CC0. In Public Domain. Digitization by eGangotri

श्री ५ महेन्द्ररत्नग्रन्थमालायां द्वितीयं पुष्पम्

स्कन्दपुराणस्य
अम्बिकाखण्डः

सम्पादकः—
पं. कृष्णप्रसादभट्टराई

प्रकाशकः—
महेन्द्रसंस्कृतविश्वविद्यालयः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सप्रेम
भट्टराई
२०८०/२/२८

श्री ५ महेन्द्ररत्नग्रन्थमालाया द्वितीयं पुष्पम्

स्कन्दपुराणस्य
अम्बिकाखण्डः

संपादकः–
पं. कृष्णप्रसादभट्टराई

प्रकाशकः–
महेन्द्रसंस्कृतविश्वविद्यालयः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

इत्थमेव कतिपये महोत्सवप्रसङ्गाश्चात्र समागच्छन्ति । तेषु शिवपार्वतीशुभविवाहमहोत्सवः, कौमुदीमहोत्सवः, तरुपुत्रमहोत्सवश्च मुख्याः सन्ति । सत्पुत्राणां शतादप्येक एव तरुपुत्रः श्रेष्ठतरोऽस्तीति जगदम्बिकया गौर्याऽनुष्ठितोऽन्तिमस्तरुपुत्रमहोत्सवस्तरूणां महत्त्वमावेदयन् तरुसंरक्षणाय वर्तमानयुगेऽपि लोकान् प्रयोजयति ।

पुराणस्यास्य साहित्यिकमैतिहासिकञ्च महत्त्वं वेविद्यते । अत्र लिङ्ग-मत्स्य-शिवमहापुराणादिभ्योऽनेकान्युदाहरणान्युद्धृतानि सन्ति । अतस्तेषां पुराणानां रचनाऽम्बिकाखण्डरचनातः पूर्वं जातेति प्रमाणीभवति । इत्यादिकमस्यैतिहासिकं महत्त्वम् । पीयूषनिष्यन्दमधुराणां रचनानां निकेतत्वादस्य साहित्यिकं मूल्यं तु स्वतः सिद्ध्यति ।

अन्ते चास्माकं पाशुपतक्षेत्रनेपालात् पशुपतिमहिमपुण्यस्य प्रस्तुतपुराणस्य प्रकाशनं महत्सौभाग्यं पुण्यमयं कार्यञ्चेति विचिन्त्यास्माभिरस्मद्ग्रन्थमालायां द्वितीयपुष्पत्वेनेदं देशनरेशसेवायां श्रीपशुपतिनाथचरणयोः समर्पितमिति शम् ।

२०४५ वैक्रमाब्दे पौषमासस्य
प्रथमे दिवसे

प्रा. डा. हरिदेवमिश्रः
महेन्द्रसंस्कृतविश्वविद्यालयस्योपकुलपतिः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विषयसूची

१	प्रस्तावना	१
२	आदर्शपत्राणि	५५
३	द्वितीयाध्यायोद्दिष्टा विषयाः	१
४	विषयाणामनुक्रमणिका	३
५	प्रकृतो ग्रन्थः (स्कन्दपुराणम्)	१
६	परिशिष्टम्	१

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रस्तावना

पुराणम्

अत्र तावत् केचिदित्थं पुराणनिर्वचनं कुर्वन्ति१ ----

पुराणमिति - "पुराभवं पुराणम् इति" । अयमाशयः- पुराणशब्दे तावद् द्वावंशौ । एकः 'पुरा' इति, अन्यश्च 'अण' इति, 'ण' इति वा । तत्र तुदादिगणपठितादग्रगमनार्थकात् परस्मैपदिनः पुरधातोः पुरतीति कर्त्रर्थे बाहुलक 'का' प्रत्यये 'पुरा' इति निष्पद्यते । पुराशब्दार्थश्च -

'स्यात् प्रबन्धे चिरातीते निकटागामिके पुरा ।।२५३।। (अमर नानार्थवर्गः)

इत्यदितोवसीयमानोतीतानागतादिः । ततश्च तस्मादतीतानागताद्यर्थकात् पुराशब्दादव्ययाद्भवाद्यर्थे 'सायं चिरं प्रह्णे प्रगेऽव्ययेभ्यष्ट्युटचुलौ तुट्चे, ति (पा. अ. ४। ३।२३) सूत्रेण तुडागमं विनाकृते शैषिके टचुप्रत्यये ट्युलि वा 'पुराणशब्दो' निष्पद्यते । तत्र तुडभावश्च **'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेने'** ति (२।१।४९) सूत्र निपातनात् कल्प्यत इति ।

'यद्वा 'पुरापि नवं पुरणम् ।' **'पुराणप्रोक्तेषु ब्राह्मणकल्पेष्वि' ति(४/ ३/ १०५) सूत्रे निपातितमि' ति ।** 'यद्वा 'पुरा अतीतानागतावर्थौ 'अणती' ति (अनतीति वा) । पुराशब्दोपपदाद् भ्वादिगणपठितात् शब्दार्थकात् परस्मैपदिनः 'अण' धातोः पचाद्यचि (उपपदसमासतो) निष्पन्नः पुराणशब्द इति ।

'यद्वा 'पुरा' नीयते इति' । (पुरा) +नी +ड, णत्वं चेति, ।

तदेवं तत्र तत्र नैकधा व्युत्पाद्यमानोप्ययं 'पुराण'शब्दः **प्रकृतेऽनादिवाङ्मयप्रवाह** परंपराप्राप्तस्वनामख्यातपुरातनग्रन्थविशेषे (षु) रूढ इति योगरूढोयं पुराणशब्दः ।

किंवान्यत्र प्रत्नत्वाद्यर्थान्तरपरस्यास्य पुराणशब्दस्योक्तरीत्या यौगिकत्वस्वीकारेपि प्रकृते ग्रन्यविशेषपरस्यास्य **रूढत्वमेव** केवलं प्रकल्प्यमिति ।

ब्रह्माण्डे तु पुनरन्यथैवैतद् व्युत्पादितम्, । यथा-

'यस्मात् पुरा ह्यनक्तीदं पुराणं तेन तत् स्मृतम् ।

निरुक्तमस्य यो वेद (सर्वपापैः प्रमुच्यपे ।।३।। इति (प्रक्रिया पा. अ. १) ।

१ अमरस्य नामलिङ्गानुशासने पुराण शब्द व्याख्याने भानुजीदीक्षिताः पुराण शब्द व्याख्या प्रसङ्गे शब्दकल्पद्रुमकाराश्च ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अत्र हि 'पुरा अनक्तीति पुराण' मित्युक्तम् । तत्र 'अनक्ती'ति पदं प्रकृते दुरूहमिव । यद्यप्यत्र 'अनक्ती' त्येतद् रुधादौ पठितस्य श्रविकरणस्य 'अञ्जूव्रातोर्लटि' रूपं प्रसिद्धम्, तथापि पुराशब्दे एतस्य योजनेन 'पुराण' शब्दव्युत्पादनमसुकरमिव । तस्मात् तादृशावयवावयविभावकल्पनां विनैव पुराणशब्दस्य पाणिनिसूत्रे इवात्रापि सिद्धवत्प्रयोगरूपं निपातनं प्रकल्प्य तस्य प्रकृते रूढत्वाङ्गीकारे न काप्यनुपपत्तिरिति । किंच पुनरत्रोदाहृतस्य यस्मात्पुराह्यनक्तीद' 'मित्यस्य स्थाने 'यस्मात्पुरा ह्यभूच्चैत, दिति पाठान्तरस्याप्युपलम्भात् 'पुराभवं पुराण'मिति प्राक्प्रदर्शिता व्युत्पत्तिरपि साधीयस्येवेत्यलमेतावता (अनक्तिपदार्थ) प्रपञ्चेनेति ।

वस्तुत आर्षप्रयोगस्याननुयोज्यत्वात् पौराणिकीयं निरुक्तिरार्थी न तु शाब्दीति यथाश्रुत एव कथंचित् समाधानमन्विष्यमिति । तदर्थमेव चोक्तं तत्रैवोत्तरार्धेन 'निरुक्तमस्य यो वेदे' ति ।

अत्रेदमपि तावत् प्रसङ्गाज् ज्ञातव्यं भवति यत्- पुरणशब्दः परमात्मपरोपि तत्र तत्र श्रूयते शास्त्रेष्विति । यथा -

"अजो नित्यः शाश्वतोयं पुराणः ।।१८।।"

"गुहाहितं गह्वरेष्ठं पुराणम् ।।१२।।" - कठोप. अ. १७ व. २,

"वेदाहमेतमजरं पुराणम् ।।२१।।" - श्वेताश्वतर. अ. ३,

"कविं पुराणमनुशासितारम् ।।९।।" - श्रीमद्भगवद्गीता अ. ८ । इत्यादि।।

परं तत्र परमात्मपरः पुराणशब्दो विशेष्यवाची वा स्याद् बिशेषणवाची वा प्रायः पुंल्लिङ्गेर्वतते । प्रकृते ग्रन्थविशेषपरस्तु प्रायः क्लीब इति । अर्थान्तरपरस्य तु पुराणशब्दस्य नात्रापेक्षेत्यतिरोहितमेवैतदिति ।

तत् किंतावदेतत् पुराणं नाम । ब्रह्मणोवक्त्राद् विनिःसृतः स्वनामख्यातः पुरातनशास्त्रविशेषः पुराणमिति । तदुक्तं वृहदारण्यके (२।४) -

"एवं वा अरे अस्य महतो भूतस्य निःश्वसितमेतद् यद् –
(ऋग्वेदो यजुर्वेदः सामवेदोथर्वाङ्गिरस इतिहासः) पुराण" मिति ।।१०।।

(-शतपथ. १४।५।४)

महतो भूतस्येति ब्रह्मणःसमाख्या । निर्गुणस्यैव सगुणरूपेण व्यक्तिमापन्नस्येति । निःश्वसितमिव निःश्वसितम् । ब्रह्मणः परमात्मतादात्म्यतयोपदेश इति । यदुक्तं श्रीमद्भागवते -

'योध्यात्मिकोयं पुरुषः सोसावेवाधिदैविकः ।' इति (स्क. २, अ. १०),

तथा अथर्ववेदेपि ।

'ऋचः सामानि छन्दांसि पुराणं यजुषा सह ।

उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिवि श्रिताः ।।' इति (११।७।२४)!

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

उच्छिष्टादिति ब्रह्मण एव । उच्छिष्टोवशिष्टः कल्पान्ते सर्वशेषतयावस्थितो ब्रह्मा, तस्मादिति । अथवा 'उच्छिष्ट' उच्छेष, उद्‌गार इवेति तस्यैव । तस्मादिति, तदेवेति वा । अभेदवचनमिति ।

अयं भावः- कल्पान्ते स्वसृष्टं जगत् सर्वं स्वस्मिन् समाहृत्य - वाङ्मयजातं स्वान्तरात्मनि प्रविलाप्य प्रसुप्तस्य निशावसाने कल्पादौ पुनः प्रबुद्धस्य ब्रह्मणो वक्त्रादयत्नादेव निःश्वसितमिव स्वतो यथापूर्वं यथानुपूर्वीकं त्रय्यादि वाङ्मयजातमखिलं प्रवर्तते लोकस्येव सुप्तोत्थितस्य व्यवहारो दैनन्दिन इति ।

अथवा जन्मान्तरीयसंस्कारवशादनादिवासनावशात्स्वेच्छावशात्स्वेच्छयैव वा स्वहृदि चिरविरूढं वाङ्मयजातमादिकल्पे जातमात्रस्य ब्रह्मणो वक्त्राद् (वक्त्रेभ्यः) युगपदेव विनिःसृतं निःश्वासरूपेण क्रन्दितमिव बालस्य लोके जातमात्रस्येति ।

यदुक्तं मार्कण्डेये-

"उत्पन्नमात्रस्य पुरा ब्रह्मणोव्यक्तजन्मनः ।

पुराणमेतद्वेदाश्च मुखेभ्योनु विनिः सृताः" इति (४५/२०) ।

एतदिति पुराणमात्रस्योपलक्षणम् । वेदा विनिःसृतास्तदनु पुराणं विनिःसृतमिति व्युत्क्रमेणान्वयः । अथवा पुराणं विनिःसृतं तदनु वेदा विनिःसृता इति यथास्वमेवान्वयः, अन्यत्रापि तथा दर्शनात् ।

तथाहि मात्स्ये ५३ तमाध्यये ब्रह्माण्डे च-

'पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।

अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः, ।।इति।। (१३)

प्रशंसातिशयपरं वैतद् वचनम् । अन्यत्र प्रायः सर्वत्र वेदानामेव प्रथमतो निदर्शनात् । प्रशंसास्थानं च वेदसहजातमिति, वेदस्थानीयमिति, वेदार्थोपबृंहकमिति, वेदार्थोपवर्णनमिति, वेदार्थप्रतिपादकमिति, वेदोपाङ्गमिति वा सर्वमेव वा । उदाहरिष्यते चैतदधस्तात् पश्चादपि सत्यवसर इति ।

इदमत्र तात्पर्यम्- द्वे खलु विधे सृष्टिलययोः । एका क्रमपूर्विका क्रमविहिता क्रमिकी, अन्या च समूहरूपा सामुदायिकीति । तत्र प्रथमे कल्पे गर्भ एव सतस्ततो जातमात्रस्य वा हिरण्यगर्भस्य ब्रह्मणश्चित्तभित्तौ परचित्प्रकाशप्रतिबिम्बात्मा बिन्दुस्ततः शब्दब्रह्ममयो नादस्ततस्त्र्यक्षरात्मनाव्यक्तरूपेण मुखादितो विनिःसृतो वैखरीभावमापन्नः सार्धत्रिमात्रस्त्रिवृदोङ्कारस्तस्माद् व्याहृतित्रयं तस्मात् त्रिपाद् गायत्री ततः साङ्गोपाङ्गा सरहस्या त्रयीति क्रमसृष्टिर्वाङ्मयस्य । यदुक्तं श्रीमद्भागवते-

"समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः ।

हृद्याकाशादभून्नादः . . . . . ." ।।३७।।

'ततोऽभूत्त्रिवृदोङ्कारो योऽव्यक्तप्रभवः स्वराट् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यत्तल्लिङ्गं भगवतो ब्रह्मणः परमात्मनः ।।३९।।

'स सर्वमन्त्रोपनिषद्वेदबीजं सनातनम् ।।४१।।

ततोक्षरसमाम्नायमसृजद् भगवानजः ।।४३।।

तेनासौ चतुरो वेदाँश्चतुर्भिवर्दनैर्विभुः ।।

सव्याहृतिकान् सोङ्कारान् चातुर्होत्रविवक्षया' ।।४४।। इति (स्कं. १२, अ.६)

तथा च श्रुतिरपि -

"स एव प्रजपतिरभवत् ।।५।। सोयं पुरुषः प्रजापतिरकमायत भूयान्स्यां प्रजायेयेति । सोश्राम्यत् । स तपोतप्यत । स श्रान्तस्तेपानो ब्रह्मैव प्रथममसृजत त्रयीमेव विद्याम् . . सर्वस्य प्रतिष्ठेति" ।।८।। शतपथका. ६।१/१ ।

स इति परमात्मा । सोयमिति निर्गुणः परमात्मैव सगुणरूपमापन्नः परमेष्ठीति । ब्रह्मैवेति नादब्रह्मैव प्रथममसृजतेति । अथवा ब्रह्मेति वेदान् । नादादिक्रमेण प्रथमं वेदानेवासृजतेति ।

स्थलान्तरे तु हिरण्यगर्भस्यैव शब्दब्रह्मत्वमप्युक्तं तत्र । यथा तृतीयस्कन्धे–

'पूर्वस्यादौ परार्धस्य ब्राह्मो नाम महानभूत् ।

कल्पो यत्राभवद् ब्रह्मा शब्दब्रह्मेति यं विदुः" ।।३४।। (अ. ११)

एवं–

"शब्दब्रह्मात्मनतस्य व्यक्ताव्यक्तात्मनः परः ।।

ब्रह्मावभाति विततो ननाशक्त्युपबृंहितः" ।।४८।। इति (अ. १२) ।

तथा–

"ब्रह्मणा वाव सर्वे वेदा महीयन्ते" । मुंडको. (१-१) ।

"ब्रह्मा देवानां प्रथमः संबभूव" । तेनैव सर्वे वेदा महीयन्त इति ।

तदेतत् प्राय आदिकल्पाभिप्रायेण । अनन्तरकल्पेषु तु सुप्तोत्थितस्य ब्रह्मणो वक्त्रात् पूर्वत एवाव्यक्तरूपेण हृद्यवस्थितं (स्मृतमात्रं) सर्वं वाङ्मयं समुदायात्मना युगपदेव यथापूर्वं वहिर्निःसरति क्रमनिरपेक्षं, गर्भस्थो बाल इव संपूर्णाङ्गः प्राप्तकाल इति ।

यथोक्तं श्रीमद्भागवते एव तृतीयस्कन्धे द्वादशाध्याये –

'कदाचिद् ध्यायत स्रष्टुर्वेदा आसंश्चतुर्मुखात् ।।

कथं स्रक्ष्याम्यहं लोकान् समवेतान् यथा पुरा' ।।३४।। इति

कदाचिदिति कल्पादौ । समवेतानिति सामुदायिकसृष्ट्यभिप्रायेण । यथा पुरेति च पूर्वकल्पाभिप्रायेणेति

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तथा-

"ऋग्यजुः सामाथर्वाख्यान् वेदान् पूर्वादिभिर्मुखैः ।।३७।।

इतिहासपुराणानि पंचमं वेदमीश्वरः" ।।

सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः" ।।३९।। इति च ।

सर्वेभ्यो वक्त्रेभ्य इति पुराणेतिहासाना सर्ववेदार्थसारसंग्रहात्मकत्वेन वेदसामान्यरूपत्वोपपादनार्थम् । इतिहासपुराणानां समष्टयात्मनां सर्ववेदार्थोपवर्णकत्वाद् वेदत्वमित्यत उक्तम् –

'पंचमं वेदमीश्वर' इति ।

तदित्थमिनिहासपुराणानामृगादिभिः सह वेदत्वेनोल्लेखोन्यत्रापि दृश्यते । यथा-

"ऋग्वेदं भगवोध्येमि यजुर्वेदं सामवेदमाथर्वणम् ।

इतिहासपुराणं पंचमं वेदानां वेदमिति" ।।२।। छान्दोग्य अ. ७, ख. १

"विज्ञानेन वा ऋग्वेदं विजानामि यजुर्वेदम् . . .

इतिहासपुराणं पंचमं वेदानां वेदमिति" ।। – तत्रैव ७।७।१

"ऋग्वेदो यजुर्वेदः सामवेद आथर्वणश्चतुर्थः,

इतिहासपुराणः पंचमो वेदानां वेदः" ।। इति तत्रैव ७।१।४

"ते वा खल्वेते थर्वाङ्गिरसमभ्यवदन् इतिहासपुराण पंचमो वेदानां वेदा "इति । – न्या. सू. भाष्ये 'पात्रचयान्तानुपपत्तेश्चेति' सूत्रव्याख्यानावसरे वात्स्यायनेनोद्धृता छान्दोग्यश्रुतिः ।

'ते वा एतेथर्वाङ्गिरस एतदितिहासपुराणमभ्यतपंस्तस्याभितप्तस्य

यशस्तेज इन्द्रियं वीर्यमन्नाद्यं रसो जायत' । इति तु छा. ३।४।२

शतपथेपि (अश्वमेधकाण्डे) ऋगाद्यनन्तरम् 'अथ नवमेह' न्नित्युपक्रम्य-

"तानुपदिशति पुराणं वेदः सोयमिति किंचित्पुराणमाचक्षीते" त्यादि ।। १३ । ४ । ३ । १३

श्रीमद्भागवतेपि –

"ऋग्यजुः सामार्थर्वाख्या वेदाश्चत्वार उद्धृताः ।।

इतिहासपुराणं च पंचमो वेद उच्यते" ।।२०।। इति (प्र. अ. ४) ।

इत्थमितिहासपुराणानां वेदत्वेनाभिधानं च तेषां सकलवेदार्थसारोद्धाररूपत्वादित्यप्युक्तं तत्रैव । यथा-

"इदं भागवतं नाम पुराणं ब्रह्मसंमितम् ।

सर्ववेदेतिहासानां सारं सारं समुद्धृत' मिति ।।४२।। (१।३)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

भागवतमित्युपलक्षणं, पुराणमात्रस्य तथात्वादिति । वेदेष्वनधिकारिणां कृते वेदार्थोपवर्णनायेतिहासपुराणानां लोके प्रवृत्तिश्रवणात् । यथा श्रीमद्भागवत एव-

"स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ।
इति भारतमाख्यानं कृपया मुनिना कृत" मिति ।। (१।४।२५ ।

भारतमिति पुराणास्याप्युपलक्षणम् । यथोक्तं देवीभागवते –

"स्त्रीशूद्रद्विजबन्धूनां न वेदश्रवणं मतम् ।
तेषामेव हितार्थाय पुराणानि कृतानि चे" ति ।।२१।। (१ ।३ २१) ।

स्कान्देपि मानसखण्डे –

'व्रात्यानां द्विजबन्धूनां वेदेष्वनधिकारिणाम् ।
स्त्रीणां दुर्मेधसां नृणां धर्मज्ञानं कथं भवेत् ।।
विचार्यैतत्तु मनसा भगवान् बादरायणः ।
पुराणसंहितां दध्यौ तेषां धर्मविधित्सये' ति ।।१५-१६।। (दे. भा. मा.) ।

दध्यौ चिन्तितवान् स्मृतवान्, स्मृत्वा च कथितवान् ग्रथितवांश्चेति ।

मात्स्येपि –

'इहलोकहितार्थाय संक्षिप्तं परमर्षिणे' ति ।। (अ. ३.) ।

तदेतत् पंचमवेदरूपं पुराणं पंचलक्षणमाचक्षते-

'पुराणं पंचलक्षण' मिति ।

पंच (सर्गादीनि) लक्षणानि प्रतिपाद्यानि (प्रतिपाद्यविषया) यस्येति यत्रेति वा ।

यथा –

'सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चैव पुराणं पंचलक्षण' मिति ।।

क्वचिच्च पुराणं दशलक्षणमाख्यायते, यथा श्रीमद्भागवते –

'पुराणलक्षणं ब्रह्मन् ब्रह्मर्षिभिर्निरूपितम् ।
शृणुष्व बुद्धिमाश्रित्य वेदशास्त्रानुसारतः ।।८।।' इत्युपक्रम्य–
सर्गोस्याथ विसर्गश्च वृत्ती रक्षान्तराणि च ।
वंशो वंशानुचरितं संस्था हेतुरपाश्रयः ।।९।।
दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदु' रिति ।। – (१२।६) ।

लक्ष्यते (पुराणम्) एभिरिति लक्षणानि, दश (सर्गादीन्येव) लक्षणानि यस्य यत्र वा तत् पुराणमिति ।

तदनन्तरं च –

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

'केचित् पंचविधं ब्रह्मन् महदल्पव्यवस्थया' ।।१०।।, इत्यपि तत्रैव ।

पंचविधमिति पंचलक्षणम् । महदल्पव्यवस्थयेति यथास्वं महापुराणाल्पपुराणयोर्व्यवस्थयेति (वक्ष्यामः) । दशानां सर्गादिनां विवरणान्यपि तत्रैव' यथा –

''अव्याकृत्तगुणक्षोभान्महतस्त्रिवृतोहमः ।
भूतमात्रेन्द्रियार्थानां सम्भवः 'सर्ग' उच्यते ।।११।।
पुरुषानुगृहीतानामेतेषां वासनामयः ।
'विसर्गो'ऽयं समाहारो बीजाद् बीजं चराचरम् ।।१२।।
'वृत्ति' र्भूतानि भूतानां चरणामचराणि च ।
कृता स्वेन नृणां तत्र कामाच्चोदनयापिवा ।।१३।।
'रक्षा' च्युतावतारेण विश्वस्यानु युगे युगे ।।
तिर्यङमर्त्यर्षिदेवेषु हन्यन्ते यैस्त्रयीद्विषः ।।१४।।
'मन्वन्तरं' मनुर्देवा मनुपुत्राः सुरेश्वरः ।।
ऋषयोंशावतारश्च हरेः षड्विधमुच्यते ।।१५।।
राज्ञां ब्रह्मप्रसूतानां 'वंश' स्त्रैकालिकोन्वयः ।।
'वंशानुचरितं' तेषां वृत्तं वंशधराश्च ये ।।१६।।
नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः ।।
'संस्थे'ति कविभिः प्रोक्ता चतुर्धास्य स्वभावतः ।।१७।।
'हेतु' र्जीवस्य सर्गादेरविद्याकर्मकारकः ।।
यं चानुशयिनं प्राहु रव्याकृतमुतापरे ।।१८।।
व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु ।।
मायामयेषु तद् ब्रह्म जीववृत्ति 'व्यपाश्रयः' ।।१९।।' इति (१२।७) ।

अन्यच्च पुनस्तत्रैव - द्वितीयस्कन्धे–

'तस्मा इदं भागवतं पुराणं दशलक्षणम् ।।
प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत् ।।४३।।' इति (अ. ९) ।

भागवतमधिकृत्य परस्ताद् दश लक्षणान्युक्तानि तत्रैव, यथा–

'अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।।
मन्वन्तरेशानुकथानिरोधो मुक्तिराश्रयः ।।१।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् ।।
वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा ।।३।।' इति (अ. १०) ।

तदनन्तरं तेषां विवरणान्यपि तत्रैव, यथा–

'भूतमात्रेन्द्रियधियां जन्म 'सर्ग' उदाहृतः ।।
ब्रह्मणो गुणवैषम्याद् 'विसर्गः' पौरुषः स्मृतः ।।३।।
'स्थिति' र्वैकुण्ठविजयः 'पोषणं' तदनुग्रहः ।।
मन्वन्तराणि' सद्धर्म 'ऊतयः' कर्मवासनाः ।।४।।
अवतारानुचरितं हरेश्चास्यानुवर्तिनाम् ।।
पुंसा 'मीशकथाः' प्रोक्ता नानाख्यानोपवर्णिताः ।।५।।
'निरोधो'ऽस्यानुशयनमात्मनः सह शक्तिभिः ।।
'मुक्ति' र्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः ।।६।।
आभासश्च निरोधश्च यतश्चाध्यवसीयते ।।
स 'आश्रयः' परं ब्रह्म परमात्मेति शब्द्यते' ।।७।। इति (१०) ।

देवीभागवते तु पुनः सूतशौनकसंवादमुखेन प्रसंगात् प्रारम्भ एव–

'अष्टादशपुराणानि कृष्णेन मुनिनानघ ।।
कथितानि सुदिव्यानि पठितानि त्वयानघ ।।३।।
पंचलक्षणयुक्तानि सरहस्यानि मानद ।।
त्वया ज्ञातानि सर्वाणि व्यासात् सत्यवतीसुतात् ।।४।।' इति (१।१) ।

एवं –

'तथैव च पुराणानि त्रिगुणानि कथानकैः ।।
कथितानि त्वया सौम्य पंचलक्षणवन्ति च ।।' १।१।१५),

तथा –

'पंचलक्षणयुक्तानि भवन्ति मुनिसत्तमाः' ।।' (१।१।३५),

इत्यादिना विशेषेणैव पुराणानां पंचलक्षणत्वं सूचितम् ।

तथैव स्कान्दे प्रभासखण्डेऽपि –

'पंचाङ्गानि पुराणस्य चाख्यानमितरत् स्मृतम् ।।'इत्युपक्रम्य –
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।।
वंशानुचरितं चैव पुराणं पंचलक्षणम् ।।८४।।' (अ. २) – इत्युक्तम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

(यद्यप्येतत् तत्रोपपुराणविवरणप्रसंगे उक्तम्, तथापि न ततःकश्चिद् विशेषः स्फुटीभवतीति ।)

इत्थं पुराणानां क्वचित् पंचलक्षणत्वमुक्तं क्वचिच्च दशलक्षणत्वम् । तनश्च पुराणं किं पंचलक्षणमाहोस्विद् दशलक्षणमिति विजिज्ञासा स्वाभाविकीति । तत्र पुराणानां दशलक्षणत्वपक्ष एव मुख्यतयाभिप्रेतः श्रीमद्भागवते । यथा-

'दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदु' रिति ।। - (१२।६।१०) ।

तद्विदः पुराणविदः पूर्वे पुराणाचार्या महर्षयः दशभिर्लक्षणैः सर्गादिभिः सपद्युक्तैर्युक्तं पुराणं विदुः । पुराणं पुराणसामान्यं (महदल्पत्वाविशेषेण पुराणमात्रं दशलक्षणं विदुरिति । पुराणं दशलणमित्यर्थ इति ।

तथा (च)-

'एवं लक्षणलक्ष्याणि पुराणानि पुराविदः ।

मुनयोष्टादश प्राहुः क्षुल्लकानि महान्ति च ।।' इति (१२।७।२३) ।

एवंलक्षणैः सपद्युक्तैर्दशभिर्लक्ष्याणि । पुराविदः पुराणविदः पूर्वे आचार्या महर्षयः । क्षुल्लकानि अल्पानि पुराणानि - उपपुराणानि, महान्ति पुराणानि महापुराणानि च । अष्टादशेति पुराणसंख्यानिर्देशः । तस्य चोभयत्रान्वयः । महापुराणन्यष्टादश, उपपुराणानि चाष्टादशैवेति । एवं च दशलक्षणानि पुराणानि, (तानि च) द्विधा विभक्तानीति ।

अयं भावः- उपर्युदाहृते पूर्वस्मिन् पद्यार्धे ऽविशेषेण पुराणमात्रस्य दशलक्षणत्वमुक्तम् । उत्तरस्मिन् पद्ये पुनस्तेषां महदल्पत्वव्यवस्थया द्वैधा विभागनिदर्शनपुरस्सरं संख्यानिर्देशोपि कृत इति । उभयत्र पुराविदामुल्लेखश्चोक्तेर्थे आदरातिशयद्योतनार्थं इति ।

एतावता पुराणानि, दशलक्षणानि तानि च महापुराणान्युपपुराणानि चेति द्विविधानि । द्विविधान्यपि तानि गणनायामष्टादश संख्याकानीति श्रीमद्भागवतसंमतः पुराणानां दशलक्षणत्वपक्ष एकः, श्रीमद्भागवतस्य मुख्यः पक्ष इति ।

पक्षान्तरे - **'दशभिर्लक्षणैर्युक्त'** मित्यादिना दशलक्षणत्वप्रतिपादनसमनंतरमेव तत्र केचिदित्यादिना मतान्तरत्वेन पंचलक्षणत्वमपि निर्दशितं पुराणानाम् । यथा -

'केचित् पंचविधं ब्रह्मन् महदल्पव्यवस्थया ।।' इति (१२।६।१०) (प्रागुदाहृतम्) केचिदन्ये आचार्याः पुराणविदो महर्षय एव महदल्पव्यवस्थया महापुराणोपपुराणव्यवस्थया पंचलक्षणं पुराणं पंचलक्षणमिति पुराणानां पंचलक्षणत्वमाहुरिति । तत्र केचिदेके पुराणं दशलक्षणं केचिदन्ये पंचलक्षणमाहुः, । तथा च विकल्पः प्राप्त; इत्थं विकल्पसंभावनायां महदल्पव्यवस्थया - महापुराणानि दशलक्षणानि, अल्पपुराणानि तु पंचलक्षणानीति व्यवस्थां व्यवस्थितविभाषामाहुरित्यन्यः पक्षः (श्री मद्भागवतमते गौणः) केचिदितिपदेन द्योत्यत इति । तत्र अल्पपुराणानीति 'उपपुराणानि' अभिप्रेतानि ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ब्रह्मवैवर्ते तु **'पुराणं पंचलक्षण'** मिति पंचलक्षणत्वमुपपुराणानाम् । महापुराणानां तु दशलक्षणत्वमिति स्पष्टमेव प्रतिपादितम् । यथा कृष्णजन्मखण्डे –

'सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं विप्र पुराणं पंचलक्षणम् ।।६।।' (अ १३१)

इत्युक्त्वा तत्समनन्तरमेव च पुनः –

'एतद्ध्युपपुराणानां लक्षणं च विदुर्बुधाः ।।' इत्युक्तम् ।

अत्र पूर्वं सहसैव **'पुराणं पंचलक्षण'** मित्युक्तम्, तत्र पुराणमात्रस्य पंचलक्षणत्वमाशङ्क्येतेत्यञ्जसा तत्परिहारार्थमेतदिति । पुराणं पंचलक्षणमिति यदेतदुक्तमुच्यते वा तत् (सर्गादिपंचकम्) उपपुराणानां लक्षणमिति (न तु महापुराणानामपीति) । महापुराणानां तु पुनस्तत्रैव –

'महतां च पुराणानां लक्षणं कथयामि ते ।।७।।' इत्युपक्रम्य–
'सृष्टिश्चापि विसृष्टिश्च स्थितिस्तेषां च पालनम् ।।
कर्मणां वासना वार्ता मनूनां च क्रमेण च ।।८।।
वर्णनं प्रलयानां च मोक्षस्य च निरूपणम् ।।
उत्कीर्तनं हरेरेवं देवानां च पृथक् पृथक् ।।९।।
दशाधिकं लक्षणं च महतां परिकीर्तितम् ।।' इत्युक्तम् ।

दशाधिकं लक्षणं दशलक्षणम् । यथोक्तं दशलक्षणम् । तत् महतां पुराणानां परिकीर्तितम् । महापुराणानि दशलक्षणानीति । (अत्र च लक्षणमिति प्रतिपाद्यविषयजातं मन्तव्यमिति) ।

एवम्–

'अष्टादश पुराणानामेवमेव विदुर्बुधाः ।।
एवं चोपपुराणानामष्टादश प्रकीर्तिताः ।।२२।।' इति च तत्रैव ।

अष्टादशमहापुराणानामेवमष्टादशोपपुराणानां चैवमेव लक्षणं व्यवस्थां वा विदुरिति ।

इत्थं श्रीमद्भागवतं ब्रह्मवैवर्त्तं च विहायान्यत्र प्रायः सर्वत्र पुराणानां मुख्यतः पंचलक्षणत्वमेवाभिमतमिति । एतावता पुराणानां लक्षणं संख्या च विनिर्दिष्टा । परंतु नैतावन्मात्रं पर्याप्तमिव पुराणानां स्वरूपनिरूपणे । इतोप्यधिकं सर्वातिशायी किल तावन्महिमा शास्त्रेषु श्रूयते पुराणानाम् । यथा-

नारदीये-

'शृणु वत्स प्रवक्ष्यामि पुराणानां समुच्चयम् ।
यस्मिन् ज्ञाते भवेज्ज्ञातं वाङमयं सचराचरम् ।।' (१।९२।२१)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तथा–

पुराणाख्यानकं विप्र नानाकल्पसमुद्भवम् ।
नानाकथासमायुक्तमद्भुतं बहुविस्तरम् ।।' (अ. ९३)

तथा-

'यस्मिन् श्रुते श्रुतं सर्वं ज्ञाते ज्ञातं कृते कृतम्।
वर्णाश्रमाचारधर्मं साक्षात्कारत्वमेति च ।।' इति च तत्रैव ।

स्कान्दे (रेवाखण्डे) -

'श्रुतिस्मृती ह्युभे नेत्रे पुराणं हृदयं स्मृतम् ।
एतत्त्रयोक्त एव स्याद्धर्मो नान्यत्र कुत्रचित् ।।'

तथा-

'श्रुतिस्मृतिपुराणानि विदुषां लोचनत्रयम् ।
यस्त्रिभिर्नयनैः पश्येत् सोंशो माहेश्वरो मतः ।।' (१।६६।,

तथा–

'यच्च दृष्टं हि वेदेषु तद् दृष्टं स्मृतिभिः किल ।
उभाभ्यां यत्तु दृष्टं हि तत् पुराणेषु गीयते ।।' इति च ।

तथा च नारदीये (अ. ९३) स्कान्दे (रेवाखण्डे अ. १) पाद्मे (सृष्टि खण्डे अ.१) च –

प्रवृत्तिः सर्वशास्त्राणां पुराणादभवत्ततः ।।' इति ।

अत एव चोच्यते –

'पुराणं सर्वशास्त्राणामाधारोयं सनातनः ।
यदाश्रित्य प्रवर्तन्ते लोके शास्त्राणि यान्युत ।।'

तथा च–

'पुराणं सर्वधर्माणां निधानं बीजमव्ययम् ।
यदाश्रित्य क्रियाः सर्वाः प्रवर्तन्तेत्र देहिनाम् ।।'

अपि च –

'यदत्र लोके वेदे च यद्वा नान्यत्र कुत्रचित् ।
तत्सर्वं हि पुराणेषु समाम्नातं महर्षिभिः ।।'

तथा–

'आश्चर्यमेतद्यत् सर्वं पुराणैर्विषयीकृतम् ।
अनादित्वात् पुराणस्यातीतानागतवाचिनः ।।'

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ततश्च –

'पुराणस्य समुद्देशः प्रायः सर्वत्र दृश्यते ।
न किंचिदस्ति तच्छास्त्रं यत्रैतन्नानुकीर्त्यते ।।' इति ।

तद् यथा (छान्दोग्ये) –

'अथर्वाङ्गिरस एव मधुकृत इतिहासपुराणं पुष्पम्' । इति (३।४।२)

पुष्पादिवेतिहासपुराणादमृतरसपलोपलब्धेर्वचनमिदमिति, यदुदाहृतं प्रागपि तत्रैव (३।२)

पुराणस्य माङ्गलिकत्वं यथाश्वलायनगृह्ये –

'आयुष्मतां कथाः कीर्तयन्तो माङ्गल्यानीतिहासपुराणनीत्याख्यायमाना' इति । (४।६)

चतुर्दशविद्यास्वन्यतमत्वं पुराणस्य यथा (विष्णुपुराणे) –

'अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश ।।' इति ।

धर्मस्थानत्वं च यथा (याज्ञवल्क्ये)–

'पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ।।' इति (आचा. १०१) ।

ब्रह्मयज्ञादावुपयोज्यत्वं पुराणानां यथा (तत्रैव) -

'वेदाथर्वपुराणानि सेतिहासानि शक्तितः ।
जपयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपे' दिति ।।१३१।।

तथा –

'वाकोवाक्यं पुराणं च नाराशंसीश्च गाथिकाः ।
इतिहासांस्तथा विद्याः शक्त्याधीते हि योन्वहम् ।।' इत्यादि (तत्रैव) ।

कात्यायनः–

'वाकोवाक्यं पुराणानि इतिहासानि चान्वहम् ।' (पठेदिति) ।

व्यासः–

'इतिहासपुराणानां वेदोपनिषदां द्विजः ।
शक्त्या सम्यक् पठेन्नित्यमल्पमप्यासमापना' दिति ।।

मनुः–

'स्वाध्यायं श्रावयेत् पित्रे धर्मशास्त्राणि चैव हि ।
आख्यानानीतिहासांश्च पुराणान्यखिलानि च ।।' इति । (३।२१२) ।

– पित्रे श्राद्धादाविति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शतपथब्राह्मणे –

'तस्मात् स्वध्यायोध्येतव्यः ।।३।। पय आहुतयो वा एता देवानां यदृचः ।

स य एवं विद्वानृचोहरहः स्वाध्यायमधीते . . . . . ।।४।।'

इत्याद्युपक्रम्य –

'मध्याहुतयो ह वा एता देवानां यदनुशासनानि विद्या वाकोवाक्यमितिहासपुराणं गाथा नाराशंसीरित्यहरहः स्वाध्यायमधीते मध्वाहुतिभिरेव तद्देवाँस्तर्पयति . . . . ।।' इत्यादि (११।५।६।८, प्र. पा, ३ ।

अन्यच्च यथा तत्रैव –

'क्षीरौदनमांसौदनाभ्यां ह वा एष देवाँस्तर्पयति य एवं विद्वान् वाकोवाक्यमितिहासपुराणमित्यहरहः स्वाध्यायमधीते . . . . ।। इ. (११।५।७।९) प्र. पा. ४

वृहज्जावालोपनिषदि – (अर्थवादरूपेण) –

'य एवन्नित्यमधीते (स ऋचो . . . . यजूषि . . . सामानि . . .

अथर्वाङ्गिरसोधीते . . .) स पुराणान्यधीते ।।' इति ।

हयग्रीवोपनिषदि (तथैव) –

'(. . . . मन्त्रान् यो वेद) स श्रुति स्मृतीति -

हास पुराणानि वेदे' ति ।।'

वृहत्पाराशरीये –

'वैदिकं तु जपं कुर्यात् पौराणं पाञ्चरात्रक' मिति ।(अ. २) ।

तथा –

'जप्यानि ब्रह्मसूक्तानी'त्याद्युपक्रम्य –

'पौराणिकानि चान्यानि (तथा सैद्धान्तिकानि चे' ति), (तत्रैव) ।

दक्षः–

इतिहासपुराणाद्यैः षष्ठसप्तमकौ नयेत् ।' इति ।

हारीतः–

'इतिहासपुराणाभ्यां कंचित् कालं नयेद् बुधः ।' इति ।

अत्रिः–

इतिहासपुराणानि धर्मशास्त्राणि चाभ्यसेत् ।' इति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गौतमः–

'द्वौ लोके धृतव्रतौ राजा ब्राह्मणश्च बहुश्रुतः ।' इत्युपक्रम्य –

'स एष बहुश्रुतो भवति लोके वेदवेदाङ्गविद्

वाकोवाक्येतिहासपुराणकुशलः' इत्यादिः ।

तथा –

'तस्य व्यवहारो (रे) वेदा धर्मशास्त्राण्यङ्गान्युपवेदाः

पुराणं देशजातिकुलधर्माश्चाम्नायैरविरुद्धाः प्रमाण' मिति ।

महाभारतेपि (अनुशासनपर्वणि) –

'पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम् ।

आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ।।'

– (मनुस्मृतिव्याख्यायां कुल्लूकभट्टोद्धृतं पद्यम्) ।

ब्रह्माण्डेपि (प्रक्रियापादे) –

'यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः ।

न चेत् पुराणं संविद्यान्नैव स स्याद्विचक्षणः ।। इति (अ. १) ।

वसिष्ठोपि –

'बह्वीनां द्वादश ह्येव पुत्राः पुराणदृष्टाः ।'

इति धर्मव्यवहारनिर्णये पुराणं निदर्शयन् दृष्टः । 'सेयंप्रतिष्ठा पुराणानामिति' ।

पुराणामधिकृत्यान्यदपि वचनं यथा (महाभारत एव) –

'पुराणे हि कथा दिव्या आदिवंशाश्च धीमताम् ।

कथ्यन्ते ये पुरास्माभिः श्रुतपूर्वा पितुस्तवेति ।।' (१-५-२) ।

- सौतिं प्रति शौनकवचनम् ।

एवमेव वाल्मीकीयेपि (बालकाण्डे) –

'एतच्छ्रुत्वा रहः सूतो राजानमिदमब्रवीत् ।

श्रूयतां यत् पुरावृत्तं पुराणेषु मया श्रुत' मिति ।

दशरथसंबन्धि वृत्तान्तं पुराणेषु श्रुतपूर्वमिति तं प्रति सुमन्त्रवाक्यमेतत् ।

एतेनापि पुराणस्य सर्वतः प्राचीनत्वं सर्वमान्यत्वं च सिद्ध्यति ।

एतावता 'वेदार्थोपबृंहितसर्गादिलौकिकलौकिकविषयप्रतिपादकपुरातनसंवादरूपो ग्रंथः पुराण'मिति पुराणलक्षणमपि निर्दशितं भवतीति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तदेतत् पुराणं पूर्वं समष्ट्यात्मना शतकोटिप्रविस्तरमविभक्तमेकमेवासीत् । ततश्च तत्तत्कल्पे तत्तत्कल्पाश्रितकथामधिकृत्य तत्तद्देवतामहर्षिप्रभृतीनां परस्परसंवादरूपेण युगानुयुगमनादिपरंपरया प्रवर्तमानमेतत् प्रतिमन्वन्तरं द्वापरे द्वापरे व्यासेन लोकहितार्थाय संक्षिप्य यथादृष्टं यथाश्रुतं यथास्मृतमेव च क्वचिद्वक्तृसंबन्धं क्वचिच्छ्रोतृसंबन्धं क्वचिच्च प्रतिपाद्य (प्रधान) देवतासंबन्धं (तच्चरितसंबन्धं वा) (प्रवृत्ति) निमित्तीकृत्य तत्तन्नाम्ना महापुराणोपपुराणभेदेन नैकधा व्यस्य पृथक्पृथगष्टादशधा विभज्य स्वशिष्याय (लोमहर्षणाय) प्रतिपादितं ततश्च शिष्यपरंपरया लोके प्रवृत्त'मेकं सद्विप्रा बहुधा वदन्ती' तिवदिति । यथाह नारदीये –

'पुराणमेकमेवासीत् सर्वकल्पेषु मानद ।
चतुर्वर्गस्य बीजञ्च शतकोटिप्रविस्तरम् ।।
प्रवृत्तिः सर्वशास्त्राणां पुराणादभवत्ततः ।
कालेनाग्रहणं दृष्ट्वा पुराणस्य महामतिः ।।
हरिर्व्यासस्वरूपेण जायते च युगे युगे ।
चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा ।।
तदष्टादशधा कृत्वा भूर्लोके निर्दिशत्यपि ।
अद्यापि देवलोके तु शतकोटिप्रविस्तरम् ।।
अस्त्येव, तस्य सारस्तु चतुर्लक्षेण वर्ण्यत ।' (अ. ९३),

तथा स्कान्देपि - (पुराणानुक्रमणिकाध्यायः)।

'पुराणमेकमेवासीदस्मिन् कल्पान्तरे नृप ।
त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम् ।।
स्मृत्वा जगाद च मुनीन् प्रति देवश्चतुर्मुखः ।
प्रवृत्तिः सर्वशास्त्राणां पुराणादभवत्ततः ।।
कालेनाग्रहणं दृष्ट्वा पुराणस्य ततो नृप ।
व्यासरूपं विभुःकृत्वा समाहृत्य युगे युगे ।।
चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा ः
तदष्टादशधा कृत्वा भूर्लोकेस्मिन् प्रभाषते ।।
अद्यापि देवलोके तत् शतकोटिप्रविस्तरम् ।
तदर्थोत्र चतुर्लक्षः संक्षेपेण निवेशितः ।। इति (रे. मा. १।२३।३०)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एवं पाद्मेपि (सृष्टिखंडे)–

'पुराणमेकमेवासीत् पुरा कल्पान्तरेनघ ।
त्रिवर्गसधनं पुण्यं शतकोटिप्रविस्तरम् ।।
प्रवृत्तिः सर्वशास्त्राणां पुराणादभवत्ततः ।
कलिनाग्रहणं दृष्ट्वा पुराणस्य तदा विभुः ।।
व्यासरूपी तदा देवः संगृह्यार्थं युगे युगे ।
चतुर्लक्षप्रमाणेन द्वापरे द्वापरे प्रभुः ।।
तदष्टादशधा कृत्वा भूर्लोकेस्मिन् प्रकाशते ।' इति ।। (अ. १) ।

तथा च कदाचित् कालवशात् क्षीणं कल्पान्तेपु संहृतं विलीनं दुष्टैरपहृतं विनष्टमपि वा तद् भगवता मत्स्यादिरूपेणोद्धृत्य समाहृतं धारितं वा पुनर्ब्रह्मनुमहर्ष्यादिभ्य उपदिष्टं समयानुसारं नैकरूपेण प्रवाहपरंपरया लोके प्रचरद् बीजाङ्कुरवत् प्रवर्तते इति ।

तदप्युक्तं यथा- मात्स्ये –

'पुराणमेकमेवासीत् तदा कल्पान्तरेनघ ।।
त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम् ।।४।।
निर्दग्धेषु च लोकेषु वाजिरूपेण वै स्वयम् ।।
अङ्गानि चतुरो वेदाः पुराणं न्यायविस्तरम् ।।५।।
मीमांसा धर्मशास्त्रं च परिगृह्य मया धृतम् ।।
मत्स्यरूपेण च पुनः कल्पादावुदकार्णवे ।।६।।
अशेषमेतत् कथितमुदकान्तर्गतेन च ।।
श्रुत्वा जगाद च मुनीन् प्रति देवश्चतुर्मुखः ।।७।।
इह लोकहितार्थाय संक्षिप्तं परमर्षिणा ।।' इति (अ. ५३) ।

तदपि यस्मिन् कल्पे यद् येन यावद् यादृग् वोपदिष्टं श्रुतं वा तत्तावत्तादृक् तस्यैव नाम्ना प्रसिद्धिं गतमिति । यथोक्तं (नारदीय एव) -

'एतत् कथानकं सूत्रं वक्तुः श्रोतुः समाह्वयम् ।।' इति ।

समाह्वयमिति समाख्या। वक्तृनाम्ना श्रोतृनाम्ना वा समाख्यातमिति। वक्तृश्रोतृसमाख्यया प्रवृत्तमिति । अत एव प्रतिपुराणं वर्णनपद्धतिः क्वचित् समानापि दृश्यते, क्वचिच्च समानेपि विषये साऽसमानेवेति । तदप्युक्तं यथा लिङ्गपुराणे–

'इतिहासपुराणानि भिद्यन्ते कालगौरवादि' ति ।। (अ. ३९) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कालगौरवात् तत्तत्कल्पाश्रितकथागौरवादिति । इतिहासपुराणानीति तेषां वर्णनादिपद्धतिः, रीतिरितियावत्। आनुपूर्वीभेदोपि वा तेषां भेदे निमित्तमिति ।

यथाह 'तेन प्रोक्त' मिति (अष्टा. ४/३/१) सूत्रव्याख्यानावसरे छन्दसां नित्यानित्यत्वविवेचनप्रसङ्गे भगवान् पतञ्जलिर्महाभाष्ये–

'यद्यप्यर्थो नित्यः, या त्वसौ वर्णानुपूर्वी सा ऽ नित्या, तद्भेदाच्चैतद् भवतीति।'

तत्र कैयटोपि–

'या त्वसाविति । महाप्रलयादिषु वर्णानुपूर्वीविनाशे पुनरुत्प (न्ना) ऋषयः संस्कारातिशयाद्वेदार्थं स्मृत्वा शब्दरचनां विदधतीति । तद्भेदादानुपूर्वीभेदादित्यर्थः । ततश्च कठादयो वेदानुपूर्व्याः कर्त्तार एवेति ।'

ततश्च वेद इव पुराणेष्यानुपूर्वीभेदेन तत्कर्तृभेदेन वा काठकादिवद् ब्राह्म-पाद्मादिसमाख्याया पृथक्पृथगष्टादशपुराणानीति ।

पूर्वं भगवता ब्रह्मणे स्मारितं ब्रह्मणा महर्षिभ्यः प्रोक्तं, तदेव पश्चाद् द्वापरेषु व्यासेनानुपूर्वीविशेषरचनया स्वशिष्याय प्रोक्तमिति ।

'द्विविधं चेह प्रोक्तं गृह्यते परकृतं स्वकृतं वा । प्रपूर्वो वचिः प्रकाशने ऽध्यापनरूपे वा वर्तते करणे वेति ।' इति –

तत्रैव कैयटस्मरणादष्टादशानामपि पुराणानां व्यासः स्मर्ता प्रादुष्कर्ता कर्ता चोच्यत इति ।

तथा-

अष्टादशपुराणानां कर्ता सत्यवतीसुतः ।' इति ।

तथा-

'अष्टादशपुराणानां वक्ता सत्यवतीसुतः ।' इति (स्कान्दरेवाखण्डः) ।

देवीभागवतेपि-

'मन्वन्तरेषु सर्वेषु द्वापरे द्वापरे युगे ।
प्रादुष्करोति धर्मार्थी पुराणानि यथाविधि । १८।।' इति ।

तथा-

'अल्पायुषोल्पबुद्धींश्च विप्रान् ज्ञात्वा कलावथ ।
पुराणसंहितां पुण्यां कुरुतेसौ युगे युगे ।।२०।।' इति च (१।३) ।

द्वापरे द्वापरे व्यासः पुराणानि प्रादुष्करोतीति । क्वचित् स्मर्तुरपि कर्तृत्वव्यपदेश उपचारात् ।

'न कश्चिद् वेदकर्ता स्याद् वेदस्मर्ता चतुर्मुखः ।' इति निदर्शनात् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पुराणानामपि **'पुराणं पंचमो वेद'** इति वेदत्वश्रवणात् तथा स्मरणाच्चेत्याहुः ।

तत्तत्कल्पेषु तत्तन्मन्वतरेषु वा तत्तद्रूपेणोपदिश्यमानतया पृथक् तत्तत्समाख्यां गतानि यावन्ति पुराणान्येकैकशः समाहृत्य व्यासेनानुपूर्वीविशेषरचनया संक्षिप्य प्रोक्तानीति तत्तन्नाम्नैव प्रवृत्तानि प्रवर्तितानि वा । तानि च महापुराणोपपुराणभेदेन द्विविधानि । द्विविधान्यपि तानि पृथगष्टादशधा समाम्नातानीति ।

यथा विष्णुपुराणे–

'अष्टादश पुराणानि पुराणज्ञाः प्रचक्षत ।' इति (३।६) ।

तथा–

'महापुराणान्येतानि ह्यष्टादश महामुने ।

तथा चोपपुराणानि मुनिभिः कथितानि च ॥' इति च (११५।१६) ।

एवं स्कान्देपि (रेवाखण्डे)-

'पुराणानि दशाष्टौ च सांप्रतं तदिहोच्यते ।' इति (२३।३०) ।

ब्रह्मवैवर्तपाद्मादिवचनानि तु प्रागेवोदाहृतानीति नेह पुनर्निदर्श्यन्त इति ।

तत्राष्टादश महापुराणानि यथा-देवीभागते (प्रथमस्कन्धे)–

'मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।

अनापलिंगकूस्कानि पुराणानि पृथक् पृथक् ॥२॥' इति (अ. ३) ।

मद्वयमिति - मात्स्यं मार्कण्डेयं च । भद्वयं भविष्यं भागवतं च । ब्रत्रयं - ब्राह्मं ब्रह्माण्डं ब्रह्मवैवर्तं च । वचतुष्टयं – वैष्णवं वामनं वायव्यं वाराहं च । अ - अग्निपुराणं, ना नारदीयम्, प - पाद्मम्, लिं - लिङ्गपुराणम्, ग - गरुडपुराणम्, कू - कूर्मपुराणम्, स्क - स्कन्दपुराणम्, इत्यष्टादशेत्यर्थः ।

अन्यत्र क्वचिदनापलिंगेत्यादिस्थले (पुराणान्तरे) –

'आलिपाग्निपुराणानि कूस्कं गारुडमेव च ।'

इत्याद्यपि श्रूयते । **'नालिपाग्नी'**ति वक्तव्ये **'आलिपाग्नी'** त्याकारवचनं नारदीयस्थाने आदित्यस्य ग्रहणार्थमिति । तेन तत्र आ - इति आदित्यपुराणं गृह्यत इति वदन्ति ।

एवमेवान्यत्रापि क्वचित् पुराण(नाम)भेदः, क्वचित् क्रमभेदः, क्वचिच्च ग्रन्थसंख्याभेदश्च दृश्यते । तत्र कल्पभेदेन वा व्यवस्था कल्प्येति ।

तत्र देवीभागवतं विहायान्यत्र सर्वत्राष्टादश महापुराणानामुद्देशक्रमः प्रारम्भे समाप्तौ च ब्रह्मादि-ब्रह्माण्डान्तरूपः प्रायः समान एव । अन्तरैव हि क्वचिद् भिन्नक्रमेणोल्लेख इति । यथा –

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

श्रीमद्भागवते (द्वादशस्कन्धे) –

'ब्राह्मं पाद्मं वैष्णवं च शैवं लिङ्गं सगारुडम् ।
नारदीयं भागवतमाग्नेयं स्कान्दसंज्ञितम् ।।
भविष्यं ब्रह्मवैवर्तं मार्कण्डेयं सवामनम् ।
वाराहं मात्स्यं कौर्मं च ब्रह्माण्डाख्यमिति त्रिषट् ।।२३-२४।।' इति (अ. ७) ।

मार्कण्डेये तु क्रमो(पि) निश्चित एव, यथा –

'ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ।
तथान्यन्नारदीयं च मार्कण्डेयं च सप्तमम् ।।
आग्नेयमष्टमं प्रोक्तं भविष्यं नवमं तथा ।
दशमं ब्रह्मवैवर्तं लैङ्गमेकादशं स्मृतम् ।।
वाराहं द्वादशं प्रोक्तं स्कान्दमत्र त्रयोदशम् ।
चतुर्दशं वामनं च कौर्मं पंचदशं तथा ।
मात्स्यं च गारुडं चैव ब्रह्माण्डं च ततः परम् ।।८-११।।' इति (अ.१३५) ।

श्रीमद्भागवतेपि प्रागुद्देशावसरेन्तराक्रमवैलक्षण्यदर्शनेप्यनन्तरं संख्याविवरणावसरे स एवेतरसाधारणोभ्यर्हितः क्रमोभ्युपगतः । यथा द्वादशस्कन्धे (त्रयोदशाध्याये) –

'ब्राह्मं दशसहस्राणि पाद्मं पंचोनषष्टि च ।
श्रीवैष्णवं त्रयोविंशच्चतुर्विंशति शैवकम् ।।
दशाष्टौ श्रीभागवतं नारदं पंचविंशतिः ।
मार्कण्डं नव वाह्नं च दशपंच चतुश्शतम् ।।
चतुर्दश भविष्यं स्यात् तथा पंचशतानि च ।
दशाष्टौ ब्रह्मवैवर्तं लिङ्गमेकादशैव तु ।।
चतुर्विंशति वाराहमेकाशीतिसहस्रकम् ।
स्कान्दं शतं तथा चैकं वामनं दश कीर्तितम् ।।
कौर्मं सप्तदशाख्यातं मात्स्यं तत्तु चतुर्दश ।
एकोनविंशत् सौपर्णं ब्रह्माण्डं द्वादशैव तु ।।४-८।।' इति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नारदीयेपि (चतुर्थपादे) -

'ब्राह्मं पाद्मं वैष्णवं च वायवीयं तथैव च ।
भागवतं नारदीयं मार्कण्डेयं तथैव च ॥
आग्नेयं च भविष्यं च ब्रह्मवैवर्तलिङ्गके ।
वराहं च तथा स्कान्दं वामनं कूर्मसंज्ञकम् ॥
मात्स्यं च गारुडं तद्वद् ब्रह्माण्डाख्यमिति त्रिषट् ।' इति (अ. ९२) ।

– एवमन्यत्रापि ।

इत्थं च सामान्यतोष्टादशमहापुराणेषु –

(१) प्रथमं ब्रह्मपुराणं दशसहस्रश्लोकात्मकम् (१०) ।
(२) द्वितीयं पद्मपुराणं पञ्चपञ्चाशत्साहस्रम् (५५) ।
(३) तृतीयं विष्णुपुराणं त्रयोविंशतिसहस्रम् (२३) ।
(४) चतुर्थं वायुपुराणम् चतुर्विंशतिसहस्रम् – (२४) ।
(५) पंचमं भागवतमष्टादशसहस्रात्मकम् (१८) ।
(६) षष्ठं नारदीयपुराणं पंचविंशतिसहस्रम् (२५) ।
(७) सप्तमं मार्कण्डेयपुराणं नवसहस्रात्मकम् (९) ।
(८) अष्टममग्निपुराणं पंचदशसाहस्रम् (१५) ।
(९) नवमं भविष्यपुराणं चतुर्दशसाहस्रम् (१४) ।
(१०) दशमं ब्रह्मवैवर्त्तपुराणमष्टादशसहस्रम् (१८) ।
(११) एकादशं लिङ्गपुराणमेकादशसाहस्रम् (११) ।
(१२) द्वादशं वराहपुराणं चतुर्विंशतिसाहस्रम् – (२४) ।
(१३) त्रयोदशं स्कन्दपुराणमेकाशीतिसाहस्रम् – (८१) ।
(१४) चतुर्दशं वानपुराणं दशसहस्रात्मकम् – (१०) ।
(१५) पंचदशं कूर्मपुराणं सप्तदशसाहस्रम् – (१७) ।
(१६) षोडशं मत्स्यपुराणं चतुर्दशसाहस्रम् - (१४) ।
(१७) सप्तदशं गरुडपुराणमूर्नत्रिंशतिसाहस्रम् - (१९) ।
(१८) अष्टादशं ब्रह्माण्डपुराणं द्वादशसाहस्रम् – (१२) ।

इति नारदीयोक्तो बहुसंमतः क्रमः । एकत्र देवीभागवत एव पुराणानां मात्स्यादिस्कन्दान्तो विलक्षणः क्रमो दृष्टः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तत्र ब्रह्मपुराणं सर्वपुराणानामाद्यमति सर्वेषामभिमतम् । केलवलं पाद्म एव स्वस्य (पद्मपुराणस्य) प्राथम्यमुक्त्वा भागवतस्य सर्वतः पश्चाद्भावित्वमुक्तम् । यथा -

पातालखण्डे -

'तत्र पद्मपुराणं च प्रथमं स प्रणीतवान् ।
ततोन्यानि पुराणानि कृत्वा षोडश तु क्रमात् ।।
अष्टादशं भागवतं सारमाकृष्य सर्वतः ।
कृतवान् भगवान् व्यासः (शुकञ्चाध्यापयत्सुतम्) ।।' इति ।

अष्टादशसु महापुराणेषु चतुर्थं पुराणं वायवीयमिति नारदीयमात्स्ययोर्मतं देवीभागवतस्य च । अन्येषां मते चतुर्थं पुराणं शैवमिति । शिवलिङ्गकूर्मपुराणादिषु पुराणानामुल्लेखक्रमोऽन्तरान्यतो भिन्नः । कौर्ममते शैववायवीययोर्द्वयोरेवाष्टादशसु समावेशो न त्वाग्नेयस्येत्यपि वदन्ति । पंचमं पुराणं भागवतम् । तत्र भागवतमिति क्वचिद् देवीभागवतं क्वचिच्च श्रीमद्भागवतं (विष्णुभागवतं) गृह्यते । तत्र व्यवस्थितं विकल्पं केचित् कल्पयन्तीति ।

तत्र नारदीयमार्कण्डेयब्रह्मवैवर्तश्रीमद्भागवतविष्णुपुराणेषु अष्टादशमहापुराणानामुल्लेखक्रम (उद्देशक्रम) आदितोन्तपर्यन्तं सर्वत्र समानः । केवलं नारदीये चतुर्थं पुराणं वायवीयमन्यत्र शैवमित्येव विशेषः ।

पुराणगतश्लोकानां संख्या (ग्रन्थसंख्या) नारदीयोक्ताः श्रीमद्भागवतोक्ताश्चात्र प्रागेव निर्दशिताः । तत्राग्निपुराणं नारदीयवचनेन पंचदशसाहस्रम्, ब्रह्मवैवर्त्तश्रीमद्भागवतयोर्मतेन चतुःशताधिकं पंचदशसाहस्रम्, देवीभागवतशिवपुराणमत्स्यपुराणानां मतेन षोडशसाहस्रम् । भविष्यपुराणं नारदीयमतेन चतुर्दशसाहस्रम्, भागवतद्वयब्रह्मवैवर्त्तशैवमात्स्यानां मतेन पंचशताधिकं चतुर्दशसाहस्रम् । केचिदेतत् शैवमात्स्ययोर्मते पंचशताधिकमष्टादशसाहस्रमित्यपि वदन्ति । स्कान्दं नारदीयमतेनैकाशीतिसाहस्रम्, इतरेषां मते (तदीयमते) शताधिकमेकाशीतिसाहस्रम् । ब्रह्माण्डं देवीभागवतमते शताधिकं द्वादशसाहस्रमन्यमते द्वादशसहस्रमात्रम् केचिदेतत् शैवमतेन शतद्वयाधिकं द्वादशसाहस्रमिति वदन्ति । एवं शैवे मात्स्ये चात्रेतरापेक्षया बहु वैलक्षण्यं वर्णयन्ति । मन्यत्समानम् । एतच्च पश्चाद् दर्शयिष्यते ।

उक्तानि संक्षेपान्महापुराणानि । इदानीमुपपुराणानि दर्शयिष्यन्ते । तानि च यथा देवीभगवते (प्रथमे स्कन्धे)-

'तथैवोपपुराणानि शृण्वन्तु ऋषिसत्तमाः ।।'

-इत्युपक्रम्य-

'सनत्कुमारं प्रथमं नारसिंहं ततः परम् ।।१३।।
नारदीयं शिवं चैव दौर्वाससमनुत्तमम् ।।
कापिलं मानवं चैव तथा चौशनसं स्मृतम् ।।
वारुणं कालिकाख्यं च साम्बं नन्दिकृतं शुभम् ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सौरं पाराशरप्रोक्तमादित्यं चातिविस्तरम् ।।
माहेश्वरं भागवतं वासिष्ठं च सविस्तरम् ।।
एतान्युपपुराणानि कथितानि महात्मभिः ।।१६।।' इति (अ. ३) ।

तथा मलमासतत्त्वनाम्ना शब्दकल्पद्रुमपरिशिष्टोद्धृते कौर्मे --

'अन्यान्युपपुराणानि मुनिभिः कथितान्यपि ।।'

—इत्युपक्रम्य—

'आद्यं सनत्कुमारोक्तं नारसिंहं ततः परम् ।
तृतीयं वायवीयं च कुमारेण च भाषितम् ।।
चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम् ।
दुर्वाससोक्तमाश्चर्यं नारदीयमतः परम् ।।
नन्दिकेश्वरयुग्मं च तथैवोशनसेरितम् ।
कापिलं वारुणं चैव कालिकाह्वयमेव च ।।
माहेश्वरं तथा साम्बं दैवं सर्वार्थसिद्धिदम् ।
पराशरोक्तमपरं मारीचं भास्कराह्वयम् ।।' इति ।

दैवं देवीपुराणमिति ।

तथा माध्यन्दिनवाजसनेयाह्निकोदाहृते वाचस्पत्युद्धृते कौर्म एव । यथा –

'आद्यं सनत्कुमारोक्तं नारदीयमतः परम् ।
तृतीयं नारदं प्रोक्तं कुमारेण तु भाषितम् ।।
'चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम् ।
दुर्वाससोक्तमाश्चर्यं नारदोक्तमतः परम् ।।
कापिलं मानवं चैव तथैवोशनसेरितम् ।
ब्रह्माण्डं वारुणं चाथ कालिकाह्वयमेव च ।।
माहेश्वरं तथा साम्बं सौरं सर्वार्थसंचयम् ।
पराशरोक्तं प्रवरं तथा भागवतद्वयम् (ताह्वयम्?) ।
इदमष्टादशं प्रोक्तं पुराणं कौर्मसंज्ञितम् ।' इति ।
–अत्र पूर्वस्मादन्यथैव पाठो बहुत्रेति विचारणीयम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तथा स्कान्दे (प्रभासखण्डे द्वितीयाध्याये), (किंचित्पाठभेदेन) शब्दकल्पद्रुमोद्धृते गारुडे २२७ तमेध्याये च –

'आद्यं सनत्कुमारोक्तं नारसिंहमतः परम् ।
तृतीयं स्कान्दमुद्दिष्टं कुमारेणानुभाषितम् ।।
चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम् ।
दुर्वाससोक्तमाश्चर्यं नारदोक्तमतः परम् ।।
कापिलं मानवं चैव तथैवोशनसेरितम् ।
ब्रह्माण्डं वारुणं चान्यत् कालिकाह्वयमेव च ।।
माहेश्वरं तथा साम्बं सौरं सर्वार्थसंचयम् ।
पराशरोक्तं परमं मारीचं भार्गवाह्वयम् ।।१४।।
एतान्युपपुराणानि कथितानि द्विजोत्तमाः ।।' इति (स्का. अ. २.) ।

इत्थमुदाहृतेष्वेषूद्धरणेषु वहुत्र मिथः पाठविसंवादो विचारणीयः । तत्र कापिलं वामनं चेति, पराशरोक्तमपरं चेति पाठो गारुडे । तदन्तरेणान्यत् सर्वमुभयत्रापि तुल्यम् ।

लैङ्गेपि (षड्विंशाध्याये ब्रह्मयज्ञवर्णनप्रसङ्गे)–

'अष्टादशपुराणनां ब्रह्माद्यानां तथैव च ।' इत्यनन्तरम् –
'तथा चोपपुराणानां सौरादीनां यथाक्रमम् ।।२७।।' इति ।

स्कान्देपि (आवन्त्य (रेवा) खण्डे) –

'तथैवोपपुराणानि यानि चोक्तानि वेधसा ।।४५।।'

–इत्युपक्रम्य–

'इदं ब्रह्मपुराणस्य सुलभं सौरमुत्तमम् ।
संहिताद्वयसंयुक्तं पुण्यं शिवकथाश्रयम् ।।
'आद्या सनत्कुमारोक्ता द्वितीया सूर्यभाषिता ।
सनत्कुमारनाम्ना हि तद्विख्यातं महामुने ।।
द्वितीयं नारसिंहं च पुराणे पाद्मसंज्ञिते ।
शौकेयं हि तृतीयं तु पुराणे वैष्णवे मतम् ।।
बार्हस्पत्यं चतुर्थं तु वायव्यं संमतं सदा ।
दौर्वाससं पंचमं च स्मृतं भागवते सदा ।।
भविष्ये नारदोक्तं च सूरिभिः कथितं पुरा ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कापिलं मानवं चैव तथैवोशनसेरितम् ।।

ब्रह्माण्डं वारुणं चाथ कालिकाह्वयमेव च ।

माहेश्वरं तथा साम्बं सौरं सर्वार्थसंचयम् ।।

पाराशरं भागवतं कौर्मं चाष्टादशं क्रमात् ।

एतान्युपपुराणानि मयोक्तानि यथाक्रमम्' ।। ४५-५४।। इति (अ. १) ।

तथा तत्रैव प्रभासखण्डे –

'उपभेदान् प्रवक्ष्यामि लोके ये संप्रतिष्ठिताः ।।७९।।

पाद्मे पुराणे यत् प्रोक्तं नारसिंहोपवर्णनम् ।।

तच्चाष्टादशसाहस्रं नारसिंहमिहोच्यते ।।८०।।

नन्दिन (नो) यत्र महात्म्यं कार्त्तिकेयेन वर्णितम् ।।

लोके नन्दिपुराणं वै ख्यातमेतद् द्विजोत्तमाः ।।८१।।

यत्र साम्बं पुरस्कृत्य भविष्यति कथानकम् ।।

प्रोच्यते तत् पुनर्लोके साम्बमेव मुनिव्रताः ।।८२।।

एवमादित्यसंज्ञं तु तत्रैव परिपठ्यते ।।' इति (अ. २.) ।

तानि च –

'तथा चोपपुराणानामष्टादश प्रकीर्त्तिताः ।।'

'पराशरं भागवतं कौर्मं चाष्टदशं क्रमात् ।।'

'इदमष्टादशं प्रोक्तं पुराणं कौर्मसंज्ञितम् ।।'

मुनयोष्टादश प्राहुः क्षुल्लकानि (महान्ति, च ।।'

इत्यादिः प्रागुदाहृतदेवीभागवत-ब्रह्मवैवर्त्त- स्कान्द - कौर्म - श्रीमद्भागवतादिवचनतस्तथा –

'यः षट् त्रिंशत् पुराणानि सर्वाणि परिकीर्त्तयेत् ।।'

इत्यादिपद्मपुराणीयमहापुराणोपपुराणोभयसामान्यसंख्याप्रतिपादकवचनतश्च संख्यायामष्टादशेति ।

निर्दशितानि नामभिः संख्यया चैतान्युपपुराणानीति, तदतिरिक्तान्यपि श्रूयन्ते दृश्यन्ते च कानिचित् पुराणान्यन्यानि, तेषु कतिपयेषां नामानि, यथा–

आदिपुराणम्, आत्मपुराणम्, कल्किपुराणम्, गणेशपुराणम्,

धर्मपुराणम्, पशुपतिपुराणम्, महाभागवतम्, मुद्गलपुराणम्,

लघुब्रह्मवैवर्त्तम्, लुण्ठिकेश्वरपुराणम्, विष्णुधर्मः, विष्णु

धर्मोत्तरम्, स्वयम्भूपुराणम्' इत्यादि ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तान्यपि तेभ्य एवाष्टादशपुराणेभ्यो विनिर्गतानि न तेभ्यः पृथक् गण्यानीत्यप्युक्तं तत्रैव । यथा –

'अष्टादशभ्यस्तु पृथक् पुराणं यत् प्रदृश्यते ।।
विजनीध्वं द्विजश्रेष्ठास्तदेतेभ्यो विनिर्गतम् ।।८३।।' इति ।

अष्टादशभ्यः सनामग्राहमुपरिनिर्दिष्टेभ्यो निश्चितसंख्येभ्यः पुराणेभ्यः पृथक्तया यत् किंचित् पुराणमधिकं दृश्यते तस्य सर्वस्य तेभ्योष्टादशभ्य एव विनिर्गतत्वेन यथायोगं तेष्वेवान्तर्भावसंभवान्नपृथक्त्वेन गणना, ततश्च पुराणान्यष्टादशैवेति तेषामाशय इति ।

एतावता - महापुराणेषु यदनाख्यातमाख्यातमपि यन्न व्याख्यातं, संक्षिप्तमस्फुटं वा तदादाय परिशिष्टात्मना (तत्परिशेषतयेति यावत्) उपपुराणान्यपि महापुराणवत् समानरीत्या प्रवृत्तानीति मे मतिः ।

अत्र केचिदष्टादशमहापुराणेभ्यः पृथगष्टादशसंख्यातोधिकं वा यद् दृश्यते तस्याष्टादशोपपुराणेषु गणना, यच्चाष्टादशोपपुराणेभ्योपि पृथगधिकं वा दृश्यते तस्योपपुराणत्वमति(रिक्त)पुराणत्वं वा कल्पनीयमित्यपि कथयन्ति ।

उक्तानि पुराणानि यथाश्रुतानि । सांप्रतं प्रस्तुततयात्र स्कान्दविषये किंचिदुच्यते ।

स्कन्दपुराणम्–

तत्र स्कान्दं महापुराणमेकाशीतिसहस्रश्लोकात्मकमित्युक्तम् । तच्च मूलतस्तत्पुरुषकल्पाश्रितकथामाश्रित्य प्रवृत्तं व्यासेन सारमादाय संक्षिप्य प्रोक्तं सप्तखण्डात्मकं तदिति ।

यथोक्तं नारदीये पूर्वभागे पुराणवर्णनानुक्रमे –

'शृणु वक्ष्ये मरीचे ते पुराणं स्कन्दसंज्ञितम् ।
यस्मिन् प्रतिपदं साक्षान्महादेवो व्यवस्थितः ।।
'पुराणे शतकोटौ तु यच्छैवं वर्णितं मया ।
लक्षितस्यार्थजातस्य सारो व्यासेन कीर्तितः ।।
स्कान्दाह्वयस्तत्र खण्डाः सप्तैव परिकल्पिताः ।
एकाशीतिसहस्रन्तु स्कान्दं सर्वाघकृन्तनम् ।।' इति ।
'यत्र माहेश्वरा धर्माः षण्मुखेन प्रकाशिताः ।
-कल्पे तत्पुरुषे वृत्ताः सर्वसिद्धिविधायकाः ।।' इति च (अ. १०४ ।

तथा स्कान्देपि (प्रभासखण्डे)–

'पुरा कैलासशिखरे ब्रह्मादीनां च सन्निधौ ।
स्कान्दं पुराणं कथितं पार्वत्यग्रे पिनाकिना ।।
पार्वत्या षण्मुखस्याग्रे तेन नन्दिगणाय वै ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नन्दिनापि कुमाराय तेन व्यासाय धीमते ।।

व्यासेन तु समाख्यातं भवद्भ्योहं प्रकीर्तये ।'

इति प्रथमाध्याये उपक्रम्य ततो द्वितीयाध्याये –

'स्कान्दं तु सप्तधा भिन्नं वेदव्यासेन धीमता ।

एकाशीतिसहस्राणि शतं चैकं च संख्यया ।।

सर्वे द्वादशसाहस्रं विभागाः साधिका मताः ।' इति ।

तत्समनन्तरमेव च पुनः–

'तस्य माहेश्वरश्चाद्यः खण्डः पापप्रणाशनः ।

किंचिन्न्यूनार्कसाहस्रो बहुपुण्यो बृहत्कथः ।।

सुचरित्रशतैर्युक्तः स्कन्दमाहात्म्यसूचकः ।'

इत्यादिना तत्रैव खण्डा अपि विनिर्दिष्टाः । ते च खण्डाः – माहेश्वर – वैष्णव - ब्रह्म - काशी - अवन्ती-नागर - प्रभासाख्याः सप्तेति ।

अन्यत्र पुनः पंचाशत्खण्डोपेतं संहिताषट्कात्मकं स्कान्दमुक्तम् । यथा पण्डितज्वालाप्रसादमिश्रकृता 'ष्टादशपुराणदर्पणो' द्धृत 'शंकरसंहिता' यां (हालास्य माहात्म्ये) –

'स्कान्दमद्यापि वक्ष्यामि पुराणं श्रुतिसारजम् ।।६२।।

षड्विधं संहिताभेदैः पंचाशत्खण्डमण्डितम् ।

आद्या सनत्कुमारोक्ता द्वितीया सूतसंहिता ।।

तृतीया शाङ्करी प्रोक्ता चतुर्थी वैष्णवी तथा ।

पंचमी संहिता ब्राह्मी षष्ठी सा सौरसंहिता ।।' इति ।

तासां संहितानां श्लोकसंख्याविवरणं च तदुद्धृतायामेव सूतसंहितायां दत्तं यथा –

'ग्रन्थेनैव च षट्त्रिंशत्सहस्रेणोपलक्षिता ।

आद्या तु संहिता विप्रा, द्वितीया षट्सहस्रिका ।।

तृतीया ग्रन्थतस्त्रिंशत्सहस्रेणोपलक्षिता ।

चतुर्थी संहिता पंचसहस्रेणाभिनिर्मिता ।।

ततोन्या त्रिसहस्रेण ग्रन्थेनैव विनिर्मिता ।

अन्त्या सहस्रतः सृष्टा ग्रन्थतः पण्डितोत्तमाः ।।' इति (१।२२।२४) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

इत्थं संहिताषट्कमेकत्र विनिबद्धमेकाशीतिसहस्रश्लोकात्मकमेकं स्कन्दपुराणम्, तच्च पंचाशतखण्डमण्डितमित्युक्तम् । किन्त्वद्यत्वे नारदीयोपवर्णितं सप्तखण्डात्मकमेकमेव स्कान्दं प्रचरद् दृश्यते न तु पंचाशतखण्डात्मकमेकमेकत्र संहिताषट्कोपेतमपि । तत् किमुभयमपि तद् दशसु मण्डलेष्वष्टस्वष्टकेषु चेत्येकैव द्विधा विभागं गमिता ऋक्संहितेवैकमेवेति,न चैतद् दृश्यते, संप्रत्युपलभ्यमाने स्कान्दे एकत्र पंचाशतखण्डानां षट्संहितानां चादर्शनात् । तासु च कासांचित् पृथगेवोपलम्भात् । नापि महाभारतेऽष्टादशसु पर्वसु अवान्तरपर्वणामिव स्कान्दीयेषु सप्तसु खण्डेषु पंचाशतखण्डानामन्तर्भावः कल्प्यः, तत्र तेषां नामतो विशिष्यानिर्दिश्यमानत्वेन तथात्वस्य वक्तुमशक्यत्वात् । न वा हरिवंशस्य खिलपर्वात्मना महाभारते समावेश इव तेषामतिरिक्तखण्डात्मनैकस्मिन् स्कान्दे समावेशेन हरिवंशस्य महाभारतीयखिलपर्वत्वमिव तेषामपि स्कन्दमहापुराणीयखिलखण्डत्वं वाच्यं, तेषां तत्र तथात्वस्य तथात्वेनोल्लेखस्य चादर्शनात् ।

किंच स्कान्दीयतयैवोत्कल – केदार – सह्याद्रि – हिमवन्मानसादिनामभिरन्येपि खंडाः पृथक् प्रवर्तमानाः (लोके प्रचलिताः) समुपलभ्यन्ते । तत्रोत्कलादीनां केषांचिद् माहेश्वरादिसप्तखंडान्तर्गतावान्तरखण्डत्वोपगमेपि हिमवन्मानसादीनां स्कान्दीयत्वेन प्रसिद्धानां कतिपयखंडानां प्रचलितनारदीयोक्तसप्तखंडात्मकस्कन्दमहापुराणान्तरनुपलम्भेन तेषां ततः सर्वथा भिन्नत्वस्याभ्युपगन्तव्यत्वात् ।

तथा च हिमवत्खंडादीनां स्कान्दीयत्वेन प्रसिद्धत्वेपि तेषामष्टादशमहापुराणान्यतमस्कन्दमहापुराणानन्तर्गततया तदन्तर्भावार्हं तन्मूलभूतं किंचित् स्कान्दं नाम पुराणान्तरमवश्यं कल्पनीयमापद्यते । तच्च न महापुराणमपि तूपपुराणेष्वेवान्यतममिति । एवं च किंचित् स्कान्दमुपपुराणं पृथक् सिद्ध्यति यत् महापुराणानन्तर्गतानामुक्तानामितरेषां च पृथक्खण्डानां मूलं, यत्र च तेषां पृथगुपलभ्यानां कतिपयखण्डानामन्तर्भावः शक्यः कल्पयितुमिति । किन्तु तत् किंरूपं किमाकारं, किंप्रकारं कियत्परिमाणं कीदृग् (वा) स्यादित्यत्र न किमपि वक्तुं शक्यत इदानीं निश्चयेनेति । नापि वा तादृशं किंचिदद्यावधि दृष्टिपथमापन्नमिति ।

एतावता चात्र चत्वारि पृथग्रूपाणि स्कान्दानि निर्दशितानि । तत्र त्रीणि प्रागुदाहृतानि, यथा–

एकं सप्तखण्डात्मकमष्टादशस्वन्यतमं त्रयोदशत्वेन बहुषु पुराणेषु परिगणितं सर्वसंमतं स्कन्दमहापुराणमिति प्रसिद्धम् ।

अन्यत् पंचाशतखण्डात्मकं संहिताभेदैः षोढा भिन्नं सूतशंकरसंहितोक्तम् ।

अन्यत् पुनर्हिमवन्मानसादिनामभिः पृथङ्नैकखण्डेषूपलभ्यमानमिति । तेषु प्रथमद्वयं पुराणेषु निर्दिष्टमन्यत् पुनः पुराणेषु विशिष्यानिर्दिष्टमिति ।

अन्यत् पुनस्तेभ्यो विलक्षण'मम्बिकाखण्ड'नाम्ना नेपालराष्ट्रियाभिलेखालये चिरादवस्थितमप्रकाशितम् । एवमेव प्रकारान्तरेणापि पुनश्चतुर्धा स्कान्दानि पृथग्रूपाणि पुराणेषु स्मर्यमाणानि दृश्यन्ते, यथा–

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एकम्–

'पुरा कैलासशिखरे – पार्वत्यग्रे पिनाकिनेत्यादिना'

'तेन व्यासाय धीमते' इत्यन्तेन 'भवद्भ्योहं प्रकीर्तये' इति

पिनाकिना पार्वत्याः कथितं, तया षण्मुखाय, तेन नन्दिने, तेन कुमाराय, तेन च व्यासाये' ति प्रभासखण्डे सूतमुखनिर्दिष्टं प्रागप्युदाहृतम् ।

अन्यत् – 'यत्र स्कन्दः स्वयं श्रोता वक्ता साक्षान्महेश्वरः ।

'तत्तु स्कान्दं समाख्यात' मिति शब्दकल्पद्रुमोद्धृतशिवपुराणोत्तरखंडप्रोक्तम् । अन्यत् पुनः-

'वायोः सकाशात् स्कन्देन श्रुतमेतत् पुरातनम् ।

एवं परंपराप्राप्तं शतसंख्यैर्द्विजोत्तमै, रिति ।।'

'रेवाखण्डोक्त' मिति पण्डितश्रीकृष्णमणित्रिपाठिना स्वपुस्तके उदाहृतम् ।

अन्यच्च पुनरिदमित्थमित्यविवृतमुपपुराणोद्देशक्रमे -

'तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषितम् ।'

इति प्रभासखण्डे द्वितीयाध्याये, शब्दकल्पद्रुमोद्धृते गारुडे २२७ तमाध्याये च निर्दशितमिति ।

इति विविधरूपेण (विविधरूपाणि) स्कान्दानि निर्निष्टानि पुराणेषु। तेषु कतममेतद् 'अम्बिकाखण्ड' नाम्नोपकल्पितं प्रकृतं स्कान्दं यदस्माभिरत्र संपाद्य प्रस्तूयमानमिति ।

तदत्र प्रस्तूयमानमिद स्कान्दं न महापुराणण्, नारदीयोक्तप्रसिद्धस्कन्दमहापुराणतोस्य सर्वथा भिन्नरूपत्वात्, न वा प्रागुदाहृतप्रभास–रेवा शिवपुराणोत्तरखण्डोक्तेष्वन्यतमं तत् निर्दिष्ट वक्तृश्रोतृभिन्नवक्तृश्रोतृकत्वेनास्य ततोपि भिन्नत्वात् ।

तर्हि कतममेतत् स्कान्दमिति ?

'तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषित' मिति ।।११।।

प्रागुदाहृतस्कान्दगारुडयोरष्टादशसु तृतीयत्वेन यत् स्कान्दमुपपुराणं निर्दिष्टं तदेवैतदिति, तस्यैतस्माद-भिन्नत्वात्। उभयोरप्येतयोः समानवक्तृश्रोतृकत्वदर्शनात् । तत्र कुमारेण भाषितमिति स्कान्दवचने कुमारपदस्य सनत्कुमारपरत्वात् । प्रकृतस्य स्कान्दस्य च साक्षात् सनत्कुमारेण भाषितत्वात् ।

ननु तर्हि सनत्कुमारोक्तस्यास्य कथं स्कान्दत्वं, स्कन्दोक्तस्यैव स्कान्दत्वेन समाख्यातुमुचितत्वादिति चेदत्र ब्रूमः। अस्य सनत्कुमारोक्तत्वेपि स्कान्दत्वेन समाख्यातुं योग्यत्वादिति। स्कन्दोत्पत्तेश्चात्र प्रधानत्वेन प्रधानेन व्यपदेशस्य सर्वथैवोचितत्वादिति ।

तथा चास्य पुराणस्य स्कन्दोत्पत्तिप्रतिपादकत्वात् स्कान्दत्वमिति सुव्यक्तमेव । उपक्रमोपसंहारादौ सर्वत्र स्कन्दोत्पत्ति-प्रसङ्गस्यैवोपलम्भात् । यथा–

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तत्र- (आरम्भ एव)-

'ब्रह्मसत्रे पुरा साधो नैमिषारण्यवासिनाम् ।
कथितं भारताख्यानं पुराणं च परं त्वया ।।'
'यत् पुण्याख्यानसदृशं पुराणाद्यद्वि (द्धि) शिष्यते ।
तत्त्वा पृच्छाम वं जन्म कार्तिकेयस्य धीमतः ।।'
'इमे हि मुनयः सर्वे त्वदुपास्तिपरायणाः ।
स्कन्दसंभवशुश्रूषासञ्जातौत्सुक्यमानसाः ।।' इति (अ. १) ।

-(प्रयागे सूतंप्रति मुनीनामुक्तिः) ।

'शृणुध्वं मुनयः सर्वे कार्त्तिकेयस्य संभवम् ।' इति (अ. १) ।

-(मुनिन्प्रति सूतस्योक्तिः) ।

'श्रुत्वाथ वचनं सूनौर्ब्रह्मणो मुनिपुंगवः ।
इदमाह वचो विप्रा श्चिरं यद् हृदयेस्थितम् ।।'
'कुमारस्य कथं जन्म कार्तिकेयस्य धीमतः ।
. . . . इच्छाम्येतद्धि वेदितुम् ।।' इति (अ. १) ।

-(सनत्कुमारसविधे व्यासेन कृताया जिज्ञासाया ऋषीन्प्रति सूतकृतोनुवादः ।)

'एवं स पृष्ट एकाग्रे ब्रह्मणः पुत्रसत्तमः ।
उवाच सर्वं सर्वज्ञो व्यासायाक्लिष्टकारिणे ।।'
तच्छृणुध्वं यथातत्त्वं कीर्त्यमानं मयानघ (ाः) ।' इति (अ. १) ।

-(पुनः सूतोक्तिः) ।

'तस्मै देवाय सोमाय प्रणम्य प्रयतः शुचिः ।
पुराणाख्यानजिज्ञासोर्वक्ष्ये स्कन्दोद्भवं शुभम् ।।' इति (अ. २) ।

-(व्यासं प्रति सनत्कुमारस्योक्ति ।)

'एतज् ज्ञात्वा यथावद्धि कुमारानुचरो भवेत् ।
बलावान्मतिसंपन्नः पुत्रं चाप्नोति संमतम् ।।' इति (अ. २) ।

तथा-

'इदं पुत्राय शिष्याय धार्मिकायानसूयवे ।
कुमारभक्ताय तथा श्रद्धानाय चैव हि ।।
कथनीयं सदा ब्रह्मन् . . . . . . ।।' इति (अ. ३.) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

इत्यादिना स्कन्दोत्पत्तिमेवाधिकृत्य पुराणोपक्रमात् । तथा च (१६६ तमेध्याये)–

'भगवन् सर्वधर्मज्ञ महायोगबलान्वित ।
श्रुतमेतन्मया कृत्स्नं स्कन्दस्य चरितं महत् ॥'

एवमन्ते–

'एवं सनत्कुमारस्तु पृष्टो व्यासेन धीमता ।
मुनीन्द्रः कथयामास पुराणं स्कन्दसंभवम् ॥'

इति स्कन्दोत्पत्तिसमाख्यया पुराणास्योपसंहारात् ।

न केवलमित्थमुपक्रमोपसंहारयोरेव, अपित्वस्यादितः समाप्तिपर्यन्तमेव प्रायः सर्वत्रान्तरान्तरा स्कन्दजन्मसंबन्धिन्याश्चर्चाया उपलभ्यमानतयाप्यस्य पुराणस्य स्कन्दोत्पत्तिप्रतिपादकत्वं सिद्धयतीति ।

पुनश्चात्र स्कन्दोत्पत्तितच्चरित्रव्यतिरेकेण यान्यन्यानि आख्यानान्युपलभ्यन्ते तानि सर्वाणि प्रसङ्गवशादागतानि प्रासंगिकानि गौणानि न प्रधानानि, स्कान्दान्येव तु प्रधानानि। तथापि तानि साक्षात्परंपरया वा स्कन्दजन्मना प्रधानेन प्रतिपाद्येन संबद्धानि तन्निमित्तानि तदुपपादकानि तदुपोद्बलकानि वेति ।

पुत्रजन्म प्रति मातापित्रोरिच्छापि निमित्तं भवति । स्कन्दोत्पत्तिमाख्यातुं तन्निमित्तरूपेण पार्वत्याः पुत्रलिप्सा तत्र तत्र दर्शितोपलभ्यते ।

पुत्रजन्मप्रति पार्वत्या उत्कटोभिलाषो यथा–

३४ तमाध्याये–

'महादेवप्रिया देवी पुत्रार्थं च वरार्थिनी ।' (तपश्चचारेति शेषः) ।,

तथा–

'पुत्रार्थमासक्तमनोरथायां देवोकरोद्यत्तदिदं शृणुष्वे' ति ।
देव्यां पुत्रलिप्सया तपसि स्थितायामिति तदर्थः ।

तथा ५५ तमेध्याये (वरदानार्थमुद्यतं ब्रह्माणं प्रति पार्वत्या उक्तिः)–

'इच्छामि भगवन् पुत्रं सर्वधर्मभृतां वरम् ।
महाबल महोत्साहं सर्वलोकनमस्कृत' मिति ॥

पुनस्तत्रैव–

पुत्रस्ते भविता देवि महायोगबलान्वितः ।
सदा बालोथ सुभगो धर्मज्ञो धर्मवत्सलः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

षण्मुखो द्वादशभुजः शक्तिपाणिस्तथैव च ।'
'अयोनिजो महातेजा लोकानां सुखकृत्सदा ।'

– इति ब्रह्मणो वाक्यादनन्तरम्–

५८ तमेध्याये-

'पुत्रलम्भकृतं हर्षं चिन्तयन्त्या मुहुर्मुहुः ।
अपतज्जलमत्यर्थं शीतलं सुसुगन्धि च ।।' इति ।

७२ तमेध्याये च–

'ततः प्रणम्य देवेशं पार्वती प्रणयादिदम् ।
वचः प्रोवाच जननी कृत्सनस्य जगतोव्यया ।।'
'यथा मेदेहजः पुत्रो भविता गोवृषध्वजः ।'
'तथा कुरु महादेव यदि ते प्रियता मयि ।।' इति ।

देहज औरसः ।

तदन्तरं तत्रैव पुनर्महादेवस्य सान्त्ववचनम् –

'एवं भवतु देवेशि विज्ञप्ति सकलामिमाम् ।
करिष्यामि तवेशानि पुत्रस्ते स भवेद्यथा ।।' इति ।
'गच्छन्त्या तत्तपः कर्तुं वरः पूर्वमपि त्वया ।
प्रार्थितो ह्येष पुत्रार्थं तेनावश्यं ददामि ते ।।' इति च ।

स्कन्दोत्पत्यर्थं शिवयोरुद्योगो यथा तत्रैव–

'योगयुक्तौ तदा देवौ परां मूर्त्ति समास्थितौ ।
कृत्स्नस्य जगतो योनी पार्वतीभुवनेश्वरौ ।।
तस्थतुः सुचिरं कालं तनयार्थं महाद्युती ।' इति ।
श्रीकण्ठो भगवानेष देवदेवस्त्रिलोचनः ।
युक्तोभूद्धिमवत्पुत्र्या तनयार्थं महाद्युतिः ।।' इति च ।

पार्वतीगर्भतः स्कन्दोत्पत्तिमनिच्छतां देवानां तद्वारणप्रयासो यथा तत्रैव–

'तनयः किल यः शंभोर्गिरिजायां भविष्यति ।'
'यथा न देहजः पुत्रो भवेद्देव्याः सुरेश्वराः ।'
'यो नः स्वयंवरे दत्तो वरस्तिष्ठति शङ्करे ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तमेव वरयिष्यामो वरमग्र्यं पिनाकिनः ।।
यथा न देहजो देव्यास्तनयः स भविष्यति ।' इति ।

पुरा स्वयंवरावसरे वरदानोत्सुके शिवे देवानां प्रार्थनोक्तिः –

'तथैव भगवन्नस्तु वर एषोवतिष्ठताम् ।
यदा कार्यं तदा नस्त्वं दास्यसे वरमीप्सितम् ।।' इति (अ. १४) ।

कार्यं भाविकार्यं, पार्वत्या गर्भतः स्कन्दोत्पत्तेर्वारणमन्यतरस्तदुत्पादनं च । तदर्थं देवैः पूर्वं न्यासीकृतो वर इति ।

तत्रैव महासुरतावसरे (तदवसाने)–

'यो नः स्वयंवरे देव वरो दत्तस्त्वया विभो ।
तं प्रार्थयामः सहितास्तन्नो दातुं त्वमर्हसि ।।'
'तेनैष न यथा देव्या देहे सञ्जायते सुतः ।
जायते च यथा देव तथा नः कर्तुमर्हसि ।। इति ।

तत्प्रसंग एव महादेवस्योक्तिर्यथा तत्रैव–

'महान्तं किन्त्विदं कालं तेजः सन्धारितं मया ।
अस्य प्रपश्यत स्थानममोघं ह्येतदुत्तमम् ।।' इति ।

स्कन्दोत्पत्तये शिवस्याग्नौ वीर्याधानं यथा तत्रैव–

'जुहावाग्नौ ततस्तेजस्तदात्मीयं परं भवः ।
हुत्वा तस्मिँस्ततः कृत्स्नं तुष्टोभूत्परमेश्वरः ।।' इति ।

ततः शिवस्य पार्वतीं प्रति सान्त्वोक्तिर्यथा तत्रैव–

'सुतस्ते भविता श्रीमान् षट्शिरा द्वादशेणः ।' इति ।

स्कन्दोत्पत्तिसंक्षेपः पुनस्तत्रैव यथा –

'यत्र तेषां तदा भित्त्वा कुक्षीन् तेजो विनिष्क्रमत् ।' इति ।

पुत्रजन्मप्रवृत्तिं ज्ञात्वा पार्वत्यास्तोषो यथा तत्रैव (७२ तमेध्याये) –

'श्रुत्वा देवैरभिहितमिदं प्रीतियुक्तैर्वचोग्र्यं
प्रीता देवी हृदयमहिता पुत्रजन्मप्रवृत्तिम् ।
ज्ञात्वा तस्थौ विबुधवरदा योगमता विधात्री' इति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पुनः १५८ तमेध्याये-

'प्रोषिते त्वयि देवेश भ्रमन्त्या मन्दरे यथा ।
अशोकतरुको दृष्टः कोमलः सुमनोरमः ।।
आसीच्च मे तदा भाव एष मे तरुपोतकः ।
भविष्यति सुतो रुद्र निर्विघ्नं पुनरागते ।।
आभ्यां च मे महादेव कुचाभ्यां द्विजपावन ।
क्षीरमागात् सुधासारं पुत्रस्नेहात् सुखप्रदम् ।।
देवैः पुत्रफले क्षिप्ते स हि मे तरुपोतकः ।
तुष्टिप्रदो ह्यपुत्रायाः पुत्रको भवितानघ ।।'

इति पार्वत्या नैराश्योक्त्यनन्तरम् -

'देवि फुल्लारविन्दाक्षि कथं नाम न ते सुतः ।
भविष्यति तपस्विन्या ऐश्वर्यपरमे स्वयम् ।।
शक्ता जनयितुं पुत्रान् तपसा त्वमनिन्दिते ।
अहं च ते प्रदास्यामि पुत्रान् परमशोभनान् ।।'

इत्यादि महादेवस्य तां प्रति समाश्वासनवचनम् ।

ततः पुनः १६२ तमेध्याये-

'शार्वं तेजः समादाय वह्निः किं कृतवान् तदा ।
कथं स्कन्दः समुत्पन्नः कस्मिंस्थाने महाद्युतिः ।।
सेनापत्ये कथं चासावभिषिक्तः सुरोत्तमैः ।
किमर्थमभिषिक्तश्च कस्मिन्देशेपि वा प्रभो ।।'

इति व्यासप्रश्नानन्तरम्-

'अथ त्रैलोचनं तेजः सुतसंकल्पसंभवम् ।
न धारयितुमुत्सेहे' – इत्याद्युपक्रम्य –
'शरमध्यात् समभवत् बालोबलपराक्रमः ।
षड्वक्त्रो द्वादशभुजः सूर्यकोटिसमप्रभः ।।'

इत्यादिना विस्तरेण स्कन्दोत्पत्तिप्रसङ्गविवरणम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तथा १६४ तमेध्याये–

'अथ संहृष्टमनसः प्रहृष्टं पावकात्मजम् ।
अभ्यषिञ्चन् तदा सर्वे सेनापत्ये महौजसम् ।।'

–इति स्कन्दाभिषेककथनम् ।

१६५ तमेध्याये– स्कन्दकृतस्तारकासुरसंहारः ।

१७१ तमेध्याये–

शृणु व्यास महाबुद्धे यन्मां त्वं पृष्टवानसि ।
कुमारेण यथा भिन्नो मैनाकिः क्रौञ्चपर्वतः ।।' इत्यादिना

तथा ११० तमेध्याये – स्कन्दकृतवृकबन्ध - वाराहतनुमोक्षणादिप्रसङ्गप्रतिपादनेन च स्कन्दस्यापूर्वबालचरितादिवर्णनम् ।

इतः पूर्वमप्यौरसपुत्रलम्भार्थं भृशमुत्सुकायाः पार्वत्याः परिसान्त्वनार्थं मध्येमध्ये प्रकारान्तरेण तस्याः शुक्रादिदत्तकपुत्रलम्भनप्रसङ्ग उदाहृतः यथा–एकादशाध्याये–

'उमा तासां वरिष्ठा च श्रेष्ठा च वरवर्णिनी ।
महायोगबलोपेता महादेवमुपस्थिता ।।
दत्तकश्चोशनास्तस्याः पुत्रः स भृगुनन्दनः ।' इति ।

तथा द्वाविंशाध्याये–

'ततो देव्याः स्वयं देवो नन्दीश्वरमतिप्रभम् ।
पुत्रस्तेयमिति प्रोच्य पादयोस्तं व्यनामयत् ।।
सा तमाघ्राय शिरसि पाणिभ्यां परिमार्जती ।
पुत्रप्रेम्णाभ्यषिञ्चत्तं स्रोतोभिस्तनजैस्त्रिभिः ।।' इति ।

तथा त्रयोविंशे–

'सप्तलोकाधिपत्यं च गणेशानां तथैव च ।
सर्वमर्हति देवेश नन्दी पुत्रो ममाग्रतः ।।' इति पार्वत्युक्तिः ।

ऊनविंशे च कुबेरं लक्ष्यीकृत्य शिवस्य पार्वतीं प्रत्युक्तिर्यथा–

'पुत्रस्तेयं यतो देवी तस्मान्न क्रोद्धुमर्हसि ।' इति ।

अन्तः १५८ तम एवाध्याये–

अथवायमनुग्राह्यस्तवाशोकतरुः प्रिये ।
अनुज्ञाता मया देवि कुर्वशोकतरुं सुतम् ।।'

इति महादेवानुज्ञानानन्तरम्–

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

१६२ तमेध्याये–

'अपुत्रा भगवन्तोहमशोकतरुकं सुतम् ।
इममद्य ग्रहीष्यामि समनुज्ञातुमर्हथ ॥'

–इति पार्वत्या अशोकतरुपुत्रग्रहणम् ।

इत्येवमादिको योयं पार्वत्याः पुत्रलम्भाख्यानप्रसङ्गः स सर्वोपि स्कन्दजन्मप्रसङ्गसंबद्ध इति ।

एतावता चैतत् पुराणं स्कन्दजन्मकथां निमित्तीकृत्य सनत्कुमारव्याससंवादरूपेण प्रवृत्तं पश्चात् सूतेन शौनकादिभ्य उक्तमिति सुव्यक्तम् ।

किं वा–

अधीहि भगव इति होपससाद सनत्कुमारं नारदः ॥१॥'

इति (प्रथमखण्डे) प्रारम्भे उपक्रम्यान्ते–

'तस्मै मृदितकषायाय तमसस्पारं दर्शयति भगवान् सनत्कुमारस्तं स्कन्द इत्याचक्षते २/४२ इति छान्दोग्ये (अ. ७ ख. २६) सनत्कुमारस्यापि स्कन्दत्वेन समाखयानश्रवणात् अत्र सनत्कुमारोक्तस्यैतस्य वक्तृत्वसमाख्ययापि स्कान्दत्वं सुवचमित्यपि वक्तुं शक्यत इति न कापि विप्रतिपत्तिरिति ।

किं चास्यान्ते पाशुपतयोगोपसंहारे-

'ज्ञानशक्त्या स्मृतं चात्र ब्रह्माण्डे भवकारणे (?) ।
स्थितिधर्मनिबोधार्थं पुराणं च करिष्यसि ॥
यज्ञधर्मप्रचारार्थं वेदं स्वायंभुवं स्मृतम् ।
विज्ञानात्त्वमनुस्मृत्य चतुर्धा वि (पि?) करिष्यसि ॥'

इत्यादि (व्यासं प्रति) सनत्कुमारोक्तेस्तथा–

'कृत्स्नस्य जगतो विप्रा आदिकर्ता यथा हरः ।
तथा सर्वपुराणानां पुराणोयं परः स्मृतः ॥'

इति शौनकादीन् प्रति सूतोक्तेश्च दर्शनाद् व्यासेनास्मिन्मन्वन्तरे वेदविभाजनात् पुराणनिबन्धनाच्च पूर्वमेव सनत्कुमारमुखादनुश्रुतमेतत् पुराणमिति सर्वपुराणानामाद्यमेतदिति च स्फुटीभवति ।

ततश्चानादिपरंपरायां कल्पभेदेन वा क्वचिदुपपुराणानामपि महापुराणात् प्राग्वर्तित्वं कल्प्यत इति गम्यत इति ।

यद्वा 'सर्वपुराणानां पर' इति गुणवादोयं भूतार्थवाद एव वा कल्पनीय इति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वस्तुतः –

'मुमुक्षया परं स्थानं याते शुकमहात्मनि ।
सुतशोकाभिसंतप्तो व्यासस्त्र्यम्बकमैक्षत ।।
दृष्ट्वैव स महेशानं व्यासोभूद्विगतव्यथः ।
विचरन् स तदा लोकान् मुनिस्सत्यवतीसुतः ।।
मेरुश्रृङ्गे थ ददृशे ब्रह्मणः सुतमग्रजम् ।
सनत्कुमारं वरदं योगैश्वर्यसमन्वितम् ।।' (अ. १)

इत्यादिसूतोक्तेः शुकस्य परमपदप्राप्त्यनन्तरं व्यासस्य सनत्कुमारेण समागमस्ततश्च व्यासेन सनत्कुमारमुखादेतत्पुराणाख्यानं श्रुतमित्यवगमात् पुराणान्तरनिबन्धनात् पश्चादेवैतत्पुराणं व्यासेन निबद्धमिति कल्प्यते । यतो हि श्रीमद्भागवतं व्यासेन शुकायाध्यापितं, तच्च भारतवत् पुराणान्तरतोपि पश्चादेव निर्विण्णमनसा तेन नारदोपदेशाद्रचितमिति तत्र तत्र पुराणेषु स्मरणात् । ततश्च पुराणान्तरेभ्यः पश्चादेवैतस्य 'पुराण'स्य निबद्धत्वात् पूर्ववर्तिषु महापुराणेषु प्रायो न क्वापि पश्चाद्वार्त्वि न एतस्योल्लेख इति न किमप्याश्चर्यमिति । न च पूर्वापरग्रन्धविरोधः सनत्कुमारेण व्यासाय योयं पुराणार्थ उपदिष्टः स सर्वपुराणानामाद्यः, यच्चेदमिदानीमत्र (प्र) वर्तमानं तदर्थप्रतिपादकग्रन्थसन्दर्भरूपं प्रकृतं पुराणं तद् व्यासेन पुराणान्तरनिबन्धनात् पश्चादानुपूर्वीविशेषयोजनया निबद्धमिति न पूर्वापर(ग्रन्थ)विरोध इति ।

अथवा त्रिकालज्ञस्य मुनेः पश्चाद्भाविनः कार्यस्य पूर्वमपि निदर्शनसंभवात्–

तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषितम् ।'

इत्येतत्पुराणपरा (पूर्वोदाहृता) स्कान्दोक्तिरत्रापि सङ्गच्छत इति सर्वमेवावदातमित्यलं विस्तरेणेति ।

तद् यदेतत् स्कन्दपुराणमत्रास्माभिः संपाद्य प्रस्तूयमानं तस्य तावत् त्रीणि पुस्तकानि नेपालराष्ट्रियाभिलेखालये वर्तन्ते । एकं चान्यत् भारतीयकलिकातानगरीस्थित 'एशियाटिक सोसाइटी' नामकसंस्थायाः संग्रहालये ।

राष्ट्रियाभिलेखालये वर्तमानानि तानि पुस्तकानि त्रीण्यपि प्राचिनलिप्या तालपत्रेषु लिखितानि, प्राचीनानि, न केवलं प्राचिनान्यपि तूत्तरोत्तरं प्राचीनतराणि उच्चावचान्यपि सोदराणीवाग्रजातानुजातानि, यान्येव चोपजीव्यास्माभिः प्रथमत एतद्ग्रन्थसंपादनं समारब्धमिति ।

तेषु प्रथमं (पुस्तकं) तत्रत्ये सूचीपत्रे 'प्र. ८३१' क्रमाङ्कसांकेतेन 'स्कन्दपुराणम् (अम्बिकाखण्ड)' इति नाम्ना निर्दिष्टं षोडशाधिकशतद्वय(२१६)पत्रात्मकमादिमध्यान्तखण्डितमपूर्णं जीर्णं शीर्णमन्तरान्तराऽसंलग्नं प्रकीर्णं च 'क'पुस्तकमित्यस्माभिरत्र कृतसंकेतम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

द्वितीयं तत्रैव 'द्वि. २२९' इति क्रमाङ्कसंकेतेन खण्डविशेषानुल्लेखेन केवलं 'स्कन्दपुराण' मित्येवोल्लिखित-नामधेयमूनत्रिंशदधिकशतद्वय (२२९) पत्रात्मकं तथैव खण्डितं जीर्णं शीर्णं प्रकीर्णमन्तिमपत्रे समाप्तौ 'सं. २३४ चैत्रशुक्लद्वादश्यां लिखित' मिति कृतलेखसमयोल्लेखं प्रथमपुस्तकात् प्राचीनतरत्वेन संभावितं 'ख' पुस्तकमित्यस्माभिरत्र कृतसंकेतम् ।

तृतीयं पुनस्तत्रैव 'च. २२६०' इति क्रमसंख्या संकेतेन सह 'ग' पुस्तकवदेव खण्डविशेषानुल्लेखेन निर्दिष्टं केवलं द्वाविंशति (२२) पत्रात्मकं जीर्णं शीर्णमसंलग्नं प्रकीर्णं तथैव प्राचीनतरं 'ग' पुस्तकमित्यस्माभिः कृतसंज्ञम् ।

चतुर्थं तु पुनः प्राङ्निर्दिष्टभारतीयकलिकातानगरीस्थित 'एशियाटिक सोसाइटी' गतसंग्रहालये वर्तमानं स्कन्दपुराणस्य-'अम्बिकाखण्डः' इति नाम्ना निर्दिष्टं 'कागत' पत्रेषु देवनागरीलिप्या लिखितं २३२ पत्रात्मकमत्रत्य-त्रि. वि. वि. संस्कृताध्ययनसंस्थानाध्यक्ष 'डीन' पदभाजः श्रीमत्तोयनाथपाण्डेमहोदयस्य प्रयासादस्माभिः प्रस्तुतग्रन्थ-संपादनानन्तरं वर्षद्वयात् पश्चादेव प्रतिच्छवि(फोटोपत्र)रूपेण समुपलब्धं प्रारम्भे-मङ्गलार्थिना प्रतिलिपिकारेण रचितेन 'हस्त्याननः शकलचन्द्रनिभैकदन्त' इत्यादिवसन्ततिलकापद्येनैकेन युतमध्यायान्तेषु च प्रायः 'इति स्कन्दपुराणे एकाशीतिसाहस्र्यां संहितायामम्बिकाखण्डे' इत्यादिनार्वाक् प्रकल्पितेन पुष्पिकावाक्येनालंकृतं नातिप्राचीनं सुन्दर-मशुद्धिबहुलं मध्ये मध्ये खण्डितमपूर्णं चापि पूर्वसंपादितस्यैतस्य ग्रन्थस्य पुनः प्रकृतेस्मिन् (प्रति) संपादनकर्मणि खण्डितांशप्रपूर्त्यै संदिग्धस्थलेषु पाठादिनिर्णयार्थं च भृशमुपकारकमित्यादित एव समपेक्षितं चेत्यस्माभि-रत्रोपयोगार्थं 'घ' पुस्तकसंज्ञया कृतसंकेतमिति ।

तत्र 'क' संज्ञिते प्रथमपुस्तके- प्रथमं (१) पत्रमेकं, षष्ठतो नवमान्तं (६-९) पत्रचतुष्टयं, विंशत-श्चतुर्विंशान्तं (२०-२४) पत्रपंचकं, ४१ तमं ४३ तमं चेति पत्रद्वयं, ५६ तमं ५७ तमं चेति पत्रद्वयं, ६१ तमं पत्रमेकं, ११८ तमपत्रतः १४७ तमपत्रपर्यन्तं त्रिंशतपत्राणि, १८४ तमं पत्रमेकं, २१३ तमं २१४ तमं २१५ तमं चेति पत्रत्रयं, पुनः २२५ तमं २५७ तमं २५९ तमं चेति पत्रत्रयं तथा २७० तमम्(२७१ तमं वा) अन्तिमं पत्रमेक-मिति यथायोगं त्रिपंचाशत् (५३) पत्राणि प्रणष्टानि ।

यथा च तेषु – प्रथमोध्याय एकः (१) (प्रारम्भत एव प्रचुरतरो भागः), पंचमतो दशमपर्यन्तं (५-१०) (पंचमस्योत्तरभागतो दशमस्य पूर्वभागान्तरम्) अध्यायपंचकम्, सप्तदशत एकविंशपर्यन्तम् (१०-२१) अध्या-यपंचकम्, २९ तमाध्यायस्यान्तिमो भागः, ३० तमाध्यायस्य प्रारम्भभाग उत्तरभागश्च, तथा ३१ तमाध्यायस्य प्रारम्भांशश्च (इत्यध्यायत्रयम्), ३४ तमाध्यायस्य पूर्वार्धम्, ३६ (३७) तमाध्यायस्य प्रारम्भांशः, ७६ तमाध्यायतः १०५ तमाध्यायस्योपान्त्यभागपर्यन्तं त्रिंशदध्यायाः, १२८ तमाध्यायस्य पूर्वत एव बहुलो भागः, १५५ तमाध्यायतः १५७ तमाध्याय (पूर्वार्ध) पर्यन्तमध्यायत्रयं, १६३ तमाध्यायस्य पूर्वार्धम्, १७४ तमाध्यायस्य पूर्वतमो भागः, १७५ तमाध्यायस्यादित उपान्त्यपर्यन्तो भाग, स्तथा ऽन्तिमस्याध्यायस्यासमाप्ति समग्रो भाग इति केचित् पूर्णतया केचिच्चांशतो नष्टा अध्याया यावन्तश्चतुःपञ्चाश (५४) दिति । (क. पुस्तके यावन्तश्चतुःपंचाश (५४) दध्यायाः प्रणष्टा इति ।)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

'ख' संज्ञिते पुनर्द्वितीये पुस्तके द्वितीयं (२) पत्रमेकं, चतुर्थं पंचमं षष्ठमिति (४–६) पत्रत्रयम् १२ तमं पत्रमेकं, चतुर्दशतोऽ ष्टाविंशतिपर्यन्तं (१४–२८) पंचदशपत्राणि, ४० तमं पत्रमेकं, ४५ तमं (४६ तमं चेति) (पत्रद्वयम्) षष्टितमादित्रिषष्टितमान्तं (६०-६३) पत्रचतुष्टयं, ९६ तमं पत्रमेकं, ९८ तमात् १०० तमपत्र-पर्यन्तं पत्रत्रयम्, ११७ तमं, १२० तमं, १२६ तमं, १४८ तमं १५२ तमं, १७१ तमं, १९० तमं, २०७ तमं चे-त्यष्टौ, तथा एकसप्तत्युत्तरद्विशततमात् चतुःसप्तत्युत्तरद्विशततमरूपान्तिमपत्रपर्यन्तं (२७१–२७४) चत्वारीति साकल्येन द्वि चत्वारिंशत् (४२) पत्राणि प्रणष्टानि ।

तथा च तत्र प्रथमाध्यायस्यान्ततस्तृतीयाध्यायस्यारम्भपर्यन्तं समग्रो द्वितीयोध्याय एकः (१) चतुर्थादासप्तमम् (४–७) अध्यायचतुष्टयम्, द्वादशाध्याय (१२) एकः (मध्यमभागमात्रम्), त्रयोदशाध्यायस्य मध्यमतश्चतुर्विंशा-ध्यायमध्यपर्यन्तं (१३–२४) द्वादशाध्यायाः, २७ तमाध्यायस्योत्तरभागः, ३० तमोध्यायः, ३२ तमोध्यायः, ३३ तमाध्यायस्य पूर्वभागः, ६० तमाध्यायस्योत्तरभागः, ६२ तमोध्यायः, ७१ तमोध्यायः, ७२ तमाध्यायस्योत्तर-भागः, ७३ तमाध्यायस्य प्रारम्भभागः, ७५ तमाध्यायः, १५० (९४) तमाध्यायः, १५३ (९७) तमाध्यायः, १६४ तमाध्यायः, १७२ तमाध्यायस्य मध्योत्तरभागः, १८० तमाध्यायतस्तथा २१९ तमाध्यायश्चेति पूर्णतयांशतश्च नष्टा अध्याया द्वात्रिंश (३२) दिति ।

'ग' संज्ञितस्य तृतीयपुस्तकस्य केवलं द्वाविंशति (२२) पत्रात्मकत्वेन प्रकीर्णपत्रसंग्रहमात्ररूपत्वात् तस्य न नष्टानि पत्राणि नापि वा नष्टा अध्याया अत्र गण्यन्ते, किन्तु तत्रोपलब्धेषु पत्रेषु कतमे ऽध्यायाः के वा विषया वर्तन्त इत्येव निदर्श्यते ।

तथा च 'ग' संज्ञिते तृतीये पुस्तके – प्रथमं चतुर्थाध्यायपुष्पिकायुतं सरस्वतीप्रादुर्भाव - ब्रह्म-यज्ञसंवा-दादिकथोपेतं पत्रमेकम् । द्वितीयं ब्रह्म - यज्ञविवाद - ब्रह्मशिरश्छेदादिकथांशोपेतमेकम्, तृतीयं नवमाध्यायपुष्पिका-युतं सतीतपश्चर्या - सतीजन्म सतीदक्षविवादादिकथोपेतम्, चतुर्थं दशमाध्यायपुष्पिकायुतं, सतीदेहत्याग - शिव-दक्षविवाद - हिमवत्कश्यपसंवादादिकथोपेतम्, पंचमं (कश्यपोक्त) सुकेशोपाख्यानसंक्षेपरूपम्, षष्ठं हिमवच्छिखरे गौरीतपश्चर्योपक्रमकथनात्मकं साङ्कं, ६१ तमपत्ररूपम्, सप्तममुग्रमन्यूपाख्यानात्मकं साङ्क ६३ तमपत्ररूपम्, अष्टमादित्रयोदशान्तं सुकेशोपाख्यानीयपितृपुत्रसंवादात्मकनरकवर्णनादिरूपं ६५-६८ तमपत्रांकयुतं ६८ तम पत्रत आरभ्य ३७ तम ४२ - ४४ तमाध्यायपुष्पिकायुतं पत्रषट्कम्, चतुर्दशं गणयुद्धशुक्रशापादिकथोपेतम्, पंचदशा-द्यर्विंशान्तमशोकतरुपोतपुत्रग्रहणगतब्राह्मणामन्त्रणादिविसर्जनान्तकथोपेतं १३७ - १३८ तमाध्यायद्वयपुष्पिकायुतं पत्रपंचकम्, विंशं स्कन्दोत्पत्ति - गुह - शक्र विवादादिकथोपेतम्, एकविंशं द्वात्रिंशं च स्कन्दस्य सेनापत्या-भिषेचनोपक्रमीयमेकतरस्मिन् (एकत्रपत्रे) १४१ तमाध्यायपुष्पिकायुतं पत्रद्वयमिति प्रकीर्णरूपाणि द्वाविंशति पत्राणि ।

अन्यच्च पुनः– 'क' पुस्तके प्रायः सर्वत्र 'प्रथमोध्यायः, द्वितीयोध्यायः, नामाध्यायः ३, अध्यायश्चतुर्थः, इत्येवं रीत्या ऽध्यायक्रमसूचकसंख्या उक्ताः, केवलं १६६-१६७ तमाध्याययोस्तथा १६९ तमाध्यायात् १७२ तमा-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ध्यायपर्यन्तं चेति षट्सु स्थलेष्वेवाक्षराङ्का दत्ताः । 'ख' पुस्तके सर्वत्राक्षराङ्का एव दत्ताः । 'ग' पुस्तके तू भयथैवाङ्काः प्रयुक्तास्तत्रेति ।

तथा च तत्र पुस्तकत्रयेपि सामान्यतो येक्षराङ्काः प्रयुक्तास्तेषु केचिदत्र प्रदर्श्यन्ते । यथा–



किंच क. ख. पुस्तकयोर्द्वयोरपि क्वाचित्कपाठभेदमन्तरेण ग्रन्थः सर्वोपि समानः समानानुपूर्वीकश्च दृश्यते, ग. पुस्तके च तथैव प्रकल्प्यते । तत्र क. पुस्तके (घ. पुस्तके चा) ऽध्यायसमाप्तिषु प्रायः सर्वत्राध्यायसंख्यास्तत्सूचका अंका वा दत्ता न तु श्लोकसंख्या । किंतु ख. पुस्तके अध्यायान्तेषु प्रायः सर्वत्रैव श्लोकसंख्यासूचका अङ्का दत्ताः। अध्यायाङ्कास्तु श्रीगिरिवरप्रदानाध्याय (६०) त आरभ्यैव दत्ताः । ततः पूर्वं तत्राध्यायाङ्का नोपलभ्यन्ते । केवलं नन्दिविवाहवर्णनाध्यायान्ते यत्र क.पुस्तके पंचविंशतिमोध्याय इति लिखितं तत्र ख. पुस्तके 'नन्दिकेश्वरमहाभाग्यं नाम' (अध्याय) इदन्तरम् 'आदितः प्रभृतिराध्यायाश्चतुर्विंश'दिति लिखितमुपलभ्यन्ते, कौशिकीचरितोपसंहारान्ते यस्मिँस्थले ख. पुस्तके 'स्कदपुराणे महिषवध'' इति प्रकरणसमाप्तिसूचकं वाक्यं दृश्यते तत्र क. पुस्तके न कश्चन तादृगुल्लेखो दृश्यते । किन्तु स्थलान्तरेष्विवाध्याय(प्रकरण)समाप्तिसूचकं भिन्नवृत्तं पद्यं 'मालिनीपद्यं' ख. पुस्तक इवा तात्रापि दृश्यन्ते । पुनश्च तदुत्तरं क. पुस्तके यत्र ६८ तमोध्यायस्तत्र ख.पुस्तके ६९ तमोध्यायः, एवं क. पुस्तके एकत्राध्यायसमाप्तौ पुष्पिकायां यत्र (७० तमाध्याये लेखनीये) ऊनसप्तति (६९) संख्या लिखिता तत्र ख.पुस्तकेपि सप्तति (७०) संख्यायां लेख्यायां षष्टि -(६०) संख्या लिखिता, एवमन्धकवरप्रदानाध्याये कपुस्तके यत्र ७२ संख्या दृश्यते तत्र ख. पुस्तके ऽकस्मात् १३० संखया दत्ता दृश्यते, एवमेवोत्तरत्र त्रिष्वपि, न केवलं त्रिष्वेवापितु चतुर्ष्वपि पुस्तकेषु अध्यायसंख्यानां परस्परं भूयान् विसंवादो दृश्यते, न केवलमन्योन्यमेवेत्थं विसंवादः, अपितु एकस्मिन्नपि पुस्तके (क पुस्तके ख पुस्तके घ. पुस्तके वा) स्वस्मिन्नेव तत्रतत्राध्यायसंख्यासु भूयान् विसंवादो व्युत्क्रमश्च दृश्यते, महाँश्चान्तरोध्यायसंख्यासूचकानामङ्कानां चेति ।

एवमेव घ. पुस्तकेपि स्कन्दोत्पत्त्याख्यानतः पूर्वं कथांशद्योतको ग्रन्थः प्रायः समानः समानानुपूर्वीकश्च, अध्यायक्रमश्च प्रायः समानः, केवलमन्तरान्तरा तत्र पद्यानि क्वचिदधिकानि क्वचित् खण्डितानि, पाठभेदश्च भूयान्, स्कन्दोत्पत्त्याख्यानत आरभ्य तारकोत्पत्तिकथा तारकयुद्धं तद्वधाख्यानं, क्रौञ्चदारणं तत्संजीवनं मातृ्णामुत्पत्त्याख्यानं चेत्यादिषु पाठोत्यन्तं भिन्नो विस्तृततरश्च, अध्यायाङ्का अपि पूर्वत्र प्रायः क. पुस्तकेन समाना, उत्तरत्रैव कतिपयस्थलेषु प्रमादकृतोध्यायांकविषयकोध्यायसमाप्तिविषयकश्च विसंवादो दृश्यते तत्रेति ।

तत्र मूले पुस्तकचतुष्टयेपि प्रायः समानेप्यध्याये परस्परविसंवादितया व्युत्क्रमतया चोपलभ्यमाना अध्यायसंख्याद्योतका अंकाः केचिद् अत्र निदर्श्यन्ते यथा–

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

क, पुस्तके	ख. पुस्तके	ग. पुस्तके	घ. पुस्तके	पुष्पिकोक्तविषया
२५	२४	×	२५	नन्दिकेश्वरमहाभाग्यं नाम
६९	६०	×	६९	श्रीगिरिवरप्रदानाध्यायः
७३	१३०	×	—	अन्धकवरप्रदाना "
७५	१०२	×	—	हिरण्याक्षसभाप्रवेशः
×	१५५	×	×	सागरप्रवेशाध्यायः
×	१५५	×	×	किंकरादेशना "
१०५	१६०	×	१०४	वराहाप्यायनाध्यायः
१०६	१६१	×	१०५	त्रिशूलक्षेपणा "
१०७	१६१	×	—	हिरण्याक्षवधाध्यायः
१०८	१६२	×	१०७	वराहोत्सवाध्यायः
×	×	×	१११	पार्वतीकृतधर्मोपदेशसमाप्तिः
११२	१६६	×	११२	मन्दरारोहणाध्यायः
११३	१६६	×	—	अमृतमथना "
१२२	१७५	×	—	हरिश्चन्द्रपुरिश्चन्द्रवर्णना "
१२३	१७६	×	—	राममाहात्म्याख्यानम्
१२४	१७६	×	—	कश्यपपृथ्वीभावः
१२५	(१७६)	×	×	ध्वजयुद्धम्
१२६	१७६	×	—	सगरोत्पत्त्यध्यायः
१२७	१७७	×	१२७	गङ्गावतरणाध्यायः
१३४	१८४	×	—	गणयुद्धम्
१३५	१८४	×	—	" "
१३६	१८५	×	—	" "
१५८	२०७	×	१४८	अशोकतरुपुत्रग्रहणोपक्रमः
१५९	२०८	×	१४९	तरुविवाह० ब्राह्मणामन्त्रणम्
१६०	(२०९)	१३७	×	तरुपुत्रग्रहणम्
१६१	२१०	१३८	१५०	विप्रामन्त्रणसमाप्तिः
१६३	—	१४१	—	स्कन्दाभिषेकानुज्ञा०
१६६	२१४	×	—	श्वेतवरप्रदानाध्यायः
१६७	२१५	×	—	शिवायतनवर्णनम्
१७५	२२३	×	—	ध्यानविधौ द्वितीयः २
१६६	२२४	×	—	" " तृतीयः ३
१६७	२२५	×	—	" " चतुर्थः ४ इ० ।

— इत्यादि ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

इत्थमत्र समाने ग्रन्थे समाने विषये समानेऽप्यध्याये ऽध्यायसंख्यासु विपर्ययो भृशमसामञ्जस्यमुत्पादयति, (घ. पुस्तके त्वधिकानां पाठानामत्यन्तबाहुल्यमपि) । तथाप्यस्माभिरत्र ग्रन्थे प्रथमं पुस्तकत्रयाधारेण यथासंभवमध्यायाङ्कसंवादो विहितः । अत्रादितः प्रभृति समाप्त्यन्तगणनायां साकल्येन त्र्यशीत्युत्तरशतम् (१८३) अध्यायाः (घ. पुस्तकानुसारेण गणने १८५ अध्यायाः) संपद्यन्ते ।

तथा च मिथोऽध्यायाङ्कविसंवादेपि क्वाचित्कपाठभेदमन्तरा ताडपत्रपुस्तकेषु सर्वत्र ग्रन्थविसंवादो न क्वाप्युपलब्धः । केवलं घ.पुस्तक एव परतः क्वचित्क्वचिद् भूयान्पाठभेदो दृश्यत इति ।

अत्रैतत्पूर्ववर्त्तिनां प्राचीनपुस्तकानां कालवशाज्जीर्णशीर्णतया नष्टप्रायाणां यथालब्धमंशनुपगृह्य प्रतिसंस्कारे क्रियमाणे तदा यतो यदीयानि पत्राणि यो यादृशो वांशोऽधिगतः स तथैव प्रतिलिपीकृत्य ईदृग्रूपेण स्थापितः स्यादिति प्रतिभाति । अस्माभिरपि पुस्तकचतुष्टयाद्यथालब्धमंशमुपसंगृह्य ग्रन्थ एष यथास्थित एव प्रस्तुत इति ।

तदेतस्य स्कन्दपुराणस्य यान्युच्चावचानि त्रीणि पुस्तकानि नेपालराष्ट्रियाभिलेखालये वर्तन्ते तेषु न क्वापि खण्डविशेषोल्लेखो दृश्यते । पुस्तकत्रयेऽप्यध्यायपुष्पिकास्वन्यत्र वा क्वचिद् 'अम्बिकाखण्ड' इत्युल्लेखो न दृष्टः । तेषां केवलमेकस्य 'प्र. ८३१' इतिक्रमाङ्कयुक्तस्य क. संज्ञितस्य प्रथमपुस्तकस्य 'अम्बिकाखण्ड' इति नाम दत्तं तत्रत्ये सूचीपत्रे ।

तत्र म. म. हरप्रसादशास्त्रिमहोदयेनापि 'द्वि. २२९' इतिक्रमाङ्कयुक्तस्य ख.सञ्ज्ञितस्य द्वितीयपुस्तकस्य खण्डविशेषानुल्लेखेन केवलं 'स्कन्दपुराण' नाम्ना सविवरणमुल्लेखः कृतः सन् १९०५ तमे ख्रिष्टाब्दे प्रकाशिते–

'A catalogue of Palm leaf and selected Paper mss belonging to the Durbar Library, Nepal.'

इतिनामके स्वनिर्मिते सूचीपत्रे, यथा ।

(२२९ ।) स्कन्दपुराणम्, Folio 247, lines 5 to 7 on a page,

Incomplete, Leaves are not in order.

तथा च तद्भूमिकायामविकला तदुक्तिराङ्गलभाषायाम्–

"Skandapurana, pp 8 and 141, No. 229, is in Gupta character. Professor Bendall and myself carefully examined the palaeography of the Ms. at the Durbar Library, and we came to the conclusion that the work must have been copied at least two hundred years before the Paramesvaratantra in transitional Gupta characters, described by prof Bendall in his cam. Cat. So The NIS. must have been copied before 651 A. D., as the Paramesvaratantra was copied in Harsha era 252 = 859 A. D. [See my report p. 4.].

Since writing that report I have carefully compared my reconstruction of the Skandapurana in the Durbar Liberary with the copy of the Ambikakhanda of the Skandapnrana

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

in the Library of the Asiatic Society of Bengal, and have found them to differ as much as any two Pauranika works of anyt cult may differ from each other.

As there is no mention of Khandas in any of the colophons of the Purana as found in the Durbar Library, it may be inferred that it formed the Purana entitled Skandapurana. It gradually branched out into somany Khandas and somany mahatmyas, that scholors thought that the Purana hardly existed excepted in Khandas and mahatmyas.'' इति ।

शास्त्रिमहोदयास्तत्र भूमिकायां कथयन्ति यत्–

२२९ संख्याङ्कितमेतत् स्कन्दपुराणं गुप्ताक्षरे लिखितं वर्तते, प्राध्यापकबेण्डालमहाशयेन सह ते दरबारपुस्तकालयस्यैतत्पुस्तकसंबन्धिप्राचीनलिपिविज्ञानं सावधानतया परीक्ष्यैतन्निष्कर्षं प्राप्तवन्तो यत् पुस्तकमेतदवश्यं प्रा. बेण्डालमहाशयेन स्वकीये क्याम्ब्रिजसूचीपत्रे वर्णितात् 'पारमेश्वरतन्त्र' पुस्तकाद् द्विशतवर्षपूर्वमेव (न कथंचित्त-तोर्वाक्) लिखितं (प्रतिलिखितं - प्रतिलिपिकृत) भवेदिति (भवितुमर्हतीति)। यतो हि तत् पारमेश्वरतन्त्रपुस्तकं २५२ तमे हर्षाब्दे = अर्थात् ८५९ तमे खिष्टाब्दे लिखित (प्रतिलिपिकृत) मिति [तदीयविवरणे ४ पृष्टे द्रष्टव्यमिति च]

परतश्च ते कथयन्ति यत् – तद्विवरणलेखनावसरे ते सावधानतया दरबारपुस्तकालयवर्तिनोऽस्य स्कन्दपुराणस्य संबन्धिनः स्वकृतप्रतिसंस्करणस्य वङ्गप्रदेशीय - एशियाटिक सोसाइटी समाख्यसंस्थागतपुस्तकालयवर्तिना स्कन्द-पुराणीयाम्बिकाखण्डेन सह सावधानतया तुलनां कृत्वा तयोर्मिथस्तावन्तमेव भेदमासदितवन्तो यावान् कस्यचित् संप्रदायस्य संबन्धिनोर्द्वयोः पौराणिकग्रन्थयोरासाद्यत इति ।

दरबारपुस्तकालयवर्तिनोऽस्य पुराणस्य पुष्पिकास्वेकत्रापि कस्यचित् खण्डस्यानुल्लेखादेतत् कल्प्यते यदिदं पुराणं (प्रथमं) स्कन्दपुराणनामैवासीत्, ततः (पश्चात्) क्रमेणैतदेतावदधिकसंख्येषु (अनेकेषु) खण्डेषु माहात्म्येषु च विभक्तं - शाखारूपेण प्रसृतं - यदेतत् पुराणं खण्डव्यतिरेकेण माहात्म्यव्यतिरेकेण च न कथंचित् कांचित् सत्तां भजत इतीव तर्कयन्ति स्म विद्वांसः, इति ।

तदित्थं शास्त्रिमहोदयैरेतस्य पुराणस्य नाम्बिकाखण्डत्वं नापि वा किंचित् खण्डान्तरत्वं निश्चयेनोक्तं किन्त्व-म्बिकाखण्डादस्य किंचिद्भिन्नत्वमेव दर्शितमिति स्फुटमेव ।

किं च तदानीं दरबारपुस्तकालये वर्तमानमेतस्य स्कन्दपुराणस्य पुस्तकान्तरं (यदिदानीं तत्रत्ये सूचीपत्रे प्र. ८३१ इति संख्याङ्कितमत्रास्माभिः संपादनक्रमे क. पुस्तकमिति कृतसंज्ञं) शास्त्रिमहोदयानां दृष्टिगोचरे नैवापतितमिव, अन्यथा कुतस्तस्योल्लेखस्तत्र तैर्नकृत इति ।

पं. ज्वालाप्रसादमिश्रास्तु एतत् पुराणं स्कन्दपुराणस्याम्बिकाखण्डमेव कथयन्ति । यथा तत्कृते ऽष्टादश-पुराणादर्पणनाम्नि पुस्तके (अविकला तदुक्तिर्हिन्दीभाषायाम्)–

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

"महामहोपाध्याय हरप्रसाद शास्त्री महाशय और बेण्डल साहब नेपाल के राजपुस्तकागार मे खृष्टीय ७ म शताब्दी की हाथ की लिखी एक स्कन्दपुराण की पोथी देख आये हैं। शास्त्री महाशय ने नेपालके राजपुस्तकालय की प्राचीन पोथियों की जो सूची प्रकाश की है उस मे उक्त स्कन्दपुराण की पोथी के प्रत्येक अध्यायकी पुष्पिका उद्धृत हुईहै, किन्तु यह पोथी स्कन्दपुराण के किस खण्ड के अन्तर्गत है इस विषयमे कोइ बात नहीं लिखी। तथापि हम ने उक्त अध्याय पुष्पिका की आलोचना करके उस को स्कन्दपुराण का अम्बिकाखंड स्थिर कियाहै। अम्बिकाखण्ड की विषयानुक्रमणिका और उक्त नेपाल की पोथी की अध्यायपुष्पिका परस्पर मिलाकर देखने से इस विषयमे फिर कोइ भी सन्देह नहीं रहेगा। बडे ही आश्चर्य का विषहै नारदीय पुराण मे यह अम्बिका खण्ड सप्तम (सप्त?) खण्ड मे नहीं गिना है। किन्तु अम्बिकाखण्ड की पोथी और शंकरसंहितानिर्दिष्टखण्डादि का विषय आलोचन करने मे आपत्ति नहीं रहती।" इति।

तत्र मिश्रमहोदया एव प्रमाणम्। मया तु घ.पुस्तकव्यतिरेकेणान्यत्र पुस्तकत्रयेऽपि नास्य पुराणास्य क्वचिद-म्बिकाखण्डत्वेनोल्लेखस्तत्रान्यत्र वोपलब्धः। केवलमेकस्मिन् पुस्तके-अस्माभिरत्र घ.पु. संज्ञया कृतसंकेते एशियाटिक-सोसाइटीगत-संग्रहालयवर्तिनि स्कन्दपुराणपुस्तके – 'इति श्रीस्कन्दपुराणे एकाशीतिसाहस्र्यां संहितायामम्बिकाखण्डे' इत्यादिना तस्य अम्बिकाखण्डत्वेनोल्लेखः कृतस्तत्पुष्पिकासु। तद्दर्शनमूलैव च मिश्रमहोदयानामन्येषां च केषांचिदेतस्य स्कन्दपुराणस्य 'अम्बिकाखण्ड' त्वप्रकल्पनोक्तिर्नान्या। तत्र पुष्पिकासु अम्बिकाखण्डत्वोल्लेखश्च न प्रामाणिकः यतो हि सोंशः केनचिन्नातिविज्ञेन तत्प्रतिलिपिकर्त्रा लेखकेन स्वयं प्रकल्प्य पश्चाद्योजितो न मौलिकः किन्तु प्रक्षिप्त इति स्फुटं प्रतिभासमानत्वात्, एवं तस्यं 'अम्बिकाखण्ड' इति नामकरणं ततस्तेनैव नाम्ना तस्य तत्र संग्राहलये पञ्जीकरणं च सर्वमेव तथैव तत्पुष्पिकादर्शनवशान्निष्पन्नं न यथार्थमिति।

यदि नाम कदाचित् कुतश्चिदेतस्य पुराणस्य –

'पंचाशत्खण्डमण्डितम्।'

'एवं परंपराप्राप्तं शतसंख्यैर्द्विजोत्तमैः।'

इत्यादिप्रागुदाहृतस्कन्दवचनप्रमाणतः पंचाशतखण्डेषु शतखण्डेषु वान्यतमत्वमेतस्य कल्प्यं भवति तदाप्ये-तस्योपक्रमोपसंहारादितः प्राङ्निर्दशितरीत्या 'स्कन्दजन्म'खण्डत्वमेवास्य सिद्ध्यति (प्रतिपत्तव्यं च भवति) नाम्बिका-खण्डत्वमिति।

तथा चैतत् पुराणमाम्बिकाखण्डं मन्यमानैर्मिश्रमहोदयैरेनदम्बिकाखण्डं नारदीये सप्तमखण्डे (स्कन्दपुराणीय-सप्तखण्डेषु तदन्तर्गततया वा) न गणितमिति महत आश्चर्यस्य 'विषय इत्युक्तम्। तत्रैतस्योपपुराणत्वेन महापुराण-त्वाभावात् नारदीये स्कन्दमहापुराणीयखण्डेषु (पृथक्तया तदन्तर्गततया वा) गणाना न कृतेत्यत्र किमाश्चर्यमिति।

नेपालराष्ट्रियाभिलेखालयीयसूचीपत्रे एतस्य 'अम्बिकाखण्ड' त्वेनोल्लेखश्च मिश्रमहोदयोक्तिसमाश्रयेणेत्युक्तं तत्रैव विशेषविवरणे, यथा –

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

"प्र. ८३१ स्कन्दपुराणम् (अम्बिकाखण्डः), पत्रांक २–१७३, २ तः १७५ अध्यायान्तं खण्डितं प्रकीर्णं च। आकार२० ५/८ × २ पंक्तिः ६–७, ग्रन्थसंख्या ८०००, लिपिः गुप्तः, अतिप्राचीनं जीर्णं च।"

"धेरै प्राचीन भई पत्र पनि खजमज, की. का., मू. का. भई पत्रांक पनि धेरै नभएकोले मिलाउँदा आदिको पत्र नभई पत्रांक २ देखि ६ संम, (अध्याय २ देखि ४ संम), १० देखि १९ संम (अ. १०-१६), २५ देखि ४० संममा (अ. २१–२९), र ४२ को पत्र १, ४४–५५ पत्रमा (अ. ३२–३३), प. ५८–६० मा (अ· ३४–३५), प. ६२–११७ मा (अ. २७–७५), र १२९ को पत्र १, प. १४८–१७३ संममा (अ १०५–१२०), संम भई यहाँसंम पत्रांक भएको अध्यायको क्रमवाट बीचबीचमा खण्डित भई मिलेको छ। त्यहाँ पछि पत्रांक नभएकोमा १२२ देखि १७५ अध्यायसंमका असंलग्न पत्र गोटा ४५, फेरि अध्यायाङ्कमा अक्षराङ्क अ. चु, भएका असंलग्न गोटा २८ (?) फेरि पत्रांक पनि नभएका अध्यायपुष्पिका पनि नभएका बीचबीचका फुटकर पत्र १४ (यी माथि लेखेका बीचका टूट पत्र जस्ता छन्), सो सबै मिलाउँदा जंमा पत्र २१६ छन्। पुष्पिकामा स्कन्दपुराणे भन्ने वाक्य भई यो खण्ड हो भन्ने केही खुल्दैन तापनि पं. ज्वालाप्रसादले लेखेको अम्बिकाखण्डको सूचीमा भएको ३।४ अध्यायादिमा नैमिषारण्योत्पत्ति, ब्रह्मप्रजापत्याभिषेक रुद्रजन्म आदि कथा मिलेको हुनावे अम्बिका खण्ड हो भन्ने बुझिन्छ। यसको अक्षर गुप्ताक्षर जस्तो छ। प्राचीन अक्षर हुनाले साबिकमा भुजबल भन्ने लेखिएको हो।" (इति नेपालीभाषायां तद्विवरणम्।)

पं. श्रीकृष्णमणित्रिपाठिना च (चौखम्बा सुरभारती-प्रकाशन) वाराणसीतः प्रकाशिते स्वकृते "पुराणपर्यालोचन"नाम्नि पुस्तके (गवेषणात्मकभाग · चतुर्थपरिच्छेदे) (२३७ तमपृष्टे)–

म. म. हरप्रसादशास्त्रिणः च नेपालस्थ राजकीयपुस्तकालये सप्तमशताब्द्यां लिखितं स्कन्दपुराणस्यैकं पुस्तकामुपलभ्य यद् "वर्तमानस्कन्दपुराणतः पूर्ण मिलती" ति वदता वर्तमानस्कन्दपुराणेनास्य पुराणस्य तादात्म्यमुक्तम्। तत्र वर्तमानस्कन्दपुराणमिति कतमं पुराणं तस्याभिप्रेतं न ज्ञायते। नारदीयोक्तसप्तखण्डात्मकवर्तमानप्रसिद्धस्कन्दमहापुराणतोऽस्य सर्वथा भिन्नत्वादिति। एतच्च प्रागेवोपरिष्टान्निर्दिशितमस्माभिः।

एवमेव पुराणसम्बन्धे लिखितान्यपि कतिपयपुस्तकानि प्रकाशितानि वर्तन्ते, तानि चात्र विषये (एतत्पुराणसंबन्धे) प्राय इत्यमेवैतत्स्थालीपुलाकतां गतानीति मया न तानि विलोकितानीति न तेषां मतान्यत्र निर्दशितानि।

अत्र यद्यपि पं. ज्वालाप्रसादमहोदयेन ग्रन्थोयमम्बिकाखण्डान्नान्य इत्युक्तं, तथापि यावत् क्वचित् पुस्तकान्तरेऽप्युपक्रमोपसंहारयोरध्यायसमाप्तिसूचकपुष्पिकादौ ग्रन्थान्तरे वाऽस्य 'अम्बिकाखण्डत्वेनोल्लेखो न दृश्यते, एतस्य तथात्वे दृढं प्रमाणान्तरं (प्रमाणं) वा नोपालभ्यते तावदेतस्याम्बिकाखण्डत्वमभ्युपगन्तुं मनो मे न कथंचिदुत्सहते। यदि वास्य किंचित्खण्डत्वमभ्युपगन्तव्यं तथाप्युपक्रमोपसंहारादितः सिद्धं (प्रत्यक्षतो दृष्टं) स्कन्दजन्मखण्डत्वमेवास्याभ्युपगन्तव्यं नान्यदिति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वस्तुतः पुराणमेतन्न किञ्चित्खण्डात्मकं - न स्कन्दपुराणस्य - महापुराणस्योपपुराणस्य वा - किञ्चित्खण्डं किन्तु स्वस्मिन्नेव पूर्णं स्वतन्त्रमखण्डं च पुराणान्तरमेतत् । परञ्च तद्ग्रन्थसमाप्तावुपान्ते –

१) आद्यं पुराण (पुण्य) मुमापतेर्द्विजवृषाः स्तोत्रानुवादं परं

२) देव्याश्चापि महाप्रभावकथनं सर्वागमैरन्वितम् ।

३) स्कन्दस्योद्भवविक्रमे (मै!) . . . .

४) . . . . ॥

इत्याद्युपसंहारवाक्यदर्शनाद्वरमेतस्य पुराणस्य पुराणान्तरीयखण्डात्मकत्वकल्पनापेक्षया यथाक्रमम् (१) उमापतिचरितम्, (२) उमाचरितम्, (३) स्कन्दचरितम्, (४) पाशुपतयोग (विधि) वर्णनं चेति प्रकरणत्रयात्मकत्वं (प्रकरणचतुष्ठयात्मकत्वं वा) कल्पयितुमुचितमिति मे प्रतिभातीति । किं बहुना प्रत्यक्षदर्शिनो विद्वांस एवात्र प्रमाणम्, यत्तेभ्यो रोचते तदेवास्त्वित्यास्तामिदानीमेतदेतावदेवेति । प्रकृतमधुनोपगरामः ।

अत्र पुस्तकत्रितयेपि नष्टानि पत्राणि नष्टाश्चाध्यायाः पृथगुपरिष्टान्निर्दशिताः । तेषु त्रिष्वपि समानरूपेण सर्वथा प्रणष्टाः कथाविषयांशाः केचिदत्र निदर्श्यन्ते । ते च यथा–

१) ब्रह्मलोकविभूषणयाः सरस्वत्या मर्त्यलोकावतरणकारणविवरणकथांशाः ।

२) तत्प्रसंगागतब्रह्मकपालधारण तत्संस्थापनकथांशाः ।

३) कल्माषपादोपाख्यानम्, पराशरोत्पत्तिकथा, व्यासोत्पत्तिकथा ।

४) वसिष्ठकौशिकयोर्वैरोद्भव– तत्समापनकथा ।

५) नन्दितपश्चर्याकथा ।

६) यक्षानुग्रहकथांशाः ।

७) तपश्चर्यार्थं गौर्याः प्रस्थानं हिमवच्छिखरारोहणकथांशाः ।

८) हिरण्याक्षसभाप्रवेशानन्तरकालिकप्रारम्भांशाः ।

९) हिरण्याक्षस्य विजययात्राप्रसङ्गेन वरुणलोकाद्यमलोकाभिगमनकथांशाः ।

१०) वराहावतारसंबन्धिप्रारम्भिकः कथांशाः ।

११) अग्निसंक्रामितस्य स्वसन्धारितस्य हरोग्रतेजसो गङ्गया यदुत्सर्जनं तत्समनन्तरवर्त्तिकथास्वल्पांशश्चेति ।

अत्र त्रिष्वपि पुस्तकेषु प्रणष्टाः खण्डिता वा येंशास्तेषु भूयांसोस्माभिः घ पुस्तकादुद्धृत्य यथासंभवं प्रपूरिताः । घ. पुस्तकेपि अनुपलब्धाः स्वल्पावशिष्टा अंशाः ग्रन्थपाठत एवानुमातुं शक्या इति नात्र प्रदर्शिताः ।

तथा च घ.पुस्तके ऽधिकत्वेनोपलब्धाः कतिपयेंशाः । यथा –

१] पार्वत्या धर्मोपदेशाख्याने देव्यन्तरकृतधर्मोपदेशाख्यानकथांशाः ।

२] मातृृणामुत्पत्त्याख्याने कतिपयेंशाः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

३] विनायकोत्पत्तिकथा ।
४] स्कन्दोत्पत्त्याख्याने कतिपयेंशाः ।
५] क्रौञ्चदारणं तत्संजीवनाख्याने कतिपयेंशाः ।
६] तारकोपाख्यानतद्युद्धविस्तारकथांशाः ।
७] 'एकाशीतिसाहस्त्र्यां संहितायामम्बिकाखण्डे' इति पुष्पिकांशाः ।

एतावतात्र पुस्तकचतुष्टयस्यापि समान्यतो दृष्टं साधर्म्यं वैधर्म्यं चोप पादितम् इति । इदानीमेतत्पुराण-विषयमधिकृत्य किञ्चिदुच्यते –

पुराणेस्मिन्ननेके हृदयाकर्षका विषयाः प्रतिपादिताः । तेषु कतिपये पुराणान्तरसाधारणा अपि वर्णना परिपाट्या असाधरणतया विदग्धानां हृदि भृशं चमत्कृतिजनकाः । षण्णामिव ऋतूनां सर्वेषां भावानां सर्वरसानां चात्र एकत्राद्भुतः समागमस्तत्रतत्रालंकारविशेषचमत्कारश्च कस्य न कौतूहलाय ।

यद्यपि सर्वाण्यपि पुराणानि स्वस्मिन्नदभ्रं वैशिष्टयं भजमानानि व्यासस्याद्भुतं रचनाकौशलमुद्द्योतयन्ति, तथाप्येतस्योत्तरोत्तरमपूर्वाणि हृदयासेचनकान्याख्यानोपाख्यानानि तत्तत्संबद्धानि गिरिनदीजलाशयोद्यानोपवनपुण्यायतन-पुण्यस्थानादिवर्णनानि भृशं मनो हरन्ति । यत्रैकतोत्रत्यानि नैकविधयुद्धवृत्तान्तोपवर्णनानि यथाऽपूर्वं वैचित्र्य-मावहन्ति तत्रान्यतो विविधयोगचर्याविधिवर्णनान्यपि तथैवानुपममुत्कर्षातिशयं स्वस्य दर्शयन्ति । किं बहुना, अनेके विषया अत्र स्वस्यानुसन्धानार्थं प्रतिपदं विदुषः समाह्वयन्त इव तत्समागमं प्रतीक्षमाणा इव दृश्यन्त इत्येतत् सर्वमेतद्-ग्रन्थस्याध्यायनतः स्फुटीभविष्यति ।

सर्वतो दिक्षु देशविशेषेषु स्थानविशेषेषु चावस्थितानि शंभोः पुण्यायतनान्यत्र निर्दिष्टानि, उदयगिरावस्ता-चले मेरुशृङ्गे हिमालये विन्ध्यशैले गन्धमादने दिवि भुवि चान्तरिक्षे क्षीरसागरे दक्षिणोदधितीरे गङ्गासागरसङ्गमे पश्चिमोदधौ सिन्धुसागरसङ्गमे यवनेषु नेपालेषु भातिषु च तत्र तत्र समवस्थितानां शिवलिङ्गानां पुण्यानां तदायतनानां च सविश्रम्भमुल्लेखः केषांचित्संक्षिप्तं परं रोचकं च वर्णनमत्राकिंचनानामपि दृष्टिश्रुत्योः सुखावहं स्वान्तःप्रीणना-यालौकिकं दोहदं चेति ।

यद्यप्येतत्सर्वं यथासंभवमत्रास्माभिः सोद्देशमुद्धृत्य पुस्तकस्यान्ते विषयान्तरैः समं परिशिष्टरूपेणैकत्र संगृह्य स्थापितं, तथापि तेषु नेपालविषयान्तर्वर्तिनां पशुपतिप्रभु - गोकर्ण - गौरीशिखर - कुचकुण्डा - लंकारधारा-प्रभृतिनां कतिपयपुण्यस्थलानामेतत्पुराणोक्तः प्रसङ्गः संक्षेपेणात्रापि तावत् किञ्चिदुदाह्रियते । यथा –

पशुपतिप्रभुः -

तत्र १६७ तमेऽध्याये शिवायतनवर्णनप्रसङ्गे श्रीपशुपतेरुल्लेखो यथा–

'नेपालेषु च देवेशं दृष्ट्वा पशुपतिं प्रभुम् ।
दशाश्वमेधानाप्नोति रुद्रलोकं च गच्छति ।।
देहभेदं च संप्राप्य पशुत्वाद्विप्रमुच्यते ।।' इति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पशूनां जीवमात्राणां पतिः पालको नियन्ता त्राता पाता स्वामी पशुपतिः । तद्दर्शनमात्राज्जीवः पशुपाशतो विमुक्तो भवतीति ।

तदिदं पुण्यमायतनं काष्ठमण्डपप्रदेशे नेपालराजधान्याः कान्तिपुरतः पूर्वत ईषद् दूरे देवपत्तननाम्नि स्थले पुण्यसलिलाया वाग्वत्या दक्षिणे तटे वर्त्तते । यत्र जगदधिष्ठातुः शिवस्य श्रीपशुपतिनाथनाम्ना विश्रुतं चतुर्मुखं (पञ्चवक्त्रं) महालिङ्गं, यन्नाम्ना चैतत् क्षेत्रं पाशुपतक्षेत्रमित्युच्यते । (नर्मदापरिसरवर्त्ति पुराणं पशुपतिक्षेत्रं तु कारोहणाख्यमन्यदेवेति) ।

उत्तरगोकर्णम् –

तत्र तावद् गोकर्णनाम्ना क्षेत्रद्वयं स्मर्यते - दक्षिणगोकर्णमुत्तरगोकर्णञ्चेति । द्वयोरप्युत्पत्तेराख्यानं समानमेव । तद्यथा –

पुरा वृत्रासुरभयात् त्रस्तैर्ब्रह्मविष्ण्विन्द्रादिदेवैः शरणार्थं महादेवमन्विष्यद्भिरेकश्रृङ्गमृगरूपेण मृगयूथ-मध्ये विचरन्तं तं पार्वतीवचनाद्विज्ञाय त्रिभिरपि देवैर्युगपदेव सहसा स श्रृङ्गे गृहीतः । गृहीतमात्रस्तु मृगः श्रृङ्गं विहायादर्शनं गतः । श्रृङ्गं त्रिधाभग्नमेकैकखण्डरूपेण त्रयाणां देवानां हस्तेष्वेकैकशोऽवस्थितिमिति । तेषु च खण्डत्रयेषु विष्णुहस्तस्थितं विष्णुरादाय वैकुण्ठं प्रययौ, द्वितीयं खण्डं ब्रह्मणा तत्रैव स्थापितमित्युक्तं तत्र । यथा –

'न्यवेशयत तत्रैत्र वारिजोदरसंभवः ।' इति (अ. ६०) ।

तत्रैवेति - यत्र स्थले मृगःश्रृङ्गे गृहीतस्त्रैव तन्न्यवेशयतेति । तृतीयं च खण्डमाखण्डलेन नीयमानं मध्येमार्गं रावणस्तद्धस्ताद्रभसाऽपहृत्य सन्ध्यावन्दनार्थं दक्षिणोदधितीरे तत् संस्थाप्य सन्ध्यां समाप्य यावदादातुमिच्छति तावत् स्वस्थानान्न विचलितमिति तत् स्वयं तत्र प्रतिष्ठितम् । तस्य च गोकर्णमिति ब्रह्मा नाम चक्रे इति । यथोक्तं तत्रैव –

'गोकर्णमिति नामास्य चकार कमलासनः ।' इति ।

तत्र द्वितीयं खण्डं यद् ब्रह्मणा तत्रैव स्थापितमित्युक्तं तस्य नाम 'उत्तरगोकर्ण' मिति । यथोक्तं तत्रैव –

'गोकर्णमुत्तरं व्यास स्थापितं पद्मयोनिना ।' इति ।

उत्तरदिशि स्थापितं दक्षिणगोकर्णापेक्षयाप्युत्तरमिति उत्तरगोकर्णमिति नाम । एतेन गोकर्णद्वयमप्येतदेकदैव प्रतिष्ठितमित्युभयोः प्राचीनतापि समानैवेति । तत्रैकं भारतेऽवस्थितं यदुदीच्या वयं दक्षिणगोकर्णमिति ब्रूमः । अन्यद्यदेतदत्रोत्तरगोकर्णमिति निर्दिष्टं यत्र च द्वितीयं श्रृङ्गखण्डं ब्रह्मणा स्थापितमित्युक्तमत्र तदेवेदं नेपाले काष्ठमण्डप-क्षेत्रे श्रीपशुपतिनाथमन्दिरतः प्रागुदीच्यां दिश्यविदूरे वर्तमानं रावणतपःस्थलत्वेन लोकेऽपि प्रसिद्धं गोकर्णमिति विश्रुतं पुण्यक्षेत्रम् । यत्र गोकर्णेश्वरनाम्ना ख्यातिं गतं प्राचीनं शिवलिङ्गं (शिवस्य पुण्यायतनं) वर्तते । एतावता च गोकर्णेश्वरोयं पूर्वं ब्रह्मणैव प्रतिष्ठापित इति विज्ञायते । एतत्क्षेत्रस्य रावणातपः स्थलत्वं चास्मिन्पुराणेपि प्रतिपा-दितं, यथा शिवायतनवर्णनक्रमे १६७ तमेध्याये –

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

'ततश्चोत्तरगोकर्णं हरलिङ्गाङ्कितामयम् ।
तप्तं यत्र तपस्तीव्रं राक्षसैः पिशिताशनैः ।।
रावणाद्यैर्महाभागैर्लब्धश्च वर ईप्सितः ।' इति,
'पुरा यत्र तपः कृत्वा प्रसाद्य च पिनाकिनम् ।
त्रैलोक्ये चक्रवर्तित्वं रावणः समवाप्तवान् ।।' इति च ।

गौरीशिखरम् –

गौरीशङ्करनिवासतया वा गौरीशङ्कर (हिमाल)नाम्ना लोके ख्यातिं गतं गौर्यास्तपःस्थलभूतं हिमवतोन्यतमं शिखरं यत्र स्वतपःप्रभावेण कृष्णवर्णामपोह्य पार्वती गौरवर्णतामाप्तवती, तदनन्तरं च पुनर्यत्र गौरीशङ्करौ समागत्यावस्थिताविति, यत्परितः पञ्चयोजनविस्तीर्णमग्रारण्यमिति नामान्तरख्यातं पुण्यं गौरीशिखरक्षेत्रं, यत्र चालङ्कारधारा-स्तनकुण्ड - कृष्णाजिन - कृष्णाकोशी - गौरीशिला - निश्चीरा - नीलकुण्डादीनि प्रादुर्बभूवुरिति । यदुक्तम् -

'महद्धिमवतस्त्वन्यत् कूटं सिद्धनिषेवितम् ।
यत्र देवी तपस्तेपे गौरवर्णसमीप्सया ।।
गौरी शिखरमित्येव त्रिषु लोकेषु विश्रुतम् ।
कुचकुण्ड इति ख्याते तीर्थे यत्रोमया कृते ।।' इति (अ. १६७) ।

तथा –

'पुण्यस्त्वमचलश्रेष्ठ भविता पापमोचनः ।
गौरीशिखर इत्येव लोके ख्यातिं गमिष्यसि ।।' इति (अ. ६९) ।

तथा –

'गौर्याश्चात्रैव सान्निध्यं सर्वदा ते भविष्यति ।'
'दूरादेवं नगश्रेष्ठ दृष्ट्वा त्वामुच्छ्रितं जनाः ।
सर्वपापैर्विमोक्ष्यन्ते यास्यन्ति परमां गतिम् ।।
त्रिरात्रमुषितो यस्त्वामभिरुह्य शुचिव्रतः ।
दृष्ट्वा गौरीमथाभ्यर्च्य ब्राह्मणं तर्पयिष्यति ।।
नारी वाथ नरो वापि लोकं गौर्याः स यास्यति ।' इति (अ. ६९) ।

अन्यच्च –

'अग्रमारुह्य यस्मात्त्वमत्र तप्तवती तपः ।
अग्रारण्यमिति ख्यातिमेतद्यास्यति सर्वदा ।।'
'पञ्चयोजनसंस्थानं गौरीशिखरमुत्तमम् ।
वत्स्यामि चैव सततं त्वया सार्धमिह प्रिये ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

आवामिह स्थितौ देवि योर्चयिष्यति मानवः ।
आवयोर्गणपो भूत्वा जगत् स विचरिष्यति ।।' इति तत्रैव ।

तथा –

'एतद्धिमवतः शृङ्गमुच्छ्रितं कान्तिमत् स्थितम् ।
युगान्तादित्यसंकाशं दूरात्समभिलक्षये ।।' इति ।

तथा –

'अहो नु शिखरं पुण्यं भाग्यवच्चापि सर्वथा ।'
'यदेतत् शिखरं दृष्ट्वा न पश्याम पुनर्भवम् ।।' इति च (अ. ५४) ।

अत्र 'महद्धिमवतस्त्वन्यत् कूट'मित्यादिना गौरीशिखरनाम्ना यदिदं हिमवतः शृङ्गं निर्दिष्टं तदेवैतदस्माकं नेपालाधिराज्यस्य पूर्वाञ्चलवर्त्ति 'गौरीशङ्करहिमालय' नाम्ना प्रसिद्धं शिखरमिति । एतच्चास्माभिर्नामसाम्याल्लोकप्रसिद्धिमनुरुद्ध्योक्तम् । अन्यथा 'युगान्तादित्यसंकाशं दूराद् दृश्यमानमुच्छ्रितमित्यादिवचनविशेषानुरोधेन 'गोरीशङ्करहिमाला'पेक्षया ऽधिकमुच्छ्रितत्वेनाधिकं प्रकाशमानतया दूरतरस्थानाद् दृश्यमानतया च 'सगरमाथा' प्रभृतिशिखरान्तरमेव गौरीशिखरतया ग्राह्यं स्यादिति। अपि च नकेवलं समुच्छ्रितत्वमात्रमप्यत्र निमित्तं, किन्तु दीर्घकालतपश्चर्यावस्थानयोग्यतापि स्थानस्यास्य ग्राह्यतायां निमित्तमिति सगरमाथा'पेक्षया 'गौरीशङ्कर'स्यैव तदा रमणीयत्वादिना ऽवस्थानयोग्यस्थातया स्वानुकूलतया वा तपश्चर्यार्थं पार्वत्या वरणसंभवात्। अथवा पुराकाले तदानीं 'गौरीशङ्कर' स्यैव 'सगरमाथा'प्रभृत्यपेक्षया समुच्छ्रिततरत्वेन तथात्वस्य संभावादिति, एतच्च गौरीरिशिखरक्षेत्रं पंचयोजनसंस्थानं तदेवाग्रारण्यमपीति उक्तम् । अत्र 'अग्रमारुह्य' 'अभिरुह्य' इत्यादितः शिखरारोहणपरंपरा ऽतिप्राचीनेत्यपि स्पष्टीभवतीति ।

अलंकारधारा–

अलंकारधारेति पार्वत्या गौरीशिखरे तपश्चरणसमये स्वशरीरादुद्धृत्य शिलातले स्थापितादलंकारात् सरिद्रूपेण प्रवृत्ता जलधारेति । यदुक्तं तत्र –

'प्रागेव स्थापितवती यानि चारुशिलातले ।
भूषणानि नदी तेभ्यो जज्ञे पुण्यजलाश्रया ।।
तामलंकारधारेति विश्रुतां पापनाशिनीम् ।
सदा पश्यन्ति च जनाः सर्वकालजलां शुभाम् ।।' (अ. ३४) ।

तथा –

'तपस्तप्तुमलंकारानहं त्यक्तवती यदा ।
तदा तेभ्यः स्रुता देव जलधारापतद् द्रुतम् ।।'

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

'तदा चेदमपां कुण्डं द्वितीयं मे कृतं शुभम् ।'
'अलंकारात् स्रुता धारा येयन्तव वरानने ।
एषालंकारधारेति नाम्ना ख्यातिं गमिष्यति ।।' इ० (६९) ।

अत्र येयमलंकारधारेति गौरीशिखराद्विनिर्गता सर्वकालजला सरिदुद्दिष्टा, सा नेपाले मध्यपूर्वाञ्चलवाहिनी शीतलजला स्वर्णकोशी (सुनकोशी) एवेति । अलंकाराणां प्रायः सुवर्णमयत्वस्यैव दर्शनात्, रत्नालंकाराणामपि प्रायशः सुवर्णेन संबन्धात्, अत्राप्यलंकारपदेन सुवर्णमेवाभिप्रेतमिति, तत्संबन्धाच्चास्याः स्वर्णकोशी(सुनकोशी)ति लोके प्रसिद्धिरप्युपपन्नेति ।

यद्यपि साक्षाद् गौरीशिखरतस्ताम्रकोशी (तामाकोशी) एव विनिर्गता न स्वर्णकोशीति, अत्रालंकारधारेति स्वर्णकोश्यपेक्षया ताम्रकोश्येव ग्रहीतुं योग्या, तथाप्यलंकारेषु ताम्रापेक्षया सुवर्णस्यैवाधिकमुपयुक्ततया ऽत्राप्यलङ्कारपदेन सौवर्णालङ्कारस्यैव ग्रहीतुमुचितत्वात् तज्जन्यत्वेन स्वर्णकोश्या एवात्रोक्तालंकारधरात्वकल्पनं युक्तिसंगतं प्रतिभातीति ।

किंच गौरीशिखरक्षेत्रस्य पंचयोजनक्षेत्रसंनिबिष्टतया निकटवर्तिस्वर्णकोश्युद्भवक्षेत्रस्यापि तदन्तर्वर्त्तित्वकल्पनेन तस्यास्ततो विनिर्गतत्वमपि वक्तुं शक्यमिति ।

किंवा गौरीशङ्करतः साक्षाद्विनिःसृतत्वात् 'तामाकोशी' एवात्रोक्तालंकारधारा ऽस्तु सर्वथोक्तकोशीद्वयतः कयाप्येकया ऽत्रोक्तालंकारधारया भाव्यमिति । 'तत्र नदी जज्ञे' इत्येकवचनप्रयोगेणैकस्या एव नद्या अभिप्रेतत्वात्, अन्यथा द्वयोरेव तयोरलंकारधारात्वेन ग्रहणेपि क्षतेरभावादिति ।

वस्तुतो गौरीशिखरक्षेत्रस्य पूर्वापरायतत्वमवश्यं कल्प्यं भवतीति न किंचिदसामञ्जस्यम्, अन्यथा दुग्धकोश्या उद्भवत्वेन संभाव्यमानस्यात्र सपदि वक्ष्यमाणस्य स्तनकुण्डस्याप्यन्यत्र (गौरीशिखरादन्यत्र) उत्पत्तेः स्वीकार्यत्वेनोक्तपुराणवचनविरोधापत्तेरिति ।

स्तन (स्तन्य) कुण्डम् –

तपस्तप्तुं गौरीशिखरे समागतायाः पार्वत्याः स्तनयुगलप्रस्नुतपयोधारानिर्मितं सिततोयं कुण्डद्वयमेव स्तनकुण्डम् । तदुक्तम् –

'यदाहमागता देव तपस्तप्तुमिह प्रभो ।
स्तनयोः प्रस्तुते धारे महत्यौ मे तदासकृत् ।।
एते ताभ्यां कृते कुण्डे सिततोये महाप्लवे ।' इति ।

तथा –

'स्तनतोयेन ये पूर्णे तव कुण्डे शशिप्रभे ।
स्तकुण्डेति तेनैते यास्येते ख्यातिमुत्तमाम् ।।' इति च (अ.६९) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तदेतत् स्तन (स्तन्य) कुण्डं नेपाले पूर्वाञ्चलवर्त्तिगौरीशिखरक्षेत्रे दुग्धकुण्ड (दूधकुण्ड - दूधपोखरी) नाम्ना प्रसिद्धं कुण्डम्, दुग्धकोश्याः (दूधकोशीतिप्रसिद्धायाः सरितः) उद्भवस्थानम्, यतो दुग्धकोशी विनिःसृतेति । एतच्चास्माभिर्न स्वतः प्रत्यक्षीकृतं किन्तु जनश्रुतिं लोकप्रसिद्धिं स्थानीयभौगोलिकस्थितिं वास्थाय नामसाम्याद्वस्तुस्थित्या च प्रकल्पितमिति ।

नीलकुण्डम् –

ब्रह्मणः सकाशाद्वरलाभानन्तरं कृष्णवर्णमपोह्य गौरीभावसमापत्तये सरसि स्नातमात्रायाः पार्वत्याः शरीरतः कंचुक (कोश) वत् पृथग्भूतायाः कृष्णवर्णायाः कोश्याः (कंचुक्याः) समायोगाज्जनितं नीलतोयं कुण्डम् । यदुक्तम्-

'अपतज्जलमत्यर्थं शीतलं सुसुगन्धि च ।
बह्वभूत् सरसि स्वच्छं तस्यास्तत्तेजसा जलम्
शिष्ये बुद्धिगुणेनेव गुरुणा ज्ञानमाहितम् ॥'
'विगाहमाना सा देवी तत्सरो विमलोदकम् ।
रेजे वियन्मध्यगता दीप्तेव सवितुः प्रभा ॥
विगाहमाना व्यजहात् कृष्णां कोशीं तदानघा ।
सा विरेजे तया मुक्ता कलेवेन्दोर्घनात्यये ॥'
'तस्याः कोश्याः समभवत् कौशिकी लोकविश्रुता ।
विश्वं सिसृक्षतो धातुर्देहादिव पुरा निशा ॥' इति (अ. ५८) ।

तथा –

ब्रह्मणश्च यदा लब्धं गौरवर्णत्वमुत्तमम् ।
शरीरान्मे तदा देव कृष्णा कोशी विनिष्क्रमत् ॥
तस्याः कोश्याः समुत्पन्नमेतत् कुण्डं तृतीयकम् ।'

तथा –

'नीलतोय मिदं यत्तो महत्कुण्डं शुभोदक (य?)म् ।
नीलकुण्डमिति ख्यातिमेतत् सर्वत्र यास्यति ॥' इति (अ. ६९) ।

कृष्णाकोशीति - पार्वत्याः शरीरकोशः - शरीरस्य बाह्यावरणरूपः कृष्णवर्णः सहजः क्षुद्रकोशः - स्नानसमनन्तरमेव पर्वत्याः शरीरतः कंचुकवत् पृथग्भूयावस्थितः, सैव कोशी । तस्याः कोश्या नीलकुण्डसमुत्पत्तिः (नीलकुण्डतापत्तिर्वा) ततश्च कौशिकीसमुद्भव इति । कौशिक्यपि कृष्णैव, निशोपमानसामर्थ्यादिति । (कौशिकीयमष्टभुजा दुर्गा विन्ध्याचलवासिनीति ।) आस्तामेतत् । प्रकृतमेवानुसरामः !

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अत्र गौरीशिखरवर्तितया यदेतन्नीलकुण्डमुक्तं तत् कतमं किमवस्थानं वा न विष्पष्टम् । तथापि नामसाम्यात् गोसाइं (गोस्वामि) कुण्डत्वेन लोके प्रसिद्धं 'नीलकण्ठकुण्ड' मेव किं न तद् भवेत्, गौरीशिखरक्षेत्रस्य विस्तृततया गोसाइंकुण्डस्यापि तदन्तर्गतत्वकल्पने का हानिरिति चिन्त्यम् ।

तदेतेन गौरीशिखरवर्ति कुण्डत्रयमेतत्पुराणोक्तमुदाहृतम् । तत्रैकं स्तनकुण्डं दुग्धकोश्या उद्भवस्थानत्वेन कल्पितम् । द्वितीयमलंकारधारानिर्मितं तदाख्यसूनकोशीतामाकोश्योरेकतराया मूलस्रोतोरूपम् । तृतीयं च कृष्णवर्णप्रहाणाय स्नातवत्याः पार्वत्याः शरीरविनिःसृतकृष्णाकोशीसमायोगाज्जनितं नीलतोयं कुण्डमिति ।

गौरीशिला –

गौरीशिखरे तपस्यन्त्या पार्वत्या ऽवस्थितं शिलातलम् । यथोक्तम् –

'अथापश्यच्छिलां व्यास सौवर्णां मणिभूषिताम् ।
कथयामास तां देव्यै शिलां पश्येति स प्रभुः ।।
'तमाह देवो देवेशमिह तप्तं मया तपः ।
प्रियमेवं मम स्थानं सोमनन्दिन एव च ।।' इति

तथा –

'प्राणान् परित्येजेद्यश्च शिलायामिह दुस्त्यजान् ।
सोपि तप्ततपा भूत्वा ब्रह्मलोकं गमिष्यति ।।' इति च अ. ६९) ।

गौरीशिखरवर्तितया निर्दिष्टैषा शिला ऽविज्ञातसंस्थानावस्थानेति नास्याः संबन्धे किंचिद्वक्तुं शक्यत इति ।

निश्चीरा –

गौरीशिखरे पार्वत्याश्चीरवल्कलतः समुत्पन्ना नदी । यथोक्तं तत्रैव –

गृहीत्वा पादपस्थानि बल्कलानि तदा प्रभुः ।
नदीभवेति संप्रोच्य चिक्षेप प्रहसन्निव ।।
तान्यभूवँस्तदा व्यास नदी स्वच्छजला शुभा ।
तटजैर्विविधैर्वृक्षैर्हंसचक्राह्वशोभिता ।।
तामुवाच सुरश्रेष्ठः पुण्यतोयां महानदीम् ।
चीरेभ्यो निःसृता यस्मात्त्वमत्र सरितां वरा ।।
लोके पुण्यतमा तस्मान्निश्चीरेति भविष्यसि ।' इति ।

सैषापि सरिद्वरा लोके केन नाम्ना प्रसिद्धा कतमेत्यविज्ञातेति । तथापि तदञ्चलवाहिनीसरिदन्तराणीव साक्षात्परंपरया वा पार्वतीकोशसंबन्धात् कौशिकीष्वन्यतमैवेयं किं नस्यादिति विचारणीयमिति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कृष्णाजिनम् --

तपोवस्थानसमये पार्वत्या स्वशरीरादवमुच्य स्थापितं कृष्णसारमृगचर्म । यथोक्तं तत्रैव -

'इदं कृष्णाजिनं शुभ्रं स्थापितं तत् पुरा मया ।'

'कृष्णाजिनं महत्पुण्यं सर्वपापहरं तव ।

इदं द्रक्ष्यति यो विप्रः स्वर्गस्तस्य न दुर्लभः ।।'

'यत्फलं नैमिशारण्ये पुष्करेषु च यत्फलम् ।

तदेव लभते देवि दृष्ट्वा कृष्णाजिनं द्विजः ।।'इति च तत्रैव ।

एतदपि गौरीशिखरवर्त्तित्वेन निर्दिष्टं तत्र । किन्तु सर्वथास्माभिरविज्ञातमिति इत्थमेवान्येपि नैके विषया अनुसन्धानापेक्षिणोऽस्मिन्पुराणे वर्णिताः । तत्रानुसन्दिधित्सवो विद्वांस एव प्रमाणमिति प्रकृतपुराणप्रस्तावनाप्रसंगादस्माल्लेखनीयं सांप्रतमत्रैव विश्राममादत्तो इति ।

अन्ततो लुप्यमानस्यैतादृशस्य ग्रन्थस्य यथातथेदानीं कथंचिदुद्धारो जात इति महतीयं मनसस्तुष्टिरिति । तदर्थं संबद्धा विद्वांसोधिकारिणो धन्यवादार्हा इति।

''अत्र पुस्तकत्रयेपि क्वचित्क्वचित् पाठभेद उपलब्धः, घ.पुस्तके तु भूयान् । तत्र शुद्धत्वेनोपयुक्तत्वेन वा संभावितः पाठो मूले स्थापितः, पाठान्तराणि पृष्ठस्याधस्ताट्टिप्पण्यां दत्तानि । क्वचित् पाठभेदमन्तरापि मूलपाठस्याशुद्धत्वसंभावनायां तत्समनन्तरमेव कोष्ठे शुद्धत्वेन संभावितं पाठान्तरमपि दत्तम् । तथापि क्वचिदनवधानतया संभ्रमवशाद्वाऽऽपाततः शुद्धोऽभिमतश्च पाठष्टिप्पण्यामशुद्धोऽनभिमतो वा पाठश्च मूले दत्तः । एतच्च पश्चादेवावगतम् । तस्य कृते यदि संभवेत् पश्चात् पृथक् संशोधनप्रयासो विधास्यत इति ।

अत्रास्माभिर्ग्रन्थारम्भात् प्रागध्यायक्रमेण 'विषयाणामनुक्रमाणिका' दत्ता । सहैव चैतद्ग्रन्थद्वितीयाध्यायोक्ताऽनुक्रमणिकापि दत्ता । तत्रानुक्रमणिकाऽध्यायोक्तविषयाणां ग्रन्थगतविषयाणां च मिथः क्वचिद्विसंवादोपि पाठविसंवादोर्थविसवादः, क्वचिदनुक्रमाणिकायां पौनरुक्त्यं च) लक्ष्यत इव । तत्र विद्वांसः स्वयमेव विचारयिष्यन्तीति न मे किञ्चित्कथनीयमस्तीति ।

पुनः प्रस्तावने नैकं परिशिष्टमपि दत्तम् । तत्रैतत्पुराणे उक्ताः प्रसंगादागताश्च कतिपये 'शब्दाः, स्थानविशेषाः प्रान्तरेषु प्रतिष्ठितानि शिवलिङ्गानि, पुण्यक्षेत्राणि, नेपालविषयान्तर्वर्तिकतिपयपुण्यस्थलानि, पर्वताः, नदीजलाशयाः जलजन्तु-क्षुद्रजन्तु-कीटपतङ्गादयः, पशुपक्षिणः, पुष्पौषधिलतावृक्षवनस्पतयः, सिद्धा ऋषयो विप्रवर्याः, षट्कुलीयाः, सप्तर्षयो देवता देवयोनयः; उपदेवा गन्धर्वाप्सरसो देव्यो देशविशेषेषु सन्निवेशिता देव्यः, प्रमथगणेश्वराः, स्कन्दपारिषदाः, स्कन्दानुगा मातरः, मातृतन्त्राणि, वेदविद्यास्तन्त्रान्तराणि च, योगिन्यः, दैत्यदानवराक्षसाः, आयुधानि (उपकरणान्तराणि च कानिचित्), वादित्राणि, युद्धमार्गविशेषाः, राजानः, पुरुषविशेषाः. सप्तद्विजशिष्याः, व्याधा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मृगाश्च क्रकवाकाश्च, स्त्रीविशेषाः, दशमहानाड्यः, सोमतर्पिकाः सूक्ष्मतरा दशनाड्यो नाड्यन्तराणि, आसनपंचकम्, पंचदेहाग्नयः, मोक्षसिद्धिप्रदास्त्रयः पन्थानः, धनञ्जयस्य मुखानि त्रीणि, त्रिविधो मृत्युः, त्रिविधोत्क्रान्ति'रित्यादयो द्वित्रोनपंचाशद्विषयाः प्रदत्ताः ।

अत्राध्यायसंख्याविषयेऽपि क. ख. पुस्तकयोर्द्वयोर्मिथो विसंवादो दृश्यते, घ. पुस्तके च क्वचित्सैवावस्था । तत्र क. पुस्तके यत्र 'अशीत्युत्तरशत(तम)ोध्याय इति लेखनीये' सप्त्यु(सप्तत्यु)त्तरशतोध्याय इति लिखितम्, तत्रैव ख. पुस्तके 'अध्याय २२९' इति लिखितम्, एवमन्यत्रापि बहुत्र, एतच्चाध्यायसंख्याद्योतकाङ्कलेखने लेखकस्य (प्रतिलिपिकर्तुः)यः प्रमादस्तत्कृतोऽयं विसंवादो न तु वस्तुगत इति । एतच्चास्माभिः प्रागेव दर्शितमेतत्प्रस्तावनायाम् । ततश्चाध्याय (संख्या) गणने उभयत्र त्र्यशीत्युत्तरं शतं (१८३) अध्यायाः संपद्यन्ते इति । घ. पुस्तके तु 'पार्वत्या धर्मोपदेशान्ते कौञ्चसंजीवनान्ते चोभयत्र पृथगेकैकोध्यायो ऽध्यायसमाप्त्या दर्शित इति तत्राध्यायद्वयमधिकं गण्यते, तदनुसारं च पञ्चाशीत्यधिकशतमध्यायाः संपद्यन्ते । तथा च पुराणमिदं १८३ अध्यायात्मकं १८५ अध्यायात्मकं वा पर्यवस्यति । किन्त्वत्रास्माभिः प्राचीन पुस्तकानुसारं पूर्वसंस्करणे यद् गणितं तदत्रापि तथैव कृतमिति १८३ अध्याया एव अत्र संपन्नाः । ग्रन्थ(श्लोक)संख्या चात्र किंचित्न्यूनाधिकमेकादशसाहस्र(द्वादशसहस्रान्नाधिक)मिति ग्रन्थोयं किञ्चिन्न्यूनाधिकैकादशसहस्रश्लोकात्मकः (द्वादशसहस्रश्लोकात्मको वा) प्रकल्प्यते इति ।

'धृष्टता विहिता येयं मयात्र स्वल्पबुद्धिना ।
क्षमतां तां महादेवो मम साम्ब उमापतिः ॥'

शुभमस्तु

विनीतः संपादकः
पं. कृष्णप्रसादशर्मा भट्टराई

सं. २०४३ फाल्गुनपूर्णिमा
काष्ठमण्डपः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

आदर्शपत्राणि

१) क. पु. - प्र. ८३१ –पत्रचतुष्टयम्

२) ख. पु. द्वि. २२९–पत्रचतुष्टयम्

३) ग. पु. च २२६०–पत्रद्वयम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्कन्दपुराणस्य द्वितीये ऽनुक्रमाणिकाध्याये उद्दिष्टाः (उल्लिखिताः) विषयाः

१ रुद्रस्य देहावतारः
२ प्राजापत्यभिषेकः (ब्रह्मणः)
३ शिरसो हरणम् (")
४ षट्कुलीयानां दर्शनम्
५ चक्रस्य विसर्जनम्
६ नैमिशस्योद्भवः
७ सत्रस्य समापनम्
८ तत्र ब्रह्मण आगमः
९ तपश्चरणम् (ब्रह्मणः)
१० शर्वस्य दर्शनम्
११ देव्याः समुद्भवः (सत्याः)
१२ सत्या विवादः
१३ दक्षशापः
१४ मेनायाः समुत्पत्तिः (देव्याः)
१५ देव्याः स्वयंवरः
१६ देवानां वरदानम्
१७ वसिष्ठस्य वरदानम्
१८ पराशरोत्पत्तिः
१९ व्यासस्योत्पत्तिः
२० वसिष्ठकौशिकयोर्वैरोद्भवः
२१ वसिष्ठकौशिकयोर्वैरसमापनम्
२२ वाराणस्याः शून्यत्वम्
२३ (वाराणसी)क्षेत्रमहात्म्यम्
२४ रुद्रस्य तत्र सान्निध्यम्
२५ नन्दिनोऽनुग्रहः
२६ गणानां दर्शनम्
२७ गणानामशेषतःकथनम्
२८ कालीव्याहरणम्
२९ तपश्चरणम् (काल्याः)
३० सोमनन्दिसमुत्पत्तिः
३१ वरदानम् (ब्रह्मणा देव्याः)
३२ गौरीत्वम् (गौरवर्णत्वं देव्याः)
३३ पुत्रलम्भः (पुत्रलम्भवरप्राप्तिः)
३४ देव्या उत्पत्तिः (कौशिक्याः)
३५ कौशिक्या भूतमातृत्वम्
३६ सिंहस्य रथता[१] (देवीवाहनता)
३७ गौर्या निलयो विन्ध्ये
३८ विन्ध्यसूर्यसमागमः
३९ अगस्त्यस्य माहात्म्यम्
४० सुन्दोपसुन्धवधः
४१ निशुम्भशुम्भनिर्णाशः
४२ महिषस्य वधः
४३ 'कौशिक्या अभिषेकः'
४४
४५ . . . . वरदानम्
४६ अन्धकस्योत्पत्तिः
४७ पृथिव्या बन्धनम्
४८ हिरण्याक्षवधः

१ रथिता इति मूले ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

४९ हिरण्यकशिपोर्वधः
५० (देवदेव्योर्विन्ध्याचले) गमनम्
५१ देव्याः समयः
५२ देवानामागमनम् (तत्र)
५३ अग्नेर्दूतत्वम्
५४ देवानां वरदानम्
५५ शुक्रस्य विसर्जनम् (अग्नौ)
५६ दूतस्य? उत्पत्तिः
५७ देव्या अन्धकदर्शनम्
५८ शैलादिदैन्यसंमर्दः
५९ देव्याः शतरूपता
६० आर्यावरप्रदानम्
६१ शैलादिस्तवः
६२ देवस्यागमनम्
६३ वृत्तकथनम्
६४ पतिव्रताख्यानम्
६५ गुरुशुश्रूषणाख्यानम्
६६ पञ्चचूडाख्यानम्
६७ तेजसोऽधृष्यता
६८ दूतस्यागमनम्
६९ (दूत) संवादः
७० (दूत) विसर्जनम्
७१ अन्धकासुरसंवाद
७२ मन्दरागमनम्
७३ गणानामागमः
७४ संख्यानश्रवणम्
७५ अन्धकविग्रहः (महता युद्धेन)
७६ शरीरार्धप्रदानम् (देव्याः)
७७ अशोकसुतसंग्रहः
७८ भस्मसोमोद्भवः
७९ श्मशानवसतिः (रुद्रस्य)
८० रुद्रस्य नीलकण्ठत्वम्
८१ आयतनवर्णनम् (रुद्रस्य)
८२ यक्षराजस्योत्पत्तिः
८३ कुमारस्योत्पत्तिः[१]
८४ भुजगेन्द्राणां निग्रहः
८५ शिखरस्य पातनम्
८६ सशक्रस्य त्रैलोक्यस्य वशीकरणम्
८७ देवसेनाप्रदानम्
८८ सेनापत्येऽभिषेचनम्
८९ तारकप्रेषितस्य नारदस्यागमः
९० तारकस्यमृध[२] उग्रः
९१ भद्रवटस्य यात्रा
९२ महिषवधः[३] (?)
९३ क्रौञ्चनिवर्हणम्
९४ शक्तेरुद्धरणम्
९५ तारकस्य वधः
९६ देवासुरभयोत्पत्तिः
९७ त्रैपुरं युद्धम्
९८ प्रह्लादविग्रहः
९९ कृतघ्नाख्यानम्
१०० ब्राह्मणानां महाभाग्यम्

इति

१ कुवेरस्येति मूले। २ वधः - ख.। ३ द्विरुक्तम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विषयाणामनुक्रमणिका

१ प्रथमेध्याये–

प्रयागे ऋषीणां सूतेन समागमः, ऋषीणां स्कन्दजन्मविषयकः प्रश्नः । सूतस्य व्याससनत्कुमारसंवादमुखेन स्कन्दोत्पत्तिकथावतरणोपक्रमः ।

२ द्वितीयेध्याये–

सनत्कुमारेण व्यासाय स्कन्दोत्पत्तिविषयकपुरातनकथाख्यानप्रतिज्ञानम् । प्रकृतपुराणगतविषयोद्देशसंक्षेपश्च ।

३ तृतीयेध्याये–

शम्भुतो ब्रह्मण उत्पत्तिः, तपश्चर्या, शर्वदर्शनम्, वरलाभः, प्राजापत्ये ऽभिषेकश्च ।

४ चतुर्थेध्याये–

प्रजासृष्टचर्थं ब्रह्मणः पुनस्तपश्चरणम् । रुद्राद्वरप्राप्तिः, पुत्रकामनयाग्नौ हविर्जुह्वतो ब्रह्मणो ललाटजस्वेदसंसर्गादग्नितो नीललोहितरुद्रस्योत्पत्तिः, दक्षधर्मादीनामुत्पत्तिः, क्रमेण सकलप्रजासृष्टिः, कालान्तरे तस्य (ब्रह्मणः) विसर्जनम्, प्रयागे यजतो मरीच्यादिषट्कुलीयानामृषीणामागमः, समागतानां तेषां सर्वजगन्नियन्तृपरमकारणजिज्ञासया प्रश्नः, ब्रह्मणा रुद्रस्यैव सर्वजगन्नियन्तृपरमकारणत्वकथनम्, तद्दर्शनार्थं च महासत्रानुष्ठानोपदेशः, ब्रह्मणा चक्रस्य विर्जनम्, नैमिशोत्पत्तिः ।

५ पंचमेध्याये–

नैमिशे ऋषीणां दीर्घसत्रारम्भः । तत्र वायोरागमनम्, जगत्सृष्टचादिविषये प्रश्नः, वायुना तत्सर्वस्याशेषतया कथमम् । सत्रसमाप्तौ वेदीमध्यात् सरस्वत्याः प्रादुर्भावः । नदीरूपेण प्रवृत्तायां तस्यामृषीणामवभृथस्नानम्, ब्रह्मलोकविभूषणायाः सरस्वत्या इत्थं ततोवतीर्य भूर्लोके प्रवृत्तौ किं कारणमिति ऋषीणां प्रश्नः, ब्रह्मयज्ञविवादरूपपुरातनेतिहासविवरणमुखेन वायुकृतस्तत्कथावतारः, स्वकृतलोकसृष्टिदर्शनद् ब्रह्मणः सर्वश्रेष्टत्वाभिमानः, ब्रह्मयज्ञयोर्विवादः, रुद्रस्य तत्र प्रादुर्भावः, क्रुद्धस्य ब्रह्मणः पंचमशीर्षोत्पत्तिः, रुद्रकृतं तत्कृन्तनम्, ब्रह्मकृता रुद्रस्तुतिः, कृत्तस्य शिरसो धारणार्थं प्रार्थना च ।

६ षष्ठेध्याये–

ब्रह्मणोऽनुरोधात् तच्छिरःकपालमादाय विकृतरूपं दधतो रुद्रस्य देववेश्मसु भिक्षार्थं प्रचारः, विष्णोः सकाशाद् भिक्षामाददानेन रुद्रेण कपालवर्तिनि भैक्षरसे विष्णोश्छायादर्शनात्तत्सदृशमूर्त्तेर्नरस्य सर्जनम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

७ सप्तमेध्याये–

धृतकपालस्य भैरवरूपिणो रुद्रस्य भैक्षार्थं ततो ब्रह्मलोकगमनम्, तत्रोर्मिति व्याहरतस्तस्य वदनात् सरस्वत्याः प्रादुर्भावः, कपालसंस्थापनम्, महिषरूपिणो हालाहलाह्वयस्यासुरस्य विनाशः, कपालमातृणामुत्पत्तिः, महाकपालसरसस्तत्क्षेत्रस्य चोत्पत्तिः।

८ अष्टमाध्याये–

सरस्वतीप्रवृत्तिकथोसंहारः। सत्रसमाप्तौ ब्रह्मणस्तत्रागमः, ब्रह्मण उपदेशाद् ऋषिभिः शंकराराधनोद्देशेन पुनर्बहुविधसत्रानुष्ठानसमारंभणम्। सत्रे स्वर्भानुना सोमस्यापहरणम्, गायत्र्या श्येनीभूय तत्प्रत्यानयनम्, सत्र-समाप्तिः। ब्रह्मादिदेवानामृषिभिः सह मैनाके तपश्चर्या, तपसोऽन्ते तुष्टेन शंकरेण तेभ्यो दर्शनदानम्।

९ नवमेध्याये-

ब्रह्मादिकृता रुद्रस्तुतिः, तेषु रुद्रस्यानुग्रहः। रुद्रेण स्वतेजसो विसर्जनम्। तेजसोधर्षिन मुखत उल्कासर्जनम्। रुद्रादेशान्नारीभूतायास्तस्या ब्रह्मण अराधनाय तपश्चरणम्। स्वर्णाक्ष–स्वर्णाक्षीनामसमाख्या। षट्कुलीयानां तत्रैव क्षेत्रे निवसनार्थमादेशः, क्षेत्रमहिमा।

१० दशमेध्याये–

रुद्राज्ञया तपश्चरन्त्यास्तस्या देव्या ब्रह्मण उपदेशात् त्र्यम्बकपतिप्राप्तये दक्षदुहितृत्वेन सतीनाम्ना शरीरान्तर-(जन्म) ग्रहणम्, सत्यास्त्र्यम्बकभार्यात्वम्, रुद्राणां सृष्टिः, स्थाणुपदनिरुक्तिः, दक्षकृतः सत्या अवमानः, सत्या योगधारणया देहत्यागः, महादेवकृतो दक्षशापः।

११ एकादशाध्याये–

कदाचिद् हिमवतो गृहे कश्यपस्यागमः। "लोके ख्यातिकरं पूज्यत्वापादकं च किं, केन चाक्षया लोकाः स्यु"रिति कश्यपं प्रति हिमवतः प्रश्नः, "अपत्येन सर्वमाप्यत" इति कश्यपकृतमपत्यमहिमवर्णनम्, दृष्टान्तमुखेन च सुकेशोपाख्यानकथनम्। सुकेशस्य रुद्राराधनया गणपत्वप्राप्तिस्तत्पितृणां गर्तादुद्धरणं चेति। कश्यपस्य हिमवन्तं प्रति गुणवदपत्योत्पादनोपदेशः, हिमवतस्तपश्चरणम्। ब्रह्मणो वरप्राप्तिः। मेनायां कन्यात्रयोत्पादनम् त्रिकु-मारीणां दुश्चरतपश्चरणम्, अपर्णादि-नाम-निर्वचनम्, प्रसङ्गात् तासां पतिपुत्रादिसमुल्लेखः। उमाया महादेव-पतिप्राप्तये तपश्चरणम्, ब्रह्मणा समाश्वासनं वरदानं च।

१२ द्वादशेध्याये–

ब्रह्मणः समाश्वासनेन देव्यास्तपसो निवृत्तिः। स्वाश्रमद्वारि जातमशोकं समाश्रित्य संस्थितायाः देव्याः समक्षं गङ्गाङ्कतिलकस्य शिवस्य विकृतब्राह्मणरूपेणोपस्थितिर्विवाहार्थं प्रार्थना च। देव्याः स्वस्यास्वतन्त्रत्वज्ञापनम्। तदर्थं पितुरन्तिकं गन्तुमनुरोधः। शिवस्य तेनैव रूपेण हिमालयसमीपे गमनं कन्यायाचनं च। हिमालयेन दुहितुर्मे स्वयंवरो भविता, तत्र सा स्वेच्छया यं वरयेत् स तस्या भर्त्ता भवे'दिति स्वाभिप्रायप्रकटनम्। ततः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रत्यागत्य नैराश्यं प्रकटयतः शिवस्य स्कन्धे ऽ शोकस्तबकसंस्थापनेन तदैव देव्या तस्य स्वतो वरणम्, ततोऽन्तर्हितस्य शिवस्य पुनर्देव्या अग्रतो ग्राहग्रस्तदीनब्राह्मणवटुरूपेण नर्मलीलाऽदर्शनम् ।

१३ त्रयोदशेध्याये -

हिमवत्पृष्ठे देव्याः स्वयंवरमहोत्सवः । सलोकपालानां सगणानां त्रिदिवौकसां गन्धर्वयक्षोरगकिन्नरादीनां च समक्षं देव्या महादेवपतिवरणम् । उद्वाहार्थं तत्र मण्डपनिर्माणम् । ऋतूनां विचित्रः समागमः । सर्वभूतसमाजोपस्थितिः ब्रह्मण आर्त्विज्ये पार्वतीपरमेश्वरयोर्वैवाहिकविधिसमापत्तिः ।

१४ चतुर्दशेध्याये –

उद्वाहानन्तरं हर्षातिशयेन ब्रह्मादिभिः कृताः देवदेवस्तुतिः । तुष्टस्य शम्भोर्देवान्प्रति वरदित्सा । वरस्य समुचितकालावधि तथैव न्यासार्थं देवानामनुरोधः । शिवेन तस्यानुमोदनम् ।

१५ पंचदशेध्याये –

मन्मथस्य दुरभिप्रायः । देवदेवकृतो मन्मथदेहदाहः । देवदेव्यो रतिसमाश्वासनम् । वसिष्ठस्य तपश्चर्या । देवदेवदर्शनम्, वसिष्ठकृता देवदेवस्तुतिः । देवदेवस्य तस्मिन्ननुग्रहः, वरदानम् ।

१६ षोडशेध्याये –

वसिष्ठात् शक्तेरुत्पत्तिः । अपत्यार्थं शक्तेस्तपश्चर्या । अभीष्टवरलाभः, शक्तेःपत्न्या अदृश्यन्त्या गर्भधारणम् । गर्भवत्यां तस्यां कल्माषपादेन राज्ञा गुरुशापाद्रक्षोभावमापन्नेन शक्तेर्भक्षणम् ।

१७ सप्तदशेध्याये –

राज्ञा कल्माषपादेन शक्तेर्भक्षणे किं कारणं किमर्थं च राजा रक्षसाविष्ट इति व्यासकृतजिज्ञासाशमनार्थं पुनर्विस्तरेण सौदासोपाख्यानारम्भः । तत्र विश्वामित्रप्रेरितेन रक्षसा हृतचेतनेन राज्ञा मांसभोजनार्थिने गुरुपुत्राय शक्तये मनुष्यमांसपरिवेषणम् । तद्विज्ञाय क्रुद्धेन मुनिना राज्ञे पुरुषादो (राक्षसो) भविष्यसीति शापदानम् । मोहितेन च राज्ञा 'त्वामेव प्रथमं सभ्रातृकं भक्षयिष्यामी'ति प्रतिज्ञानम् ।

१८ अष्टादशेध्याये –

सभार्यस्य सौदासस्य वनप्रवेशः । तत्र रक्षोभावमापन्नेन तेन वसिष्ठस्य पश्यतः सभ्रातृशतस्य शक्तेर्भक्षणम् । पुत्रशोकानुतप्तस्य वसिष्ठस्यात्महत्यार्थं प्रयत्नः । (शतद्रु) विपाशादि - नाम - निरुक्तिः । वसिष्ठेन राज्ञो रक्षोभावात् मोचनम् । राज्ञःक्षेत्रे पुत्रोत्पादनम् । अदृश्यन्त्या गर्भतः पराशरस्योत्पत्तिः । पराशरकृतो रक्षःसत्रसमारम्भः ।

१९ ऊनविंशेध्याये –

वसिष्ठानुरोधात् पराशरस्यापत्यार्थं मैनाके तपश्चरणम् । पराशरात् काल्यां व्यासस्योत्पत्तिः । व्यासात् शुकोत्पत्तिः, शुकस्य पुत्रचतुष्टयं कन्या चैकेत्यन्वयोद्देशः । पुत्रशतघातानन्तरमप्यप्रशान्तवैरेण विश्वामित्रेण

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वसिष्ठजिघृक्षया सरस्वत्याः साहाय्याभ्यर्थना । सरस्वत्याः स्रोतोवेगेन वसिष्ठस्याश्रमादपवाहनम् । विश्वामित्र-शापात् सरस्वत्या असृक्तोयत्वम् । विश्वामित्रस्य वसिष्ठजिघांसा । द्वयोरन्योऽन्यमुग्रसंमर्दः । सर्षीणां देवानामभ्यर्थनया द्वयोः प्रवर्धमानवैरत्यागेन परस्परं सख्याङ्गीकारः । सरस्वत्याः स्वच्छजलत्वम् ।

२० विंशेध्याये –

नन्द्युपाख्यानारम्भः, शिलादस्य पुत्रार्थं तपश्चर्या । शिलादकृता देवदेवस्तुतिः, वरलाभः, नन्दिन उत्पत्तिः । महादेवदर्शनेन तदनुग्रहलिप्सया नन्दिनो गृहान्निर्गमनम् ।

२१ एकविंशेध्याये –

भुवनां प्रविश्य तदन्तर्जले नन्दिनोऽनेककोटिरूद्रजापः । देवदेवदर्शनम् । नन्दिकृता देवदेवस्तुतिः ।

२२ द्वाविंशेध्याये –

नन्दिनं प्रति देवदेवस्यानुग्रहः । जप्येश्वरोत्पत्तिः । पञ्चनदसमाख्यानम् ।

२३ त्रयोविंशेध्याये –

नन्दिनः सेनापत्याभिषेकोपक्रमः। तदर्थं गणानामाह्वानम् । अखिलगणसमाजोपस्थितिः । तेषामशेषतो नामारूप-संख्यादिविवरणम् ।

२४ चतुर्विंशेध्याये –

देवदेवाज्ञया गणपानां सर्वसंभारोपस्थापनम् । सर्वदेवानां सर्षीणां तत्रागमः । देवदेव्योः समक्षं पर्यायेण ब्रह्मादिकृतो महर्द्धियुक्तो नन्दिनः सेनापत्येऽभिषेकः । ब्रह्मादिकृता नन्दिस्तुतिः । सर्वतो जयकारश्च ।

२५ पंचविंशेध्याये –

नन्दिनः कृते महादेवेन तत्र मरुतां सकाशे कन्यायाचनम् । मरुत्कन्यया सुयशया सह नन्दिनो विवाहः । निखिलैर्गणैर्नन्दिनोऽभिनन्दनम् । नन्दिकृता गणानां स्तुतिः ।

२६ षड्विंशेध्याये –

एकदा स्वेच्छया पार्वत्या मातृगृहगमनम् । तत्र मातुर्मुखाद् भर्तृविषयकासंभावितासंमतहीनवचनश्रवणम् । ततो नातिहृष्टमनसा निवृत्य भर्तुः पार्श्वे समागतया तया पर्वतं विहाय निवासार्थं स्थलान्तरगमनेच्छाप्रकटनम् । तदर्थं शिवेन निकुम्भनामानं गणेश्वरमाहूय तस्य दिवोदासाध्युषितायाः वाराणस्याः शून्यीकरणार्थमाज्ञादानम् । तदनुसारं निकुम्भस्य वाराणसीं गत्वा नापितसाहाय्येन मन्दिरं निर्माय तत्र निजप्रतिमायाः प्रतिष्ठापनम् । ततश्च तत्र वरदगणेशरूपेण निकुम्भस्यावस्थानम् । स्वावहेलनं व्याजीकृत्य तेन समर्हिर्पीकस्य दिवोदासस्य ततः उत्सादनम् । एवं शून्यीकृतायां वाराणस्यामागत्य सोमस्य सगणस्य देवदेवस्य निवसनम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

२७ सप्तविंशाध्याये –

पार्वत्या पृष्टेन शम्भुना भक्तानुग्रहार्थं स्वप्रासादनिर्माणसंमार्जनोपलेपनशुभ्रीकरणलिङ्गस्थापनपूजनस्नपना-भिगमनानुयानविविधद्रव्यदानोपचारसमर्पणादिफलकथनम् ।

२८ अष्टाविंशेध्याये –

शम्भूद्देश्यकतत्तुष्टिकरविवधव्रतोपवासतपोनियमदानजपनामकीर्तनादिफलकथनम् ।

२९ ऊनत्रिंशेध्याये –

सोमस्य देवदेवस्य वाराणसीक्षेत्रे स्वकृतदिव्योद्यानदर्शनम् । शम्भुकृतं गोप्रेक्षेश्वरकपिलाह्रदभद्रदोह्योपशान्तशिव-हिरण्यगर्भेश्वरस्वलीनेश्वरव्याघ्रेश्वरज्येष्ठस्थानाविमुक्तशैलेश्वरसंगमेश्वरमध्यमेश्वरशुक्रेश्वरजम्बुकेश्वराविमुक्तेश्वर-वाराणसीजाह्नव्यादीनां पुण्यक्षेत्राणां नामनिर्वचनपूर्वकं माहात्म्यकथनम् । तदैव पार्वत्या पाशुपतव्रतिनां योगिनां ज्योतिर्मये षड्विंशे परस्मिन् पुरुषे लयदर्शनम् । एवं स्वपुण्यस्थानान्याख्याय शम्भुना पुनरविमुक्तक्षेत्रस्य (काश्या) भागीरथ्याश्च विस्तरेण माहात्म्यकथनम् ।

३० त्रिंशेध्याये –

जैगीषव्यतपश्चर्या, जैगीषव्यं प्रति शिवस्यानुग्रहः । जैगीषव्यकृता शिवस्तुतिः, वरलाभः । कुबेरतपश्चार्या, तत्सन्निधौ शिवयोरागमनम्, कुबेरेण कटाक्षदृष्ट्या ऽनिमिषेण पार्वतीमुखनिरीक्षणम् । पार्वत्याः कोपः । कुबेरस्य पिङ्गाक्षत्वम्, कुबेरकृता देवदेवस्तुतिः । कुबेरं प्रति शिवस्यानुग्रहः । पचचूडानां तपश्चर्या, शिवयोस्तासां दर्शनदानम् । पंचचूडाभिः कृता पार्वतीस्तुतिः । ताभ्यः पार्वत्या वरप्रदानम् ।

३१ एकत्रिंशेध्याये –

हरिकेशापरनाम्नः पिङ्गलयक्षस्य शिवपरायणस्य गणत्वप्राप्तिः । पार्वत्याः पुनरुद्यानदिदृक्षा । काशीक्षेत्र-माहात्म्यश्रवणेच्छा च । शम्भुना पार्वत्या उद्यानदर्शनम् । विस्तरेणोद्यानवर्णनम् । अविमुक्तापरनाम्नः काशीक्षेत्रस्य माहात्म्यवर्णनम् । जैगीषव्यगुहाया उल्लेखः । पिङ्गलाय वरदानम्, मन्दरतपश्चर्या । सगणस्य सोमस्य शम्भोस्तपस्यन्तं मन्दरं प्रति गमनम् । तस्मिन् शम्भोरनुग्रहो वरदानञ्च । प्राग्यज्ञमूर्तिजलदवाहनस्य रुद्रस्य पश्चाद् वृषवाहनत्वे कारणमाख्यातुं पुरातनकथावतारणम् । क्षुवतो ब्रह्मणो वक्त्रात् क्षुपस्योत्पत्तिः । क्षुपदधीचिविवादः । विष्णुदधीचियुद्धम्, स्थानेश्वरस्थाणुतीर्थस्थाणुवटादिमाहात्म्यवर्णनम् ।

३२ द्वात्रिंशेध्याये –

दक्षकृतः क्रत्वनुष्ठानारम्भः । तत्र रुद्राय यज्ञभागाप्रदानम्, पर्वतीप्रकोपः । भद्रकालीहरिभद्र(वीरभद्र)-योरुत्पत्तिः । तत्कृतं क्रतुविध्वंसनम् । मृगरूपेण पलायमानस्य यज्ञस्य वीरभद्रकृतः शीर्षच्छेदः, देवैः कृता देवदेवस्तुतिः । देवानां महेश्वरोदरप्रविष्टानां विविधाद्भुतलोकविचित्रपुरदर्शनम् । कालकर्ण्या उत्पत्तिः, तद्भयाद् देवानां भस्मकूटे निलयनम् । भस्मसंसर्गात् तेषां पाशुपतत्वप्राप्तिः, देवैः कृता कालकर्णीस्तुतिः,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

देवान्प्रति देवदेवस्यानुग्रहः । यज्ञस्य मृगशीर्षतासमापत्तिः, भद्रकर्णह्रदभद्रेश्वरयोर्महिमा, हरिभद्रस्य पुण्यक्षेत्रत्वम्, कुब्जाम्रकब्रह्मावर्त्तयोः समाख्या । दक्षकृता पार्वतीपरमेश्वरयोः स्तुतिः, दक्षं प्रति शिवयोरनुग्रहः । अर्जुनानदी-कनखलयोर्नामनिर्वचनं समाहात्म्यम् ।

३३ त्रयस्त्रिंशेध्याये –

रुद्रवाहनत्वकामनया धर्मयज्ञयोस्तपश्चर्या, रुद्रदर्शनम्, धर्मयज्ञकृता रुद्रस्तुतिः । जन्मान्तरेपि रुद्रवाहनत्वप्राप्तये तयोरभ्यर्थना, यथेष्टवरावाप्तिः । अतुलपुत्रप्राप्त्यर्थं सुरभ्यास्तपश्चर्या । सुरभ्या वृषभोत्पत्तिः, एकादशरुद्राणा-मुत्पत्तिः, गोकन्योत्पत्तिः (सप्तगवोत्पत्तिः) । वृषभचर्चारताख्यानम्, चरिततृणस्य तृषार्त्तस्य वृषभस्य समुद्रे जलपानारम्भः, समुद्रशोषणाशङ्कया वडवानलकृतो वृषभनिग्रहः । पीतस्य जलस्याशेषतश्छर्द्दनम्, तथावमानितस्य वृषभस्य रुद्राराधनम् । तुष्टस्य रुद्रस्य वृषभप्रार्थनया वडवानलनिग्रहः पश्चात्तद्विसर्जनं च । देवतानां प्रर्थनया रुद्रेण वृषभस्य लोकोद्वेजकरवेगनिवारणाय प्रभाकरनाम्नो गणस्य सर्जनम् । रुद्रस्य वृषवाहनत्वम्, वृषभस्य सर्वदेवमयत्वम्, तदङ्गावयवेषु सर्वभूतस्थितिकथनम् ।

३४ चतुस्त्रिंशेध्याये –

देवदेवस्य वृषवाहत्वकथोपसंहारः । महादेवेन कथान्तरे कृष्णेत्युक्तायाः पार्वत्या गौरवर्णत्वप्राप्तये पुत्रसंजननार्थं च हिमवच्छिखरे दुश्चरतपश्चरणम् । पार्वत्या अलंकारतोलंकारधाराख्यपुण्यसलिलसरिदुत्पत्तिः । पार्वत्यां तपसि स्थितायां तद्भक्षणोद्देशेन तत्र समागतस्य शार्दूलस्य तत्प्रतीक्षया तस्यामनिमेषदृष्टेस्तद्दिनात्प्रभृति तत्रैव निश्चलतयावस्थानम् । उपमन्यूपाख्यानम्, उपमन्योरनायासोपस्थितक्षीरान्नभोजनप्राप्तये रुद्राराधनम् । यथेप्सित-वरप्राप्तिः, उपमन्युकृता शिवस्तुतिः ।

३५ पंचत्रिंशेध्याये–

सुकेशोपाख्यानम्,– सुकेशस्य पथि गच्छतो वने गर्तान्तर्वीरणस्तम्बाश्रितलम्बमानाधोमुखस्वपूर्वजपित्रादिदर्शनम् । सुकेशस्य तदुद्धरणोपायजिज्ञासा । सुकेशाय पितृकृतोऽपत्योत्पादनोपदेशः, ऊर्ध्वरेतसः सतः सुकेशस्यापत्यो-त्पादनमन्तरेणैव पितॄणामुद्धारार्थं रुद्राराधना, तुष्टेन रुद्रेण सुकेशपितॄणां नरकादुद्धरणं, तस्य गाणपत्य-प्रदानं च ।

३६ षट्त्रिंशेध्याये–

सुकेशतत्पितृसंवादः, पुत्रप्रशंसा पुत्रपदनिरुक्तिश्च । पितृपदसमाख्यानम् । पुत्राणां पितृत्वप्राप्त्युपाख्यानम् । नारकीयगतिजिज्ञासया पितॄन्प्रति सुकेशस्य प्रश्नः ।

३७ सप्तत्रिंशेध्याये–

सुशर्मकृतं नरकवर्णनम्, यमलाचलादित्रयोदशनरकाणां नामकथनम् । तदुच्छ्रयाणां संख्योपकथनम् । पापिनां नारकीयगतिक्रमसंक्षेपः, सामान्येन नरकयातनावर्णनम् । यमलाचलनरकतद्गामिजीवतत्कर्मतद्यातनादीनां वर्णनम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

३८ अष्टत्रिंशेध्याये–

कूटशाल्मलिनरकतद्गामिजीवतत्कर्मतद्यातनादिवर्णनम् ।

३९ ऊनचत्वारिंशेध्याये–

कालसूत्रनरकतद्गामिजीवतत्कर्मतद्यातनादिवर्णनम् ।

४० चत्वारिंशेध्याये–

कुम्भीपाकनरकतद्गामिजीवतत्कर्मतद्यातनादिवर्णनम् ।

४१ एकचत्वारिंशेध्याये–

असिपत्रवनतद्गामिजीवतत्कर्मतद्यातनादिवर्णनम् ।

४२ विचखारिंशेध्याये–

वैतरणीनदीतदन्तःपातिजीवतत्कर्मतद्यातनदिवर्णनम् ।

४३ त्रिचत्वारिंशेध्याये–

अयोधननरकतद्गामिजीवतत्कर्मतद्यातनादिवर्णनम् ।

४४ चतुश्चत्वारिंशेध्याये–

पद्माख्यनरकतद्गामिजीवतत्कर्मतद्यातनादिवर्णनम् ।

४५ पंचचत्वारिंशेध्याये–

महापद्माख्यनरकतद्गामिजीवतत्कर्मतद्यातरादिवर्णनम् ।

४६ षट्चत्वारिंशेध्याये–

रौरवनरकतद्गामिजीवतत्कर्मतद्यातनादिवर्णनम् ।

४७ सप्तचत्वारिंशेध्याये–

महारौरवनरकतद्गामिजीवतत्कर्मद्यातनादिवर्णनम् ।

४८ अष्टचत्वारिंशेध्याये–

तमोनामनरकतद्गामिजीवतत्कर्मतद्यातनादिवर्णनम् ।

४९ ऊनपंचाशत्तमेध्याये–

तमस्तमतरनरकतद्गामिजीवतत्कर्मतद्यातनादिवर्णनम् ।

५० पंचासत्तमेध्याये –

नारकीयाणां संसारपरिवर्तापरनामनानायोनिप्राप्तिक्रमवर्णनम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

५१ एकपंचाशत्तमेध्याये –

नारकीयाणां जीवानामुद्धारार्थं सुकेशस्य पुनर्दुश्चरतपश्चरणेन रुद्राराधनम् । रुद्रप्रसादतोऽशेषजीवानां सद्यो नरकादुद्धारः ।

५२ द्विपंचाशत्तमेध्याये –

नरकगतिनिवारकाणां शुभकर्मणां कथनम्, सुकेशोपाख्यानोपसंहारः । काष्ठकूटोपाख्यानम्, भूमन्युनाम्नो गौतमकुलोत्पन्नस्यापुत्रस्य वृद्धब्राह्मणस्य रुद्राराधनतः, सुयशानाम्न्यां पत्न्यां काष्ठकूटनामसुतोत्पत्तिः । काष्ठकूटस्य विप्रवटोः पित्रोरनुमत्या विद्याध्ययनार्थं गृहान्निर्गत्य च्यवनसविधे गमनम् । तदन्तरे भूमन्योर्दिष्टान्तप्राप्तिः काष्ठकूटेऽध्ययनं समाप्य गृहं प्रत्यागते भर्तृशोकाकुलायास्तन्मातुरपि प्राणत्यागः । कष्ठकूटस्य रुद्राराधनम् रुद्रानुग्रहेण काष्ठटस्य गाणपत्यप्राप्तिः । तत्पित्रोरुज्जीवनम्, तेषां श्वेतपर्वते निवसनम्, काष्ठकूटोपाख्यानोपसंहारः । उपमन्युसुकेशकाष्ठकूटादिषु महादेवस्य योसावनुग्रहः स देव्यां तपसि स्थितायां संवृत्त इति कथनम् ।

५३ त्रिपंचाशत्तमेध्याये –

देव्यास्तपः प्रभावेण लोकानां स्थितिविपर्ययं दृष्ट्वा भीतानां ब्रह्मादीनां शंकरदिदृक्षया दिव्येन विमानेन मन्दाराचलगमनम् ।

५४ चतुष्पचाशत्तमेध्याये –

शिवाज्ञया ब्रह्मादीनां ततः परावृत्य हिमवच्छिखरे तपश्चरन्त्या देव्याः समीपे गमनम् ।

५५ पंचपंचाशत्तमेध्याये–

ब्रह्मणोऽभ्यर्थनया पार्वत्यास्तपसो विनिवृत्तिः । ब्रह्मणा वरेणच्छन्दनम् । पार्वत्या प्रथमं व्याघ्रस्य कृते वरयाचनम् ब्रह्मणा व्याघ्रस्य सोमनन्दिनामनिर्देशनपुरःसरं गणत्वप्रदानम् । ब्रह्मणः सकाशे पार्वत्याः स्वस्य गौरवर्णत्वाय लोकोत्तरमहिमपुत्रप्राप्तये च प्रार्थना । ब्रह्मणा पार्वत्या यथाभिलषितवरप्रदानन् ।

५६ षट्पंचाशत्तमेध्याये –

दुष्कृतकर्मणा दुर्गतिं गतानामपि पितृभक्तिवशाच्छुभगतिप्राप्तेरुदाहरणाय सोमनन्दिनः पूर्ववृत्तमाख्यातुं सप्तव्याधोपाख्यानम् । सप्तानां द्विजशिष्याणां गुरोर्वचनाद् गामानेतुं दशार्णतो माहिष्मतीगमनम् । गुर्वर्थं गामादाय प्रतिनिवर्तमानानां तेषां पथि दुर्भिक्षवशाद् निराहारतया मुमूर्षूणां क्षुधातुराणां गत्यन्तराभावात् पित्रुद्देशेन तामेव गामालभ्य तन्मांसभक्षणम् । तद्विज्ञाय क्रुद्धेन गुरुणा तेषां कष्टा गतिर्भवित्रीति शापप्रदानम् । गुरुशापवशान्नष्टसंज्ञानां तेषां दशार्णातीरवर्तिनि वने व्याधपुत्रत्वेन जन्मग्रहणम् । व्याधवृत्त्या वने विचरतां तेषां करुणाविष्टचेतसोपाध्यायेन जातिस्मरणयोग्यतापादनेनानुग्रहकरणम् । ततो गृहं प्रत्यागतानां तेषां तत्पित्रा व्याधेन स्वपूर्ववृत्तकथनम् । व्याधे पितरि स्वर्याते मातरि च संस्थितायां सप्तानामपि तेषां कालञ्जरादिषु क्रमेण

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मृगादिजन्मप्राप्तिः । चक्रवाकयोनौ वर्तमानानां तेषां सप्तानां मध्ये प्रथमेषां त्रयाणां काम्पिल्याधिपतेरणुहस्य सान्तःपुरस्य सरोवरे जलक्रीडादर्शनाज्जातरागाणां यथाक्रमं ब्रह्मदत्तब्रह्मधन्वपाञ्चालनाम्ना राजपुरोहितमन्त्रि-पुत्रत्वेन जन्मग्रहणम् ।

५७ सप्तपंचाशत्तमेध्याये –

अन्येषां चतुर्णां चक्रवाकानां तत्रैव कस्यचिद्यायावरस्य सुतत्वेन जन्मग्रहणम् । ब्रह्मदत्तस्य पञ्चालब्रह्मधन्वभ्यां सह वहुकालं काम्पिल्ये राज्यसुखभोगः । तदनन्तरं चतुर्णां यायावरसुतानां योगेश्वराणां संकेतश्लोकद्वयश्रवणेन जातस्मृतेर्ब्रह्मदत्तस्य वने गत्वा योगेन तनुत्यागः । पञ्चालस्य तपसा यक्षत्वप्राप्तिः । ब्रह्मधन्वनश्च देवदेव्या आराधनतः कामरूपित्वप्राप्तिः । हालोपाखयानम्, भलन्दनोपाख्यानम् । कामवशाद् व्याघ्ररूपेण ऋषिं संत्रास्य रिरंसया ऋषिपत्नीं धर्षयतो ब्रह्मधन्वनस्तस्याः शापवशाद् व्याघ्रयोनिं प्राप्तिरिति सोमनन्दिनः पूर्ववृत्तोपसंहारः।

५८ अष्टपंचाशत्तमेध्याये –

ब्रह्मणो वरलाभादनन्तरं कृष्णवर्णापहानाय पार्वत्याः सरसि स्नानम् । सरसि स्नातायाः पार्वत्याः शरीरकोशतः कौशिक्युत्पत्तिः । देव्याज्ञया कौशिक्या दुर्गानाम्ना विन्ध्यशिखरे निवसनम् ।

५९ ऊनषष्टितमेध्याये –

पार्वत्या गिरिशिखरवृक्षाग्निपरिचारिकादिभ्यो वरदानम् । ततो वनदेवताभिर्वन्दिताया देव्या अग्निं प्रदक्षिणी-कृत्य ऋषीनभिवन्द्य सोमनन्दिना सार्धं वियता जगत्पतेर्देवदेवस्य पत्युःपार्श्वे गमनम् ।

६० षष्टितमेध्याये–

देव्या कौशीकी किमर्थं विन्ध्याचले संप्रेषितेति व्यासस्य जिज्ञासा । प्रसंगाद् विन्ध्यकृतादित्यमार्गविरोधना-गस्त्यकृततदवनामनकथाख्यानम् । सुन्दनिसुन्दोपाखयानप्रसंगेन गोकर्णक्षेत्रोत्पत्त्याख्यानम् । गोकर्णे सुन्दनिसुन्दयो-स्तपश्चर्या, ब्रह्मणः सकाशाद् वरप्राप्तिः ।

६१ एकषष्टिमेध्याये–

वरदृप्तयोः सुन्दनिसुन्दयोर्लोकनाशाय निर्गमः। अत्याचारः, नन्दनवनावमर्दनम् । अमरावतीप्रवेशश्च, देवानां ततः पूर्वमेव पलायनम् ।

६२ द्विषष्टितमेध्याये –

अमरावतीं विजितवतोः सुन्दनिसुन्दयोर्विन्ध्याचले निवसनम् । तयोःसंहाराय देवानां तिलोत्तमासर्जनम् । तां प्रति शिवस्यानुग्रहः, मण्डलेश्वरसमाख्या । पिण्डारेश्वरोत्पत्तिः, तिलोत्तमाया विन्ध्याचले गमनम् । सुन्द-निसुन्दयोस्तिलोत्तमादर्शनम् । तिलोत्तमार्थं कलहायमानयोः कामसमूढचेतसोः सुन्दनिन्दयोः परस्परगदाप्रहारेण निधनम्। सुन्दनिसुन्दयोर्मृतयोर्जीवतः शुंभनिशुंभोत्पत्तिः । तयोस्तपश्चर्या, वरप्राप्तिः, देवदानवसंगरः, शुंभ-निशुंभयोर्विजयश्रीप्राप्तिः, देवानामन्तर्धानम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

६३ त्रिषष्टितमेऽध्याये –

देवान् विजितवतोः शुंभनिशुंभयोर्विन्ध्याचले आगत्य निवसनम् । शुंभानुचरस्य मूकदानवस्य विन्ध्यशिखरे कौशिकीदर्शनम् । मूकवचसा कामातुरस्य शुंभस्य देवीसमीपे दूतप्रेषणम् । देव्या स्वस्य युद्धशुल्कत्वज्ञापनम् । दैत्यानामितिकर्तव्यताविषये परामर्शः ।

६४ चतुःषष्टितमेऽध्याये –

दैत्यानां सैन्यसन्नाहः, शुंभनिशुंभयोर्महता सैन्येन कौशिकीं प्रति प्रयाणम् । देव्याःशरीराद् योगिनीनां प्रादुर्भावः। देव्याः सैन्यसज्जा, युद्धाय निर्याणम् ।

६५ पंचषष्टितमेऽध्याये –

देवीनां दैत्यानां च मिथस्तुमुलं युद्धम् । देवीकृतं दैत्यानां कदनम् । षष्ठीमेघस्वनयोर्मृत्युकार्तस्वरयोर्लक्ष्मीद्रुमयोः कान्तिमययोः सरमामुरयोश्चण्डाघनयोर्नियतिखरयोः प्रभावतीधुन्ध्वोः संसक्तं द्वन्द्वयुद्धम् । युद्धे दैत्यसैन्यानां विनाशः । युधि विहतपराक्रमपौरुषाणां दानवयोधमुख्यानां द्विरदवरानधिष्ठाय पुनर्युद्धाय प्रयतनम् ।

६६ षट्षष्टितमेऽध्याये –

दैत्यानां प्रयत्नं विदित्वा देवीनामपि युद्धार्थं सांग्रामिकगजोत्तमाधिरोहणम् । गजारूढानां देवीदानवानां संकुलं युद्धम् । देवीभिराजौ स्वबलान्यभ्यर्दितानि दृष्ट्वा चतुरङ्गिण्या सेनया शुंभनिशुंभयोः समाजभूमावागमनम् । देव्या सह शुंभनिशुंभयोर्युद्धम्, तुमुलः संघर्षः, देव्या दैत्यसैन्यानामल्पावशेषीकरणम् । देव्या शुंभनिशुंभयोर्ध्वजकवचाश्वसारथीनां निर्णाशनम् । दिवमुत्पतितयोः शुंभनिशुंभयोर्देव्या ग्रीवयोः संप्रगृह्य निष्पेषणम्, शुंभनिशुंभवधः ।

६७ सप्तषष्टितमेऽध्याये –

देवैः कृता कौशिकीस्तुतिः, देवदेव्योः कौशिक्यै वरप्रदानम् । कौशिकीविजयमहोत्सवः, विन्ध्यशिखरे देवैर्दिहितः कौशिक्या अभिषेकः, शक्रवाक्यम् ।

६८ अष्टषष्टितमेऽध्याये –

कौशिक्या स्वदेहोद्भूतानां देवीनां लङ्कादिदेशेषु प्रतिष्ठापनम्, कौशिकीकृतो महिषबधः ।

६९ ऊनसप्ततितमेऽध्याये –

पार्वत्या गौरवर्णप्रासादनानन्तरं भर्त्तुर्दर्शनाय हिमवच्छिखरवरान्मन्दराचले प्रत्यागमनम् । नन्दिकृता गौरीस्तुतिः । व्याघ्रद्वितीयाया गौर्या भर्त्तुश्चरणाभिवन्दनम् । गौर्या देवदेवस्य सविधे स्वतपश्चर्याविनिरणकथनम् । शिवेन सोमनन्दिनो वरप्रदानम् । सोमस्य सगणस्य शम्भोर्गौर्यास्तपस्थलदर्शनाय हिमवच्छिखरगमनम् । गौरीशिखरसमाख्या, शिवेन हिमवतो वरप्रदानम् । गौरीशिलास्तनकुण्डालङ्कारधाराकोशीनीलकुण्डनिश्रीराग्रारण्यकृष्णाजिनादिमहिमसमाख्यानम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

७० सप्ततितमेध्याये –

देवदेवस्य दर्शनार्थं शक्रशशिवायूनां मन्दराचले आगमनम् । हिरण्यकशिपोर्वधार्थं गृहीतनरसिंहरूपस्य विष्णो-रुद्धारार्थं देवदेवस्य समीपे शक्रस्य प्रार्थना । देवदेवानुग्रहेण वायोर्मूर्त्तत्वम् । शशिनो यक्ष्मापहानाय प्रभासे तपश्चरणोपदेशः, प्रसंगागतं हिरण्यकाशिपूपाख्यानम् । हिरण्यकशिपोरुत्पत्तिः, श्रीपर्वते हिरण्यकशिपोस्तपश्चर्या । ब्रह्मणो वरलाभः, त्रैलोक्यराज्यकरणम्, श्रीपर्वतोपाख्यानम् । श्रीपर्वतमाहात्म्यम्, श्रीगिरेर्वरप्रदानम् ।

७१ एकसप्ततितमेध्याये –

हिरण्यकशिपोरत्याचारेण पीडितानां देवानां ब्रह्मणा सह विष्णोः समीपे गमनम् । हिरण्यकशिपोर्वधार्थं प्रार्थना, विष्णुना नरसिंहरूपेण हिरण्यकशिपोर्वधः । रुद्रस्य शरभरूपेणावतारः, नृसिंहकृता शरभस्तुतिः । शरभरूपिणा रुद्रेण विष्णोर्नृसिंहरूपात्समुद्धरणम् ।

७२ द्विसप्ततितमेध्याये –

मन्दरे विहरतो देवदेवस्य पार्वत्याः प्रार्थनया विन्ध्याचलमागम्य तत्र मनसा निर्मिते महापुरे योगसन्धानमास्थाय तया सह महासुरतारम्भः । तन्निमित्तान् महोत्पातान् दृष्ट्वा भीतैर्देवैर्विन्ध्यमागत्य शंकरदर्शनार्थं तत्सविधेऽ-लक्ष्यदूतरूपेण वह्नेःप्रेषणम् । तत्र नन्दिनोऽनुग्रहेण वह्नेरभ्यन्तरप्रवेशः । वह्नेः प्रार्थनया देवदेवस्य महासुरता-त्तूष्णीं निष्क्रम्य देवेभ्यो दर्शनदानम् । देव्यास्तनययोगापनोदनाय शम्भोः सुरतविरतये देवानां प्रार्थना । देवानां तुष्टचर्थं शम्भुना चिरसन्धारितस्य स्वतेजसो वह्नावाधानम् । महासुरतभङ्गात् पार्वत्याः प्रकोपः । नन्दिनं प्रति रोषेण कर्णोत्पलप्रक्षेपः । ततः स्वर्णशृंगसमींपतो भद्रोत्पलसरोत्पत्तिः । देवताभ्यः पार्वत्याःशापः । कैटभनाम्ना पार्वत्यास्तत्रावस्थानम् । रमणशिलामहिमा, शङ्करसकाशे देवानामन्धकतपःप्रवृत्तिविज्ञापनम् । शंकरेण देवानां समाश्वासनम्, शंकराज्ञया माहेश्वरतेजसो देवैः शरवणे समुत्सर्जनम् । तत्प्रभावात् तत्र सर्वस्य हिरण्मयीभावः ।

७३ त्रिसप्ततितमेध्याये–

अन्धकोत्पत्तिकथामवतारयितुं प्रसंगात् शंकुकर्णक्षेत्रसमाख्यानम् । पुत्रप्राप्त्यर्थं शंकुकर्णक्षेत्रे हिरण्याक्षस्य तपश्चर्या । परिहासार्थं पार्वत्या शंभोर्नेत्रनिमीलनम् । शंभुनेत्रनिमीलनजन्यांधकारादन्धकोत्पत्तिः, तपश्चरते हिरण्याक्षाय महादेवेनान्धकसुतप्रदानम् । युवावस्थां प्राप्तस्यान्धकस्य गृहान्निर्गत्य तपसे प्रस्थानम् ।

७४ चतुःसप्ततितमेध्याये–

गङ्गाद्वारवर्त्तिकनखलक्षेत्रेन्धकस्य तपश्चर्या, ब्रह्मणः सकाशाद् वरप्राप्तिश्चक्षुर्लाभश्च ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

७५ पंचसप्ततितमेध्याये–

लब्धवरस्यान्धकस्य गृहं प्रत्यागमनम् । हिरण्याक्षकृतश्चिरचिन्तितः कौमुदीमहोत्सवः ।

७६ षट्सप्ततितमेध्याये–

हिरण्याक्षपुरे दानवानां महासमाजः, दैत्यदानवानां सभाप्रवेशः, हिरण्याक्षस्य सभाप्रवेशः ।

७७ सप्तसप्ततितमेध्याये–

दैत्यदानववीराणां परामर्शः, विजययात्राप्रस्तावः, हिरण्याक्षस्य सैन्यसन्नाहः, शुक्रवाक्यम् । शुक्रं पुरस्कृत्य ससैन्यस्य हिरण्याक्षस्य अमरावतीविजयाय निर्याणम् ।

७८ अष्टसप्ततितमेध्याये–

अमरावत्यां देवानां भयसूचका दारुणोत्पाताः, बृहस्पतिवाक्यम्, देवानां सैन्यसन्नाहः, व्यूहरचना, युद्धाय निर्याणम् ।

७९ ऊनाशीतितमेध्याये–

दैत्यपक्षे व्यूहरचना, युद्धारम्भः देवदानवसैन्यानां भीषणः संघर्षः ।

८० अशीतितमेध्याये–

लोकपालानां दैत्यदानववीरैः सह दारुणं युद्धम् । दैत्यदानववीराणां पराक्रमः ।

८१ एकाशीततमेध्याये–

देवराड्हिरण्याक्षयोर्युद्धम् । अंशनाम्न आदित्यस्य पराक्रमः ।

८२ द्वयशीतितमेध्याये–

देवदानववीराणां तुमुलं युद्धम् । दैत्यदानववीराणां युद्धस्थलाद्विद्रवणम् हिरण्याक्षवाक्याद्वीराणां पलायनान्नि-वृत्तिः ।

८३ त्र्यशीतितमेध्याये –

देवदानववीराणां पुनस्तुमुलयुद्धारम्भः । संकुलं युद्धम्, उभयोः पक्षयोर्महत् कदनम् ।

८४ चतुरशीतितमेध्याये –

देवदानवयुद्धस्य महायज्ञरूपेण वर्णनम्, देवानां दानवानाञ्च भीषणः संघर्षः, दारुणं द्वन्द्वयुद्धम्, देवेन्द्रहिरण्याक्षयो-र्युद्धम्, ऐरावतस्य विक्रमः । हिरण्याक्षकृतप्रहारेण सशक्रस्यैरावतस्य युद्धभूमेर्विद्रवणम् ।

८५ पंचाशीतितमेध्याये –

वायुविप्रचित्त्योरंशसंवरयोर्भगबलयोः पूषविरोचनयोश्च द्वन्द्वयुद्धवर्णणनम् । वाय्वंशभगानां पराजयः, पूष्णः पराक्रमः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

८६ षडशीतितमेध्याये –

पूष्णः पराजयः, बलिमित्रयोर्बाणवरुणयोर्यमान्धकयोर्जयन्तेल्वलयोश्च द्वन्द्वयुद्धम् । मित्रवरुणयमजयन्तानां पराभवः।

८७ सप्ताशीतितमेध्याये –

मयचन्द्रमसो राहुर्हिर्बुध्नयोरजैकपात्कालनेम्योर्ज्वरकार्तस्वनयोर्द्वन्द्वयुद्धम् ।

८८ अष्टाशीतितमेध्याये –

अर्यमप्रह्लादयोर्धरानुह्लादयोर्द्वन्द्वयुद्धम् । ततः पुनर्देवगणानां दैत्यानां च संकुलं युद्धम् । देवानां बलवद्वेगेन दानवानां बलस्य भृशं वेगप्रतिघातः ।

८९ ऊननवतितमेध्याये –

दानवानां त्राणाय हिरण्याक्षस्य युद्धेभिसरणम् । हिरण्याक्षस्य पराक्रमः, देवानां विद्रवणम्, वायोरभिसरणम् । वायोः पराक्रमः, वायुहिरण्याक्षयुद्धम्, दानववीरैः सह वायोः संकुलं युद्धम् । वायोर्विक्रमभङ्गः, सेन्द्राणां देवानां पुनर्दानवान् प्रति अभ्याक्रमणम् । संकुलं युद्धम्, देवेन्द्रविरोचनयोर्युद्धम् । विरोचनस्य पराक्रमः, देवानां पलायनम् ।

९० नवतितमेध्याये –

देवसैन्यं दानववीरैरर्द्यमानं समीक्ष्य अग्नीषोमयोर्युद्धेभिसरणम् । चन्द्रमसः शराघातेन हिरेण्याक्षस्य मोहः । सारथिना हिरण्याक्षस्य संग्रामादपवाहनम् । चन्द्रमसः पराक्रमः, दैत्यवीराणां स्तब्धीभावः, सोमेनेवाग्निनापि दैत्यसैन्यानां भृशं कदनम् ।

९१ एकनवतितमेध्याये –

हिरण्याक्षकृता सारथिभर्त्सना । हिरण्याक्षस्य पुनर्युद्धभूमौ प्रत्यागमनम्, हिरण्याक्षस्याग्नीषोमाभ्यां युद्धम् । सोमस्य युद्धादपयानम् ।

९२ द्विनवतितमेध्याये –

अग्निदानवयुद्धम्, अग्नेः पराक्रमः, अग्निमुखोत्थेन धूमेन युद्धभूमौ सर्वत्रान्धकारः, आटविकसंज्ञं भृशदारुणमन्धकारयुद्धम्।

९३ त्रिणवतितमेध्याये –

अन्धकारविलयनम्, शक्रपुरस्सराणां देवानां प्रसभं दैत्यसैन्यविमर्दनम् , अन्धकासुरपराक्रमः, देवानां पलायनम्, दैत्यानाममरावतीप्रवेशः । हिरण्याक्षस्य विजयात्रारम्भः, वरुणलोकाय प्रस्थानम् ।

९४ चतुर्णवतितमेध्याये –

(वरुणलोकविजयः), (यमलोकाभिगमनम्, यमलोकविजयः), नारकीयाणां मोक्षणम्, पितृपतित्वेन विप्रचित्तेः स्थापनम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

९५ पंचनवतितमेध्याये –

लङ्काभिगमनम्, यक्षपुर्या लङ्काया वशीकरणम् । लङ्कायां प्रह्लादस्याभिषेकः, लोकानां वशीकरणानन्तरं देवतानां स्थानेषु दानवेश्वराणां स्थापनम् । अमरावत्यामिन्द्रत्वेनान्धकस्याभिषेचनम् । स्वयं हिरण्याक्षस्याखिलभूर्लोकानुशासनम् । मूर्तिमतीं पृथिवीं वशीकृत्य नागपाशैर्बद्ध्वा रसातले स्वपुरसमीपतस्तस्यावरोधनम् । हिरण्याक्षराज्यवर्णनम् ।

९६ षण्नवतितमेध्याये –

देवानां दुरवस्था, ब्रह्मकृतं देवानां समाश्वासनम् । ब्रह्मदत्तयोगप्रभावेण देवानां प्रजाशरीरेषु निलीयावस्थानम् । हिरण्याक्षस्य अत्याचारः ।

९७ सप्तनवतितमेध्याये –

ब्रह्मणो वाक्याद् देवानां श्वेतपर्वतगमनम् । तत्र देवैः कृता विष्णोः स्तुतिः । हिरण्याक्षविनाशाय प्रार्थना, सर्वदेवमयं (यज्ञ) वाराहशरीरमास्थायैव तमुग्रदैत्यं हनिष्यामीति विष्णुना देवतानां समाश्वासनम् ।

९८ अष्टनवतितमेध्याये –

देवैर्वराहरूपप्रकल्पनम्, विष्णुना वराहशरीरग्रहणम् । वराहरूपस्य विष्णोरङ्गप्रत्यङ्गेषु देवादीनामवस्थितिवर्णनम् । ऋषिभिर्वराहतेजसः समुद्दीपनम् । वराहस्य देवान्प्रति वचनम्, महादेवेन देवानां समाश्वासनम् । ब्रह्मणा कृतरक्षाविधेर्वराहस्य रुद्रं नमस्कृत्य वरुणालयं प्रति प्रस्थानम् ।

९९ एकोनशततमेध्याये –

वराहस्य महार्णवप्रवेशः, अन्तःसमुद्रे क्रमाल्लोकाल्लोकान्तरं गच्छतो वराहस्य रसातलप्राप्तिः, हिरण्याक्षाय वराहागमनं निवेदयितुं सागरपालस्य दानवस्य अश्मकपुरं प्रति गमनम् ।

१०० शततमेध्याये –

हिरण्याक्षपुरे भयङ्करा उत्पाताः, प्रह्लादहिरण्याक्षयोरनिष्टस्वप्नदर्शनम् । दैत्यानां विमर्शः, भीतस्य सागरपालस्य ससंभ्रमं सभाप्रवेशः । तत्कृतं वराहस्वरूपवर्णनम् । वराहप्रवृत्तिविज्ञानाय हिरण्याक्षेण किङ्करगणप्रेषणम् ।

१०१ एकोत्तरशततमेध्याये –

किङ्कराणां वराहसन्दर्शनम् । वराहकिङ्करसंवादः, किङ्कराणां वराहं प्रति शस्त्रकूटैः प्रहरणम् । वराहेण किङ्कराणां निःशेषतया कदनम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

१०२ द्वच्युत्तरशततमेध्याये –

किङ्कराणां कदनं श्रुत्वा भृशं क्रुद्धस्य हिरण्याक्षस्य स्वासनादुत्पतनम् । विप्रचित्तिप्रभृतिभिर्दानवैः समाश्वासनम् । हिरण्याक्षस्याज्ञया प्रह्लादादिप्रमुखवीराणां वराहनिग्रहार्थं निर्याणम् । किङ्करगणान्निपात्याश्मकपुरं प्राप्तेन वराहेण पुरद्वारादिविध्वंसनम् । सशस्त्रवर्णं दानववीरैरनुयातस्य वराहस्य पुराद बहिः समां भूमिमुपाश्रित्य योधनम् ।

१०३ त्र्यधिकशततमेध्याये –

वराहस्य प्रह्लादान्धकविप्रचित्त्यादिभिर्दानववीरैः सह सुभीषणं चित्रयुद्धम् । तथा युध्यता वराहेण निखिलदानवानां विद्रावणम् ।

१०४ चतुरुत्तरशततमेध्याये –

दानवैः पुनर्वराहं प्रति शस्त्रवर्षणम् । दानवप्रहितसर्वशस्त्राणां वराहेण ग्रसनम् । दानवैः सह वराहस्य भीषणं युद्धम् । वराहेण निखिलदानवानां विद्रावणम् । नर्दता वराहेण विप्रचित्तिं भ्रामयित्वा तस्य पुरं प्रति प्रोत्क्षेपणम् । विप्रचित्तेर्हिरण्याक्षभवनोपरि वेगेन निपतनम् । हिरण्याक्षेण विप्रचित्तेः समाश्वासनम् । विप्रचित्तिहिरण्याक्षसंवादः । विप्रचित्तेर्नैराश्यवचनम्, हिरण्याक्षस्य स्वयं युद्धाय गन्तुं निश्चयः ।

१०५ पंचोत्तरशततमेध्याये –

क्रुद्धस्य हिरण्याक्षस्यातिमहता रथेन युद्धाय निर्याणम् । युद्धार्थं पुरान्निर्गच्छतो हिरण्याक्षस्य नानाविधमहोत्पातदर्शनम् । वराहहिरण्याक्षयुद्धम् । हिरण्याक्षशराघातेन निश्चेष्टस्य वराहस्य महर्षिभिर्देवताभिश्च स्वतेजोभिः समाप्यायनम् ।

१०६ षडुत्तरशततमेध्याये –

तैस्तथाप्यायनादूर्जिततेजसो वराहस्य पुनर्हिरण्याक्षेण सह भीषणं युद्धम् । वराहहिरण्याक्षयोः परस्परमाक्षेपः । दारुणं युद्धम्, क्रुद्धस्य हिरण्याक्षस्य वराहं प्रति भीषणशूलप्रक्षेपः ।

१०७ सप्तोत्तरशततमेध्याये –

अलक्षितेन वेगवता शूलेन हृदि विद्धस्य वराहस्य निःसंज्ञतया भूमौ निपतनम् । जगति ननाविधमहोत्पातप्रवृत्तिः, ब्रह्मादिभिः प्रार्थितेन महादेवेन स्वतेजसा वराहाप्यायनम् । तथाप्यायितस्य कृच्छ्रान्मुक्तस्य वराहस्य हिरण्याक्षेण बहुकालं युद्धम् । प्राप्तकालानतिक्रमणार्थं वराहं प्रत्याकाशवाणी, वराहकृतो हिरण्याक्षवधः ।

१०८ अष्टोत्तरशततमेध्याये –

वराहेणान्तः समुद्रे पृथिव्या अन्वेषणम् बन्धनादुन्मोचननम्, रसातलादानीय स्वस्थाने स्थापनं च। ततो देवकृतैर्दिव्योत्सवैर्नन्दतो वराहस्य मृगीरूपेणोपस्थिताभिर्दिव्याप्सरोभिः सह सुचिरं भूर्लोक एव क्रीडाविहरणेनावस्थानम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

१०९ नवाधिकशततमेऽध्याये –

तथा रममाणस्य वराहस्य चित्रलेखाभार्यायां वृकनाम्नः पुत्रस्योत्पत्तिः । यदृच्छया पृथिव्यां विचरतो वृकस्य हिमवच्छिखरे कुमारानुपस्थितौ तदालयमासाद्य बलदर्पाद्युद्यानद्रुमभञ्जनम् । कोकामुखनाम्ना कुमारानुचरेण वृकस्य बन्धनम् । नारदमुखात्तद्विज्ञाय वराहस्य ससंभ्रमं कुमारगृहगमनम् ।

११० दशोत्तरशततमेऽध्याये –

कुमारेण सह वराहस्य युद्धम् । कुमारशक्तिप्रहारतो वराहस्य देहावपातः । वराहशरीरादुन्मुक्तेन विष्णुना कृता शंकरस्तुतिः। पाशुपतव्रतोपदेशार्थं प्रार्थना च । देवताभ्यो व्रतोपदेशार्थं शम्भोर्देवैः सह द्युलोकगमनम् ।

१११ एकादशोत्तरशततमेऽध्याये –

शम्भौ व्रतोपदेशार्थं द्युलोकं गते लोकमातॄणां देवीनामृषिपत्नीनां देवयक्षोरगगन्धर्वादिपत्नीनां च धर्मजिज्ञासया पार्वतीसमीप आगमनम् । ताभ्यः पार्वत्या धर्मोपदेशः । अन्नादिदानमहिमा, प्रपाकूपतडागादिकरणमहिमा, वृक्षरोपणादिमहिमा, काञ्चनभूम्यादिदानमहिमा, शय्योपकरणवस्त्रभाजनादिदानमहिमा, कन्यादानमहिमा, गृहगजरथाश्वादिदानमहिमा, विविधधेनुदानमहिमा, गोदानमहिमा, गवामङ्गवर्त्तिनां देवादीनां वर्णनम् । जलपात्रादिदानमहिमा, असहायदीनमूढव्याधितसाहाय्यकरणमहिमवर्णनम् । दरिद्राय विप्राय सुवर्णदानस्य फलकथनम् ।

११२ द्वादशोत्तरशततमेऽध्याये–

एकभक्तोपवासकृच्छ्रचान्द्रायणादिविविधव्रतविधिवर्णनम् । स्त्रीणां भर्त्रनुज्ञयैव धर्माचरणादावधिकार इति कथनम् । पार्वत्या देवमातृभिः सह मन्दरे वनदिदृक्षया भ्रमणम् । तत्र पार्वत्या पुष्पिताशोकतरुपोतकदर्शनम् । बालाशोकदर्शनाज्जातस्नेहायाः पार्वत्या हृदि तस्य पुत्रत्वेन ग्रहणाभिलाषः, तदन्तरे सगणस्यान्धकस्य पातालादभ्येत्य मन्दराचले गमनम् । तत्र तस्य पार्वतीदर्शनान्मनःक्षोभः, तद्विज्ञाय पार्वत्या दूरत एव ततोन्यत्र गमनम् । जगन्मातुः पार्वत्या अनवमानार्थमन्धकाय प्रह्लादस्योपदेशः, मन्दरे सप्तर्षीणां धात्रादिभिः समागमः, तेषां यथाश्रुतामृतमथनेतिवृत्तकथनम् ।

११३ त्रयोदशोत्तरशततमेऽध्याये–

ब्रह्मण उपदेशाद् देवासुरकृतं समुद्रमथनम् । तदुत्थोग्रविषस्य शङ्करेण पानम्, अमृतोत्पत्तिः, असुरैरमृतापहरणम् । विष्णुना मोहिनीरूपमास्थाय माययाऽसुरान्मोहयित्वाऽमृतं प्रगृह्य तस्य देवेभ्यः प्रदानम् ।

११४ चतुर्दशोत्तरशततमेऽध्याये –

कालकूटविषस्योत्पत्तेर्विस्तरेण वर्णनार्थं महादेवस्य नीलकण्ठतासमाख्यानार्थं च सनत्कुमारं प्रति व्यासस्यानुरोधः । कथाप्रसंगेन वायुबालखिल्यसंवादस्य कुमारवसिष्ठसंवादस्योमामहेश्वरसंवादस्य चावतारणम् । उमया पृष्टेन महादेवेन स्वस्य नीलकण्ठताया इतिवृत्तं कथयितुं कालकूटोत्पत्तेर्विस्तरेण वर्णनम् । समुद्रमन्थनोत्पन्नात्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कालकूटाज्जगतस्त्राणार्थं ब्रह्मकृता भवस्तुतिः । ब्रह्मणः प्रार्थनया सुरासुरसंघानां सविस्मयं पश्यतां मया लोकत्रयहिताय तदुग्रंविषं निपीय कण्ठे धृतं, ततश्चेयं श्रीकण्ठता ममेति महादेवेन पार्वत्यै स्वस्य नीलकण्ठताया इतिवृत्तकथनम् । ब्रह्मकृतस्य निजस्तवस्य माहात्म्यवर्णनञ्च ।

११५ पंचदशोत्तरशततमेध्याये –

अमृतहरणोत्तरसंजातदेवासुरसंग्रामवर्णनम् । युद्धे देवैर्दानवानां कदनम् । देवानां विजयः, प्रह्लादप्रमुखानां दैत्यानां युद्धात्परावर्तनम् ।

११६ षोडशोत्तरशततमेध्याये –

उत्तरोत्तरं युद्धेषु विष्णुना पराजितेन प्रह्लादेन पुत्राय राज्यप्रदानम् । देवासुराणां वर्षसहस्रिकमाटिवकाख्यं युद्धम् । तस्मिन् युद्धे शक्रकृतो विरोचनवधः । विरोचने हते ब्रह्मणा दैत्यराज्ये वलेरभिषेचनम् । देवान् विजित्य वलिना त्रैलोक्यराज्यकरणम् । विष्णोर्वामनावतारः, वामनस्य बलिसद्मगमनम् । बलिवामनसंवादः, बलेः सकाशे वामनस्य पदत्रयोन्मितभूमियाचनम् । बलौ वामनाय भूमिं दातुं प्रवृत्ते प्रह्लादेन निषेधनम् । वलि-प्रह्लादसंवादः, प्रसंगाद् वलिकृतमष्टकेतिवृत्ताख्यानम् । वलिना वामनाय संकल्प्य पदत्रयप्रदानम्, वलेरुपरि ससाधुवादं देवैः कृता पुष्पवृष्टिः ।

११७ सप्तदशोत्तरशततमेध्याये –

प्रतिग्रहानन्तरं वामनस्य पदत्रयार्थं विक्रमणम् । तद् दृष्ट्वा दैत्यानां त्रिविक्रमस्योपरि शस्त्रास्त्रैराक्रमणम् । देवदानवयुद्धम्, दैत्यानां पराजयः, ब्रह्मणा बलेः समयकरणम् । देवानां राज्यप्राप्तिः, बलेः पातालप्रवेशः, देवैः कृता वामनस्तुतिः । देवनां स्तुत्या संजाततोषातिशयस्य वामनरूपस्य विष्णोः स्वाभिमानतो योगभ्रंशः । योगभ्रष्टे तस्मिन् तदन्तरेणासुरीपाप्मायाः प्रवेशः । तत्कृता च विष्णोश्चिरन्तनी वामनरूपतापत्तिः ।

११८ अष्टादशोत्तरशततमेध्याये –

प्रतिग्रहकृतया पाप्मयाविष्टस्य विष्णोस्तत्पाप्मप्रहाणार्थं ब्रह्मणो वाक्यात् सप्तर्षिप्रभृतिमुनिजनसहितानां देवानां वामनमादाय तीर्थयात्रायै प्रस्थानम् । शुकोपाख्यानम् - सुषुम्णापुष्करिणीप्रभृतिकतिपयपुण्य तीर्थयात्रा-नन्तरमग्रतो गच्छतां तेषामेकत्र शुष्कतरुकोटरे क्षुत्तृड्भ्यां शुष्यतः शुकस्य तैर्दर्शनम् । शुकशक्रसंवादः, शुककृतं तरुमहिमवर्णनम् । शुकाय शक्रेण वरदानम्, शक्रस्य वरदानतस्तस्य शुष्कतरोः पुनरुज्जीवनम्, शुकस्य च ब्रह्मलोक-प्राप्तिः ।

११९ ऊनविंशोत्तरशततमेध्याये –

(१) गौतम्युपाख्यानम्, - कृमिलापुर्यामेकस्या गौतमीनाम्न्या विधवाया ब्राह्मण्यास्तपसि सक्तायास्तद्बालपुत्रस्य कृष्णसर्पदंशनाद् मरणम् । अर्जुननाम्ना व्याधेन गौतम्यास्तद्वृत्तान्तकथनम् । गौतम्या विलापः । व्याधेन सर्पस्य निग्रहणम्, सर्पव्याधसंवादः, गौतम्यास्तपसो भीतनां कालमृत्युनियतिकृतान्तयमनां बालमृत्यु(निमित्त)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कारणत्वेन सर्पाद्युत्तरोत्तरकृताभियोगानां सर्वेषामेकैकशस्तत्रागमनम् । यमगौतमीसंवादः, यममुखाद् देहिनां जन्ममरणयोः स्वकृतशुभाशुभकर्मनिमित्तत्वश्रवणाद् गौतम्या मनसो दुःखशमनम् । देवानां वरदानेन मृतबालस्य पुनरुज्जीवनम् ।

(२) यातुधान्युपाख्यानम् - कृमिलातो गच्छतां देवनां कृत्यानामतीर्थस्थलप्राप्तिः, कृत्यासमाख्यानप्रसंगागतं तृणबिन्दूपाख्यानम् । याजनप्रार्थनानङ्गीकारात् प्रकुपितेन तृणबिन्दुना सप्तर्षीन् प्रति कृत्याप्रेषणम् । सप्तर्षीणां विनाशाय शुभां वापीमुपाश्रित्यान्तरं प्रतीक्षमाणाया यातुधान्यपरनाम्न्याः कृत्यायाः परिव्राड्वेषेणेन्द्रेण हननम् । तीर्थयात्रोपसंहारः, विष्णोरश्वमेधेन यजनम् । तत्र शंकरस्यागमनम् ।

१२० विंशत्युत्तरशततमेध्याये –

भगवतः शूलिनः पार्वत्या सह रजन्यां श्मशानदर्शनायाभिगमनम् । क्रमादुज्जयिनीं प्राप्तेन भगवता शूलिना श्मशाने संस्कारार्थमानीतं मृतं विप्रबालमुज्जीव्य तस्य गणत्वप्रदानम् । ततो गत्वा, तीर्थयात्रां समाप्य हिमवच्छिखरे यज्ञवरेण यजतां देवानां महादेवेन दर्शनदानं वरेणच्छन्दनं च ।

१२१ एकविंशत्युत्तरशततमेध्याये –

विष्णोः पाप्माप्रहाणार्थं शंभुसविधे देवानां प्रार्थना । महादेवेन तत्र गिरौ शूलारोपणेन जलधारानिःसारणम् । तज्जले स्नपितस्य विष्णोः शरीरान्मूर्त्तायाः पाप्माया अभिनिःसरणम् । विष्णुना पाशुपतव्रतवरणम्, तुष्टेन हरेण विष्णवे स्वशरीरार्धप्रदानम् । तन्निमित्तं च तस्य विष्णुशंकरत्वम् (हरिहररूपत्वम्)। त्रैलोक्यराज्यार्थे पुनर्देवासुरयुद्धम् । महादेवस्याज्ञया परशुरामेणैकाकिना युधि सर्वेषां सैंहिकेयगणानां हननम् । दानवानां पलायनम्, देवैर्जामदग्न्याय वरप्रदानम् ।

१२२ द्वाविंशत्युत्तरशततमेध्याये –

कालनेमिपराक्रमः, केशवकालनेमियुद्धम् । विष्णुकृतः कालनेमिवधः, तारकमययुद्धोपसंहारः । पुरिश्चन्द्रक्षेत्रसमाख्यानम्, नारायणपाप्माप्रहाणाय देवताभिः कृतं त्र्यम्बकस्तोत्रम् । विष्णोः कृते देवताभिः पुरश्चरणानुष्ठानम् । महादेवाज्ञया सर्वैः पाशुपतव्रताचरणम् । विष्णोस्तपश्चर्या, विष्णोः पाप्माप्रहाणम् । हरिश्चन्द्रक्षेत्रसमाख्यानम् ।

१२३ त्रयोविंशत्युत्तरशततमेध्याये –

जामदग्न्येन पुरिश्चन्द्रे महादेवदर्शनम् । महादेवेन जामदग्न्याय चिरजीवित्वादिवरसप्तकप्रदानपूर्वकं सरहस्यधनुर्वेद (विद्याज्ञान) प्रदानम् । जामदग्न्येन पितुर्वैरनिर्यातनार्थं पृथिव्या निःक्षत्रत्वकरणम् । जामदग्न्यकृतः श्रियाः परिभवः । जामदग्न्येन यज्ञानुष्ठानम्, कश्यपाय पृथ्वीप्रदानम् । जामदग्न्यस्य काश्यपभूमिं परित्यज्य समुद्रान्तर्द्वीपे निवसनम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

१२४ चतुर्त्रिंशत्युत्तरशततमेध्याये-
कश्यपपालितायाः पृथिव्या अधोगमनम् । कश्यपस्य स्वतपोबलात् स्वयं पृथ्वीभावेनावस्थानम्, पृथिव्या कश्यपस्य प्रसादनम्, पृथिव्याः कश्यपदुहितृत्वम् ।

१२५ पंचविंशत्युत्तरततमेध्याये-
विप्रचित्तेर्भस्त्रापदे तपश्चर्या, तस्य महादेवाद्वरप्राप्तिः, देवासुरसंग्रामः, लोमहर्षणं ध्वजयुद्धम् । इन्द्रकृतो दानवसंहारः ।

१२६ षड्विंशत्युत्तरशततमेध्याये-
व्यासजिज्ञासया भस्त्रापदक्षेत्रसमाख्यानाय गङ्गावतरणमुपाख्यातुं सगरोपाख्यानम्, सगरनामसमाख्या, सगरस्याश्वमेधेन यजनम्, अश्वापहरणम्, अश्वान्वेषणाय सागरोत्खननम्, कपिलावमाननात् सगरसुतानां संहारः, सगराज्ञयांशुमतः कपिलाश्रमगमनम् ।

१२७ सप्तविंशत्युत्तरशततमेध्याये-
अंशुमत्कपिलसंवादः, अंशुमतो वैनतेयेन समागमः, सगराणामुद्धाराय वैनतेयकृतो गङ्गानयनोपदेशः, कपिलाश्रमादश्वप्रत्यानयनम्, सगरस्य यज्ञसमाप्तिः, गङ्गानयनाय सयावसरं तपश्चरतोरंशुमद्दिलीपयोर्मनोरथसिद्धि विनैव स्वर्गमनम, गङ्गावतारणोपक्रमः, भगीरथस्य तपश्चर्या । ब्रह्मणो वरप्राप्तिः, भगीरथेन शंकरतोषणम्, गङ्गाया गर्वः, शंकरस्य कोपः, शंकरप्रसादनार्थं देवैः कृता रुद्राणीस्तुतिः, तत्र तस्या लोकजनीत्वोपपादनाय देवैर्भस्त्राशब्दप्रयोगः पार्वत्या शिवप्रसादनम्, शिवेन गङ्गावेगधारणाङ्गीकरणम् । भस्त्रापदक्षेत्रनिरुक्तिः भस्त्रापदभस्मेश्वरयोर्महिमवर्णनम् ।

१२८ अष्टाविंशत्युत्तरशततमेध्याये-
भस्त्रापदे देवताभिः शिवलिङ्गानि संस्थाप्य स्वस्वनाम्ना तीर्थानां स्थापनम् । वज्रोपल(भस्त्रापद?)नाम्नि हिमवच्छिखरे गङ्गावतरणप्रेक्षणाय महतः समाजस्योपस्थितिः, उमासहायस्य देवदेवस्य तत्रागमनम् । महादेववचनाद् भगीरथेन गङ्गायाः संस्मरणम्, गङ्गायाः स्वर्लोकादवतरणम्, दिवोवतरन्त्या गङ्गाया मध्येपथमाकाशगङ्गादिनामनिष्पत्तिः, तस्या एव पुनस्त्रिस्रोतादिनामान्तरनिष्पत्तिः । त्रिभिर्वेगैर्महता जवेन पतन्त्या गङ्गायाः शिवेन स्वजटाभारे ग्रहणम् । जटाजूटेवरुद्धायास्तस्यास्तत्रैव चिरकालमवस्थानम् । देवानां प्रार्थनया शिवेन स्वजटाभाराद् गङ्गाया अवमोचनम् । बिन्दुसरस उत्पित्तिः, गङ्गायास्त्रिभिः स्रोतोभिस्ततो निःसरणम् । तस्या मध्यस्रोतसो भागीरथीति समाख्या । गङ्गाद्वारोत्पत्तिः' गङ्गावतरणस्थलस्य भस्त्रापदमित्याख्या ।

१२९ ऊनत्रिंशदुत्तरशततमेध्याये-
हालाहलयुद्धाख्यानम्, बलस्य नेतृत्वे हालाहलाख्यस्य दानवगणस्य देवैः सह संग्रामः, प्रथमतोसुराणां विजयः, पश्चान्महादेवानुग्रहाद्देवानां विजयः, इन्द्रेण बलस्य हननम् । असुराणां पराजयः, अन्धकारयुद्धम् । देवान्तकस्य तपश्चर्या, रुद्रप्रसादात्तामसीं मायामाश्रित्य देवान्तकेन देवानां प्रबाधनम् । ऋषीणां वचनाद् देवैरसुराणां मोहाया

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्सरसां प्रेषणम्, अप्सरोरूपमोहितानां दानवानां परस्परयुद्धेन स्वतः संहारः, अवशिष्टानां देवैः संहरणम् ।

१३० त्रिंशदुत्तरशततमेध्याये–

अन्धकाख्यानम् (पूर्वप्रक्रान्तम्), अन्धकेन मन्दरप्रस्थे पार्वत्या दर्शनम् । पार्वतीरूपदर्शनात् क्षुभितस्य कामोपहत-चेतसोन्धकस्य तां प्रति दुष्टभावना । प्रह्लादस्योपदेशः, अन्धकस्य दुराग्रहः । अन्धकस्य दुष्टभावं बुद्ध्वा कोपाच्छूलमुद्यम्य तं हन्तुं प्रवृत्तायाः पार्वत्या महादेवेन निषेधनम्, पार्वत्यास्ततोन्यतो गमनम्, अन्धकेन सह योद्धुं महादेवाज्ञया नन्दिना सकलगणनामाह्वानम्, सगणानां सकलगणनायकानां महासमाजस्य तत्रोपस्थितिः, उपस्थितानां गणानां नन्दिना महादेवाय रूपगुणसंख्यादिविज्ञापनम् ।

१३१ एकत्रिंशदुत्तरशततमेध्याये–

महादेवेन गणनां महासमाजस्य निरीक्षणम्, संख्यानश्रवणम्, महादेवाज्ञया नन्दिनः संरक्षकतायां बृहस्पतिनाग्नावाहुतिप्रदानम् । मन्दरमारुरुक्षूणामसुरबलानां प्रमथैः सह संघर्षः, अन्धकबलानां मन्दरारोहणम् । मन्दरस्थितिवर्णनम् ।

१३२ द्वात्रिंशदुत्तरशततमेध्याये–

शुक्रेणान्धकाय प्रमथानीकनायकानां परिचयप्रदानम्, अन्धकस्य प्रार्थनया शुक्रेणासुरबले पर्वतव्यूहरचनम् । महादेवाज्ञया बृहस्पतिना प्रमथानीके वज्रव्यूहरचनम् ।

१३३ त्रयस्त्रिंशदुत्तरशततमेध्याये–

प्रमथासुरसंग्रामदर्शनार्थं विमानकोटिभिरुपस्थितानां दवानां समाजैर्नभोमण्डलसमाच्छादनम् । प्रमथासुरसैन्ययोर्युद्धोपक्रमः, (गणयुद्धारम्भः) ।

१३४ चतुस्त्रिंशदुत्तरशततमेध्याये–

प्रमथासुरसैन्ययोः संकुलं युद्धम्, युद्धभूमौ शोणितौघवहानदीप्रवृत्तिः ।

१३५ पंचत्रिंशदुत्तरशततमेध्याये –

प्रमथासुरसुसैन्ययोस्तुमुले युद्धे वर्तमाने शंकुकर्णप्रभृतीनां दशानां प्रवरगणेश्वराणामसुरबलान्तःप्रवेशः, असुराणां व्यूहभङ्गः, उभयोः पक्षयोर्दारुणः संघर्षः ।

१३६ षट्त्रिंशदुत्तरशततमेध्याये –

विरोचनस्य प्रमथानीके प्रवेशः, विरोचनस्य पराक्रमः, विनायकविरोचनयुद्धम् । विनायकपराक्रमः, बाणकुण्डोदरयुद्धम्, बाणविनायकयुद्धम्, विनायकराहुयुद्धम् । गणेश्वरदानवेश्वराणां संसक्तयुद्धम् ।

१३७ सप्तत्रिंशदुत्तरशततमेध्याये –

प्रमथासुरसैन्यनायकानां वीराणां तुमुलं द्वन्द्वयुद्धम् । रथगजवाजिपादातानां दारुणः सन्निपातः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

१३८ अष्टात्रिंशदुत्तरशततमेध्याये –

प्रमथासुरसैन्ययोर्महता वेगेनान्योन्यमाक्रमणम् । घोरः संग्रामः, नन्दिनो जम्भकुजम्भाभ्यां दारुणं युद्धम्, कुजम्भवधः ।

१३९ ऊनचत्वारिंशदुत्तरशततमेध्याये –

क्रुद्धेन जम्भेन नन्दिनं प्रति दारुणपरिघप्रक्षेपणम् । शंकुकर्णेन जवान्मध्येमार्गं तत्परिघप्रग्रहणम् । शंकुकर्णस्य परिघमुद्यम्य जम्भं प्रति धावनम्, महान् कोलाहलः । तद्युद्धदर्शनलालसया सान्धकानां प्रमथासुरसैन्यप्रवीराणां तदानीं कलहाद् विरम्य कौतूहलेन तत्र तथैवावस्थानम् ।

१४० चत्वारिंशदुत्तरशततमेध्याये –

जम्भमुद्दिश्य धावन्तं शंकुकर्णं प्रति वृत्रस्याभिधावनम् । वृत्रशंकुकर्णयोर्दारुणं युद्धम् ।

१४१ एकचत्वारिंशदुत्तरशततमेध्याये –

वृत्रस्य पराक्रमः, विट्पतिवृत्रयोर्युद्धम् । विट्पतिं प्रति दैत्यवीराणां सम्भूयाक्रमणम्, प्रमथासुरवीराणामति-दारुणं युद्धम् ।

१४२ द्विचत्वारिंशदुत्तरशततमेध्याये –

कार्त्तस्वनपराक्रमः, कार्त्तस्वनेन प्रमथानामाकुलीकरणम्, विट्पतिकार्त्तस्वनयोर्युद्धम्, कार्त्तस्वनवधः ।

१४३ त्रिचत्वारिंशदुत्तरशततमेध्याये –

विट्पतिं प्रति क्रुद्धानां प्रह्लादाद्यसुरवीराणामभ्याक्रमणम् । तद् दृष्ट्वा सोमनन्द्यादिप्रमुखगणेश्वराणां प्रत्याक्रमणम् । संसक्तानां प्रमथासुरवीराणां भीषणं युद्धम् ।

१४४ चतुश्चत्वारिंशदुत्तरशततमेध्याये –

प्रमथासुरवीराणां तुमुलं संसक्तयुद्धम्, विनायककृतो हुण्डतुहुण्डवधः ।

१४५ पंचचत्वारिंशदुत्तरशततमेध्याये –

प्रमथासुराणां संकुलं युद्धम् । जम्भवधः, असुरगणेश्वराणां महान्सन्निपातः । स्वयंप्रभेण दानवसैन्यसागरप्रमथनम्, अन्धकविरोचनयोर्विमुखीकरणम् । विमुखीभूतस्यान्धकस्य शुक्रसकाशे गमनम् ।

१४६ षट्चत्वारिंशदुत्तरशततमेध्याये –

अन्धकेन शुक्रसविधे दीनमनसा दुःखनिवेदनम् । शुक्रेणान्धकस्य समाश्वासनम् । रणे निपतितानां दानववीराणां शुक्रेण समुत्थापनम् । प्रमथासुरवीराणां पुनर्भीमनादः प्रतिसमागमः ।

१४७ सप्तचत्वारिंशदुत्तरशततमेध्याये –

असुरगणेश्वराणामतिभैरवः संघट्टः, जम्भविनायकयुद्धम् । प्रमथासुराणामाश्चर्यकरं युद्धम् । नन्दिना महादेवाय लोकातिशायि भार्गवकर्म निवेदनम् । महादेवाज्ञया नन्दिना हठात् शुक्रमपहृत्य तस्य तत्समीपे उपस्थापनम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

महादेवेन सजीवस्य (जीवतः) शुक्रस्य निगीरणम् ।

१४८ अष्टचत्वारिंशदुत्तरशततमेऽध्याये –

शुक्रेऽपहृतेऽन्धकस्य विषादः, गणदानवानां पुनर्भीषणं युद्धम् । नन्दिनं प्रति जम्भस्य गजेनाभियानम् । विनायकेन जम्भगजस्य मध्येमार्गं विनिपातनम्, विनायकस्य जम्भकुजम्भाभ्यां दारुणं युद्धम् । विनायकसाहाय्यार्थमुपस्थितानां गणेश्वराणां दानववीरैःसह संकुलं युद्धम् ।

१४९ ऊनपंचाशदुत्तरशततमेऽध्याये –

अन्धकेन तदनुयायिदानववीरैश्च प्रमथगणानामुपरि दारुणशस्त्रास्त्रवर्षणम् । दानववीरैः प्रमथानां कदनम्, रुद्रद्वारपालादीनां दानवैः सह संघर्षः ।

१५० पंचाशदुत्तरशततमेऽध्याये –

रुद्रोदरान्तर्भ्राम्यमाणस्य विवशस्य शुक्रस्य बहुविधविचित्रलोकदर्शनम् । वर्षशतानन्तरं महादेवप्रसादात् शुक्रस्य शुक्रवल्लिङ्गान्निःसरणम् । शुक्रमार्गेण तथानिःसरणात् भार्गवस्य शुक्रत्वं महादेवपुत्रत्वञ्च । शुक्रनिर्मुक्तेर्दर्शनाद्दानवसैन्ये महान् हर्षः, प्रमथासुराणां पुनर्भीषणः संघर्षः । प्रमथैःसमर्दितानां (पूर्वमेव) सागरसमाश्रयणम् । युद्धादपसृत्य सागरं श्रितात् दानवान् प्रति शुक्रस्य शापः, शुक्रेणान्धकस्य समाश्वासनम् । शुक्रेण संरक्षितस्यान्धकस्य द्विगुणेनोत्साहेन युद्धे प्रवृत्तिः । अन्धकेन शस्त्रप्रहारैर्गणेश्वराणां स्तब्धीकरणम् । गणेश्वराणां दानवैः सह पुनर्भयानकं युद्धम् ।

१५१ एकपंचाशदुत्तरशततमेऽध्याये–

अन्धकबलार्दितानां प्रमथानां साहाय्यार्थं ब्रह्मणो वचनात् शक्राद्यखिलदेवानां युद्धभूमावतरणम्, प्रमथैर्देवगणैश्च दानवबलानां व्याकुलीकरणम्, अन्धकस्य रुद्रमुद्दिश्य वेगेनाभिसरणम्, नन्दिना तस्य वारणम्, नन्द्यधन्कयोर्दारुणं युद्धम्, अन्धकस्य विरथीभावः, रथान्तरारोहणम्, पुनः सुदारुणयुद्धप्रसक्तिः ।

१५२ द्विपञ्चाशदुत्तरशततमेऽध्याये–

देवदानवानां द्वन्द्वयुद्धम्, नन्दिना सहान्धकस्याति भयंकरं युद्धम्, अन्धकस्य मायायुद्धम्, एकेनान्धकेन सर्वेषां देवानां प्रमथगणेश्वराणां च व्याकुलीकरणम् ।

१५३ त्रिपंचाशदुत्तरशततमेऽध्याये–

अन्धकस्य प्रमथगणेश्वरैस्सहातिदारुणं युद्धम् । प्रमथैर्दानवानां प्रमथनम्, युद्धभूमौ दुस्तरशोणितनदीप्रवृत्तिः । देवदानवानां समाकुलमद्भुतं युद्धम् ।

१५४ चतुःपञ्चाशदुत्तरशततमेऽध्याये–

क्रुद्धानां दानवेश्वराणां नन्दिनं प्रति अभिद्रवणम् । नन्दिनो दानववीरैः सह भीषणं युद्धम् । नन्दिना शरेण बलेर्निपातनम् । बलौ निपतिते दानवानां युद्धाद्विद्रवणम् । अन्धकेन दानवेन्द्राणां संबोधनम्, अन्धकवचसा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दानवानां पुनर्युद्धाय प्रतिनिवर्तनम्, अन्धकस्य नन्दिनं प्रति रथेनाभियानम्, नन्द्यन्धकयोस्तुमुलं द्वैरथं (युद्धम्), अन्धकस्य युद्धेद्भुतः पराक्रमः, अन्धकशरवेधव्याकुलानां देवगणानां प्रमथगणेश्वराणाञ्च नन्दिनमेकं विमुच्य सर्वेषां युद्धाद्विद्रवणम्, ततोसुरबले घोरः सर्वप्राणिकृतः सवादित्ररवो महान् सिंहनादः ।

१५५ पंचपंचाशदुत्तरशततमेध्याये–

अन्धकेन भग्नपौरुषाणां देवानां शूलपाणेः शरणे गमनम्, देवानां प्रार्थनया महादेवेन शूलं संप्रेष्य तेन हृदि विद्धस्यान्धकस्य स्वसमीप आनायनम्, शूलविद्धान्धकहृदयविनिःसृतशोणितबिन्दुभ्योन्धकसरूपाणां योधानां समुत्पत्तिः, महादेवाज्ञया मातृभिस्तेषां भक्षणम् । अन्धकस्य वर्षसहस्रं सूर्यतेजसा शूलाग्रे पचनम् । ततो जनितसात्विकभावेनान्धकेन चन्द्रार्धमौलेः स्तवनम्, सुतुष्टेन महादेवेनान्धकाय गाणपत्यप्रदानम्, ब्रह्मकृतो रुद्रस्तवः ।

१५६ षट्पंचाशदुत्तरशततमेध्याये –

अन्धकमथनानन्तरं महादेवेन देवानां गणानाञ्च यथोचितमर्चनेन विसर्जनम् ।

१५७ सप्तपंचाशदुत्तरशततमेध्याये –

देवगणविसर्जनानन्तरं शङ्करस्य स्वभवनप्रवेशः । गणप्रवरीकृतस्यान्धकस्य महादेवेन पार्वत्याः स्वसुतत्वकथनम् । पार्वत्या चान्धकस्य पुत्रेति संबोधनम् । अन्धककृता पार्वतीस्तुतिः । अन्धकं प्रति पार्वत्या अनुग्रहः ।

१५८ अष्टपंचाशदुत्तरशततमेध्याये –

महादेवस्याग्रतः पार्वत्याः पुत्र विषये जिज्ञासा, महादेवकृतं पुत्रमहिमवर्णनम् । कोष्ठजात् पुत्राद् भूमिरुहस्य (कृतकपुत्रत्वम्), पुत्रस्य श्रेष्ठतरत्वकथनम्, पुत्रशब्दनिरुक्तिः, तरूणां पुत्रप्रतिकृतित्वम्), तरुपुत्रकग्रहणविधिकथनम्, पार्वत्या महादेवसविधे अशोकतरुपुत्रग्रहणेच्छाप्रकटनम्, महादेवेन तदनुमोदनम्, प्रसङ्गात् स्त्रीणां भर्त्रनुज्ञयैव धर्माद्यनुष्ठानाधिकारितायाः कथनम् ।

१५९ ऊनषष्टयुत्तरशततमेध्याये –

पार्वत्या अशोकतरुपुत्रग्रहणोत्सवोपक्रमः, महादेवाज्ञया अशोकतरुपोतकसन्निधौ उत्सवस्थले सुमालिनाम्ना पिङ्गलयक्षेण यथावश्यकान्नादिसयोजनेन सामग्रीसज्जीकरणम्, महादेवाज्ञया विप्राग्र्याणां लोकपालादीनां चामन्त्रणार्थं नन्दिनः प्रस्थानम्, नन्दिनः प्रथमतो वरुणालयगमनम् तत उदयाचलगमनम् ।

१६० षष्टयुत्तरशततमेध्याये –

ततो नन्दिनो यथाक्रमं सूर्य - धनेश - यम - शक्र - लोकगमनम् ।

१६१ एकषष्टयुत्तरशततमेध्यायें –

शक्रलोकान्नन्दिनो ब्रह्मलोकगमनम्, ततः क्षीरसागरगमनम् दिवि भुवि च यथोपदृष्टश्रुतान् विप्रानामन्त्र्य नन्दिनो मन्दरे प्रत्यावर्तनम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

१६२ द्विषष्ट्युत्तरशततमेऽध्याये –

नन्दिनः कार्यात् प्रसन्नेन महादेवेन पार्वत्या अनुमोदेन नन्दिने वरदानम् । सायं सन्ध्योपासनानन्तरं सगणस्य सोमस्य महादेवस्य हर्षान्नृत्याचरणम् । अशोकतरुपुत्रग्रहणार्थं महादेवाज्ञया पार्वत्यास्तद्रात्रौ यथोक्तनियमेनावस्थानम्, परेद्युः प्रभात एव पार्वत्या भर्त्रा सह अशोकतरुपोतसन्निधौ गमनम्, ब्रह्मादिदेवानां महर्षिप्रवराणामन्येषां च महतः समाजस्य तत्रोपस्थितिः, उमया ऽशोकतरुपोतकस्य वस्त्रभूषादिना समलंकरणम् । विप्राणां वेदघोषैः पुण्याहशब्दैश्च गुञ्जायमाने हर्षोल्लासयुक्ते महोत्सवे गृहीतविप्रानुज्ञयोमया सविध्यशोकतरुपुत्रग्रहणम्, सोमेन शिवेन सम्यक्सभाजितानां सत्कृतानां पूजितानां तर्पितानां विप्राणां देवादीनां च स्वस्वस्थानगमनम्, अशोकतरुपुत्रग्रहणमहोत्सवसमाप्तिः ।

१६३ त्रिषष्ट्युत्तरशततमेऽध्याये –

व्यासस्य प्रार्थनया पुनः सनत्कुमारकृतः पूर्वप्रक्रान्तस्कन्दोत्पत्तिविवरणारम्भः वह्निना शम्भुतेजसो गङ्गाया सङ्क्रामणम्, तदुग्रतेजो धारयितुमक्षमया गङ्गया तस्य श्वेतपर्वतशिखरवर्त्तिशरस्तम्बे समुत्सर्जनम्, ततश्च स्कन्दोत्पत्तिः । स्कन्दस्य विश्वामित्रेण जातकर्मसम्पादनम्, कृत्तिकादीनां मातॄणां च तत्रोपस्थितिः, स्कन्देन गिरिश्रृङ्गस्य पातनम्, शक्रस्य तत्रागमनम्, शक्रस्कन्दविवादः, शक्रदर्पदलनम्, शक्रकृता सेनापत्यग्रहणप्रार्थना, सोमस्य शिवस्यागमः, वह्निस्वाहागङ्गादीनां च तत्रोपस्थितिः, स्कन्देन षोढामूर्त्तिधारणम्, महादेवेन स्कन्दाय चतुर्विधास्त्रग्रामप्रदानम्, पार्वत्या वह्न्यादिभिश्च तस्मै विविधवस्त्रालङ्कारादिप्रदानम्, ब्रह्मादिसर्वदिवौकसां तत्रागमनम्, देवानां तारकसंहाराय स्कन्दस्य सेनापत्येऽभिषेचनार्थं शिवसविधे प्रार्थना, महादेवेनतदनुज्ञानम् ।

१६४ चतुःषष्ट्युत्तरशततमेऽध्याये –

स्कन्दमादाय तस्याभिषेकार्थं ब्रह्मादीनां समन्तपञ्चके सरस्वत्यास्तीरभूमावागमनम्, तत्र सुवर्णकलशसिंहासनादीनामुपकरणानां सज्जीकरणम्, गृहीतविविधोपहारस्य सर्वलोकसमाजस्य तत्रोपस्थितिः, बृहस्पतेराचार्यत्वे ज्वलनं समिध्य समग्राभिषेचनिकविधिसमापादनम्, महति समारोहे जयवाद्यवेदगीतघोषैः सह स्कन्दस्य सेनापत्येऽभिषेचनम्, स्कन्दाय विविधोपहारप्रदानम्, तस्य विविधोपकरणैरलङ्करणम्, ब्रह्मादिभिरखिलैस्तत्रोपस्थितैः स्कन्दाय नानापारिषदप्रदानम्, शिवेन पार्वत्या च स्वपुत्राय नानारूपधरानेकमहापारिषदप्रदानम् । कौशिक्या स्कन्दायानेकमातृगणप्रदानम्, एवं विविधोपकरणैः सज्जीभूतस्य स्कन्दस्य तारकविजयाय प्रस्थानोपक्रमः ।

१६५ पंचषष्ट्युत्तरशततमेऽध्याये –

सन्नद्धसैन्यानां सुराणां स्कन्दं पुरोधाय दैत्यान्प्रत्यभियानम्, तद्विज्ञाय दैत्यानां ससंभ्रमं सैन्यं सन्नाह्य युद्धार्थं निर्गमनम् देवासुरसैन्ययोस्तुमुलः संघर्षः, तारकस्य युद्धार्थमभिसरणम्, स्कन्दतारकयोर्युद्धम्, तारकबधः, समस्तदैत्यसैन्यानां विनाशः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

१६६ षट्षष्ट्युत्तरशततमेऽध्याये-

पार्वत्याः प्रार्थनया महादेवेन स्वनाम्नामर्थप्रबोधनम् (नामनिर्वचनम्) नामोच्चारणमहात्म्यकथनं च, श्वेतोपाख्यानम्, बाल्यात्प्रभृत्येव श्वेतस्य वृषध्वजेनन्या भक्तिः, विरक्तस्य श्वेतस्य रुद्राराधनार्थं चिरकाल तपश्चर्या, तपसि स्थितस्यैव क्षीणायुषः प्राप्तकालस्य श्वेतस्य नयनार्थं यमदूतानामागमनम्, यमदूतदर्शनात् त्रस्तस्य श्वेतस्य रुद्रानुस्मरणम्, रुद्रेण आसन्नमृत्योः श्वेतस्य रक्षार्थं तत्समीपे गणानां प्रेषणम्, स्वयं यमस्य तत्रागमः, यमस्य रुद्रगणैः सह विवादः, श्वेतमादाय यमस्य गणैः सह रुद्रसमीपे गमनम्, रुद्रेण यमस्य भृशं भत्सर्नम्, रुद्रस्य क्रोधदृष्ट्या यमस्य भस्मीभावः, श्वेतं प्रति रुद्रस्यानुग्रहः, श्वेतं मृत्युमुखादुन्मुच्य तस्मै गाणपत्यप्रदानम्, ससुराणां देवानां प्रार्थनया महादेवेन यमस्य पुनरुज्जीवनम्, श्वेतोपाख्यानोपसंहारः ।

१६७ सप्तषष्ट्युत्तरशततमेऽध्याये-

शिवायतनवर्णनम् आदित्यबन्धन (आदित्यरोधन), समाख्यविन्ध्यकूटवर्त्तितपनेश्वरप्रभृतिनेपालस्य पशुपतिनाथसनाथनैकतुङ्गाद्रिनेश्वरान्तनैकविधपुण्यस्थानानां संक्षिप्तवर्णनम् । अविमुक्तक्षेत्रस्य वाराणस्याः सविस्तरं वर्णनम् ।

१६८ अष्टषष्ट्युत्तरशततमेऽध्याये-

त्रैपुरोपाख्यानोपक्रमः । तारकाक्षविद्युत्प्रभाभ्यां सह मयस्य तपश्चर्या । पितामहाद्वरप्राप्तिः । पुरत्रयनिर्माणम् । त्रिपुरासुरैर्देवान् विजित्य त्रैलोक्यराज्यकरणम् । लोकानां पीडनम् । त्रिपुरविनाशार्थं ब्रह्मादिभिःकृता महादेवस्तुतिः ।

१६९ ऊनसप्तत्युत्तरशततमेऽध्याये-

महादेवेन देवानां समाश्वासनम् । त्रिपुरसंहारार्थं महादेवस्य कृते देवै रथकल्पनम् । त्रिदेवमयशरकल्पना । ब्रह्मणः सारथ्ये शम्भोः रथारोहणम् । नारदस्य मयदिदृक्षया त्रिपुरे गमनम् । शम्भुना सह युद्धकरणाय नारदेन मयस्य प्रोत्साहनम् । दानवानां युद्धसन्नाहः । कृतयुद्धसज्जानां दानवानां शम्भुरथस्य समीपे गमनम् ।

१७० सप्तत्युत्तरशततमेऽध्याये-

शम्भो रथस्य पश्चिमसागरमूर्ध्नि स्थितं त्रिपुरं प्रत्यभियानम् । गणदानवानां तुमुलं युद्धम् । युधि निहतानां दानवानाममृतवेकेन त्रैपुरैः पुनरुज्जीवनम् । ब्रह्मणो विज्ञप्त्या शम्भुना संकल्पमात्रेण दानवानाममृतस्य हरणम् । शम्भुना त्रिपुरदाहार्थं शरक्षेपणम् । शरक्षेपणसमकालमेव शम्भुना हा कष्टमिति उच्चैः प्रोच्य मयस्य दहनाद्रक्षार्थं नन्दिनो मुखेन (त्रिपुरं दिधक्षते) अननाय सन्देशप्रेषणम् । वह्निगवयान्मयस्य त्रिपुरान्निष्क्रम्य पाताले गमनम् । त्रिपुरदाहः । महादेवेन देवानां विसर्जनम् । सगणस्य महादेवस्य कैलासे गमनम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

१७१ एकसप्तत्युत्तरशततमेध्याये -

गुहकृतं क्रौञ्चादारणं शक्रकृतं पर्वतपक्षच्छेदनं चाधिकृत्य व्यासस्य सनत्कुमारं प्रति प्रश्नः । शरस्तम्बवने शक्रेण सह षण्मुखस्य विवादः । मिथः श्रेष्ठत्वपरीक्षार्थं क्रौञ्चप्रदक्षिणा । प्राथम्यविषये पुनर्विवादः। साक्ष्ये साक्ष्ये प्रकल्पितेन क्रौञ्चेन अकृतपरिक्रमस्यापि शक्रस्य मोहात् कृतप्रथमप्रदक्षिणत्वकथनम् । ततः क्रुद्धेन कुमारेण क्रौञ्चस्योपरि शक्त्या प्रहरणम् । क्रौञ्चस्य पञ्चत्वप्राप्तिः । सर्वेषां प्रार्थनया कुमारेण क्रौञ्चस्य पुनरुज्जीवनम् । स्कन्दस्य पराक्रमप्रदर्शनम् । कुमारसंस्तवः । मातृृणामुत्पत्तिः । देवानां मातृरूपत्वम् । ईशानस्य मातृृनायकत्वम् । कोटिवर्षहेतुकेश्वरशूलकुण्डप्रतिकूलादिपुण्यक्षेत्रोत्पत्तिकथनम्। नानाविधमातृतन्त्रोत्पत्तिकथनम् । कोटिवर्षे मातृृणामवस्थानम् ।

१७२ द्विसप्तत्युत्तरशततमेध्याये-

पर्वतपक्षच्छेदोपाख्यानम्- पितुर्बधमनुस्मरतः प्रह्लादस्य वैरनिर्यातिनेच्छया तपश्चरणम् । ब्रह्मणः सकाशादजय्यत्वादिवरलाभः । प्रह्लादहिमवत्संवादः । प्रह्लादेन देवानां विनाशाय हिमवत्सकाशे साहाय्यप्रार्थनम्। प्रह्लादवाक्यात् स्वैरमुत्पतद्भिः पर्वतैर्देशानामुपमर्दनम् । तद् दृष्ट्वा क्रुद्धेन शक्रेण लोकधर्मरक्षार्थं पर्वतानां पक्षच्छेदनम् । प्रह्लादस्य विष्णुना सह विग्रहः । प्रह्लादस्य प्रव्रज्या । आसुरेः शिष्यतां गत्वा पञ्चशिखनाम्ना ख्यातिं गतस्य प्रह्लादस्य सिद्धभावेन परमपदप्राप्तिः । पर्वतपक्षच्छेदोपाख्यानोपसंहारः।

१७३ त्रिसप्तत्युत्तरशततमेध्याये-

द्विजमाहात्म्यवर्णनम् । पार्वत्या जिज्ञासया महादेवेन द्विजमाहात्म्यकथनम् । दानरुचिविप्रोपाख्यानम् ।

१७४ चतुःसप्तत्युत्तरशततमेध्याये–

(१)– पाशुपतयोगवर्णनम् । व्यासस्य जिज्ञासया सनत्कुमारेण पाशुपतयोगवर्णनम् । योगलक्षणम् । योगाभ्यासोदाहरणम् । प्रत्याहारप्राणायामध्यानधाराणानां वर्णनम् । योगिनः प्रातिभविघ्नानां तन्नाशोपायस्य च कथनम् । सांख्यसिद्धान्तनिर्देशः ।

१७५ पंचसप्तत्युत्तरशततमेध्याये–

(२)– सांख्यतत्वविवेचनम् संक्षेपेण सांख्य सिद्धान्त विस्तरः, साँख्यसंमतपंचविंशतत्त्वसंबोधान्नमुक्तिरितिकथनम् । पाशुपतयोगमहिमकथनम् ।

१७६ षट्सप्तयुत्तरशततमेध्याये-

(३)– जन्तोरुत्पत्तेर्वैराग्यस्य प्रबोधोपायस्य (च) विस्तरेण वर्णनम् ।

१७७ सप्तसप्तत्युत्तरशततमेध्याये–

(४)– योगाभ्यासविधिवर्णनम् । योगमहिमा, ध्यानिनां स्वरूपकथनम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

१७८ अष्टसप्तत्युत्तरशततमेध्याये-
(५)- योगिनो ध्यानविधेर्वर्णनम्। योगिनो लक्षणम्, युक्तस्य लक्षणम्, मुक्तस्य लक्षणम्, योगिनो ध्यानसंसिद्धेः सांख्यानां तत्वनिश्चयस्य माहेश्वरविधिं विना न विशेषातिशयः। प्रणवमहिमा, प्रणवस्वरूपम्। प्रणवचिन्तनम्।

१७९ ऊनाशीत्युत्तरशततमेध्याये-
(६)- योगविधिवर्णनम्। पंचविंशकपुरुषस्वरूपकथनम्। षड्विंशकपरमेश्वर (परमपुरुष) स्वरूपकथनम्। षड्विंशकस्येश्वरस्य ज्ञानात् मुक्तिसिद्धिरिति कथनम्। षड्विंषकपरमेश्वरध्यानविधिकथनम्। ध्यानयोगप्रक्रियाकथनम्।

१८० अशीत्युत्तरशततमेध्याये-
(७)- पाशुपतव्रतकथनम्, पाशुपतीदीक्षा, भस्ममाहात्म्यम्, भस्मस्नानमहिमा, प्रणवमहिमा, प्रणवोपासना-माहात्म्यम्।

१८१ एकाशीत्युत्तरशततमेध्याये-
(८)- देहावस्थावर्णनम्, जीवस्थितिवर्णनम्, चेतनपुरुषस्थितिकथनम्, सात्विकादिभाववर्णनम्, जाग्रदाद्यव-स्थावर्णनम्। देहेग्नीषोमयोःस्थितिवर्णनम्, जीवेश्वरयोरास्पदवर्णनम्, ध्यानयोगवर्णनम्, महेश्वरज्ञानात् परमपदप्राप्तिकथनम्, नाडीषु वायूनां संचारकथनम्, माहेश्वर(पाशुपत) योगोपसंहारः।

१८२ द्व्यशीत्युत्तरशततमेध्याये-
व्यासस्य जिज्ञासया सनत्कुमारेण 'प्राप्तयोगस्य मुनेर्विना क्लेशं स्वेच्छया तनुं त्यक्त्वा ब्रह्मप्राप्ते' रुपायकथनम्। मोक्षसाधनीभूतेश्वराराधनसंप्राप्त्युपायकथनम्। त्रिविधोत्क्रान्तिकथनम्। नाडीषु प्राणसंचारस्य कथनम्। उत्क्रान्तिप्रक्रियावर्णनम्। निष्कलयोगवर्णनोपसंहारः।

१८३ त्र्यशीत्युत्तरशततमेध्याये-
सकलस्य शिवस्य लोकस्थितिः। शिवलोकवर्णनम्, शिवपुरवर्णनम्। पुराणमहिमा, उपसंहारः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्कन्दपुराणम्

अम्बिकाखण्डः

(स्कन्दजन्मखण्डः)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ॐ नमः शिवाय

नमः परमदेवाय त्रैगुण्यविजितात्मने ।
शाश्वते[१] योगरूपाय संसाराभावहेतवे[२] ॥१॥
स्थितिसंरोधसर्गाणां[३] हेतवेन्त(?) प्रसारिणे[४] ।
षड्विंशाय प्रधानाय महादेवाय धीमते ॥२॥
प्रजापतेर्महाक्षेत्रे[५] गङ्गाकालिन्दिसङ्गमे ।
प्रयागे परमे पुण्ये ब्रह्मणो लोकवर्त्मनि ॥३॥
मुनयः शंशितात्मानस्तपसा क्षीणकलमषाः ।
तीर्थसंप्लवनार्थाय[६] पौर्णमास्यां कृताह्निकाः ॥४॥
पौराणिकमपश्यन्त[७] सूतं सत्यपरायणम् ।
स्नात्वा तस्मिन्महातीर्थे प्रणामार्थमुपागतम् ॥ ५॥
दृष्टवा ते सूतमायान्तमृषयो हृष्टमानसाः[८] ।
आशास्या[९]सनसंवेशं[१०] तद्योगं[११] समकल्पयन्[१२] ॥६॥
स प्रणम्य ततः[१३] सर्वान् सूतस्तान्मुनिपुङ्गवान् ।
प्रदत्तमासनं भेजे सर्वधर्मसमन्वितः[१४] ॥७॥
तमासीनमपृच्छन्ते[१५] मुनयस्तपसैधिताः[१६] ।
ब्रह्मसत्रे पुरा साधो[१७] नैमिशारण्यवासिनाम्[१८] ॥८॥

---

१ शाश्वतो - ख., सर्वतो - घ. । २ संसारभार ... - घ., संसारोद्भाव ... - ख. । ३ स्थितिसंबोध... - घ. । ४ कर्त्रे हर्त्रे पुरारिणे - घ. । ५ पुरा हुतवहक्षेत्रे, .. महक्षेत्रे - ख. । ६ ...संप्लावनार्थाय - घ. । ७ ... न्ते - ख, .. न्त - घ. । ८ ... न्तं सर्वेप्या कृष्टमानसाः - ख. । ९ आश्चर्या - घ. । १० सेन . - ख. । ११ .. ग्यं - घ. । १२ येत् - ख. । १३ च तान् - ख. । १४ ... धर्मांगमा ... - घ. ।१५ अपृच्छन्त - घ, । १६ .. स्तै समाहिताः -घ. । ... तपसैधिता - .ख । १७ पुरासीना - घ. । १८ ... वासिनः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कथितं भारताख्यानं पुराणञ्च परं[१९] त्वया ।
तेन नः प्रतिभासि[२०] त्वं साक्षात्सत्यवतीसुतः[२१] ॥९॥
सर्वागमपरार्थज्ञः[२२] सत्यधर्मपरायणः ।
द्विजपूजारतो नित्यं तेन पृच्छां त्वमर्हसि ॥१०॥
भारताख्यानसदृशं पुराणाद्यद्विशिष्यते[२३]।
तत्त्वा[२४] पृच्छाम[२५] वै जन्म कार्तिकेयस्य धीमतः ॥११॥
इमे हि मुनयः सर्वे त्वदुपास्तिपरायणाः ।
स्कन्दसंभवसुश्रूषासंजातौत्सुक्यमानसाः[२६] ॥१२॥
एवमुक्तस्तदा सूतः[२७] संसिद्धै र्मुनिपुङ्गवैः ।
प्रोवाचेदं मुनीन् सर्वान् वचो भूतार्थवाचकम् ॥१३॥
श्रृणुध्वं मुनयः सर्वे कार्तिकेयस्य संभवम्[२८] ।
ब्रह्मण्यञ्च[२९] समाहात्म्यं वीर्यञ्च त्रिदशाधिकम्[३०] ॥१४॥
मुमुक्षया[३१] परं स्थानं याते शुकमहात्मनि[३२] ।
सुतशोकाभिसन्तप्तो व्यासस्त्र्यम्बकमैक्षत[३३] ॥१५॥
दृष्टैव स[३४] महेशानं व्यासोभूद्विगतव्यथः ।
विचरन्[३५] स तदा[३६] लोकान्मुनिः सत्यवतीसुतः ॥१६॥
मेरुश्रृङ्गेथ[३७] ददृशे ब्रह्मणः सुतमग्रजम् ।
सनत्कुमारं वरदं योगैश्वर्यसमन्वितम् ॥१७॥
विमाने रविसंकाशे तिष्ठन्तमनलप्रभम् ।
मुनिभिर्योगसंसिद्धैस्तपोयुक्तैर्म्महात्मभिः ॥१८॥
वेदवेदाङ्गतत्त्वज्ञैः[३८] सर्वधर्मागमान्वितैः ।
सकलावाप्तविद्यैस्तु[३९] चतुर्वक्त्रमिवावृतम् ॥१९॥

---

१९ पुरा - घ. । २० प्रविभासि - ख, घ. । २१ तम् - ख. । २२... परोर्थज्ञ: - ख, .. परार्थज्ञ - घ । २३ द्वि शिष्यते । २४ तं त्वा - ख. तत्त्वां - घ । २५ पृच्छामि - घ । २६ संजातोत्सुक्यमानसाः - ख । २७ सूतं - ख. घ. । २८...त्वान् घ । २९ ...स्य च - घ. । ३० ...तृ- ख. त्रिदिवा... - घ. । ३१ मुमुक्षूणां - घ. । ३२ शुके जाते... - घ. । ३३ ... मी... - ख. । ३४ महात्मानं -घ. । ३५ ... रं - ख. । ३६ तपो - घ. । ३७ स - घ. । ३८... वेदार्थतत्त्वज्ञै - घ. । ३९ नकलावाप्तवेदैस्तु - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दृष्टवा तं[४०] सुमहात्मानं व्यासो[४१] मुनिमथास्थितम् ।
ववन्दे परया भक्त्या साक्षादिव पितामहम् ॥२०॥
ब्रह्मसूनुरथ व्यासं समायातं[४२] महौजसम् ।
परिष्वज्याभिसंवेश्य[४३] प्रोवाच वचनं शुभम् ॥२१॥
दिष्टया त्वमसि धर्मज्ञ प्रसादात् पारमेश्वरात्[४४] ।
अपेतशोकः संप्राप्तो विवक्षुर्हृदये[४५] स्थितम् ॥२२॥
श्रुत्वाथ[४६] वचनं सूनो[४७]र्ब्रह्मणो मुनिपुङ्गवः ।
इदमाह वचो विप्राश्चिरं यद्धृदये[४८] स्थितम् ॥२३॥
कुमारस्य कथं जन्म कार्तिकेयस्य धीमतः ।
किन्निमित्तं कुतो वास्य इच्छाम्येतद्धि वेदितुम् ॥२४॥
कथं रुद्रसुतश्चासौ[४९] वह्निगङ्गासुतः कथम् ।
उमायास्तनयश्चैव स्वाहायाश्च कथं सुतः ॥२५॥
स[५०] सुतश्चापि मातॄणां कृत्तिकानां कथञ्च सः[५१] ।
कश्चासौ पूर्वमुत्पन्नः किन्तपाः[५२] कश्च विक्रमः ॥२६॥
सूत[५३] संमोहनं ह्येतत् कथयस्व[५४] यथातथम् ।

सूत उवाच

एवं स पृष्ट[५५] स्तेजस्वी ब्रह्मणः पुत्रसत्तमः ॥२७॥
उवाच[५६] सर्वं सर्वज्ञो व्यासायाक्लिष्टकारिणे[५७] ।
तच्छृणुध्वं यथातत्त्वं कीर्त्यमानं मयानघाः ॥ २८ ॥

⊙ इति स्कन्दपुराणे प्रथमोध्यायः ⊙

---

४० स तं - घ. । ४१ मुनिव्यासोथ सं - घ । ४२ ... न्तं - ख., तमुदंक्षत - घ. । ४३ परं प्रेम्णा .. - घ. । ४४ परमेश्वरात् - घ. । ४५ पिपिक्षुर्वेदवांछितं - घ. । ४६ ... च - ख. । ४७ सूनु - ख. । ४८ य .. - घ. । ४९ ... सावग्नि - घ. । ५० सुपंर्ण्याश्चाथ - क. । ५१ न - क. । ५२ ... पः - घ. । ५३ भू .. - क. । ५४ त्वं - घ. । ५५ एकाम्रे - क. । ५६ च स धर्मं - घ. । ५७... कर्मणे - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

प्रपद्ये देवमीशानं सर्वज्ञमपराजितम् ।
महादेवं महात्मानं विश्वस्य जगतः पतिम् ॥१॥
शक्तिरप्रतिघा यस्य[१] ऐश्वर्यञ्चैव सर्वशः[२] ।
स्वामित्वञ्च विभुत्वञ्च[३] स्वकृतानि प्रचक्षते ॥२॥
तस्मै देवाय सोमाय प्रणम्य प्रयतः शुचिः ।
पुराणाख्यानजिज्ञासोर्वक्ष्ये स्कन्दोद्भवं शुभम् ॥३॥
देहावतारो देवस्य रुद्रस्य परमात्मनः ।
प्राजापत्याभिषेकश्च हरणं शिरसस्तथा ॥४॥
दर्शनं षट्कुलीयानां चक्रस्य च विसर्जनम् ।
नैमिशस्योद्भवश्चैव सत्रस्य च समापनम् ॥५॥
ब्रह्मणश्चागमस्तत्र तपसश्चरणन्तथा ।
शर्वस्य दर्शनञ्चैव देव्याश्चैव समुद्भवः ॥६॥
सत्या विवादश्च तथा दक्षशापस्तथैव च ।
मेनायाश्च समुत्पत्ति[४] र्यथा[५] देव्याः स्वयंवरः ॥७॥
देवानां वरदानञ्च वसिष्ठस्य च धीमतः ।
पराशरस्य चो[६] त्पत्तिर्व्यासस्य च महात्मनः ॥८॥
वसिष्ठकौशिकाभ्याञ्च वैरोद्भवसमापनम्[७] ।
वाराणस्याश्च शून्यत्वं क्षेत्रमाहात्म्यवर्णनम् ॥९॥
रुद्रस्य चात्र सान्निध्यं[८] नन्दिनश्चाप्यनुग्रहः ।
गणानां दर्शनञ्चैव कथनञ्चाप्यशेषतः ॥१०॥
कालीव्याहरणञ्चैव[९] तपश्चरणमेव च ।
सोमनन्दिसमुत्पत्ति[१०]र्वरदानं तथैव च ॥११॥

---

१ तस्य - घ. । २ गं - घ. । ३ मुनिश्चापि - घ. । ४ यथोत्पत्ति - क. । ५ ... स्त - घ. । ६ पाराशर्यसुतो -घ. ।
७ सनं - घ. ।८ साने - क। ९ ... क - क. । १०... समाख्यानं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गौरीत्वं पुत्रलम्भश्च[११] देव्या उत्पत्तिरेव च ।
कौशिक्या भूतमातृत्वं सिंहस्य[१२] रथता[१३] तथा ।।१२।।
गौर्याश्च निलयो विन्ध्ये विन्ध्यसूर्यसमागमः ।
अगस्त्यस्य च माहात्म्यं वधः सुन्दनिसुन्दयोः[१४] ।।१३।।
निशुम्भशुम्भनिर्णाशो[१५] महिषस्य वधस्तथा ।
अभिषेकश्च कौशिक्या - - - - - - - - ।।१४।।
- - - - - - - - - वरदानमथापि च ।
अन्धकस्य तथोत्पत्तिः पृथिव्याश्चैव बन्धनम्[१६] ।।१५।।
हिरण्याक्षवधश्चैव हिरण्यकशिपोस्तथा ।
बलशंशमनं[१७] चैव देव्याः समय एव च ।।१६।।
देवानां गमनं चैव[१८] अग्नेर्दूतत्वमेव[१९] च ।
देवानां वरदानं च शुक्रस्य[२०] च विसर्जनम् ।।१७।।
दूतस्य[२१] च तथोत्पत्तिर्देव्याश्चान्धकदर्शनम् ।
शैलादिदैन्यसम्मर्दो[२२] देव्याश्च[२३] शतरूपता ।।१८।।
आर्यावरप्रदानं च शैलादिस्तव[२४] एव च ।
देवस्यागमनं चैव वृत्तस्य[२५] कथनं तथा ।।१९।।
पतिव्रतायाश्चाख्यानं गुरुशुश्रूषणस्य च ।
आख्यानं पञ्चचूडायास्तेजसश्चाप्यधृष्यता ।।२०।।
दूतस्यागमनं चैव संवादोथ विसर्जनम् ।
अन्धकासुरसंवादो मन्दरागमनं तथा ।।२१।।
गणानामागमश्चैव संख्यानश्रवणं तथा ।
विग्रहश्चान्धकस्याथ[२६] युद्धेन[२७] महता तथा ।।२२।।
शरीरार्धप्रदानं च अशोकसुतसंग्रहः[२८] ।
भस्मसोमोद्भवश्चैव श्मशानवसतिस्तथा ।।२३।।

---

११ ... लाभाश्च-घ. । १२ सिंहाश्च - घ. । १३ रथिता - क. रथिन - घ। । १४ शुंदोपशुः ... - घ. । १५ ... निर्याणं - घ., निर्णाशं क. । १६ वर्णनम् - घ. । १७ बलेः संयमनं - घ. । १८ ... नामागमश्चै ... - घ. । १९ ... भूं - क. घ. । २० शक्रस्य - घ. । २१ व्रतस्य - घ । २२ ... देश्चापि .. - घ । २३ श्चाप्यनु - घ. । २४ शैलादे - घ. । २५ मित्र-घ. । २६ निग्रह - घ. । २७ स्कन्देनागच्छ - घ. । २८ संगमः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

प्रपद्ये देवमीशानं सर्वज्ञमपराजितम् ।
महादेवं महात्मानं विश्वस्य जगतः पतिम् ॥१॥
शक्तिरप्रतिघा यस्य[१] ऐश्वर्यञ्चैव सर्वशः[२] ।
स्वामित्वञ्च विभुत्वञ्च[३] स्वकृतानि प्रचक्षते ॥२॥
तस्मै देवाय सोमाय प्रणम्य प्रयतः शुचिः ।
पुराणाख्यानजिज्ञासोर्वक्ष्ये स्कन्दोद्भवं शुभम् ॥३॥
देहावतारो देवस्य रुद्रस्य परमात्मनः ।
प्राजापत्याभिषेकश्च हरणं शिरसस्तथा ॥४॥
दर्शनं षट्कुलीयानां चक्रस्य च विसर्जनम् ।
नैमिशस्योद्भवश्चैव सत्रस्य च समापनम् ॥५॥
ब्रह्मणश्चागमस्तत्र तपसश्चरणन्तथा ।
शर्वस्य दर्शनञ्चैव देव्याश्चैव समुद्भवः ॥६॥
सत्या विवादश्च तथा दक्षशापस्तथैव च ।
मेनायाश्च समुत्पत्ति[४] र्यथा[५] देव्याः स्वयंवरः ॥७॥
देवानां वरदानञ्च वसिष्ठस्य च धीमतः ।
पराशरस्य चो[६] त्पत्तिर्व्यासस्य च महात्मनः ॥८॥
वसिष्ठकौशिकाभ्याञ्च वैरोद्भवसमापनम्[७] ।
वाराणस्याश्च शून्यत्वं क्षेत्रमाहात्म्यवर्णनम् ॥९॥
रुद्रस्य चात्र सान्निध्यं[८] नन्दिनश्चाप्यनुग्रहः ।
गणानां दर्शनञ्चैव कथनञ्चाप्यशेषतः ॥१०॥
कालीव्याहरणञ्चैव[९] तपश्चरणमेव च ।
सोमनन्दिसमुत्पत्ति[१०]र्वरदानं तथैव च ॥११॥

---

१ तस्य - घ. । २ गं - घ. । ३ मुनिश्चापि - घ. । ४ यथोत्पत्ति - क. । ५ ... स्त - घ. । ६ पाराशर्यसुतो -घ. ।
७ सनं - घ. ।८ सानै - क। ९ ... क - क. । १० ... समाख्यानं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गौरीत्वं पुत्रलम्भश्च[११] देव्या उत्पत्तिरेव च ।
कौशिक्या भूतमातृत्वं सिंहस्य[१२] रथता[१३] तथा ॥१२॥
गौर्याश्च निलयो विन्ध्ये विन्ध्यसूर्यसमागमः ।
अगस्त्यस्य च माहात्म्यं वधः सुन्दनिसुन्दयोः[१४] ॥१३॥
निशुम्भशुम्भनिर्णाशो[१५] महिषस्य वधस्तथा ।
अभिषेकश्च कौशिक्या -- --- --- ॥१४॥
- - - - - - - - - वरदानमथापि च ।
अन्धकस्य तथोत्पत्तिः पृथिव्याश्चैव बन्धनम्[१६] ॥१५॥
हिरण्याक्षवधश्चैव हिरण्यकशिपोस्तथा ।
बलशंशमनं[१७] चैव देव्याः समय एव च ॥१६॥
देवानां गमनं चैव[१८] अग्नेर्दूतत्वमेव[१९] च ।
देवानां वरदानं च शुक्रस्य[२०] च विसर्जनम् ॥१७॥
दूतस्य[२१] च तथोत्पत्तिर्देव्याश्चान्धकदर्शनम् ।
शैलादिदैन्यसम्मर्दो[२२] देव्याश्च[२३] शतरूपता ॥१८॥
आर्यावरप्रदानं च शैलादिस्तव[२४] एव च ।
देवस्यागमनं चैव वृत्तस्य[२५] कथनं तथा ॥१९॥
पतिव्रतायाश्चाख्यानं गुरुशुश्रूषणस्य च ।
आख्यानं पञ्चचूडायास्तेजसश्चाप्यधृष्यता ॥२०॥
दूतस्यागमनं चैव संवादोथ विसर्जनम् ।
अन्धकासुरसंवादो मन्दरागमनं तथा ॥२१॥
गणानामागमश्चैव संख्यानश्रवणं तथा ।
विग्रहश्चान्धकस्याथ[२६] युद्धेन[२७] महता तथा ॥२२॥
शरीरार्धप्रदानं च अशोकसुतसंग्रहः[२८] ।
भस्मसोमोद्भवश्चैव श्मशानवसतिस्तथा ॥२३॥

---

११ ... लाभाश्च-घ. । १२ सिंहाश्च - घ. । १३ रथिता - क. रथिन - घ ॥ १४ शुंदोपशुः ... - घ. । १५ ... निर्याणं - घ., निर्णाशं क. । १६ वर्मनम् - घ. । १७ बलेः संयमनं - घ. । १८ ... नामागमश्चै ... - घ. । १९ ... भूं - क. घ. । २० शक्रस्य - घ. । २१ व्रतस्य - घ । २२ ... देश्चापि ... - घ । २३ श्चाप्यनु - घ. । २४ शैलादे - घ. । २५ मित्र-घ. । २६ निग्रह - घ. । २७ स्कन्देनागच्छ - घ. । २८ संगमः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

रुद्रस्य नीलकण्ठत्वं तथायतनवर्णनम् ।
उत्पत्तिर्यक्षराजस्य कुमारस्य[२९] च धीमतः ।।२४।।
निग्रहो भुजगेन्द्राणां शिखरस्य च पातनम् ।
त्रैलोक्यस्य सशक्रस्य वशीकरणमेव च ।।२५।।
देवसेनाप्रदानञ्च सेनापत्याभिषेचनम् ।
नारदस्यागम[३०]श्चैव[३१] तारकप्रेषितस्य[३२] ह ।।२६।।
वधश्च[३३] तारकस्योग्रो यात्रा भद्रवटस्य[३४] च ।
महिषस्य वधश्चैव क्रौञ्चस्य च निबर्हणम् ।।२७।।
शक्तेरुद्धरण[३५]ञ्चैव[३६] तारकस्य[३७] वधः शुभः ।
देवासुरभयोत्पत्तिस्त्रैपुरं[३८] युद्धमेव च ।।२८।।
प्रह्लादविग्रहश्चैव कृतघ्नाख्यानमेव च ।
महाभाग्यं ब्राह्मणानां विस्तरेण प्रकीर्त्यते[३९] ।।२९।।
कूटे विरूपकरणं योगस्य[४०] च परो विधिः ।
एतज्ज्ञात्वा यथावद्धि कुमारानुचरो भवेत् ।।
बलवान्मतिसंपन्नः[४१] पुत्रञ्चाप्नोति[४२]सम्मतम् ।। ३० ।।

⊙ इति स्कन्दपुराणे अनुक्रमणिकानाम द्वितीयोध्यायः ⊙

सनत्कुमार उवाच[१]

श्रृणुध्वेमां कथां दिव्यां सर्वपापप्रणाशनीम् ।
कथ्यमानां मया चित्रां बह्वर्थां श्रुतिसंमताम्[२] ।।१।।
यां श्रुत्वा पापकर्मापि गच्छेच्च[३] परमां गतिम् ।
न नास्तिके श्रद्दधाने शठे चापि कथञ्चन ।।२।।
इमां कथामनुब्रूयात्तथा चासूयके नरे ।
इदं[४] पुत्राय शिष्याय धार्मिकायानसूयवे ।।३।।

---

२९ कुवेरं ... -क. घ. । ३० नारदागमनं - घ. । ३१ श्चै ... - क. । ३२ प्रेषणं तथा-घ. । ३३ मृघ(?) - ३४ रुद्रज - । ३५ ... रूद्वहण - घ. । ३६ न्देव - क. । ३७ कालस्य च - घ. । ३८ स्त्रिपुरं - घ. । ३९ . णानुकीर्तनं - घ., रोयं(?) । ४० योग्य . -घ. । ४१ . न्नं - घ. । ४२ ... माप्नोति - घ. ।
[१ सनत्कु, उ. - क. । २ संमि ... - क । ३ गच्छेत - क. । ४ इमां - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कथनीयं[५] सदा ब्रह्मन् देवभक्ताय वा भवेत् ।
कुमारभक्ताय तथा श्रद्दधानाय चैव हि ॥४॥
सदा वाच्यमिदं[६] गुह्यं यतीनां भावितात्मनाम् ।
ततः प्रोवाच - - - प्रप-न्नेनान्तरात्मना ॥५॥
पुराब्रह्मा प्रजा[७] त्वष्टुरण्डेस्मिन्[८] संप्रसूयत ।
सोज्ञानात् पितरं ब्रह्मा न वेद तमसावृतः ॥६॥
अहमेक[९] इति ज्ञात्वा सर्व्वाँल्लोकानवैक्षत[१०] ।
नचापश्यत तत्रान्यं[११] तपोयोगबलान्वितः ॥७॥
पुत्रपुत्रेति चा[१२]प्युक्तो [१३] ब्रह्मा शर्वेण धीमता ।
प्रणतः[१४] प्राञ्जलिर्भूत्वा तमेव शरणं गतः ॥८॥
स दत्त्वा ब्रह्मणे शम्भुः स्रष्टृत्वं[१५] ज्ञानसंहितम् ।
विभुत्वं चैव[१६] लोकानामन्तर्धात्[१७] परमेश्वरः ॥९॥
तदेषोपनिषत् प्रोक्ता मया व्यास सनातनी[१८] ।
यां श्रुत्वा योगिनो ध्यानात् प्रपद्यन्ते[१९] महेश्वरम् ॥१०॥
यो ब्रह्माणं विदधे पुत्रमग्रे ज्ञानञ्च यः प्रहिणोति स्म[२०] तस्मै ।
तमात्मस्थं येनु[२१] पश्यन्ति धीरास्तेषां शान्तिः शाश्वती[२२] नेतरेषाम्॥११॥
स व्यास पितरं दृष्ट्वा दीप्त्या[२३] परमया[२४] युतम् ।
पुत्रकामः प्रजाहेतोस्तपस्तीव्रं चचार[२५] ह ॥१२॥
तस्योग्रयोगतपसा[२६] युक्तस्य[२७] सुमहात्मनः ।
अचिरेणैव कालेन पिता संप्रतुतोष ह[२८] ॥१३॥
दर्शनं चागमत्तस्य वरदोस्मी त्युवाच च[२९] ।
स[३०] तुष्टावा[३१] नतो भूत्वा कृत्वा शिरसि चाञ्जलिम् ॥१४॥

---

५ ... या - घ. । ६ वाक्य ... - घ. । ७ ... ध्यक्षो - घ. । ८ ब्रह्माण्डे - घ. ... मण्डे (?) । ९ ... व - ख । १० .. वेक्षत क. ख. । ११ कश्चापि - घ. । १२ स प्रो ... - घ. । १३ ... क्तौ - ख । १४ प्राञ्जलिः ... प्रणतोभू ... घ. । १५ सुहृत्वं - ख. । १६ चापि - घ. । १७ ... र्द्धे - क. । १८ ... ना - क. । १९ ... न्ति - क. । २० स्मेति पदं घ. पुस्तके नविद्यते । २१ न - ख. । २२ ... ता - क. । २३ स्वदीप्त्या - क. ख., प्रदीप्त्या - घ. । २४ परया - क. ख. घ । परमया - क. टी. । २५ चकार - घ. । २६ महता योगतपसा - ख. । २७ च ... - घ. २८ पितरं प्रत्यतोषयंत् - ख. । २९ ह - ख. । ३० तमुवाचा ... - ख. । ३१ ... व - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नमः परमदेवाय देवानामपि वेधसे ।
त्रष्ट्रे वै लोकतन्त्राय[३२] ब्रह्मणः पतये नमः ॥१५॥
एकस्मै[३३] शक्तियुक्ताय आसक्तिरहिताय[३४] च ।
अनन्तायाप्रमेयाय इन्द्रियाविषयाय[३५] च ॥१६॥
व्यापिने व्याप्तपूर्वाय अधिष्ठात्रे प्रचोदिने ।
कृतप्रचोदनायैव तत्त्वविन्यासकारिणे[३६] ॥१७॥
प्रधानचोदकायैव गुणानां[३७] शक्तिदाय च ।
दृष्टिदाय च सर्वेषां स्वयं वै दर्शनाय च ॥१८॥
विषयग्राहिणे चैव नियमस्य च कारिणे ।
मनसः करणानां[३८] च कर्त्रे वै[३९] निगमस्य[४०] च ॥१९॥
भूतानां गुणकर्त्रे च शक्तिदाय तथैव च ।
कर्त्रे ह्यण्डस्य महाश्च[४१] अचिन्त्यायाग्रजाय च ॥२०॥
अप्रमेय पितर्नित्यं[४२] प्रीतो[४३] नो दिश[४४] शक्वरीम् ।
अप्रमेयगुणैश्वर्यशक्तयेव्याहताय वै ॥२१॥
तस्यैवं स्तुवतो[४५] व्यास देवदेवो महेश्वरः[४६] ।
तुष्टोब्रवीत् स्वयं पुत्रं ब्रह्माणं प्रणतं तदा[४७] ॥२२॥
यस्मात्तो विदितं वत्स सूक्ष्ममेतन्महाद्युते ।
तस्माद् ब्रह्मेति लोकेषु नाम्ना ख्यातिं गमिष्यसि ॥२३॥
यस्माच्चाहं पितेत्युक्तस्त्वया बुद्धिमतां वर ।
तस्मात् पितामहत्वं ते लोके ख्यातिं गमिष्यति[४८] ॥२४॥
प्रजार्थं यच्च ते तप्तं तप उग्रं सुदुश्चरम् ।
तस्मात्प्रजापतित्वं ते ददामि[४९] प्रयतात्मने ॥२५॥

---

३२ ... स्य (?) । ३३ ... एत ...- कः । ३४... अशक्ति ...- क. ख. । ३५... पाय- क. । ३६ ... धा-ख. । ३७ गुणिनां-ख.। ३८ का... - घ.। ३९ तत्रैव - ख. । ४० निय... - क. ख. घ. । ४१ ... गु - ख. । ४२ ... यामितायैव - ख. । ४३ प्रीति-ख. । ४४ सर्वंग - ख. घ. । ४५ स्तुतो - ख. । ४६ देवः स परमेश्वरः - क. स देवः... पर.... - घ. । ४७ तथा - ख । ४८ ...सि ख. । ४९ ...ति ख. घ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एवमुक्त्वा स देवेशो सृजन्मूर्त्तिमतीः[५०] स्त्रियः[५१] ।
यास्ताः[५२] प्रकृतयस्त्वष्टौ विकारा[५३] श्चेन्द्रियैः सह ॥२६॥
भावाश्च सर्वे ते देवमुपतस्थुः स्वरूपिणः ।
तानुवाच ततो देवः पतिं युक्तः[५४] स्वतेजसा ॥२७॥
एतमद्याभिषेकेण सम्पादयत मा चिरम् ।
ताभिः स्वं स्वं समादाय भावं दिव्यमतर्कितम् ॥२८॥
अभिषिक्तो बभूवेह[५५] प्रजापतिरतिद्युतिः ।
तत्रेमं[५६] योगिनः[५७] सूक्ष्मं दृष्ट्वा दिव्येन चक्षुषा ॥२९॥
पुराणं[५८] योगतत्त्वज्ञा गायन्ति त्रिगुणान्वितम्[५९] ।
रूद्रः स्रष्टा हि सर्वेषां भूतानां तव च प्रभो[६०] ॥३०॥
अस्माभिश्च भवान् सार्द्धं जगतः संप्रवर्त्तकः ।
स देवस्तोषितः सम्यक् परमैश्वर्ययोगधृक्[६१] ।
ब्रह्माणमग्रजं[६२] पुत्रं प्राजापत्येभ्यषेचयत् ॥३१॥

यः कृत्वा बहुविधमार्गयोगयुक्तं[६३] तन्वाख्यं[६४] जगदिदमादराद्युयोज ।
तं देवं[६५] परममनन्तयोगयुक्तं मायाभिःत्रिभुवनबन्धुमप्रमादम्[६६] ॥३२॥
सर्वेषां मनसि सदावतिष्ठमानं[६७] पश्यन्तं[६८] शुभमशुभं च भूतनाथम् ।
तं देवं प्रणतगतिं[६९] प्रणम्य भक्त्या नित्यं वै शरणमुपैमि[७०] सूक्ष्मसूक्ष्मम् ॥३३॥

⊙इति स्कन्दपुराणे ब्रह्मणः प्राजापत्याभिषेचनो[७१] नाम तृतीयोऽध्यायः[७२]⊙

---

५० ...मूर्तिमत्योसृजत् - क. । ५१ स्त्र... - घ. । ५२ यस्मात् - ख. यास्तदा - घ. । ५३ विशेषा - ख. घः । ५४... तिर्युक्तः क., ...तिर्भुक्तः - घ । ५५ थभूत्वे...-क. । ५६ तत्रस्था - क., अत्रे मं - घ. । ५७...नं - ख. । ५८...ण... घ.। ५९ ... त्मकं - घ. । ६०...भोः - ख.,...भुः - घ. । ६१ ...गैश्वर्यपरयोग - क. घ. । ६२ब्रह्मणः परमं - ख. । ६३ योगमार्गे - घ. । ६४ तत्त्वा - ख. घ. । ६५ देवानाम्य ... - खः । ६६ ...मप्रसादम् - ख. । ६७...नो - ख. । ६८ लोकानां - क., जानानः - ख. । ६९ प्रमथपतिं ... - ख. । ७० ... ति - क. ख., ... णि - घ. ७१... षेकोनाम - ख. । ७२ चतुर्थोध्याय इति घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार[1] उवाच

प्राजापत्यं ततो लब्ध्वा प्रजाःस्रष्टुं प्रचक्रमे ।
प्रजास्ताः सृज्यमानाश्च न विवर्धन्ति[2] तस्य ह ।।१।।
स कुर्वाणस्तथा सृष्टिं शक्तिहीनः पितामहः ।
सृष्टयर्थं भूय एवाथ तपश्चर्त्तुं प्रचक्रमे ।।२।।
सृष्टिहेतोस्तप[3] स्तस्य ज्ञात्वा त्रिभुवनेश्वरः ।
तेजसा जगदाविश्य आजगाम तदन्तिकम्[4] ।।३।।
स्रष्टा तस्य जगन्नाथोदर्शयत्स्वतनौ जगत् ।
महायोगबलैश्वर्यो[5] ज्ञानसिद्धगणावृतः ।।४।।
स्वयमागत्य देवेशो महाभूतपतिर्हरः ।
व्याप्येव[6] हि जगत् कृत्स्नं परमेण स्वतेजसा ।। ५।।
शम्भुः प्राह वरं वत्स याचस्वेति पितामहम् ।
तं ब्रह्मा लोकसृष्टयर्थं पुत्रत्वे[7] मनसा वरीत्[8] ।।६।।
स ज्ञात्वा तस्य संकल्पं ब्रह्मणः परमेश्वरः ।
मूढोयमिति सञ्चिन्त्य प्रोवाच वरदः स्वयम् ।।७।।
आगतं पितरं मा त्वं यस्मात् पुत्रं[9] समीहसे ।
मन्मूर्त्तिस्तनयस्तस्माद् भविष्यति ममाज्ञया ।।८।।
स च ते पुत्रतां यात्वा[10] मदीयो गणनायकः ।
रुद्रो विग्रहवान् भूत्वा[11] मूढ[12] त्वां विनयिष्यति ।।९।।
सर्वविद्याधिपत्यं[13] च योगानां चैव सर्वशः ।
बलस्याधिपतित्वं[14] च अस्त्राणां च प्रयोक्तृता[15] ।।१०।।

---

१ ऋषि - ख. । २ प्र... - ख. । ३ स्तत - घ । ४ च त... - घ । ५... र्य - क. । ६ व्याप्यैव - घ. ।
७...त्वं - क. ख घ । ८ वद्रीत् - क., ब्रवीत् - ख. घ. । ९ पुत्रत्व... - घ. । १० ग ...घ. ११ दृष्ट्वा - घ. ।
१२ ... ढं - म. । १३ त्वं - क. । १४ वचनस्याधिपत्यत्वं - घ. । १५ ...गता - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मया दत्तानि तस्याशु उपस्थास्यन्ति सर्वशः ।
धनुः पिनाकः[१६] शूलं च खड्गः[१७] परशुरेव च ।।११।।
कमण्डलुस्तथा दण्ड अस्त्रं[१८] पाशुपतं तथा ।
संवर्त्ताकाशनिश्चैव चक्रं च प्रतिसर्गिकम्[१९] ।।१२।।
एवं सर्वर्द्धिसंपन्नः सुतस्ते स[२०] भविष्यति ।
एवमुक्त्वा गते तस्मिन्नन्तर्धानं महात्मनि ।।१३।।
ब्रह्मा चक्रे तदा चेष्टिं पुत्रकामः प्रजापतिः ।
स जुह्वञ्छ्रमसंयुक्तः प्रतिघातसमन्वितः ।।१४।।
समिद्युक्तेन हस्तेन ललाटं प्रममार्ज ह ।
समित्संयोगजस्तस्य स्वेदबिन्दुर्ललाटजः ।।१५।।
पपात ज्वलने तस्मिन् द्विगुणं[२१] तस्य तेजसा ।
तद्धि माहेश्वरं तेजः सन्धितं[२२] ब्रह्मणि[२३] स्रुतम्[२४] ।।१६।।
प्रेरितं देवदेवेन निपपात हविर्भुजि ।
क्षणे तस्मिन्महेशेन स्मृत्वा तं वरमुत्तमम् ।१७।।
प्रेषितो गणपो[२५] रुद्रः सद्य[२६] एवाभवत्[२७] तदा ।
तच्च संस्वेदजं तेजः पूर्वं ज्वलनयोजितम् ।।१८।।
भूत्वा लोहितमाश्वेव[२८] पुनर्नीलमभूत्तदा ।
नीललोहित इत्येव तेनासावभवत्[२९] प्रभुः ।।१९।।
त्र्यक्षो दशभुजः श्रीमान् ब्रह्माणं छादयन्निव ।
शर्वाद्यैर्नामभिर्ब्रह्मा तनूभिश्च जलादिभिः ।।२०।।
स्तुत्वा[३०] तं सर्वगं देवं नीललोहितमव्ययम् ।
ज्ञात्वा सर्वसृजं[३१] पश्चान्महाभूतप्रतिष्ठतम् ।।२१।।
असृजद्द्विविधास्त्वन्याः प्रजाः स जगति प्रभुः ।
सोपि योगं समास्थाय ऐश्वर्येण समन्वितः ।।२२।।

---

१६ ...कं - क. घ । १७ ... ङ्गं - क. घ. । १८ मन्त्र - घ. । १९ प्रतिमादिकं - घ. । २० सं ...- घ. । २१ ...णे - घ. । २२ सन्निभं - घ. । २३...णः - घ । २४ शुचिः - घ. । २५ गगनाद् - घ. । २६ सत्य - घ. । २७ शतस्तदा - घ. । २८ वर्णश्च - घ. । २९..., तन्नामाचा- ...घ । ३० स्तुन्वन्ति, घ । स्तौति स्मेति स्यात् । ३१..., जत्वं च - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

लोकान्सर्वान्समाविश्य धारयामास सर्वदा ।
ब्रह्मणोपि ततः पुत्रा दक्षधर्मादयः शुभाः[३२] ॥२३॥
असृज्यन्त प्रजास्सर्वा देवमानुषसंकुलाः ।
अथ कालेन महता कल्पेतीते पुनः पुनः । ॥२४॥
प्रजाधारयतो योगादस्मिन्कल्प उपस्थिते
प्रतिष्ठितायां वार्तायां प्रवृत्ते सृष्टिसर्जने[३३] । ॥२५॥
प्रजासु च विवृद्धासु प्रयागे यजतश्च ह ।
ब्रह्मणः षट्कुलीयास्ते ऋषयः शंसितव्रताः[३४] । ॥२६॥
मरीचयोत्रयश्चैव वसिष्ठाः ऋतवस्तथा ।
भृगवोङ्गिरसश्चैव तपसा दग्धकिल्विषाः ॥२७॥
ऊचुर्ब्रह्माणमभ्येत्य सहिताः कर्मणोन्तरे ।
भगवन्नन्धकारेण महता स्मः समावृताः ॥२८॥
खिन्ना विवदमानाश्च न[३५] च पश्याम यत्परम् ॥
एतन्नःसंशयं देव चिरं हृदि समास्थितम् ॥२९॥
त्वं हि वेत्थ यथातत्त्वं कारणं परमं हि नः[३६] ।
किं परं सर्वभूतानां बलीयाँ[३७] श्चापि सर्वतः[३८] ॥३०॥
केन चाधिष्ठितं विश्वं को नित्यः कश्च शाश्वतः ।
कः स्रष्टा सर्वभूतानां प्रकृतेश्च प्रवर्तकः ॥३१॥
कोस्मान् सर्वेषु कार्येषु[३९] प्रयुनक्ति महामनाः[४०] ।
कस्य भूतानि वश्यानि कः सर्वविनियोजकः ॥३२॥
कथं पश्येम तञ्चैव एतन्नः शंस सर्वशः ।
एवमुक्तस्ततो ब्रह्मा सर्वेषामेव सन्निधौ ॥३३॥
देवानां च ऋषीणां च गन्धर्वोरगरक्षसाम्[४१] ।
यक्षाणामसुराणां च ये च भूत[४२] प्रवर्त्तकाः ॥३४॥

---

३२ ... यस्तथा - घ. । ३३ वृ... - क. । ३४ संशित ... - क. । ३५ तु - घ. । ३६ वः - घ. । ३७ ... यः - घ. । ३८ शः - घ. । ३९ भूतेषु - घ. । ४० ... त्मना - क,... त्मनः - घ. । ४१ ...रा -... क. । राक्षसैः - घ. । ४२ कुत्र - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

- - -क्षाणां सपिशाचानां ये चान्ये तत्समीपगाः ।
उत्थाय प्राञ्जलिः प्राह रुद्रेति[४३] त्रिःप्लुतं वचः ।।३५।।
स चापि तपसा शक्यो द्रष्टुं नान्येन केनचित्
सः[४४] स्रष्टा सर्वभूतानां बलवाँश्चापि[४५] स स्मृतः ।।३६।।
तस्य वश्यानि भूतानि तेनेदं धार्यते जगत् ।
- - - र्वं[४६] - - - - - ते नमश्चक्रुर्महात्मने ।।३७।।

ऋषय[४७] ऊचुः

किं तन्महत्तपो देव येन दृश्येत स प्रभुः ।
तन्नो वदस्व देवेश वरदं चाभिधत्स्व नः ।।३८।।

पितामह उवाच

सत्रं महत्समासध्वं वाङ्मनोदोषवर्जिताः ।
देशं[४८] च वः प्रवक्ष्यामि यस्मिन्देशे चरिष्यथ ।। ३९ ।।

सनत्कुमार उवाच

ततो मनोमयं चक्रं स सृष्ट्वा[४९] तानुवाच ह ।
क्षिप्तमेतन्मया चक्रमनुव्रजत मा चिरम् ।।४०।।
यत्रास्य नेमिः शीर्येत स देशस्तपसः शुभः ।
ततो मुमोच तच्चक्रं ते च तत्समनुव्रजन् ।।४१।।
तस्य वै व्रजतः क्षिप्रं यत्र नेमिरशीर्यत ।
नैमिशन्तत् स्मृतं नाम्ना पुण्यं सर्वत्र पूजितम् ।।४२।।
तत्पूजितन्देवमनुष्यसिद्धै रक्षोभिरुग्रै रुरगैश्च दिव्यैः ।
यक्षैः सगन्धर्वपिशाचसंघैः सर्वाप्सरोभिश्च दितेः सुतैश्च ।।४३।।
विप्रैश्च दान्तैः शमयोगयुक्तैस्तीर्थैश्च सर्वैरपि चावनीध्रैः[५०] ।
गन्धर्वविद्याधरचारणैश्च साध्यैश्च विश्वैः पितृभिः स्तुतञ्च ।।४४।।
⊙इति स्कन्दपुराणे षट्कुलीयोत्पत्ति[५१]र्नाम चतुर्थोऽध्यायः⊙

---

४३ विद्रुतं - घ. । ४४ यः - घ. । ४५ स्तेन - क. । तन्मयं जगत् - घ. । ४६ अतस्त्वे सर्वलोकेशो - घ. । ४७ षट्कुलीया - घ. । ४८ वरं - घ. । ४९ ह (कृ ?) त्वा - घ. । ५० वारणस्थैः घ. । ५१ नैमिशोत्पत्तिरिति पाठः साधीयान् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच [१]

तन्नैमिशं समासाद्य ऋषयो दीप्ततेजसः ।
दिव्यं सत्रं समासन्त महद्वर्षसहस्रिकम् ॥१॥
एकाग्रमनसः सर्वे निर्ममा[२] निरहंकृताः[३] ।
ध्यायन्तो नित्यमीशेशं सदारतनयाग्नयः ॥२।
तन्निष्ठास्तत्पराः सर्वे तद्युक्तास्तदुपाश्रयाः[४] ।
सर्वक्रियाः[५] प्रकुर्वाणास्तमेव मनसा गताः ॥३॥
तेषां तं[६] भावमालक्ष्य मातरिश्वा महातपाः ।
सर्वप्राणि[७] चरः श्रीमान्[८] सर्वभूतप्रवर्तकः[९] ॥४॥
ददौ स रूपी भगवान् दर्शनं सत्रिणां शुभः[१०] ।
तन्ते दृष्ट्वार्चयित्वा च मातरिश्वानमव्ययम् ॥५॥
आसीनमासने पुण्ये ऋषयः संश्रितव्रताः[११] ।
पप्रच्छु[१२] रुद्भवं कृत्स्नं[१३] जगतः प्रलयन्तथा ॥६॥
स्थितिश्च कृत्स्नां[१४] वंशांश्च युगमन्वन्तराणि च ।
वंशानुचरितं कृत्स्नं दिव्यमानं तथैव च ॥७॥
अष्टानां देवयोनीनामुत्पत्ति प्रलयन्तथा ।
पितृसर्गं तथा शेषं ब्रह्मणो मानमेव च ॥८॥
चन्द्रादित्यगतिं सर्वां ताराग्रहगतिं तथा ।
स्थितिं सर्वेश्वराणां च द्वीपधर्ममशेषतः ॥९॥
वर्णाश्रमव्यवस्थानं[१५] यज्ञानां च प्रवर्तनम् ।
एतत्सर्वमशेषेण कथयामास स प्रभुः[१६] ॥१०॥

---

१ सन उ - क. । २ निर्मला - घ. । ३ ह्यनहंकृताः - क. । ४ स्तदपा ... - क., स्तत्परायणाः - घ. । ५...यां - घ. । ६ स - घ. । ७...धरो - घ. । ८ देव; घ । ९ लोक...- घ. । १० ततः - घ. । ११ संश्रित...- घ. । १२ संभवं -घ. । १३ पुण्यं - घ. । १४ कृत्स्नं - क. । १५ नां - क. । १६ सर्वशः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दिव्यवर्षसहस्रं च[१७] तेषां तदभियात्तथा ।
अथ दिव्येन रूपेण सामवाग् दिङ्निरीक्षणा ।।११।।
यजुर्घ्राणाथर्वशिरा शब्दजिह्वा शुभा सती ।
न्यायश्रोत्रा निरुक्तत्वगृक्पादपद[१८] गामिनी ।।१२।।
कालबाहूर्वर्षकरा दिवसाङ्गुलिधारिणी ।
कलादिभिः पर्वभिश्च मासैः कररुहैस्तथा ।।१३।।
कल्पेन चोरसा[१९] दिव्या शिक्षाविद्योन्नतस्तनी[२०] ।
छन्दोविजितमध्या च मीमांसानाभिरेव च ।।१४।।
पुराणविस्तीर्णकटिर्धर्मशास्त्रमनोरथा[२१] ।
आश्रमोरुर्वर्णजानुर्यज्ञगुल्फा फलाङ्गुलिः[२२] ।।१५।।
लोकवेदशरीरा च रोमभिश्छान्दसैः[२३] शुभैः ।
श्रद्धा[२४] शुभाचारवस्त्रा[२५] योगधर्माभिभाषिणी ।।१६।।
वेदीमध्याद्विनिःसृत्य प्रवृत्ता परमाम्भसा ।
तस्यान्ते[२६] वभृथे प्लुत्य वायुना सह संगताः ।।१७।।
तामपृच्छन्त कान्वेषा वायुं देवं महाधियम्[२७] ।
उवाच स महातेजा ऋषीन्धर्मानुभावितान्[२८] ।।१८।।
शुद्धाः स्थ तपसा सर्वे महान्धर्मश्च वः कृतः ।
यस्मादियं नदी पुण्या ब्रह्मलोकादिहागता ।।१९।।
इयं[२९] सरस्वती नाम ब्रह्मलोकविभूषणा ।
प्रथमं मर्त्यलोकेस्मिन् युष्मत्सिद्ध्यर्थमागता ।
नास्याः पुण्यतमा लोके त्रिषु लोकेषु विद्यते ।।२०।।

ऋषय ऊचुः

कथमेषा महापुण्या प्रवृत्ता ब्रह्मलोकगा[३०] ।
कारणं किञ्च तत्रासीदेतदिच्छाम वेदितुम् ।।२१।।

---

१७ तु - घ. । १८ ऋग्वेदपाद -धा . । १९ कल्पसाधारणा - क. । २० विद्योदित ... -(?) ।... ना - क. । २१...रमा - घ. । २२...लः - क । २३...शी - घ. । २४ शुद्धा - घ. । २५...वर्ण्णा - घ. । २६ न्तु (न्त्व ?) - घ. । २७ मनोगमम् - घ । २८ तानृषीन्धर्म ... घ. । २९ एषा - घ. । ३० लोकगा शुभा - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वायुरुवाच

अत्र वो वर्त्तयिष्यामि इतिहासं पुरातनम् ।
ब्रह्मणश्चैव संवादं पुरा यज्ञस्य चैव हि[३१] ॥२२॥
यज्ञैरिष्ट्वा पुरा देवो ब्रह्मा दीप्तेन तेजसा ।
असृजत्सर्वभूतानि स्थावराणि चराणि च ॥२३॥
स दृष्ट्वा दीप्तिमान्देवो दीप्त्या परमया युतः ।
अवेक्षमाणस्ताँल्लोकाँश्चतुर्भिर्मुखपङ्कजैः ॥२४॥
देवादीन् मानुषादीं[३२]श्च दृष्ट्वा दृष्ट्वा महामनाः ।
अमन्यत न मेन्योस्ति समो लोके न चाधिकः ॥२५॥
योहमेताः प्रजाः सर्वाः सप्तलोकप्रतिष्ठिताः ।
देवमानुषतिर्यक्षु ग्रसामि विसृजामि च ॥२६॥
अहं स्रष्टा हि भूतानां नान्यः कश्चन विद्यते ।
नियन्ता लोककर्ता च न ममास्ति समः[३३] क्वचित् ॥२७॥
तस्यैवं मन्यमानस्य यज्ञ आगान्महामनाः ।
उवाच चैनं दीप्तात्मा मैवं[३४] मंस्था महामते ॥२८॥
अयं हि तव संमोहो विनाशाय भविष्यति ।
न युक्तमीदृशन्तेद्य सत्वस्थस्यात्मयोनिनः[३५] ॥२९॥
स्रष्टा त्वञ्चैव नान्योस्ति तथापि न यशस्करम् ।
अहं धर्त्ता[३६] हि भूतानां भुवनस्य तथैव च ॥३०॥
करोमि न च संमोहं यथा त्वं देव कत्थसे[३७] ।
तमुवाच तदा ब्रह्मा न त्वं धारयिता विभो ॥३१॥
अहमेव हि भूतानां धर्त्ता[३८] हर्ता[३९] तथैव च ।
मया सृष्टानि भूतानि त्वमेवात्र विमुह्यसे ॥३२॥

---

३१ ह - क. । ३२ मनुष्या . - क. । ३३ समोस्ति न समः - घ. । ३४ मैव - क. ग. घ. ।
३५ जा (या) जिनः - घ. । ३६ कर्ता - क. ग. घ. । ३७ कथ्यसे - घ. । ३८ कर्ता - घ. । ३९ भर्ता - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथागत्तत्र संविग्नो वेदः[४०] परमदीप्तिमान् ।
उवाच चैव तौ वेदो[४१] नैत[४२] देवमिति प्रभुः ॥३३॥
अहं श्रेष्ठो यत्कृतोस्मि[४३] न वदाम्यनृतं क्वचित्[४४] ।
शृणुध्वं मम यः कर्त्ता भूतानां युवयोश्च ह ॥३४॥
परमेशो महादेवो रुद्रः सर्वगतः प्रभुः ।
येनाहं तव दत्तश्च कृतस्त्वञ्च प्रजापतिः ॥३५॥
यज्ञोयं यत्प्रसूतिश्च[४५] अहं[४६] यत्रास्मि[४७] संस्थितः[४८] ।
सर्वं तस्मात्प्रसूतं वै नान्यः[४९] कर्त्तास्ति नः[५०] क्वचित् ॥३६॥
तमेवंवादिनं देवो ब्रह्मा वेद[५१]मभाषत ।
अहं श्रुतीनां[५२] सर्वासां नेता[५३] स्रष्टा तथैव च ॥३७॥
मत्प्रसादाद्धि वेदस्त्वं यज्ञश्चायं न संशयः ।
मूढौ[५४] युवामधर्मो वा भवद्‌भ्यामन्यथा कृतः ॥३८॥
प्रायश्चित्तं चरध्वं वः किल्विषान्मोक्ष्यथस्ततः ।
एवमुक्ते तदा तेन महाञ्छब्दो बभूव ह ॥३९॥
आदित्यमण्डलाकारमदृश्यत च मण्डलम् ।
महच्छब्देन[५५] महता उपरिष्टाद्[५६] वियत्स्थितम् ॥४०॥
स चापि तस्माद्विभ्रष्टो भूतलं समुपाश्रितः[५७] ।
हिमवत्कुञ्जमासाद्य नानाविहगनादितम् ॥४१॥
व्योमगश्च चिरं भूत्वा भूमिगः संबभूव ह ।
ततो ब्रह्मा दिशः सर्वा निरीक्ष्य मुखपङ्कजैः ॥४२॥
चतुर्भिर्न वियत्स्थं तमपश्यत्स पितामहः ।
स मुखं पञ्चमं दीप्त[५८]मसृजन् मूर्ध्नि[५९] संस्थितम् ॥४३॥

---

४० देवः - घ. । ४१ वदतो देवा - घ. । ४२ नेत - घ. । ४३ मत्कृतोस्मि - ग., महाभाग - घ. । ४४ नवदाम्यहमन्यथा - घ ४५. मत्प्रसूतिश्च - क. । ४६. अण्डं - क. ग. घ. । ४७. ... स्ति - घ. । ४८...तं - ग. घ. । ४९ सद्यः - घ. । ५० न - घ. । ५१ चेद - घ. । ५२ मुनीनां सर्वेषां - घ । ५३ वेत्ता - घ. । ५४...ढो - ग. घ., । ५५ श .. - ध., श्च - क. । ५६ रूप ... - क. ग. । ५७ सम... - क. । ५८ दिव्य - घ. । ५९ मूर्ति-क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तैनापश्यद्धियत्स्थं तं सूर्यायुतसमप्रभम् ।
आदित्यमण्डलाकारं शब्दवद् घोरदर्शनम् ॥४४॥
तन्दृष्ट्वा पञ्चमं तस्य शिरो वै क्रोधजं महत् ।
संवर्तकाग्निसदृशं ग्रसिष्यत्तमवर्धत ॥४५॥
वर्द्धमानं तदा तत्तु वडवामुखसन्निभम् ।
दीप्तिमच्छब्दवच्चैव देवोसौ दीप्तमण्डलः ॥४६॥
हस्ताङ्गुष्ठनखेनाशु वामेनावज्ञयैव हि ।
चकर्त्त तन्महद्घोरं ब्रह्मणः पञ्चमं शिरः ॥४७॥
दीप्तिकृत्तशिराः सोथ दुःखेनोस्त्रेण[६०] चार्दितः ।
पपात मूढचेता[६१] वै योगधर्मविवर्जितः ॥४८॥
स विदंष्ट्रो महाहस्ती विश्शृङ्गो हरगोपतिः ।
विरश्मिरिव चादित्यः पतितो भूतले बभौ ॥४९॥
ततः सुप्तोत्थित इव संज्ञां लब्ध्वा महातपाः ।
मण्डलस्थं महादेवमस्तौषीद्दीनया गिरा ॥५०॥

ब्रह्मोवाच

नमः सहस्रनेत्राय शतनेत्राय वै नमः[६२] ।
नमो विवृतवक्त्राय[६३] शतवक्त्राय वै नमः ॥५१॥
नमः सहस्रवक्त्राय सर्ववक्त्राय वै नमः ।
नमः सहस्रपादाय सर्वपादाय वै नमः ॥५२॥
सहस्रपाणये चैव सर्वतःपाणये नमः ।
नमः सर्वस्य स्रष्ट्रे[६४] च द्रष्ट्रे[६५] सर्वस्य ते नमः ॥५३॥
नम आदित्यवर्णाय[६६] शिरसश्छेदनाय च ।
सृष्टिप्रलयकर्त्रे च स्थितिकर्त्रे तथा नमः[६७] ॥५४॥

---

६० ग्रेण - घ । ६१ ...धर्मो - घ. । ६२ चैत्रहि - घ । ६३ विवृत्त... - क. ग. । ६४ द्रष्ट्रे - क. ।
६५ द्रष्ट्राय - ग. । ६६ आदित्यवर्णाय नमः - क. ग. घ. । ६७...नघ - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नमः सहस्रलिङ्गाय सहस्रचरणाय च ।
संहारलिङ्गिने[६८] चैव जललिङ्गाय वै नमः ॥५५॥
अन्तश्चराय सर्वाय प्रकृतेः पूरणाय च ।
व्यापिने सर्वसत्त्वानां पुरुषप्रेरकाय च ॥५६॥
इन्द्रियार्थविशिष्टाय[६९] तथा नियमकारिणे ।
भूतभव्याय सर्वाय नित्यमध्यवदाय च (?) ॥५७॥
त्वमेव स्रष्टा लोकानां मंत्रदाता तथा विभो ।
शरणागताय दान्ताय[७०] प्रसादं कर्तुमर्हसि ॥५८॥
तस्यैवं स्तुवतः सम्यग्भावेन परमेण ह ।
स तस्मै देवदेवेशो दिव्यं चक्षुर्ददौ तदा ॥५९॥
चक्षुषा तेन स तदा ब्रह्मा लोकपितामहः ।
विमाने सूर्यसंकाशे तेजोराशिमपश्यत ॥६०॥
तस्य मध्यात्[७१] ततो वाचं महतीं सम[७२]शृण्वत[७३] ।
गंभीरां मधुरां[७४] युक्ता[७५]मर्थ [७६]संपन्नलक्षणाम् ॥६१॥
विशदां[७७] पुत्रपुत्रेति पूर्वं देवेन चोदिताम् ।
अंबरात्पुत्र उत्पन्नो[७८] यस्तुभ्यं नीललोहितः ॥६२॥
यच्च पूर्वं मया प्रोक्त[७९] स्त्वं [८०] तदा सुतमार्गणे ।
मदीयो गणपो यस्ते मन्मूर्तिश्च भविष्यति ॥६३॥
स प्राप्य[८१] परमं ज्ञानं मूढ त्वा[८२] विनयिष्यति[८३] ।
तस्येयं[८४] फलनिष्पत्तिः शिरसश्छेदनं तव[८५] ॥६४॥
मयैव कारिता तेन निर्वृतश्चाधुना भव ।
ऊर्ध्वगं ज्ञानरूपं तु शिरोदिव्यं समुत्थितम् ॥६५॥

---

६८ सङ्घार ...क, सहस्र .. - घ. । ६९...विशेषाय - घ. । ७०... गजाय दन्ताय - घ. । ७१ मध्यं - घ. । ७२ स तु - घ । ७३ तः - घ. । ७४ महता - घ. । ७५ सं. - ग । ७६ थो - ग. । ७७ दिशती - घ. । ७८ मुत्पन्नो - घ. । ७९ प्रोक्तं - घ. । ८० ते - ग. । ८१ सं... - घ. । ८२ त्वां - घ. । ८३ विनसि - ग., विशसि ? । ८४ पश्येहं - घ. । ८५ तथा - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अस्य[८६] चैवोत्पथस्थस्य[८७] यज्ञस्य तु[८८] महामते ।
शिरश्छेत्स्यत्यसावेव कस्मिंश्चित् कारणान्तरे[८९] ।
स्तवेनानेन तुष्टोस्मि किं ददानि[९०] च तेनघ ॥६६॥

वायुरुवाच[९१]

ततः स भगवान् हृष्टः[९२] प्रणम्य शुभया गिरा ।
उवाच प्राञ्जलिर्भूत्वा लक्ष्यालक्ष्यं तमीश्वरम् ॥६७॥
भगवन्नैव मे दुःखं दर्शनात्तो प्रबाधते ।
इच्छामि शिरसो ह्यस्य धारणं सर्वदा त्वया ॥६८॥
नाहं[९३] स्मरेयमेतच्च शिरसश्छेदनं विभो ।
भूयश्चाधर्मकार्येभ्यस्त्वय्यैवेच्छे निवारणम् ॥६९॥
तथा च कृत्यमुद्दिश्य पश्येयं त्वा[९४] यथासुखम् ।
विज्ञप्तिं ब्रह्मणः श्रुत्वा प्रोवाच भुवनेश्वरः ॥७०॥
स एव सुतसंज्ञस्ते[९५] मन्मूर्त्तिर्नीललोहितः ।
शिरश्छेत्स्यति यज्ञस्य विभर्त्स्यति शिरश्चते ॥७१॥
इत्युक्त्वा देवदेवेशस्तत्रैवान्तरधीयत ।
गते तस्मिन्महादेवे[९६] ब्रह्मा लोकपितामहः ।
सयज्ञः सहवेदश्च[९७] स्वं लोकं[९८] प्रत्यपद्यत ॥७२॥

वायुरुवाच

य इमं[९९] शृणुयान्मर्त्यो गुह्यं वेदार्थसंमितम् ।
स देहभेदमासाद्य सायुज्यं ब्रह्मणो व्रजेत् ॥७३॥
यश्चेमं पठते नित्यं ब्राह्मणानां समीपतः ।
स सर्वपापनिर्मुक्तो[१००] रुद्रलोके महीयते ॥७४॥

---

८६ तस्य - ग. । ८७ ..न्म... - ग. । ८८ यज्ञास्यत्व न - घ. । ८९ द्रात्रणान्तरे - घ. । ९०...मि - घ. ।
९१ वायुरु - ग. । ९२ भूयुः (नुष्टः) घ । ९३ नोघं - घ. । ९४ त्वां - घ. । ९५ मज्ञस्ते - घ । ९६ देवः स्वं लोकं प्रत्यपद्यत-ग । ९७ देवश्च - घ. । ९८ स्वल्लों - घ । ९९ एवं - घ, १०० सर्वपापवि... - घ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नापुत्रशिष्ययोगिभ्य इदमाख्यानमैश्वरम् ।
आख्येयं[१०१] चापि नाज्ञाय[१०२] न शठाय न मानिने ।।७५।।
इदं महद्दिव्यमधर्मशासनं[१०३] पठेत्[१०४] सदा ब्राह्मणवैद्यसंसदि ।
कृतावकाशो[१०५] भवतीह मानवः[१०६] शरीरभेदे[१०७] प्रविशेत् पितामहम् ।।७६।।

⊙ इति स्कन्दपुराणे पञ्चमोध्यायः ⊙

सनत्कुमार उवाच

ततः स भगवान्देवः कपर्दी नीललोहितः ।
आज्ञया परमेशस्य जग्राह ब्रह्मणः शिरः ।।१।।
तद् गृहीत्वा शिरो दीप्तं रूपं विकृतमास्थितः ।
योगक्रीडां समास्थाय भैक्षाय प्रचचार ह ।।२।।
स देववेश्मनि तथा भिक्षार्थमगमद् द्विजाः ।
न चास्य कश्चित्तां भिक्षामनुरूपामदाद्विभोः ।।३।।
अथ संचक्रमे[१] देवो वेश्म विष्णोर्महात्मनः ।
तस्या[२] तिष्ठत स द्वारि भिक्षामुच्चारयन् शुभाम् ।।४।।
स दृष्ट्वा ततहस्तं[३] तं विष्णुर्वै योगचक्षुषा ।
शिवलीलां[४] समाज्ञाय[५] रक्तधारामपातयत् ।।५।।
पपात सा च विस्तीर्णा योजनार्द्धशतं तदा ।
तया पतन्त्या विप्रेन्द्रा बहून्यब्दानि धारया ।।६।।
पितामहकपालस्य नार्धमप्यभिपूरिम् ।
तमुवाच ततो देवः प्रहस्य वचनं शुभम् ।।७।।
सकृत्कन्याः प्रदीयन्ते सकृदग्निश्च जायते ।
सकृद्राजानो ब्रुवते[६] सकृद् भिक्षा प्रदीयते ।।८।।

---

१०१ .देयं - ग । १०२ नास्तिका ... - ग । १०३ ना - घ. । १०४ पठन् - घ. । १०५ क्रीडावकाशो -घ
१०६ भवदीय - घ । १०७... पि - घ ।
१ संक्रमणा - मू. । २ तस्य - मू. । ३ तहतस्तंता - मू. । ४ लीलात् - मू. । ५ '''मादाय(?) । ६ च इत्यधिकं मूले ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तुष्टोस्मि तव दानेन युक्तेनानेन मानद ।
वरं वृणीष्व देवेश वरदोस्मि तवाद्य वै ॥९॥

विष्णुरुवाच

एष एव वरः श्लाघ्यो यदहं देवताधिपम् ।
पश्यामि शंकरं दीप्तं - - - - कपर्द्दिनम्[७] ॥१०॥
देवश्छायां ततो वीक्ष्य कपालस्थे तदा[८] रसे[९] ।
ससर्ज पुरुषं दिव्यं विष्णोः सदृशमूर्जितम् ॥११॥
तमाह[१०] चाक्षयश्चासि अजरोमर[११] एव च ।
युद्धेषु चाप्रतिद्वन्द्वी सखा विष्णोरनन्तरः ॥१२॥
देवकार्यकरः श्रीमान् महासेनपरं वच (?) ।
नारासु जन्म[१२] यस्मात्तो वियुद्धेहो भवान्वच(?) ।
नरस्तस्माद्धि नाम्ना त्वं प्रियश्चास्य भविष्यसि ॥१३॥

वायुरुवाच

तं तदा[१३]श्चास्य विक्षिप्य नरं विष्णोरनन्तरम् ।
अगमद् ब्रह्मसदनं तौ चाप्याविशतुर्गृहम् ॥१४॥
य इदं नरजन्मेह शृणुयाद्वा पठेत वा ।
स कीर्त्या[१५] परया युक्तो विष्णुलोके महीयते ॥१५॥
⊙ इति स्कन्दपुराणे नरजन्मनामा षष्ठोध्यायः : ॥ ⊙

---

७ ने - भू. । ८ ...तसा - मू. । ९ वसे - मू. । १० हा एवक्षय - मू. । हैवाक्षय (?) । ११... रामर - मू. ।
१२ स्वयं - मू. । १३ तथा (?) । १४ रः - मू. । १५ कृत्यो - मू. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वायुरुवाच

ब्रह्मलोकं समासाद्य भगवान् सर्वलोकपः ।
भक्ष भैक्षमिति प्रोच्य[१] द्वारे समवतिष्ठत ॥१॥
तं दृष्ट्वा विकृतं ब्रह्मा कपालकरभूषणम् ।
ज्ञात्वा योगेन महता तुष्टाव भुवनेश्वरम् ॥२॥
तस्य तुष्टस्तदा देवो वरदोस्मीत्यभाषत ।
वृणीष्व वरमव्यग्रो यत्तो मनसि वर्तते ॥३॥

ब्रह्मोवाच

इच्छामि देवदेवेश त्वया चिह्नमिदं कृतम् ।
येन चिह्नेन लोकोयं चिह्नितः स्याज्जगत्पते ॥४॥
तस्य तद्वचनं श्रुत्वा भगवान् वदतां वरः ।
सर्वं प्रतिमयं (?) ब्रह्मन्नोमिति व्याजहार सः ॥५॥
तस्यैवं ध्यानमात्रेण[२] वागियं दिव्यरूपिणी ।
निःसृता[३] वदनाद्देवी प्रह्वा समवतिष्ठत ॥६॥
तामुवाच ततो देवी वाचा संजीवयन्निव ।
यस्मात् त्वम[४]क्षरो भूत्वा मम वाचो विनिःसृता ॥७॥
सर्वविद्याधिदेवी त्वं तस्माद्देवि[५] भविष्यसि ।
यस्माद् ब्रह्मरसं वेदं मुखं[६] मम समाश्रिता ॥८॥
तस्मात् सरस्वतीत्येवं[७] लोके ख्यातिं गमिष्यसि ।
इमं लोकं रसाम्भोभिर्भावयित्वा च सुप्रभे ॥९॥
सर्वलोकान् तारयिता पुनस्त्वं[८] नात्र संशयः ।
यज्ञभागं च ते देवा दास्यंति सपितामहाः ॥१०॥
इत्येव ब्रह्मणश्चेदं कपालममितौजसः ।
इमं लोकमनुप्राप्य[९] देशे प्रेष्ठेवतिष्ठत[१०] ॥११॥

---

१ ...क्ष-- मू ।सर्वोप्ययं घपुस्तकमूलपाठो मन्तव्यः । २ ध्यात... । ३...त्य-(?) । ४ त्वं य । ५ ...वी । ६ सुखं । ७ देवी । ८ स्थं । ९...प्यं । १० ...तें ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तत्र तच्च महद्दिव्यं कपालं देवताधिपः ।
स्थापयामास दीप्तार्चिः कुशानामग्रतः प्रभुः ॥१२॥
स्थापितं तदथो[११] दृष्ट्वा गणाः सर्वे महात्मनः ।
व्यनदन् सुमहानादं नादयन्तो दिशो दश ॥१३॥
[१२]- - - - -ि तप्रख्ये[१३]- - - - -विदीर्यते ।
तेन शब्देन घोरेण असुरो देवकण्टकः ॥१४॥
हालाहल इति ख्यातस्तं देशं सोभ्यगच्छत ।
अमृष्यमाणः क्रोधान्धो दुरात्मा यज्ञशासकः[१४] ॥१५॥
ब्रह्मदत्तवरश्चैव अवध्यः सर्वजन्तुभिः ।
महिषश्छन्नरूपाणा[१५]मसुराणां शतैर्वृतः ॥१६॥
तमापतन्तं सक्रोधं महिषं देवकण्टकम् ।
संप्रेक्ष्याह गणाध्यक्षो गणान्सर्वान् पिनाकिनः ॥१७॥
यो ह्ययं गणपा दुष्टस्त्रैलोक्ये[१६] सुरकण्टकः ।
आयाति रुषितो[१७] युष्मान्[१८] तस्मादेनं निहिंसत[१९] ॥१८॥
ततस्ते गणपाः सर्वे समायांतं सुरद्विषम् ।
भित्त्वा शूलेन संक्रुद्धा विगतासुं प्रचक्रिरे ॥१९॥
हते तस्मिन् तदा देवो दिशः सर्वानवैक्षत ।
ताभ्यः पिशाचवृत्तास्याः पिशाच्यश्च[२०] महाबलाः ॥२०॥
अभ्यगच्छंत तं देवं[२१] ताभ्यस्तं विनिवेदयन् ।
स ताभिरुपयुक्तश्च - - - - - सर्वशः ॥२१॥
तमेवाप्यथवावासं देवादिष्टं प्रपेदिरे ।
भक्षयन्ति स्म तं नित्यं सिद्धासिद्धा यतस्ततः ॥२२॥
कपालमातरः प्रोक्तास्तस्माद्देवेन धीमता ।
कपालं स्थापितं यस्मात्तस्मिन्देशे पिनाकिना[२२] ॥२३॥

---

११ तम... । १२ क्षुर्चरंते सरित्प्रख्यो । १३ निर्भियेन । १४ ...शाशक । १५ ...छ । १६ श्वर । १७ दूषिता । १८ यूयं । १९ हिंष्यथ । सर्वोयं मूलपुस्तकपाठो बोध्यः । २० ...चाश्च । २१ देशं (?) । २२ ...नः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

महाकपालं[२३] तत्तस्मात् त्रिषु लोकेषु गद्यते[२४] ।
स्थापितस्य कपालस्य यथा तदभवत्तदा[२५] ॥२४॥
ख्यातं शिवतडागं तत्सर्वपापप्रमोचनम् ।
आगत्याथ ततो ब्रह्मा देवतानां गणैर्वृतः ॥२५॥
कर्पादिनमुपामंत्र्य तं देशं सोन्व[२६]गृह्णत ।
अर्द्धयोजनविस्तीर्णं क्षेत्रमन्यत् समंततः ।
भविष्यति न संदेहः सिद्धक्षेत्रं महात्मनः ॥२६॥
श्मेति[२७] हि प्रोच्यते पापं क्षयं शानं[२८] विदुर्बुधाः ।
ध्यानेन नियमै[२९]श्चैव श्मशानं तेन संज्ञितम्[३०] ॥२७॥
गुह्यं देवाधिदेवस्य[३१] परं प्रिय[३२]मनुत्तमम् ।
एवं तत्र नरः पापं सर्वमेव प्रहास्यति ॥२८॥
त्रिरात्रोपोषितश्चैव अर्चयित्वा वृषध्वजम् ।
राजसूयाश्वमेधाभ्यां फलं कृत्स्नमवाप्स्यति[३३] ॥२९॥
यश्च प्राणान् प्रियाँस्तत्र परित्यक्ष्यति मानवः ।
स गुह्यगणदेवानां समतां समवाप्स्यति ॥३०॥

वायुरुवाच

ततः स तत्र संस्थाप्य देवस्यार्चाद्वयं[३४] शुभम् ।
सुरेश्वरश्चकाराशु[३५] रुद्रस्यायतनं शुभम् ॥३१॥
तत्राभिगमनादेव कृत्वा पापस्य संक्षयम् ।
रुद्रलोकमवाप्नोति स प्राहैवं[३६] पितामहः ॥३२॥
यत्र चापि शिरस्तस्य चिच्छेद भुवनेश्वरः ।
[३७] - - - सोभवन्नाम्ना देशः पुण्यतमः शुभः ॥३३॥

---

२३ ...फ-पं। २४ पद्म(ठ्य)ते । २५ तम ...। २६ सोत्र । २७ श्वेते । २८ सानं । २९ ... म । ३० संगि... । ३१ देवाति... । ३२ श्रित । ३३ ... ति । ३४ चर्च्या... । ३५ ...श्चकार... । ३६ प्राहेव । ३७ ऋस्मादसौ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ततो देवः[३८] सह गणै रूपं विकृतमास्थितः ।
पश्यतां सर्वदेवानामन्तर्द्धानमगात् प्रभुः ।।३४।।
एतच्च[३९] देवनाथेन कपालस्थानमव्ययम् ।
सर्वतीर्थाभिषेकस्य फलेन समयोजि यत्[४०] ।।३५।।
तदद्यापि महद्दिव्यं सरस्तत्र[४१] प्रदृश्यते[४२] ।
महाकपालं[४३] विप्रेन्द्राः[४४] स्वर्गस्तत्राक्षयः स्मृतः ।।३६।।
इदं शुभं दिव्यमधर्मशासनं महाह्रदं सेन्द्रसुरासुरार्चितम् ।
महा[४५]कपालप्रकृतोपवर्णनं[४६] सुरेशलोकादिविगाहने हितम्[४७] ।।३७।।
तपोधनैः सिद्धगणैश्च संस्तुतं दिविष्टतुल्यं[४८] द्विजराजमण्डलम् ।
पठेन्नरो यः शृणुयाच्च सर्वदा त्रिविष्टपं गच्छति सोभिनन्दितः[४९] ।।२८।।

⊙ इति स्कन्दपुराणे कपालसंस्थापनं[५०] नाम सप्तमोध्यायः ⊙

वायुरुवाच

एवं ह्येषा[१] भगवती ब्रह्मलोकानुसारिणी ।
युष्माकं धर्मसिद्ध्यर्थं वेदीमध्याद् व्यवर्त्तत ।।१।।

सनत्कुमार उवाच

एवं तेषां समाप्तेथ[२] सत्रे वर्षसहस्रिके ।
प्रवृत्तायां सरस्वत्यामगात्तत्र[३] पितामहः ।।२।।

ब्रह्मोवाच[४]

भूयोनेनेह[५] सत्रेण यजध्वं[६] देवमीश्वरम् ।
यदा वो भविता विघ्न[७]स्तदा निष्कल्मषं तपः ।।३।।

---

३८ देवैः । ३९ एते च । ४० ...जयत् । ४१ सुर... । ४२ प्रहस्य ... । ४३ ... ली । ४४ ... न्द्रः । ४५ सहा (द) - ग महत् - घ । ४६ दर्शनं । ४७ ...ङ्गितम् - ग । पाठोयं प्राय. सर्वोपि घपुस्तकमूले प्रतिधृतो बोध्यः । ४८ विदिष्ट - घ. । ...ल्य... - घ. । ४९ रुद्रवशोभिनंदति - घ. । ५०... नो - घ. ।

१ एवमेषा - घ. । २ तु - घ. । ३ म - घ., आ - ख. । ४ पितामह उवाच - घ. । ५ ह्येह - घ. । ६ भजध्वं - घ. । ७ विघ्नं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विघ्नं तच्चैव[८] संतीर्य[९] तपस्तप्त्वा च भास्वरम् ।
योगं प्राप्य महद्युक्ता[१०]स्ततो[११] द्रक्ष्यथ शङ्करम् ॥४॥
तथेत्युक्त्वा गते तस्मिन् सत्राण्याजह्रिरे[१२] तदा ।
बहूनि विविधा[१३] काराण्यभियुक्ता[१४] महाव्रताः ॥५॥
निस्सोमां पृथिवीं कृत्वा कृत्स्ना[१५]मेतां ततो द्विजाः ।
राजानं सोममानाय्य[१६] अभिषोतु[१७]मियेषिरे ॥६॥
अथ सोऽपि कृत[१८]स्तिर्यग[१९]दृश्येन दुरात्मना ।
स्वर्भानुना हृतः सोमस्ततस्ते दुःखिता भवन् ॥७॥
ते गत्वा मुनयः सर्वे कलापग्रामवासिनम् ।
पुरूरवसमानीय राजानन्तेभ्यषेचयन् ॥८॥
ऊचुश्चैनं[२०] महाभागा हृतः सोमो हि नः प्रभो ।
केनापि तद्भवान्[२१] क्षिप्रमिहानयतु मा चिरम्[२२] ॥९॥
स एवमुक्तो मृगयन् यदा नासादयत्[२३] प्रभुः ।
उवाच स तदा विप्रान् प्रणम्य भयपीडितः ॥१०॥
परमं यत्न[२४]मास्थाय मया सोमोऽभिमार्गितः ।
न च तं वेद्मि केनासौ क्व वा नीत इति प्रभुः ॥११॥
तमेवं[२५]वादिनं क्रुद्धा ऋषयः शंसितव्रताः ।
ऊचुः सर्वे सुसंरब्धा इलापुत्रं महामतिम् ॥१२॥
भवान् राजा कृत[२६]स्तात यतो[२७]स्माभिर्भयार्दितैः ।
न च नस्तद्भयं मुक्तं[२८] नापि शक्तोसि[२९] वेदितुम् ॥१३॥
विषयेष्वभि[३०]सक्तात्मा योगात्तं[३१] नानुपश्यसि[३२] ।
तस्माद्विरोधमास्थाय द्विजेभ्यो वधमाप्स्यसि[३३] ॥१४॥

---

८ तच्चैव - घ. । ९ संतर्प्यं - घ. । १० तत्त्वयु... - घ. । ११ ...त - ख । १२ जज्ञि... - घ. । १३ ...ज्ञानि- घ. ।
१४ अतिमु... - घ. । १५ कृत्वा कृत्स्ना - घ. । १६ मानम्भ्रे - घ. । १७ प्रतिषेद - घ., अभिषेक्तु (?) ।
१८ वि... - ख. । १९ कृतार्ति - ख., हताशल्यं - घ. । २० ...त्रं - घ. । २१ भगवान् - घ. । २२ योगवित् - ख. ।
२३ ...मासाद्यत् - ख. । २४ यज्ञ - घ. । २५ त एवं - घ. । २६ कु... - घ. । २७ क्र... - घ. । २८ मु... - घ. ।
२९ f... नो विभो - ख. । ३० ...ति - घ. । ३१ त्मानम ... - घ. । ३२ ...ति - घ. । ३३ ...ति - घ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वयमेव हि राजानमानेष्याम[३४] सुदुर्विदम् ।
तपसा स्वेन राजेन्द्र पश्य[३५] नो बलमुत्तमम्[३६] ॥१५॥
ततस्त ऋषयः सर्वे तपसा दग्धकिल्बिषाः ।
अस्तुवन्वाग्भिरिष्टाभिर्गायत्रीं वेदभाविनीम् ॥१६॥
स्तुवतां तु[३७] ततस्तेषां गायत्री वेदभाविनी ।
रूपिणी दर्शनं प्रादादुवाचेदं च तान्द्विजान् ॥१७॥
तुष्टास्मि वत्साः किं वोद्य करोमि वरदास्मि वः ।
ब्रूत[३८] तत्कृतमद्यैव[३९] भविष्यति न संशयः ॥१८॥

ऋषय ऊचुः

सोमो नोपहृतो देवि केनापि सुदुरात्मना ।
तमानय[४०] नमस्तेस्तु एष नो[४१] वर उत्तमः ॥१९॥

सनत्कुमार उवाच

सा तथोक्ता विनिश्चित्य दृष्ट्वा[४२] दिव्येन चक्षुषा ।
श्येनीभूता जगामाशु स्वर्भानुमसुरं प्रति ॥२०॥
व्यग्राणामसुराणां सा[४३] गृहीत्वा सोममागता ।
आगम्य तानृषीन्प्राह अयं सोमोभिषूयताम्[४४] ॥२१॥
ते तमासाद्य ऋषयः प्राप्य यज्ञफलं महत् ।
अमन्यन्त तपोस्माकं निष्कल्मषमिति द्विजाः ॥२२॥
ततस्तत्र स्वयं ब्रह्मा सह देवोरगादिभिः ।
आगत्य तानृषीन् प्राह[४५] तपः[४६] कुरुत[४७] मा चिरम् ॥२३॥
ते सह ब्रह्मणा गत्वा मैनाकं पर्वतोत्तमम् ।
सर्वैर्देवगणै[४८]स्सार्द्धं तपश्चेरुः समाहिताः ॥२४॥

---

३४ मानयिष्याम - ख, घ. । ३५ यथा - घ. । ३६ योग .. - घ. । ३७ सा व्रतान्ते (?) - ख. । ३८ ध्रुवं- घ. । ३९ ... मेवैव - घ. । ४० तस्मा । (?) - ख. । ४१ ते - घ. । ४२ ...ष्टचा - ख. । ४३ च - घ. । ४४ स्त्र (सो) यं राजा नियुज्य... - घ. । ४५ सर्वाँ - घ. । ४६ स्त ... ख., घ. । ४७ कुर्वत - घ. । ४८ सर्वे दे... - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तेषां कालेन महता तपसा भावितात्मनाम् ।
योगप्रवृत्तिरभवत्[४९] सूक्ष्मयुक्ता[५०]स्ततस्तु ते[५१] ॥२५॥
ते युक्ता ब्रह्मणा सार्धमृषयः सह देवतैः ।
महेश्वरे[५२] मनः स्थाप्य निश्चलोपलवत् स्थिताः ॥२६॥
अथ तेषां महादेवः पिनाकी नीललोहितः ।
अभ्यगच्छत तं देशं विमानेनार्कतेजसा ॥२७॥
तद्भावभावितान् ज्ञात्वा स[५३] भावेन परेण ह ।
उवाच मेघनिर्ह्लादः शतदुन्दुभिनिस्वनः ॥२८॥
भो भो सब्रह्मका देवाः सविष्णु[५४] ऋषिचारणाः ।
दिव्यं चक्षुः प्रयच्छामि पश्यध्वं[५५] मां यथेप्सितम्[५६] ॥२९॥

सनत्कुमार उवाच

अपश्यन्त[५७] ततः सर्वे सूर्यायुतसमप्रभम् ।
विमानं[५८] मेरुसंकाशं[५९] नानारत्नविभूषितम्[६०] ॥३०॥
तस्य मध्येग्निरोचिष्कं[६१] सुमहद्दीप्तिमा[६२]स्थितम् ।
ज्वालामालापरिक्षिप्त[६३]मर्चिभिरुपशोभितम् ॥३१॥
दंष्ट्राकरालवदनं प्रदीप्तानललोचनम् ।
त्रेताग्नि[६४]पिङ्गलजटं भुजगाबद्धमेखलम् ॥३२॥
मृष्टकुण्डलिनं चैव शूलाशक्तमहाकरम् ।
पिनाकिनं दण्डहस्तं मुद्गराशनिधारिणम्[६५] ॥३३॥
असिपट्टिशहस्तं[६६] च चक्रिणं चोर्ध्वमेहनम्[६७] ।
अक्षसूत्रकरं[६८] चैव दुष्प्रेक्ष्य[६९]मकृतात्मभिः ॥३४॥

---

४९ रागप्रवृत्तिरभवत् - घ. । ५० ...मु... - घ. । ५१ ततः स्फुटी - घ. । ५२ परमेशे - घ. । ५३ सद् - ख. ।
५४ स् - घ., ि - ख. । ५५... त्वं - घ. । ५६ यथासुखम् - घ. । ५७ तेपश्यँस्ते - घ. । ५८ ...ने - ख. ।
५९ ...शे - ख. । ६० ... ते - ख. । ६१ ... ग्निरोचिस्तं - घ., त्रिकूटश्च - ख. । ६२ ... मां - ख.
६३ ...क्लिष्ट - घ । ६४ ... मन्त्राग्नि ... - घ. । ६५ ... पाणिनम् - ख. । ६६ ... सहर्षं - ख. ।
६७ ...मेखलं - घ. । ६८ ... रथं - घ. । ६९ ... क्ष - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

चन्द्रादित्यग्रहैश्चैव कृतस्रगुपभूषणम्[७०] ।
तमपश्यन्त[७१] ते सर्वे देवा दिव्येन चक्षुषा ।
यं दृष्ट्वा न भवेन्मृत्युर्मर्त्यस्यापि कदाचन[७२] ॥३५॥
तपसां[७३] विनियोगयोगिनः प्रणमन्तो भवमिन्दुनिर्मलम्[७४] ।
वियतीश्वरदत्तचक्षुषः[७५] सह देवैर्मुनयो मुदान्विताः[७६] ॥३६॥
प्रसमीक्ष्य[७७] महासुरेशकालं मनसा चापि विचार्य दुर्विसह्यम् ।
प्रणमन्त[७८] गतात्मभावचिन्ताः[७९] सह देवैर्जगदुद्भवं स्तुवन्तः[८०] । ॥३७॥

⊙ इति स्कन्दपुराणे रुद्रदर्शनो नामाष्टमोऽध्यायः ⊙

सनत्कुमार उवाच

ते दृष्ट्वा देवदेवेशं ब्रह्मेन्द्रप्रमुखाः[१] सुराः ।
अस्तुवन् वाग्भिरिष्टाभिः प्रणम्य वृषवाहनम् ॥१॥

पितामह उवाच

नमः शिवाय सोमाय[२] भक्तानां भयहारिणे ।
नमः शूलाग्रहस्ताय कमण्डलुधराय च ॥२॥
नमस्ते[३] नीलकण्ठाय करालदशनाय[४] च ।
त्रेताग्निदीप्तनेत्राय त्रिनेत्राय हराय च ॥३॥
नमः पिनाकिने चैव नमो[५]स्त्वशनिधारिणे ।
व्यालयज्ञोपवीताय कुण्डलाभरणाय च ॥४॥
नमश्चक्रधरायैव व्याघ्रचर्मधराय च ।
कृष्णाजिनोत्तरीयाय सर्पमेखलिने तथा[६] ॥५॥

---

७० ...ग्रवि ... - ख. । ७१ ...तः - ख. । ७२ कथंचन - घ. । ७३ ... सा - घ. । ७४ ...ला - ख. ।
७५ ...षा - ख. । ७६ ... पि हर्षिताः - घ. । ७७ प्रतिवी... - घ. । ७८ ... न्ति ख., - घ. ।
७९ यथात्मभावचित्ताः- घ । गतात्मभावचित्ताः- ख., त्तः - घ. । ८० ...वस्तरन्तः - घ. ।
१ ब्रह्माणं... - ख., सर्वे सब्रह्मकाः - घ. । २ सौम्याय - घ. । ३ दान्ताय - घ. । ४ ...नयनाय - घ. ।
५ नम - घ. । ६ नमः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वरदात्रे च[७] पुत्राय सरस्वतीसुवे[८] तथा ।
सोमसूर्याक्षमालाय[९] अक्षसूत्रकराय च ॥६॥
ज्वालामालासहस्राय[१०] ऊर्ध्वलिङ्गाय[११] वै नमः ।
नमः पर्वतवासाय शिरोहर्त्रे च मे पुरा ॥७॥
हालाहलविनाशाय कपालवरधारिणे ।
विमानवरवाहाय जनकाय ममैव च[१२] ॥८॥
वरदाय वरिष्ठाय श्मशानरतये नमः ।
नमो नरस्य कर्त्रे च स्थितिकर्त्रे[१३] नमः सदा ॥९॥
उत्पत्तिप्रलयानां च कर्त्रे सर्वसहाय च ।
ऋषिदैवतनाथाय सर्वभूताधिपाय च ।
शिवः सौम्यश्च देवेश भव[१४] नो भक्त[१५]वत्सल[१६] ॥१०॥

सनत्कुमार उवाच

ब्रह्मण्यथैवं स्तुवति देवदेवः[१७] स लोकपः ।
उवाच तुष्टस्तान्देवानृषींश्च तपसैधितान् ॥११॥
तुष्टोस्म्यनेन वः सत्य[१८]न्तपसा ऋषिदेवताः ।
वरं ब्रूत प्रदास्यामि सुनिश्चित्य च[१९] उच्यताम् ॥१२॥

सनत्कुमार उवाच

अथ सर्वानभिप्रेक्ष्य संतुष्टान्[२०] तपसैधितान्[२१] ।
दर्शनेनैव[२२] विप्रेन्द्र[२३] ब्रह्मा वचनमब्रवीत् ॥१३॥

ब्रह्मोवाच

यदि तुष्टोसि देवेश यदि देयो वरश्च नः ।
तस्माच्छिवश्च सौम्यश्च संदृश्यश्च[२४] भवस्व नः ॥१४॥

---

७ वरदानाच्च - घ., परयाम... - ख. । ८ ...ते - घ । ९ सूर्यसोमार्क ... - घ. । १० ...ल ... - ख. घ. । ११ तत्त्व... - घ. । १२ ह - घ. । १३ ह ... - ख. । १४ भा... - ख. । १५ भक्ति... - घ., द्भक्ति... - ख. । १६... लः - घ. । १७ देवेगः सर्त्रे... - घ. । १८ सम्यक् - घ. । १९ स - ख. । २० ...ष्टस्त... - घ. । २१ ...से... ख. घ. । २२ ...न च - घ । २३ ...न्द्रा - घ. । २४ दृश्यश्चैव - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सुख[२५]संव्यवहार्यश्च नित्यं तुष्टमनास्तथा ।
सर्वकार्येषु च सदा हितः[२६] पथ्यश्च शंकर ॥१५॥
सह देव्या[२७] ससूनुश्च सह देव[२८]गणैरपि ।
एष नो दीयतां देव वरो वरसहस्रद ॥१६॥

सनत्कुमार उवाच

एवमुक्तः स भगवान् ब्रह्मणा[२९] देवसत्तमः ।
स्वकं[३०] तेजो महद्[३१] दिव्यं व्यसृजत्[३२] सर्वयोगवित्[३३] ॥१७॥
अर्धेन तेजसस्तस्य[३४] मुखादुल्कां ससर्ज ह ।
तामाह भव नारीति[३५] भगवान् विश्वरूपधृक् ॥१८॥
साकाशं द्यां च भूमिश्च महिम्ना व्याप्य धिष्ठिता[३६] ।
उपतस्थे च देवेशं दीप्यमाना यथा तडित् ॥१९॥
तामाह प्रहसन् देवो देवीं कमललोचनाम् ।
ब्रह्माणं देवि वरद[३७]माराधय शुचिस्मिते ॥२०॥
सा तथेति प्रतिज्ञाय तपस्तप्तुं प्रचक्रमे ।
रुद्रश्च तानृषीनाह श्रृणुध्वं मम तोषणे ॥२१॥
फलं फलवतां श्रेष्ठा यद् ब्रवीमि तपोधनाः ।
अमरा जरया त्यक्ता अरोगा जन्मवर्जिताः ॥२२॥
मद्भक्तास्तपसा युक्ता इहैव[३८] च निवत्स्यथ[३९] ।
अयं चैवाश्रमः श्रेष्ठः[४०] स्वर्णश्रृङ्गोचलोत्तमः ॥२३॥
पुण्यं पवित्रं स्थानं वै भविष्यति न संशयः ।
मैनाके पर्वते ह्यस्मिन्[४१] स्वर्णाक्षोहं[४२] यतः[४३] स्थितः[४४] ॥२४॥

---

२५ ...खं - ख. । २६ भितकल्प... - घ. । २७ सभृत्य... - घ. । २८ भृत्य (?) । २९... णो - ख. घ. ।
३० ...कां - ख. । ३१ मयं - घ. । ३२ मभवत् - घ. । ३३ स च घ. । ३४ स्वस्य - ख. । ३५ त्वं - ख. ।
३६ संस्थिता - घ. । ३७ ...दा - ख. । ३८ इह चैव घ. । ३९ हि वत्स्य... - घ. । ४० ष्ठाः-- ख., ष्ठं - घं. ।
४१ श्रेष्ठे - ख. । ४२ स्वर्णहमभवं ग., स्वर्णे महति संचये - ख. । ४३ सदा - घ. । ४४ यतः - ग. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्वर्णाक्षीं चासृजं देवीं[४५] स्वर्णाक्षं तेन तत्स्मृतम्[४६] ।
स्वर्णाक्ष[४७] ऋषयो यूयं[४८] षट्कुलीया[४९]स्तपोधनाः ।।२५।।
निवत्स्यथ मयाज्ञप्ताः स्वर्णाक्षं[५०] वै ततश्च ह[५१] ।
समन्ताद्योजनं क्षेत्रं पवित्रं[५२] तन्न संशयः ।।२६।।
देवगन्धर्वचरितमप्सरोगणसेवितम्[५३] ।
सिंहेभशरभाकीर्णं शार्दूलर्क्षमृगाकुलम्[५४] ।।२७।।
अनेकविहगाकीर्णं लतावृक्षक्षुपाकुलम्[५५] ।
ब्रह्मचारी नियमवान् जितक्रोधो जितात्मवान्[५६] ।।२८।।
उपोष्य त्रिगुणां रात्रिं चरुं कृत्वा निवेद्य च ।
यत्र[५७] तत्र मृतः सोपि[५८] ब्रह्मलोके निवत्स्यति ।।२९।।
योप्येवमेवाकामान्मां पश्ये[५९]दत्र वृषध्वजम् ।
गोसहस्रफलं सोपि मत्प्रसादादवाप्स्यति ।।३०।।
नियमेन मृतश्चात्र मया सह चरिष्यति ।
यावत् स्थास्यन्ति लोकाश्च मैनाकश्चाप्ययं गिरिः ।।३१।।
तावत् सह मया देवा मत्प्रसादा[६०]च्चरिष्यथ ।
एवं[६१] स तानृषीनुक्त्वा दृष्ट्वा सौम्येन[६२] चक्षुषा ।
पश्यतामेव सर्वेषां तत्रैवान्तरधीयत ।।३२।।

सनत्कुमार उवाच

य इमां[६३] शृणुयान्मर्त्यो द्विजातीञ्छ्रावयीत[६४] वा ।
सोपि तत्फलमासाद्य चरेन्मृत्युविवर्जितः ।।३३।।
जयति जलदवाहः सर्वभूतान्तकालः ।
शमदमनिरतानां[६५] क्लेशहर्ता[६६] यतीनाम् ।

---

४५ स्वर्णाक्षी च मया सृष्टा - घ. । ४६ स्वर्णाक्षो यो गिरिस्ततः - घ. । ४७ अस्मिँश्च - घ.। ... क्षं - ख., क्षे...- ग. । ४८ युक्ताः - घ. । ४९ ...ना - ग. । ५० स्वर्णाक्षे - घ. । ५१ लर्वकामदे - घ. । ५२ भविष्यति - घ. । ५३ गीतनादितम् - घ. । ५४...समा...- घ. । ५५...समा...- घ. । ५६ जितेन्द्रियः - घ. । ५७ त... - ख. । ५८ साक्षात् - घ. । ५९ त्त... - ख. घ. । ६० मत्प्रभावा... - ग. । ६१ चैव स ता - घ. । ६२ दिव्येन - घ. । ६३...दं - घ. । ६४... येत्तथा - घ. । ६५ निय ...ख. ग. घ । ६६... हन्ता - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जननमरणहर्ता[६७] चेष्टतां धार्मिकाणाम्[६८] ।
विविधकरणयुक्तः खेचरः पादचारी ॥३४॥
मदनपुरविदारी नेत्रदन्तापहारी[६९] ।
विगतभयविषादः सर्वभूतप्रणेता[७०] ॥
सततमभिदधानश्चेकितानात्मचितः ।
करचरणललामः सर्वदृग् देवदेवः ॥ ३५ ॥

⊙ इति स्कन्दपुराणे[७१] वरप्रदानिको नाम नवमोध्यायः ⊙

सनत्कुमार उवाच

सा देवी त्र्यम्बकप्रोक्ता तताप सुचिरं तपः ।
निराहारा कदाचिच्च एकपर्ण्णाशिना पुनः ॥१॥
वाय्वाहारा पुनश्चापि अब्भक्षा[१] भूय एव हि[२] ।
तां तपश्चरणे युक्तां ब्रह्मा ज्ञात्वातिभास्वराम् ॥२॥
उवाच ब्रूहि तुष्टोस्मि देवि किं करवाणि ते ।
साब्रवीत् त्र्यम्बकं देवं[३] पतिं प्राप्येन्दुवर्च्चसम् ।
विचरेयं सुखं देव सर्वाँल्लोकान्नमस्तव ॥३॥

ब्रह्मोवाच

नहि येन शरीरेण क्रियते परमं तपः[४] ।
तेनैव परमेशोसौ पतिः शम्भुरवाप्यते ॥४॥

---

६७ ...हंता घ. । ६८... नां - ख व. । ६९ ...वपाती - ख. ग, ...वचारी - घ. । ७० प्रचेताः - ख, घ. ।
७१ सुवर्णाक्षोत्पत्ति... - घ. ।
१ ...भक्ष - घ. । २ च - घ. । ३... व - ख. । ४ च परन्तपे - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तस्माद्धि योगाद्भवती[५] दक्षस्येह प्रजापतेः ।
जायस्व दुहिता भूत्वा पतिं रुद्रमवाप्स्यसि ॥५॥
ततः सा तद्वचः[६] श्रुत्वा योगाद्देवी मनस्विनी ।
दक्षस्य दुहिता जज्ञे सतीनामा[७]तियोगिनी ॥६॥
तां दक्षस्त्र्यम्बकायैव ददौ भार्यामनिन्दिताम् ।
ब्रह्मणो वचनाद्यस्यां मानसा[८]नसृजत्सुतान् ॥७॥
आत्मतुल्यबलान्दीप्तान् जरामरणवर्जितान् ।
अनेकानि सहस्राणि रुद्राणाममितौजसाम् ॥८॥
तान्दृष्टा सृज्यमानाँश्च ब्रह्मा तं प्रत्यषेधयत् ।
मा स्राक्षीर्देवदेवेश प्रजा मृत्युविवर्जिताः ॥९॥
अन्याः[१०] सृजस्व भद्रन्ते प्रजा[११] मृत्युसमन्विताः[१२] ।
तेन चोक्तं स्थितोस्मीति[१३] स्थाणुस्तेन ततः स्मृतः ॥१०॥

[१४]देवदेव उवाच

न स्रक्ष्ये मृत्युसंयुक्ताः प्रजा ब्रह्मन् कथञ्चन ।
स्थितोस्मि वचनात्तेद्य वक्तव्यो नास्मि ते पुनः ॥११॥
ये त्विमे मानसाः[१५] सृष्टा महात्मानो महाबलाः ।
चरिष्यन्ति मया सार्धं सर्व एते हि याज्ञिकाः ॥१२॥

सनत्कुमार उवाच

अथ काले गते व्यास स दक्षः शापकारणात् ।
अन्यानाहूय जामातॄन्सदारानर्च्चयद् गृहे[१६] ॥१३॥
सतीं सह त्र्यम्बकेण[१७] नाजुहाव रुषान्वितः ।
सती ज्ञात्वा तु तत्सर्वं गत्वा पितरमब्रवीत् ॥१४॥

५...ति - घ । ६ तत्वतः - खः । ७ नामे - घ. । ८ म... - ख । ९ षेधत - घ. । १० .. न्यां - ख. । ११... जां - ख. । १२... ताम् - ख. । १३ स्मृतो... - ख. । १४ एतत्स्थाने अथ काले गते व्यास देवदेवोभ्यभाषत । इति घ. पुस्तके । १५ मनसा - ख. । १६ महे - घ. । १७ तां सतीं त्र्यम्बकेनाथ - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अहं ज्येष्ठा वरिष्ठा च जामात्रा सह सुव्रत[१८]।
मां हित्वा नार्हसि[१९] ह्येताः सह भर्तृभिरर्चितुम् ॥१५॥
क्रोधेनाथ समाविष्टः स क्रोधोपहतेन्द्रियः[२०]।
निरीक्ष्य प्राब्रवीद्[२१] दक्षश्चक्षुषा निर्दहन्निव ॥१६॥
मामेताः सति सस्नेहाः पूजयन्ति सभर्तृकाः।
न त्वं तथा पूजयसे सह भर्त्रा महाव्रते ॥१७॥
गृहाँश्च मे सपत्नीकाः प्रविशन्ति तपोधनाः।
श्रेष्ठाँ[२२]स्तस्मात्सदा मन्ये ततस्तानर्चयाम्यहम् ॥१८॥
तस्माद् यां ते[२३] करोम्यद्य शुभां[२४] वा यदि वाशुभाम्[२५]।
पूजां गृहाण तां पुत्रि गच्छ वा यत्र रोचते ॥१९॥

सनत्कुमार उवाच

ततः सा क्रोधदीप्तास्या न जग्राहातिकोपिता।
पूजामसम्मतां हीनामिदं चोवाच तं शुभा ॥२०॥
यस्मादसम्मतामेनां पूजां त्वं कुरुषे मयि।
श्लाघ्यां चैवाप्यदुष्टाश्च श्रेष्ठां मां गर्हसे पितः ॥२१॥
तस्मादियं[२६] स्वकं देहं त्यजाम्येषा[२७] तवात्मजम्[२८]।
असत्कृतायाः किं मेद्य जीवितेनाशुभेन ह ॥२२॥

सनत्कुमार उवाच

ततः कृत्वा नमस्कारं मनसा त्र्यम्बकाय ह।
उपाचेदं सुसंरब्धा वचनं वचनारणिः ॥२३॥
यत्राहमुपपद्येयं पुनर्देहे[२९] स्वयेच्छया[३०]।
देव तत्राप्यसं[३१]मूढा[३२] संभूता धार्मिका सती ॥२४॥

---

१८ जामातरि शुभव्रता - घ । १९... से - ख. । २० अज्ञानो... घ. । २१ विषवीँ - ख., तां पुनर् - ।
२२ ज्येष्ठाँ - घ. । २३ यत्ते - घ । २४...भम् । २५... भम् - घ. । २६... दं - घ. । २७ ... ष - घ. ।
२८... जा - घ. । २९ देहं - घ. । ३० सुखेच्छया - घ. । ३१ प्येष - घ । ३२ संमूढा - घ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गच्छेयं धर्मपत्नीत्वं त्र्यम्बकस्यैव धीमतः ।
ततः सा धारणां कृत्वा देव्याग्नेयीं समाधिना ॥२५॥
ददाह वै स्वकं देहं स्वसमुत्थेन[३३] वह्निना ।
तां ज्ञात्वा[३४] त्र्यम्बको देवीं तथाभूतां महायशाः ॥२६॥
उवाच दक्षं संगम्य[३५] इदं वचनकोविदः ।
यस्मात्तो निन्दित[३६]श्चाहं प्रशस्ताश्चेतरे पृथक् ॥२७॥
जामातरः सपत्नीकास्तस्माद्वैवस्वतेन्तरे ।
उत्पत्स्यन्ते पुनर्यज्ञे तव जामातरस्त्विमे ॥२८॥
त्वं चैव मम शापेन क्षत्रियो भविता नृप[३७] ।
प्रचेतसां सुतश्चैव कन्यायां शाखिनां पुनः ।
धर्मविघ्नञ्च ते तत्र करिष्ये क्रूरकर्मणः[३८] ॥२९॥

सनत्कुमार उवाच

तमुवाच तदा दक्षो दूयता हृदयेन वै ।
मया यदि सुता[३९] स्वा[४०] वै प्रोक्ता त्यक्तापि वा पुनः ॥३०॥
किं तवात्र[४१] कृतं देव अहं तस्याः प्रभुः सदा ।
यस्मात्त्वं मामभ्यशपस्तस्मात्त्वमपि शङ्कर ।
भुव्येव वत्स्यसे नित्यं नान्तरिक्षे कदाचन ॥३१॥
भागं च तव यज्ञेषु दत्त्वा सर्वे द्विजातयः ।
अपस्प्रक्ष्यन्ति सर्वत्र महादेव महाद्युते ॥३२॥

सनत्कुमार उवाच

ततः स देवः प्रहसन् तमुवाच त्रिलोचनः ।
सर्वेषामेव लोकानां मूलं भूर्लोक[४२] उच्यते ॥३३॥

---

३३ स (स्व)कीयेनैव - घ. । ३४ ज्ञात्वा तु - घ. । ३५ सम्यक् - घ. । ३६ नार्थित - घ. । ३७ नृपः-- घः ।
३८... णा - घ. । ३९ मया चैव - घ. । मयेयं दुहिता - ग. । ४० सा घ. । ४१...द्य - घ. । ४२ भूरिति - घ.।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तमहं धारयाम्येको लोकानां हितकाम्यया ।
एतस्मिन् हि धृते[४३] लोकाः सर्वे तिष्ठन्ति शाश्वताः ।।३४।।
तस्मात्तिष्ठाम्यहं नित्यमिहैव न तवेच्छया ।
भागान्दत्त्वा तथान्येभ्यो दित्सवो मे द्विजातयः ।।३५।।
अपः स्पृशन्ति शुद्ध्यर्थं भागं[४४] यच्छन्ति मे ततः ।
दत्त्वा स्पृशन्ति भूयश्च धर्मस्यैवाभिवृद्धये ।।३६।।
यथा[४५] हि देवनिर्माल्यं शुचयो धारयन्त्युत ।
अशुचिं[४६] स्प्रष्टुकामाश्च त्यक्त्वापः संस्पृशन्ति च ।।३७।।
यथा ममैव[४७] मन्येषां दित्सवो ब्राह्मणर्षभाः ।
भागानपः स्पृशन्ति स्म तत्र का परिदेवना ।।३८।।
त्वन्तु मच्छापनिर्दग्धो विपरीतो नराधमः ।
स्वस्यां सुतायां[४८] मूढात्मा पुत्रमुत्पादयिष्यसि ।।३९।।

सनत्कुमार उवाच

एवं स भगवाञ्छप्त्वा दक्षं देवो जगत्पतिः ।
विरराम महातेजा जगाम च यथागतम्[४९] ।।४०।।
सोमदिवाकरवह्निसमाक्षं[५०] चन्द्रनिभाननपद्मदलाक्षम् ।
गोवृषवाहममेय[५१] गुणौघं शाश्वतमिन्दुवहं[५२] प्रणताः स्मः ।।४१।।
य इमं[५३] दक्षशापाङ्कं[५४] देव्याश्चैवाशरीरताम् ।
शृणुयाद् वाथ विप्रान्[५५] वा श्रावयीत[५६] यतव्रतः ।
स सर्वपापनिर्मुक्तो रुद्रलोकमवाप्नुयात् ।।४२।।

⊙ इति स्कन्दपुराणे दक्षशापो नाम दशमोध्यायः ⊙

---

४३ निर्वृते - घ. । ४४...गान् - ग. । ४५ त... - घ. । ४६ ...चिः - घ. । ४७ देवानामेव - घ., देवतामेव - ख. ग. । ४८ अस्याः स्वभार्या - घ. । ४९ ...मतम् - घ. । ५० मेरु - कं, मेरु भास्कार - ख., मेरुहिमाचलमन्दकरक्षं - घ. । ... समक्षं - घ. । ५१ मशेष - घ. । ५२ सततमिहेन्दु... - ख. । ५३ इदं - घ. ५४ ...ङ्गं - घ. । ५५ विप्रेभ्यः - घ. । ५६... येत - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

कदाचित् स्वगृहं[१] प्राप्तं कश्यपं द्विपदाम्वरम्[२] ।
अपृच्छद्धिमवान् प्रश्नं लोके ख्यातिकरं नु[३] किम् ।।१।।
केनाक्षयाश्च लोकाः स्युः ख्यातिश्च परमा मुने[४] ।
तथैव[५] चार्चनीयत्वं सत्सु तत्[६] कथयस्व मे ।।२।।

कश्यप उवाच

अपत्येन महाभाग[७] सर्वमेतदवाप्यते ।
मम ख्यातिरपत्येन ब्रह्मणश्चर्षिभिः सह ।।३।।
किन्न पश्यसि शैलेन्द्र यतो मां परिपृच्छसि ।
वर्त्तयिष्यामि[८] तच्चापि यन्मे दृष्टं पुराचल[९] ।।४।।
वाराणसीमहं गच्छन्नपश्यं संस्थितं दिवि ।
विमानं स्वनवद्दिव्यमनौपम्यमनिन्दितम् ।।५।।
तस्याधस्तादार्त्तनादं गर्भस्थाने[१०] शृणोम्यहम् ।
- - - - - - - - - - - - - - - - - - ।
तानहं[११] तपसा ज्ञात्वा तत्रैवान्तर्हितः स्थितः[१२] ।।६।।
अथागात्तत्र शैलेन्द्र[१३] विप्रो नियमवान् शुचिः ।
तीर्थाभिषेकपूतात्मा परे तपसि संस्थितः ।।७।।
अथ स व्रजमानस्तु व्याघ्रेणाभीषितो द्विजः ।
विवेश तं तदा देशं सा गर्ता[१४] यत्र भूधर ।।८।।
गर्त्तायां[१५] वीरणस्तम्बे लम्बमानाँस्तदा मुनीन् ।
अपश्यदार्तो[१६] दुःखार्त्तानपृच्छत्तांश्च स द्विजः[१७] ।।९।।
के यूयं वीरणस्तम्बे लम्बमाना ह्यधोमुखाः ।
दुःखिताः केन मोक्षश्च युष्माकं भवितानघाः[१८] ।।१०।।

---

१ इच्छया - घ. । २ मुनिपुंगवम् - घ. । ३ तु - घ. । ४ ...त्मने - घ. । ५ सर्वथैवा... - घ. । ६ ससुतं - ख, घ., सत्सुतं (तत्) - क. । ७ महाबाहो - ख. घ. । ८ चात्रैव - घ. । ९ ...तन - घ. । १० गर्त्ता... - ख. घ. । - ११ तथाहं - क., तमहं - घ. । १२ ... तास्थितान् - ख. । १३ सैन्येय - घ. । १४ सगर्तो - घ । १५ गर्त्तोयं - घ. । १६ ...र्त्तान् - ख. । १७ ...जाः - ख. । १८ ...घ - क, ग, ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पितर ऊचुः

वयन्तेकृतपुण्यस्य पितरः सपितामहाः ।
प्रपितामहाश्च क्लिश्यामस्तव[१९] दुष्टेन कर्मणा ।।११।।
नरकोयं महाभाग गर्त्तारूपं[२०] समास्थितः ।
त्वञ्चापि वीरणस्तम्बस्त्वयि लम्बामहे वयम् ।।१२।।
यावत्त्वं जीवसे विप्र तावदेव वयं स्थिताः ।
मृते त्वयि गमिष्यामो नरकं पापचेतसः ।।१३।।
यदि त्वं दारसंयोगं कृत्वापत्यं गुणोत्तरम् ।
उत्पादयसि तेनास्मान्मुच्येम वयमेकशः[२१] ।।१४।।
नान्येन तपसा पुत्र न तीर्थानां फलेन च ।
तत् कुरुष्व महाबुद्धे तारयस्व पितॄन् भयात् ।।१५।।
स तथेति प्रतिज्ञाय आराध्य च वृषध्वजम् ।
पितॄन् गर्त्तात्समुद्धृत्य गणपान् प्रचकार ह ।।१६।।
स्वयञ्च[२२] रुद्रदयितः सुकेशो नाम नामतः ।
संमतो बलवाँश्चैव रुद्रस्य[२३] गणपोभवत् ।।१७।।
तस्मात् कृत्वा तपो घोरमपत्यं गुणवद् भृशम्[२४] ।
उत्पादयस्व शैलेन्द्र ततः कीर्तिमवाप्स्यसि ।।१८।।

सनत्कुमार उवाच

स एवमुक्त[२५] ऋषिणा शैलेन्द्रो नियमे स्थितः ।
तपश्चकार विपुलं येन ब्रह्मा तुतोष ह ।।१९।।
तमागत्य[२६] ततो[२७] ब्रह्मा वरदोस्मीत्यमाषत ।
ब्रूहि तुष्टोस्मि ते शैल[२८] तपसानेन सुव्रत ।।२०।।

---

१९ त... - ख. । २० गर्त्तारूपा - ख. गर्तरूपी घ. । २१ ...मंहसः - घ. । २२ अयश्च... - घ. । २३ वरस्य - घ. । २४ ...त्तरम् - घ. । २५ एवमुक्तो हि - घ., ...क्तो - क. ख. घ., ...क्ते - ग. । २६ ततो गत्वा - घ. । २७ तदा - क. घ. । २८ शैलेन्द्र - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

हिमवानुवाच

भगवन् पुत्रमिच्छामि गुणैः सर्वैरलंकृतम् ।
एतद्वरं[२९] प्रयच्छस्व यदि तुष्टोसि नः प्रभो ॥२१॥

ब्रह्मो[३०]वाच

कन्या भवित्री[३१] शैलेन्द्र सुता ते वरवर्णिनी ।
यस्याः प्रभावात् सर्वत्र कीर्त्तिमाप्स्यसि पुष्कलाम् ॥२२॥
अर्चितः सर्वदेवानां तीर्थकोटीसमावृतः[३२] ।
पावनश्चैव पुण्यश्च[३३] देवानामपि सर्वतः ।
ज्येष्ठा च सा[३४] भवित्री[३५] ते अन्ये चानु ततः[३६] शुभे[३७] ॥२३॥

सनत्कुमार उवाच

एवमुक्त्वा ततो ब्रह्मा तत्रैवान्तरधीयत ।
सोपि कालेन शैलेन्द्रो मेनायामुदपादयत्[३८] ॥२४॥
अपर्णामेकपर्णां च तथा चाप्येकपाटलाम् ।
न्यग्रोधमेकपर्णा तु पाटलं[३९] चैकपाटला ॥२५॥
आश्रिते द्वे ह्यपर्णा तु अनिकेता तपोचरत् ।
शतं वर्षसहस्राणां दुश्चरं देवदानवैः ॥२६॥
आहारमेकपर्णेन सैकपर्णा समाचरत् ।
पाटलेन तथैकेन व्यदधाच्चैकपाटला[४०] ॥२७॥
पूर्णे पूर्णे सहस्रे तु आहारं ते च चक्रतुः[४१] ।
अपर्णा[४२] तु निराहारा[४३] तां माता[४४] प्रत्यभाषत ॥२८॥
निषेधयन्तीत्युमेति मातृस्नेहेन दुःखिता ।
सा तथोक्ता तदा मात्रा देवी दुश्चरचारिणी ।
तेनैव नाम्ना लोकेषु विख्याता सुरपूजिता ॥२९॥

---

२९ एवं वरं - क. ग. घ. । २० पितामह - क. । ३१ ...ता - घ. । ३२ समन्चितः - घ. । ३३ पूत ...- घ. । ३४ सा च - घ । ३५ सवित्री - क. । ३६ गते - घ. । ३७ शुभा - क., सुते - घ. । ३८ मुप ...क. ख. । ३९ ...लां चैव - घ. । ४० विदधात्येक... क. ख. घ. । ४१ ...रश्च तया कृतः - घ. । ४२ ...र्णां - घ. । ४३ ...रां - क. । ४४ माता तां - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एतत् तत्त्रि[४५]कुमारीकं[४६] जगत् स्थावरजङ्गमम् ।
एतासां तपसा लोकान्[४७] यावद् भूमिर्धरिष्यति ॥३०॥
तपःशरीरास्ताः सर्वास्तिस्रो योगबलान्विताः ।
सर्वाश्चैव महायोगाः[४८] सर्वाश्च[४९] स्थिरयौवनाः[५०] ॥३१॥
लोकानां मातर[५१]श्चैव ब्रह्मचारिण्य एव च ।
अनुगृह्णन्ति लोकांश्च तपसा स्वेन सर्वदा ॥३२॥
उमा तासां वरिष्ठा च श्रेष्ठा[५२] च वरवर्णिनी ।
महायोगबलोपेता महादेवमुपस्थिता ॥३३॥
दत्तकश्चोशनास्तस्याः[५३] पुत्रः स भृगुनन्दनः ।
असितस्यै[५४]कवर्णा तु देवलं सुषुवे सुतम् ॥३४॥
या तु तासां कुमारीणां तृतीया ह्येकपाटला ।
पुत्रं शतशलाकस्य जैगीषव्यमुपस्थिता ॥३५॥
तस्यापि शंखलिखितौ स्मृतौ पुत्रावयोनिजौ ।
उमा तु या[५५] मया तुभ्यं कीर्तिता वरवर्णिनी ॥३६॥
अथ तस्यास्तपो[५६] योगात् त्रैलोक्यमखिलं तदा ।
प्रधूपितं समालक्ष्य ब्रह्मा वचनमब्रवीत् ॥३७॥

ब्रह्मोवाच

देवि किं तपसा लोकान् तापयिष्यसि शोभने ।
त्वया सृष्टमिदं विश्वं मा कृत्वैतद्[५७] विनाशय ॥३८॥
त्वं हि धारयसे लोकानिमान् सर्वान् स्वतेजसा ।
ब्रूहि किन्ते जगन्मातः प्रार्थितं संप्रसीद नः[५८] ॥३९॥

---

४५ त्वद्रि... - घ. । ४६ ..णां - ख. । ४७ दृग्ध- क. । ४८ ...भागा - ख. । ४९ स्तथा च - क. । ५० तपोधनाः - ख. । ५१ ...ता लोक - क. । ५२ ज्येष्ठा - घ. । ५३ दत्तश्चोशनसा तस्याः... - क. घ., तस्य - ख. । ५४ ...चैक... - क. घ.,...चैक (?) । ५५ सा ... - क. । ५६ स्ताप... - घ. । ५७ कृत्वा त... क., कृतान्तवि... - ख., हृतात्व... - घ. । ५८ हृ - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

देव्युवाच[५९]

यदर्थन्तपसो ह्यस्य चरणं मे पितामह ।
जानीषे तत्त्वतस्तन्मे[६०] ततः पृच्छसि किं पुनः ।।४०।।

ब्रह्मोवाच[६१]

यदर्थं देवि तपसा श्राम्यसे लोकभावनि[६२] ।
स त्वां[६३] स्वयं समागम्य[६४] इहैव वरयिष्यति ।।४१।।
सर्वदेवपति[६५]श्रेष्ठः सर्वलोकेश्वरेश्वरः ।
वयं सदेवा यस्येशे वश्याः किङ्करवादिनः[६६] ।।४२।।
सदेवदेवः परमेश्वरे[६७]श्वरः स्वयं[६८] तवाथास्यति[६९] लोकपोन्तिकम् ।
उदाररूपो विकृतो[७०]भिरूपवान्[७१] समानरूपो हि नरस्य[७२] कस्यचित्[७३] ।।४३।।
महेश्वरः पर्वतलोकवासी चराचरेशः प्रथमो[७४]प्रमेयः ।
विनेन्दुनापीन्दु[७५]समानवक्त्रो विभीषणं रूपमिहास्थितोग्र्यम्[७६] ।।४४।।

⊙ इति स्कन्दपुराणे देव्या वरप्रदानं[७७] नाम एकादशोध्यायः ⊙

ततः स भगवान्देवो ब्रह्मा तामाह सुस्वरम् ।
देवि येनैव सृष्टासि न विना यस्त्वया शुभे[१] ।।१।।
स भर्ता तव देवेशो[२] भविता मा तपः कृथा[३] ।
ततः प्रदक्षिणं कृत्वा ब्रह्मा व्यास गिरेः सुताम् ।।२।।

---

५९ उमोवाच - घ । ६० तत्त्वमेतन्मे - ख. । ६१ पितामह उ० - घ. । ६२ भाविनि - क., भाविनी घ. । ६३ त्वा - ख. । ६४ ...त्य - ख. । ६५ ...तिः - क. । ६६ वा (मा) निनः- ख., ...वाणि वः- घ. । ६७ ...रः स्वयं - ख । ६८ हरो - घ. । ६९ तवैव मा... - ख. । ७० ...ता - क. । ७१ तिरूपः... - क, मिरूपः - घ. । ७२ नहि यस्य - क., ...णि. - घ. । ७३ कश्चित् - क. । ७४ ...मा - क. । ७५ ही... - क., ती... - घ । ७६ ...ग्रं - क., ...ग्रतः स्थितं - ख । ७७ उमातपसि ब्रह्मवचनो - घ. ।

१ मनसा यस्त्वया वृतः - ख. । २ ...शि - ख. । ३ स्तथा - ख ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जगामादर्शनं तस्याः सा चापि विरराम ह ।
सा देवी युक्तमित्येवमुक्त्वा स्वस्याश्रमस्य ह ॥३॥
द्वारि जातमशोकं वै समुपाश्रित्य संस्थिता ।
अथागाच्चन्द्रतिलकस्त्रिदशार्तिहरो हरः ॥४॥
विकृतं रूपमास्थाय ह्रस्वो बाहुक एव च ।
विभुग्ननासिको भूत्वा कुब्जः केशान्तपिङ्गलः ॥५॥
उवाच विकृतास्यश्च देवि त्वां[४] वरयाम्यहम् ।
अथोमा योगसंसिद्धा[५] ज्ञात्वा शङ्करमागतम् ॥६॥
अन्तर्भावविशुद्धात्मा क्रियानुष्ठानलिप्सया ।
तमुवाचार्घपाद्याभ्यां[६] मधुपर्केण चैव हि ।
संपूज्य सुमनोनेत्रा[७] ब्राह्मणं ब्राह्मणप्रिया ॥७॥

देव्युवाच

भगवन्नस्वतन्त्रास्मि पिता मेस्त्यरणी तथा ।
तौ प्रभू मम दाने वै कन्याहं द्विजपुङ्गव ॥८॥
गत्वा याचस्व पितरं मम शैलेन्द्रमव्ययम् ।
स चेद्ददाति मां विप्र तुभ्यं तद्रुचितं मम ॥९॥

सनत्कुमार उवाच

ततः स भगवान् देवस्तथैव विकृतः प्रभुः ।
उवाच शैलराजं तमुमां[८] मे यच्छ शैलप[९] ॥१०॥
स तं विकृतरूपेण ज्ञात्वा रुद्रमथाव्ययम् ।
भीतः शापाच्च विमना इदं वचनमब्रवीत् ॥११॥
भगवन्नावमन्यामि ब्राह्मणान् भूमि[१०]दैवतान्[११] ।
मनीषितं तु यत् पूर्वं तच्छृणुष्व महातपः[१२] ॥१२॥

---

४ त्वा - ख. । ५ ...द्ध्या - क. । ६ ...र्घ्यमानाय्य - ख. । ७ सुमना नत्वा - घ. । ८ न्तामुमां - क. टि. । ९ ...राट् - ख. । १० भुवि - घ. । ११ देवतान् - क. - ताँ - ख. । १२ ...प - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्वयंवरो मे दुहितुर्भविता विप्र पूजितः ।
वरयेद्यं स्वयं तत्र स भर्त्तास्या भवेदिति ॥१३॥

सनत्कुमार उवाच

तच्छ्रुत्वा शैलवचनं भगवान् गोवृषध्वजः ।
देव्याः समीपमागत्य इदमाह महामनाः ॥१४॥
देवि पित्रा तवाज्ञप्तः[१३] स्वयंवर इति श्रुतम् ।
तत्र त्वं वरयित्री यं स ते भर्त्ता किलानघे ॥१५॥
तदापृच्छे गमिष्यामि दुर्ल्लभा त्वं वरानने ।
रूपवन्तं समुत्सृज्य वृणीथा मादृशं[१४] कथम् ॥१६॥

सनत्कुमार उवाच

तेनोक्ता सा तदा तत्र भावतो यत्तदीरितम्[१५] ।
भावञ्च रुद्रनिहितं प्रसादं[१६] मनसस्तथा ॥१७॥
संप्राप्योवाच देवेशं मा तेभूद् बुद्धिरन्यथा ।
अहं त्वां वरयिष्यामि नान्यद्भूतं कथञ्चन ॥१८॥
अथवा तेस्ति सन्देहो मयि विप्र कथञ्चन ।
इहैव त्वां महाभाग वरयामि मनोरथे[१७] ॥१९॥

सनत्कुमार उवाच

गृहीत्वा स्तबकं सा तु हस्ताभ्यां तत्र संस्थितम्[१८] ।
स्कन्धे शम्भोः समाधाय[१९] देवी प्राह वृतोसि मे ॥२०॥
ततः स भगवान् देवस्तथा देव्या[२०] वृतस्तदा[२१] ।
उवाच तमशोकं[२२] वै वाचा संजीवयन्निव[२३] ॥२१॥

---

१३ समा...- घ. । १४...षे – ख. । १५ भव पन्त्या उदीरितम् - घ. । १६...दान् - घ. । १७...थं १८...ता-क. ।
१९ ...दाय - क. घ. । २० वो देव्या तत्र–घ. । २१ न्त...- घ. । २२ ता - घ. । २३ संचार... घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यस्मात्तव सुपुष्पेण स्तवकेन वृतो ह्यहम् ।
तस्मात्त्वं जरया त्यक्तः[२४] अमरः संभविष्यसि ॥२२॥
कामरूपः कामपुष्पः कामगो दयितो मम ।
सर्वाभरणपुष्पाढ्यः सर्ववृक्षफलोपगः ॥२३॥
सर्वान्नभक्षदश्चैव अमृतस्रव एव च ।
सर्वगन्धश्च देव्यास्त्वं भविष्यसि दृढं प्रियः ॥२४॥
निर्भयः सर्वलोकेषु[२५] चरिष्यसि सुनिर्वृतः ।
आश्रमं चैन[२६]मत्यर्थं[२७] चित्रकूटेति विश्रुतम् ॥२५॥
योभियास्यति पुण्यार्थी सोश्वमेधमवाप्स्यति ।
यत्र तत्र मृतश्चापि ब्रह्मलोकं गमिष्यति ॥२६॥
यश्चात्र नियमैर्युक्तः प्राणान् सम्यक् परित्यजेत् ।
स देव्यास्तपसा युक्तो महागणपतिर्भवेत् ॥२७॥

सनत्कुमार उवाच

एवमुक्त्वा ततो[२८] देव आपृच्छ्य हिमवत्सुताम् ।
अन्तर्दधे जगत्स्रष्टा सर्वभूतप ईश्वरः[२९] ॥२८॥
सापि देवी गते तस्मिन् भगवत्यमितात्मनि ।
तत एवोन्मुखी स्थित्वा शिलायां संविवेश ह ॥२९॥
उन्मुखी सा गते तस्मिन्महेष्वासे प्रजापतौ ।
निशेव चन्द्ररहिता बभूव[३०] विमनास्तदा[३१] ॥३०॥
अथ शुश्राव सा शब्दं बालस्यार्त्तस्य शैलजा ।
सरस्युदकसंपूर्णे समीपे स्वा[३२]श्रमस्य ह ॥३१॥
स कृत्वा बालरूपं तु देवदेवः स्वयं शिवः ।
क्रीडाहेतोः सरोमध्ये ग्राहग्रस्तोभवत्तदा ॥३२॥

---

२४ मुक्तो- घ. । २५ भूतेषु -घ. । २६ चैव-क., चम-घ. । २७ मा... -घ. । २८ तदा-घ. । २९ ...तीश्वरः घ. । ३० सा बभौ – क. घ. । ३१ . तः-क । ३२ चा- क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

योगमायामथास्थाय प्रपञ्चोद्भवकारणः ।
तद्रूपं सरसो मध्ये कृत्वेदं[३३] समभाषत ।।३३।।
त्रातु मां कश्चिदेत्येह ग्राहेण हृतचेतसम् ।
धिक्कष्टं बाल एवाहमप्राप्तोथ मनोरथम्[३४] ।।३४।।
यास्यामि निधनं वक्त्रे ग्राहस्यास्य दुरात्मनः ।
शोचामि न स्वकं देहं ग्राहग्रस्तोपि दुःखितः ।।३५।।
यथा शोचामि पितरं मातरञ्च तपस्विनीम्[३५] ।
मां श्रुत्वा ग्राहवदने प्राप्तं निधनमुत्सुकौ ।।३६।।
प्रियपुत्रावेकपुत्रौ प्राणान्नूनं विहास्यतः ।
अहो वत महत्[३६] कष्टं योहं बालोकृतव्रतः ।
अतप्त्वा तप एवायं यास्यामि निधनं हतः ।।३७।।

सनत्कुमार उवाच

श्रुत्वा तु देवी तन्नादं विप्रस्यार्त्तस्य शोभना ।
उत्थाय प्रद्रुता तत्र यत्र तिष्ठत्यसौ द्विजः ।।३८।।
सापश्यदिन्दुवदना बालकञ्चारुरूपिणम् ।
ग्राहेण ग्रस्यमानं तं वेपमानमवस्थितम् ।।३९।।
सोपि ग्राहवरः श्रीमान् दृष्ट्वा देवीमुपागताम् ।
तं गृहीत्वा द्रुतं यातो[३७] मध्यं सरस एव हि[३८] ।।४०।।
स कृष्यमाणस्तेजस्वी नादमार्त्तन्तदा[३९]करोत् ।
अथाह देवी दुःखार्त्ता बालं दृष्ट्वा महाव्रता ।।४१।।
ग्राहराज महासत्व[४०] बालकं ह्येकपुत्रकम् ।
विसृजैनं महादंष्ट्र क्षिप्रं भीमपराक्रम ।।४२।।

ग्राह उवाच

यो देवि दिवसे षष्ठे प्रथमं समुपैति माम् ।
स आहारो मम पुरा विहितो लोककर्तृभिः ।।४३।।

---

३३ कृत्वैव (वं) - घ. । ३४ मप्राप्तात्म... - घ., मप्राप्याथ ? । ३५ ...नौ - क. । ३६ श्र ज्वाली. - घ.।
३७ स्रोतो - क. । ३८ ह - फ. । ३९ मथा - घ. । ४० ...त्मश्च - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सोयं मम महाभागे षष्ठेहनि गिरीन्द्रजे ।
ब्रह्मणा प्रहितो[४१] नूनं नैनं मोक्ष्ये[४२] कथञ्चन ॥४४॥

देव्युवाच

यन्मया हिमवच्छृङ्गे चरितं तप उत्तमम् ।
तेन बाल[४३]मिमं मुञ्च ग्राहराज नमोस्तु ते ॥४५॥

ग्राह उवाच

मा व्ययं तपसो देवि कार्षीः शैलेन्द्रनन्दने[४४] ।
नैनं मोचयितुं शक्तो देवराजोपि यः[४५] स्वयम् ॥४६॥
महासीशेन तुष्टेन शर्वेणोग्रेण शूलिना ।
अमरत्वमवध्यत्वमक्षयं बलमेव च ॥४७॥
स्वयं ग्रहणमोक्षश्च ज्ञानञ्चैवाव्ययं पुनः ।
दत्तं ततो ब्रवीमि त्वां[४६] नायं मोक्षमवाप्स्यति ॥४८॥
अथवा ते कृपा देवि भृशं बाले शुभानने[४७] ।
ब्रवीमि यत् कुरु तथा ततो मोक्षमवाप्स्यति ॥४९

देव्युवाच

ग्राहाधिप वदस्वाशु[४८] यत् सतामविगर्हितम् ।
तत् कृतं नात्र सन्देहो मान्या मे ब्राह्मणा[४९] दृढम् ॥५०॥

ग्राह उवाच

यत् कृतं वै तपः किञ्चिद्भवत्या स्वल्पमन्तशः[५०] ।
तत् सर्वं मे प्रयच्छस्व ततो मोक्षमवाप्स्यति ॥५१॥

देव्युवाच

जन्मप्रभृति यत् पुण्यं महाग्राह कृतं मया[५१] ।
तत्तो सर्वं मया दत्तं बालं मुञ्च ममाग्रतः ॥५२॥

---

४१ विहितो - क. घ. । ४२ न मोक्ष्येहं - घ., ... क्षे - क. । ४३ सत्त्व - घ. ।
४४ चिकीर्षोर्व्यर्थमेव हि - घ. । ४५ स - क. । ४६ त्वा - क. । ४७ हता... - घ. । ४८ वदाम्या... - घ. ।
४९ मनो मे ब्राह्मणे - घ. । ५० ...ल्पमनन्तशः - घ. । ५१ मया कृतम् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

प्रजज्वाल ततो ग्राहस्तपसा तेन बृंहितः ।
आदित्य इव मध्याह्ने दुर्निरीक्ष्यस्तदाभवत् ।।५३।।
उवाच चेदं हृष्टात्मा देवीं लोकस्य धारिणीम् ।
देवि किं कृतमेतत्ते अनिश्चित्य[५२] महाव्रते ।।५४।।
तपसो ह्यर्जनं दुःखं तस्य त्यागो न शस्यते ।
गृहाण तप एतच्च[५३] बालं चेमं शुचिस्मिते[५४] ।।५५।।
तुष्टोस्मि ते विप्रभक्त्या वरं तस्माद्ददामि ते[५५] ।
सा त्वेवमुक्ता ग्राहेण उवाचेदं महाव्रता ।।५६।।
सुविचिन्त्य[५६] महाग्राह कृतं बालस्य मोक्षणम् ।
न विप्रेभ्यस्तपः श्रेष्ठं श्रेष्ठा मे ब्राह्मणा मताः ।।५७।।
दत्त्वा चाहं[५७] न गृह्णामि ग्राहेन्द्र विदितं हि ते ।
न हि कश्चिन्नरो ग्राह प्रदत्तं पुनराहरेत् ।।५८।।
दत्तमेतन्मया तुभ्यं नाददामि[५८] हि तत्पुनः ।
त्वय्येव रमतामेतद्[५९] बालश्चायं विमुच्यताम् ।।५९।।
तथोक्तस्तां प्रशस्याथ[६०] मुक्त्वा[६१] बालं नमस्य च ।
देवीमादित्यसङ्काशं[६२] तत्रैवान्तरधीयत ।।६०।।
बालोपि सरसस्तीरे मुक्तो ग्राहेण वै तदा ।
स्वप्नलब्ध इवार्थो यस्तत्रैवान्तरधीयत ।।६१।।
तपसोथ व्ययं मत्वा देवी हिमगिरीन्द्रजा ।
भूय एव तपः कर्तुमारेभे यत्नमास्थिता ।।६२।।
कर्तुकामां तपो भूयो ज्ञात्वा तां शंकरः स्वयम् ।
प्रोवाच वचनं व्यास[६३] मा कृथास्तप इत्युत[६४] ।।६३।।

---

५२ अनिवाह्य - घ., ...न्त्य - क. । ५३ एवैनं - घ. । ५४ ...वृते घ. । ५५ विप्रभक्त्या वरं तस्माद् ददामि सुव्रते तव - घ. । ५६ सुनिश्चित्य - । ५७ हं नहि - घ. । ५८ ...नि - क., ..मीह - घ. । ५९ त्वय्येव वरमाहात्म्यं - घ. । ६० प्रसन्नो - घ. । ६१ त्यक्त्वा - घ. । ६२ ...वज्वालं - घ. । ६३ भूयो - घ. । ६४ इत्युमे - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मह्यमेतत्तपो[६५] देवि त्वया[६६] दत्तं महाव्रते ।
तेनैतदक्षयं[६७] तुभ्यं भविष्यति सहस्रधा ।।६४।।
इति लब्ध्वा वरं देवी तपसोक्षय्यमुत्तमम् ।
स्वयंवरमुदीक्षन्ती तस्थौ प्रीतियुता सती[६८] ।।६५।।
इदं पठेद्यो हि नरः सदैव बालानुभावाचरणं[६९] हि शम्भोः ।
स देहभेदं समवाप्य पूतो भवेद् गणस्तस्य कुमारतुल्यः ।।६६।।

⊙ इति स्कन्दपुराणे द्वादशोध्यायः ⊙

सनत्कुमार उवाच

विस्तृते हिमवत्पृष्ठे विमानशतसंकुले ।
अभवत् स तु कालेन शैलपुत्र्याः स्वयंवरः ।।१।।
अथ पर्वतराजोसौ हिमवान्[१] ध्यानकोविदः ।
दुहितुर्देवदेवेन ज्ञात्वा तदभिमन्त्रितम् ।।२।।
जानन्नपि महाशैलः समाचारक्रियेप्सया ।
स्वयंवरं ततो देव्याः सर्वलोकेष्वघोषयत् ।।३।।
देवदानवसिद्धानां सर्वलोकनिवासिनाम् ।
वृणुयात् परमेशानं समक्षं येन मे सुता ।।४।।
तदेव[२] सुकृतं श्लाघ्यं ममाभ्युदयसम्मतम् ।
इति संचिन्त्य शैलेन्द्रः कृत्वा हृदि महेश्वरम् ।।५।।
आब्रह्मकेषु[३] लोकेषु देव्याः शैलेन्द्रसत्तमः ।
कृत्वा रत्नाकुलं[४] देशं स्वयंवरमचीकरत्[५] ।।६।।

---

६५ त्वया - घ. । ६६ तपो - घ. । ६७... वमक्षयं - क., वद - घ. । ६८ प्रीतिमुदा युता - घ. । ६९ वै चव र च - घ. ।
१ भग... - घ. । २ ...वं - घ. । ३ अपेक्ष्य लोकान् - घ. । ४ कृत्वा वतरस्वयं - घ. । ५ ...मथाकरोत् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथैवमाघोषितमात्र एव स्वयंवरे व्यास महीध्रपुत्र्याः ।
देवादयः सर्वजगन्निवासाः समाययुर्दिव्यगृहीतवेषाः[६] ॥७॥
प्रफुल्लपद्मासनसन्निविष्टः सिद्धैर्वृतो योगिभिरप्रमेयैः[७] ।
विज्ञापितस्तेन महीध्रराजा[८] पितामहस्तत्र समाजगाम ॥८॥
अक्ष्णां सहस्रं सुरराट् स बिभ्रद् दिव्या[९]ङ्गहारस्रगुदात्तरूपः ।
ऐरावतं सर्वगजेन्द्रमुख्यं स्रवन्मदासारकृतप्रवाहम् ॥९॥
आरुह्य सर्वामरराट् स वज्रं बिभ्रत्समागात् पुरतः सुराणाम् ।
तेजः प्रतापा[१०]धिकदिव्यरूपः[११] प्रोद्भासयन् सर्वदिशो विवस्वान् ॥१०॥
हैमं विमानं स चलत्पताक[१२]मारुह्य[१३] आगात् त्वरितं जवेन ।
मणिप्रदीप्तोज्ज्वलकुण्डलश्च वह्न्यर्कतेजःप्रतिमे विमाने ॥११॥
समभ्यगात् कश्यपविप्रसूनुरादित्य आराद्[१४] भगनामधारी ।
पीनाङ्गयष्टिः सुकृताङ्गहारस्तेजोबलाज्ञासदृशप्रभावः ॥१२॥
दण्डं समादाय कृतान्त आगादारुह्य भीमं महिषं जवेन ।
महामहीध्रोच्छ्रय[१५]पीनगात्रः स्वर्णादिरत्ना[१६] चितचारुवेषः[१७] ॥१३॥
समीरणः सर्वजगद्विभर्त्ता विमानमारुह्य समभ्यगाद्धि ।
सन्तापयन्सर्वसुरासुरेशाँस्तेजोधिक[१८]स्तेजसि सन्निविश्य[१९] ॥१४॥
वह्निः समभ्येत्य सुरेन्द्रमध्ये ज्वलन् प्रतस्थौ वरवेषधारी ।
नानामणिप्रज्वलिताङ्गयष्टिर्जगच्चरन्दिव्यविमानमग्र्यम् ॥१५॥
आरुह्य सर्वद्रविणाधिपेशः स राजराजस्त्वरितोभ्यगाच्च ।
आप्याययन् सर्वसुरासुरेशान् कान्त्या च वेषेण[२०] च चारुरूपः ॥१६॥
ज्वलन्महारत्नविचित्ररूपं[२१] विमानमारुह्य शशी समागात् ।
श्यामाङ्गयष्टिः सुविचित्रवेषः सर्व[२२]स्रगाबद्धसुगन्धिमालः[२३] ॥१७॥

६... शाः - ख. घ. । ७...यः - घ. । ८ ...ज्ञा - क. ख. घ. । ९ ...न्द्रि... - क, ...रः - क., ...रं - घ. । १० प्रभावा - घ. । ११...पं - घ. । १२ सपताकदण्ड - ख. । १३ आरूढ - घ. । १४ ...आगाद् - क. ख. । १५...ध्राश्र...- घ. । १६...त्नो...- घ. । १७...शः - ख. । १८...प - घ. । १९...वेश्य - घ., ...वेशः - ख. । २० ...थ रूपेण - घ. । २१... (त्रि) ...तांगं - ख । २२ ...शीतः - घ । २३...सुगन्धिमाल्यः - घ., सुगन्धमाली - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तार्क्ष्यं समारुह्य महीध्रकल्पं गदाधरोसौ त्वरितं समेतः ।
तथाश्विनौ देवभिषग्वरौ तौ[२४] एकं[२५] विमानं त्वरयाभिरुह्य ॥१८॥
मनोहरावुज्ज्वलचारुवेषावाजग्मतुर्देवसदः[२६] सुवीरौ ।
शेषः सहस्रं स्फुरदग्निवर्णं बिभ्रत् फटानां ज्वलनार्कतेजाः ॥१९॥
सार्धं स नागैरपरैर्महात्मा विमानमारुह्य समभ्यगाच्च ।
दितेः सुतानां च महासुराणां वह्न्यर्कशक्रानिल[२७]तुल्यभासाम् ॥२०॥
वरानुरूपं प्रविधाय वेषं[२८] वृन्दं समागात् पुरतः सुराणाम् ।
गन्धर्वराजः स च चारुरूपी दिव्याङ्गनो दिव्यविमानचारी ॥२१॥
गन्धर्वसंघैः सहितोप्सरोभिः शक्राज्ञया तत्र समाजगाम ।
अन्ये च देवास्त्रिदिवौकसेशाः पृथक् पृथक् चारुगृहीतवेषाः ॥२२॥
आजग्मुरारुह्य विमानपृष्ठं गन्धर्वयक्षोरगकिन्नराश्च[२९] ।
शचीपतिस्तत्र सुरेन्द्रसंघे[३०] राजाधिकाराधिकलक्ष्यमूर्त्तिः ॥२३॥
राज्ञां बलैश्वर्यकृतप्रमोहो वृथाधिकं यत्नमुपाचकार[३१] ।
हेतुस्त्रिलोकस्य जगत्प्रसूति[३२]र्माता च तेषां ससुरासुराणाम् ॥२४॥
पत्नी च शंभोः पुरुषस्य धाम्नो[३३] गीता पुराणैः[३४] प्रकृतिः परार्था ।
दक्षस्य कोपाद् हिमवद्गृहं सा कार्यार्थमागात् परमेशपत्नी ॥२५॥
एवं यत[३५]स्तान्न विदुः सुरेशा मोहस्ततस्तान्पर आविवेश ।
वरार्थमाजग्मु[३६]रतो विमूढा ईशेन यस्माद् वृडिताः[३७] कृतास्ते ॥२६॥
ततः प्रनृत्ताभि[३८]रथाप्सरोभिर्गन्धर्वसंघैश्च सुगीतशब्दैः ।
स्थितैश्च नानाविधरूपवेषै[३९]र्देवासुरादित्रिदिवौकसंघैः[४०] ॥२७॥
विमानपृष्ठे मणिहेमचित्रे स्थिता चलच्चामरबीजिताङ्गी ।
सर्वर्तुपुष्पां[४१] सुसुगन्धमालां[४२] प्रगृह्य देवी[४३] प्रसभं प्रतस्थे[४४] ॥२८॥

---

२४ तु. - क. घ. । २५... वं - क. । २६... सभा - घ. । २७... शनि ... - घ. । २८ देहं - घ. ।
२९ ...क्षोरग ... - क. । ३०... मध्ये - ख. । ३१ चचार - ख. । ३२ ... ते - ख. । ३३ चाग्रचा - घ. ।
३४ ...णे - क. घ. । ३५ स्वत - ख. । ३६ ततः समाजग्मु - क. । ३७ कुपिताः - घ. । ३८ प्रवृ ... - क. ।
३९ गी(गी)तैश्च नाना विदग्धे (विध) शरागै - घ. । ४० त्रिदिवेश - घ. । ४१... ष्यं - घ. ।
४२ ...ल्यं - घ. । ४३ मा (बा?) ला - ख. । ४४ ... स्थौ - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

मालां प्रगृह्य देव्यान्तु स्थितायां देवसंसदि ।
शक्राद्यैरागतैर्देवैः स्वयंवर उपागतैः[४५] ॥२९॥
देव्या जिज्ञासया शम्भुर्भूत्वा पञ्चशिखः शिशुः ।
उत्सङ्गतलसंसुप्तो बभूव सहसा विभुः ॥३०॥
अकस्मादथ तं देवी शिशुं पञ्चशिखं स्थितम् ।
ज्ञात्वा योगसमाधानाज्जहृषे प्रीतिसंयुता ॥३१॥
अथ सा शुद्धसंकल्पा कांक्षितप्राप्तसत्फला ।
निर्वृतेव तदा तस्थौ कृत्वा हृदि तमेव तु ॥३२॥
ततो दृष्ट्वा शिशुं देवा देव्या उत्सङ्गवर्त्तिनम् ।
कोयमत्रेति संमन्त्र्य चुक्रुधु[४६]र्भृशमर्दिताः ॥३३॥
वज्रमाका[४७]रयत्तस्य बाहुमुत्क्षिप्य वृत्रहा ।
स बाहुरुत्थित[४८]स्तस्य तथैव समतिष्ठन ॥३४॥
स्तम्भितः शिशुरूपेण देवदेवेन शम्भुना ।
वज्रं क्षेप्तुं नो[४९] शशाक बाहुञ्चालयितुं न च ॥३५॥
भगो नाम ततो देव आदित्यः काश्यपो बली ।
उत्क्षिप्य मुशलं दीप्तं क्षेप्तुमैच्छद्विमोहितः ॥३६॥
तस्यापि भगवान् बाहुं तथैवास्तम्भयत्तदा ।
शिरः प्रकम्पयन् विष्णुः सकोपस्तमवैक्षत ॥३७॥
तस्यापि शिरसो देवः खालित्यं प्रचकार ह ।
पूषा दन्तान्दशन्दन्तैः शर्वमैक्षत मोहितः ॥३८॥
तस्यापि दशनाः पेतुर्दृष्टमात्रस्य शम्भुना ।
यमस्य स्तम्भितो दण्डस्तेजो वह्नेः शशेः[५०] प्रभा ॥३९॥

---

४५ मु... - घ. । ४६ चुक्षुभु - घ. । ४७ धा... - घ. । ४८ रुन्न... - घ. । ४९ न - क. घ. ।
५० शशिन इति वक्तव्ये शशेरिति छन्दोभङ्गभयकृतप्रयोग आर्षत्वेन कथंचित्समाधेयः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

बलं वायोस्तथान्येषां तस्मिन्सर्वदिवौकसाम् ।
बलन्तेजश्च योगश्च तथैवास्तम्भयद्विभुः ।।४०।।
अथ तेषु स्थितेष्वेवं मन्युमत्सु सुरेषु तु ।
ब्रह्मा परमसंविग्नो ध्यानमास्थाय सादरम् ।।४१।।
बुबुधे देवदेवेशमुमोत्सङ्गसमास्थितम् ।
स बुद्ध्वा[५१] परमेशानं शीघ्रमुत्थाय सादरम् ।।४२।।
ववन्दे चरणौ शम्भोरस्तुवच्च पितामहः।
पौराणैः[५२] सामसंगीतैः पुण्याख्यैर्गुह्यनामभिः ।।४३।।
अजस्त्वममरो देवः स्रष्टा हर्ता विभुः परः ।
प्रधान[५३]पुरुषस्तत्त्वं ब्रह्म ध्येयं तदक्षरम्[५४] ।।४४।।
अमृतं परमात्मा च ईश्वरः कारणं महत् ।
ब्रह्मकृत् प्रकृते : स्रष्टा सर्वसृक् परमेश्वरः ।।४५।।
न त्वं वै देवदेवेश शक्यो ज्ञातुं दिवौकसैः ।
मुनिभिर्वापि योगज्ञैर्ज्ञातुं देव न शक्यते ।।४६।।
अप्रमेयो महादेव वर्तसे त्वं स्वलीलया ।
महासर्गे महाकल्पे त्वमेकस्तिष्ठसि प्रभो ।।४७।।
अहमेव न जानामि चेष्टां तव महेश्वर ।
कथं विदन्ति त्रिदशा गंभीरं गहनात्मकम् ।।४८
इयञ्च प्रकृतिर्देव [५५] सदा ते सृष्टिकारणम् ।
पत्नीरूपं समास्थाय जगत्कारणमागता ।।४९।।
नमस्तुभ्यं सदेशान देव्याश्चैव सदा नमः ।
प्रसादात्तव देवेश नियोगाच्च मया प्रजाः ।।५०।।
देवाद्यास्त इमे सृष्टा मूढास्त्वद्योगमोहिताः ।
कुरु प्रसादमेतेषां यथापूर्वं भवन्त्विमे ।।५१।।
तत एवं तदा ब्रह्मा विज्ञाप्य परमेश्वरम् ।
स्तम्भितान्सर्वदेवाँस्तानिदमाह महाद्युतिः ।।५२।।

---

५१ ज्ञात्वा - घ. । ५२ कीर्तनैः - क. । ५३ ...नं - क. । ५४...यम् - क. । ५५ ...वी - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मूढाः स्थ देवताः सर्वे[५६] नैनं बुद्ध्यथ[५७] शंकरम् ।
देवदेवमिहायातं ममैवोत्पत्तिकारणम् ॥५२॥
अयं रुद्रो महादेवः शर्वो भीमः कपर्द्दवान्[५८] ।
उग्र ईशान आत्मा च अजः शंकर एव च ॥५३॥
देवदेवः परं धाम ईशः पशुपतिः पतिः ।
जगत्स्रष्टा जगद्धर्ता जगत्संस्थितिकारणम्[५९] ॥५४॥
गच्छध्वं शरणं शीघ्रमेत[६०]मेवामरेश्वराः ।
सार्धं मयैव देवेशं परमात्मान[६१]मव्ययम् ॥५५॥
ब्रह्मणो वचनं श्रुत्वा देवो नारायणः प्रभुः ।
प्रहस्य विबुधान् सर्वान् बोधयामास लोकपाः ॥५६॥
एवमेव न सन्देहो यथाह पद्मसंभवः ।
पूर्वसर्गे नु विबुधा मया सार्धं महेश्वरः ॥५७॥
बहुरूपेण रूपेण जगद् व्याप्य व्यवस्थितः ।
तस्मात् सर्वात्मना भूत्वा गच्छध्वं शरणं हरम् ॥५८॥
ततस्ते स्तम्भिताः सर्वे तथैव त्रिदिवौकसः ।
प्रणेमुर्मनसा शर्वं भावशुद्धेन चेतसा ॥५९॥
अथ तेषां प्रसन्नोभूद् देवदेवो महेश्वरः ।
यथापूर्वं चकाराशु देवतानां तनूस्तदा[६२] ॥६०॥
तत एवं प्रवृत्ते तु सर्वदेवनिवारणे[६३] ।
वपुश्चकार देवेशस्त्र्यक्षं परममद्भुतम् ॥६१॥
तेजसा यस्य[६४] देवास्ते चक्षुरभ्यर्थयन्[६५] विभुम् ।
तेभ्यः परमकं चक्षुः स्ववपुर्दृष्टिशक्तिमत्[६६] ॥६२॥
प्रादात् परमदेवेशः अपश्यँस्ते तदा प्रभुम् ।
ते दृष्ट्वा परमेशानं तृतीयेक्षणधारिणम् ॥६३॥

---

५६ सर्वाः - घ. । ५७ ...त - क. घ. । ५८... र्द्दिमान् - क. । ५९ ... णः - क. । ६० ... व - क., त - घ. । ६१ ...नन्द - घ. । ६२...था - घ. । ६३ ...णम् - घ. । ६४ त...- घ. । ६५ रप्रा... - क. घ. । ६६ ...मान् - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ब्रह्माद्या नेमिरे तूर्ण्णं सर्व एव सुरेश्वराः ।
तस्य देवी तदा हृष्टा समक्षं त्रिदिवौकसाम् ॥६४॥
पादयोः स्थापयामास स्रग्मालाममितद्युतेः ।
साधु साध्विति संप्रोच्य[६७] देवतास्ते पुनर्विभुम् ॥६५॥
सह देव्या[६८] नमश्चक्रुः शिरोभिर्भूतलाश्रितैः ।
अथास्मिन्नन्तरे व्यास ब्रह्मा लोकपितामहः ॥६६॥
हिमवन्तं महाशैलमिदमाह महाद्युतिः ।
श्लाघ्यः पूज्यश्च वन्द्यश्च सर्वेषां नस्त्वमेव हि ॥६७॥
शर्वेण सह संबन्धो यस्य तेभूदयं महान् ।
क्रियताञ्चाशु उद्वाहः किमर्थं स्थीयते[६९] परम् ॥६८॥
ततः प्रणम्य हिमवान् तं देवं प्रत्यभाषत ।
त्वमेव कारणं देव येन शर्वोदयन्मम[७०] ॥६९॥
प्रसादः सहसोत्पन्नो हेतुश्चापि त्वमेव हि ।
उद्वाहन्तु यथायोग्यं[७१] तद्विधत्स्व पितामह ॥७०॥
तत एवं वचः श्रुत्वा गिरिराजः[७२] पितामहः ।
उद्वाहः क्रियतां देव[७३] इति देवमुवाच ह ॥७१॥
तमाह शङ्करो देवं यथेष्टमिति लोकपम् ।
तत्क्षणाच्च ततो व्यास ब्रह्मणा कल्पितं पुरम्[७४] ॥७२॥
उद्वाहार्थं महेशस्य नानारत्नोपशोभितम् ।
रत्नानि मणयश्चित्रा हेम मौक्तिकमेव च ॥७३॥
मूर्त्तिमन्त उपागम्य[७५] अलञ्चक्रुः पुरोत्तमम् ।
चित्रा मारकती भूमिः सौवर्णस्तम्भशोभिता ॥७४॥
भामयस्फाटिकाभित्ति[७६]र्मुक्ताहारप्रलम्बिता ।
तस्मिन् शिवपुरे[७७] रम्ये उद्वाहार्थं विनिर्मिते ॥७५॥

---

६७ संपूज्य - घ. । ६८ ...वा - घ. । ६९ स्थितये - क. । ७० ... यं - ग. क. घ. । ७१ विवाहं तव जामातृक् (तुः?) - घ. । ७२ ... ज्ञः - क. । ७३ क्रियतां देव उद्वाह - घ. । ७४ पुरा - घ. । ७५ मु... - क. घ. । ७६ भासस्फटिकभित्तीभि - क. । ७७ रति... - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शुशुभे देवदेवस्य महेशस्य महात्मनः ।
सोमादित्यौ[७८] समं तत्रा[७९] भासयेतां [८०] महामहीम् ॥७६॥
सौरभेयं मनोरम्यं गन्धमादाय[८१] मारुतः ।
प्रववौ सुखसंस्पर्श ईशे भक्तिं प्रदर्शयन्[८२] ॥७७॥
समुद्रास्तत्र चत्वारः शक्राद्याश्च सुरोत्तमाः ।
देवनद्यो महानद्यः सिद्धा मुनय एव च ॥७८॥
गन्धर्वाप्सरसः सर्वे नागा यक्षाः सराक्षसाः ।
गुह्यकाः खेचराश्चान्ये किन्नरा देवचारणाः [८३] ॥७९॥
तुम्बुरुर्नारदो हाहा हूहूश्चैव तु सामगाः[८४] ।
रत्नान्यादाय वाद्याँश्च तत्राजग्मुर्मुदा युताः[८५] ॥८०॥
ऋषयः कृत्स्नशस्तत्र वेदगीतान् तपोधनाः[८६] ।
पुण्यान् वैवाहिकान् मन्त्रान् जेपुः संहृष्टमानसाः ॥८१॥
जगतो[८७] मातरः सर्वा देवकन्याश्च कृत्स्नशः[८८] ।
गायन्ति हृषिताः सर्वा [८९] उद्वाहे परमेष्ठिनः ॥८२॥
ऋतवः षट् समं तत्र नानागन्ध[९०]सुखावहाः ।
उद्वाहः शङ्करस्येति मूर्त्तिमन्त उपस्थिताः ॥८३॥
नीलजीमूतसंघातमन्द्रध्वानप्रहर्षितैः ।
केकायमानैः शिखिभिर्नृत्यमानैश्च सर्वशः ॥८४॥
विलोलपिङ्गलस्पष्टविद्युल्लेखावभासिता ।
कुमुदापीतशुक्लाभिर्वलाकाभिश्च शोभिता ॥८५॥
प्रत्यग्रसंजातशिलीन्ध्रकन्दला लताद्रुमाभ्युद्गतचारुपल्लवा ।
शुभाम्बु[९१]धाराप्रणयप्रबोधितै[९२]र्मदालसैर्भेकगणैश्च नादिता ॥८६॥

---

७८ ... त्यैः - क. । ७९ तत्र - क. घ. । ८० ...यन्तो - क., ...यन्तौ - घ. । ८१ ... माघ्राय - क. घ. ।
८२ प्रसाद... - क. । ८३ चारिणः - घ., वारणाः - क. । ८४ समागताः - घ. । ८५ स्तदा पुरं - क. ।
८६ स्तपो ... - घ. । ८७ संगता - घ. । ८८ सर्वशः - घ. । ८९ ...र्वे - घ. । ९० ...धाः - घ. ।
९१ सुधा ... - घ. । ९२ प्रलयप्रबोधितैः ... - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रियेषु मानोन्नतमानसानां सुनिश्चितानामपि कामिनीनाम् ।
मयूरकेकाभिहतैः क्षणेन मनोहरैर्मानविभङ्गकर्त्री ॥८७॥
तथा त्रिवर्णोज्ज्वलचारुमूर्तिना शशाङ्कलेखाकुटिलेन सर्वतः ।
पयोदसंघातसमीपवर्त्तिना महेन्द्रचापेन भृशं विराजिता ॥८८॥
विचित्रपुष्पस्पर्शात् सुगन्धिभि[९३] र्घनाम्बुसंपृक्ततया[९४] सुशीतलैः ।
विकम्पयन्ती[९५] पवनैर्मनोहरैः सुरा[९६]ङ्गनानामलकावलीः शुभाः ॥८९॥
गर्जत्पयोदस्थगितेन्दुबिम्बा नवाम्बुसेकोद्गतचारुदूर्वा[९७] ।
निरीक्षिता सादरमुत्सुकाभिर्निःश्वासधूम्रं[९८] पथिकाङ्गनाभिः ॥९०॥

हंसनूपुरशब्दाढ्या समुन्नतपयोधरा ।
चलद्विद्युल्लताकाञ्ची[९९] स्पष्टपद्मविलोचना ॥९१॥

असितजलदवृन्दध्वानवित्रस्तहंसा
विमलसलिलधारापाततास्रोत्पलाग्रा ।
सुरभिकुसुमरेणुक्लृप्तसर्वाङ्गशोभा
गिरिदुहितृ[१००]विवाहे प्रावृडागाद्विभूत्यै ॥९२॥

मेघकञ्चुकनिर्मुक्ता पद्मकोशोद्गतस्तनी ।
हंसनूपुरनिर्ह्लादा[१०१] सर्वरम्यदिगन्तरा ॥९३॥
विस्तीर्णपुलिनश्रोणी कूजत्सारसमेखला ।
प्रफुल्ले[१०२]न्दीवराभोगविलोचनमनोहरा ॥९४॥
पक्वबिम्बाधरपुटा कुन्ददन्तप्रहासिनी ।
नवश्यामालताश्यामरोमराजि[१०३]परिष्कृता ॥९५॥
चन्द्रांशुहारवर्येण सौधोरःस्थलसर्पिणा ।
प्रह्लादयन्ती चेतांसि सर्वेषां त्रिदिवौकसाम् ॥९६॥
प्रमदालिकुलो[१०४]द्गीतमधुरस्वन[१०५]भाषिणी ।
चलत्कुमुदसंघातचारुकुण्डलशोभिनी[१०६] ॥९७॥

---

९३ च्छुगन्धि ... - क. । ९४ सपर्क ... - क., भयात् ... - घ. । ९५ विकल्प ...- घ. । ९६ पुरा - घ. । ९७ प... - घ । ९८ ...म्रा - घ. । ९९ वि(जि?)ह्वा - घ । १०० ... तु - क. । १०१ ...द - क. । १०२ पुष्करे - घ. । १०३ ... जी - क. घ । १०४ समदासीगणो ... - घ. । १०५ ... र - घ, । १०६ ... ता - घ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

रक्ताशोकाग्रशाखोत्थपल्लवाङ्गुलिधारिणी ।
तत्पुष्पसंचयमयैर्वासोभिः समलंकृता ॥९८॥
रक्तोत्पलाग्रचरणा जातीपुष्पनखावली ।
कदलीस्तम्भचारूरुः शशाङ्कवदना शुभा[१०७] ॥९९॥
पद्मकिञ्जल्कसंपृक्त[१०८]पवनप्रकरैः[१०९] सुरान्[११०] ।
प्रेम्णा स्पृशन्ती कान्तेव शरदागान्मनोरमा ॥१००॥
निर्मुक्ता[१११] सितमेघकञ्चुकपुटा पूर्णेन्दुबिम्बानना
नीलाम्भोजविलोचनाब्मुकुल[११२]प्रोद्भिन्नचारुस्तनी ।
नानापुष्परजःसुगन्धिपवना[११३] प्रह्लादनी चेतसाम्
तत्रागात्[११४] कलहंसनूपुररवा देव्या विवाहे शरत्[११५] ॥१०१॥
अत्यर्थशीतलांभोभिः प्लावयन्तौ गिरेः शिलाः ।
ऋतू हेमन्तशिशिरा[११६]वाजग्मतु रभिद्युती[११७] ॥१०२॥
ताभ्यामृतुभ्यां प्राप्ताभ्यां हिमवान् स नगोत्तमः ।
प्रालेयचूर्णवर्षिभ्यां क्षिप्रं रौप्य इवाबभौ ॥१०३॥
तेन प्रालेयवर्षेण घनेन स हिमाचलः ।
शोभनेन[११८] तदा रेजे क्षीरोद इव सागरः ॥१०४॥
हिमस्थानेषु हेमन्तो[११९] नाशयामास पादपान् ।
साधूपचारान् सहसाकृतार्थ इव दुर्जनः ॥१०५॥
प्रालेयपटलच्छन्नैः शृङ्गैः स[१२०] शुशुभे नगः ।
छत्रैरिव महाभोगैः पाण्डरैः पृथिवीपतिः ॥१०६॥
पाण्डराणि विशालानि श्रीमन्ति सुभगानि च ।
अद्रिशृङ्गाणि तुङ्गानि[१२१] सौधानीव चकाशिरे ॥१०७॥
तस्याचलेन्द्रस्य दरीष्वतीव विचित्रसारङ्ग[१२२]कुलाकुलासु ।
प्रालेयधाराः शशिपादगौरा गोक्षीरधारा इव सन्निपेतुः ॥१०८॥

---

१०७ तथा - क. । १०८ संयुक्ता - घ. । १०९ पद्मव्यग्रकरा - घ. । ११० शुभा - घ. । १११ ..निमुक्तोज्झित - घ. । ११२ कुमुद - घ. । ११३ ... न - क. घ. । ११४ तद्योगात् - घ. । ११५ स्वयम् - घ. । ११६ शिशिरहेमन्ता - क. घ. । ११७ रति... - क घ. । ११८ अगाधने (धेन?) - घ. । ११९ हिमवान् - ग. क. घ. । १२० सं - घ. । १२१ तुङ्गानि चाद्रिशृंगाणि - घ. । १२२ शार्दूल - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

बहुकुसुमरजोभिरुत्कराङ्गा[१२३] हिमकणसङ्गसु[१२४]शीतलाः समीराः ।
ववुरमरगणेश्वराम्बराणि प्रतनुतमानि शनैर्विकम्पयन्तः ॥१०९॥
विधूतरू[१२५]क्षानीलवीतदोषः[१२६] प्रोद्भिन्नचूताङ्कुरकर्णपूरः ।
वसन्तकालश्च तमद्रिपुत्रीसेवार्थमागाद्धिमवन्तमाशु[१२७] ॥११०॥
तस्मिन्नृतावद्रिसुताविवाहसिषेवया तं गिरिमभ्युपेते ।
प्रादुर्बभूवुः कुसुमावतंसाः समन्ततः पादपगुल्मषण्डाः ॥१११॥
ववुः सुगन्धाः सुभगाः सुशीता विचित्रपुष्पाग्र[१२८] रजोत्कराङ्गाः ।
मनोभवोद्रेककराः[१२९] सुराणां सुरङ्गनानाञ्च मुहुः समीराः ॥११२॥
स्वच्छाम्बुपूर्णाश्च तथा नलिन्यः पद्मोत्पलानां कुसुमैरुपेताः[१३०] ।
ईषत्समुद्भिन्नपयोधराग्रा नार्यो यथा रम्यतमा बभूवुः ॥११३॥
ऋतोः स्वभावाच्च मदोद्भवाच्च फुल्लासु शाखासु निलीनपक्षाः ।
श्रोत्राभिरामं त्रिदशाङ्गनानां पुंस्कोकिलाश्चाविकलं[१३१] विनेदुः ॥११४॥
नात्युष्णशीतानि सरःपयांसि किञ्जल्कचूर्णैः कपिलीकृतानि[१३२] ।
चक्राह्वयुग्मैरुपनादितानि पपुः प्रहृष्टाः सुरदन्तिमुख्याः ॥११५॥

प्रियंगुसंवृतवरः वृतांश्चापि प्रियतरः ।(?)
तर्जयन्त इवान्योन्यं मञ्जरीभिश्चकाशिरे[१३३] ॥११६॥
हिमशुक्लेषु भृङ्गेषु तिलकाः कुसुमोत्कराः[१३४] ।
शुशु - -[१३५] कार्यमुद्दिश्य वृद्धा इव समागताः ॥११७॥
फुल्लाशोकलतास्तत्र रेजिरे शालसंश्रिताः[१३६] ।
कामिन्य इव कान्तानां कण्ठालम्बितमूर्त्तयः[१३७] ॥११८॥
समदालिकुलोद्गीतलताकुसुमसंचयाः ।
परस्परं हि मालत्यो भाषन्त्य इव रेजिरे ॥११९॥

---

१२३ रावृताङ्गा - घ. । १२४ ...म - घ. । १२५ वृ... - घ. । १२६ शीतदोषः - घ. । १२७...शुः - क. ।
१२८ पुष्पोग्र - घ. । १२९ न्मेष... - घ. । १३० स्वकुलै ... - घ. । १३१ ति :...- क. घ. ।
१३२ कलुषी ... - घ. । १३३ र्वंभापिरे - घ. । १३४ कुमुदोःत्करा: - क. । १३५ शिशुभिः - घ. ।
१३६ साल ... - क. । १३७ वाहवः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नीलानि नीलाम्बुरुहैः पयांसि गौराणि गौरैश्च मृणालदण्डैः ।
तथैव चित्राणि[१३८] भृशं कृतानि मत्तद्विरेफार्धविदष्टपत्रैः[१३९] ॥१२०॥
हैमानि विस्तीर्णजलेषु केषुचिन्निरन्तरं मारकतानि केषुचित् ।
वैदूर्यनालानि सरस्सु केषुचित् प्रजज्ञिरे पद्मवनानि सर्वतः ॥१२१॥

वाप्यस्तत्राभवन् रम्याः कमलोत्पलभूषिताः ।
नानाविहङ्गसंघुष्टा[१४०] हेमसोपानपंक्तयः ॥१२२॥
शृङ्गाणि तस्य तु गिरेः कर्णिकारैः सुपुष्पितैः ।
समुच्छ्रितान्यविरलैः[१४१] हैमानीव बभुर्मुने ॥१२३॥
ईषदुद्भिन्नकुसुमैः पाटलैः[१४२] श्चापि पाटला[१४३] ।
संबभूर्वुदिशः सर्वाः पवनाकम्पिसूर्त्तिभिः[१४४] ॥१२४॥
कृष्णाञ्जनाद्रिशृङ्गाभा नीलाशोकमहीरुहाः ।
गिरौ वबृधिरे फुल्लाः स्पर्धयेव[१४५] परस्परम् ॥१२५॥
चञ्चरीकविघुष्टानि[१४६] किंशुकानां वनानि च ।
पर्वतस्य नितम्बेषु सर्वेष्वेवाभिजज्ञिरे[१४७] ॥१२६॥
तमालगुल्मैस्तस्यासीच्छोभा हिमवतस्तदा ।
नीलजीमूतसंघातैर्निलीनैरिव सन्धिषु ॥१२७॥

निकामपुष्पैः[१४८] सुविशालशाखैः समुच्छ्रितैश्चम्पकपादपैश्च ।
प्रमत्तपुंस्कोकिलसंप्रलापैः[१४९] हिमाचलोतीव तदा रराज ॥१२८॥
श्रुत्वा शब्दा[१५०] नृतुमदकलान्[१५१] सर्वतः कोकिलानाम्
चञ्चत्पक्षाः सुमधुररुतं नीलकण्ठा विनेदुः ।
तेषां शब्दैरुपचितबलः पुष्पचापेषुहस्तः
सज्जीभूतस्त्रिदशवनिता वेद्धुमङ्गेष्वनङ्गः ॥१२९॥

पटुसूर्यातपश्चापि प्रायः सोष्णजलाशयः ।
देवीविवाहसेवार्थं[१५२] ग्रीष्म आगाद्धिमाचलम् ॥१३०॥

---

१३८ रक्तानि रक्तैश्च - घ. । १३९ विदह्यमालैः - घ. । १४०...मसंयुक्ता - घ.,...ष्ट...—क १४१ समुत्सृ...—घ । १४२...कुसुमाः पादपा...घ. । १४३ - धिपाटला - घ । १४४ मूर्त्तयः - घ. । १४५... या च - घ. । १४६ विपुष्टानि - घ. । १४७ तस्मिन्काले गिरीशस्य सर्वस्थानेथ ... - घ. । १४८ निमील ... - घ. । १४९ पुंस्कोकिलानां च तथा ... - घ. । १५० दं शब - क. घ । १५१ कलं - क. घ. । १५२ समये - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स चापि तरुभिस्तत्र बहुभिः कुसुमोत्करैः ।
शोभयामास शृङ्गाणि प्रालेयाद्रेः समन्ततः ॥१३१॥
तस्यापि च ऋतोस्तत्र वायवः सुमनोहराः ।
ववुः पाटलविस्तीर्णकदम्बार्जुनगन्धिनः ॥१३२॥
वाप्यः प्रफुल्लपद्मौघाः केसरारुणमूर्तयः ।
अभवन् तटसंघुष्टकलहंसकदम्बकाः ॥१३३॥
तथा कुरवकाश्चापि[153] कुसुमापाण्डुमूर्तयः ।
सर्वेषु जज्ञुः[154] शृङ्गेषु भ्रमरावलिसेविताः ॥१३४॥
वकुलाश्च नितम्बेषु विशालेषु महीभृतः ।
उत्ससर्जुर्मनोज्ञानि कुसुमानि समन्ततः ॥१३५॥
इति कुसुमविचित्रसर्ववेषा[155] विविधविहङ्गमनादरम्यदेशाः ।
हिमगिरितनयाविवाहभूत्यै षडुपययुर्ऋतवो मुनिप्रवीर ॥१३६॥
तत एवं[156] प्रवृत्ते तु सर्वभूतसमागमे ।
नानावाद्यसमाकीर्णे ब्रह्मा मम पिता स्वयम् ॥१३७॥
शैलपुत्रीमलंकृत्य योगा[157] भरणसंपदा ।
पुरं प्रवेशयामास ...य[158] मादाय लोकवित् ॥१३८॥
ततस्तु पुनरेवेशं[159] ब्रह्मा व्यज्ञापयद्विभुम् ।
हविर्जुहोमि वह्नौ तु उपाध्यायपदे स्थितः ॥१३९॥
ददासि मह्यं यद्याज्ञां कर्तव्योयं क्रियाविधिः ।
तमाह शङ्करो देवं देवदेवो जगत्पतिः ॥१४०॥
यत्त्वदिष्टं[160] सुरेशान तत्कुरुष्व यथेप्सितम्[161] ।
कर्तास्मि वचनं सर्वं ब्रह्मँस्तव जगद्विभोः[162] ॥१४१॥

---

१५३ ...न्ये- घ. । १५४ जज्ञे - क., नग... - घ. । १५५ ...वृक्षा - घ. । १५६ तत्रोत्सवे - घ. ।
१५७ योग्या(?) । १५८ श्रय(?) - घ. । १५९ देवेशं - क. । १६० यद्य ...- क. । १६१ यथोचि...- घ. ।
१६२ ...भो- घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ततः प्रणम्य हृष्टात्मा ब्रह्मा लोकपितामहः ।
हस्तं देवस्य देव्याश्च[१६३] योगबन्धे युयोज ह ॥१४२॥
ज्वलनश्च[१६४] स्वयं तत्र[१६५] कृताञ्जलिरुप[१६६]स्थितः[१६७] ।
श्रुतिगीतैर्महामन्त्रैर्मूर्तिमद्भिरुपस्थितैः ॥१४३॥
यथोक्तविधिना हुत्वा सर्पिस्तदमृतं च हि[१६८] ।
त्रिश्च[१६९] तं ज्वलनं देवं कारयित्वा प्रदक्षिणम् ॥१४४॥
मुक्त्वा[१७०] हस्तसमायोगं सहितः[१७१] सर्वदेवतैः[१७२] ।
सुतैश्च मानसैः सर्वैः[१७३] प्रहृष्टेनान्तरात्मना ॥१४५॥
वृत्तो उद्वाहकार्ये[१७४] तु प्रणनाम वृषध्वजम् ।
योगेनैव तयोर्व्यास तदोमापरमेशयोः ॥१४६॥
उद्वाहः स परो वृत्तो यं देवा न विदुः क्वचित् ।
इति ते सर्वमाख्यातं स्वयंवरमिदं शुभम् ।
उद्वाहश्चैव देवस्य शृण्वतः परमाद्भुतम् ॥१४७॥

⊙इति स्कन्दपुराणे उमापरिणयनं नाम त्रयोदशोध्यायः ⊙

सनत्कुमार उवाच

अथ वृत्ते विवाहे तु भवस्यामिततेजसः ।
प्रहर्षमतुलं गत्वा देवाः सह पितामहाः[१] ॥१॥
तुष्टुवुर्वाग्भिरिष्टाभिः प्रणमन्तो महेश्वरम् ।
नमः पर्वतलिङ्गाय पर्वतेशाय वै नमः ॥२॥
नमः पवनवेगाय विरूपायाजिताय च ।
नमः क्लेशविनाशाय दात्रे च शुभसम्पदाम् ॥३॥

---

१६३ वै देवदेवस्य - घ. । १६४ च्च - क. । १६५ कृत्वा - क. । १६६ मुप... - क. । १६७ ...तं - क. ।
१६८ हविः - घ. । १६९ त्रिषु - घ. । १७० स्तुत्वा - घ. । १७१ हसित: घ. । १७२ सर्वदैवतैः- घ. ।
१७३ सिद्धैः - घ. । १७४ ...ले - क. घ. ।
१ देवताः सपितामहाः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नमो नीलशिखण्डाय अम्बिकापतये नमः ।
नमः पवनरूपाय शतरूपाय वै नमः ।।४।।
नमो भैरवरूपाय विरूपनयनाय[२] च ।
नमः सहस्रनेत्राय सहस्रचरणाय च ।।५।।
नमो वेदरहस्याय वेदाङ्गाय[३] नमो नमः ।
विष्टम्भनाय[४] शक्रस्य[५] बाहो[६]र्वेदाङ्कुराय च ।।६।।
चराचराधिपतये शमनाय नमो नमः ।
सलिलेशयलिङ्गाय युगान्तायतलिङ्गिने[७] ।।७।।
नमः कपालमालाय कपालस्रग्विणे नमः ।
नमः कपालहस्ताय दंष्ट्रिणे गदिने[८] नमः ।।८।।
नमस्त्रैलोक्यनाथाय[९] सप्तलोकनताय[१०] च ।
नमः खट्वाङ्गहस्ताय प्रमथार्त्तिहराय च ।।९।।
नमो यज्ञशिरोहर्त्रे कृष्णकेशा[११]पहारिणे ।
भगनेत्रनिपाताय पूष्णो दन्तहराय च ।।१०।।
नमः पिनाकशूलासिखड्गमुद्गरधारिणे ।
नमोस्तु कालकालाय तृतीयनयनाय[१२] च ।।११।।
अन्तकान्तकृते चैव नमः पर्वतवासिने ।
सुवर्णरेतसे चैव शंखकुण्डलधारिणे ।।१२।।
वाड्वले(?)र्योगनाशाय योगिनां गुरवे नमः ।
शशाङ्कादित्यनेत्राय ललाटनयनाय च ।।१३।।
नमः श्मशानरतये श्मशानवरदाय च ।
नमो दैवतनाथाय त्र्यम्बकाय नमो नमः ।।१४।।

२...पाय हराय - घ. । ३ देवाज्ञा (देवज्ञा?) य - घ. । ४ विश्वम्भराय - घ. । ५ शक्राय - घ. । ६ राहो - घ. ।
७ युगान्तस्तोभ... - घ. । ८ ङ्ग... - (?) । ९ वाहाय - क. । १० रथाय - क. । ११...स्य केशः... - घ. ।
१२ नयनत्रितयाय (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अशनीशतहासाय ब्रह्मण्यायाजिताय च ।
गृहस्थसाधवे नित्यं जटिने ब्रह्मचारिणे ।।१५।।
नमो मुण्डार्धगण्डाय[१३] पशूनां पतये नमः ।
सलिले तप्यमानाय योगैश्वर्यप्रदाय च ।।१६।।
नमः शान्ताय दान्ताय प्रलयोत्पत्तिकारिणे ।
नमोनुग्रहकर्त्रे च स्थितिकर्त्रे नमो नमः ।।१७।।
नमो रुद्राय वसवे आदित्याया[१४]श्विने नमः ।
नमः पित्रेथ साध्याय[१५] विश्वेदेवाय वै नमः ।।१८।।
नमः शिवाय [१६] शर्वाय[१७] उग्राय वरदाय च ।
नमो भीमाय सेनान्ये पशूनां पतये नमः ।।१९।।
शुचये रेरिहाणाय सद्योजाताय वै नमः ।
महादेवाय चित्राय नमश्चित्ररथाय च ।।२०।।
प्रधानाया[१८]प्रमेयाय कार्याय करणाय च ।
पुरुषाय नमस्तेस्तु पुरुषेच्छाकराय च ।।२१।।
नमः पुरुषसंयोगप्रधानगुणधारिणे ।
प्रवर्तकाय प्रकृतेः पुरुषस्य च सर्वशः ।।२२।।
कृता[१९]कृतस्य संवेत्रे फलसंयोगदाय च ।
कालज्ञाय च सर्वत्र नमो नियमचारिणे[२०] ।।२३।।
नमो वैषम्यकर्त्रे च गुणानां वृत्तिदाय च ।
नमस्ते[२१] देवदेवेश नमस्ते भूतभावन ।
शिवः सौम्यः सुखो द्रष्टुं भव सोमो हि नः प्रभो ।।२४।।

सनत्कुमार उवाच

एवं स भगवान्देवो जगत्पतिरुमापतिः ।
स्तूयमानः सुरैः सर्वैरमरानिदमब्रवीत् ।।२५।।

---

१३ मुक्तार्धमुण्डाय - घ. । १४ य नमो नमः- घ. । १५ सवित्रे च सावित्राय - घ. । १६ सर्वाय - क. ।
१७ . . . . य - क. । १८ ...य - क. । १९ कृते - घ. । २० का...- घ. । २१ नमोस्तु - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

द्रष्टुं सुखश्च सौम्यश्च देवानामस्मि भो सुराः ।
परं ब्रूत यथेष्टं वो[२२] दातास्मि वदता[२३]नघाः ॥२६॥
ततस्ते प्रणताः सर्वे ऊचुः सब्रह्मकाः सुराः ।
तथैव भगवन्नस्तु[२४] वर एषोवतिष्ठताम् ॥२७॥
यदा कार्यं तदा नस्त्वं[२५] दास्यसे वरमीप्सितम् ।
एवमस्त्विति तानुक्त्वा विसृज्य च सुरान् हरः ।
लोकाँश्च प्रमथैः सार्धं विवेश भवनं ततः[२६] ॥२८॥
यस्तु हरोत्सवमद्भुतमेतं[२७] गायति दैवतविप्रसमक्षम् ।
सोप्रतिरूपगणेशसमानो देहविपर्ययमेत्य सुखी स्यात् ॥२९॥

सनत्कुमार उवाच

पाराशर्य स्तवं ह्रीमं[२८] श्रृणुयाद्यः पठेत वा ।
स स्वर्गलोकगो[२९] भूत्वा पूज्यतेमरराडिव[३०] ॥३०॥

⊙इति स्कन्दपुराणे उमाविवाहस्तवो नाम चतुर्दशोध्यायः ⊙

सनत्कुमार उवाच

प्रविष्टे भवनं देवे सूपविष्टे वरासने
सवह्निर्मन्मथः क्रूरो देवं वेद्धुमना[१]भवत् ॥१॥
तमनाचारसंयुक्तं दुरात्मानं कुलाधमम् ।
लोकान् सर्वान् तापयानं[२] सर्वेष्वकरुणात्मकम् ॥२॥
ऋषीणां विघ्नकर्तारं नियमानां व्रतैः सह[३] ।
चक्राह्वयस्य रूपेण रत्या सह समा[४]गतम् ॥३॥

---

२२ च - क. घ. । २३ वरदो - घ. । २४ तदैव भगवन् शभो - घ. । २५ श्च - घ. । २६ भगवास्ता - घ. । २७ तद् - क. । २८ ह्येतत् - घ., ह्येतं(?) । २९ सर्वलोकगो - घ. । ३० चामराधिपैः - घ. ।
१ सन्धिरार्षः । ह्यभूदिति वा पाठः कल्प्यः । २ तापमान - घ. । ३ तथैव च - घ. । ४ तया - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथाततायिनं व्यास वेद्धु कामं सुरेश्वरम् ।
नयनेन तृतीयेन सावज्ञं तमवैक्षत ॥४॥
ततोस्य नेत्रजो वह्निर्ज्वालामालासहस्रवान् ।
संवृत्य[५] रतिभर्तारमदहत् सपरिच्छदम् ॥५॥
स दह्यमानः करुणमार्त्तोक्रोशत विस्वरम् ।
प्रसादयँश्च तं देवं पपात स महीतले ॥६॥
आशु सोग्निपरीताङ्गो मन्मथो लोकतापनः[६] ।
पपात भस्मसाच्चैव क्षणेन समपद्यत ॥७॥
पत्नी तु करुणं तस्य विललाप सुदुःखिता ।
देवं देवीञ्च[७] रुदती[८] अयाचत् करुणायती ॥८॥
तस्यास्तत्[९] क्रन्दनं[१०] श्रुत्वा[११] देवौ तौ करुणात्मकौ ।
ऊचतुस्तां समालोक्य समाश्वास्य च[१२] दुःखिताम् ॥९॥
दग्ध एष ध्रुवं भद्रे[१३] नास्योत्प[१४]त्तिरिहेष्यते ।
अशरीरोपि ते काले कार्यं सर्वं[१५] करिष्यति ॥१०॥
यदा तु विष्णुर्भविता वसुदेवसुतः शुभे ।
तदा तस्य सुतो ह्येष[१६] पतिस्ते भविता रते[१७]॥११॥

सनत्कुमार उवाच

ततः सा तं वरं लब्ध्वा कामपत्नी शुभानना ।
जगामेष्टं[१८] तदा देशं प्रीतियुक्ता गतक्लमा[१९] ॥१२॥

सनत्कुमार उवाच

एवं दग्ध्वा स कामं तु शङ्करो मूढचेतसम् ।
प्रोवाच हिमवत्पुत्रीं भक्त्या मुनिवरस्य ह ॥१३॥

---

५ संभूत्तं - घ. । ६ पातनः - क. । ७ देवी देवं च - घ. । ८ दुःखार्ता - क. । ९ श्च - घ. ।
१० करणं - घ. । ११ ज्ञात्वा - घ. । १२ सु - घ. । १३ तत्र - घ. । १४ नान्यो .. - घ. ।
१५ सर्वकार्यं - घ. । १६ प्येष - घ., यः स्यात् - क. । १७ स भविष्यति - क. । १८ ... ष्टतमं - घ. ।
१९ शंभोराधनकाम्यया - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वसिष्ठो नाम विप्रेन्द्रो मां कृत्वा हृदि तप्यते ।
तस्याहं वरदानाय प्रयास्यामि महाव्रते ॥१४॥
एवमुक्त्वा स देवीं तु भक्त[२०]प्रीत्या तदा विभुः ।
जगाम तपतो[२१]भ्यासं वसिष्ठस्य मुनेर्विभुः ॥१५॥
ततो मुनिवरश्रेष्ठं वरिष्ठं तपतां वरम् ।
वसिष्ठमृषिशार्दूलं तप्यमानं परन्तपः ॥१६॥
पूर्णे वर्षसहस्रे तु ज्वलमानमिवानलम् ।
उवाच भगवान् गत्वा ब्रूहि किन्ते[२२] ददान्यहम्[२३] ॥१७॥
ददामि दिव्यं चक्षुस्ते पश्य मां सगणं द्विज ।
दृष्ट्वा तु स तमीशानं[२४] प्रणम्य शिरसा प्रभुम्[२५] ।
शिरस्यञ्जलिमाधाय[२६] तुष्टाव हृषिताननः ॥१८॥

वसिष्ठ उवाच

नमः कनकलिङ्गाय[२७] वेदलिङ्गाय[२८] वै नमः ।
नमः सहस्रलिङ्गाय वह्निलिङ्गाय वै नमः ॥१९॥
नमः पुराणलिङ्गाय श्रुतिलिङ्गाय वै नमः ।
नमः परमलिङ्गाय [२९] ब्रह्मलिङ्गाय वै नमः ॥२०॥
नमस्त्रैलोक्यलिङ्गाय दाहलिङ्गाय वै नमः ।
नमः पर्वतलिङ्गाय स्थितिलिङ्गाय वै नमः ॥२१॥
नमो रहस्यलिङ्गाय सप्तद्वीपाध्वलिङ्गिने[३०] ।
नमः सर्वार्थलिङ्गाय सर्वलोकाङ्गलिङ्गिने[३१] ॥२२॥
नमोस्त्वव्यक्त[३२]लिङ्गाय बुद्धिलिङ्गाय वै नमः ।
नमोहङ्कारलिङ्गाय भूतलिङ्गाय वै नमः ॥२३॥
नम इन्द्रियलिङ्गाय नमस्तन्मात्रलिङ्गिने ।
नमः पुरुषलिङ्गाय भावलिङ्गाय वै नमः ॥२४॥

---

२० र्भाक्त... - क., भक्त्या - घ. । २१ तप्यतो - क. । २२ किन्न - घ. । २३ वदा - क., ददानि ते - घ. ।
२४ ततस्तमीशानं - क. । २५ विभुः - घ. । २६ मादा... - घ. । २७...पिङ्गाय - घ. । २८ स्थिति... - घ. ।
२९ पवन... - क. । ३० सर्वनोकाङ्ग... - घ. । ३१ सत्व लिङ्गाय वै नमः - घ. । ३२ नम : प्रकृति... - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नमः सत्वोर्ध्वलिङ्गाय[३३] तमोलिङ्गाय वै नमः ।
नमो रजोर्ध्वलिङ्गाय सत्वलिङ्गाय वै नमः ॥२५॥
नमो गगनलिङ्गाय तेजोलिङ्गाय वै नमः ।
नमो वायूर्ध्वलिङ्गाय शब्दलिङ्गाय वै नमः ॥२६॥
नम ऋक्स्तुतलिङ्गाय यजुर्लिङ्गाय वै नमः ।
नमस्तेथर्वलिङ्गाय सामलिङ्गाय वै नमः ॥२७॥
नमो यज्ञाङ्गलिङ्गाय यज्ञलिङ्गाय वै नमः ।
नमस्तेनन्तलिङ्गाय वेदानुगतलिङ्गिने[३४] ॥२८॥
दिश नः[३५] परमं योगमपत्यं मत्समं तथा[३६] ।
ब्रह्म चैवाक्षयं देव शमञ्चैव परं विभो ।
अक्षयत्वं च वंशस्य धर्मे च मतिमक्षयाम् ॥२९॥

सनत्कुमार उवाच

एवं स भगवान् व्यास वसिष्ठेनामितात्मना ।
स्तूयमानस्तुतोषाथ तुष्टश्चेदं तमब्रवीत् ॥३०॥

भगवानुवाच

तुष्टस्तेहं ददाम्येतत्[३७] तव सर्वं मनोगतम् ।
योगं च परमं सूक्ष्ममक्षयं सर्वकामिकम् ॥३१॥ [३८]
पुत्रञ्च[३९] त्वत्समं दिव्यं तपोयोगबलान्वितम् ।
ज्ञानानि[४०] च [४१] ऋषिश्रेष्ठ प्रतिभास्यन्ति चैव ते[४२] ॥३२॥
दमः शमस्तथा कीर्तिस्तुष्टिरक्रोध एव च ।
नित्यं तव भविष्यन्ति अमरत्वं च[४३] सर्वशः ॥३३॥
अवश्यत्व[४४] मसह्यत्वमक्षयत्वञ्च सर्वदा ।
वंशस्य चाक्षतिर्विप्र धर्मे च मति[४५]रव्यया ।
ब्रूहि चान्यानपि वरान् ददामि[४६] ऋषिसत्तम ॥३४॥

---

३३ सर्वार्थं... - घ. । ३४ देवानुगत ... - क. । ३५ मे - घ. । ३६ यथा - घ. । ३७ ददान्ये... - क. घ. । ३८ सार्वंकामिदं - घ. । ३९ पौत्रञ्च - क. । ४० ददानि - क. । ४१ ते - क. घ. । ४२ ह - घ. । ४३ हि - घ. । ४४ ...ध्यत्व - क. । ४५ रति - घ. । ४६ ददानि - क. घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वसिष्ठ उवाच

भगवन् विदितं[४७] सर्वं भूतं यद्वर्तनं विभो ।
भविष्यं[४८] येन जानीयां तन्मे देव विधीयताम् ॥३५॥

देव उवाच

भविष्यं स्वेच्छया कुर्यामिति ज्ञातुं न शक्यते ।
तदपि मत्प्रसादेन ज्ञास्यसि निर्वृतो भव ॥३६॥

वसिष्ठ उवाच

भगवन् विदितं सर्वं भविष्यं देवसत्तम ।
तस्यापि तत्तथा देव यथा वा मन्यसे प्रभो ॥३७॥

देवदेव उवाच

भविष्यं नान्यथा कुर्यादिति मे निश्चिता मतिः ।
- - - - - - - - कथं कुर्यात्तदन्यथा ॥३८॥

तथा तन्नात्र सन्देहो विहितं यद्यथा मया ।
तस्मात्तेनुग्रहं कर्ता भूयः पुत्रस्तवाव्यय ॥३९॥

सनत्कुमार उवाच

एवमुक्त्वा ततो देवः कपर्दी नीललोहितः[४९] ।
पश्यतस्तस्य विप्रर्षेः क्षणादन्तरधीयत[५०] ॥४०॥

⊙ इति स्कन्दपुराणे वसिष्ठवरप्रदानं नाम पञ्चदशोध्यायः ⊙

४७ निगदितं - घ. । ४८ ...ष्यन्(?) - घ. । ४९ वृषभध्वज इति च - घ. । ५० क्षणेना... - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वरान् स[१] लब्ध्वा भगवान् वसिष्ठोस्मत्पितामहः[२] ।
कं पुत्रं जनयामास आत्मनः सदृशद्युतिम् ।।१।।

सनत्कुमार उवाच

तेनासौ वरदानेन देवदेवस्य शूलिनः ।
अरुन्धत्यामजनयत्तपोयोगबलान्वितम् ।।२।।
ब्रह्मिष्ठं शक्तिनामानं पुत्रं पुत्रशताग्रजम् ।
तस्य बाल्यात्प्रभृत्येव वासिष्ठस्य[३] महात्मनः ।।३।।
रभसोपगता[४] भक्तिरभवद् गोवृषध्वजे ।
स कदाचिदपत्यार्थमाराधयदुमापतिम् ।।४।।
तस्य तुष्टो महादेवो वरदोस्मीत्यभाषत ।
अथ दृष्ट्वा तमीशानमिदमाहानताननः[५] ।।५।।
केन स्तोष्यामि[६] ते[७] देव यस्त्वं[८] सर्वजगत्पतिः ।
सर्वान् धारयसे लोकानात्मना समयाद्विभो ।।६।।
त्वमेव भोक्ता भोज्यश्च कर्ता कार्यं तथा क्रिया ।
उत्पादकस्तथोत्पाद्य उत्पत्तिश्चैव सर्वशः ।।७।।
आत्मानं पुत्रनामानं मम तुल्यं गुणैर्विभो ।
इच्छामि दत्तन्देवेश एष मे दीयतां वरः ।।८।।

सनत्कुमार उवाच

तमेवंवादिनं देवः प्रहस्य वदतां वरः ।
उवाच वचसा व्यास दिशः सर्वा विनादयन्[९] ।।९।।

---

१ लब्ध्वा तु - घ. । २ मे पि. ... - घ. । ३ वसिष्ठस्य - घ. । ४ मनसा तपसा - क. ।
५ ...माहर... - घ. । ६ तो... - क. । ७ त्वां - घ. । ८ यस्त्वं - घ. । ९ व्यगादयन् - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

त्वयाहं याचितः शक्ते स च ते संभविष्यति ।
त्वत्समः सर्ववेदज्ञस्त्वदीयो मुनिपुङ्गव[१०] ॥१०॥
बीजात्मा च तथोद्भूतः स्वयमेवान्तरात्मना ।
बीजात्मना न भवति परिणामान्तरङ्गतः ॥११॥
एवं स आत्मनात्मा नः संभूतोपत्यसंज्ञितः ।
स्वेनात्मना न भविता परिणामान्तरं गतः ॥१२॥

सनत्कुमार उवाच

एवमुक्त्वा तु तं देवः प्रहस्य च निरीक्षतः[११] ।
जगाम सहसा योगी अदृश्यत्वमतिद्युतिः ॥१३॥
तस्मिन् गते महादेवे शक्तिस्तव पितामहः ।
वचस्तत् परिनिश्चित्य एवमेवेत्यमन्यत[१२] ॥१४॥
अथ कालेतिमहति समतीते शुभप्रदे[१३] ।
तपसा भावितश्चापि महताग्निसमप्रभः ॥१५॥
अदृश्यन्त्यां महाप्रज्ञ आदधे[१४] गर्भमुत्तमम् ।
तस्यामापन्नसत्वायां राजा कल्माषपादृषिम् ।
भक्षयामास संरब्धो रक्षसा हृतचेतनः ॥१६॥

⊙ इति स्कन्दपुराणे षोडशोध्यायः ⊙

व्यास उवाच

कस्मात् स राजा तमृषिं चखाद तपसान्वितम् ।
रक्षसा स किमर्थं च हृतचेता[१] भवन्नृपः ॥१॥

---

१० पुङ्गवः ... - क. ।११ क्ष्यतः (त?) - क. । १२ वर एवं ह्यभाषत - घ. । १३ ...व्रते - क. ।
१४ ...श्चादधे - घ. ।
१ कृतचेता - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वसिष्ठयाज्यो[२] राजासीन्नाम्ना मित्रसहः[३] प्रभुः ।
सौदासस्तस्य पुत्रोभू[४]दिन्द्रचन्द्रसमद्युतिः ॥२॥
तमागम्याब्रवी[५]च्छक्तिश्चरिष्ये दीक्षितो व्रतम् ।
ततो मे निशि राजेन्द्र सदैव[६] पिशिताशनम् ॥३॥
इहागतस्य यच्छ त्वं शुचि [७] सर्वगुणान्वितम् ।
सुप्रभाहार[८]संयुक्तमेकस्यैकान्त[९] एव च ॥४॥
एवमस्त्विति तेनोक्ते जगाम स महामनाः ।
अथास्यान्तर्हितं रक्षो[१०] नृपतेरभवत्तदा ॥५॥
सूदान्ना[११]ज्ञापयत् तेन[१२] तस्यार्थे मुनिसत्तम[१३] ।
गते च दिवसे तात संस्मृत्याथ यतात्मवान् ।
सूदमाहूय[१४] प्रोवाच आर्तवत्[१५] स नराधिपः ॥६॥

सौदास उवाच

मया मृतवसो प्रातर्गुरुपुत्रस्य धीमतः ।
पिशितं संप्रतिज्ञातं भोजनं निशि संस्कृतम् ॥७॥
तत्कुरुष्व यथाक्षिप्रं कालो नोपरमेद्यथा ।
स एवमुक्तः प्रोवाच सूदो[१६] मृतवसुस्तदा ॥८॥
राजँस्त्वया त्वनाख्यातं प्रागेव नरपुङ्गव ।
सांप्रतं नास्ति पिशितं स्तोकमप्यभिकांक्षितम् ॥९॥
पिशितस्यैव[१७] चाल्पस्य बहूनां चैव भूभुजाम् ।
अमृतस्य(?) प्रदानाच्च न किंचिदवशिष्यते ॥१०॥

राजोवाच

जाने सर्वोपयोगं च जाने चा[१८]दुष्कृतं तव ।
जाने स्तोकं च पिशितं कार्यं चेदं[१९] तथाविधम् ।
मृग्यतां[२०] पिशितं क्षिप्रं लुब्धकं यत्र मन्यसे ॥११॥

---

२ राज्ये - घ. । ३ ...सख - घ. । ४ तस्य पुत्रश्च सौदासो - घ. । ५ वदत् - घ. । ६ सदे... - घ. । ७ ...चिः - घ. । ८ ...कार - घ. । ९ स्ये... - घ. । १० वश्यो - घ. । ११ मुद्राना ...- घ. । १२ त्तत्र - घ. । १३ मक्षः - घ. । १४ इदमाहूय - घ. । १५मार्त... - घ. । १६ सृतो - घ. । १७ ...स्येव - घ. । १८ वा - घ. । १९ यथाविधम् - घ. । २० भु (यु? यो?) ज्यतां - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

पिशितं मृगयन् यत्नान्नाप्यविन्दत कर्हिचित् ।
यदा न लब्धवान् मांसं तदोवाच[२१] नराधिपम्[२२] ।
मृगयन् सार(?)खि[२३]न्नोस्मि शाधि[२४] किं करवाणि ते ॥१२॥

सनत्कुमार उवाच

स एवमुक्तः सूदेन तस्मिन् काले नराधिपः ।
नोवाच किंचित्तं सूदं विमनाः[२५] स बभूव ह ॥१३॥
इदमन्तरमासाद्य विश्वामित्रसमीरितः ।
राक्षसो रुधिरो नाम संविवेश नराधिपम् ॥१४॥
राक्षसेन तदाविष्टो रुधिरेण दुरात्मना ।
उवाच सूदं[२६] शनकैः कर्णमूले महाद्युतिः ॥१५॥
गच्छ यत्किंचिदानीय मांसं मानुष्यकं ततः ।
गार्दभं वाप्यथौष्ट्रं वा शीघ्रं[२७]संस्कर्तुमर्हसि ॥१६॥
किमसौ ज्ञास्यते रात्रौ त्वया भूयश्च संस्कृतम् ।
रसवद् गन्धवच्चैव[२८] क्षिप्रमेव समानय ॥१७॥

सनत्कुमार उवाच

एवमुक्तस्तु तेनाथ मानुषं मांसमाददे ।
राजापकारिणो व्यास सूदो[२९] शिष्टस्य कस्यचित् ॥१८॥
अथार्धरात्रसमये भास्कराकारवर्चसम् ।
राजानल[३०]समप्रख्यमपश्यन्मुनिसत्तमम् ॥१९॥
स तमर्घ्येण पाद्येन आसनाग्रवरेण च ।
अर्चयित्वा[३१] तु विधिवदन्नमस्योपपादयत्[३२] ॥२०॥

---

२१ तत्रो... - घ । २२ ... प - घ. । २३ ... थि... - घ. । २४ सा... - घ. । २५ विमूढः - ? । २६ श्रृंग - घ. । २७ सर्वं - घ. । २८ वशवंधयुव - घ. । (रसगन्धयुतं चैव ?) । २९ मृतो - घ. । ३० शतानन... - घ. । ३१ सोर्चवित्वा - घ. । ३२ त्वन्नभस्यो ... - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स तदन्नं[३३] समानीतं [३४] समालभ्य महातपाः ।
चुकोप क्षोभितं चापि पार्थिवं प्रहसन्निव ॥२१॥

शक्तिरुवाच

पार्थिवाधम विप्राणां भोजनं राक्षसोचितम् ।
न दीयते विधिज्ञेन त्वं तु मामवमन्यसे ॥२२॥
यस्मात्त्वं राक्षसमिदं मह्यं दित्ससि भोजनम् ।
तस्मात्त्वं कर्मणानेन पुरुषादो भविष्यसि ॥२३॥

सनत्कुमार उवाच

स एवमुक्तस्तेजस्वी राजा संचिन्त्य तत्तदा ।
उवाच क्रोधरक्ताक्षो राक्षसाविष्ठचेतनः ॥२४॥
पुरुषादो भवेत्येवं मामवोचद् भवान् यतः ।
अतस्त्वां भक्षयिष्यामि भ्रातृभिः सहितं द्विज ॥२५॥
भक्षयित्वा विशुद्ध्यर्थं मुक्तशापस्ततः परम् ।
चरिष्यामि तपः शुद्धं संयम्येन्द्रियसंयुतम् (?) ।
पित्रा तवाभ्यनुज्ञातः स्वर्गे वत्स्ये यथेप्सितम् ॥२६॥

⊙ इति स्कन्दपुराणे एकाशीतिसाहस्र्यां संहितायामम्बिकाखंडे
कल्माषपादशापः सप्तदशोऽध्यायः ⊙

सनत्कुमार उवाच

ततः स राजा स्वं राज्यमुत्सृज्य सह भार्यया ।
वनं विवेश तत्राभूत् पुरुषादो महाबलः ॥१॥
सोभक्षयत तत्राग्रे शक्तिमेव महामुनिम् ।
ततो भ्रातृशतं तस्य वसिष्ठस्यैव पश्यतः ॥२॥

---

३३ ...र्थं - घ.। ३४... सीनं - घ.।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ततः पुत्रवधं घोरं दृष्ट्वा ब्रह्मसुतः प्रभुः ।
नोत्ससर्ज ततः क्रोधं वसिष्ठः कौशिकं प्रति ॥३॥
पुत्रशोकेन महता भृशमेवान्वतप्यत[१] ।
स बद्ध्वा महतीं कण्ठे शिलां ब्रह्मसुतः प्रभुः ॥४॥
नद्यामात्मानमसृजच्छतरात्रं वसत्तया(?) ।
- - - इति तां प्राहुर्मुनयः शंसितव्रताः[२] ॥५॥
पुनः पाशैर्दृढं बद्ध्वा अन्यस्यामसृजद् वशी ।
तस्यां विपाशः संवृत्तो विपाशा साभवत्ततः ॥६॥
ततो वापीं समामाद्य निराहारो जितेन्द्रियः ।
वायुभक्षस्तदा तस्थौ स्वदेहं परितापयन् ॥७॥
अथ शुश्राव गच्छन्तं ध्वनिमेकस्य सुस्वरम् ।
अधीयानस्य तत्रासौ[३] ध्यानमेवान्वपद्यत ॥८॥
अथैनं चारुसर्वाङ्गी पीनोन्नतपयोधरा ।
उपतस्थेग्रतः पत्नी शक्तेर्दीनानने[४]क्षणा ॥९॥
तामुवाच कुतस्त्वं वै कस्यैवं श्रूयते ध्वनिः ।
सोवाच[५] दीनया वाचा वदतां शुश्रुवं(?) तदा ॥१०॥

अदृश्यन्त्युवाच

यदैव सुतदुःखेन[६] निर्गतोस्या[७]श्रमाद् गुरो[८] ।
तदाप्रभृत्येव चाहं भगवन्तमनुव्रता ॥११॥
अधीयानस्य चैवायं[९] ध्वनिः पौत्रस्य ते विभो ।
उदरस्थस्य श्रुतो मे[१०] मा दुःखं[११] दुःसहं[१२] कृथाः ॥१२॥

---

१ नु कीर्त्यंते - घ. । २ संशि... - घ. । ३ ... सु (शु?) - घ. । ४ नल (`?) - घ. । ५ नोवाच - घ. ।
६ सुखदुःखेन - घ. । ७ तस्या - घ. । ८ ...रोः - घ. । ९ ...हं - घ. । १० मे मृतो - घ. । ११ न्मृदुःखे
(खेदं?) - घ. । १२ द्रसमः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

- ।

इदानीमस्ति मे वत्से[१३] जीविताशेति सो[१४]ब्रवीत्[१५] ॥१३॥

- - - - - - - - - - - - - - - - - - - ।

- - - - - - - - - - - - - - - - - - - ॥१४॥

- - - - - - - - - - - - - - - - - - - ।

- - - - - - - - - - - - - - - - - - - ॥१५॥

- - - - - - - - - - - - - - - - - - - ।

उवाच चैनं दुष्टात्मन् दहेयं त्वां सबान्धवम् ॥१६॥

- ।

दग्धेन च[१६] त्वया किं मे गच्छ मुक्तोसि दुर्मते ॥१७॥

सनत्कुमार उवाच

ततः स मुक्तो दीनात्मा राक्षसः क्रूरकर्मकृत् ।
प्रणम्य सहसा भीतो जगाम कौशिकान्तिकम्[१७] ॥१८॥
निशाचरे गते राजा प्रणम्य शिरसा मुनिम् ।
प्रसादयामास तदा स चोवाचेदमर्थवत् ॥१९॥
न दोषस्तव राजेन्द्र रक्षसाधिष्ठितस्य वै ।
कृतास्तेन कृताः (?) पुत्रा निमित्तं तत्र राक्षसः ॥२०॥
प्रशाधि राज्यं राजेन्द्र पितृपैतामहं[१८] प्रियम् ।
ब्रूहि किं वा प्रियं तेद्य करोमि नरपुंगव ॥२१॥

राजोवाच

इच्छामि भगवन् पुत्रं त्वयो[१९]त्पादितमच्युत ।
देव्यामस्यां महासत्वं तत्कुरुष्व मम प्रियम् ॥२२॥

---

१३ ... त्स - घ. । १४ ब्रा (तां) - घ. । १५ इतः परमपि मूले कियानंशः खण्डित इव प्रतिभाति ।
१६ न - घ. । १७ न्ताकं - घ. । १८ ह ... - घ. । १९ मं ... - घ., ममो? ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

एवमस्त्वित्यथोक्त्वासौ तस्य[२०] पत्न्यां महाव्रत[२१] ।
पुत्रं च लोष्टकं[२२] नाम जनयामास विश्रुतम् ॥२३॥
तं लोष्टकं ततो राज्ये स्व[२३]पुत्रमभिषिच्य सः ।
जगाम वनमेवाथ सभार्यस्तपसि[२४] स्थितः ॥२४॥
वसिष्ठस्यापि कालेन शक्तेः पुत्रः प्रतापवान् ।
अदृश्यन्त्यां भवत्पुत्रो नाम्ना स हि पराशरः ॥२५॥
वसिष्ठं तु तदा धीमान् तातमेवाभ्यमन्यत ।
तात तातेति च मुहुर्व्याजहार पिता गुरुः ॥२६॥
ततः कदाचिद् विज्ञाय भक्षितं रक्षसाशुचिम् ।
पितरं तपसा मंत्रै रजरक्षकृतौ (?) तदा ॥२७॥
ततः कोटचः सपंचाशद्रक्षसां क्रूरकर्मणाम् ।
जुहावाग्नौ महातेजास्ततो ब्रह्माभ्यगाद् द्रुतम् ॥२८॥
सुतमभ्येत्य संपूज्य वसिष्ठसहितः प्रभुः ।
ऋषिभिर्दैवतैश्चैव इदमाह पराशरम् ॥२९॥

ब्रह्मोवाच

देवतास्तर्पयन्ति स्म यज्ञैर्मन्त्रपुरःसरैः ।
अष्टमं स्थानमेतद्धि देवानां मा[२५] त्व[२६]मीदृशम् ॥३०॥

पराशर उवाच

सह देवैरहं सर्वान् लोकान् धक्ष्यामि पावकैः ।
दग्ध्वान्यान् प्रथयिष्यामि तत्रालोकान्न संशयः ॥३१॥

सनत्कुमार उवाच

तस्यैवं गर्वितं वाक्यं श्रुत्वा देवः पितामहः ।
उवाच श्लक्ष्णया वाचा सान्त्वयन्[२७] तमिदं वचः ॥३२॥

---

२० ... स्यां - घ. । २१ ... त - घ. । २२ नोष्टकं... - घ. । २३ ...ज्यम... - घ., ...ज्ये स पुत्रमभिषिच्य च (?) । २४ ... से - घ. । २५... ना - घ. । २६ त्य - घ. । २७ शान्तरं त्व - घ., सान्तरं त(?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पितामह उवाच

कृतमेतन्न सन्देहो यथा ब्रूषे महामुने ।
क्षन्तव्यं सर्वमेतत्तु अस्मत्प्रिय[२८]चिकीर्षया ।।३३।।
यैस्ते पिता महाभाग भक्षितः सहसोदरः[२९] ।
त एवाग्नौ[३०] तु होतव्या विश्वमित्रस्य पश्यतः ।।३४।।
अन्येषां स्वस्ति सर्वत्र देवानां सह राक्षसैः ।
तस्य संकल्पसंतुष्टो मन्यं द्यतमुदाहरत्[३१] (?)।।३५।।
वसिष्ठस्य महाभाग त्वं निवारय पौत्रकम् । (?)
देवाः प्राञ्जलयः सर्वे प्रणेमुस्ते महामुनिम् ।।३६।।
ऋषयश्चैव स ऋुद्धस्तपोयोगबलान्वितः ।
विहिद्य (?) तपसो योगाद्धोष्ये दीप्ते विभावसौ ।।३७।।

सनत्कुमार उवाच

ततो देवाः सगन्धर्वाः पितामहपुरस्सराः ।
प्रभावं तस्य ते ज्ञात्वा पराशरमपूजयन् ।।३८।।
हतेषु च ततस्तेषु रक्षस्सु सुदुरात्मसु ।
संजहार ततः सत्रं ब्रह्मणोनु[३२]मते सदा ।।३९।।

सनत्कुमार उवाच

य इदं श्राद्ध[३३]काले वा दैवे कर्मणि वा द्विजान् ।
श्रावयीत शुचिर्भूत्वा न तं हिंसंति राक्षसाः ।।४०।।
पराशरस्येदमदीनसंभवं विशुद्धवाक्कर्मविधानसंभवम् ।
निशम्य - --- ----- -रीयुः[३४] कुलसिद्धिसंभवम् ।४१।।

⊙ इति स्कन्दपुराणे राक्षससत्रं नामाष्टादशोऽध्यायः । ⊙

---

२८ ...त्प्रीति - घ. । २९ सहसा ... - घ. । ३० ... थौं - घ. । ३१ ...रेत् - घ. । ३२ ब्राह्मणान्न - घ. ।
३३ श्राद्ध - घ. । ३४ रियु - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

एवं तव पिता व्यास रक्षःसत्रं समाहरत् ।
समापयित्वा च पुनस्तपस्तपति सत्वरम्[1] ॥१॥
तमागत्य वसिष्ठस्तु तपसा भास्करद्युतिम् ।
उवाच प्रीतिसंपन्नमिदमर्थवदव्ययः[2] ॥२॥

वसिष्ठ उवाच

पितरः पुत्रकामा वै तपस्तप्त्वातिदुश्चरम् ।
पुत्रमुत्पादयंति स्म तपोज्ञानसमन्वितम् ॥३॥
यत्नतः संततिश्चैव ज्ञानवाँस्तपसान्वितः ।
करिष्यति गतिं दैवीमिति वेदविदो विदुः ॥४॥
सद्यस्तपोन्वितश्चैव ज्ञानवान् यशसान्वितः ।
पुत्रः पुत्रवतां श्रेष्ठो विहीनः (?) प्रजया विभो ॥५॥
तस्मात् पितॄणामानृण्यं गच्छ व्रतवतां वर ।
सुतमुत्पादय क्षिप्रं सममेव च भावन ॥६॥

सनत्कुमार उवाच

स एवमुक्तस्तेजस्वी वसिष्ठेन महात्मना ।
मैनाकं पर्वतं प्राप्य तपस्तेपे सुदुस्तरम् ॥७॥
तस्य कालेन महता तपसा तारितस्य तु ।
उमापतिर्वरं प्रादात् स च वव्रे वरं सुतम्[3] ॥८॥
स लब्ध्वा वरमागत्यान्वेषयत् पुत्रकारणात् ।
क्षेत्रं सुपरिशुद्धं च स्वपुत्रो यत्र सम्भवेत् ॥९॥
स भ्रमन् दाशराजस्य[4] दुहितृत्वमुपागताम् ।
पितृकन्यां ततः कालीमपश्यद्दिव्यरूपिणीम् ॥१०॥

१ सस्वरम् - घ. । २ ...मदव्यय - घ. । ३ शुभंम् - घ. । ४ दासराजस्य - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मत्स्य[५] गर्भसमुत्पन्नां मत्स्यबीजोद्भवां पुरा ।
अद्रिकामप्सरःश्रेष्ठां ब्रह्मतेजोमयीं शुभाम् ॥११॥
तस्यां स जनयामास वरं दत्त्वा महातपाः ।
भवन्तं तपसां योनिं श्रौतस्मार्तप्रवर्तकम् ॥१२॥
तव पुत्रोभवच्चापि शुको वेदविदां वरः ।
तस्य पुत्राश्च चत्वारः कन्या चैका सुमध्यमा ॥१३॥

व्यास उवाच

तादृग् वैरं परं ब्रह्मन् विश्वामित्रवसिष्ठयोः ।
कथं चापि गतं भूय एतदिच्छामि वेदितुम् ॥१४॥

सनत्कुमार उवाच

पराशरे तु गर्भस्थे रिपुत्वं[६] गाधिजे गते ।
सरस्वत्यां कुरुक्षेत्रे वसतोः स्वाश्रमे तयोः[७] ॥१५॥
तत्र वैरमनुस्मृत्य विश्वामित्रेण धीमता ।
नियतस्य वसिष्ठस्य हृतं पुत्रशतं रुषा ॥१६॥
- - - - - - - - - - -- -- --- - ।
मुनिरप्याह तत्रासौ विश्वामित्रः प्रतापवान् ॥१७॥
सरस्वतीमथैकान्ते वसिष्ठं - - --- [८] ।
स्रोतसा महता क्षिप्रं स्नायमानमिहानय ॥१८॥
सैवमुक्ता[९] तु तं गत्वा वसिष्ठं प्राह दुःखिता ।
यदुक्तवाँस्तु गाधेयः[१०] स चोवाच महानदीम् ॥१९॥
एवं कुरु महाभागे मां[११] नयस्व यथेप्सितम् ।
मा ते क्रूरः स गाधेयः शापं दद्यात् सुदुस्तरम् ॥२०॥

सनत्कुमार उवाच

गाधेयस्य ततः सा तु जुह्वतोथ दिवाकरे ।
मध्यं प्राप्तेनयच्चैव[१२] वसिष्ठं स्रोतसा शुभा ॥२१॥

---

५ यस्यां - घ. । ६ ... त्रं - घ. । ७ द्वयो र्वस्याप्रमे (...रण्याश्रमे ?) - घ. । ८ मे महारगे - घ. ।
९ ...क्त्वा - घ. । १० ... यं - घ. । ११ मा - घ. । १२ त्वेव - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स तं दृष्ट्वा हृतं व्यास स्रोतसा मुनिसत्तमम्[१३] ।
उवाच छद्मना सोस्मद्वेगेनापहृत[१४]स्त्वया ॥२२॥
तस्मात्त्वं कर्मणानेन सासृक्तोया भविष्यसि ।
विश्वामित्रेण सा शप्ता नदी लोकसुखप्रदा ॥२३॥
अवहद्रुधिरं घोरं[१५] मासं मेदस्तथैव च ।
विश्वामित्रस्ततो गत्वा देवानामधिपं तदा[१६] ॥२४॥
उवाच वज्रं मे देही शरीरं चैव कौशिकः[१७] ।
दुर्वृत्तं हि हनिष्यामि वसिष्ठं ब्राह्मणाधमम् ॥२५॥
पुत्राः शक्र मया तस्य निहताः पापचेतसः ।
तान् हत्वापि न मे शान्तिर्भवित्री चैव देवप ॥२६॥

शक्र उवाच

ब्रह्मेशानौ वसिष्ठश्च तव चात्मनि सत्तम । (?)
निर्वेशे सोममेतेषां नो मुक्तं भव वेदितुम् (?) ॥२७॥
ततः समभिक्रुद्धोसौ गाधेयः शक्रमोजसा ।
योगात् प्रच्यावयामास[१८] शरीरात् कालिनन्दन ॥२८॥
स तच्छरीरमाविश्य वृत्रशत्रोः प्रतापवान् ।
वज्रोद्यतकरो भूत्वा छिद्रान्वेष्यवतिष्ठत ॥२९॥
ज्वलंतं स त[१९]र्मग्नि तु (?) वज्रेण शतपर्वणा ।
चिच्छेद सप्तधा कृत्वा मुनीनामेव पश्यताम् ॥३०॥
खण्डान्यथ समानीय क्षिप्रमेव मुनिः स्वयम् ।
संधाय स्वशरीरं[२०] वै सक्रोधो वाक्य[२१]मब्रवीत् ॥३१॥
तिष्ठ कौशिक मेदानीं मया दृष्टो गमिष्यसि ।
- - - - - - - - - - - - - - - - - ॥३२॥
- - - - - - - - - - - - - - - - - - ।
दिवा कराद् वै (?) कबन्धाः पेतुः शतसहस्रशः ॥३३॥

---

१३ म... - घ. । १४ ...कृत - घ. । १५ चौर - घ. । १६... पस्तथा - घ. । १७... क - घ. ।
१८ प्रक्षा ... - घ. । १९ शत - घ. । २० स शरीरं - घ. । २१ राज्य - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अशून्यं[२२] रुधिरं चैव गगनाच्च पपात ह ।
ववुश्चात्यशुभा[२३] वाता विमानान्यपतन् दिवः[२४] ॥३४॥
नेयुर्वेदाश्च विप्राणां नागाश्चाकाशगास्तथा ।
एवमादीँस्तदोत्पातान् विविधाँल्लोकनाशनान् ॥३५॥
दृष्ट्वा देवाः समुनयस्तमाहुर्गाधिनन्दनम् ।
वसिष्ठश्च महातेजास्त्वं च गाधेय धार्मिक ॥३६॥
अमरौ जरया त्यक्तौ तपोयोगबलान्वितौ ।
युवयोर्हि क्षयं नास्ति क्षयं च न करिष्यथः ॥३७॥
देवानां सर्वलोकानां युध्यमानौ[२५] परस्परम् ।
मत्तयोर्गजयोर्यद्वदरण्ये युध्यमानयोः ॥३८॥
वीरुधां भूरुहां चैव संमर्द्देन क्षयो महान्[२६] ।
तथा वैरेण युवयोः प्रवृत्तेन महात्मनोः[२७] ॥३९॥
लोकानामनयो व्यक्तं[२८] भविष्यति न संशयः ।
तस्माद्विनाशं - - - लोकानामृषिभिः सह ॥४०॥
युवयोरस्तु सख्यं च क्षयो वैरस्य चाथ वै ।
स एवमुक्तो गाधेयो मुनिभिर्दैवतैः सह ॥४१॥
एवमस्त्विति तान्प्राह विस्मितस्तेजसा तदा ।
ततो वसिष्ठमप्येवमूचुः सर्वे दिवौकसः ॥४२॥
असा[२९]वपि तथैवेति तेन सख्यं चकार ह ।
ततःप्रभृति सर्वं वै जगत् स्थावरजङ्गमम् ॥४३॥
ससुखं प्रीतिसंयुक्तं मुमुदे[३०] विगतज्वरम्[३१] ।
- ।
- - - - - - - - - - - - - - - - - - - -॥१४॥

---

२२ ... न्यो - घ. । २३ प्यसुरा - घ. । २४ ...द् गिरः - घ. । २५ ... नः - घ. । २६ सप्तवैद्यनयोर्मं... - घ., (?) व - घ. । २७ ...ना घ. । २८ र्व्यक्तं - घ. । २९ तासा ... - घ. । ३० ययुर्देवि... - घ. । ३१ देवैर्यतज्वरम् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

अथ तीर्थप्रसंगेन मुनिभिः समुपागतैः ।
अनुग्रहः कृतस्तस्या येन स्वच्छजलाभवत् ॥४५॥
महतस्तपसः शक्ताः (?) कालेन महता तदा ।
वसिष्ठस्य तु तां क्षान्ति ज्ञात्वा स ऋषिपुङ्गवः ॥४६॥
विश्वामित्रो महातेजा वसिष्ठे वैरमत्यजत् ।
एवं तौ वैरमन्योन्यं जहतुर्मुनिसत्तमौ ॥४७॥

सनत्कुमार उवाच

य इदं शृणुयाद्विप्रो ब्राह्मणाञ्छ्रावयीत वा ।
सुदुस्तराणि दुर्गाणि तरत्य[३२]श्रान्तपौरुषः ॥४८॥
त्रिपौरुषौदार्यविहारसत्वैः समुन्नतश्चोज्ज्वलचारुवेषः ।
भवेच्च सर्वामरराजतुल्यस्त्रिविष्टपे क्रीडति चेच्छया स्वयम् ॥४९॥
एवं तदभवद् व्यास विश्वामित्रवसिष्ठयोः ।
वैरं समाप्तं लोकानां हितार्थं पुनरेव च ॥५०॥

⊙ इति स्कन्दपुराणे वैरनिवर्तनं नाम ऊनविंशोध्यायः ⊙

व्यास उवाच

उमाहरौ तु देवेशो चक्रतुर्यत्तु संगतौ ।
तन्मे सर्वमशेषेण कथयस्व महामुने ॥१॥

सनत्कुमार उवाच

उमाहरौ तु संगम्य परस्परमनिन्दितौ ।
- - - - - - - - - - - - - - - - - ॥२॥
शिलादस्यात्मजं विप्रं[१] - - - शक्तिवारणम्[२] ।
- - - - - - - - - - - - - - - - - ॥३॥

---

३२ ... त्या - घ. ।
१ यं रण - घ. । २ शशांकस्यानुजोर्विप्रं यं रणशक्तिवारणं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स चाप्ययोनिजः पुत्र आराध्य च महेश्वरम् ।
रुद्रेण समतां लब्ध्वा महागणपतिर्बभौ ॥४॥

व्यास उवाच

कथं नन्दी समुत्पन्नः कथं चाराध्य शंकरम् ।
समत्वमन्वगाच्छम्भोः प्रतीहारत्वमेव च ॥५॥

सनत्कुमार उवाच

अभूदृषिः सुधर्मात्मा शिलादो नाम वीर्यवान् ।
तस्याभूत् शीलवृत्तित्वं[3] शिलादस्तेन सोभवत् ॥६॥
अपश्यन्लम्बमानाँस्तान् गतीर्यान् स पितृ न् द्विजः ।
विच्छिन्नसंततिर्घोरं निरयं वै प्रपेदुषः[4] ॥७॥
तैरुक्तोपत्यकामो वै तं देवं लोक(?)मव्ययम् ।
आराधय महादेवं सुतार्थं द्विजसत्तम ॥८॥
योयमुत्तारणे शक्तः स ते[5] पुत्रं प्रदास्यति ।
तेषां वाक्यं ततः श्रुत्वा जगाम शरणं[6] शिवम् ॥९॥
तस्य वर्षसहस्रेण तप्यमानस्य शूलधृक् ।
शर्वः सोमो गणवृतो वरदोस्मीत्यभाषत ॥१०॥
सोमं स दृष्ट्वा[7] देवेशं प्रणतः[8] पादयोर्विभोः[9] ।
हर्षगद्गदया वाचा तुष्टाव विबुधेश्वरम् ॥११॥

शिलाद उवाच

नमः परमदेवाय महेशाय महात्मने ।
स्रष्ट्रे[10] सर्वसुरेशानां ब्रह्मणः पतये नमः ॥१२॥
नमः कामांगनाशाय योगसंभवहेतवे ।
नमः पर्वतवासाय ध्यानगम्याय ते नमः ॥१३॥
ऋषीणां पतये नित्यं देवानां पतये नमः ।
लोकानां पतये चैव योगिनां पतये नमः ॥१४॥

---

३ स्ता - घ. । ४...तसः (तुष?) - घ. । ५ शत्रो (सतं?) - घ. । ६ सवलं - घ. । ७ स दृष्ट्वा सोम... - घ. ।
८ ...य - घ. । ९ बंभौं - घ. । १० श्रेष्टे - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रधानाय नमो नित्यं[११] - - - - - सर्गिणे ।
वरदाय च भक्तानां नमः सर्वगताय च ॥१५॥
तन्मात्रेन्द्रियभूतानां विकाराय[१२] गुणैः सह ।
[१३] - - - पतये चैव नमस्तो प्रभविष्णवे ॥१६॥
जगतः पतये चैव जगत्स्रष्ट्रे नमः सदा ।
प्रकृतेः पतये नित्यं पुरुषात्परगामिने ॥१७॥
ईश्वराय नमो नित्यं योगगम्याय - - -[१४] ।
संसारोत्पत्तिनाशाय सर्वकामप्रदाय च ॥१८॥
शरण्याय नमो नित्यं नमो भस्मांगरूपिणे ।
नमस्ते योग्रहस्ताय (?) तेजसां पतये नमः ॥१९॥
सूर्यानिलहुताशाम्बुचन्द्राकाशधराय च ।
स्थिताय सर्वदा नित्यं नमस्त्रैलोक्यवेधसे ॥२०॥
स्तोतस्यान्यांगतो देव विश्रामस्तव हंक्ष्यते । (?)
यस्माद्धेतुस्त्व[१५]मेवास्य जगतः स्थितिनाशयोः ॥२१॥
अशरण्यस्य देवेश त्वत्तश्च शरणार्थिनः ।
प्रसादं परमालक्ष्य वरदो भव विश्वधृक् ॥२२॥

सनत्कुमार उवाच

यः स्तोत्रमेतदमलं पठति द्विजन्मा प्रातः शुचिर्नियमवान् पुरतो द्विजानाम् ।
तं ब्रह्मराक्षसपिशाचसभूतयक्षा हिंसन्ति नो द्विपदपन्नग - - पूताः ॥२३॥

ततः स भगवान् देवः स्तूयमानः सहोमया ।
उवाच वरदोस्मीति ब्रूहि यत्ते मनोगतम् ॥२४॥
तमेवंवादिनं देवं शिलादोभ्यर्चयत् तदा[१६] ।
उवाच चेदं देवेशं स वाचा सज्जमानया ॥२५॥
भगवन् यदि तुष्टोसि यदि देयो वरश्च मे ।
इच्छाम्यात्मसमं पुत्रं मृत्युहीनमयोनिजम् ॥२६॥

---

११ तत्वमेसं - घ. । १२ विक... - घ. । १३ स्वाष्ट्र च - घ. । १४ वाहसे - घ. । १५ द्वित्तत्व - घ. । १६ सदा - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एवमुक्त्वा ततो देवः प्रीयमाणस्त्रिलोचनः ।
एवमस्त्विति तं प्रोच्य तत्रैवान्तरधीयत ।।२७।।
गते तस्मिन्महेष्वासे ऋषिः परमपूजितः ।
स्वमाश्रममुपागम्य ऋषिभ्योकथयत्ततः ।।२८।।
- - - - - - - - - - - - - - - - - - - ।
- - - - - - - - - - - - - - - - - - ।।२९।।
सर्वकामानलप्रख्यः कुमारः प्रत्यभाषत ।
स तं दृष्ट्वा तथोद्भूतं कुमारं दीप्ततेजसम् ।।३०।।
राक्षसोयमिति ज्ञात्वा भया[१७]न्नोपससार तम् ।
कुमारोपि तथोद्भूतः पितरं दीप्ततेजसम् ।।३१।।
उपासर्पत दीनात्मा तात तातेति चाब्रवीत् ।
स तातेत्युच्यमानोपि यदा तन्नाभ्यनन्दत ।
अथ वायुस्तदाकाशे निनादं प्राह सुस्वरम् ।।३२।।

वायुरुवाच

सालंकायन पुत्रस्ते योसौ देवेन शंभुना ।
अयोनिजः[१८] पुरा दत्तः[१९] स एष[२०] प्रतिनन्दय ।।३३।।
यस्मान्नन्दिकरस्तेयं सदैव द्विजसत्तम ।
तस्मान्नन्दीति नाम्ना[२१]यं भविष्यति सुतस्तव ।।३४।।

सनत्कुमार उवाच

ततः स वायुवचनान्नन्दिनं परिसष्वजे ।
गृहीत्वा स्वा[२२]श्रमं तेन चानयद् दृष्टिवर्द्धनम् (?)।।३५।।
चूडानामव्रतादीनि कर्माण्यस्य चकार सः ।
कृत्वा चाध्यापयामास वेदान् साङ्गा[२३]नशेषतः ।।३६।।
आयुर्वेदं च गान्धर्वं धर्म[२४]शास्त्रं सलक्षणम्[२५] ।
हस्तिनां चरितं चैव नवनिध्योश्च[२६] लम्भनम्[२७] ।।३७।।

---

१७ भवा - घ. । १८ ...जं - घ. । १९ ...त्तां - घ. । २० एव - घ. । २१ नामा - घ. । २२ चा - घ. । २३ साध्या - घ. । २४ काम?, अश्व ? । २५ आयुर्वेदं (धनुर्वेदं) गान्धर्वं शास्त्रलक्षणम् ? । २६ नरनार्योश्च लक्षणम् ?, नवनाध्यो - घ. । २७ लम्बनम् ... - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शिल्पानि चैव सर्वाणि निमित्तज्ञानमेव च ।
भूतग्रामचिकित्सां च मातॄणां चरितं च यत् ।।३८।।
भुजगानां च सर्वेषां यच्च किञ्चिद् विचेष्टितम् ।
यच्च शास्त्रसमूहाना[२८]मष्टौ व्याकरणानि च ।।३९।।
तथा चैव पुराणानि इतिहासमशेषतः ।
पंचस्थानानि यानि स्युर्ज्योतिर्गणविचारणे[२९] ।।४०।।
मातृभूतग्रहं[३०] तन्त्रं योगिनां[३१] मतमुत्तमम् ।
अब्दैरधीतवान् सर्वं व्यास षट्पंचभिस्ततः ।।४१।।
दक्षः शुचिरदीनात्मा प्रियवागनसूयकः ।
सर्वलोकप्रियो नित्यं नानानयननन्दनः ।।४२।।
तस्याथ[३२] सप्तमे वर्षे ऋषिदेवौ तपोधनौ ।
आश्रमं समनुप्राप्तौ शिलादस्याहृतौजसौ ।।४३।।
तावभ्यर्च्य यथान्यायं शिलादः सुमहातपाः ।
सुखासीनौ समानम्य[३३] आसने परमार्चितौ ।।४४।।
मित्रावरुणनामानौ तपोयोगबलान्वितौ ।
अभिज्ञौ सर्वभूतानां त्रिलोके सचराचरे ।।४५।।
ताभ्यां समर्थितः सोपि निससाद वरासने ।
- - - - - - - - - - - - - - - - - - ।।४६।।
उवाच गुणवान् सम्यक् कुलवंशविवर्धनः ।
तमाहूय च संतुष्टः पुत्रं नन्दिनमच्युतः ।।४७।।
तयोः पादेषु शिरसापातयत्तमनिन्दितम् ।
तौ तु तस्याशिषं दिव्यौ प्रयुक्तावथ नित्यताम् ।
गुरुशुश्रूषणे भावं लोकांश्चैव तथाक्षयान् ।।४८।।

सनत्कुमार उवाच

शिलादस्तावथालंब्य आशिषं देवयोस्तदा ।
विसृज्य नन्दिनं भीतः सोपृच्छदृषिसत्तमौ ।।४९।।

---

२८ ...हेन - घ. । २९ चारयन् - घ. । ३० गृहं - घ. । ३१ न - घ., नी? । ३२ यस्यार्थं - घ. । ३३...नम्र - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शिलाद उवाच

किमर्थं मम पुत्रस्य दीर्घमायुरुभावपि ।
प्रयुक्तवन्तौ धन्यस्य(?)[३४] नाशिषं मुनिसत्तमौ ॥५०॥

मित्रावरुणावूचतुः

तवैष तनयस्तात स्वल्पायुः सर्वसंमतः ।
इतोन्यद् वर्षमेकं वै जीवितं धारयिष्यति ॥५१॥

सनत्कुमार उवाच

ततः स शोकसंतप्तोपत्यव्यसनदुःखितः[३५] ।
विसृज्य ऋषिशार्दूलावेकाकी विललाप च ॥५२॥
तस्य शोकाद् विलपतः स्वरं श्रुत्वा सुतः[३६] शुभम् ।
नन्द्या[३७]गात्तं तथापश्यत्पितरं दुःखितं भृशम् ॥

नन्द्युवाच

केन त्वं तात दुःखेन दूयमानः[३८] प्ररोदिषि ।
दुःखं ते कुत उत्पन्नं ज्ञातुमिच्छाम्यहं पितः ॥५४॥

शिलाद उवाच

पुत्र त्वं किमु वर्षेण जीवितं संप्रहास्यसि ।
ऊचतुस्तावृषीत्येवं ततो मां - - -[३९] विशत् ॥५५॥

नन्द्युवाच

सत्यं देवऋषी तात न तावनृतमूचतुः ।
तथापि तन्न[४०] मृत्युर्मे प्रभविष्यति मा शुचः ॥५६॥

शिलाद उवाच

किं तपः किं परिज्ञानं को योगः कः श्रमश्च ते ।
येन त्वं दारुणं मृत्युं वञ्चयिष्यसि[४१] पुत्रक ॥५७॥

---

३४ धन्यस्य - घ., दीनस्य? । ३५ व्यथदुः ... - घ. । ३६ सुभ - घ. । ३७ नद्या - घ. । ३८ भू (अभिभू?) - घ. । ३९ कृत्रणा? - घ. । ४० पितर्न - घ. । ४१ मुञ्चयिष्यसि - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नन्द्युवाच

न तात तपसा मृत्युं वंचयिष्ये न विद्यया ।
महादेवप्रसादेन मृत्युं जेष्यामि नान्यथा ।।५८।।
द्रक्ष्यामि शंकरं देवं ततो मृत्युर्न मे भवेत् ।
नष्टे मृत्यौ त्वया[४२] सार्धं चिरं वत्स्यामि निर्वृतः ।।५९।।

शिलाद उवाच

मया वर्षसहस्रेण तपस्तप्त्वा सुदुश्चरम् ।
महादेवः पुरा दृष्टो लब्धस्त्वं मे यतः सुतः ।
कथं द्रष्टा[४३] महादेवमेतदिच्छामि वेदितुम् ।।६०।।

नन्द्युवाच

न चापि तपसा देवो दृश्यते नापि विद्यया ।
- - -[४४] मनसा देवो दृश्यते परमेश्वरः ।।६१।।
अहमेतद्विजानामि येन[४५] द्रक्ष्यामि शंकरम् ।
त्वया विसृष्टो गत्वाहमचिरेण त्रिलोचनम् ।।६२।।
द्रष्टा तात न सन्देहो विसृजाशु ततस्तु माम् ।
अचिरेणैव कालेन मृत्युदुःखविवर्जितम्[४६] ।।६३।।
द्रक्ष्यसे मां कृतार्थं च तस्मान्मां त्वं विसर्जय ।
तिष्ठन्तं वा शयानं वा धावन्तं पतितं तथा ।।६४।।
न प्रतीक्षेत[४७] मां[४८] मृत्युरिति बुद्ध्वा शमं व्रज ।
यदि मृत्युसहस्राणि यमकोटिशतानि च ।।६५।।
अभिद्रवन्ति संतप्ता दण्डपाशोद्यतायुधाः ।
व्यथां (?) तथापि ते कर्तुं[४९] न समर्थाः कदाचन ।।६६।।
न ममैते करिष्यन्ति व्यथां लोम्ना तथैव हि ।
अवतीर्य जलं दिव्यं भावं[५०] शुद्धं समाश्रितः ।।६७।।

---

४२ तया - घ. । ४३ दृष्ट्वा - घ. । ४४ गृहेन? - घ । ४५ यस्मात् - घ. । ४६ ...तः - घ. ।
४७ ...ति घ. । ४८ वै ... - घ. । ४९ तात - घ. । ५० द्वारं - घ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अभ्यस्य[५१] रौद्रमध्यायं ततो द्रक्ष्यामि शङ्करम् ।
जपत[५२]श्चाभियुक्तस्य रुद्रभावयुतस्य[५३] च ।
न मृत्युकालबहवः (?) करिष्यन्ति मम व्यथाम् ।।६८।।

सनत्कुमार उवाच

तमेवं[५४]वादिनं मत्वा ब्रुवाणं शुद्धया धिया[५५] ।
व्यसर्जयन्नदीनात्मा धृत्या[५६] पुत्रं महातपाः ।।६९।।
अभिवन्द्य[५७] पितुः पादौ शिरसा स महायशाः ।
प्रदक्षिणं समावृत्य संप्रतस्थे[५८] विनिश्चितः ।।७०।।
अभिवन्द्य ऋषीन् सर्वान् स दिदृक्षु[५९]रुदारधीः ।
मुनिर्देवमनाश्चैव प्रणतार्तिहरं शिवम् ।।७१।।

इति स्कन्दपुराणे नदिन्तपःप्रवेशो नाम विंशतितमोऽध्यायः

सनत्कुमार उवाच

निर्गतोथ ततो नन्दी जगाम सरितां वराम्[१] ।
भुवनामिति विख्यातां सर्वलोकहितावहाम् ।।१।।
तां प्रविश्य ततो धीमानेकाग्रो द्युतिमाँस्थितः ।
स जजाप ततो रुद्रं मृत्योर्भीतः समाहितः ।।२।।
जपता तेन तत्रैव तत्परेण तदाशिषा ।
कोटिरेका यदा जप्ता तदा देवस्तुतोष ह ।।३।।

सनत्कुमार उवाच

सोवतीर्य ततो भूयः प्रयतात्मा तथैव च ।
जजाप कोटिमन्यां तु रुद्रमेवानुचिन्तयन् ।।४।।

---

५१ अद्यस्य - घ. । ५२ जगत - घ. । ५३ भावयित - घ. । ५४ तदेवं - घ. । ५५ क्रिया - घ. । ५६ कृत्वा - घ., । धृत्वा ? । ५७ ...नन्द्य - घ. । ५८ स प्रभस्ते - घ. । ५९ समदृक्षु - घ ।
१ वरम् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

द्वितीयायां ततः कोटयां संवृतायां[२] वृषध्वजः ।
अभ्याजगाम तं चैव वरदोस्मीत्यभाषत ॥५॥
स प्राह भगवन् कोटिं तृतीयामधिकामहम् ।
जप्तुमिच्छामि देवेश त्वत्प्रसादात्त्वहं विभो ॥६॥
एवमस्त्विति भूयोपि भगवान् प्रत्युवाच ह ।
- - जगाम स्वं वेश्म देव्या सह महामतिः ॥७॥
ततस्तृतीयां रुद्राणां कोटिमन्यां जजाप ह ।
युगान्तादित्यसंकाशः ततः समभवद् द्विजः ॥८॥
तस्य कोटित्रये व्यास समाप्ते ज्वलनत्विषः ।
सोमः सह गणैर्देवस्तं[३] देशमुपचक्रमे ॥९॥
स तं करेण संगृह्य तद्वृत्तसलिलाच्च ह ।
संसृज[४]न्नग्रहस्तेन नन्दिनं कालहाब्रवीत् ॥१०॥

देवदेव उवाच

शैलादे वरदोहं ते तपसानेन तोषितः ।
साधु जप्तं त्वया धीमन् ब्रूहि यत्तो[५] मनोगतम् ॥११॥

शैलादिरुवाच

जपेयं कोटिमन्यां वै भूयोपि तव तेजसा ।
वरमेतं वृणे देव यदि तुष्टोसि मे विभो ॥१२॥

भगवानुवाच

शैलादे - - - - -[६] तव तुष्टोस्मि साम्बिकः ।
यं त्वद्य वृणुषे कामं सर्वं तं प्रददामि ते ॥१३॥
ब्रह्मत्वमथ[७] विष्णुत्वमिन्द्रत्वमथवान्यताम्[८] ।
आदित्यो भव रुद्रो वा ब्रूहि किं करवाणि ते ॥१४॥

सनत्कुमार उवाच

स एवमुक्तो देवेन शिरसा पादयोर्नतः ।
तुष्टाव पुरकामांगक्रतुपर्वतनाशनम् ॥१५॥

---

२ संस्मृता - घ, समाप्ता ? । ३ व्यास देवस्तं वस - घ., स्तमुप ? । ४ संमृज ? । ५ या (जा?) तु - घ. । ६ कर्मणानेन ?, कर्मणनेन शैलादे ? । ७ मघ (द्य.) - घ. । ८ नृतां - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नमो देवाधिदेवाय[९] महादेवाय वै नमः ।
नमः कामांगनाशाय नीलकंठाय वै नमः ॥१६॥
नमस्तुषितनाशाय त्रैलोक्यदमनाय च ।
नमः कालाग्रदण्डाय उग्रदण्डाय वै नमः ॥१७॥
सर्वतः पाणिपादाय सर्वतोक्षिमुखाय[१०] च ।
सर्वतः प्रभवे चैव[११] सर्वमावृत्य तिष्ठते[१२] ॥१८॥
नमस्ते रुक्मवर्णाय तथैवातीन्द्रियाय च ।
नमः कनकलिंगाय सर्वलिंगाय वै नमः ॥१९॥
नमश्चन्द्रार्कवर्णाय योगेशायाजिताय च ।
पिनाकपाणये चैव शूलमुद्गरपाणये ॥२०॥
निषङ्गिणे[१३] खड्गिने च[१४] परश्वधधराय च ।
रथिने चर्मिणे चैव महेशाय च वै नमः ॥२१॥
नमस्त्रिशूलहस्ताय उग्रदण्डधराय च ।
नमो गणाधिपतये रुद्राणां पतये नमः ॥२२॥
नमः सहस्रनेत्राय शतनेत्राय वै नमः ।
आदित्यानां - [१५] पतये वसूनां पतये नमः ॥२३॥
नमः पृथिव्याः पतये आकाशपतये नमः ।
नमः स्वर्लोकपतये उमायाः पतये नमः ॥२४॥
नमो योगाधिगम्याय सर्वयोगप्रदाय च ।
ध्यानिनां ध्यायमानाय (?) ध्यानिभिः संस्तुताय च ॥२५॥
मृत्यवे कालदण्डाय यमाय च महात्मने ।
देवाधिपतये चैव दिव्यसंहननाय च ॥२६॥
यज्ञाय वसुदानाय स्वर्गदाय जयाय च ।
सवित्रे सर्वदेवानां धर्मयानेकरूपिणे ॥२७॥
अमृताय वरेण्याय सर्वदेवस्तुताय च ।
ब्रह्मणश्च शिरोहर्त्रे[१६] यज्ञस्य च महात्मनः ॥२८॥

---

९ ...तिदेवाय - घ. । १० सुखाय - घ. । ११ प्रभवित्रे च ? । १२ स्थानवे - घ., स्थास्नवे ? । १३ खङ्गिने - घ. । १४ चैव - घ. । १५ आदित्यानष्ट... घ., । आदित्यपतये चाष्ट ? । १६ हंत्रे - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

त्रिपुरघ्नाय चोग्राय सर्वाशुभहराय च ।
उमादेहार्धरूपाय ललाटनयनाय च ॥२९॥
महिषान्धकभर्त्रे च द्रष्ट्रे[१७] च परमेष्ठिने ।
ब्रह्मणे गुरवे चैव ब्रह्मणे जनकाय च ॥३०॥
कुमारगुरवे चैव कुमारवरदाय च ।
हलिने मुशलघ्नाय महाहासाय वै नमः ॥३१॥
मृत्युपाशाग्रहस्ताय तक्षकब्रह्मसूत्रिणे ।
सविद्युद्घनवाताय तथैव वृषयायिने ॥३२॥
हिमवद्विन्ध्यवासाय मेरोः पृष्ठनिवासिने ।
कैलासवासिने चैव धनेश्वरसखाय च ॥३३॥
विष्णुदेहार्धदत्ताय तस्यैव वरदाय च ।
सर्वभूता[१८] धियज्ञाय सर्वभूतानुकम्पिने ॥३४॥
अन्तर्भूतादिभूताय प्राणिनां जीवदाय च ।
नमस्ते मन्यमानाय अभिमानाय चैव हि ॥३५॥
बुध्यमानाय[१९] बोध्याय[२०] द्रष्ट्रे[२१] वै चक्षुषे नमः ।
नमस्ते स्पर्शयित्रे च तथैव रसनाय च ॥३६॥
नमो घ्राणाय घ्रात्रे च श्रोत्रे श्रोत्राय चैव हि ।
हस्तिने चैव हस्ताय तथा पादाय पादिने ॥३७॥
नमोस्त्वानन्दकर्त्रे च आनन्दाय च ते नमः ।
वाचेथ वाग्मिने चैव तन्मात्राय महात्मने ॥३८॥
सूक्ष्माय चैव स्थूलाय सत्वाय रजसे नमः ।
नमश्च तपसे नित्यं क्षेत्रज्ञाया[२२]जिताय च ॥३९॥
विष्णवे लोककर्त्रे च प्रजानां पतये नमः ।
नमः सप्तर्षये चैव तप्यमानाय तापिने ॥४०॥

---

१७ दृष्टे - घ. । १८ सर्वभूताय - घ. । १९ बुद्ध्यमानाय - घ. । २० बुद्ध्याय - घ. । २१ दुष्टो - घ. ।
२२ क्षेत्रज्ञाय - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ब्रह्मण्याय[२३] च - - -[२४] तथा दुर्वाससे नमः ।
शिल्पिने शिल्पनाथाय विदुषे विश्वकर्मणे ॥४१॥
अत्रये भृगवे चैव वसिष्ठाय नमोस्तुते ।
भूताय भूतनाथाय - - -[२५] पतये नमः ॥४२॥
तिष्ठते द्रवते चैव गायते नृत्यतेपि च ।
अवश्यायाप्यवध्याय अजरायामराय च ॥४३॥
अक्षयायाप्ययायैव तथाप्रतिहताय च ।
अनावेश्याय सर्वेषां दृश्यादृश्य[२६]स्वरूपिणे ॥४४॥
सूक्ष्मेभ्यश्चातिसूक्ष्माय सर्वेशाय महात्मने ।
नमस्ते भगवन् त्र्यक्ष नमस्ते भगवन् शिव ॥४५॥
नमस्ते सर्वलोकेश नमस्ते लोकभावन ।
न मे देवाधिपत्येन ब्रह्मत्वेनापि वा पुनः ॥४६॥
न विष्णुत्वेन देवेश न इन्द्रत्वेन भूतप ।
इच्छाम्यहं तवेशान गणत्वं नित्यमव्ययम् ॥४७॥
नित्यं[२७] त्वां सगणं साम्बं प्रसन्नं सपरिच्छदम् ।
द्रष्टुमिच्छामि देवेश एष मे दीयतां वरः ॥४८॥
दत्त्वा गतिं पुरा देव त्वं वैरावर्त्तनं पुनः (?) ।
शरणं त्वञ्च[२८] मे नाथ नान्यं पश्यामि कर्हिचित् ॥४९॥
त्वया त्यक्तस्य चैवाशु विनाशो[२९] नात्र संशयः ।
अन्यां गतिं न पश्यामि योस्यान्यं तेन्तकं[३०] शुभम् ॥५०॥
अनुरक्तं च भक्तं च त्वत्परं त्वदुपाश्रयम् ।
प्रतीच्छ मां सदा देव एष मे दीयतां वरः ॥५१॥

सनत्कुमार उवाच

य इदं प्रातरुत्थाय पठेदविमना[३१] नरः ।
स देहभेदमासाद्य नन्दीश्वरसमो भवेत् ॥५२॥

---

२३ ब्रह्मणा - घ. । २४ तक्राय (भक्ताय? तर्काय?) - घ. । २५ ... स्वांत - घ. । २६ दृश्यदृश्याय - घ. ।
२७ तेन - घ. । २८ त्वं च - घ. । २९ ...शं - घ, विनाशान्? । ३० यास्याम्यन्तिकं - घ. । ३१ .. लं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यश्चेमं शृणुयान्नित्यं श्रावयेद्वा द्विजातिषु ।
सोऽश्वमेधफलं प्राप्य रुद्रलोके महीयते ।।५३।।
श्रुत्वा सकृदपि[३२] ह्येतं स्तवं पापप्रणाशनम् ।
यत्र तत्र मृतो[३३] व्यास न दुर्गतिमवाप्नुयात् ।।५४।।
योधीत्य नित्यं स्तवमेतमग्र्यं[३४] देवं सदाभ्यर्चयते यतात्मा ।
किं तस्य यज्ञैर्विविधैश्च दानैस्तीर्थैः सुतप्तैश्च तथा तपोभिः ।।५५।।

⊙ इति स्कन्दपुराणे एकविंशो[३५]ध्यायः ⊙

सनत्कुमार उवाच

ततस्तु देवदेवेशो भक्त्या परमया युतम् ।
अश्रुपूर्णेक्षणं दीनं पादयोः शिरसा नतम् ।।१।।
कराभ्यां सुसुखाभ्यां तं[१] संगृह्य[२] परमार्त्तिहा ।
उत्थाप्य नयने सोम अश्रुपूर्णे[३] ममार्ज ह[४] ।।२।।
उवाच[५] चैनं[६] तुष्टात्मा वचसाप्याययन्निव ।
निरीक्ष्य गणपान् सर्वान् देव्या सह तदा[७] प्रभुः ।।३।।

देवदेव उवाच

जाने भक्तिं तव मयि जाने चार्त्तिं तवा[८]नघ ।
तस्य सर्वस्य शैलादे उदर्कं सन्निशामय ।।४।।
अमरो जरया त्यक्तो नित्यं दुःखविवर्जितः ।
अक्षयश्चाव्ययश्चैव[९] सपिता ससुहृज्जनः[१०] ।।५।।
ममेष्टो गणपश्चैव मद्वीर्यो मत्पराक्रमः ।
इष्टो मम सदा चैव मम पार्श्वगतस्सदा ।।६।।

---

३२ शिवस्य दयितं - घ. । ३३ पठतो मानसे - घ. । ३४ दग्र्यं ... - क. । ३५ ...शति(त) मो - क.(घ)।
१ तु - क. । २ संपूज्य - घ. । ३ ... र्णो - क. । ४ सः (तम्?) - क., ह्यमार्जत । ५ उत्थाय - क. ।
६ चेदं - घ. । ७ तया - घ. । ८ तथा - क. । ९ श्चैव मद्वीर्यो - घ. । १० मत्तुल्यो मत्पराक्रमः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मद्रूपश्चैव भविता महायोगबलान्वितः ।
ऋद्धिमच्चैव ते द्वीपं क्षीरोदममृताकरम् ॥७॥
संवासं च[११] प्रयच्छामि तत्र रंस्यसि[१२] सर्वदा ।
कुशेशयमयीं मालामवमुच्यात्मनस्ततः ॥८॥
आबबन्ध महातेजा नन्दिने दिव्यरूपिणीम् ।
स तया मालया नन्दी बभौ कण्ठावसक्तया ॥९॥
त्र्यक्षो दशभुजः श्रीमान् द्वितीय इव शङ्करः ।
ततो हस्ते[१३] समादाय हस्तेन भगवान् हरः ॥१०॥
उवाच ब्रूहि किं[१४] तेद्य ददानि[१५] वरमुत्तमम् ।
आश्रमश्चायमत्यर्थं तपसा तव भावितः ॥११॥
जप्येश्वर इति ख्यातो मम गुह्यो भविष्यति ।
समन्ताद् योजनं क्षेत्रं दिव्यं देवगणैर्वृतम् ॥१२॥
सिद्धचारणसंकीर्णमप्सरोगणसेवितम् ।
सिद्धिक्षेत्रं[१६] परं गुह्यं भविष्यति न संशयः ॥१३॥
कर्मणा मनसा वाचा यत्किञ्चित् कुरुते नरः ।
शुभं वाप्यशुभं वात्र[१७] सर्वं भवितृ[१८] तच्छुभम् ॥१४॥
जप्यमानः स[१९] तुल्यो[२०] वै रुद्राणां तु[२१] भविष्यति ।
यत्र तत्र मृता मर्त्या यास्यन्ति त्वत्[२२]सलोकताम् ॥१५॥
ततो जटाप्लुतं वारि[२३] गृहीत्वा हारनिर्मलम् ।
उक्त्वा[२४] नदी भवस्वेति विससर्ज महातपाः ॥१६॥
सा ततो दिव्यतोया च[२५] पुण्या मणिजला शुभा ।
हंसकारण्डवाकीर्णा चक्रवाकोपशोभिता ॥१७॥
पद्मोत्पलवनोपेता[२६] प्रावर्तत महानदी ।
स्त्रीरूपधारिणी चैव प्राञ्जलिः शिरसानता ॥१८॥

---

११ सं - घ. । १२ वत्स्यसि - घ. । १३ तत एनं - घ. । १४ कं. ? । १५ ...मि - घ. ।
१६ सिद्धक्षेत्रं - घ. । १७ वापि - घ. । १८ भवति - घ. । १९ तप्यमानस्य - घ. । २० तुल्यं - क. घ. ।
२१ तद् - क., च - घ. । २२ तव - क., देव - घ. । २३ जटाम्बू स्वकरे ? । २४ शुद्धा - घ. ।
२५ तु - घ. । २६ दलोपेता - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पद्मोत्पलदलाभाक्षी[२७] तदा देवमुपस्थिता ।
तामुवाच ततो देवो[२८] नदीं स्वय[२९]मुपस्थिताम् ।।१९।।
यस्माज्जटोदकाद् देवि प्रवृत्ता त्वं शुभानने[३०] ।
तस्माज्जटोदा नाम्ना[३१] त्वं भविष्यसि सरिद्वरा ।।२०।।
त्वयि स्नानं तु यः कुर्याच्छुचिः प्रयतमानसः ।
सोऽश्वमेधफलं प्राप्य रुद्रलोके महीयते ।।२१।।

सनत्कुमार उवाच

ततो देव्या - - - - नन्दीश्वरमतिप्रभम् ।
पुत्रस्तेयमिति प्रोच्य पादयोस्तं व्यनामयत् ।।२२।।
सा तमाघ्राय[३२] शिरसि पाणिभ्यां परिमार्जती ।
पुत्रप्रेम्णाभ्यषिञ्चत्तं स्रोतोभिः स्तनजै[३३]स्त्रिभिः ।।२३।।
पयसा शंखगौरेण देवी देवं निरीक्षती ।
तानि स्रोतांसि[३४] त्रीण्यस्याः स्रुतान्योघवती नदी ।।२४।।
नदीं त्रिस्रोतसीं[३५] पुण्यां ततस्ता[३६]मवदद्धरः[३७] ।
त्रिस्रोतसां नदीं दृष्ट्वा वृषः परमहर्षितः ।।२५।।
ननर्द नादात्[३८] तस्माच्च सरिदन्या ततोभवत् ।
यस्माद् वृषभनादेन प्रवृत्ता सा महानदी ।।२६।।
तस्माड् ढिक्किरिकान्तां[३९] वै उवाच वृषभध्वजः ।
जाम्बूनदमयं चित्रं स्वं देवः परमाद्भुतम् ।।२७।।
मुकुटञ्चाबबन्धास्य कुण्डले चामृतोद्भवे ।
तं तथाभ्यर्चितं व्योम्नि दृष्ट्वा मेघः प्रभाकरः ।।२८।।
देवोपवाह्यः सिषिचे सनादः सतडिद्गुणः ।
तस्याभिषिक्तस्य[४०] तदा प्रवृत्तो स्रोतसो भृशम्[४१] ।।२९।।

२७ भासा ?, महा - घ. । २८ देवी - क. । २९ नंदीश्वर - घ. । ३० मूतले - घ. । ३१ देवी तस्माज्जटा नाम्ना - घ. । ३२ प्य - क. । ३३ तनुजैः - घ. । ३४ स्रोतानि - क । ३५ ...सां - घ. । ३६ तत्रस्था - घ. । ३७ मवहद्धरः - क., मगमद्व्रः - घ, ...राः - क । ३८ नादं - घ., नादा (न्) - क. । ३९ दिक्कारिकां तां - घ. । ४० भिपक्तस्य - घ. । ४१ स्रोतसां नदीम् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यस्माच्च कुण्डलात् स्वर्णात्[४२] नद्येका संप्रवर्तत[४३] ।
स्वर्णोदकेति नाम्ना तां महादेवोऽभ्यभाषत ॥३०॥
जम्बूनदमया[४४]द्यस्माद् द्वितीया मुकुटा[४५]च्छुभात्[४६] ।
प्रावर्तत नदी पुण्या प्राह[४७] जाम्बूनदीति[४८] ताम्[४९] ॥३१॥
एतत्पञ्चनदं नाम जप्येश्वरसमीपगम् ।
व्याख्यातं फलमेतासां[५०] जटोदया[५१] महात्मना ॥३२॥
तच्च[५२] पञ्चनदं दिव्यं देवं जप्येश्वरं च तम् ।
त्रिरात्रोपोषितो गत्वा स्नात्वाभ्यर्च्य च[५३] शूलिनम् ॥३३॥
ब्राह्मणाँस्तर्पयित्वा च यत्र तत्र मृतो नरः ।
नन्दीश्वरस्यानुचरः क्षीरोदनिलयो भवेत् ॥३४॥
यस्तु जप्येश्वरे प्राणान्[५४] परित्यजति[५५] दुस्त्यजान् ।
नियमेनान्यथा वापि स मे गणपतिर्भवेत् ॥३५॥
नन्दीश्वरसमो नित्यं शाश्वतो ह्य[५६]क्षयोऽव्ययः ।
मम पार्श्वेऽप्यनुचरः प्रियः सन्मत एव च[५७] ॥३६॥
जप्येश्वरं पंचनदं च तद्वै यो मानवोऽभ्येत्य जहाति देहम् ।
स मे सदा स्याद् गणपो वरिष्ठस्त्वष्ट्रा समः[५८] कान्तवपुश्च[५९] नित्यम्[६०] ॥३७॥

⊙ इति स्कन्दपुराणे द्वाविंशोऽध्यायः[६१] ⊙

---

४२ यस्मात् सुवर्णान्निः सृत्य - क., तत्कुण्डलादेको - घ. । ४३ यतः साक्षात्प्रवर्तिता - घ. । ४४ जाम्बूनदमयाद् - घ. । ४५ न्मु... - क, त् मू... - घ. । ४६ भा (त्) - क. । ४७ ऊचुः - क. । ४८ जम्बू... - क. । ४९ नदीं च ताम् - घ. । ५० मेतेषां - घ., मेतस्य ? । ५१ जटोदयान् - क., जटावन - घ. । ५२ तञ्च - घ. । ५३ भ्यर्चय - क. । ५४ जनुः - घ. । ५५ प्रणान् - घ. । ५६... था - घ । ५७ तिष्ठते मत्पुरेदार (पुरद्वारि?) यावदाभूतसंप्लवम् - घ. । ५८ त्वष्टा... - क. । ५९ कान्ति ... - क. । ६० यो मां नरः स्नापयति पंचनद्यां जहाति देहं विधिवच्च तासु । इत्युत्तरार्धत्वेन दत्तः पाठो घपुस्तके । ६१ ...शतिमो - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

भगवान् देवदेवेशः सर्वभूतपतिर्हरः ।
देवीमुवाच वागीश उमां गिरिवरात्मजाम् ॥१॥
देवि[१] नन्दीश्वरं देवमभिषेक्ष्यामि भूतपम् ।
गणाना[२]वाहयिष्यामि किं वा त्वं[३] मन्यसेव्यये[४] ॥२॥

देव्युवाच

सप्तलोकाधिपत्यं च गणेशानां तथैव च ।
सर्वमर्हति देवेश नन्दी पुत्रो ममाग्रजः[५] ॥३॥

सनत्कुमार उवाच

ततः स भगवान् देवः सुरशत्रुनिषूदनः ।
प्राङमुखः स गणेशानामाह्वानमकरोत्तदा[६] ॥४॥
ततस्सहस्रशस्तत्र गणाध्यक्षा मुदा युताः ।
संप्राप्ताः सर्वलोकेशास्तत्क्षणाच्च[७] महामुने[८] ॥५॥
संप्राप्ताः सर्वलोकेशा ये रुद्राः स्वर्गवासिनः ।
अन्ये रुद्रवरा व्यास येषां संख्या न विद्यते ॥६॥
ब्रह्माण्डावरणा ये च अहिर्बुध्न्यादयो[९] मुने ।
कपालांशिविशोकाश्च शतनेत्राः शताननाः[१०] ॥७॥
अनन्तरुद्रा ये चान्ये शतवक्त्राः शतोदराः ।
सर्वतः पाणिपादाश्च सर्वदिक्षु समाश्रिताः ॥८॥
अणिमादिगुणैर्युक्ता ब्रह्मसंभूतिहेतवः ।
संप्राप्ताः सर्वलोकेशास्ताञ्छृणुष्व[११] महामुने ॥९॥
ततः करालवदनो[१२] भृकुटीभूषिताननः[१३] ।
शंखहाराम्बुगौरश्च दंष्ट्री स्रग्वी त्रिलोचनः ॥१०॥

---

१ देवी - क. । २ ...नां - क. । ३ ...त्र - घ. । ४ उमे - घ. । ५ महा... - क. । ६ ततः - घ. । ७ तच्छृणुष्व - क । ८ महात्मने - क. । ९ अजब्रध्न - घ. । १० सनातनाः - घ. । ११ ये श्रृ... - घृ. । १२ दशनो - घ. । १३ भ्रूकुटीभीषणाननः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जटासहस्रोर्ध्व[१४]शिखो[१५] ज्वालाकेशो महाहनुः[१६] ।
अग्न्यंगारकनेत्रश्च भुजगाबद्धमेखलः ॥११॥
विद्युज्जिह्वो महाकायस्तथा चैवोर्ध्वमेहनः ।
सर्पयज्ञोपवीती च परश्वधधरस्तथा ॥१२॥
भुजगाबद्धमौञ्जिजश्च भुजगैरेव कङ्कणैः ।
निनादान् संसृजानश्च[१७] अशनीपातसन्निभान् ॥१३॥
डिण्डि[१८]रित्येव विख्यातो गणपः समदृश्यत ।
आत्मनः सदृशानाञ्च कोटिभिर्दशभिर्वृतः ॥१४॥
गणपानां सुरेशानां योगिनां दीप्ततेजसाम् ।
ततोपरो महाकेशो महाकायोर्ध्वमेहनः ॥१५॥
त्र्यक्षोनलशतप्रख्यः अशनीपातनर्दनः ।
नृत्यन् गायँश्च चित्राणि कुर्वन्नाट्या[२०]न्यनेकशः ॥१६॥
ज्वलद्दंष्ट्रो महाहासो बृहत्स्कन्धः पिनाकधृक् ।
कोटिभिर्दशभिस्सार्धं द्विगुणाभिर्महात्मनाम् ॥१७॥
गणानां चित्ररूपाणां युगपत् संप्रदृश्यत ।
सिंहास्यगजकेशास्यै[२१]र्द्वीपिशार्दूलकाननैः[२२] ।
सोषाढिर्नाम[२३] गणपो व्यास तत्र समागतः ॥१८॥

सनत्कुमार उवाच

अथान्यो व्यास संप्राप्तो युगान्तादित्यसप्रभः ।
शतयोजनबाहुश्च दिग्वासाश्चोर्ध्वमेहनः ॥१९॥
अतिदीर्घोतिमेढ्रश्च लम्बभ्रूः स्थूलनासिकः ।
वृत्तास्यश्च[२४] महाक्षश्च भ्रुकुटीसंहताननः ॥२०॥
पंचयोजनविस्तीर्णो दीर्घो वै तावदेव च ।
दंष्ट्राश्चतस्रो वक्त्रेण बिभ्रच्छंखेन्दुपाण्डराः ॥२१॥

---

१४ स्रार्धं - घ. । १५ ...शिरा क. घ. । १६ मना... - घ. । १७ अट्टहासानसृजँश्च - घ. । १८ दण्डि - घ. ।
१९ गणानां च - घ. । २० ...न्द्या - क., दान - घ. । २१ ...नां शरभानां च - घ. । २२ रक्षसाम् - घ. ।
२३ ससोभोना... - घ. । २४ ... क्षश्च - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पंचाग्निको[२५]र्ध्वकर्णश्च पाशहस्तो मनोजवः[२६] ।
वृतः कोटिशतेनैव सदृशाना[२७]मदृश्यत ।।२२।।
भार[२८]भूतीति विख्यातो महायोगबलान्वितः ।
गणपो देवदेवस्य समीपं सोऽभ्यगच्छत ।।२३।।
ततः कुन्देन्दुशंखाभं हिमराश्यम्बुसन्निभम् ।
मृणालस्फटिस्काभं च भस्मकक्षा[२९]वलम्बनम् ।।२४।।
गृहीत्वा चाशनीहासं[३०] त्रिपादं चीरवाससम् ।
शतोदरं[३१] त्रिशिरसं त्रिनेत्रं चोर्ध्वमूर्धजम् ।।२५।।
ज्वालामालोग्र[३२]केशञ्च व्याघ्रचर्माजिनाम्बरम्[३३] ।
वायुवेगं महाहासं भुजगाबद्धमेखलम् ।।२६।।
महोरगकृतापीडं शंकु - -[३४] र्ध्वमेहनम् ।
भस्मप्रहरणं चैव महादंष्ट्रं महाहनुम्[३५] ।।२७।।
महागणपतिं वीरं ज्वर इत्येव विश्रुतम् ।
कोटीशतवृतं तञ्च गणपं सोऽन्वपश्यत ।।२८।।
ततोपरः सौम्यरूपो भस्मदिग्धाङ्ग एव च ।
त्रिशूलपाणिर्दिग्वासा महायोगबलान्वितः ।।२९।।
बहुवेषधरश्चैव ध्यानयोगपरायणः ।
सोमवर्ण इति ख्यातः कोटीशतवृतः प्रभुः ।।३०।।
तादृशानां गणाध्यक्षो देवेनाहूत आगतः ।
सहस्रज्वालभस्मांगो महानेत्रोर्ध्वमेहनः ।।३१।।
अथापरो महाकायः शूलपाणिर्महाबलः ।
युगान्तानलसंकाशः स्थिरः स्थिरयशोबलः ।।३२।।
चन्द्रमौलिर्महाकेशश्चतुर्बाहुर्विलोहितः ।
एकपादैर्महाकायैस्त्र्यक्षैस्तैः शूलपाणिभिः ।।३३।।

---

२५ पंचाग्नि... - क., पंचजिह्वो - घ. । २६ यः - घ. । २७ सदृशां स - घ. । २८ तावद् - घ. । २९ धर्मकर्मा घ. । ३० साशनिपाशं - घ. । ३१ समोदरं - घ. । ३२ माल्यग्र - घ. । ३३ चिना ... (चिता?) - घ. । ३४ कर्णो - क., कान्तो - घ. । ३५ ...ननम् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वृतः कोटीशतेनैव स्थाणुस्तत्राभ्यवर्तत ।
स महापार्षदो रुद्रः[३६] सर्वासुरनिवर्हणः ॥३४॥
ततोपरः पट्टसेनो[३७] ह्रस्वपादोदरः शुचिः ।
सहस्त्रबाहुचरणः सहस्त्राक्षः प्रतापवान् ॥३५॥
करालदशनश्चैव कृष्णसर्पाम्बरच्छदः ।
त्र्यक्ष[३८] श्चन्द्रकृतापीडः कण्ठमालाविभूषितः ॥३६॥
उग्रसेन इति ख्यातः कोटीशतवृतः स च[३९] ।
आगात्समीपं देवस्य आहूतः स्वयमीश्वरः ॥३७॥
ततोपरः समावेदे देवं चन्द्रार्धधारिणम् ।
चतुर्वक्त्रो महातेजाश्चतुर्विशेक्षणः प्रभुः ॥३८॥
सहस्त्रबाहुर्ज्वालास्यो महानेत्रोर्ध्वमेहन ।
करालदशन[४०]श्चैव शंकुकर्णो[४१] महानखः ॥३९॥
असिपाणिर्महातेजाः शतपादश्शतोदरः ।
विद्युत्केशोतिहासश्च तथैवोभयतो गतिः ॥४०॥
अजैकपादिति ख्यातो वृतः कोटिशतेन सः ।
काञ्चनोपलवृक्षाढ्यः समेघ इव पर्वतः ॥४१॥

सनत्कुमार उवाच

आगात्ततोपरो व्यास गणपः सुमहाबलः ।
सर्वतो वदनः[४२] श्रीमान् सर्वतः पाणिपादभृत्[४३] ॥४२॥
ह्रस्वबाहूरु[४४]पादश्च अशनिं धारयञ्छुभम्[४५] ।
शतैर्वृत[४६]श्च कोटीनामष्टाभिश्चात्मनः समैः ॥४३॥
निकुम्भ इति विख्यातः शतपादोदराननः ।
आगात्ततोपरश्चापि विद्युत्केशो महाबलः ॥४४॥
चन्द्रमालाधरो घोरः प्रहसन्[४७] प्रविचालयन्[४८] ।
दण्डधारी महावक्त्रः शंखकुन्देन्दुसप्रभः ॥४५॥

---

३६ रौद्रः - घ. । ३७ पट्टिशेनो - घ. । ३८ स्त्र्यक्ष - क. । ३९ प्रभुः - घ. । ४० वदन - घ. ।
४१ कान्ताकुर्णो - घ. । ४२ वरदः - घ. । ४३ .. धृक् - क. । ४४ बाहुक - घ. । ४५ ... भाम् - घ. ।
४६ वृत्यै - क. । ४७ सहस्त्रं - घ. । ४८ प्रतिचारयन् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गणकोटीशतवृतः परमम्परतापनः ।
ततोपरः सहस्रेण कोटीनां गणपो वृतः ॥४६॥
सूर्यमालास्रजं बिभ्रदाजगाम महातपाः ।
स सूर्याप्यायनो नाम देवस्य परमप्रियः ॥४७॥
धनुष्पाणिर्महातेजा विश्रुतः स[४९] महाद्युतिः ।
तथान्यः[५०] सर्पमालश्च[५१] चक्राभरण एव च ॥४८॥
चक्रायुधो महातेजा ह्रस्वपाद[५२]कटीकरः[५३] ।
स नाम्ना विश्रुतो लोके ग्रहाप्यायन इत्युत ॥४९॥
गणकोटिशतैः षड्भिर्वृतस्समनुधावत ।
शंकुकर्णोभ्ययाच्चैव गणकोटया महाबलः ॥५०॥
नन्दिकश्चापि दशभिः पिङ्गाक्षोष्टाभिरेव च ।
विनायकश्चतुःषष्टया कुष्माण्डो नाम विश्रुतः ॥५१॥
हिरण्यवर्णः षड्भिश्च एकपादस्तथैव च ।
धूम्रकेशो द्वादशभिः पताकी दशभिस्तथा ॥५२॥
सहस्रघंटोष्टादशभिस्तपः पंचभिरेव च ।
सहस्रशीर्षः षड्भिश्च भवः कोटिसमावृतः ॥५३॥
वरो दशभिरभ्यागात् कुम्भकर्णस्तथाष्टभिः ।
विष्वक्सेनः सहस्रेण अनदस्तु शतेन वै ॥५४॥
आवेशनी[५४] तथाष्टाभिः सप्तभिश्च प्रवर्तनः[५५] ।
महारवः सहस्रेण गणानां गणपो वृतः ॥५५॥
चतुर्मुखो द्वादशभिस्तथा बाहुप्रहारकः[५६] ।
महाकालः शतेनैव तथाग्निशिखरो गणः ॥६६॥
आदित्यमूर्धा कोटया च तथा चैव धनावहः ।
सन्नाभ[५७]श्च शतेनैव कुक्कुटोष्टाभिरेव च ॥५७॥

---

४९ सु - घ. । ५० अथान्यः - घ. । ५१ शपमानश्च - घ. । ५२ क्रमुपाद - घ । ५३ कटः - क, घ. ।
५४ — नः? । ५५ प्रतर्दनः? । ५६ वाहूपकारकः - घ. । ५७ ... म - फ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कुन्दश्च पञ्चदशभिस्तथा संकोटकोपरः ।
अमोघभूतिः कोटचा[५८] च तथा चैवाघभूतिकः[५९] ॥५८॥
एकपादोपरः षष्टचा तथा सप्तभिरारणः[६०] ।
महाबलश्च[६१] नवभि[६२]रपस्मारश्च विश्रुतः ॥५९॥
नीलो नवत्या देवेशः पूर्णभद्रस्तथैव च ।
निर्ऋति[६३]श्चैव सप्तत्या कोटीनामभ्यगात् सह ॥६०॥
कोटीकोटीसहस्राणां शतैर्विंशतिर्भिवृताः ।
ईतय[६४]स्तत्र चाजग्मुर्महायोगबलान्विताः ॥६१॥
भूताः कोटिसहस्रेण प्रमथाः कोटिभिस्त्रिभिः ।
वीरभद्रश्चतुःषष्टचा वृषभश्च महाबलः ॥६२॥
मेघः सौदामिनीमालो[६५] नवत्या संवृतो[६६]भ्यगात् ।
प्रभाकरश्च विंशत्या विट्पति[६७]श्च महाबलः ॥६३॥
गिरिको[६८] मेघनादश्च उदरो मणिरेव च ।
काष्ठकर्णश्च दिव्यात्मा विश्वरूप[६९]श्च विश्रुतः ॥६४॥
शतमन्युस्तथा चैव पञ्चाक्षश्चैव वीर्यवान् ।
तालकेतुश्च[७०] षंडश्च कपाली गजनाशनः[७१] ॥६५॥
संवर्तकस्तथा चैत्रस्त्रैलोक्यदहन[७२]स्तथा ।
लोकान्तकश्च दीप्तात्मा हेमकुण्डल एव च ॥६६॥
मृत्युश्चैव यमश्चैव कालो विषहरस्तथा ।
शतमायो महामायः सर्वत्राशरण[७३]स्तथा ॥६७॥
एकशृङ्गी च विख्यातस्तथा भृङ्गिरिटिश्चयः ।
एते चान्ये च गणपा गुह्या ये च महाबलाः ॥६८॥
तत्राजग्मुर्मुदा युक्ताः सर्वे चित्रास्त्रयोधिनः[७४] ।
गायन्तश्च द्रवन्तश्च नृत्यन्तश्च महाबलाः ॥६९॥

---

५८ . टचौ - घ. । ५९ रौअघभूतिकः - घ, चानघ? । ६० ...णाः - क. । ६१ ... रश्च - घ. ।
६२ ... ति - क. । ६३ निवृत्ति - घ. । ६४ दूतय - घ. । ६५ मनीमानो - घ., माला - क. ।
६६ संभृतो - घ. । ६७ विद्युति - घ. । ६८ विवेको - घ. । ६९ . विल्वरूप - क. । ७० अलकेतुश्च - घ. ।
७१ कपालजगदासनः - घ. । ७२ सहन - घ. । ७३ पूर्वताभरण - घ. । ७४ दिव्यास्त्रयोधिनः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मुखाडम्बरवाद्यानि वादयन्तस्तथैव च ।
रथैर्नागैर्हयैश्चैव[७५] ययुर्मर्कटवाहनाः[७६] ॥७०॥
व्याघ्रसिंहविडालैश्च सर्पैः पक्षिभिरेव च ।
श्वापदैश्च तथानेकै[७७]रत्नैश्च विविधैः शुभैः ॥७१॥
विमानेषु तथारूढा मानुषेषु[७८] तथापरे ।
पुष्पकेन विमानेन तथा मत्तद्विपेन च ॥७२॥
छंदं कृत्वा तथा शं - किन्नरोरगचारणैः[७९] । (?)
उत्तमायुधयुक्तेन हंसयुक्तेन चापरे ॥७३॥
नानाविमानमारूढाः कोटिशस्तत्र चापरे ।
भेरीशृंग[८०]मृदङ्गैश्च पणवानकगोमुखैः ॥७४॥
वादित्रैर्विविधैश्चैव पटहैरेकपुष्करैः[८१] ।
भेरीझर्झर[८२]सन्नादैराडम्बरकडिण्डिमैः ॥७५॥
मड्डूकै[८३] र्वेणुवीणाभिर्विवृषैस्तुणवैरपि[८४] ।
दर्दरै[८५]स्तलघातैश्च[८६] कच्छपैः पणवैरपि ॥७६॥
वाद्यमानैर्महायोगा आजग्मुर्देवसंसदम् ।
हंसजालेन दिव्येन पद्मयोनिः पितामहः ॥७७॥
मुनिभिर्योगसंसिद्धैर्वृतः सर्वैः समन्ततः ।
ऋग्वेदो दक्षिणे भागे दिव्यकुंडलभूषितः ॥७८॥
पश्चिमे सामवेदश्च नाना (?) रूपधरः शुभः ।
अथर्वा चोत्तरे चैव वह्निनेत्रधरः प्रभुः ॥७९॥
यजुर्वेदस्तु पूर्वेण विद्युद्रूपधरस्तथा ।
इतिहासपुराणानि नानारूपधराणि च ॥८०॥
अग्रतो दीपयानेन तेपि तत्र प्रजग्मिरे ।
शिवभक्तो महायोगी[८७] गरुडस्थो जनार्दनः ॥८१॥

---

७५ श्चैवा - क., श्चापि - घ. । ७६ वायुन ... - घ. । ७७ नथीनकै - घ । ७८ मनुष्येषु - क. ।
७९ ... णाः - घ । ८० शंत्र - घ. । ८१ पुष्पकैः - घ । ८२ मुरज - घ । ८३ मंडूकैः - घ ।
८४ त्रिविधैः पटहै .. - घ. । ८५ दर्गौ - घ. । ८६ ...लवातैश्च - क. घ. । ८७ महाभोगी - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सर्वैः स्वीयैः परिवृतस्तत्रागात् पार्षदैः[८८] सह ।
वृत आत्मसमैर्दिव्यैर्विष्णुरूपधरैः शुभैः ॥८२॥
दृष्ट्वा नारायणं प्राप्तं महादेवोब्रवीदिदम् ।
वाचा गंभीरया शंभुस्तदेवं लोकभावनम् ॥८३॥
शृणु विष्णो वचो मह्यं तद्वक्ष्यामि जनार्दन ।
अभिषेकं प्रयच्छस्व नन्दिनि मम सुप्रिये ॥८४॥
प्रहस्य शंकरं[८९] देवो भूयो नारायणोब्रवीत् ।
यथा वदसि देवेश करिष्येहं वृषध्वज ॥८५॥
देवानामपि देवस्त्वं पुमान् त्वं - - न संशयः ।
शक्र ऐरावतारूढ आजगाम तदन्तिकम् ॥८६॥
वसुभिर्मातरश्चैव यमवरुणवित्तपैः ।
पृथग्विमानसंस्थैश्च छादयित्वा नभस्तलम् ॥८७॥
प्रलयान्ते च सृष्टौ तु यादवासन (?) संज्ञया ।
ब्रह्मादिरूपं यातेमा संप्राप्ता गणरूपिणः (?) ॥८८॥
ते विश्वकर्माणममित्रहासां[९०] विश्वेशमेकाक्षरमव्ययश्च ।
सहस्रनेत्रप्रतिमातिभास्वराः[९१] प्रणेमुरुच्चैरपि चाभिनेदुः ॥८९॥

⊙ इति स्कन्दपुराणे गणपाह्वानो नाम त्रयोविंशोध्यायः ⊙

सनत्कुमार उवाच

ते गणेशा[१] महासत्वाः सर्वदेवश्वरेश्वरम्[२] ।
प्रणम्य देवदेवञ्च[३] इदं वचनमब्रुवन् ॥१॥
भगवन् देवतारिघ्न देवदेवाम्बिकापते ।
किमर्थं वयमाहूता आज्ञापय कृतं हि तत्[४] ॥२॥

---

८८ सरैः - घ. । ८९ संवरा - घ. । ९० ?िहा - घ. । ९१ भास्करा ... घ ।
१ गणेशाश्च - घ. । २ सर्वे देवासुरेश्वराः - घ. । ३ देवदेवं च - घ. । ४ महत् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

किं सागरान् शोषयाम यमं वा सह किङ्करैः ।
हन्म मृत्युं च कालं च[५] न भवत्यस्य कोप्यज ॥३॥
बद्ध्वेन्द्रं[६] सह देवैश्च सविष्णुं सह वायुना ।
आनयाम सुसंक्रुद्धा दैत्यान् वा सह दानवैः ॥४॥
कस्याद्य व्यसनं घोरं करिष्यामस्तवाज्ञया ।
कस्य वा[७]द्योत्सवं देव सर्वकाम[८]समृद्धिमत् ॥५॥
तांँस्तथावादिनः सर्वान्नमतो भक्तवत्सलः ।
उवाच देवः संपूज्य गणान्[९] गणपतिर्भवः ॥६॥

देवदेव उवाच

शृणुध्वं यत्कृते यूयमिहाहूता जगद्धिताः ।
श्रुत्वा च प्रयतात्मानः कुरुध्वं तदशङ्किताः ॥७॥
नन्दीश्वरोयं पुत्रो नः सर्वेषामीश्वरेश्वराः[१०] ।
प्रियो[११]ग्रनायकश्चैव सेनानीर्वः समाहितः ॥८॥
तमिमं मम सन्देशाद्यूयं सर्वेभिसंमताः[१२] ।
सेनान्यमभिसिञ्चध्वं[१३] महायोगपतिं पतिम् ॥९॥
अद्यप्रभृति युष्माकमयं नन्दीश्वरः शुभः ।
प्रियो गौरवयुक्तश्च सेनानीरमरः प्रभुः ॥१०॥

सनत्कुमार उवाच

एवमुक्ते भगवता गणपाः सर्व एव ते ।
एवमस्त्विति संमन्त्र्य संभारानाहरँस्ततः ॥११॥
तस्य रूपाश्रयं दिव्यं जाम्बूनदमयं शुभम् ।
आसनं मेरुसंकाशं मनोरममथाहरन् ॥१२॥
शातकुम्भमयश्चापि चारुचामीकरप्रभम् ।
मुक्तादामावलम्बं च मणिरत्नावभासितम् ॥१३॥

---

५ मृत्युमुतामृत्युन्न- क. । ६ महेन्द्रं - घ. । ७ चा ... - घ । ८ कार्यं - क । ९ सर्वान् - घ. । १०... र - क. । ११ यं - घ. । १२ तिसंमताः - घ. । १३ सेनापत्येमिसिञ्चध्वं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्तम्भैश्च वैदूर्यमयैः किंकिणीजालसंवृतम् ।
चातूरक्तकसंयुक्तं[१४] मण्डपं बिभ्रतो मुखम् ॥१४॥
कृत्वा चक्रुश्च तन्मध्ये तदासनवरं शुभम् ।
तस्याग्रतः पादपीठं नीलं वज्रावभासितम् ॥१५॥
चक्रुः पादप्रतिष्ठार्थं कलशौ चास्य पार्श्वगौ ।
संपूर्णौ[१५] परमाम्भोभिररविन्दावृताननौ ॥१६॥
अग्रतोऽग्निं समाधाय[१६] वृषभञ्चापि पार्श्वतः[१७] ।
सवत्सां सुरभिञ्चापि तस्य पार्श्वेथ दक्षिणाम्[१८] ॥१७॥
छत्रं शतशलाकं च जाम्बूनदमयं[१९] शुभम्[२०] ।
शंखहाराम्बुगौरेण पृष्ठेनाभिविराजितम् ॥१८॥
व्यजनं चन्द्रशुभ्रञ्च हेमदण्डं सुचारुमत् (?) ।
मालां कुशेशयानां च भ्रमरावलिसेविताम् ॥१९॥
आनिन्युस्तत्र गणपा नन्द्यावर्त्तांश्च काञ्चनान् ।
पुनर्वसुञ्च पुष्यञ्च द्वौ मत्स्यौ वरुणालयौ ॥२०॥
स्वस्तिकं वर्धमानं च श्रीवत्सं चैव काञ्चनम् ।
कीचका वेणवश्चैव कन्याश्चैवाभिपूजिताः ॥२१॥
ऐरावतं सुप्रतीकं गजावेतौ च पूजितौ ।
ध्वजञ्च पूजितं दिव्यं शंखं चैवेन्दुवर्चसम् ॥२२॥
कलशानां[२१] सहस्रञ्च काञ्चनानां सुवर्च्चसाम् ।
राजतानां सहस्रञ्च पार्थिवानां तथैव च ॥२३॥
ताम्राणामथ दिव्यानां सहस्रमनलत्विषाम् ।
वासोयुगं वृक्षजं च विरजः सूक्ष्ममेव च ॥२४॥
मुकुटं काञ्चनं चैव सुकृतं विश्वकर्मणा ।
कुण्डले चामले दिव्ये वज्रञ्चैव वरायुधम्[२२] ॥२५॥

---

१४ चानु ... - क., चातु .. - क. टि., चारुदण्डैः सुसंयुक्तं - घ. । १५ सुपूर्णौ - घ. । १६ समादाय - क. ।
१७ ...बः - घ. । १८ ...णे - घ. । १९ जम्बूनदमयं - क. । २० ततं - घ. । २१ शलाकानां - क. ।
२२ ... वाकरायुधम् - क., परा . - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पट्टिशश्च महद्दिव्यं शूलं चाशनिमेव च ।
जाम्बूनदमयं[२३] सूत्रं केयूरद्वयमेव च ॥२६॥
हारश्च मणिचित्राङ्गं रोचना रुचकं[२४] तथा ।
नलभा[२५] पारियात्रं[२६] च वर्जं[२७] कङ्कण[२८]मेव च ॥२७॥
दर्भाँश्च दिव्यान् समिध आज्यं धूपमथापि च ।
समन्तान्[२९] निन्युरव्यग्रा गणपा देवसम्मताः ॥२८॥
ततो दिशः समुद्रा[३०]श्च वरुण - - - - - [३१] ।
नभोग्निर्वसवश्चैव[३२] चन्द्रादित्यौ ग्रहैस्सह ॥२९॥
तारारूपाणि सर्वाणि नक्षत्राणि ध्रुवस्तथा[३३] ।
रुद्रा रक्षांसि यक्षाश्च अश्विनौ दैत्यदानवाः ॥३०॥
गन्धर्वाप्सरसश्चैव नारदः पर्वतस्तथा ।
पृथिवी च समुद्राश्च वर्षाणि गिरयस्तथा ॥३१॥
वृक्षाश्च वीरुधश्चैव ओषध्य[३४]श्च महाबलाः ।
नद्यः सर्वाः समाजग्मुर्वसवश्चैव[३५] सर्वशः ॥३२॥
लोकस्य मातरश्चैव पृथिवी स्वर्ग एव च ।
भूतानि प्रकृतिश्चैव इन्द्रियाणि च सर्वशः ॥३३॥
तीर्थानि चैव सर्वाणि दानानि विविधानि च ।
ऋचो यजूंषि सामानि अथर्वाङ्गिरसा अपि[३६] ॥३४॥
यज्ञाश्च क्रतवश्चैव इष्टयो नियमा[३७]स्तथा ।
छन्दांसि चैव सर्वाणि[३८] पिशाचा देवयोनयः ॥३५॥
ब्रह्मा च ऋषयश्चैव विष्णुः सानुचरस्तथा ।
प्राचीं प्रतीचीं ये रुद्रा दक्षिणामुत्तरं तथा ॥३६॥
अधश्चोर्ध्वं च ये रुद्राः साध्याः[३९] पितर एव च ।
तेष्वागतेषु सर्वेषु भगवान् गोवृषध्वजः ॥३७॥

---

२३ पट्ट ... - क. । २४ रोमानां कवचं - घ. । २५ जलतां - घ. । २६ परिहार्यं - घ. । २७ कर्ष - घ. ।
२८ कङ्किण - क. । २९ संमन्त्रा (न्) (न्त्य?) - क. । ३० सपाला? । ३१ वरुणो धनदो यमः? ।
३२ वृक्षाश्च वीरुधश्चैव - घ. । ३३ आदित्याः सर्वशस्तथा - घ. । ३४ वारिण्यौषध्यो घ. । ३५ परम - घ. ।
३६ वपि - क. घ. । ३७ इष्टीः सनियमा क. । ३८ च यथार्हाणि - घ. । ३९ आजग्मुस्ते - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सर्वं कार्यविधिं कर्तुमादिदेश पितामहम् ।
एकैकं कलशं तत्र सर्वौषधिसमन्वितम् ॥३८॥
कृत्वाद्भिः पूरयित्वा च कुशेशययुगावृतम्[४०] ।
जयाञ्च विजयाञ्चैव सिंहीं व्याघ्रीं तथैव च ॥३९॥
सुवर्चलां शंखपुष्पीं विष्णुक्रान्तां पुनर्नवाम् ।
कुमारीं चन्द्रकान्ताञ्च मृतसञ्जीवनीमपि ॥४०॥
आदित्यवर्चसं चैव अमृतां श्रीनिकेतनाम् ।
तथा कुमुद्वतीं चैव प्राक्षिपँस्ते तथौषधीम्[४१] ॥४१॥
पार्थिवेषु तदा व्यास सर्वेष्वेव गणेश्वराः ।
सौवर्णेषु तु सर्वेषु तीर्थानि विविधानि च ॥४२॥
दानानि चैव सर्वाणि भगवान् संन्यवेशयत् ।
राजतेषु च कुम्भेषु मन्त्राँश्छन्दांसि चैव ह ॥४३॥
ऋतुमत्यश्च[४२] विविधा इष्टीः काम्यान् तथेतरान् ।
औदुम्बरेषु सर्वेषु सरितः सागराँस्तथा ॥४४॥
तपांसि नियमाँश्चैव भगवानभिविन्यसन्[४३] ।
एकैकं कलशं तत्र अभिपूर्या[४४]भिमन्त्र्य च ॥४५॥
वेष्टयित्वा च सूत्रेण देवेभ्यः प्रददौ विभुः ।
स जग्राह तदा ब्रह्मा एकं कलशमात्मना ॥४६॥
विष्णवे च ददावेकमेकमिन्द्राय धीमते ।
गणपेभ्य[४५]स्तथा चान्यानृषिभ्यश्च पितामहः ॥४७॥
ततः श्रेष्ठासने[४६] तस्मिन्नुपवेश्य महामनाः ।
अर्चयित्वा तु तं[४७] ब्रह्मा स्वयमेवाभ्यषिञ्चत ॥४८॥
ततो विष्णुस्ततः[४८] शक्र ऋषयश्च सहामरैः ।
गणाधिपाश्च ते सर्व[४९] अभ्यषिञ्चन्त नन्दिनम् ॥४९॥

---

४० मुखावृतम् - क., युतो ... - घ. । ४१ वनौषधीः - घ. । ४२ क्रतुं यज्ञाँश्च - घ., ऋतुमत्याश्च - क. ।
४३ नभ्यविन्यसत् - क., नेत्य - घ. । ४४ अभिपूज्या - घ. । ४५ गणसेना - क., गणेशेभ्य? ।
४६ श्र ष्वा (स्वा) सने - क. । ४७ ततो - क. । ४८ ...स्तथा - घ. । ४९ सर्वे ते - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वासोयुगं च तद्दिव्यं[५०] गन्धान्दिव्यांस्तथैव च ।
केयूरे[५१] कुण्डले[५२] चैव मुकुटं हारमेव च ॥५०॥
पट्टिशं शूलवज्रे च अशनी[५३] च ददौ स्वयम् ।
छत्रं जग्राह देवेन्द्रो[५४] वायुर्व्यजनमेव च ।
ऋषयस्तुष्टुवुश्चैनं[५५] पितामहपुरोगमाः ॥५१॥

विष्णुरुवाच (?)

नमः कुष्माण्डराजाय[५६] वज्रोद्यतकराय च ।
शालंकायनपौत्राय[५७] हलमार्गोत्थिताय च ॥५२॥
शिलादस्य च पुत्राय रुद्रजप्यपराय[५८] च ।
रुद्रभक्ताय देवाय नमोन्तर्जलशायिने ॥५३॥
गणानां पतये चैव भूतानां पतये नमः ।
उमापुत्राय देवाय शिवलब्धवराय च ॥५४॥
रुद्रस्य प्रियपुत्राय पट्टिशायुधधारिणे[५९] ।
नमो दंष्ट्राकरालाय ललाटनयनाय च ॥५५॥
प्रमथाय[६०] वरेण्याय[६१] ईशानायार्पिताय[६२] च ।
द्वाराध्यक्षाय शूराय रुद्राय वरदाय च ॥५६॥
नमः सर्वार्थसिद्धाय सुयशां[६३] पतये नमः ।
नमः प्रवरमालाय[६४] क्षीरोदनिलयाय च ॥५७॥
महागणाधिपतये महायोगेश्वराय च ।
दिण्डिमुण्डाय[६५] चण्डाय एकाक्षररताय च ॥५८॥
अक्षयाया[६६] व्ययायैव[६७] अजराया[६८] मराय[६९] च ।
पशूनां पतये चैव जेत्रे[७०] मृत्योस्तथैव च ॥५९॥

---

५० तथा दिव्यं - घ. । ५१ ... रं - घ. । ५२ ... लं - घ. । ५३ मसनी - घ., - - नी - क. । ५४ चैवास्य - क. । ५५ ... व - क. । ५६ पतये - घ । ५७ गोत्राय - घ. । ५८ कराय - घ., तराय - क । ५९ ग्राय वै नमः - घ. । ६० प्रथमाय - क. । ६१... नां (?) । ६२ मिताय - घ. । ६३ स्वयशां - घ. । ६४ मानाय - घ. । ६५ दान्तक्षताय - घ. । ६६ अक्षराय - घ. । ६७ मृतायैव - क. । ६८ अजयाय - क. । ६९ व्ययाय - क. । ७० जैत्रे - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नमः पवनवेगाय सर्वज्ञायाजिताय च ।
अनेकशिरसे चैव अनेकचरणाय च ॥६०॥
किरीटिने कुण्डलिने महापरिघबाहवे ।
सर्वान्[७१] देवगणाँश्चैव पाहि देव[७२] नमोस्तु ते ॥६१॥

सनत्कुमार उवाच

एवं स्तुत्वा ततो देवस्तस्मै व्यास महात्मने ।
प्राञ्जलिः प्रयतो भूत्वा जयशब्दं चकार ह ॥६२॥
ततो गणा जयेत्यूचुस्ततो देवास्ततो[७३] सुराः ।
ततः सर्वाणि भूतानि ब्रह्मा शक्रस्तथैव च ॥६३॥
ततः शंखाँ[७४]श्च भेरी[७५]श्च पटहाडम्बराँस्तथा ।
वंशाँश्च पणवाँश्चैव क्रकवान् गोविषाणकान्[७६] ॥६४॥
डिण्डिमान् वेणुकाँश्चैव मर्दलाँश्चैव सर्वशः ।
अवादयन्त गणपा हर्षयन्तो मुदा युताः ॥६५॥

सनत्कुमार उवाच

नन्दीश्वरस्य[७७] य इमं स्तवं देवाभिनिर्मितम् ।
पठेत सततं मर्त्यः[७८] स गच्छेत् तत्सलोकताम्[७९] ॥६६॥
नमो नन्दीश्वरायेति कृत्वा यः स्वप्नमाचरेत् ।
तस्य कुष्माण्डराजेभ्यो न भयं विद्यते क्वचित् ॥६७॥
यत्रायं स्थाप्यते नित्यं स्तवः परमपूजितः ।
न भयं तत्र भवति ग्रहेभ्यो व्यास सर्वदा ॥६८॥
नन्दीश्वरं ये प्रणमन्ति [८०] मर्त्या नित्यं प्रसन्नेन्द्रियशुद्धसत्वाः ।
ते देवदेवस्य सहाद्रिपुत्र्या [८१] इष्टा वरिष्ठाश्च गणा भवन्ति ॥६९॥

⊙इति स्कन्दपुराणे नन्दीश्वरस्तवश्चतुर्विंशतितमोध्यायः⊙

---

७१ देवान् मे गणाँ - क. । ७२ आदिदेव - घ. । ७३ ततः - घ. । ७४ शंखा - घ. । ७५ भेर्य-क. घ. ।
७६ विषाणिकाम् - क., कोविषाणिकं - घ. । ७७ राय - घ । ७८ लोकः - घ. । ७९ मम सलोकताम् क., तस्य - घ. । ८० प्रलपन्ति - घ., प्रजपन्ति ? । ८१ महा ... - क. घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

ततस्तत्रागतान्देवो[1] देवताधिपतिर्भव: ।
मरुत: प्राह संपूज्य[2] कन्यार्थं सद[3]सत्पति: ॥१॥
मरुतो[4] ये महावेगा महासत्वा महौजस: ।
आमन्त्य नाम्ना तानीश: सशक्र:[5] सपितामह:[6] ॥२॥
युष्माकं सुयशां कन्यां सनसां[7] दिव्यरूपिणीम् ।
दातुमर्हथ संपूज्य[8] स्नुषा सा नौ भविष्यति[9] ॥३॥

मरुत[10] ऊचु:

त्वमस्माकं च तस्याश्च[11] सर्वस्य जगतस्तथा ।
प्रभविष्णुस्त्रिलोकेश न[12] नो याचितुमर्हसि ॥४॥
त्वयैव देया[13] ग्राह्या च त्वन्नो गतिरनुत्तमा ।
मा न: परानिवेशान याचनेन विभावय ॥५॥
पिता न: कश्यप: श्रीमान् मरीचिश्च पितामह: ।
पितामहपिता ब्रह्मा तस्यापि त्वं पिता महान्[14] ।
स त्वं पितामहोस्माकं न परान् कर्त्तुमर्हसि ॥६॥

ईश्वर उवाच

अस्माकं न परा यूयं सत्यं व: परिभाषितम् ।
किन्तु लोकहितार्थाय मुनिदेवै: प्रभाषितम् ।
अदत्ता न गृहीतव्या कन्या[15] धर्म: सनातन: ॥७॥

सनत्कुमार उवाच

स एवमुक्तो[16] देवेशो मरुद्भिर्देवसत्तमै: ।
सुयशां मरुतां कन्यामानयामास[17] तत्क्षणात् ॥८॥

---

१ देवान् - क. । २ संकल्प्य - घ. । ३ शर्व . . . - क । ४ मारुता - घ., इत: पूर्वं देवदेव उ इति क. पु. । ५ ...क्रान् - घ. । ६ ... हान् - घ. । ७ सुभगां - घ. । ८ तां पुत्रीं - घ. । ९ मह्यं बलाबला: - घ. । १० मारुता - घ. । ११ तस्याश्च - घ. । १२ ...त्वं - घ. । १३ देव - घ.। १४ पितामह - क । १५ धन्या - घ. । १६ एवमुक्तोथ - घ. । १७ ...मासयामास - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्वयं होतास्य[१८] तत्रासीद् ब्रह्मा लोकपितामहः ।
कश्यपश्च[१९] तथोद्गाता अत्रिः साम[२०] स्वयं जगौ ॥९॥
अथर्वाङ्गिरसौ[२१] देवौ[२२] ब्रह्मत्वमपि चक्रतुः[२३] ।
नारदः पर्वतश्चैव चित्रसेनश्च गायनः ॥१०॥
विश्वावसू रुचि[२४]श्चैव हाहा हूहूस्तथैव च ।
तथा शालिशिरा यश्च विश्रुतो गण्डमण्डकः ॥११॥
ईतिश्चैवेन्द्रवाहश्च[२५] यज्ञवाहोथ दक्षिणः ।
एते चान्ये च गन्धर्वा जगुर्मधुरकण्ठिनः ॥१२॥
उर्वशी चैव रम्भा च घृताची पूर्वचित्त्यपि[२६] ।
तिलोत्तमा च विश्वाची अन्याश्चाप्सरसस्तथा[२७] ॥१३॥
अनृत्यन्त[२८] महाभागा नृत्तं सुरमनोहरम् ।
- - - - - - - - - - - - - - - - - ॥१४॥
- - - - - - - - - - - - - - - - - - - ।
- - - - - - - - - - - - - - - - - ॥१५॥

सनत्कुमार उवाच

स एवमभवद् व्यास विवाहस्तस्य धीमतः ।
नन्दिनो गणमुख्यस्य अनौपम्यो ह्यनिन्दितः ॥१६॥
ततः स तु कृतोद्वाहो नन्दी गत्वा महामनाः
पादौ ववन्दे देवस्य देव्या ब्रह्मण एव च ।
शिलादस्य च लोकेशः श्रिया[२९] परमया युतः ॥१७॥

देवदेव उवाच

वरं वृणीष्व पुत्र त्वं स्नुषा चेयं तव प्रिया ।
वरान्[३०] ददामि[३१] ते वत्स मनसा यानभीप्ससे[३२] ॥१८॥

---

१८ च घ. । १९ काश्यपश्च - क. । २० सूक्तं - घ. । २१ ... सो - क. । २२ देवो - क. । २३ मभिचक्रतुः - घ. । २४ तुंबुरुः सुरुचि - घ । २५ चैवेन्द्रचापश्च - घ. । २६ वपुरित्यपि - घ. । २७... सः शुभाः - ख. । २८... त्तन्त - क. । २९ त्रिया - ख., प्रीत्या - घ. । ३० वरं - क. ख. । ३१ ...नि - क.। ३२ अनया सह (म) मीप्सितं - ख., मीप्सितं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नन्द्युवाच

भगवन् यदि तुष्टोसि त्वयि भक्तिर्दृढास्तु मे ।
सदा च तुष्टो भव मे साम्बः सहगणेश्वरः[३३] ।।१९।।
पितरञ्चैव मे देव उत्पादकमिमं प्रभो ।
अनुग्रहेण युक्तेन योक्तुमर्हसि कामद ।।२०।।

देवदेव उवाच[३४]

सदाहं तव नन्दीश सुतुष्टः[३५] सगणेश्वरः ।
पार्वत्या सहितो धीमन्निदञ्च शृणु मे वचः ।।२१।।
सदेष्टश्च वरिष्टश्च परमैश्वर्यसंयुतः[३६] ।
महायोगी महेष्वासो महाबलपराक्रमः ।।२२।।
अजय्यश्चैव जेता च पूज्येज्यश्च सदा भव ।
अहं यत्र भवाँस्तत्र यत्र त्वं तत्र चाप्यहम् ।।२३।।
यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामनु ।
अयञ्च ते पिता पुत्र[३७] परमैश्वर्यसंयुतः ।।२४।।
भविष्यति गणाध्यक्षो महागणपतिर्मम ।
विमानं[३८] चास्य[३९] वैभ्राजं कामगं सर्वकाञ्चनम् ।।२५।।
उपेतं भवनैर्दिव्यैः[४०] प्रयच्छामि जनावृतम्[४१] ।
तेनायं[४२] सर्वलोकेषु चरिष्यति यथेप्सितम् ।।२६।।
स्थानं श्रीपर्वते[४३] चास्य भविष्यति सुपूजितम्[४४] ।
भृगौ तस्मिँश्च यः प्राणाँस्त्यक्ष्यते वै सुधार्मिकः ।
स कामचारी वैभ्राजे गणपोस्य भविष्यति ।।२७।।

सनत्कुमार उवाच

ततो देवी महाभागा शैलादेर्वरयद्[४५] वरम् ।
सोब्रवीत्त्वयि भक्तिर्मे सदैवानपगा भवेत् ।।२८।।

---

३३ ...रैः - ख. घ. । ३४ ईश्वर उ - क । ३५ संतुष्टः - घ. । ३६ संयतः - घ । ३७ विप्रः - घ. । ३८ पर्वतं - क. ख. घ. । ३९ चापि - घ. । ४० दिव्यं - ख. । ४१ जलावृतम् - घ. । ४२ ततश्च - क. । ४३ श्रीपर्वतं - घ. । ४४ प्रपूजितम् - घ. । ४५ वरदा - क., रददा - ख., रदद - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ततो मरुत्सुता चैव उभाभ्यामभि[४६]चोदिता ।
वरान्[४७] वृणु यथेष्टं वै तावदिदं प्रत्युवाच ह ।।२९।।
युवयो[४८]रस्तु भक्तिर्मे तथा भर्त्तारि चैव हि ।
नित्यं चानपगा स्यान्मे धर्मे च मति[४९]रुत्तमा ।
एतमिच्छामि[५०] देवेशौ वरं वरसहस्रदौ ।।३०।।

सनत्कुमार उवाच

ततस्ता एव[५१]मेतत्ते भवितेति शुचिस्मिते ।
ऊचतुर्मुदितौ देवौ स्नुषान्तां वरवर्ण्णिनीम् ।।३१।।
नारायणं समालोक्य ब्रह्माणं च तथा हरः ।
अद्यप्रभृति नन्दीशो युवाभ्यामादृतः सदा ।।३२।।
प्रभुत्वेन हि देवानां प्रतीहारत्वमेष्यति ।
युवयोर्मयि या भक्तिस्तथा स्नेहोथ नन्दिनि ।।३३।।
- - - - - - - - - - - - - - - - - - - (?) ।
- (?) ।।३४।।
एवं भवतु देवेश नात्र कार्या विचारणा ।
गणाश्चास्य ततोभ्येत्य सर्वे देवप्रियेप्सया[५२] ।।३५।।
वरं ददुर्महासत्वाः स वव्रे काञ्चनप्रभः ।
युष्मासु मम भक्तिश्च ऐश्वर्यञ्चापि संमतम् ।
वंद्याश्च[५३] यूयं सर्वे मे प्रियो युष्माकमेव च ।।३६।।

गणा[५४] ऊचुः

भवान् यन्ता[५५]नुमन्ता च गतिरागति[५६]रेव च ।
अस्माकमीशः सर्वेषां देवानामपि चेश्वरः ।।३७।।
कुष्माण्डानां वरिष्ठश्च रुद्राणां त्वं महाबलः[५७] ।
ईतीनां द्वारपालश्च प्रमथानां तथैव च ।।३८।।

---

४६ ... पि - क. घ. । ४७ वरं - घ. । ४८ आवयो - क. । ४९ रति - घ. । ५० दिच्छामि - क. ख. घ. ।
५१ वेव - ख. । ५२ ...वः - क. टि. । ५३ वंध्या - घ., पश्या - क.,वन्द्या । ५४ गणपा - घ. ।
५५ मन्ता - क. । ५६ र्वा गति - घ. । ५७ महामनाः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

महाबलो महायोगी सेनानीस्त्वं हि नो मतः[५८] ।
त्वं भूतो भूतनेता च नायकोथ[५९] विनायकः ॥३९॥
ग्रहाणामधिपश्चैव रुद्रदण्डधरस्तथा[६०] ।
त्वमग्रयोधी[६१] शत्रुघ्नस्त्वं वीर[६२]स्त्वं दिवस्पतिः ॥४०॥
महानुभावस्त्वञ्चैव क्षीरोदनिलयश्च ह ।
जप्येश्वरनिकेतश्च जप्येश्वरविभावितः ॥४१॥
भावनः[६३] सर्वभूतानां वरदो वरदार्चितः[६४] ।
अस्माकं वरदश्चैव भव भूतेश्वर प्रभो ॥४२॥

सनत्कुमार उवाच

स एवं गणपैः सर्वैः स्तुतो नन्दीश्वरः प्रभुः[६५] ।
उवाच प्रणतः सर्वान् ब्रूत[६६] किं करवाणि वः[६७] ॥४३॥
त एवमुक्ता गणपाः सर्व एव महाबलाः ।
ऊचुस्तं दिव्यभावज्ञा देवदेवस्य सन्निधौ ॥४४॥
त्वमस्माकं गणाध्यक्षः कृतो देवेन शंभुना ।
अस्माभिश्चाभिषिक्तस्त्वं नायको धर्मदायकः[६८] ॥४५॥
स त्वं शिवश्च सौम्यश्च गुणवानगुणेष्वपि ।
क्षमा[६९]शौचदमोपेतो भव नः प्रियकृत् सदा ॥४६॥

सनत्कुमार उवाच

एवमुक्तस्तदा सर्वान् प्रणम्य बहुमानतः ।
शिरस्यञ्जलिमाधाय[७०] गणपानस्तुवत्तदा ॥४७॥

नन्द्युवाच

नमो वः सर्वभूतेभ्यो नमो योगिभ्य[७१] एव च ।
नमश्चाप्यनिकेतेभ्यो योगीशेभ्यो नमो नमः[७२] ॥४८॥

---

५८ नो ह्यनुत्तमः - ख. । ५९ स्वात्मा नोथ - क. । ६० उग्रदण्डधरस्तथा - ख. । ६१ योगी - क. ।
६२ धीर - क. । ६३ भवनः - क. । ६४ वरदान्वितः - ख., वरदर्पितः - घ । ६५ रो विभुः - ख. ।
६६ भूव - ख. । ६७ ते - क. घ. । ६८ धर्मनायकः - घ. । ६९ शम - घ. । ७० मादाय - घ. ।
७१ योगेभ्य क. -घ. । ७२ नमस्तथा-क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नमः कामचरेभ्यश्च नम उग्रेभ्य एव च ।
मृत्युभ्यश्च यमेभ्यश्च कालेभ्यश्च नमो नमः ॥४९॥
नमः काञ्चनमालेभ्यः सर्वधर्मभ्य[७३] एव च ।
नमो वो वधकृद्भ्यश्च[७४] अवध्येभ्यस्तथैव च ॥५०॥
नमः परमयोगिभ्यो[७५] जटिभ्यश्च नमो नमः ।
नमो वो दृश्यरूपेभ्यो विकृतेभ्यस्तथैव च ॥५१॥
नमो वल्कलवासोभ्यः[७६] कृत्तिवासोभ्य[७७] एव च ।
नमः श्वेताम्बरस्रग्भ्यश्चित्रस्रग्भ्यो नमो नमः ॥५२॥
धावद्भ्यश्च द्रवद्भ्यश्च संस्थितेभ्यो नमो नमः ।
नमो मुनिभ्यो[७८] गायद्भ्यो जयद्भ्यश्च नमो नमः ॥५३॥
नमः शरभरूपेभ्यः शतरूपेभ्य[७९] एव च ।
नमः पर्वतरूपेभ्यो[८०] व्याघ्ररूपेभ्य[८१] एव च ॥५४॥
नमो मार्जाररूपेभ्यः[८२] काकोलूकेभ्य[८३] एव च ।
नमो दैवतरूपेभ्यः[८४] पवनेभ्यस्तथैव च ॥५५॥
नमोग्निभ्यस्तथाद्भ्यश्च[८५] वरुणेभ्यस्तथैव च ।
नमो धनेशरूपेभ्यः सर्वरूपेभ्य[८६] एव च ॥५६॥
ननरवोदरवक्त्रेभ्यः सर्ववक्त्रेभ्य एव च ।
नमो वामनरूपेभ्यः कामरूपेभ्य[८७] एव च ॥५७॥
देवासुरमनुष्याणामाप्यायिभ्यो[८८] नमो नमः ।
नमो वः सर्वदेवानां[८९] नमो वः सर्वतः शुभाः ॥५८॥
ग्रहेभ्यश्च नमो वोस्तु मोक्षेभ्यश्च नमस्तथा ।
शुभेभ्यश्च नमो वोस्तु अशुभेभ्यस्तथैव च ।
मम सौम्याः शिवाश्चैव भवन्तु गणनायकाः ॥५९॥

---

७३ ...धर्मिभ्य - ख. । ७४ वधकेभ्यश्च - ख. । ७५ योगेभ्यो - क. । ७६... सेभ्यः - क. ख. । ७७ कृत्तिवासेभ्य - क. ख. । ७८ यक्षेभ्यो - ख. । ७९ सर्वरूपेभ्य - घ. । ८०... वासेभ्यो - घ. । ८१ .. सिंहेभ्य - क., .. संघेभ्य - घ. । ८२... रूपिभ्य - घ. । ८३ काककोकेभ्य - ख., वकरूपिभ्य - घ. । ८४ देवतरूपेभ्यः - क. । ८५ .. पेभ्यो - ख.,... दिग्भ्य - घ. । ८६... रूपिभ्य - ख. । ८७ वामरूपेभ्य - ख. । ८८ ..मुपायिभ्यो - घ. । ८९... भूतानां - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

इति स्तुता गणपतयो महाबलाः
शुभैर्वचोभिः सुरशत्रुनाशनाः ।
दिशन्तु मे सुखमतुलं सुखप्रदा
बलञ्च वीर्यं स्थिरताञ्च संयुगे ॥६०॥

तपो[90]ऽक्षयं स्थानमथातुलां गतिं
यशस्तथाग्र्यं बहु धर्मनित्यताम्[91] ।
दिशन्तु सर्वं मनसेप्सितञ्च मे
सुरेश्वराः पुष्टिमनुत्तमां तथा ॥६१॥

सनत्कुमार उवाच

इमौ[92] नन्दिगणेन्द्राणां स्तवौ योऽध्येति नित्यशः ।
सोऽश्वमेधावभृथवान्[93] सर्वपापैः प्रमुच्यते ॥६२॥
सन्ध्यायामपरस्यान्तु[94] जपन् पापं दिवाकृतम् ।
पूर्वस्यां[95] च जपँश्चापि[96] सर्वं रात्रिकृतं क्षिपेत्[97] ॥६३॥

सनत्कुमार उवाच

ततस्ते गणपाः सर्वे संस्तुतास्तेन धीमता ।
विसृष्टाश्च[98] तदा[99] जग्मुः प्रणियत्य वृषध्वजम्[100] ॥६४॥
देवाश्च सर्वलोकाश्च ततो देवः[101] स्वयं भवः[102] ।
सृष्ट्वा[103] नन्दीश्वरगृहं[104] प्रदाय च महामनाः[105] ॥६५॥
ईप्सितं सह देव्या वै जगाम स्थानमव्ययम् ।
य इदं[106] नन्दिनो जन्म वरदानं तथैव च ॥६६॥
अभिषेकं विवाहञ्च पठेद् वा श्रावयीत वा ।
ब्राह्मणः स सृतो याति नन्दीश्वरसलोकताम् ॥६७॥

---

९० मम (ा)... - घ. । ९१ वित्तसंचये - घ. । ९२ नमो - ख. । ९३...वत् - क. ख., ...भृथं च - घ. । ९४ रात्र्यां तु - क. । ९५ पूर्वसध्यां - क. । ९६ सन्त्यजेद्वापि - ख. घ. । ९७ जपन्-ख. घ. । ९८ निसृष्टाश्च - क. । ९९ तथा - ख. । १०० च सांप्रतम् - घ. । १०१ देवाः - घ. । १०२ भुवः - घ., प्रभुः - ख. । १०३ स्तुत्वा - घ. । १०४ नन्दीश्वरं गृह्य - ख. । १०५ ...त्मना - क. ख. । १०६ इमं - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यो नियतस्तु पठेत् प्रयतात्मा सर्वमिदं[१०७] प्रणतो भवभक्त्या ।
सोपि गतः परलोकविचारी नन्दिसमोनुचरो हि ---[१०८] ।।६८।।

⊙ इति स्कन्दपुराणे नन्दिकेश्वरमहाभाग्यं नाम पंचविंशतितमोध्यायः ⊙

सनत्कुमार उवाच

एवं नन्दीश्वरो व्यास उत्पन्नोनुचरश्च ह ।
अभवद् देवदेवस्य सेनापत्येभिषेचितः ।।१।।

व्यास उवाच

देव्या सहाथ भगवानासीनस्तत्र कामदः ।
अकरोत् किं महादेव एतदिच्छामि वेदितुम् ।।२।।

सनत्कुमार उवाच

भगवान् हिमवच्छृङ्गे शर्वो देव्याः प्रियेप्सया ।
गणेशैर्विविधाकारैर्हासं सञ्जनयन्मुहुः ।।३।।
देवीं बालेन्दुतिलको रामयंश्च रराम च ।
महानुभावैः सर्वज्ञैः कामरूपधरैः शुभैः ।।४।।
अथ देव्यासप्तादैका[१] मातरं परमेश्वरी ।
आसीनां काञ्चने शुभ्रे स्वा[२]सने परमार्चिते ।।५।।
साथ[३] दृष्ट्वा सतीं देवीमागतां[४] शुभरूपिणीम्[५] ।
आसनेन महार्हेण सम्भावय[६]दनिन्दिताम् ।।६।।
आसीनां तां च[७] सोवाच मेना हिमवतः प्रिया ।
चिरस्यागमनं ह्यद्य[८] तव[९] पुत्रि शुभेक्षणे ।।७।।
दरिद्रक्रीडनैस्तेद्य[१०] भर्ता[११] क्रीडति[१२] संगतः[१३] ।
ये दरिद्रा भवन्ति स्म तथैव च निराश्रयाः ।
उमे त एवं क्रीडन्ति यथा तव पतिः शुभे ।।८।।

---

१०७ ...मं - क. ख. घ. । १०८ मम स्यात् - क. ख. घ. ।
१ देवी गता तत्र - घ. । २ चा - घ. । ३ अथ - क. । ४ ततो देवीमा ततां - घ. । ५ तु सुरूपिणीम् -ख., तत्र - घ. । ६ सम्पायय - क. ख., सम्घाद - घ. । ७ तु - घ. । ८ कृत्यं - घ. । ९ कृतं (?) ।
१० स्त्वं हि - ख. घ. । ११ भर्त्रा - क. (घ.) । १२ ...सि - क. ख. घ. । १३ ...ता - क. ख. घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

सैवमुक्ता तु मान्नाथ नातिहृष्टमना[१४]भवत् ।
महत्या क्षमया युक्ता[१५] न किञ्चित्तामुवाच ह ॥९॥
विसृष्टा सा तदा[१६] मात्रा गत्वा देवमुवाच ह ।
भगवन्देवदेवेश नेह[१७] वत्स्यामि भूधरे[१८] ।
अन्यं वृणु ममावासं भुवनेश महाद्युते ॥१०॥

देवदेव उवाच

सदा त्वमुच्यमाना वै मया वासार्थ[१९]मीश्वरि[२०] ।
अन्यत्र[२१] रोचितवती नावासं देवि[२२] कर्हिचित् ॥११॥
इदानीं स्वयमेव त्वं वासमन्यत्र शोभने ।
कस्मान्मृगयसे देवि ब्रूहि तन्मे शुचिस्मिते ॥१२॥

देव्युवाच

गृहं गताहं देवेश पितुरद्य महात्मनः ।
दृष्टा[२३] च मे तत्र माता विजने लोकभावनी[२४] ॥१३॥
आसनादिभिरभ्यर्च्य सा मामेवमभाषत ।
उमे तव सदा भर्ता दरिद्रक्रीडनैः शुभे[२५] ॥१४॥
क्रीडते न हि[२६] देवानां क्रीडा भवति तादृशी ।
यत्किल त्वं महादेव गणैस्तै[२७]र्विविधैः शुभैः ।
रमसे तदनिष्टं हि मम मातुर्वृषध्वज ॥१५॥

सनत्कुमार उवाच

ततो देवः प्रहस्याह देवीं हासयितुं[२८] प्रभुः ।
एवमेतन्न सन्देहः कस्मान्मन्युरभूत्तव ॥१६॥
कृत्तिवासा ह्यवासा वा श्मशाननिलयश्च ह ।
अनिकेतो ह्यरण्येषु पर्वतानां गुहासु च ॥१७॥

---

१४ नैव द्रष्टुमना - घ. । १५ मुक्ता - क. । १६ तथा - ख. । १७ नहि - क । १८ भूतले - ख. । १९ वासार्थ- क. । २० ...री - क. । २१ ...त्र - घ. । २२ वासदेवीति - घ. । २३...ष्ट्वा - क ख. घ । २४ ...विनी - क., ...वन - व. । २५ शुभैः - क. ख. घ. । २६ ननु - घ. । २७ गणेशै - क. । २८ हाययितुं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विचरामि गणैर्नगैर्वृतोम्भोजविलोचने ।
मा क्रुधो देवि मातुस्त्वं तथ्यं मातावदत्तव ।
नहि मातृसमो बन्धुर्जन्तूनामस्ति शोभने ॥१८॥

देव्युवाच

न मेस्ति बन्धुभिः किञ्चित्[२९] कृत्यं[३०] सुरवरेश्वर ।
तथा कुरु महादेव यथान्यत्र वसामहे[३१] ॥१९॥

सनत्कुमार उवाच

स एवमुक्तो देवेशो देव्या देवेश्वरः प्रभुः ।
पार्श्वस्थं गणपं प्राह निकुम्भं नाम विश्रुतम् ॥२०॥
गणेश्वर निकुम्भ त्वं गत्वा वाराणसीं शुभाम् ।
शून्यां[३२] कुरु महाबाहो उपायेनैव मा बलात् ॥२१॥
तत्र राजा निवसति[३३] दिवोदासः प्रतापवान् ।
धार्मिको मम भक्तश्च महायोगी महाबलः ॥२२॥
सर्वं[३४] तथा गतः कुर्या यथा[३५]स्मै नापराध्यसे[३६] ।
तस्यैव चापराधेन शून्यां[३७] वाराणसीं[३८] कुरु[३९] ॥२३॥

सनत्कुमार उवाच

स एवमुक्तस्तेजस्वी निकुम्भो गणसत्तमः[४०] ।
उवाच देवं[४१] प्रणतः प्राञ्जलिर्हर्षिताननः[४२] ॥२४॥
तथा करिष्ये देवेश यथा स हि नराधिपः ।
भविष्यत्यपराधीश[४३] त्वं च तुष्टो भविष्यसि ।
शून्या वाराणसी चैव भविष्यति न संशयः ॥२५॥

सनत्कुमार उवाच

एवमुक्त्वा निकुम्भोसौ प्रणम्य शिरसा हरम् ।
जगाम पुण्यां लोकेषु पुरीं वाराणसीं प्रभुः ॥२६॥

---

२९ कार्यं - घ. । ३० किंचित् - घ. । ३१... म्यहम् - घ. । ३२ शून्यं - क., ख, श्रुत्वा - घ. । ३३ ते - ख. । ३४स त्वं - घ. । ३५...द्यथा - क. ख. घ. । ३६... धसे - घ. । ३७ शून्या - ख. । ३८ .. सी - घ. । ३९ भवेत् - ख. । ४० सप्तमः - ख. । ४१ चेदं च - घ. । ४२... र्हर्षितःननः - क. । ४३ च - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तत्रासौ दर्शनं स्वप्ने नापिताय ददौ गणः ।
मंडूकाक्षाय[४४] रूपं च स्वं तस्यादर्शयत्तदा ॥२७॥

निकुम्भ उवाच

मण्डूकाक्ष निकुम्भोहं गणपः शोकनाशनः[४५] ।
तवानुग्रहकृत् प्राप्तो यद् ब्रवीमि कुरुष्व तत् ॥२८॥
दिवोदासगृहद्वारि कुरुष्व त्वं ममालयम् ।
स्थापयस्व च तत्रार्चां मद्रूपसदृशीं शुभाम् ॥२९॥
वित्तं च ते प्रदास्यामि पुत्रान् सौभाग्यमेव च ।
प्रियत्वं चैव सर्वत्र गतिं चानुत्तमां पुनः ॥३०॥

सनत्कुमार उवाच

एवमुक्तो निकुम्भेन नापितो नृपतिं तदा ।
गत्वावदद् दिवोदासमिन्द्र[४६]वैवस्वतोपमम् ॥३१॥

नापित उवाच

स्वामिन् तव गृहद्वारि करिष्ये गणपालयम् ।
स्थापयिष्ये गणेशञ्च तन्मेनुज्ञातुमर्हसि[४७] ॥३२॥
तथेति सोप्यनुज्ञात[४८]श्चक्रे तत्र[४९] तदालयम्[५०] ।
प्रत्यस्थापयदर्चाञ्च यादृशं[५१] दृष्टवानसौ ॥३३॥
तस्य पूजां च महतीं प्रावर्त्तयत[५२] शोभनाम्[५३] ।
गणेशस्य महासत्वः स च तां प्रत्यगृह्णत ॥३४॥

सनत्कुमार उवाच

स तस्मै कर्मणा तेन वित्तं यद्यत्समीहितम् ।
पशूँश्चैव हि पुत्राँश्च सौभाग्यं चाददत् प्रभुः[५४] ॥३५॥
तस्य तां वृद्धि[५५]मतुलां नापितस्याभिवीक्ष्य तु ।
आरिराधयिषुर्लोकस्तस्य पूजां[५६] चकार ह ॥३६॥

४४...रण्याय - क. ख. घ. । ४५ शकनाशनः - क. । ४६...मिन्द्रं (दं) - क. । ४७ तन्मे ज्ञातुमिहार्हसि - घ. ।
४८ त (स?) मनुज्ञात - ख. । ४९ ते च - घ. । ५० तमालयम् - घ. । ५१ ... शीं - क. घ. ।
५२ प्रावर्तत - ख. । ५३ सुशो ... - ख. । ५४ हिरण्यञ्च पुत्रान् सौभाग्यमेव च - ख. । ५५ वृत्ति - ख. ।
५६ पूजां तस्य - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

चक्रुर्यात्रास्तथा केचिदुपवासान् तथापरे ।
होमं जप्यं[५७] तथैवान्ये पूजां चान्ये[५८] वरार्थिनः ॥३७॥
उपहाराँस्तथैवान्ये गीतं[५९] नृत्तं तथापरे ।
तेभ्यस्तथाभ्युपेतेभ्यो निकुम्भः स महायशाः ॥३८॥
ददौ सर्वानभिप्रायान् ये ये तेषामभीप्सिताः[६०] ।
एवं तं कामदं ज्ञात्वा दिवोदासो नृपस्तदा ॥३९॥
उवाच महिषीं व्यास कदाचित् पुत्रलिप्सया[६१] ।
देवि सर्वानभिप्रायान् जनेभ्योयं प्रयच्छति ॥४०॥
गणेश्वरं त्वमप्येनमपत्यार्थं प्रसादय ।
सैव[६२]मुक्ता[६३] तदा गत्वा गणेशं प्राप्य शोभना ॥४१॥
उवाच भगवन् देव अनपत्याहमीश्वर ।
उपवासं करिष्यामि तव देवाभिराधने[६४] ॥४२॥
तावन्न भोक्ष्ये यावन्मे वरो दत्तस्त्वया प्रभो ।
जाते च पुत्रे दास्यामि शतानां दशतीर्दश ॥४३॥
त्वामुद्दिश्य द्विजातिभ्यो गोधेनूनां गणेश्वर ।
तथा[६५] घटसहस्रेण दध्नश्चैव घृतस्य च ।
क्षीरस्य पंचगव्यस्य करिष्ये स्नपनं च ते ॥४४॥
ब्राह्मणानां सहस्राणां शतं चापि सुपूजितम् ।
पुरस्ताद् भोजयिष्ये ते पुत्रे जाते न संशयः ॥४५॥
बहून् दास्यति राजा च[६६] ग्रामान् दासी[६७]स्तथैव च ।
सदा सत्रश्च पूजां च करिष्यति तव प्रभो ॥४६॥

सनत्कुमार उवाच

सा तमुक्त्वा तथा व्यास तस्थौ नियममास्थिता ।
सोपवासा तदा[६८] पूजां महतीं तस्य कुर्वती ॥४७॥

---

५७ जाप्यं - ख. । ५८ पूजाश्चान्ये - क. । ५९... त - क. ख. । ६०...तान् - क. । ६१... काम्यया - घ. । ६२ सैवं बुद्धा - घ. । ६३ ...क्त्वा - क. ख । ६४ तवाराधनसुव्रता - ख. । ६५ तदा - क. । ६६ न (ो) - ख.। ६७ दास्य - क. ख.। ६८. तथा - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तां तथा तिष्ठतीं देवः प्रोवाच स गणेश्वरः ।
उत्तिष्ठ नास्ति ते पुत्रो मा खेदं त्वं वृथा कृथाः ॥४८॥
एवं तेन गणेशेन निकुम्भेन महात्मना ।
असकृत् प्रोच्यमाना सा नियमाद् विरराम ह ॥४९॥
ततो नराधिपं देवी प्रोवाच विमना[६९] तदा ।
आर्यपुत्र न मे पुत्रं गणपोसौ प्रयच्छति ।
ब्रवीति नास्ति ते पुत्रो मा वृथा नियमं कृथाः ॥५०॥

सनत्कुमार उवाच

एवं महिष्या स प्रोक्तः स्वयमेव नराधिपः ।
सदा सनियम[७०]स्तस्थौ गणेशस्याग्रतो नृपः[७१] ॥५१॥
तमप्युवाच नृपतिं निकुम्भो नियमस्थितम् ।
मा स्था[७२] वृथेह नृपते न ते पुत्रं ददाम्यहम् ॥५२॥
एवमुक्तः स राजेन्द्रो निकुम्भेन महाबलः ।
क्रोधरक्तेक्षणः प्राह तमुत्थाय गणेश्वरम् ॥५३॥

राजोवाच

गणो वा त्वं पिशाचो वा भूतो वा राक्षसोपि वा ।
कृतघ्नस्त्वं न सन्देहो न त्वं पूजामिहार्हसि ॥५४॥
मम चैव गृहद्वारि पौरैश्चैव समर्चितः[७३] ।
विषये मम वासी च[७४] न च[७५] पुत्रं प्रयच्छसि ॥५५॥
पूजार्हो न भवाँस्तस्मान्मत्तो दण्डं त्वमर्हसि ।
नृशंसश्चावलिप्तश्च निष्ठुरो मत्सरान्वितः ॥५६॥

सनत्कुमार उवाच

ततोस्य भेदयामास निलयं गजयूथपैः ।
स्थण्डिलं च बभञ्जाशु[७६] ददाहार्चां[७७] च सुप्रभाम्[७८] ॥५७॥

---

६९ विमला - घ. । ७० नियमवान् - ब. । ७१ स्थितः - ख. । ७२ त्वं - घ., वृथा नियमं कावी (र्षीः) - ख. ।
७३ समर्थितः - ख. । ७४ त्वं - घ. । ७५ मे - ख. । ७६ चकाराशु - क., घ. (चकर्ता?)
७७ गृहमर्चा - ख., तदा शो (सो) र्चा - घ. । ७८ स्वप्रभाम् - घ., सुप्रभम् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

निकुम्भोपि कृतार्थः सन्नाकाशे संस्थितः प्रभुः ।
उवाच तं[७९] दिवोदासं प्रदहन्निव[८०] तेजसा ॥५८॥
यथेष्टं संप्रयच्छन्ति देवा वरमभीप्सितम् ।
न दत्तो यद्यसौ कोपः कस्तत्र भवतोभवत्[८१] ॥५९॥
यस्मान्ममालयो भग्नस्त्वया निरपकारिणः[८२] ।
तस्माद् वर्षसहस्रं[८३] ते पुरी शून्या भविष्यति ॥६०॥

सनत्कुमार उवाच

स एवमुक्त्वा राजानं निकुम्भः परमात्मवान्[८४] ।
देवेशाय निवेद्यैवं[८५] तस्थौ पार्श्वगतः प्रभोः ॥६१॥
राजापि तस्य वाक्येन तथ्येनार्थेन चैव हि ।
व्रीडां परां समासाद्य[८६] गृहानभ्यगमत्[८७] तदा ॥६२॥
अथ सा तेन शापेन पुरी वाराणसी तदा ।
शून्या समभवत् क्षिप्रं विशुद्धा मृगसेविता ॥६३॥
तां तु शून्यां स विज्ञाय देव्या सह पिनाकधृक् ।
सगणो नन्दिना सार्धमाजगाम[८८] महाद्युतिः ॥६४॥
स तत्र[८९] मानसं दिव्यं विमानं सूर्यवर्चसम् ।
अनौपम्यगुणं देवो मनसैव विनिर्ममे[९०] ॥६५॥

सनत्कुमार उवाच

न मे प्रभवति प्रज्ञा कृत्स्नशस्तन्निरूपणे ।
एतावच्छक्यते वक्तुमनौपम्यगुणं हि तत् ॥६६॥
देवोद्यानानि रम्याणि[९१] नन्दनाद्यानि यानि तु ।
तेभ्यः श्रेष्ठतमं[९२] श्रीमदुद्यानमसृजत्[९३] प्रभुः ॥६७॥

---

७९ च - घ । ८० प्रहसन्निव - घ. । ८१ भवेत् - घ. । ८२ निरयकारिणः - घ., मेनपराधिनः - ख ।
८३ ... सहस्रां - क. । ८४ ...नाम् - ख. । ८५ ... व - घ. । ८६ समभवत् - ख., ...मनुभवन् ? ।
८७ व्यगमत् - घ., ...गमुत्तमम् - क., गमच्च तान् - क. टि. । ८८ सार्धं जगाम स - क. । ८९ तदा - घ. ।
९०...वाभिनिर्ममे - क.,...निर्मिमे - क. ख. । ९१...नि - क. । ९२ श्रेष्ठतरं - ख. । ९३ श्रीमानुद्यानमसृजत् - क ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तस्मिन् विमाने गिरिराजपुत्री सर्वर्द्धियुक्ते वचसामगम्ये ।
रेमे नवेन्दीवरफुल्लनेत्रा देवी न सस्मार वचः स्वमातुः ।।६८।।

⊙ इति स्कन्दपुराणे वाराणसीशून्यकरणं नाम षड्विंशोध्यायः ⊙

सनत्कुमार उवाच

अथ तस्मिन् सुखासीनौ शैलजावृषभध्वजौ[1] ।
आसने काञ्चने दिव्ये नानारत्नोपशोभिते ।।१।।
अथाचलसुता देवी सुखासीना विभावरी ।
सर्वलोकपतिं प्राह गिरीन्द्रतनया पतिम् ।।२।।
भगवन् देवतारिघ्न चन्द्रावयवभूषण ।
कथयैतन्मम विभो यत्त्वां पृच्छामि मानद ।।३।।
किं फलं तव देवेश लभन्ते भक्तवत्सल[2] ।
भक्ता ये फलमुद्दिश्य[3] कुर्वते[4] तव किञ्चन ।।४।।

सनत्कुमार उवाच

स एवमुमया प्रोक्तः शूलपाणिर्वृषध्वजः ।
अवोचत् सर्वमव्यग्रो देवदेवः शुभाशुभम् ।।५।।

व्यास उवाच

किन्तत् स भगवान् देवः प्रीयमाणो महातपाः ।
प्रणयात् स तथा[5] देव्या पृष्टोकथयदव्ययः ।।६।।

सनत्कुमार उवाच

मयाप्येतत् पुरा व्यास पृष्टो नन्दीश्वरः प्रभुः ।
यथोक्तवान् मयि ब्रह्मन् तथा तत्कथयामि ते ।।७।।

---

१ शैलात्मजावृषध्बजौ - क., शैलजासवृष ... - ख. । २ भक्तिवत्सल - ख.,... वत्सला - घ., ...लाः - क. ख. ।
३ फलमद्दिश्य - घ. । ४ कुर्वीत - घ. । ५ तदा - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गणेशान[६]पतिं शूरं सूर्यायुतसमप्रभम्[७] ।
अपृच्छमहमव्यग्रो[८] नन्दीश्वरमतिद्युतिम्[९] ॥८॥
ईशेन यत् पुरा देव्याः कथितं गणसत्तम[१०] ।
तन्मे ब्रूहि यथातत्त्वं परं कौतूहलं हि मे ॥९॥

नन्द्युवाच[११]

श्रूयतामभिधास्यामि पृच्छतस्ते महामुने ।
देवदेवेन पार्वत्या यत् पुराभिहितं[१२] हि तत् ॥१०॥

देवदेव[१३] उवाच

श्रूयतामभिधास्यामि यन्मां पृच्छसि सुव्रते ।
हिताय देवि भक्तानां पृष्टस्तत्[१४] कथयामि ते[१५] ॥११॥
प्रसादं यस्तु मे देवि शुभ्रं[१६] कुर्यादनिन्दिते ।
विदधाम्यर्जुनं[१७] तस्य गृहं शिवपुरेऽक्षयम् ॥१२॥
विधानेन यथोक्तेन लिङ्गं मे स्थापयेच्च[१८] यः ।
मया सहासौ चरति[१९] नित्यमष्टगुणान्वितः ॥१३॥
काञ्चनं त्रुटिमात्रं वा यो दद्याद् बहु वा मम[२०] ।
तस्य हैमवते[२१] शृङ्गे ददामि[२२] गृहमुत्तमम् ॥१४॥
यो मे गां वा[२३] हिरण्यं वा दद्यादविमनाः प्रिये ।
लोकान् ददाम्यहं[२४] तस्मै सर्वकामसमन्वितान् ॥१५॥
वृषभं यः प्रयच्छेन्मे श्वेतं[२५] नीलमथापि वा ।
स कुलानामुभयत[२६]स्तारयेदेकविंशतिम् ॥१६॥
गोचर्मद्वयसां वापि यो[२७] मे दद्याद्वसुन्धराम् ।
स मे पुरं[२८] समासाद्य गणेशैः सह मोदते ॥१७॥

---

६ महाभाग - ख. । ७... प्रभः - ख. । ८ महदव्यग्रो - क. ।९ महाद्युतिम् - ख. । १० पुण्य नि...च - ख. ।
११ नन्दीश्वर उ- ख. । १२ विहितं - घ., कथितं - ख. । १३ देव उ - ख. । १४ ...स्ते - क. घ. ।
१५ ...म्यहं - घ. । १६ दिव्यं - घ. । १७ ... न्यक्षयं लोकं - क. । १८ ...त्तु - घ. ।
१९ चरते च मया सार्धं - ग. । २०...दपि वा बहु - ख., बहुधा - घ. । २१...तः - क. । २२...दानि- क. ख. ।
२३ तु - घ., गास्तु - क. ख., वास्तु? । २४...न्यहं - क. ख., दास्याम्यहं - घ. । २५...त - ख. घ., प्रयच्छेत - ख. ।
२६ मंङ्गलानामुभयत - घ. । २७ द्वयमात्रं यं कश्चिद्यो - ख. । २८ सोमे - क., सोमेश्वरं - घ.।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यो मे पुण्यफलं[२९] दद्यादात्मना पूर्वमर्जितम्[३०] ।
सोनन्त[३१]फलमाप्नोति मोदते[३२] च त्रिविष्टपे ॥१८॥
योनुयानं[३३] चतुर्दश्यां कृष्णायां[३४] कुरुते मम ।
रथेन वृषयुक्तेन मम लोके स मोदते ॥१९॥
महिमानोपचारैश्च यो मां जप्यैश्च पूजयेत् ।
ददामि[३५] ब्रह्मणो लोके[३६] वासं तस्य सुपूजितम् ॥२०॥
मनसा चिन्तयेद् यश्च[३७] पूजयेयमहं हरम् ।
अशक्तो नास्ति च[३८] द्रव्यं यस्य नित्यं सुमध्यमे ॥२१॥
स तया श्रद्धया पूतो विमुक्तः सर्वपातकैः ।
मम लोकमवाप्नोति भिन्ने[३९] देहे न संशयः ॥२२॥
स्नातो[४०] यः पूर्वसंध्यायां सदा मामभिगच्छति[४१] ।
स मित्रं यक्षराजस्य यक्षो भवति वीर्यवान् ॥२३॥
संमार्जनं पंचशतं सहस्रमुपलेपनम् ।
गन्धाश्च दशसाहस्रा अनन्तं[४२] चार्चनं स्मृतम् ॥२४॥
अभ्यङ्गोष्टशतं चैव स्नपनं त्रिशतं भवेत् ।
गन्धोदकं पंचशतं पञ्चगव्यं तथैव च ॥२५॥
क्षीरं पञ्चगुणं देवि तस्माद् भूयश्च[४३] कापिलम् ।
तस्माच्च सर्पिषा स्नानं भूयः पंचगुणं तथा ॥२६॥
क्षमामि देवि चास्याहमपराधान् बहूनपि ।
भस्माभिषेकमानन्त्यं[४४] गुह्यं चैव मम प्रिये[४५] ॥२७॥
अगुरुर्दशसाहस्रं षट्[४६]साहस्रं तु चन्दनम् ।
चतुर्दशसहस्राणि धूपः कालागरोः स्मृतः ॥२८॥
अक्षया[४७]स्तण्डुलयवाः शालयो द्विशताः स्मृताः ।
आनन्त्यो गुग्गुलुश्चैव सहाज्येन[४८] सुधूपितः[४९] ॥२९॥

---

२९ पुण्य - घ. । ३० पुण्यमर्जितम् ख, पूर्वमा ...- क. ख । ३१ स्य... -क, ...न्त... - ख. । ३२ पूज्यते - ख. घ. ।
३३ योन्नपान - घ । ३४ कृष्णस्य - क ख । ३५ ...नि - क. घ । ३६ लोकेषु - ख. । ३७ नित्यं - ख. ।
३८ मे - ख. । ३९ ...न्न. - क. । ४० स्नात्वा - ख । ४१ मामुपगच्छति - ख. । ४२ आनन्त्यं - क. ।
४३ दूर - घ. । ४४ ...स्मा कुर्याद् - ख. । ४५ चैतन्नमेप्सितम् - क. । ४६ स - क. ख. घ । ४७ ... ता - घ. ।
४८ सहान्येन - क. । ४९ सुपूजितः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

द्वे सहस्रे पलानां तु महिषाक्षस्य यो दहेत् ।
देवि संवत्सरं[५०] पूर्ण स मे नन्दिसमो भवेत् ॥३०॥
दक्षिणायान्तु यो मूर्तौ पायसं सघृतं शुभे ।
निवेदयेद्वर्षमेकं स च नन्दिसमो भवेत् ॥३१॥
चरवो दशसाहस्रा[५१] यावकश्च चतुर्गुण:[५२] ।
शेषाश्च चरवः सर्वे यावकार्धेन संमिता:[५३] ॥३२॥
घृतपात्र[५४]असंख्येयमिह प्रेत्य च शाश्वतम् ।
प्रीणाति च पितॄन् सर्वान् विमाने चैव मोदते ॥३३॥
छत्रं पताकानिचयं शोभयित्वा[५५] ददाति यः ।
सोपि संदीप्यते[५६] भूयो रविवत्तेजसा दिवि ॥३४॥
उभौ पक्षौ त्रयोदश्या[५७]मष्टम्यां चोपवासिक:[५८] ।
उपतिष्ठेत मां भक्त्या सोपहारमनिन्दिते ॥३५॥
ददाम्यस्य[५९] स्वकं[६०] लोकं तुष्टोहं देवि शाश्वतम् ।
रक्तपीतकवासोभिः पुष्पैश्च विविधैरपि ।
पूजितोहं सदा भक्त्या पुत्रत्वे कल्पयामि तम् ॥३६॥
एकरात्रं च यो मर्त्यो दीपं धारयति[६१] स्थितः ।
सर्वयज्ञफलं तस्य ददामि[६२] श्रियमेव च ॥३७॥
मयैव मोहिताः सर्वे लोकाः सजडपण्डिता:[६३] ।
न मां पश्यन्ति रागान्धास्तमसा बहुलीकृताः ॥३८॥
ध्यानिनो[६४] योगयुक्ता[६५] ये सत्यधर्मपरायणाः ।
एकाग्रमनसो दान्ता[६६]स्ते मां पश्यन्ति[६७] नित्यदा[६८] ॥३९॥
ये मे भक्ताः सदा चैव सांख्ययोगविशारदाः ।
सर्वं[६९] पश्यन्ति मयि च मां च सर्वत्र योगत:[७०] ॥४०॥

५० द्विवत्सरस्तु - घ. । ५१ ...स्रं - क., ... स्र्या - घ । ५२ ण - क । ५३ संयुगा: (ता) - घ. । ५४ ...पाक - घ. । ५५ शोभां कृत्वा - घ. । ५६ संदीपयेत् - घ. । ५७ चतुर्दश्या - घ. । ५८ ... नः - घ. । ५९ ... न्यस्य - क. ख. । ६० स्वयं - क. । ६१ कारयति - ख. । ६२ .. नि - क. ख. । ६३... पिण्डता: - क. । ६४ ध्यायिनो - क. । ६५ नित्ययुक्ता - ख. घ. । ६६ भूत्वा - घ. । ६७ पश्यन्ति - घ । ६८ मां बुधाः - ख. । ६९ सर्वे - घ. । ७० योगतं - क. ख. घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

त्रीँल्लोकान् समतिक्रम्य ब्रह्मलोकं तथैव च ।
गच्छन्ति मम ते लोकं[७१] तमो भित्वा सुदुर्भिदम् ।।४१।।
न शक्योऽस्य्यतपोयुक्तैर्द्रष्टुं मुनिगणैरपि ।
ध्यानिनो नित्ययुक्ताश्च देवि पश्यन्ति मां बुधाः ।।४२।।
एतानि चैव सर्वाणि कृत्वा कर्माणि सुन्दरि ।
मनसा सुप्रशान्तेन मैत्रः करुणचेतसा ।।४३।।
काञ्चनं भूमिगोदानं विप्रे च प्रतिपादयन् ।
रुद्रो मे प्रीयतु इति ह्यतुलं फलमश्नुते ।।४४।।
यानि लोकेषु तीर्थानि देवतायतनानि च ।
पादयोस्तानि सुश्रोणि सदा सन्निहितानि मे ।।४५।।
ब्राह्मणानां तथा चैव करे दक्षिणतः स्थिताः ।
यो मां सर्वगतं चैव सर्वं च[७२] मयि पश्यति ।।४६।।
मय्यर्पितमना नित्यं तथा मद्भावभावितः ।
ममैव स[७३] प्रभावेन सर्वपापैः प्रमुच्यते ।।४७।।
सर्वथा वर्तमानोपि देवि यो मां स्मरेत्सदा[७४] ।
कल्मषेण न युज्येत नरः[७५] कर्ता कदाचन ।।४८।।
सर्वावस्थोपि पापात्मा ज्ञाननिष्ठेन[७६] चेतसा[७७] ।
यो[७८]ऽभ्यर्चयति मां नित्यं स ममात्मसमो भवेत् ।।४९।।
षडङ्गेन च योगेन यो मामभ्यर्चयेत्सदा[७९] ।
प्रविशेत स[८०] मां क्षिप्रमत्र नास्ति विचारणा ।।५०।।
योप्यसज्जन[८१]रतो वियोनिजः पातकैरपि समन्वितस्सदा ।
सोपि मद्गतमना मदर्पणो याति देवि[८२] गतिमप्रतर्किताम् ।।५१।।

⊙ इति स्कन्दपुराणे ईश्वरार्चनविधिः[८३] सप्तविंशतितमोध्यायः ⊙

---

७१ लोकान् - क. । ७२ सर्वेषां - घ. । ७३ च - ख. । ७४ सदा स्मरेत् - ख. । ७५ नभः - क. ।
७६ ...दृष्टेन - ख. । ७७ तेजसा - घ. । ७८ सो - ख. । ७९ मामर्चयते सदा - ख. । ८० ...च्च - ख. ।
८१ ...सर्जन- घ. । ८२ देव - घ. । ८३ पूजाविधानो नाम - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

ततो व्यास पुनर्देवी पतिं व्रतपतिं शुभा ।
अपृच्छद् व्रतसंबद्धं[१] फलं फलशतार्चिता[२] ।।१।।
व्रतानां फलमल्पं वा महद् वा यत् त्रिलोकप ।
व्रतं भवति[३] यादृग् वा तत्[४] प्रब्रूहि महेश्वर ।।२।।

देवदेव उवाच

महाफलं यद् भवति यच्चाप्यल्पफलं शुभे[५] ।
व्रतं यादृक् च यत् प्रोक्तं तच्छृणु[६] त्वमनिन्दिते ।।३।।
चतुर्दश्यां तथाष्टम्या[७]मुभयोः पक्षयोः शुचिः ।
संवत्सरमभुञ्जानः शान्तो दान्तो जितेन्द्रियः ।।४।।
सत्रयाजिफलं[८] यच्च सत्यवागृतुगामिनाम् ।
तच्चैव[९] फलमाप्नोति यमञ्चैव न पश्यति ।।५।।
शय्यासनस्थः स्त्रीमध्ये रतिरक्तः सुखे रतः ।
स तप्यत्यानखाग्रेभ्यो[१०] नित्यं यो मां समाश्रितः[११] ।।६।।
मद्भक्तस्तपसा युक्तो मामेव प्रतिपद्यते ।
लोकास्तस्याक्षया देवि यद्यपि स्यात् स[१२] पापकृत् ।।७।।
पृथिवीभाजने भुंक्ते नित्यं पर्वसु यो नरः ।
स त्रिरात्रफलं[१३] देवि अहोरात्रेण विन्दति ।।८।।
संवत्सरं तु यो भुंक्ते नित्यमेव ह्यतन्द्रितः[१४] ।
निवेद्य पितृदेवेभ्यः पृथिव्या[१५]मेकराड् भवेत् ।।९।।
नवमी[१६]मष्टमीं[१७] चैव पौर्णमासीं[१८] त्रयोदशीम्[१९] ।
यो भुंक्ते देवि नैतेषु[२०] सुपर्वसु[२१] नरः समाम् ।।१०।।

---

१ अपत्यव्रतसंबद्धं - ख.,...संम्बन्धं - ख. । २... समार्चिता - क., सदार्चिता - घ. । ३ स्तुवन्ति - घ. । ४ तच्च - ख. ५ भवेत् - ख. । ६ तच्छृणुष्व - क. । ७ चतुर्दश्यामथाष्टम्या - क. । ८ सप्तरात्रिफलं यत्र - घ. । ९ तदैव - ख., तथैव घ. । १० क्रीडमानो नमास्यो - घ., नखाग्रेण - ख. । ११ मामनुव्रतः - ख. । १२ सु - ख. । १३ स त्रिफलं - क. । १४ जितेन्द्रियः - घ. । १५ ...वी - क. । १६ अष्टमी - क. । १७ ...मी - क. । १८ ...सी - क., चतुर्दशीं - घ. । १९ ...शी - क. । २० एतेपु - क. । २१ संयतस्तु - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गाणपत्यं स लभते निस्सपत्नमनिन्दिते ।
भूतानां दयितश्चैव[२२] दिव्यं रूपं बिभर्ति च ।।११।।
श्रीवत्सं यश्च[२३] पिष्टेन दद्याद् हेमफलं[२४] शुभम् ।
किरेत् कृष्णतिलाँश्चात्र तण्डुलाक्षतमेव च ।।१२।।
फलैश्च विविधाकारैर्यथालब्धै रसान्वितैः ।
स वै वर्षसहस्राणि द्विषष्टिं दिवि मोदते ।।१३।।
दिव्यरूपधरः श्रीमान् देवतैस्सह नित्यशः ।
हिरिवेरमयीं[२५] यो मे दद्यात् प्रतिकृतिं स्वकाम् ।।१४।।
सर्वगन्धरसैर्युक्तां निर्यासैश्च सुसंस्कृताम् ।
भक्ष्यभोज्यैश्च विविधैः कृष्णपक्षे चतुर्दशीम् ।।१५।।
पूर्वदक्षिणयोश्चात्र[२६] पश्चिमोत्तरयोस्तथा ।
पार्श्वेषु हरितालश्च कृष्णागरुमनःशिलाम् ।।१६।।
चन्दनं चैव दद्याद्वै यथासंख्येन पूजितम् ।
तस्य पुण्यफलं देवि श्रृणु यन्मत्तकाशिनि ।।१७।।
सर्वव्याधिविनिर्मुक्तस्तथा[२७] निष्कल्मषश्च ह ।
वर्षकोटिशतान्यष्टौ दिवि भुक्त्वा महत्सुखम् ।।१८।।
इह लोके सुखी जातो मामेव प्रतिपद्यते ।
रत्नावलिं तु यो[२८] दद्याद् ब्राह्मणः क्षत्रियोथ विट् ।।१९।।
शूद्रः स्त्री वा स मे[२९] लोके मत्सौख्यं प्राप्नुते परम् ।
सिद्धार्थकाँश्चाघोरेण[३०] दैवे पित्र्येथ वा पुनः ।।२०।।
त्रिंशद्वर्षसहस्राणि[३१] तर्पयेत् स[३२] पितॄनपि ।
ऋषीँश्च सर्वदेवांश्च रूपश्चाप्नोति पुष्कलम्[३३] ।।२१।।
मन्वन्तरञ्च गोलोके गोकन्याभिः स[३४] पूज्यते ।
सर्वे देवास्तथा विष्णुर्ब्रह्मा ऋषय एव च ।।२२।।

२२...श्चैव - घ. । २३...च्च - क. घ. । २४ धर्मफलं - ख. । २५ हरिवेरमयीं - क., शालिपिष्टमयीं - घ. ।
२६ ...पि - ख. । २७ मुक्तो यथा - घ. । २८ वक्तारं निर्णयो - घ. । २९ मां - क., समो - ख. ।
३०...काश्च अर्घेण - घ. । ३१ त्रिषड्विंशत्...- क. । ३२ स्व...- घ. । ३३...लां - क. ख. । ३४ प्र...- ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कुर्वन्त्यर्घ्यं हि सान्निध्यं तेभ्यस्तद्धि विनिःसृतम् ।
गुह्यमेतत् परं देवि यो वेत्ति स[३५] महातपाः ॥२३॥
तस्य प्रभावाज्जायेत धनवान् प्रियदर्शनः ।
प्रज्ञारूपगुणैर्युक्तः[३६] संवत्सरशतायुषः[३७] ॥२४॥
क्षीरेण यो मां सततं स्नापयेत त्रिरुद्यतः[३८] ।
अपराधसहस्रन्तु क्षमे[३९] तस्याहमन्तशः[४०] ॥२५॥
यश्च[४१] तत्[४२] स्नपनं पश्येत् स तत्पापैः[४३] प्रमुच्यते ।
मानसस्य च जप्यस्य सहस्रस्य फलं लभेत्[४४] ॥२६॥
संवत्सरं तु यः कुर्यात् क्षीरेण स्नपनं शुचिः[४५] ।
गाणपत्यं स लभते बल्लभत्वं च नित्यशः ॥२७॥
सर्पिषा यो समाभ्यङ्गं करोत्यविमना नरः ।
द्विसाहस्रस्य जाप्यस्य मानसस्य फलं लभेत् ॥२८॥
अभिगम्यश्च देवानां स भवेच्च[४६] नरोत्तमः ।
निष्काणां च सुवर्णस्य सहस्रस्य फलं लभेत् ॥२९॥
संमार्जनं च[४७] यः कुर्यात् संवत्सरमनुव्रतः ।
वितरामि शुभं लोकं नित्यं तस्य ध्रुवं शिवम् ॥३०॥
सर्वलोकक्षये तस्य न क्षयो भवतीश्वरि ।
लिङ्गपूजां[४८] तु यः कुर्यान्मम देवि दृढव्रतः ॥३१॥
शतं वर्षसहस्राणि दिव्यानि दिवि मोदते ।
चतुर्णां पुष्पजातीनां गन्धमाघ्राति शङ्करः ॥३२॥
अर्कस्य करवीरस्य विल्वस्य च बकस्य[४९] च ।
सुवर्णनिष्कं पुष्पे तु[५०] सर्वस्मिन् देवि[५१] कथ्यते ॥३३॥
सहस्रे त्वर्कपुष्पाणां[५२] दत्ते यत् कथ्यते[५३] फलम् ।
एकस्मिन् करवीरस्य दत्ते पुष्पे हि तत् फलम् ॥३४॥

---

३५ सु... - ख. । ३६ युक्तं - क. घ. । ३७ ...युतम् - क. घ. । ३८ त्रिरुत्तनः घ. । ३९ क्षणे - घ. । ४० ...गः - घ. । ४१ यच्च - क. ख. । ४२ तं - क. ख. ग. । ४३ सर्वपापैः - ख. घ. । ४४ भवेत् - क. । ४५ शुचि - ख. । ४६ भद्रे - क., भवेत - ख. । ४७... त्तु - ख. । ४८ लिङ्गपूरं - क., लिगं पूर्वं - घ. । ४९ बुकस्य - क । ५० पुष्पैस्तु - ख., पुप्पं तु - घ. । ५१ ...त्रैव - ख. घ. । ५२ सहस्रं स्त्वन्यपुष्पाणां - ख., सहस्रे त्वन्य ... - क. । ५३ यत्कथितं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

करवीरसहस्रस्य भवेद्दत्तस्य[५४] यत् फलम् ।
तदेकस्य तु पद्मस्य दत्तस्य फलमुच्यते ॥३५॥
पद्मानां च[५५] सहस्रस्य मम दत्तस्य यत् फलम् ।
तत्फलं लभते पत्रे दत्ते विल्वस्य शोभने[५६] ॥३६॥
विल्वपत्रसहस्रे तु दत्ते मे यत् फलं स्मृतम् ।
बकपुष्पे[५७] तदेकस्मिन् मम दत्ते लभेत् फलम् ॥३७॥
बकपुष्पसहस्रस्य मम दत्तस्य यत् फलम् ।
पुष्पे दत्ते तदेकस्मिन् लभेद्[५८] धत्तूरकस्य[५९] तु[६०] ॥३८॥
निर्माल्यं यो हि मे नित्यं शिरसा धारयिष्यति ।
अशुचिर्भिन्नमर्यादो नरः पापसमन्वितः ॥३९॥
स्वैरी चैव तथा मुक्तो[६१] नियमैश्च बहिष्कृतः ।
नरके स[६२] पतेद् घोरे तिर्यग्योनौ च संभवेत्[६३] ॥४०॥
ब्रह्मचारी शुचिर्भूत्वा निर्माल्यं यस्तु धारयेत् ।
तस्य पापमहं शीघ्रं नाशयामि महाव्रते[६४] ॥४१॥
दीपमालां तु यः कुर्यात् कार्त्तिके मासि वै मम ।
अवसाने च दीपानां[६५] ब्राह्मणाँस्तर्पयेच्छुचिः[६६] ॥४२॥
गाणपत्यं स लभते दीप्यते च रविर्यथा ।
दद्यात् कृष्णतिलाँश्चैव सह[६७] सिद्धार्थकाँश्च ह ॥४३॥
यो मे देवि सदा मूर्ध्नि स मे नन्दिसमो भवेत् ।
ये हि सिद्धार्थकाः प्रोक्तास्तथा कृष्णतिलाश्च ये ॥४४॥
सर्वे ते त्वन्मया देवि गुह्यमेतन्मयेरितम् ।
- - - - - - - - - - - - - - - - - - - (?)॥४५॥
- - - - - - - - - - - - - - - - - - - (?)।
चित्रो नाम गणो मह्यं तेन सार्धं स मोदते ॥४६॥

---

५४ दत्तो भवति - घ. । ५५ तु - ख. घ. । ५६ तु सुशोभने - ख. । ५७ बुकपुष्पे - क. ख. ।
५८ लभते - घ. । ५९ बन्धुक ... - ध. । ६० वै - घ. । ६१ युक्तो - क. । ६२ न - घ. ।
६३ दीप्यते च रविर्यथा - घ. । ६४ ...मते - घ. । ६५ दीपं दत्त्वा व्रतान्ते तु - ख. । ६६...च्छुचीन् - ख. ।
६७ सदा - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सर्वसंप्रलये चैव प्राप्ते त्रैलोक्यसंक्षये ।
त्यक्त्वा सर्वाणि दुःखानि मामेव प्रतिपद्यते ।।४७।।
न तुष्याम्यर्चितोर्चायां तथा देवि नगात्मजे ।
लिङ्गेर्चिते यथा[६८]त्यर्थं परितुष्यामि पार्वति ।।४८।।
सर्वेन्द्रियप्रसक्तो वा युक्तो[६९] वा सर्वपातकैः ।
स प्रयाति दिवं देवि लिङ्गं योर्चयतीह मे ।।४९।।
त्यक्त्वा[७०] सर्वाणि पापानि निर्द्वन्द्वो दग्धकिल्विषः ।
मदाशी[७१]र्मन्नमस्कारो[७२] मामेव प्रतिपद्यते ।।५०।।

सनत्कुमार उवाच

ततो भगवती भूयः पतिं सर्वजगत्पतिम् ।
अपृच्छत् पुष्प्यमाणा[७३]स्या[७४] केन त्वं देव[७५] तुष्यसे[७६] ।।५१।।
ततः प्रहस्यमानास्यः सर्वलोकेश्वरेश्वरः[७७] ।
प्रोवाच भगवान् वाक्यं[७८] लोकानां हितकाम्यया।।५२।।

देवदेव उवाच[७९]

श्रृणु देवि यथातत्त्वं[८०] येन यान्ति शुभां गतिम् ।
त्रैलोक्ये जन्तवः सव[८१] मद्भक्ता ये शुभानने ।।५३।।
यत्तत्[८२] परतरं गुह्यं तत् सर्वं मयि[८३] तिष्ठति ।
यो हि तत्त्वेन तद् वेद संसारात्[८४] स विमुच्यते[८५] ।।५४।।
न च प्रकाशयेद् गुह्यं नाम[८३] मे कीर्तयेन्नरः ।
सदा सर्वसहेत्येवं प्रातः[८७] प्राञ्जलिरुत्थितः ।।५५।।
तस्माच्च[८८] कीर्तनात् पापं सर्वमेव विनिर्दहेत् ।
यशः कीर्त्तिं च संप्राप्य रुद्रलोके महीयते।।५६।।
सर्वमाल्यानि यो दद्यान् मम मूर्तिषु[८९] नित्यशः ।
मंत्रेण विधिवच्चैव तस्य पुण्यफलं महत्[९०] ।।५७।।

---

६८ तथा - ख. । ६९ युतो - घ. । ७० कृत्वा - घ. । ७१ महाशी... - घ. । ७२ मार्थ्यमत्प्राप्य - घ., नमस्कारोपि यं कुर्यात् - ख., । योपि कुर्यान्निमस्कार ? । ७३ पुष्यमाना - क., पुष्पमालास्या - ख., तुष्यमाना - घ. । ७४ सा - घ. । ७५ देवि - क. । ७६... सि - ख. । ७७... देवेश्वरेश्वरः - घ. । ७८ वचः प्रोवाच भगवान् - क. घ. । ७९ देव्युवाच - ख. । ८०... तथ्यं - घ. । ८१ न तु सर्वेण - घ. । ८२ यद्यत् - घ. । ८३ त्वयि - क. ख. । ८४ स संसाराद् - घ. । ८५ ... प्रमुच्यते - क. घ., प्रवि...- ख । ८६ नामतः - घ., ... स्ते - ख. । ८७ महेश्वरं प्रातः स्मरेत् - घ. । ८८ यस्माच्च - घ. । ८९ सर्वमूर्तिषु - क. घ. ९० श्रृणु - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मन्त्रः[९१]

सर्वगाय सुरेशाय सर्वदेवमयाय च ।
नमो भगवते चैव गुह्यागुह्याय वै सदा[९२] ॥५८॥
सोमाय[९३] भूतनाथाय भावनाय भवाय च[९४] ।
सर्वगुह्याय वै स्वाहा देवगुह्यमयाय[९५] च ॥५९॥
सर्वगुह्यमयो मंत्रः स्वाहा सोमाय चैव हि[९६] ।
कटंकटाय वै[९७] स्वाहा स्वाहा देवाय शुष्मिणे[९८] ॥६०॥
पुष्पाण्येतेन मन्त्रेण यो मे नित्यं निवेदयेत् ।
सहस्रं तेन[९९] जाप्यस्य मानसस्य कृतं भवेत् ॥६१॥
अथा[१००]ञ्जलिममावास्यां सुसम्पूर्णां समाहितः ।
तिलानां चैव कृष्णानां सर्षपाणां च पार्वति ॥६२॥
अर्चयित्वा यथान्यायं यथालाभं प्रयच्छति ।
इदं[१०१] च वचनं कुर्यात्[१०२] सूर्येति च ममेति च[१०३] ॥६३॥
सर्वपापविनिर्मुक्तः स्वर्गलोकं व्रजेन्नरः ।
अर्चयित्वा च मां देवि ब्राह्मणान्न च तर्पयेत् ॥६४॥
न तत्फलमवाप्नोति नाहं तुष्यामि तस्य वै ।
अर्चयित्वा द्विजान्मां च यो मे नामानि कीर्तयेत् ॥६५॥
चतुर्दश्याममथाष्टम्यां पक्षयोरुभयोरपि ।
सोपि देवि प्रमुच्येत वियोनिं न स गच्छति ॥६६॥
वामदेव सुदेवेति[१०५] हर गुप्तेति वा पुनः ।
उमापते नीलकण्ठ शान्त[१०६] श्रीकण्ठ गोपते ॥६७॥
शर्व[१०७] भीम[१०८] पशुपते[१०९] शङ्करोग्र भवेति च ।
महादेवेति चाप्यन्यन्नाम गुह्यं प्रकीर्तयन्[११०] ॥६८॥

---

९१ अय मन्त्रः - खः । ९२ गुह्यात्मने नमोस्तुते - घ । ९३ नमस्ते - घ. । ९४ भवात्मने - क. । ९५ वेदगुह्याय - ख. । ९६ स्वाहा - ख. । ९७ ...यैत्र - क. घ. । ९८ देवाय शुष्मिने स्वाहा - ख. । ९९ सहस्रांशेन - क. । १०० अन्या ..- घ. । १०१ इयं - क । १०२ ब्रूयात् - घ. । १०३ सूर्यज्योतिर्मयेति च - घ. । १०४ प्रपश्ये त - क. घ. । १०५ वासुदेवेति - घ । १०६ श्रान्त - ख. । १०७ शर्वो - क., पार्वतीश - घ. । १०८ भीमः - क. । १०९ पशुपतिः - ख, पशुपतेः - क. । ११० ...येत् - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सर्वपापैः प्रमुच्येत दिवि देवैश्च पूज्यते ।
एतेषामेकमपि यः कथयेद्वा पठेत वा ॥६९॥
स देहपद्धति[१११] भित्वा[११२] मामेव प्रतिपद्यते ।
एवं[११३] सर्व[११४]प्रणामे च[११५] यन्मया परिकीर्तितम् ॥७०॥
अमावास्यान्तु यो नित्यं सघृतं गुग्गुलं दहेत् ।
क्षीरेण चैव संमिश्रं गुह्यमेतन्मम प्रियम्[११६] ॥७१॥
सोच्युतं[११७] स्थानमाप्नोति मत्प्रसादान्न संशयः ।
इदं च परमं गुह्यं यो मे देवि निवेदयेत् ॥७२॥
अर्कपत्रयुतं पूर्णं घृतेन[११८] मधुना सह[११९] ।
निवेद्य विधिवद् भक्त्या सर्वपापैः प्रमुच्यते ॥७३॥
इमानि च महाभागे यो मे नामानि कीर्तयेत् ।
श्मशाननिलयो नग्नो भस्मशायी[१२०] यतव्रतः ॥७४॥
वामदेवः प्रशान्तश्च स्तब्धशेप[१२१]स्त्रिलोचनः ।
अपसव्यप्रियः[१२२] सव्यो बहुरूपोन्तकान्तकृत्[१२३] ॥७५॥
पुराणः पुरुहूतश्च मृत्योर्मृत्युर्जितेन्द्रियः ।
अनिन्द्रियोतीन्द्रियश्च सर्वभूतहृदि स्थितः ॥७६॥
संसारचक्री योगात्मा कापाली दिण्डिरेव च ।
महादेव[१२४] महादेव महादेवेति चैव हि ॥७७॥
जपेदेतन्नियमवान् शृणुयाद्वापि नित्यशः ।
स देहभेदमासाद्य योगात्मा गणपो भवेत् ॥७८॥

सनत्कुमार उवाच

- - - - - - - - - - - - - - - - - - - ।
- - - - - - - - - - - - - - - - - - - ॥७९॥

---

१११ ...बंधं - घ । ११२ भित्वाशु - घ. । ११३ एकं - ख. । ११४ सर्वं प्रमाणं - घ. । ११५ न - ख., ते - घ. । ११६ प्रिये - क. घ. । ११७ सोत्तमं - ख. । ११८ घृतस्य - क; घृतं च - घ. । ११९ मधुनश्च ह - क. । १२० ...स्नायी - घ. । १२१ ..शेफ - घ. । १२२ अपसव्यप्रिय. - घ. । १२३ ... न्तकोन्तकृत्- क. । १२४ ...वो - क, घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नाशुभाय[१२५] न पापाय नानृतायाव्रताय च[१२६] ।
श्रावयेद् भक्तिमान् पुण्यान्नापेताय[१२७] कदाचन ।।८०।।
धन्यं यशस्यमायुष्यं शान्तिवृद्धिकरं शुभम् ।
पूतं पवित्रं परमं मङ्गलानां च मङ्गलम् ।
श्रोतव्यं न च सर्वेण[१२८] तथा देयं न कस्यचित् ।।८१।।

⊙ इति स्कन्दपुराणे ईश्वरपूजानाम[१२९] अष्टाविंशतितमोध्यायः ⊙

व्यास[१] उवाच

एवं कालेन[२] संप्राप्य वाराणस्यां निकेतनम् ।
जगतः पितरौ देवौ चक्रतुः[३] किमतः परम् ।।१।।

सनत्कुमार उवाच

ततः स भगवान् देवो देवीं हिमवतः सुताम् ।
उवाच देवि पश्याम[४] उद्यानं यदि रोचते ।।२।।

देव्युवाच

एवं भवतु देवेश यथातथ त्वं[५] वृषध्वज ।
न हि मेन्यत्र गन्तव्यमुद्यानात् परतो हर ।।३।।

सनत्कुमार उवाच

सह देव्या ततो व्यास वाराणस्यां वृषध्वजः ।
दिव्यो[६]द्यानदिदृक्षार्थं विचचार[७] समन्ततः ।४।।
पूर्वस्मिन् स दिशो भागे देव्या देवः पिनाकधृक् । ।
उद्यानं दर्शयामास नानाकुसुमशोभितम् ।।५।।
चंपकाशोकपुन्नागप्रियंगूचूतसंकुलम्[८] ।
विल्वार्जुनकदम्बैश्च न्यग्रोधोदुम्बरैरपि ।।६।।

---

१२५ नाशुचये - घ. । १२६ ...य कदाचन - क., .. याशुभाय च - घ. । १२७ नित्यं नाव्रताय - घ ।
१२८ सर्वदा देवि - घ, सर्वैश्च - ख । १२९ पूजाविधिर्नाम - घ. ।
१ सन उ. - क. । २ कामेन घ॰ । ३ कुरुतः - घ. । ४ ...व - क. टि., घ. । ५ तत्त्वं - घ. ।
६ देवो - क., घ. । ७ विपश्राम - क. । ८ .. व्र (।) त... - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गन्धवद्भिश्च कुसुमैर्जातीकेसरकेतकैः ।
रम्यैः सुरभिपुष्पैश्च षट्पदव्रातसेवितैः ॥७॥
संयुक्तं सर्वतः श्रीमद्वनं वैभ्राजसन्निभम् ।
स तदुद्यानमासाद्य देवीमाह जगत्पतिः ॥८॥
अस्मिन् देशे पुरा देवि तिष्ठतो मम शोभने ।
ऊर्ध्वं गोलोकसंस्थानाद् गवां वत्सैः स्वयंभुवैः ॥९॥
पीयमान[9]पयोवेगात् फेनं मूर्ध्नि समापतत् ।
ततो मयो[10]र्ध्वतो दृष्टा[11] गावस्ताः सोमपार्श्वतः[12] ॥१०॥
ततस्ताः[13] प्रेक्षितास्तत्र मया[14] गावस्तदाभवन् ।
तेजसा दह्यमानास्तु नैकवर्ण्णा भृशार्दिताः ॥११॥
गावः पूर्वमिमा देवि आसन् कपिलवर्णजाः ।
नैकवर्णास्तदाभूवन् यदा संप्रेक्षिता मया ॥१२॥
तासां शरण्यतां यात्वा ताभि[15]र्मामिव शैलेजे ।
आश्रितः सोम आगत्य स्रवन्तीभिः[16] समन्ततः ॥१३॥
अर्दिताभिस्तदा गोभिर्ब्रह्मा मामब्रवीत्ततः ।
प्रसादं कुरु देवेश सौरभ्य[17]स्तेजसा तव[18] ॥१४॥
न नश्यन्ति[19] यथा सद्यस्तथा सर्वसुरार्चित ।
ततोहमास्थितो देवि स्थानेस्मिन् स्वयमेव तु ॥१५॥
गोप्रेक्ष इति विख्यातः[20] संस्तुतः[21] सर्वदेवतैः[22] ।
गोप्रेक्षेश्वरमागत्य दृष्ट्वाभ्यर्च्य[23] च मानवः ॥१६॥
न दुर्गति[24]मवाप्नोति कल्मषैश्च विमुच्यते ।
ततस्ता दह्यमानास्तु[25] प्रसन्ने[26] कपिला[27] मयि ॥१७॥
ह्लदेस्मिन् धेनवो[28]भ्येत्य शान्तास्ता विवभु[29]स्तदा ।
कपिलाह्लद इत्येवं तदाप्रभृति कथ्यते ॥१८॥

---

९ पीयनीताम्प... - क., पिबतीनां - घ । १० ममोर्ध्वं - क. । ११ दृष्टास्तु - ख., - दृष्ट्वा - घ. । १२... गाः - ख. घ. । १३ ...श्रा - क. । १४ देव्या - घ. । १५ एभि - ख. । १६ सह गोभि र्न तास्त्यजन् - क. । १७ सौरभ्या - क. । १८ भव - घ. । १९ न विनश्यद् - ख. । २० गोप्रेक्षक इति ख्यातः - ख. । २१ संस्मृतः - घ. । २२ सर्वदै ... - घ. । २३ चार्च्य - क ख, चाभ्यर्च्य - घ. । २४ स स्वर्गति - घ. । २५ दुह्यमानास्तु - घ । २६ प्रसन्न (ा) - घ. । २७ सुरभी - क. ख. । २८ धेनुर... - क., पेतु - क. ख. घ. । २९ विभवु - ख., शिशिवु - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अत्रापि[३०] स्वयमेवाहं वृषध्वज इतिश्रुतः[३१] ।
सान्निध्यं कृतवान् देवि स चायं दृश्यतां स्थितः ।।१९।।
कपिलाह्लदतीर्थेस्मिन् स्नात्वा नान्यमना नरः[३२] ।
वृषध्वजमिमं दृष्ट्वा सर्वयज्ञफलं लभेत् ।२०।।
सलोकतां मृतश्चापि अर्चयित्वा तु मामिह ।
लभते देहभेदे तु गणत्वं चातिदुर्लभम् ।।२१।।
अस्मिन्नपि प्रदेशे तु ता गावो ब्रह्मणा स्वयम् ।
शान्त्यर्थं सर्वलोकानां सर्वा दुग्धाः पयोमृतम् ।।२२।।
तासां क्षीरेण संजातं ह्लदमेतन्मनोहरम् ।
भद्रदोहमिति ख्यातं पुण्यं देवह्लदं शुभम्[३३] ।।२३।।
सर्वैर्देवैरहं देवि अस्मिन्देशे प्रसादितः ।
गच्छोपशममीशेति उपशान्तशिवस्ततः ।।२४।।
स्थितो भूत्वाहमत्रस्थः पुण्यमस्यापि दर्शनम् ।
दृष्ट्वैनं[३४] प्रयतो मर्त्यः स्वर्गलोकमवाप्नुयात् ।।२५।।
अत्राहं ब्रह्मणानीय स्थापितः परमेष्ठिना ।
ब्रह्मणश्चापि संगृह्य विष्णुना स्थापितः पुनः ।।२६।।
ब्रह्मणा स ततो विष्णुः प्रोक्तः संविग्नचेतसा ।
मयानीतमिदं लिङ्गं कस्मात् स्थापितवानसि ।।३७।।
तमुवाच पुनर्विष्णुर्ब्रह्माणं कुपिताननम् ।
रुद्रदेवे ममात्यन्तं परा भक्तिर्महत्तरा[३५] ।।२८।।
मयैष स्थापितस्तेन नाम्ना[३६] तव भविष्यति ।
हिरण्यगर्भ इत्येवं ततोत्राहं समास्थितः ।।२९।।
दृष्ट्वैनमपि देवेशे[६७] मम लोकं व्रजेन्नरः ।
पुनरेव[३८] ततो ब्रह्मा मम लिङ्गमिदं[३९] शुभे ।।३०।।

---

३० तत्रापि - क. घ. । ३१ प्रभुः - घ. । ३२ सम्यक् समाहितः - ख., संयतमानसः - घ. । ३३ वनं - क. ख. । ३४ ... व - ख. । ३५ पितामह - घ. । ३६ तव नाम्ना - ख. । ३७ ... शं - क. ख., शि ? । ३८ श्चापि - ख, रपि घ. । ३९ मिमं - क ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्थापयामास विधिवद् भक्त्या परमया युतः ।
स्वलीनेश्वर[४०] इत्येवमत्राहं स्वयमास्थितः[४१] ॥३१॥
स्वस्मिन् परतरे लीनः प्रधाने मम[४२] कारणे ।
तस्मात् स्वलीन[४३]मित्येवं[४४] गुह्यं[४५] क्षेत्रं[४६] मम[४७] स्मृतम् ॥३२॥
प्राणानिह नरस्त्यक्त्वा न पुनर्जायते क्वचित् ।
आनन्त्या सा गतिस्तस्य योगिनां चैव सा स्मृता[४८] ॥३३॥
अस्मिन्नपि[४९] मया देशे दैत्यो दैवतकण्टकः ।
व्याघ्ररूपं समास्थाय निहतो दर्पितो बली ॥३४॥
व्याघ्रेश्वरस्ततः ख्यातो[५०] नित्यमत्रा[५१] हमास्थितः ।
न पुनर्दुर्गतिं[५२] यायात्[५३] दृष्ट्वा[५४] चेमं[५५] महेश्वरम्[५६] ॥३५॥
उत्पलो विदलश्चैव यौ दैत्यौ ब्रह्मणा पुरा ।
स्त्रीवध्यौ दर्पितौ सृष्टौ त्वयैव निहतौ शुभे ॥३६॥
सावज्ञं गेन्दुकेनात्र तस्येदं चिह्नमास्थितम् ।
आदावत्राहमागत्य आस्थितो गणपैः सह ॥३७॥
ज्येष्ठं स्थानमिदं तस्मादेतन्मे पुण्यदर्शनम् ।
दृष्ट्वेदं[५७] मम लिङ्गन्तु ज्येष्ठ[५८]स्थान[५९]समाश्रितम् ॥३८॥
न शोचति पुनर्मर्त्यः संसिद्धो[६०] मृत्युजन्मनी[६१] ।
समन्ताद्दैवतै[६२]स्सर्वैर्लिङ्गानि थापितानि ह ॥३९॥
दृष्ट्वा तु नियतं[६३] मर्त्यो देहभेदे गणो भवेत् ।
मयात्विह[६४]समागत्य स्वयमेव[६५] यतः[६६] स्थितम्[६७] ॥४०॥
न च मुक्तं[६८] मया यस्मादविमुक्तमिदं ततः[६९] ।
क्षेत्रं वाराणसी पुण्या[७०] मुक्तिदं[७१] संभविष्यति ॥४१॥

---

४० स्वर्लीनेश्वर - क. ख, मुनेश्वर - घ. । ४१ मोहितः - घ. । ४२ मयि ? । ४३ स्वर्लीन - क. । ४४... मित्येव - क. ख. । ४५ मुक्तं - क. । ४६ मम - ख. । ४७ इति - ख. । ४८ योगे सिध्देथ योगिना - ख । ४९ तस्मिन्नपि - क. । ५० व्यास - ख. । ५१ नित्यं यत्रा - ख. । ५२ स पुन. स्वर्गति - घ. । ५३ याति - ख. । ५४ दृष्ट्वैनं - ख. । ५५ मम - क. । ५६ ममरेश्वरम् - ख. । ५७ दृष्ट्वैनं - क. ख. । ५८ ज्येष्ठं... - ख. । ५९ स्यानं - ख. । ६० संसिद्धि - ख. । ६१ ..नोः - खः । ६२ दैवतै - क. ख. । ६३ नियतो - क. ख. । ६४ इदानीमह...- क. । ६५ स्वयमस्मिन् - क. । ६६ व्यव... - ख., न्यतः - क. । ६७ स्थितः - क. । ६८ न मुक्तं हि - ख. । ६९ ...क्तं ततः स्मृतं - ख. । ७० पुण्यं - ? । ७१मोक्षदा - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अविमुक्तेश्वरं[७२] मां वै[७३] योत्र द्रक्ष्यति[७४] मानवः ।
गाणपत्या गतिस्तस्य यत्र तत्र मृतस्य ह ॥४२॥
प्रणानिह तु संन्यस्य[७५] यास्यते मुक्तिमुत्तमाम् ।
पित्रा ते गिरिराजेन पुरा हिमवता स्वयम् ॥४३॥
मम प्रियमिदं स्थानं ज्ञात्वा लिङ्गं प्रतिष्ठितम् ।
शैलेश्वरमितिख्यातं दृश्यतामिदमास्थितम् ॥४४॥
दृष्ट्वेदं मनुजो देवि न दुर्गतिमनुव्रजेत् ।
नदी वाराणसी चेयं पुण्या[७६] पापप्रमोचनी ॥४५॥
क्षेत्रमेतदलंकृत्य जाह्नव्या सह संगता ।
स्थापितं संगमे चास्मिन् ब्रह्मणा लिङ्गमुत्तमम् ॥४६॥
संगमेश्वर इत्येवं[७७] ख्यातं जगति दृश्यताम् ।
संगमे देवनद्योस्तु यः स्नात्वा मनुजः शुचिः ॥४७॥
अर्चयेत् संगमेशानं तस्य जन्मभयं कुतः ।
इदमन्यद् बृहत् क्षेत्रं निवासं योगिनां परम् ॥४८॥
क्षेत्रमध्ये च यत्राहं स्वयं भूत्वा समास्थितः ।
मध्यमेश्वर इत्येवं ख्यातं[७८] सर्वसुरासुरैः ॥४९॥
सिद्धनां स्थानमेतद्धि मदीयव्रतचारिणाम् ।
योगिनां मोक्षलिप्सूनां जन्ममृत्युजितात्मनाम् ॥५०॥
दृष्ट्वेदं मध्यमेशानं जन्म प्रति[७९] न शोचति ।
स्थापितं लिङ्गमेतच्च शुक्रेण तव सूनुना ॥५१॥
नाम्ना शुक्रेश्वरमिति[८०] सर्वसिद्धामरार्चितम् ।
दृष्ट्वेदं मानवः सद्यो मुक्तः स्यात् सर्वकिल्विषैः[८१] ॥५२॥
मृतश्च न पुनर्जन्म संसारे तु लभेन्नरः ।
पुरा जम्बुकरूपेण असुरा[८२] देवकण्टकाः[८३] ॥५३॥

---

७२ ...थवा – घ. । ७३ लिंगं – घ. । ७४ मम दृष्ट्वैव - घ. । ७५ संत्यज्य ? । ७६ पुण्यं – क. ख. ।
७७ ...मित्येवं - क, ..त्र - ख । ७८ ख्यातः - क. । ७९ जन्ममृत्यू - ? । ८० शुक्रेश्वरं नाम - क. ख. ।
८१...पात् – घ. । ८२ असुरो – घ. । ८३ देवकण्टकः – घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ते ब्रह्मणो[८४] वरं लब्ध्वा[८५] गोमायुवधशंकिता:[८६] ।
निहता[८७] हिमवत्पुत्रि[८८] जम्बुकेशस्ततो ह्यहम् ॥५४॥
अभवं जगति ख्यातः सुरासुरनमस्कृतः ।
दृष्ट्वैनमपि देवेशं सर्वकामानवाप्नुयात् ॥५५॥
ग्रहैः शुक्रपुरोगैश्च एतानि स्थापितानि हि ॥
पश्य लिङ्गानि पुण्यानि सर्वकामदुघानि मे[८९] ॥५६॥
इत्थमेतानि[९०] पुण्यानि मन्निवासानि पार्वति ।
कथितानि तव क्षेत्रे[९१] गुह्यं चान्यदिदं शृणु ॥५७॥
क्रोशं क्रोशं चतुर्दिक्षु क्षेत्रमेतत्प्रकीर्तितम् ।
- - - - -[९२] चार्वङ्गि मृत्युकालेमृतप्रदम् ॥५८॥
- - - - - - - स्थाने केदारे च व्यवस्थिम् ।
गणत्वं लभ्यते[९३] दृष्ट्वा क्षेत्रेस्मिन् मोक्षमाप्यते ॥५९॥
गाणपत्यपदात्तस्मात् यतः स्यान्मुक्तिरुत्तमा ।
ततो महालयात्तस्मात् केदारान्मध्यमादपि ॥६०॥
स्मृतं पुण्यतमं क्षेत्रमविमुक्तमिदं शुभे[९४] ।
केदारमध्यमे स्थाने स्थानं चैव महालयम् ॥६१॥
मम पुण्यानि भूर्लोके तेभ्यः श्रेष्ठतमं त्विदम्[९५] ।
यदा[९६] सृष्टानि लोकानि ततः क्षेत्रमिदं शुभम् ॥६२॥
कदाचिन्न मया मुक्तमविमुक्तं ततोभवत् ।
अविमुक्तेश्वरं लिङ्गं मम दृष्ट्वेह मानवः ॥६३॥
सद्यः पापविनिर्मुक्तः पशुपाशैर्विमुच्यते ।
शैलेशं संगमेशं च स्वलीनं[९७] मध्यमेश्वरम् ॥६४॥

---

८४ ब्रह्मणोथ - ख., ब्रह्मणस्तु - घ. । ८५ लब्धर - ख. । ८६ ...वरशंकिता: - घ., शंकित: - घ. ।
८७ न हिता - क., निहिता – ख. । ८८ ... पुत्री – क., पुत्र्या – ख. । ८९ .. प्रदानि तु – ख. ।
९० एवमेतानि – ख. । ९१ क्षेत्रं – घ. । ९२ योजनानां मृत्यु (?) – घ. । ९३ लभते – घ. ।
९४ शुभम् – घ. । ९५ न्विदं ? । ९६ यतः – घ. । ९७ स्वर्लीनं – क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

हिरण्यगर्भमीशानं गोप्रेक्षं[९८] सवृषध्वजम् ।
उपशान्तशिवं चैव ज्येष्ठस्थाननिवासिनम् ।।६५।।
शुक्रेश्वरं च विख्यातं व्याघ्रेशं जम्बुकेश्वरम् ।
दृष्ट्वा न जायते[९९] मर्त्यः संसारे दुःखसागरे ।।६६।।

सनत्कुमार उवाच

एवमुक्त्वा महादेवो दिशः सर्वा व्यलोकयत् ।।
विलोक्य संस्थिते पश्चाद् देवदेवे महेश्वरे ।।६७।।
अकस्मादभवत् सर्वं तत् क्षेत्रं ज्वलितं यथा ।
सविद्युत्स्तनिताघोषं सूर्यायुतशतोदितम् ।।६८।।
तेजोभिरेकतः पूर्णं वह्निभास्करयोरिव ।
ततः पाशुपताः सिद्धा भस्माभ्यंगसितप्रभाः ।।६९।।
योगीश्वरा[१००] महात्मानस्तथा वैतानिकव्रताः[१०१] ।
अव्यक्तलिङ्गिनश्चैव शिवयोगोज्ज्वलप्रभाः[१०२] ।।७०।।
बहवः सहसोपेत्य[१०३] नमश्चक्रुर्महेश्वरम् ।
पुनर्निरीक्ष्य देवेशं ध्यानयोगञ्च कृत्स्नशः (?) ।।७१।।
तस्थुरात्मानमाधाय लीयमाना इवेश्वरे ।
स्थितानां[१०४] स तथा[१०५] तेषां देवदेव उमापतिः[१०६] ।।७२।।
सञ्चिन्त्य परमां मूर्तिं बभूव[१०७] पुरुषः प्रभुः ।
षड्विंश ईश्वरोऽव्यक्तः सूर्यायुतसमप्रभः ।।७३।।
कृत्स्नं जगदिवैकस्थं कर्तुं मत्त[१०८] इवास्थितः ।
तस्य तां परमां मूर्तिमास्थितस्य जगत्प्रभोः ।।७४।।
न शशाक वपुर्द्रष्टुं हृष्टरोमा गिरीन्द्रजा ।
ततस्तं हृष्टमात्मानं बुद्ध्वा[१०९] सा प्रकृतिस्थितम् ।।७५।।

---

९८ ...क्षेशं - (?) । ९९ न दृष्ट्वा जायते - क. । १०० योगेश्वरा - ख. । १०१ वैधा .. - क ।
१०२ ...योग . - ख.,... व्रताः - क. । १०३ शतशोभ्येत्य - क. । १०४ स्थिराणाम् - ख. । १०५ तदा - क. घ., सर्वता (था) - ख. । १०६ मुमा... - ख., पतिम् - क. ख. । १०७ बभूवुः - ख. । १०८ मन्त्र (?) मन्त्रिव (?) मन्तरव ?) । १०९ सृष्टवा - घ.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रकृतेर्मूर्त्तिमास्थाय योगेन परमात्मिकाम्[११०] ।
न शशाक वपुर्द्रष्टुं पुरुषस्य परात्मनः ॥७६॥
ततस्ते लयमाधाय योगिनः[१११] पुरुषस्य तु ।
विविशुर्हृदयं सर्वे दग्धसंसारबीजिनः[११२] ॥७७॥
अनुगृह्य ततः सर्वान् तान् सिद्धान् यतिपुङ्गवान् ।
नीललोहितमूर्तिस्थं पुनश्चक्रे[११३] वपुः शुभम् ॥७८॥
तद् दृष्ट्वा[११४] शैलजा प्राह हृष्टसर्वतनूरुहा[११५] ।
स्तुन्वन्ती[११६] चरणौ गत्वा क इमे[११७] भगवन्निति ॥७९॥
तामुवाच सुरश्रेष्ठस्तदा देवीं गिरीन्द्रजाम् ।
मदीयं व्रतमाश्रित्य भक्तिमद्भिर्द्विजोत्तमैः ॥८०॥
यैर्यैर्योग इहाभ्यस्त[११८]स्तेषामेकेन जन्मना ।
क्षेत्रस्यास्य प्रभावेण[११९] भक्त्या च मम भावनात्[१२०] ॥८१॥
अनुग्रहो मया ह्येवं क्रियते मुक्तिदः सदा ।
तस्मादिदं[१२१] महत् क्षेत्रं ब्रह्माद्यैः सेव्यते मम ॥८२॥
श्रुतिमद्भिश्च विप्रेन्द्रैः संसिद्धैश्च तपस्विभिः ।
प्रतिमास[१२२]मथाष्टम्यां प्रतिमासं[१२३] चतुर्दशीम् ॥८३॥
उभयोः पक्षयोर्देवि वाराणस्यां ममास्पदे ।
शशिभानूपरागे च कार्तिक्यान्तु विशेषतः ॥८४॥
सर्वपर्वसु पुण्येषु विषुवेष्वयनेषु[१२४] च ।
पृथिव्यां सर्वतीर्थानि[१२५] वाराणस्यां तु जाह्नवी (म्) ॥८५॥
उत्तरप्रवहां पुण्यां मम मौलिविनिर्गताम् ।
पितुस्ते गिरिराजाच्च[१२६] स्नुतां[१२७] हिमवतः शुभाम् ॥८६॥

---

११० परमात्मिका - क., परमार्थकं - घ. । १११ योगेनः - ख. । ११२ ...जीविनः - क. ख. घ. ।
११३ प्रीतश्चक्रे - ख. । ११४ तं - ख., तन्दृष्ट्वा. - क । ११५ सृष्टसर्वतनूरुहा - ख. । ११६ स्तुवती - घ. ।
११७ एते - ख. । ११८ यैर्योगस्समुपास्यन्ते - ख. । ११९ भाविनः - क. । १२० भावनः - क. ।
१२१ तस्मादियं - क. । १२२ .. सं तथा - घ. । १२३ पौर्णमासीं - घ. । १२४ विषुवायनसन्धिषु - ख. ।
१२५ यानि तीर्थानि - घ. । १२६ गिरिराजस्य - क ख. घ., त्मर - ख. । १२७ सुता - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

भजन्ति[१२८] सर्वतोऽभ्येत्य ताञ्छृणुष्व वरानने ।
सन्निहित्या कुरुक्षेत्रं सार्धं तीर्थशतैस्तथा ॥८७॥
पुष्करं नैमिशं चैव प्रयागं च[१२९] पृथूदकम् ।
सन्ध्या[१३०] सप्तरिचञ्चैव (?)[१३१] सर्वा नद्यः सरांसि च ॥८८॥
समुद्राः सप्त चैवात्र देवतीर्थानि कृत्स्नशः ।
भागीरथीं समेष्यन्ति सर्वपर्वसु[१३२] काशिगाम् ॥८९॥
अविमुक्तेश्वरं[१३३] मां च काशीस्थमचलात्मजे ।
पृथिव्यां यानि पुण्यानि[१३४] मह्यमायतनानि च ॥९०॥
प्रविशन्ति सदा[१३५]भ्येत्य पुण्यां[१३६] पर्वसु पर्वसु[१३७] ।
केदारे चैव यल्लिङ्गं यच्च लिङ्गं महालये ॥९१॥
मध्यमेश्वरसंस्थं[१३८] च तथा पशुपतीश्वरम्[१३९] ।
शंकुकर्णेश्वरं चैव गोकर्णेशौ तथा ह्युभौ[१४०] ॥९२॥
द्रिमिचण्डेश्वरं चैव भद्रेश्वरमथेश्वरम् (?) ।
स्थानेश्वरमथैकाम्रं कालेश्वरमजेश्वरम्[१४१] ॥९३॥
भैरवेश्वरमीशानं तथा कारोहणस्थितम्[१४२] ।
यानि चान्यानि पुण्यानि स्थानानि मम भूतले ॥९४॥
तानि सर्वाण्यशेषेण काशिपुर्यां विशन्ति माम् ।
सर्वपर्वसु पुण्येषु गुह्यं चैतदुदाहृतम् ॥९५॥
तेनेह लभ्यते जन्तोर्विपन्नस्यामृतं पदम्[१४३] ।
स्नातस्य चैव गङ्गायां दृष्टेन च मया शुभे[१४४] ॥९६॥
सर्वयज्ञफलैस्तुल्यमिष्टैः[१४५] शतसहस्रशः ।
सद्य एव समाप्नोति[१४६] किन्त्वतः परमुत्तमम्[१४७] ॥९७॥

---

१२८ ...न्ते - ख. घ. । १२९ स - क. । १३० साध्या - घ. । १३१ सप्तर्षयश्चैव - घ. ।
१३२ पर्वपर्वसु - घ. । १३३ पुरे - क., पुरं - घ. । १३४ तीर्थानि - घ. । १३५ तदा - घ., यदाते...- ख. ।
१३६ पुण्यं - क. । १३७ सर्वसु पर्वसु - घ. । १३८ पुरसंस्थं - घ. । १३९ पाशुपतीश्वरम् - क. ।
१४० च ता (वुभौ - क. ख. । १४१ नलेश्वरम् - घ. । १४२...णास्थितम् - ख. । १४३ ... तास्पदम् - घ. ।
१४४ सकृदेव शुभानने - ख. । १४५ फलं चैव दक्षिणाभिः सहैव तु - ख. । १४६ मवाप्नोति - ख. ।
१४७ किन्त्वस्य परमं शुभम् - क. घ, परमस्ति वै - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सर्वातियनमुख्यानां दिवि भूमौ गिरिष्वपि ।
नातः[१४८] परतरं देवि[१४९] बुध्यस्वास्तीति कृत्स्नशः[१५०] ॥९८॥
ब्रह्मार्कवैश्वानरशक्रचन्द्रै र्जलेश[१५१] वित्ताधिपवायुभिश्च ।
गन्धर्वयक्षोरगसिद्धसंघैः सार्धं सदा सेवितमेतदग्र्यम् ॥९९॥
स्थानं ममेदं हिमशैलपुत्रि गुह्यं सदा क्षेत्रमिदं सुपुण्यम् ।
विशोकसं[१५२] सिद्धिफलप्रदं हि प्रबुद्धतत्त्वा[१५३] यतयो भजन्ति[१५४] ॥१००॥
क्षेत्रेस्मिन्निवसन्ति ये सुकृतिनो भक्ताः सदा मां नराः[१५५] ।
पश्यन्तोन्वहमादरेण शुचयः स्नाताः[१५६] सदा मत्पराः ।
ते मर्त्त्या भयपापदुःखरहिताः[१५७] संशुद्धकर्मक्रियाः ।
भित्त्वा संभवबन्धजालगहनं[१५८] विन्दन्ति मोक्षं परम् ॥१०१॥
एवमेतत्[१५९] सुरैःकीर्णं[१६०] नानाद्रुमलताकुलम्[१६१] ।
जाह्नव्यालंकृतं पुण्यं क्षेत्रं गुह्यतमं मम ॥१०२॥
भागीरथीमिहासाद्य वाराणस्यां ममास्पदे ।
अश्वमेधशतं प्राप्य ब्रह्मलोकं स[१६२] गच्छति[१६३] ॥१०३॥
नातः पुण्यतमं देवि[१६४] नातो गुह्यतमं क्वचित् ।
नातः शुभतरं किंचिन्नातः प्रियतरं मम ॥१०४॥
क्षेत्रं ममेदं सुरसिद्धजुष्टं संप्राप्य मर्त्यः सुकृतप्रभावात् ।
ख्यातो भवेत् सर्वसुरासुराणां मृतश्च यायात् परमं पदं तत्[१६५] ॥१०५॥

⊙ इति स्कन्दपुराणे ऊनत्रिंशोध्यायः ⊙

---

१४८ न तत् - ख. । १४९ किंचित् - घ. । १५० बुध्यस्व मा कृथान्यथा - ख., मध्यं चा - घ. । १५१ जलेन्द्र... - क.घ. ।
१५२ विमोक्षणं - ख. घ. । १५३ तत्वप्रबुद्धा - क. । १५४ भवन्ति - क., वदन्ति - ख. ।
१५५ मानवाः - क. । १५६ स्नात्वा - ख. । १५७ भयदुःखपापरहिताः - क. । १५८ मोहजालगहनं - घ. ।
१५९ एतेद - घ. । १६० ...त्सदा - क, त्सरः - ख., सुविस्तीर्णं - घ. । १६१ वन...- क., वनशताकुलम् - घ. ।
१६२ च - क. ख., ...लोके च - घ. । १६३ मानवः - क., महीयते - घ. । १६४ क्षेत्रं - घ. । १६५ च - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

उद्यानानि ततो देवः स्थानानि च तथात्मनः[१] ।
आख्याय हिमवत्पुत्र्या विचचार तदा पुनः ॥१॥
सोपश्यत[२] तदा विप्रं तप्यमानं परं तपः ।
पुत्रं शतशलाकस्य जैगीषव्यं तपोधनम् ॥२॥
स लिङ्गं देवदेवस्य प्रतिष्ठाप्यार्चयन्[३] सदा ।
भस्मशायी भस्मदिग्धो नृत्तगीतैरतोषयत् ॥३॥
जप्येन वृषनादैश्च[४] तपसा भावितः शुचिः ।
तमेवं वर्तमानं[५] तु भक्त्या परनया[६] युतम्[७] ॥४॥
भगवान् सहसाभ्येत्य इदं वचनमब्रवीत् ।
जैगीषव्य महाबुद्धे पश्य मां दिव्यचक्षुषा ॥५॥
तुष्टोऽस्मि वरदश्चास्मि[८] ब्रूहि यत्ते मनोगतम् ।
स एवमुक्तो देवेन सोमं दृष्ट्वा त्रिलोचनम् ।
प्रणम्य शिरसा पादाववदत्[९] परया मुदा ॥६॥

जैगीषव्य उवाच

नमः सर्वार्थसिद्धाय योगसिद्धाय वै नमः ।
नमः पिनाकहस्ताय हिमवन्निलयाय च ॥७॥
नमः पवनवेगाय ध्येयाय ध्यानिभिः[१०] सदा ।
नमः सोमाय हेम्ने च हेममालाधराय च ॥८॥
नमो गणाधिपतये नमः शान्तेन्द्रियाय च ।
योगसाहाय्यकर्त्रे च[११] सहसोपशमाय च ॥९॥
नमो मृत्युहरायैव नमः शोकहराय च ।
नमः सिद्धिप्रदात्रे च सिध्द[१२] सिद्धिप्रदाय च ॥१०॥

---

१ महात्मनः - घ. । २ सोन्वपश्यत् - घ. । ३ ...यत् - क. । ४ ...नादेन - ख. । ५ युक्त ... - घ. । ६ च परया - घ. । ७ र्च्चितं - क., ...विन्तंम् - घ. । ८ ...श्चैव - क. घ. । ९ ववन्दत् - ख. । १० ध्यामिभिः - ख., ध्यानतः - घ. । ११ सा - क. । १२ सिद्धि... - क. ।

Prof. Madhav Prasad Lamichhane.Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

धारिणे सर्वलोकानां सर्वलोकेश्वराय च ।
नमो दशार्धवर्णाय संसारापनुदाय च ॥११॥
नमः संसारपाराय अपारपरमाय च ।
स्वयं मन्त्रे च मनसे दुर्विज्ञेयाय वै नमः ॥१२॥
नमः कालकलाज्ञाय[13] सकलाया[14]कलाय च ।
नमस्तत्त्वाधिवासाय प्रेताधिपतये नमः[15] ॥१३॥
नमः क्रोधविहीनाय क्रोधाधिपतये नमः ।
नमः श्रमाय श्रमिणे श्रमापनयनाय च ॥१४॥
नमो ज्ञानरसज्ञाय ज्ञानिनेज्ञानहारिणे ।
सत्क्राय[16] चैव तपसि[17] ऐश्वर्यनिरताय[18] च ॥१५॥
नमो ज्ञाना[19]नुबन्धाय[20] अज्ञानविनिर्वर्तिने[21] ।
नमः सर्वानुभावाय भावानुगतचेतसे ॥१६॥
नमः शमदमाध्वाय मृत्युदूतापहारिणे ।
नमः शैलादिनाथाय शैलादिगणपाय च ॥१७॥
नमो योगरहस्याय[22] योगदाय नमो नमः ।
मह्यं सर्वात्मना कामान्[23] प्रयच्छ भगवन् प्रभो ॥१८॥

सनत्कुमार उवाच

स एवं स्तूयमानश्च[24] भक्त्या परमयापि च ।
तुष्टस्तुतोष भूयोस्य[25] इदं चैनमुवाच ह ॥१९॥

देवदेव उवाच

अजरश्चामरश्चैव सर्वशोकविवर्जितः ।
महायोगी महावीर्यो योगैश्वर्यसमन्वितः ॥२०॥
प्रभावाच्चास्य गुह्यस्य क्षेत्रस्य मम शाश्वतम् ।
योगेष्टगुणमैश्वर्यं प्राप्स्यसे परमं महत् ॥२१॥

---

१३ ...लज्ञाय - क. ख. । १४ ... य - क. । १५ अज्ञानविनिर्वत्तिने - ख. । १६ शक्ताय - क. । १७ ... से - क. । १८ ...नियताय - ख. । १९ ज्ञाय - क., वबद्धाय - ख., यबुद्धाय - घ. । २० प्रेताधिपतये नमः - ख. । २१ विनिवारिणे - घ. । २२ योगाय रम्याय - घ. । २३ कामं - घ. । २४ ...स्य - क. ख. । २५ तुष्टस्तुतो हरो देवो - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

भविष्यसि[२६] द्विजश्रेष्ठ योगाचार्यश्च विश्रुतः ।
यश्चेदं[२७] त्वत्कृतं[२८] लिङ्गं नियमेनार्चयिष्यति ॥२२॥
योनयः (?) सप्त गत्वा तु योगेशत्व[२९]मवाप्स्यति ।
जैगीषव्य गुहाञ्चेमां प्राप्य यो योक्ष्यते द्विजः ॥२३॥
सप्तरात्रं स[३०] युक्तात्मा सर्वपापैः प्रमुच्यते ।
मासेन पूर्वां जातिं च पूर्वाधीतं च वेत्स्यति[३१] ॥२४॥
एकरात्रं गतिं शुद्धां द्वाभ्यां तारयते पितॄन् ।
त्रिरात्रेण व्यतीतांश्च परान् सप्त च तारयेत् ।
अतो भूयश्च किं तेद्य[३२] जैगीषव्य ददान्यहम्[३३] ॥२५॥

जैगीषव्य उवाच

भगवन् देवदेवेश इच्छेयं मे[३४] मनोगता[३५] ।
अतोहं नान्यदिच्छामि योगाक्षय्यात् परं हि तम् ॥२६॥
त्वयि भक्तिश्च नित्यं स्यात् सोमे सगणपेश्वरे ।
अनुत्सेकं तथा क्षान्तिं शमं[३६] दमनथापि च ॥२७॥
न चाप्यभिभवं कुर्यान्न[३७] च तेजोवमाननाम् ।
एतान्वरानहं देव[३८] सदेच्छामि महाद्युते ॥२८॥

देवदेव उवाच

एते तव भविष्यन्ति अजय्यत्वं च योगिभिः ।
इच्छतो दर्शनं चैव भविष्यति च ते मम ॥२९॥

सनत्कुमार उवाच

ततः स भगवान् देवः पाराशर्योमया सह ।
सनन्दी सगणश्चैव भक्तानुग्रहलिप्सया ॥३०॥
तप्यतो यक्षराजस्य कृत्वा हृदि महेश्वरम् ।
वरदानाय देवेशो जगाम पुरतस्तदा ॥३१॥

---

२६ त्वं सिद्धश्च - घ । २७ यश्चेमं - क. । २८ दुष्कृतं - घ. । २९ योगशः - क. । ३० स सप्तरात्रं - क. । ३१ ... ते - घ. । ३२ भ्यतेः - क. । ३३ ...म्यहं - क. । ३४ यच्छ यन्मे - क., प्रयच्छस्व - घ. । ३५ मनोगतं - क. घ. । ३६ समं - क. । ३७ न - क. । ३८ एतत्सर्वमेकदैव - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ दृष्ट्वा त्रिपादञ्च ह्रस्वबाहूरुपादकम् ।
तप्यमानं तपो घोरं सुतं विस्रवसस्तदा ॥३२॥
दृष्ट्वोवाच ततो देवः कुबेरं दीप्ततेजसम् ।
तपसा भावितं व्यास त्वगस्थिपरिसंस्थितम् ॥३३॥

देवदेव उवाच

भो भो विस्रवसः पुत्र चक्षुर्दिव्यं ददामि[39] ते ।
सोमं पश्य महासत्व[40] मां त्वं दिव्येन चक्षुषा ॥३४॥
ततस्स दृष्ट्वा देवेशं साम्बं नन्दिपुरस्सरम् ।
प्रणम्य कर्षितस्सम्यगुत्थातुं न शशाक ह ॥३५॥
अबलं तं समालक्ष्य उत्थानेशक्त[41]मीश्वरः ।
उवाचोत्तिष्ठ भद्रन्ते बलं पौराणमस्तु ते ॥३६॥
तत उत्थाय जानुभ्यां कुबेरो ह्यवतिष्ठत ।
पार्श्वगां चैव नेत्रेण देवीमालोकयन् स्थितः ॥३७॥
इयं सा पर्वतसुता सर्वलोकनमस्कृता ।
माता लोकत्रयस्यास्य महायोगबलान्विता ॥३८॥
अहोस्यास्तपसो वीर्यमहो दीप्तिरहो बलम् ।
या प्रभोः सर्वलोकस्य पत्नीत्वं प्रजगाम ह ॥३९॥

सनत्कुमार उवाच

तमेवंभूतमनसमीक्षमाणं[42] च पार्वतीम् ।
बुबोध देवी बुद्ध्वा च चुकोप परमेश्वरी ॥४०॥
सा क्रुद्ध्वा तु कुबेरस्य वाममक्षि सुदीप्तिमत् ।
विशुष्कं कक्षमादीप्ता ददाहाग्नेः शिखा यथा ॥४१॥
पुनश्चास्य विनाशाय कुबेरस्य शुभानना ।
मतिं दध्रे तपोयोनिरथैनामवदद्धरः ॥४२॥

---

३९ ददानि - क. । ४० ...त्वं - घ. । ४१ शक्ति - क. । ४२ ...णस्य - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मा क्रुधो देवि यक्षस्य भक्तस्यास्य तपस्विनः ।
यशस्वी धार्मिकश्चायं भक्तस्त्वाञ्च विशेषतः ।।४३।।
कौतूहलतया ह्येष त्वान्निरीक्षितवान् शुभे ।
प्रसादं कुरु बालस्य धनदस्य महेश्वरि[४३] ।।४४।।

देव्युवाच

एषोसकृन्मां देवेश वीक्षतेविनयात् प्रभो ।
मिनोति न गुणान् देव कस्मान्मम पुरः स्थितः ।।४५।।
तेजसां योप्रमेयानां कुर्यान्मोहेन लंघनम् ।
सोल्पवीर्यो विनश्येत पतङ्गोग्निमिवागतः ।।४६।।

सनत्कुमार उवाच

तामेवं क्रोधताम्राक्षीं क्रुद्धां संप्रेक्ष्य शंकरीम् ।
उवाच मधुरं श्लक्ष्णं गिरीन्द्रतनयां वचः ।।४७।।
ब्रवीमि त्वां महाभागे मा क्रुधो जगतोरणि[४४] ।
त्वया सृष्टं जगत् सर्वं प्रकृतिस्त्वं सुरेश्वरि ।।४८।।
पुत्रस्तेयं यतो देवि तस्मान्न क्रोद्धुमर्हसि[४५] ।
मातरं चैव पुत्रस्य वीक्षमाणस्य शोभने ।।४९।।
न दोषोस्ति न चैवास्य त्वयि चेतो विमोहितम् ।
तस्मात् त्वमेव देव्यस्य प्रपन्नस्य[४६] नतस्य च ।
प्रसादं कुरु देवेशे कुबेरस्य यथेप्सितम् ।।५०।।

सनत्कुमार उवाच

सा तथा देवदेवेन प्रोक्ता गिरिवरात्मजा ।
प्रसादमकरोत्तस्य प्रसन्ना चेदमब्रवीत् ।।५१।।

देव्युवाच

कुबेर यत्ते दुरितं क्षान्तं तत्तो मयानघ ।
तुष्टास्मि मा कृथाश्चैवं पुनस्तेजस्विलंघनम् ।।५२।।

---

४३ ... श्वरी - क. । ४४ ...वले (रणे) - घ. । ४५ क्रोधमर्हति - घ., ति - घ. । ४६ प्रसन्नस्य - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यत् त्वदन्ते मया दग्धमीक्षमाणस्य लोचनम् ।
एतत्तथैव[४७] भवतु[४८] पिङ्गलं दीप्तिमच्च ह ।।५३।।
अनेन चाङ्कितो लोके भविष्यसि न संशयः ।
एकाक्षिपिङ्गलो नाम्ना ख्यातस्सर्वत्रपूजितः ।।५४।।
चरितं यत्तपश्चे द[४९]मक्षयं तच्च तेव्ययम् ।
सौभाग्यमुत्तमं चैव मत्प्रसादाद् भविष्यति ।।५५।।

सनत्कुमार उवाच

एवमुक्त्वा ततो देवी विरराम शुभानना ।
भगवान् वरदोस्मीति कुबेरमवदत्ततः ।।५६।।
अथैव[५०]मुक्तो देवेन कुबेरो हृष्टमानसः ।
तुष्टाव देवं देवीं च शिरसा प्राञ्जलिर्नतः ।।५७।।

कुबेर उवाच

नमः पट्टिशहस्ताय किरीटवरधारिणे ।
नमो बलयधारिण्यै धारिण्यै दर्पणस्य च[५१] ।।५८।।
नमः सर्वाङ्गकेशाय दीर्घकेश्यै[५२] नमो नमः ।
नमो मेखलधारिण्यै[५३] नमो मौञ्जीधराय च ।।५९।।
नमश्चित्रशिखंडिन्यै[५४] नमः पिङ्गजटाभृते ।
नमो ज्ञानाय तनवे[५५] भूताधिपतये नमः ।।६०।।
नमस्ताराभिधारिण्यै[५६] सिंहोरस्काय वै नमः ।
नमो रत्नाग्र्यधारिण्यै[५७] नमश्चन्द्रार्धमौलये[५८] ।।६१।।
नमः प्रकृतये चैव नमोस्तु पुरुषाय च ।
नमोस्तु बुद्धये चैव अहंकाराय वै नमः ।।६२।।
नमोस्तु रतये चैव सुखाय च नमो नमः ।
नमः कृत्यै[५९] कर्मणे च आरम्भाय समाप्तये ।।६३।।

---

४७ वामन्तथैव - ख. । ४८ भवितृ - क. । ४९ यत्तु पश्येद्यः - ख. । ५० तथैव - घ. । ५१ काञ्चनं ह ... - ख. ।
५२ सर्वज्ञकेशाय दीप्तकेश्यै - घ. । ५३ स्तु शूलधारिण्यै - ख. । ५४ नमो नीलशिखण्डिन्यै - घ. ।
५५ भूतये - क. । ५६...स्ताराततारायै - क. । ५७ ग्रधारिण्यै - क. । ५८...मौलिने - ख. । ५९ कीर्त्यै - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नमो यज्ञाय मन्त्राय दक्षिणायै[६०] ऋचे नमः ।
नमः साम्नेथ यजुषे छन्दसे ष्टुतये नमः ।।६४।।
नमो ग्रये च वेद्यै च स्वाहायै हविषे नमः ।
नमो लक्ष्म्यै श्रियै चैव नमो धर्माय वेधसे ।।६५।।
इच्छायै रतये चैव नमः सम्पद्विरागिणे ।
नमः सिद्ध्यै तथा पुष्टचै तुष्टचै क्षान्त्यै नमो नमः ।।६६।।
नमस्स्वधायै कव्याय हव्याय च नमो नमः ।
नमो वेद्याय विद्यायै नमः शर्वाय भक्तये ।।६७।।
लयायोत्पत्तये[६१] चैव स्थित्यै संसारणाय[६२] च ।
मोक्षाय मुक्तये चैव नमः कालाय मृत्यवे ।।६८।।
नमस्ते भगवन् देव सह देव्या जगत्पते ।
दिश[६३] नो भूतभव्येश यन्मे मनसि संस्थितम् ।।६९।।

सनत्कुमार उवाच

य इमं पठते नित्यं स्तवं प्रातस्समुत्थितः ।
जपँश्च विप्रो वैश्यो वा शूद्रः क्षत्रिय एव वा[६४] ।।७०।।
तस्य तुष्टो धनेशस्तु[६५] प्रयच्छति महद्धनम्[६६] ।
सोमश्च भगवान् तुष्टो गतिमिष्टां प्रयच्छति ।।७१।।

सनत्कुमार उवाच

एवं हि[६७] संस्तुतस्तेन कुबेरण जगत्पतिः ।
उवाच वरदोस्मीति ब्रूहि विश्रवसस्सुत[६८] ।।७२।।

कुबेर उवाच

त्वत्तः प्रसादं सततं भक्तिं च त्वयि[६९] शाश्वतीम् ।
भगवन् त्वाञ्च पश्येयं वर एषोस्तु मे विभो ।।७३।।

---

६० दीक्षणायै - क., दीक्षायै दीक्षिताय च - ख. । ६१ प्रलयोत्पत्तये - क. ख. । ६२ संसारिणाय - क. ।
६३ शंस - घ । ६४ ब्राह्मणः क्षत्रियो वापि विट् शूद्रो वापि संयतः - ख. । ६५ ...थ देवस्तु - ख. ।
६६ महद्वरम् - ख. । ६७ तु... - ख. । ६८ स्ववचसा पुनः - घ. । ६९ त्वयि च - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच[७०]

एवमस्त्विति तत्सर्वं प्रदाय[७१] भगवान् शिवः[७२] ।
आत्मना सह सख्यं च ददावात्यन्तिकं तदा ॥७४॥

देवदेव उवाच

गृहाण चैतां[७३] शिबिकां नरयुक्तामसंगिनीम् ।
लोकान् यथेष्टाँल्लोकेश यामारुह्य चरिष्यसि[७४] ॥७५॥
इमां चैवार्शनिं दिव्यामप्रतीघातलक्षणाम् ।
गृहाणायुधमेतत्तो भविष्यत्यरिदुस्सहम् ॥७६॥
अस्त्रञ्च ते प्रयच्छामि तव नाम्ना भविष्यति ।
कौबेरमिति विख्यातं मोहनं सर्वदेहिनाम् ॥७७॥

सनत्कुमार उवाच

ततस्स देवस्तुष्टात्मा मालां स्वीया[७५]मनिन्दिताम् ।
आबबद्धास्य शिरसि भास्कराकारवर्चसम्[७६] ॥७८॥
कुशेशयानां फुल्लानां स्रग्दाम च[७७] मनोरमम्[७८] ।
आबबद्धास्य कण्ठे वै प्रीयमाण उमापतिः[७९] ॥७९॥
प्रकामं[८०] दर्शनञ्चास्य दत्त्वा चैव धनेशताम् ।
जगाम भगवान् सोमस्ततोऽन्यं देशमीप्सितम् ॥८०॥

सनत्कुमार उवाच

य इदं[८१] तु कुबेरस्य वरदानमशेषतः ।
शृणुयाच्छ्रावयेद्वापि नित्यं विप्रान् समाहितः ॥८१॥
धनवान् रूपसंपन्नः पुत्रपौत्रसमन्वितः ।
कुलज्ञानबलोपेतो जायते स मृतो नरः ॥८२॥

---

७० देउदेव उ. - क. ख. घ. । ७१ प्रसादं - घ. । ७२ ...ञ्छिवः - क. । ७३ चेमां - ख. ।
७४ च यास्यसि - ख. । ७५ स्वय - क. । ७६ ...साम् - क. । ७७ ...ञ्च - क. ख. । ७८ मनोहरं - ख. ।
७९ मुमापतिः - ख. । ८० ...म - क. । ८१ इमं - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

अथ देवी महाभागा सहिता शंभुना तदा ।
संचिन्त्य पंचचूडास्तु तपन्त्योप्सरसः शुभाः ।।८३।।
कृशाङ्ग्यो भक्तिमत्यश्च तपसा दग्धकिल्विषाः ।
कारुण्याहृतचेतस्का[८२] देवं वचनमब्रवीत् ।।८४।।
एतासां तप्यमानानां[८३] योषितां वरमुत्तमम् ।
ददामीप्सितमीशान[८४] तन्मेनुज्ञातुमर्हसि ।
तस्या विज्ञप्तिमाकर्ण्य भगवा[८५]निदमब्रवीत् ।।८५।।

देवदेव उवाच

एवं कुरु महाभागे भक्तानुग्रहमीप्सितम्[८६] ।
वैदिक्योप्सरसो ह्येताः पंचचूडा इति स्मृताः ।।८६।।
त्वां कृत्वा हृदि तप्यन्ते वर आभ्यः[८७] प्रदीयताम्
ततः सा देवदेवेन तथा समनुचोदिता ।
पंचचूडाः समागम्य वच एतदुवाच[८८] ह ।।८७।।
तुष्टास्म्यप्सरसः साक्षात्[८९] पश्यध्वं मां शुचिस्मिताः ।
ददामि[९०] वो वरानिष्टान् ये वो[९१] हृदयसंस्थिताः ।।८८।।

सनत्कुमार उवाच

ता एवमुक्ताः पार्वत्या वैदिक्योप्सरसः शुभाः ।
देवीं दृष्ट्वा प्रणम्यैनां[९२] शिरसा पादयोर्नताः ।।८९।।
अश्रुपूर्णेक्षणा दीनाः संस्तभ्यात्मानमात्मना ।
शिरस्यञ्जलिमाधाय[९३] तुष्टुवुः सहिताः समम् ।।९०।।

अप्सरस ऊचुः

नमः सिद्ध्यै नमस्तुष्ट्यै क्रियायै बुद्धये[९४] नमः ।
नमः कीर्त्यै नमः सत्यै उल्क(ा)जायै तथेष्टये ।।९१।।

---

८२ कारुण्यकृतचेतस्का - ख. । ८३ जप्यमानानां - घ. । ८४ ददानीप्सितमीशान - क. ख. । ८५ भवानी - घ. ।
८६ ...कारिणि - ख. । ८७ एभ्यः - क., भिष्टं - ख. । ८८ वाक्यमेतदुवाच - ख. । ८९ सर्वाः... - घ. ।
९० ...ति - क. ख. घ. । ९१ यद्वो - क., यानि वो हृदि - ख. । ९२ ...व - क. ख. घ. । ९३ ...दाय - घ. ।
९४ वृद्धये - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नमः पृथिव्यै कल्याण्यै श्रियै[95] लक्ष्म्यै नमो नमः ।
नमः सुधायै स्वाहायै स्वधायै दितये नमः ॥९२॥
नमोस्तु तडिते[96] चैव सौदामन्यै[97] नमो नमः ।
सावत्र्यै चाथ गायत्र्यै वेदमात्रे नमो नमः ॥९३॥
नमः पर्वतकन्यायै मतये स्मृतये नमः ।
नमः पर्वतवासिन्यै रुद्राण्यै च नमो[98] नमः ॥९४॥
नमः प्रकृतये चैव ज्योत्स्नायै ऋद्धये नमः ।
शोभायै दीप्तये चैव भास्करग्रहरश्मये ॥९५॥
गत्यायै गतये चैव इन्द्राण्यै[99] मुक्तये नमः ।
नियत्यै सरिते चैव गङ्गायै सूतये नमः ॥९५॥
हेतवे[100] प्रीतये चैव नमः करणवृत्तये[101] ।
नमः सन्ततये चैव इरायै वृत्तये नमः ॥९७॥
वारुण्यै च शरण्यायै शान्त्यै कान्त्यै[102] नमो नमः ।
कौशिक्यै च नमस्तेस्तु कात्यायन्यै नमो नमः ॥९८॥
नमः सन्नतये चैव महिम्ने च नमो नमः ।
अणिमायै नमस्तेस्तु लघिमायै नमो नमः ॥९९॥
पूजायै[103] ते नमश्चैव शितिबाह्वे[104] च सृप्तये[105] ।
संज्ञायै च नमस्तेस्तु गिरेथ[106] स्मृतये नमः ॥१००॥
नमस्तेस्तु सरस्वत्यै जिह्वायै दृष्टये नमः ।
नमो महिषघातिन्यै तथा शुंभनिशुंभयोः ॥१०१॥
नमः सिंहरथिन्यै[107] च शूलिन्यै च नमो नमः ।
नमो मुद्गरधारिण्यै[108] कवचिन्यै नमो नमः ॥१०२॥
नमः कुण्डलधारिण्यै धारिण्यै जगतो नमः ।
नमो धनुर्धरायै च खड्गिन्यै च[109] नमो नमः ॥१०३॥

---

९५ श्रिये - क. । ९६ तद्धिते - क. । ९७ मौदामिन्यै - घ. । ९८ चैव ते - ख. । ९९ ... यै - ख. ।
१०० ...ये - ख. । १०१ कारणवृत्तये - ख. । १०२ काल्यै - ख. । १०३ प्रजायै - घ. । १०४ शितिकायै - घ. ।
१०५ वृष्टये - घ. । १०६ शिवायै - घ. । १०७ सिंहरथे - ख. । १०८ नमस्तु क्षीधरारिण्यै - ख. ।
१०९ खड्गहस्ते - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नमः पिच्छध्वजिन्यै च धारिण्यै पट्टिशस्य च ।
नमोस्तु भूतमात्रे च स्कन्द[११०]मात्रे नमो नमः ॥१०४
विशाखशाखयोर्मात्रे[१११] नैगमेशस्य चैव हि ।
जात्यै सर्वसुराणां[११२] च देवतायै वनस्य[११३] च ॥१०५॥
आर्यायै च नमो नित्यं शिखण्डिन्यै[११४] नमो नमः ।
नमो नीलशिखण्डिन्यै दीर्घवेण्यै नमो नमः ॥१०६॥
नमोस्तु तनुमध्यायै[११५] देवतायै धनस्य[११६] च ।
नमो धृत्यै नमश्श्रित्यै कीर्तये च[११७] नमो नमः ॥१०७॥
स्त्रीणां सौभाग्यदायिन्यै धारिण्यै च नमो नमः ।
राकानुमतये चैव सिनीवाल्यै नमो नमः[११८] ॥१०८॥
नमः क्रियायै श्रद्धायै मेधायै च नमो नमः ।
नमोस्तु धारणायै च ऊहायै च नमो नमः ॥१०९॥
अपोहायै नमस्तेस्तु वषट्प्रकृतये नमः ।
नमः समाधये चैव स्पृहायै चित्तये[११९] नमः ॥११०॥
वेदनायै नमस्तेस्तु बृहदुक्थ्यै[१२०] नमो नमः ।
नमः प्रभायै[१२१] शुद्धायै शुद्धये[१२२] शुचये नमः ॥१११॥
नमस्त्र्यम्बकभार्यायै विद्यायै[१२३] च नमो नमः।
दीक्षायै[१२४] दक्षिणायै च ज्वालायै च नमो नमः ॥११२॥
इन्द्रियणां प्रवृत्त्यै च निवृत्त्यै चैव कर्मणाम् ।
श्रुतये सर्ववेदानां[१२५] भवान्यै[१२६] च नमो नमः ॥११३॥
दुर्गायै दुर्गतारिण्यै[१२७] धारिण्यै सर्वदेहिनाम् ।
नमस्ते सर्वदेवत्ये नमस्ते लोकभाविनि[१२८] ॥११४॥
नमः शान्त्यै नमः कान्त्यै नमः पत्न्यै हरस्य च ।
नमोस्त्व[१२९]दित्यै दानव्यै वितानायै[१३०] नमो नमः ॥११५॥

११० ...स्य च - क. ख. । १११ श्चैव - क., मात्रे च - ख. । ११२ रसानां - ख. । ११३ नमस्य - क. । ११४ शिखिन्यै च - घ. । ११५ तन्तुमध्यायै - ख. । ११६ वनस्य - घ. । ११७ कीर्त्यै चैव - ख. । ११८ तथैव च - क. । ११९ वित्तये - ख. । १२० ...क्ष्यै - क., ...क्त्यै - ख. । १२१ विशुद्धायै - ख., वै - क. । १२२ शुद्धायै - ख. । १२३ नित्यायै - घ. । १२४ दीक्षणायै - क., दीक्षि... ख. । १२५ देवानां - ख. । १२६ भवाद्यै - ख. । १२७ दुर्गतायै च - ख. । १२८ सर्वभाविनी - ख. । १२९... स्तु - ख. । १३० विनतायै - ख., वितता - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नमः शिवायै कद्र्वै च प्रभावायै[१३१] नमो नमः ।
मृकण्ड्वै[१३२] माहँबाह्वै च तथा सुरभये नमः ॥११६॥
विनतायै तथा लक्ष्म्यै सुरसायै नमो नमः ।
नमस्ते शितिकण्ठिन्यै नमस्ते सर्वतः[१३३] सदा ।
दिश नः सुमनाः सर्वं यत् किंचिद् हृदये स्थितम् ॥११७॥

सनत्कुमार उवाच

य इदं[१३४] पठते नित्यं नरः स्त्री वा समाहितः ।
स रात्रिषु[१३५] कृतं पापं त्यजेत् सर्वमशेषतः ॥११८॥
शयानो जपते यश्च प्रयतो व्यास नित्यशः ।
दिवाकृतं स जह्यात्तु मृतश्च सुगतिं व्रजेत्[१३६] ॥११९॥
यश्चैत[१३७]च्छृणुयान्नित्यं द्विजान् वा श्रावयेत् सदा[१३८] ।
स देहभेदमासाद्य पञ्चचूडप्रियो भवेत् ॥१२०॥
यश्चेदं[१३९] प्रजपन् मर्त्यस्त्यजेत् प्राणान् सुदुस्त्यजान् ।
विमाने सूर्यसंकाशे अप्सरोगणसेविते ॥१२१॥
सर्वपापविनिर्मुक्तो रमेद्वर्षायुतं शतम्[१४०] ।
यश्च भक्त्या परमया तिथौ नियमवान्नरः ॥१२२॥
देवीभ्यर्च्य जपते सर्वपापैः प्रमुच्यते ।
जपनादेव तपसा[१४१] देहे भिन्ने च भक्तिमान्[१४२] ।
स भूत्वानुचरो देव्याः पुण्ये लोके महीयते ॥१२३॥

सनत्कुमार उवाच

ताभिरेवं स्तुता देवी स्थिता देवस्य सन्निधौ ।
उवाच हृष्य[१४३]माणास्या पञ्चचूडा इदं[१४४] वचः ॥१२४॥
शृणुताप्सरसः सर्वास्तपसोऽस्य[१४५] महत्फलम् ।
यच्चापि परया भक्त्या मां प्रपन्नाः स्थ शोभनाः ॥१२५॥

---

१३१ प्रभवायै - ख. । १३२ मृत्कण्वै - ख. । १३३ सर्वदे - ख. । १३४ इमं - क. ख. । १३५ रात्रिजं - क. ।
१३६ स्सुगतिमाप्नुयात् - ख. । १३७ यश्चैनं - क. । १३८ श्रावयीत वा - ख. । १३९ यश्चैनं - क. ख. ।
इतः परं पत्रमेकं खण्डितम् । १४० समम् - ख. । १४१ देहपतनात् - घ. । १४२ शक्तिमान् - घ. ।
१४३ हृर्ष ...- ख. घ. । १४४ पंचचूडमिदं - ख., तदा घ. । १४५ ...थ - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अजराश्च विशोकाश्च नित्यं मुदितमानसा: ।
प्रियाश्च सर्वलोकस्य भविष्यथ ममाज्ञया ॥१२६॥
ब्रूत यच्चापि किंचिद्वो हृदि स्थितमशंकिता: ।
सर्वं दास्यामि तद्वोहं मा चिरायत दुर्व्यथा:[१४६] ॥१२७॥

पंचचूडा ऊचु:

देवि पुंसां स्त्रिय:[१४७] सर्वा: कार्यार्थं[१४८] विदितं च ते ।
अर्थिनस्ते च नस्तावत् यावत् कार्यं समाप्यते ।
समाप्ते चैव[१४९] ते कार्ये परा इव भवन्ति न: ॥१२८॥
तद् देवि यदि तुष्टासि यदि देयो वरश्च न: ।
सर्वस्त्रीणां महादेवि भवन्तु पुरुषा वशा: ॥१२९॥

देव्युवाच

अद्यप्रभृति लोकेषु सर्वस्त्रीणां नरा: सदा ।
वश्या भवन्तु सर्वत्र[१५१] सर्वकार्यकराश्च ह[१५२] ॥१३०॥
अदौ पश्चाच्च सर्वाभ्यो[१५३] हिरण्यं पशव: स्त्रिय: ।
सर्वभोगाँश्च दास्यन्तु वशगा: सर्वथापि च ॥१३१॥
व्यलीकान्यपि कुर्वन्त्यो बहूनि विविधानि च ।
प्रिया एव भविष्यन्ति पापं न च भवेत् सदा ॥१३२॥
मातरं पितरं भ्रातॄन्[१५४] सुहृदोथ सुतानपि ।
अकार्याणि करिष्यन्ति स्त्रीणां वश्यत्वमागता: ॥१३३॥
पश्यन्तोपि व्यलीकानि दोषान् वैकृत्यमेव च ।
नैव द्रवन्ति ते पुंसां(?)[१५५] मद्वरान्मोहितेन्द्रिया: ॥१३४॥

सनत्कुमार उवाच

तत: सा देवदेवस्य पत्नी हिमवत: सुता ।
माल्यदाम गृहीत्वा तु भ्रामयन्ती शुभानना ॥१३५॥

---

१४६ दुष्यथा: - ख. । १४७ दिश च (वशा:?) - ख. । १४८... र्थे - ख. । १४९ तत् ख. घ. । १५० त्वं देवि - घ. । १५१ सर्वे वश्या भविष्यन्ति - घ. । १५२ सदा - घ. । १५३ सर्वेभ्यो - ख. । १५४ भार्या (?) १५५ वश्या: (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

भव नार्य इति प्राह हसन्ती प्रियमव्ययां ।
भ्राम्यमाणस्य दाम्नोस्य यान्य[१५६]शोर्यन्त[१५७] भूतले ॥१३६॥
कुसुमान्यभवँस्तानि नार्यः कमललोचनाः ।
ता उवाच पुरा यूयं जराक्षयविवर्जिताः ॥१३७॥
जगन्मोहकराः सर्वाः[१५८] पुंसां हृदयबन्धनाः[१५९] ।
दृष्टिस्पर्शविलासेषु आविश्य जगतीत्रयम्[१६०] ॥१३८॥
- - - - - पुरुषाँस्त्रीवशाँश्च करिष्यथ ।
नराः सर्वे च युष्मासु[१६१] भविष्यन्ति सदा रताः ॥१३९॥
वृत्तिः शुभा[१६२] भवित्री च सर्वासां मम तेजसा ।
पुंसां स्त्रीभोगसिद्ध्यर्थं स्त्रीणां रत्यर्थमेव च ।१४०॥
क्रियाः शुभाङ्गसंस्कारा दिव्या ये[१६३] मानुषाश्च ह ।
बहुरूपाश्च ता भूत्वा विविशुः सर्वदाङ्गनाः[१६४] ॥१४१॥

सनत्कुमार उवाच

एवं देवी तदा व्यास सृष्ट्वा ता[१६५] वै विसृज्य च ।
उवाचाप्सरसो ब्रूत किं वो भूयः करोम्यहम्[१६६] ॥१४२॥
तास्तुष्टमनसश्चापि ऊचुर्व्यास भवेम हि ।
देवानां मानुषाणां च अवश्याश्चैव[१६७] रक्षसाम् ।
ता उवाच ततो देवी एवं लोके भविष्यथ[१६८] ॥१४३॥
ततः स सहितो देव्या सनन्दी परमेश्वरः ।
गणैः सर्वैश्च सहितो गृहान्स्वानाविशत् प्रभुः ॥१४४॥

---

१५६ यानि - ख. । १५७ ...न्ति - ख. । १५८ यूयं - ख. - । १५९...नात् - क. । १६० जगति स्त्रियः - घ. । १६१ युष्माकं - घ. । १६२ शूद्रा - घ. । १६३ ये दिव्या - घ. । १६४ सर्वमंगलाः - घ. । १६५ सृष्टास्ता -(?) १६६ किं भूयः रवाण्यहम् (?) । १६७ अवध्याश्चैव - ख. घ. । १६८ "एवं भवत्विति प्रोक्ता (क्त्वा) देवी त्रिजगतो वली (रणी) । उवाच सद्म गच्छाम चिरोत्सृष्टमिति प्रभो" इति पाठः घपुस्तके ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

भगनयननिपाती दैत्यदर्पापहारी
सुरकमलहिमौघः कामयज्ञाग्निहन्ता[१६९] ।
जलदवृषभयायी सर्वदुःखान्तकारी
समरवृषभकेतुश्चन्द्रमौलिर्जगाम[१७०] ॥१४५॥

⊙ इति स्कन्दपुराणे वाराणस्यवलोकने जैगीषव्यधनदपंचचूडानां[१७१] वरप्रदाननामा त्रिंशोध्यायः[१७२] ⊙

व्यास उवाच

भगवन् पिङ्गलः केन गणत्वं समुपागतः[१] ।
अन्नदत्वञ्च[२] संप्राप्तो वाराणस्यां[३] महाद्युतिः ॥१॥
क्षेत्रपालः कथं जातः प्रियत्वं च कथं गतः ।
एतदिच्छामि कथितं श्रोतुं ब्रह्मसुत त्वया ॥२॥

सनत्कुमार उवाच

शृणु व्यास यथा लेभे गणेशत्वं स पिंगलः ।
अन्नदत्वं च लोकानां स्थानं वाराणसीं च हि ॥३॥
पूर्णभद्रसुतः श्रीमानासीद् यक्षः प्रतापवान् ।
हरिकेश इति ख्यातो ब्रह्मण्यो[४] धार्मिकश्च ह ॥४॥
तस्य जन्मप्रभृत्येव भवे[५] भक्तिरनुत्तमा ।
तदाशीस्तन्नमस्कारस्तन्निष्ठस्तत्परायणः ॥५॥
आसीनश्च शयानश्च गच्छन्तिष्ठन्ननुव्रजन् ।
भुञ्जानोथ पिबन् वापि[६] रुद्रमेवान्वचिन्तयत्[७] ॥६॥
तमेवं युक्तमनसं पूर्णभद्रः पिताब्रवीत् ।
न त्वा पुत्रमहं मन्ये दुर्जातो यस्त्वमन्यथा ॥७॥

---

१६९ पहर्ता - ख. । १७० मौली जगाम - ख. । १७१ आचूड (२६८) - ख. । १७२ अत्र ऊनत्रिंशोध्याय इति ख. घ. पुस्तकयोः पाठः । १ समुपावृतः - घ । २ अर्थदत्वञ्च - घ. । ३ यक्षराट् स - घ. । ४ ब्राह्मणो - ख., वरेण्यो - घ. । ५ सर्वं (शर्वे ?) - घ. । ६ ...,नश्च वदँश्चापि - घ. । ७ ...नुचिन्तयन् - घ. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नहि[८] यक्षकुलीनाना[९] मेतद् वृत्तं भवत्युत ।
गुह्यका वत यूयं वै स्वभावात्[१०] क्रूरचेतसः ।।८।।
क्रव्यादाश्चैव किं भक्षा हिंसाशीलाश्च पुत्रक ।
मैवं कार्षीर्न नो वृत्तिरेवं दृष्टा महात्मनाम् ।
स्वयंभुवा यथा सृष्टा सैव वृत्तिः प्रशस्यते ।।९।।

हरिकेश उवाच

सृष्टा[११] चैवा[१२]प्रशस्ता च गर्हिता साधुभिः सदा[१३] ।
वृत्तिः स्वयंभुविहिता[१४] त्यक्तव्या यदि नो[१५] भवेत् ।।१०।।
आश्रमान्तरजं कर्म न कुर्युर्गृहिणस्ततः ।
हित्वा मनुष्यभावं च कर्मभिर्विविधैश्च ह[१६] ।।११।।
देवत्वं नो[१७] विमार्गेयुर्मानुष्यं जातिमेव च ।
अथ चेद्विहितं तेषां कर्म तत्प्राप्तिसंसृतम् ।
ममापि[१८] विहितं पश्य कर्म तन्नात्र[१९] संशयः ।।१२।।

सनत्कुमार उवाच

स एवमुक्तः पुत्रेण[२०] पूर्णभद्रः प्रतापवान् ।
उवाच निष्क्रम क्षिप्रं गच्छ त्वं यत्र रोचते[२१] ।।१३।।
ततः स निर्गत[२२]स्त्यक्त्वा गृहसंबन्धिबान्धवान्[२३] ।
वाराणसी[२४] समासाद्य तपस्तेपे सुदुश्चरम् ।।१४।।
स्थाणुभूतो ह्यनिमिषः शुष्ककाष्ठोपलोपमः[२५] ।
संनियम्येन्द्रियग्राममवातिष्ठत[२६] निश्चलः ।।१५।।
अथ तस्यैवमनिशं[२७] तत्परस्य तदाशिषः ।
सहस्रमेकं वर्षाणां दिव्यमत्यतिवर्तत[२८] ।।१६।।

---

८ न वै - घ. । ९ यक्षकुलस्यास्य - घ. । १० न तावत् - घ. । ११ दृष्ट्वा - घ. । १२ चैव - घ. । १३ च सुबुद्धिभिः - घ. । १४ स्वयंभुवा सृष्टा - घ. । १५ वा - ख. । १६ सह - घ. । १७ नहि - घ. । १८ मया च - घ. । १९ कर्मैतन्नात्र - घ. । २० एवमुक्तः स्वपुत्रेण - घ. । २१ हितं चैव यदेच्छसि - घ. । २२ निंदित - ख. । २३ गृहं संबन्धिनं तथा - घ. । २४ स्यां - घ. । २५ शुष्कश्चैव विशेषतः - घ. । २६ मवाकृतिष्ठत - घ. । २७ तस्यत्विशक्तस्य - घ. । २८ ...मभ्यति... - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वल्मीकेन समाक्रान्तो[२९] भक्ष्यमाणः पिपीलिकैः ।
वज्रसूचीमुखैर्व्यास विध्यमानस्तथैव च ॥१७॥
निर्मांसरुधिरत्वग् वै[३०] कुन्दशंखेन्दुसप्रभः ।
अस्थिशेषो[३१]भवत् सर्वो देवश्चैवममन्यत[३२] ॥१८॥
एतस्मिन्नन्तरे देवी व्यज्ञापयत शंकरम् ।
उद्यानं पुनरेवेदं द्रष्टुमिच्छामि सर्वद[३३] ॥१९॥
क्षेत्रस्य चैव माहात्म्यं श्रोतुं कौतूहलं हि मे ।
यतश्च प्रियमेतत्तो यच्चास्य फलमुत्तमम् ॥२०॥
इति विज्ञापितो देवः पार्वत्या भुवनेश्वरः ।
सर्वं पृष्टं यथान्यायमाख्यातुमुपचक्रमे ॥२१॥
निर्जगाम च देवेशः पार्वत्या सह शंकरः ।
उद्यानं दर्शयामास देव्या देवः पिनाकधृक्[३४] ।२२॥

प्रफुल्लनानाविधगुल्मशोभितं[३५] लताप्रतानावनतं[३६] मनोरमम्[३७] ।
विरूढपुष्पैः परितः[३८] प्रियंगुभिः सुपुष्पितैः कण्टकितैश्च[३९] केतकैः ॥२३॥
तमालगुल्मैर्निचितं[४०] सुगन्धिभिर्निकामपुष्पैर्बकुलैश्च सर्वशः ।
अशोकपुंनागवनैस्सुपुष्पितैर्द्विरेफमालाकुलपुष्पसंचयैः ॥२४॥
क्वचित् प्रफुल्लाम्बुजरेणुरूषितै विहङ्गमैश्चारुकलप्रणादिभिः ।
विनादितं सारसहंसमद्गुभिः[४१] प्रमत्तदात्यूहरुतैश्च वल्गुभिः ॥२५॥
क्वचिच्च चक्राह्वरुतोपनादितं क्वचिच्च कादम्बकदम्बकैर्युतम्[४२] ।
क्वचिच्च कारण्डवनादनादितं क्वचिच्च मत्तालिकुलाकुलीकृतम् ॥२६॥
मदाकुलाभिश्च मराङ्गनाभिर्निषेवितं चारुसुगंधिपुष्पम्[४३] ।
क्वचित् सपुष्पैः[४४] सहकारवृक्षैर्लतोपगूढैस्तिलकैश्च गूढम्[४५] ॥२७॥

---

२९ वदाक्रान्तो - ख. । ३० च... - ख. । ३१ अस्थ्ना वशेष - ख. । ३२ न मन्यते - ख. । ३३ शंकर - ख. ।
३४ इतः परं देवदेव उवाच इति घ पुस्तके । ३५ ता - क. । ३६ लताप्रतानैः सततं - ख. ।
३७ मनोहरम् - ख. । ३८ पतितैः - ख. । ३९ ...भिश्च - क. ख. । ४०...तैः - ख. । ४१ नादिभिः (तैः) - ख. ।
४२ ...कायुतं - क. ख. । ४३ सुगन्धिपुष्पम् - घ. । ४४ च्च पुष्पैः - क. ख. । ४५ सुपुष्पितैः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रगीतविद्याधरसिद्धचारणं[४६] प्रनृत्तनित्यानुगताप्सरोगणम्[४७] ।
प्रहृष्टनानाविधपक्षिसेवितं प्रमत्तहारीतकुलोपनादितम् ॥२८॥
मृगेन्द्रनादाकुलसन्नमानसैः क्वचित्क्वचिद्वद्धकदम्बकं मृगैः[४८] ।
प्रफुल्लनानाविधचारुपङ्कजै[४९]स्सरस्तडागैरुपशोभितं क्वचित् ॥२९॥

निविडनिचुललीनानीलकण्ठाभिरामं[५०]
मदमुदितविहङ्गव्रातनादाभिरामम् ।
कुसुमिततरुशाखालीनमत्तद्विरेफं
नवकिशलयशोभाशोभित[५१]प्रान्तशाखम् ॥३०॥

क्वचिच्च दन्तिक्षतचारुवीरुत् क्वचिल्लतालिङ्गितचारुवृक्षम् ।
क्वचिद्विलासालसगामिनीभिर्निषेवितं किम्पुरुषाङ्गनाभिः ॥३१॥
पारावतध्वनिविकूजितचारुशृङ्गैरभ्रङ्कषैः सितमनोहरचारुरूपैः ।
आकीर्णपुष्पनिकरप्रविविक्तहासैर्विभ्राजितं त्रिदशदेवकुलैरनेकैः ॥३२॥
फुल्लोत्पलाम्बुजसहस्रवितानयुक्तैस्तोयाशयै[५२]स्समनुशोभितदेवमार्गम् ।
मार्गान्तरागलितपुष्पविचित्रभक्तै[५३]स्सम्बद्धगुल्मविटपैर्विहगैरुपेतम् ॥३३॥

तुङ्गाग्रैर्नील[५४]पुष्पस्तबकभरनतप्रान्तशाखैरशोकै-
र्मत्तालिव्रातगीतश्रुतिसुखजननैर्भासितं तन्मनोज्ञैः ।
रात्रौ चन्द्रप्रभासा[५५] कुसुमिततिलकैरेकतां संप्रयातं
छायासुप्तप्रबुद्धस्थितहरिणकुलालुप्तदर्भाङ्कुराग्रम् ॥३४॥

हंसानां पक्षवात[५६]प्रचलितकमलस्वच्छविस्तीर्णतोयं
तोयानां तीरजातप्रविकचकदलीवाटनृत्यन्मयूरम्[५७] ।
मायूरैः पक्षचन्द्रैः क्वचिदपि पतितै रञ्जितक्ष्माप्रदेशं[५८]
देशे देशे निलीनप्रमुदितविलसन्मत्तहारीतवृन्दम् ॥३५॥

---

४६ चारुगूढं - घ. । ४७...गणैः - ख. । ४८ कदम्बकैर्मृगैः - घ. । ४९...पुष्पितं-घ. । ५०...नीलं नीलकण्ठाभिरामं - ख. घ., ..रावं - ख. । ५१ ...शोभितं - क. ख. । ५२ ...श्रयै - ख. । ५३ ... क्ति... - क. ख. । ५४ ...र्लीनि - ख. । ५५ चन्द्रस्य भासा - ख. । ५६ पक्षपात - क. ख. । ५७ .. वातनृत्यन्मयूरम् - ख. । ५८ रञ्चितक्ष्माप्रदेशम् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सारङ्गैः क्वचिदुपसेवितप्रदेशं
संछन्नं कुसुमचयैः क्वचिद्विचित्रैः[५९] ।
हृष्टाभिः क्वचिदपि किन्नराङ्गनाभिः
क्षीबाभिः सुमधुरगीतवृक्षषण्डम् ।।३६।।
संसृष्टैः[६०] क्वचिदुपरि प्रकीर्णपुष्पै[६१]–
रावासैः परिवृतपादपं मुनीनाम् ।
आमूलात्फलनिचितैः क्वचिद्विशालै–
रुत्तुङ्गैः पनसमहीरुहै[६२]रुपेतम् ।।३७।।
फुल्लातिमुक्तकलतागृहलीनसिद्ध[६३]
सिद्धाङ्गनाकनकनूपुररावरम्यम् ।
रम्य[६४]प्रियंगुतरुमञ्जरिसक्तभृङ्ग
भृङ्गावलीशबलिताम्रकदम्बपुष्पम् ।।३८।।
पुष्पोत्करानिल[६५]विघूर्णितपादपाग्र[६६]–
मग्रे सुरेभविनिपातित[६७]वंशगुल्मम्[६८] ।
गुल्मान्तरप्रसृतभीत[६९]मृगीसमूह[७०]–
मूहावतां तनुभृतामपवर्गदातृ ।।३९।।
चन्द्रांशुजालधवलैस्तिलकैर्मनोज्ञैः
सिन्दूरकुंकुमकुसुम्भनिभैरशोकैः ।
चामीकरप्रतिसमैरथ कर्णिकारैः
पुष्पोत्करैरुपचितं सुविशालशाखैः ।।४०।।
क्वचिदञ्जनचूर्णाभैः क्वचिद्विद्रुमसन्निभैः ।
क्वचित्काञ्चनसंकाशैः पुष्पैराचितभूतलम् ।।४१।।
पुन्नागेषु द्विजशतविरुतं रक्ताशोकस्तबकभरनतम् ।
रम्योपान्तं क्लमहरपवनं फुल्लाब्जेषु भ्रमरविलसितम् ।।४२।।

---

५९ विचित्रं - ख. । ६० संमृष्टैः ख. । ६१ प्रलिप्तपुष्पै - क. ख. । ६२ पवनसमीरितै - ख । ६३ सिद्धैः - ख. ।
६४ रम्यं - ख., रम्या - क. । ६५ ...विल... - ख. । ६६ .. ग्यमग्रे - क. ख. । ६७ .. पातित - क. ख. ।
६८ ...युग्मं - ख. । ६९ .. भीम - ख. । ७० ...समूहा... - ख ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सकलभुवनभर्ता लोकनाथस्तदानीं
तुहिनशिखरिपुत्र्या[७१] सार्धमिष्टैर्गणेशैः ।
विविधतरुविशालं[७२] मत्तहृष्टान्यपुष्ट-
मुपवनमतिरम्यं[७३] दर्शयामास देव्याः ॥४३॥

देव्युवाच

उद्यानं दर्शितं देव शोभया परया युतम् ।
क्षेत्रस्य तु गुणान् सर्वान् पुनर्वक्तुमिहार्हसि ॥४४॥
अस्य[७४] क्षेत्रस्य महात्म्यमविमुक्तस्य तत्तदा ।
श्रुत्वा हि[७५] नहि मे तृप्तिरतो[७६] भूयो वदस्व मे ॥४५॥

देवदेव उवाच

इदं गुह्यतमं क्षेत्रं सदा वाराणसी मम ।
सर्वेषामेव जन्तूनां हेतुर्मोक्षस्य सर्वदा ॥४६॥
अस्मिन् सिद्धाः सदा देवि[७७] मदीयं[७८] व्रतमास्थिताः[७९] ।
नानालिङ्गधरा नित्यं मम लोकाभिकांक्षिणः ॥४७॥
अभ्यस्यन्ति[८०] परं योगं युक्तात्मानो जितेन्द्रियाः ।
नानावृक्षलताकीर्णे[८१] नानाविहगसेविते ॥४८॥
कमलोत्पलपुष्पाढ्यैः सरोभिः समलंकृते ।
अप्सरोगणगन्धर्वैः सदा संसेविते शुभे ॥४९॥
रोचते मे इहावासो[८२] येन कार्येण तच्छृणु ।
मन्मना मम भक्तश्च मयि सर्वार्पितक्रियः ॥५०॥
यथा मोक्षमिहाप्नोति अन्यत्र न तथा क्वचित् ।
जपध्यानोद्यतानां च ज्ञानेष्वारक्तचेतसाम्[८३] ॥५१॥

---

७१ शिखरपुत्र्या - क. ख. । ७२...विशालै - ख. । ७३ मिति... - क. । ७४ अन्य...- घ. । ७५...पि - ख. घ । ७६ श्रद्धापि जायते दृष्टेरतो - घ. । ७७ महादेवि - घ. । ७८ मदीय - ख. । ७९ ... श्रिताः - क. । ८०अभ्य सन्वि - क. ख. ।८१... समाकीर्णे - ख. घ. । ८२ महदावासं - ख. । ८३ सदा ... - घ., ...षु वास्तुचेतसाम् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तमोमोहहतानां[८४] च वाराणस्यां गतिर्नृणाम् ।
अत्रोत्क्रमणकाले तु स्वयमेव महेश्वरः ॥५२ ।
ददाति तारकं ब्रह्म येनासौ तन्मयो भवेत् ।
एवं[८५] मम पुरं दिव्यं गुह्याद् गुह्यतरं महत् ॥५३॥
ब्रह्मादयो विजानन्ति ये च सिद्धा[८६] मुमुक्षवः ।
अतः[८७] प्रियमिदं[८८] क्षेत्रं यस्माच्चेह[८९] रतिर्मम ॥५४॥
विमुक्तं न मया यस्माद् मोक्ष्यते वा कदा च न ।
मम[९०] क्षेत्रमिदं तस्मादविमुक्तमिदं[९१] स्मृतम् ॥५५॥
नैमिशेथ कुरुक्षेत्रे गङ्गाद्वारेथ पुष्करे ।
स्नानात्[९२] संसेवनाच्चापि[९३] न मोक्षः प्राप्यते यतः ॥५६॥
इह संप्राप्यते येन तत एतद्[९४] विशिष्यते ।
प्रयागे वा भवेन्[९५]मोक्ष इह वा मत्परिग्रहात्[९६] ॥५७॥
प्रयागादपि तीर्थाग्र्यादिदमेव महत् स्मृतम् ।
जैगीषव्यः परां सिद्धिं यो गतः स महातपाः ॥५८॥
अस्य[९७] क्षेत्रस्य माहात्म्याद्[९८] भक्त्या च मम भावतः ।
जैगीषव्यगुहा श्रेष्ठा[९९] योगिनां स्थानमिष्य ते ॥५९॥
ध्यायतस्तत्र मां नित्यं योगाग्निर्दीप्यते भृशम् ।
कैवल्यं परमं याति देवानामपि दुर्लभम् ॥६०॥
अत्र सिद्धिं परां प्राप्तो मार्कण्डेयो महातपाः ।
बालखिल्यास्तथा सिद्धा अस्मिन् क्षेत्रे सुदुर्लभे ॥६१॥
आत्रेया भार्गवाःसिद्धा अस्मिन् क्षेत्रे सुदुर्लभे ।
अव्यक्तलिङ्गै[१००]र्मुनिभिः सर्वसिद्धान्तवेदिभिः ॥६२॥
इह संप्राप्यते मोक्षो[१०१] दुर्लभोन्यत्र कर्हिचित् ।
तेभ्यश्चाहं प्रयच्छामि योगैश्वर्यमनुत्तमम् ॥६३॥

---

८४ ...गतानां - घ. । ८५ पूर्नं - घ. । ८६ पक्षा - घ. । ८७ इदं - घ । ८८ पुण्यतमं - घ. ।
८९ क्षेत्रमस्माच्चेह - ख. । ९० ..मह। - घ. । ९१... क्तं ततः - ख. । ९२ स्नतानि - ख. ।
९३ ...द्वापि - घ. । ९४ एवं - ख. । ९५ वा सवे - घ. । ९६ मतन्मपरिग्रहात् - ख । ९७ तस्य - ख. ।
९८ माहात्म्यं - ख. घ. । ९९ श्रेष्ठा - ख. । १०० ...लिङ्गनिर्मुक्तैः - घ । १०१ मोक्ष - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

आत्मनश्चैव[१०२] सायुज्यमीप्सितं स्थानमेव च[१०३] ।
कुबेरः स महासत्वस्तथा सर्वार्पितक्रियः ॥६४॥
क्षेत्रसंसेवनादेव धनेशत्वमवाप ह ।
- - - - - - - - - - - - - - - - - - ॥६५॥
इहैवाराध्य मां देवि सिद्धिं यास्यत्यनुत्तमाम्[१०४] ।
पराशरसुतो योगी ऋषिर्व्यासो महातपाः ॥६६॥
मम भक्तो भविष्यश्च वेदसंस्थाप्रवर्तकः[१०५] ।
रमते[१०६] सोपि पद्माक्षि क्षेत्रेस्मिन्मुनिपुंगवः ॥६७॥
ब्रह्मापि ऋषिभिः[१०७] सार्धं विष्णुर्वायुर्दिवाकरः ।
देवराजस्तथा शक्रो अपि चान्ये दिवौकसः ॥६८॥
उपासते महात्मानः सर्वेशमिह सुव्रते ।
अनन्यमनसो भूत्वा मामेवोपासते सदा ॥६९॥
आलर्कश्च[१०८] पुरीमेतां मत्प्रसादादवाप्स्यति ।
स चैनां पूर्ववत् कृत्वा चतुवर्णसमाकुलाम् ॥७०॥
स्फीतां[१०९] जनपदाकीर्णां भुक्त्वा च सुचिरं[११०] तदा ।
मयि सर्वार्पितप्राणो मामेव प्रतिपत्स्यते ॥७१॥
ततः प्रभृति चार्वंगि[१११] येपि क्षेत्रनिवासिनः ।
गृहिणो लिंगिनो वापि मद्भक्ता मत्परायणाः ॥७२॥
मत्प्रसादाद् गमिष्यन्ति मोक्षं परमदुर्गमम् ।
विषयासक्तचित्तोपि त्यक्तधर्मरतिर्नरः[११२] ॥७३॥
इह क्षेत्रे मृतश्चापि[११३] संसारं[११४] न पुनर्विशेत् ।
ये पुनर्निर्ममा धीराः[११५] सिद्धाः स्युर्विजितेन्द्रियाः ॥७४॥
व्रतिन स्थानिरावस्थाः (?) सर्वतो मयि भाविताः ।
देहभेदं समासाद्य[११६] धीमन्तः सर्गवर्जिताः[१०७] ॥७५॥

---

१०२ ... श्चापि - घ. । १०३ वा - घ. । इतः पर कियानंशः खण्डितः क. ख. पुस्तकयोः ।
१०४ यास्यनुत्यत्तमाम् - घ. । १०५ देवर्संस्थाप्रवर्तक - क. । १०६ रम्यते - घ. । १०७ ह्य्‌पिभि - घ. ।
१०८ आन (अल?) कंश्च - घ. । १०९ स्थितां - घ. । ११० स्व शुचिरं - घ. । १११ सर्वांगि - घ. ।
११२...र्वरः - घ. । ११३ ...स्यापि - घ. । ११४ ...रे - घ. । ११५ वीराः - घ. । ११६ समासश्च - घ. ।
११७ स्वर्गवर्जिताः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रपत्स्यन्ते[११८] परं मोक्षं प्रसन्ने मयि[११९] सुव्रते ।
जन्मान्तरसहस्रेषु युञ्जन् योगमवाप्नुयात् ।
तदिहैव[१२०] परं मोक्षं मरणादधि[१२१] गच्छति ॥७६॥
ब्रह्मघ्नगोघ्नगुरुतल्पगचौरवृत्ति–
र्न मो प हं (?) - - - - नियतस्ववृत्तिः ।
संसारभूतदृढपाशविमुक्तशोको
वाराणसीं मम पुरीं समुपैति लोकः ॥७७॥
एतत् संक्षेपतो देवि क्षेत्रस्यास्य महत् फलम् ।
अविमुक्तस्य कथितं मया ते गुह्यमुत्तमम् ॥७८॥
अतः परतरं नास्ति सिद्धं गुह्यमधीश्वरि[१२२] ।
एतद् बुध्यन्ति योगज्ञा ये च योग[१२३]परा[१२४]भुवि ॥७९॥
एतदेव परं ज्ञानमेतदेव परं शिवम् ।
एतदेव परं ब्रह्म एतदेव परं पदम् ॥८०॥
वाराणसी तु भुवनत्रयसारभूता
रम्या पुरी मम सदा गिरिराजपुत्रि ।
यत्रागता[१२५] विविधदुष्कृतकारिणोपि
पापक्षयाद्विरजसः श्रुति (?) यांति मुक्तिम् ॥८१॥
य आगच्छेत् कथंचिच्च[१२६] पुरीं वाराणसीं नरः[१२७] ।
तमुपायं प्रकुर्वीत निर्गच्छेन्न पुनर्यथा ॥८२॥
यदीच्छेत् सफलं जन्म कोन्यं वेद्याफलं (?) तथा ।
काशीपुर्यां त्यजेद् देहं यदीच्छेत् परमं पदम् ॥८३॥

---

११८ एता एव - घ. ।११९ मम - घ. । १२० तमिंहव - घ. । १२१ ...दपि - घ. । १२२ गुह्यमतीश्वरि - घ. ।
१२३ योगी - घ. । १२४ पुरो - घ. । १२५ यात्रागता - घ. । १२६ नरो गच्छेत् - घ. । १२७ पुनः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एतत्स्मृतं प्रियतं मम देवि विश्वं (?)
क्षेत्रं विचित्रतरुगुल्मनिकामपुष्पम् ।
अस्मिन्मृतास्तनुभृतः पदमाप्नुवन्ति[१२८]
मोक्षाख्यमेवशिवतापि (?) न संशयोत्र ।।८४।।

⊙ इति स्कन्दपुराणे वाराणसीमाहात्म्यं नाम त्रिंशत्तमोध्यायः ⊙

सनत्कुमार उवाच

एतस्मिन्नन्तरे देवो देवीमाह गिरीन्द्रजाम् ।
व्रजाम दातुं यक्षाय वरं भक्ताय भाविनि ।।१।।
भक्तो मम वरारोहे तपसा दग्धकिल्विषः ।
[१]अर्हो वरमसौ लब्धुमस्मत्तो[२] भुवनेश्वरि ।।२।।
एवमुक्त्वा ततो देवः सह देव्या जगत्पतिः ।
जगाम यक्षो यत्रास्ते कृशो धमनिसंततः ।
दिव्यं चक्षुरदाच्चैव[३] येनापश्यत् स शंकरम् ।।३।।

सनत्कुमार उवाच

अथ यक्षस्तदा व्यास शनैरुन्मील्य लोचने ।
अपश्यत् सगणं देवं वृषकेतुमुपाश्रितम्[४] ।।४।।

देवदेव उवाच

वरं ददामि[५] तेपूर्वं त्रैलोक्ये नर्शनं तथा ।
सारत्वं च शरीरस्य पश्य मां विगतज्वरः ।।५।।

सनत्कुमार उवाच

ततः स लब्ध्वा तु वरं शरीरेणाक्षतेन च[६] ।
पादयोः प्रणतस्तस्थौ कृत्वा शिरसि चाञ्जलिम् ।।६।।

---

१२८ मापुरन्ते - घ. ।
१ अहो - घ. । २ लब्धमस्मत्तो - घ. । ३...त्तस्मै - घ. । ४ वृषं श्वेतमपाश्रितम् - घ. । ५ ददानि - घ. ।
६ ...णेक्षितेनच - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

उवाच च तदेशेन[७] वरदोस्मीति चोदितः ।
भगवन् भक्तिमव्यग्रां त्वय्यनन्यां[८] विधत्स्व मे ॥७॥
अन्नदत्वं च लोकानां गाणपत्यं[९] तथाक्षयम् ।
अविमुक्ते च ते स्थाने वसेयं[१०] सर्वदा यथा ।
एतमिच्छामि[११] देवेश दत्तं वरमनुत्तमम् ॥८॥

देवदेव उवाच

जरामरणसंत्यक्तः सर्वशोकविवर्जितः[१२] ।
भविष्यसि गणाध्यक्षो वरदः सर्वपूजितः ॥९॥
अजय्यश्चापि सर्वेषां योगैश्वर्यसमन्वितः ।
अन्नदश्चापि[१३] लोकेभ्यः क्षेत्रपालो भविष्यसि ॥१०॥
महाबलो महासत्वो ब्रह्मण्यो[१४] थ मम प्रियः ।
त्र्यक्षश्च दण्डपाणिश्च महायोगी तथैव च ॥११॥
उद्भ्रमः संभ्रमश्चैव गणौ ते परिचारकौ ।
तवाज्ञया करिष्येते लोकस्योद्भ्रमसंभ्रमौ ॥१२॥

सनत्कुमार उवाच

एवं स भगवान् व्यास यक्षं कृत्वा गणेश्वरम् ।
जगाम धाम देवेशः[१५] सह तेन सुरेश्वरः[१६] ॥१३॥
अथ दृष्ट्वा ततो देवीं देवदेवो वृषध्वजः ।
तप्यतो मन्दरस्याशु वरदानार्थमब्रवीत् ॥१४॥

देवदेव उवाच

देवि फुल्लारविन्दाक्षि गमिष्यामि सुमध्यमे ।
मन्दरं पर्वतश्रेष्ठमनुग्रहवरेप्सया ॥१५॥
सभार्यःससुतश्चैव स हि मां ससुहृज्जनः ।
प्रपन्न[१७] स्तापस[१८] श्रेष्ठो मन्दरः पर्वतोत्तमः ॥१६॥

---

७ तदा तेन - घ. । ८... ग्रं त्वयि नाथे - घ । ९ सोनपत्यं - घ. । १० पश्येयं - घ. । ११...दिच्छामि - घ. ।
१२ लोकविवार्जितः - घ. । १३ अर्थदश्चापि - घ. । १४ मम च - घ. । १५ वामदेवेशः - क. घ. ।
१६ नरेश्वरः - घ. । १७ प्रसन्न - क. । १८ तपसां - घ., तपतां ? ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अद्य वर्षसहस्राणि पञ्च दिव्यानि पार्वति ।
तप्यते तपतां श्रेष्ठो मयि सर्वात्मभावतः[१८] ॥१७॥

देव्युवाच

नय मामपि देवेश मन्दरं चारुकन्दरम् ।
न रंस्येहं[२०] विना देव त्वया सर्वजगत्पते ॥१८॥
ततो देवः प्रहस्यैनामुवाच परमेश्वरः ।
अविमुक्तं न मोक्तव्यं कथं त्वं यातुमिच्छसि[२१] ॥१९॥

देव्युवाच

इह चैव निवत्स्यामि[२२] गमिष्यामि च मन्दरम् ।
अविमुक्तमिदं स्थानं ततो देव भविष्यति[२३] ॥२०॥

देवदेव उवाच

एवमेतद् वरारोहे यथा वदसि पार्वति ।
ऐश्वर्यात्[२४] सर्वगा[२५] हि त्वं यथाहं[२६] देवि सर्वशः ॥२१॥

सनत्कुमार उवाच

ततः स भगवान् देवो वृषमारुह्य सर्वगम् ।
सोमः सनन्दी सगणो[२७] मन्दरं प्रययौ हरः ॥२२॥
स गत्वा[२८] भुवनेशानस्तप्यमानं परं तपः ।
अपश्यन्मन्दरं तत्र दृष्ट्वा चैन[२९] मुवाच ह ॥२३॥
वरदोस्मि गिरीशान[३०] तुष्टस्ते तपसा[३१] भृशम् ।
वरं वृणु यथेष्टन्त्वं सर्वं तत्[३२] प्रददामि[३३] ते ॥२४॥

सनत्कुमार उवाच

स एवमुक्तश्शर्वेण दृष्ट्वा त्रिभुवनेश्वरम् ।
सोमं सनन्दिनं चैव प्रणम्य वृषवाहनम् ॥२५॥

---

१८ तपसा श्रेष्ठो मयि सर्वात्मभावितः - क. । २० वत्स्येहं - घ. । २१ मर्हसि - ध. । २२ न वत्स्यामि - घ. । २३ अविमुक्तं ततो देव भविष्यति न संशयः - घ. । २४ ऐश्वर्यं - घ. । २५ सर्वगं - घ. । २६ त्वं - घ । २७ नन्दिस्सगणो - क. ख. । २८ गत्वा तु - घ. । २९ चैत्र - क. । ३०...स्मीति गिरिशं - घ. । ३१ तपसानेन ते - क., तस्मेद्य (तुष्टोद्य ?) - घ. । ३२ तत् सर्वं - घ. । ३३ ... नि - क. ख. घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पुनः पुनर्हरं दृष्ट्वा देवीञ्चैव पुनः पुनः ।
पुनः पुनर्गणञ्चैव[३४] नन्दिनञ्च[३५] ननाम सः ॥२६॥
तं तथा व्याकुलं दृष्ट्वा हर्षजास्राविलेक्षणः[३६] ।
वरेणच्छन्दयामास भूय एव हरो गिरिम् ॥२७॥

देवदेव उवाच

वरं वृणीष्व भद्रं ते वरदोहं तवाचल ।
यथेष्टं दातुमिच्छामि वरं वरय भूधर ॥२८॥

मन्दर उवाच

भगवन् यदि तुष्टोसि देवदेव जगत्पते ।
मयि ते वासमिच्छामि सोमस्य सगणस्य च ॥२९॥
इच्छामि देवदेवेश पादस्पर्शेन ते सदा[३७] ।
पवित्रीकृतमात्मानं सोमेन सगणेन च ॥३०॥
नान्यं वरमिहेच्छामि[३८] त्वत्तो देव जगद्गुरो ।
एष एव वरो मह्यं दीयतां भुवनेश्वर ॥३१॥

सनत्कुमार उवाच[३९]

एवमस्त्विति तं[४०] प्राह मन्दरं वरदस्तदा[४१] ।
सनन्दी सह देव्या च निवत्स्यामि सदा त्वयि ॥३२॥
त्वं चापि भूभृतां श्रेष्ठो जरामरणवर्जितः ।
अभेद्यश्चैव वज्रेण मत्प्रसादाद् भविष्यसि ॥३३॥
रम्यश्च सर्वभूतानां हेमरत्नविभूषितः ।
अप्सरोगणसंकीर्णः सुरसिद्धनिषेवितः[४२] ॥३४॥

सनत्कुमार उवाच

ततोसृजद् गृहं[४३] तत्र जाम्बूनदमयं महत् ।
मनसातिगुणं व्यास[४४] न तेनास्ति[४५] समं क्वचित् ॥३५॥

---

३४ ...र्गणानां च - ख. । ३५ गणेश्वरं - खं. । ३६ ... णं - क. ख. । ३७ तेजसा - घ. । ३८ नचान्यं वरच्छामिः - ख. । ३९ देवदेव उ - घ. । ४० ततः - घ. । ४१ चारुकन्दरम् - क. । ४२ सिद्धचारणसेवितः - ख. । ४३ सद्म चाप्यंमृजत् - क., स्वयमेवासृजतसद्म - ख. । ४४ गुणैर्युक्तं - ख. । ४५ न ते तेन - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

न तादृग् ब्रह्मणोप्यस्ति[४६] किमुतान्यस्य कस्य[४७]चित् ।
तेजसा वर्ष्मणा कान्त्या वृषनाम्नातिविश्रुतम्[४८] ॥३६॥

व्यास उवाच

भगवन् ब्रह्मणः सूनो सर्वयोगेश्वरेश्वर ।
न मे तृप्ति[४९]स्त्वयाख्याते[५०] देवदेवस्य[५१] चेष्टिते[५२] ॥३७॥
स वृषो दयितश्चैव वाहनत्त्वं[५३] महाबलः ।
केनागमन्महाशब्दो महेशस्य महात्मनः ॥३८॥
कस्य पुत्रः कस्य नप्ता कथं जज्ञे[५४] तथैव च ।
किं तपः किं फलं तस्य एतदिच्छामि वेदितुम् ॥३९॥
अभवज्जलदः पूर्वं वाहनं रुद्रवल्लभम् ।
स[५५] कथं तत्[५६] परित्यज्य वृषभे मतिमादधे[५७] ॥४०॥

सनत्कुमार उवाच

पुरा वेदः[५८] सुतो जज्ञे ब्रह्मणः प्रथमोद्भुतः[५९] ।
द्वितीयश्चैव यज्ञोभूत् तं च लोके[६०] न्ययुंजत[६१] ॥४१॥
स लोकाप्यायनकरः प्रयुक्तो ब्रह्मणा स्वयम् ।
प्रजा विवर्द्धयिषता[६२] नावर्द्धयदशेषतः ॥४२॥
- - - - - - - - - - - - - - - - - - ।
- - - - - - - - - - - - - - - - - - - ॥४३॥

यज्ञ उवाच

भगवन् लोकसिद्धयर्थं प्रयुक्तोहं[६३] स्वयंभुवा ।
न च मेस्ति तथा वीर्यमत्यमिच्छ[६४] नमस्तव ॥४४॥

देवदेव उवाच

जीमूतो भव लोकानां तव सिद्धिर्भविष्यति ।
ततोमृताभिरद्भिस्त्वं लोकान् संवर्धयिष्यसि ॥४५॥

---

४६ सर्वलोकेषु - ख. । ४७ रमणीयं भवेत् - ख. । ४८ रम्यं दिव्यगुणादपि - ख. । ४९ मूर्ध्नि - . ख. । ५० ख्यातं - ख. । ५१ सांप्रतं - ख. । ५२ चेष्टितम् - क. । ५३ धारणत्व - घ. । ५४ यज्ञे - घ. । ५५ तत्, ५६ स - घ. । ५७ वाहनं वृषभं भजत् - ख. । ५८ देव - घ. । ५९ परमाद्भुत् - घ. । ६० परमात्मा - घ. । ६१ लोकोभ्यपूजयत् - घ. । ६२ लोकवृ ? । ... ६३ यं - घ. । ६४ मुषु - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यज्ञ उवाच

जीमूतत्वं यदि मम लोकसिद्धिकरं शुभम् ।
अस्मद्भवन्तं पृष्ठेन वहेयं विद्युतालय (?) ॥४६॥
- - - - - - - - - - - - - - - - - - - ।
- - - - - - - - - - - - - - - - - - - ॥४७॥
आत्मानमथ स ज्ञात्वा नातितेजसमच्युतः ।
तताप सुमहद् व्यास तपो यज्ञः सुदुश्चरम्[६५] ॥४८॥
अथ तुष्टस्तदा देवः शर्वो[६६] यज्ञस्य सुव्रत[६७] ।
उवाच वरदोस्मीति स वव्रे वरदं वरम्[६८] ॥४९॥
यथाहं[६९] यज्ञभावेन[७०] वहामि त्वां महाप्रभ[७१] ।
तथैव जलदत्वेपि[७२] वहेयं त्वाह[७३]मव्ययम् ॥५०॥

सनत्कुमार उवाच

एवमस्त्विवति सं[७४]प्रोच्य वाहनत्वे व्यकल्पयत्[७५] ।
जीमूतं[७६] व्यास भगवान् यज्ञमूर्तिमतिप्रभम् ॥५१॥
यदा तु यजतो व्यास दक्षस्य सुमहात्मनः ।
शिरश्छिन्नं शरेणाशु यज्ञस्यामिततेजसः ।
तदा शिरस्कं[७७] तं यज्ञं वाहनत्वादपानुदत[७८] ॥५२॥

व्यास उवाच

कथं यज्ञं स दक्षस्य भगवानाहनच्छुभम्[७९] ।
कारणं चात्र किं विप्र येन तं हतवान् प्रभुः ॥५३॥

सनत्कुमार उवाच

शापः पूर्वं समाख्यातः कारणं मुनिसत्तम ।
इदञ्च शृणु मे भूयो विस्तरेण पुरातनम् ॥५४॥

---

६५ सुदुस्तर - घ. । ६६ स (भ) वो - क., सर्वो - घ. । ६७ तत्सुतः - ख., . तः - क. । ६८ वरमुत्तमं - ख., विपुलं - घ. । ६९ यदा - ख. । ७० ... पि - घ, ति - क. ख. । ७१...प्रभंम् - क. ख.,...भो - ख. । ७२ वरमिच्छामि - घ. । ७३ वहेयमह... - क., भद्र... - घ. । ७४ स - ख., तं - घ. । ७५ तं ह्यकल्पयत् - ख., ...नं चेति ? - घ. । ७६ जीवितं - ख. । ७७ शिषः क्षतं - घ. । ७८ नदद्भृशं - ख., नं द्रुपान्वदत् - घ. । ७९... हनत् सुलं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पुरा हि ब्रह्मणो वक्त्रात् क्षुबतोभिविनिःसृतः[८०] ।
बद्धगोध्वांगुलित्रश्च शरी तूणी शरासनी ॥५५॥
खड्गी[८१] किरीटमाली च कुण्डली[८२] कवची[८३] तथा ।
महोरस्को महोत्साहः पुरुषः काञ्चनप्रभः ॥५६॥
क्षुप इत्येव नाम्ना तं ब्रह्मा स्वयमभाषत ।
तमिन्द्रो वरयामास राजानं भुवि[८४] लोकपम् ॥५७॥
सोब्रवीद्यदि मे वज्रमायुधं स्वं[८५] प्रयच्छसि ।
ततः स्यां भुवि राजाहं नान्यथा रोचते मम[८६] ॥५८॥

इन्द्र उवाच

चिन्तितं करमेतत्तो वज्रमेष्यति[८७] नान्यथा ।
एवं भवतु भद्रं ते भव राजा प्रजाहितः ॥५९॥

सनत्कुमार उवाच

स एवमुक्तस्तेजस्वी राजा भुवि बभूव ह ।
च्यावनिश्च[८८] दधीचोस्य[८९] सखा समभवत्तदा ॥६०॥
स तेन सह संगत्य[९०] सुखासीनो वरासने ।
चक्रे कथा विचित्रार्थाः प्रीयमाणः पुनः पुनः ॥६१॥
अथाभवत्तयोर्व्यास रागो जातिकृतः पुनः[९१] ।
क्षत्रं[९२] श्रेष्ठं न वा श्रेष्ठं ब्रह्म श्रेष्ठं न वेति[९३] च ॥६२॥
क्षुपोब्रवीत् क्षत्रमिति दधीचो ब्रह्म चेति[९४] ह[९५] ।
अब्रूतां[९६] कारणे[९७] चोभौ[९८] न न्यवर्तत[९९] कश्चन ॥६३॥
अथ तीक्ष्णतया चैव तपोधिकतया[१००] तथा ।
ब्राह्मणत्वस्य चाग्र्यत्वात्तथा दैवकृतेन च ॥६४॥

---

८० भुवि निः सृतः - घ. । ८१ शृंगी - क. । ८२ कवची - ख. । ८३ कुंडली - ख. । ८४ भूमि - क. । ८५ त्वं - क. । ८६ मम रोचते - घ. । ८७ वज्रमेष्यति क., वरं यास्यति - घ. । ८८ च्यावनेश्च - ? । ८९ दधीचस्य ? । ९० संगम्य - ख. । ९१ प्रभुः - ख. । ९२ क्षेत्रं - क. ख. । ९३ नचेति - घ. । ९४ ... वेति - क. । ९५ च - ख. घ. । ९६ नाब्रूतां - ख. । ९७ कारण - घ. । ९८ चोभे - क. ख. ९९ प्रवर्तत - घ., व्यक... - क, व्यवर्तन (त) - ख. । १०० वयोधिकतया - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कुद्धो दधीचस्तं व्यास वामहस्तेन मूर्धनि ।
आजघान महातेजा वज्रेणाताडयत्[१०१] स च[१०२] ॥६५॥
वज्रेण स द्विधा छिन्नः शक्रमाह्वयदव्ययः ।
सोवदत् त्वं[१०३] महायोगः[१०४] शक्तः[१०५] सन्धातुमात्मना[१०६] ॥६६॥
स्वं देहं[१०७] स तथाभूतं[१०८] दधीचो योगमायया ।
सन्धयामास[१०९] शर्वञ्च शरणं समपद्यत ॥६७॥
स सुरेश्वरमाराध्य प्राप्यावध्यत्वमुत्तमम्[११०] ।
वज्रास्थित्वमभेद्यत्वमजरत्वञ्च शङ्करात् ॥६८॥
सर्वभूतानुकम्पित्वं महायोगित्वमेव च ।
पुनरागात् क्षुपं द्रष्टुं पुनः सख्यमभूत्[१११] तयोः ॥६९॥
रागो जातिकृतो यश्च पूर्ववत् स[११२] बभूव ह ।
वामपादेन चाप्येनं क्षुपं स समताडयत्[११३] ॥७०॥
पुनश्च वज्रमादाय स चैनमहनत्तदा ।
न चार्ति न व्यथां तस्य[११४] तद्वज्रमकरोन्मुने ॥७१॥
अवध्यत्वमथो[११५] ज्ञात्वा क्षुपस्तस्य महात्मनः ।
नारायणं समासाद्य वरार्थं समराधयत्[११६] ॥७२॥
वरदोस्मीति तुष्टेन[११७] विष्णुना स च[११८] चोदितः ।
प्रोवाच प्रणतो विष्णुमिदं व्यास महामनाः[११९] ॥७३॥

क्षुप उवाच

दधीचो नाम विप्रर्षिरवध्योक्षय एव च ।
सखा मम हृषीकेश स च मामाह नित्यदा[१२०] ॥७४॥
बिभेम्यहं न देवस्य राक्षसस्यासुरस्य वा ।
पिशाचस्याथ यक्षस्य वयसो मानुषस्य वा[१२१] ॥७५॥

१०१ वक्रेणा ताडयत् - क. । १०२ तदा - घ. । १०३ ... त्तं - घ. । १०४ महायोगं - घ. । १०५ शक्रः - घ. । १०६ महात्मनः - क. । १०७ स्वदेहं - ख., स - घ. । १०८ त्यक्ता - क., भूत्वा - ख., श्रुत्वा - घ. । १०९ सांत्वयामास - घ. । ११० तं वरेश्वरमाराध्य संप्राप्य वरमुत्तमम् - घ. । १११ संख्यममूत् - घ. । ११२ सं - क. घ. । ११३ समभिताडयत् - ख. । ११४ चास्य - ख. । ११५ मयं - ख. । ११६ वरार्थमतपत्तपः - ख., समवारयत् - घ. । ११७ तुष्टोस्मि - ख. । ११८ स तु - घ., सम ... - ख. । ११९ महातपाः - घ. । १२० ..., नामहनत्सदा - घ. । १२१ च - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

बिभेमीति यथा ब्रूयात् तथा त्वं[१२२] कर्तुमर्हसि[१२३] ।
एवमुक्तो नरेशेन[१२४] स विष्णुर्लोकभावनः ॥७६॥
तथास्त्विति च तं प्रोच्य दधीचस्याश्रमं ययौ ।
स[१२५] प्रविश्याश्रमं व्यास दधीचेनाभिपूजितः ॥७७॥
अभिवाद्याञ्जलिं कृत्वा दधीचमिदमब्रवीत् ।
भगवन् ब्रह्मणश्रेष्ठ पितामहसमद्युते ॥७८॥
वरमेकं वृणेहं यं तं[१२६] भवान्दातुमर्हति[१२७] ।
प्रसादितोहं विप्रेन्द्र क्षुपेण शुभकर्मणा ॥७९॥
वरदोस्मीति चाप्युक्तो वरं वव्रे महामुने ।
प्रोक्तं त्वया बिभेमीति ब्रूहि तन्[१२८] मदनुग्रहात् ॥८०॥
अभयं सर्वभूतेभ्यो[१२९] ब्राह्मणस्य न संशयः ।
अवध्यश्चापि सर्वेषां महायोगबलान्वितः ॥८१॥
अभीतस्त्वं[१३०] तथाप्यद्य मदर्थं वद तत्[१३१] प्रभो ।
दधीचश्चैव[१३२]मुक्तोपि[१३३] विष्णुना मधुरं तदा ॥८२॥
उवाच न विभेमीति भूयो भूयो जनार्दनम् ।
नाहं वक्ष्ये बिभेमीति नोक्तं नाप्युच्यते मया ॥८३॥

सनत्कुमार उवाच

एवमुक्तश्चक्रपाणिश्चचार्वाणिं[१३४] क्रोधमूर्च्छितः[१३५] ।
उवाच चक्रमुद्यम्य भयमस्य विदर्शयन् ॥८४॥
एवमेव हि कर्तव्या ये भूत्वा[१३६] बलवत्तराः ।
अस्वामिन इव प्रेम्णा ब्रुवते[१३७] दुर्बलं जनम्[१३८] ॥८५॥
न चेद् द्रक्ष्यसि[१३९] भीतोस्मीत्येत च्चक्रं[१४०] ततस्तव ।
सुनसं शिर आदाय[१४१] महीं सं प्रापयिष्यति ॥८६॥

---

१२२ तत्तथा - घ. । १२३ मर्हति - घ. । १२४ नरेन्द्रेण - घ. । १२५ सं - ख. । १२६ त्वत्तः - ख., तद् - क., स - ख. । १२७ मर्हसि - क ख. । १२८ वाक्यन्त (वाच्यन्तद्?) - ख. । १२९ सर्वभूतानां - ख. । १३० ...श्च - क., ...तोपि - ख. । १३१ त्वं वद - ख. । १३२ स्त्वेव... - ख. । १३३ वै - क. । १३४ दधीचं - घ. । १३५ मूर्छितः - घ । १३६ भूता - घ. । १३७ विब्रूते - घ. । १३८ बलं - घ. । १३९ न च वक्ष्यामि - घ. । १४० एवं चक्रं - ख. । १४१ सनसं सुमुखं तस्य - ख., नृशंस शिवया (शिरआ?) - घ. मुखमादाय - ख. । ४२ स - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दधीचिरुवाच[१४३]

किं वृथा चक्रमुद्यम्य विष्णो त्वं[१४४] क्लेशमिच्छसि[१४५] ।
नाहं चक्रस्य ते गम्यः[१४६] प्रसादात् त्र्यम्बकस्य तु ।।८७।।
किन्तु जिज्ञासया यामि लोकपालशरण्यताम् ।
तेषां निष्क्रियतां ज्ञात्वा ततो यास्यामि[१४७] शंकरम् ।।८८।।
एवमुक्त्वा च्यावनिस्तु प्राद्रवद् वरुणं प्रति ।
शरणं तं प्रपन्नश्च सं[१४८] प्रादादभयं[१४९] प्रभुः ।।८९।।
तत्र विष्णोश्च देवस्य वरुणस्य च धीमतः ।
युद्धं समभवद् घोरं बहूनब्दान् विभिषणम् ।।९०।।
निगृहीतेथ[१५०] वरुणे च्यावनिर्यममभ्ययात्[१५१] ।
स चाप्यभयद[१५२]स्तस्मै[१५३] विष्णुना निर्जितो युधि ।।९१।।
ततोग्निमभ्ययाद्[१५४] व्यास सोपि तेनाभिनिर्जितः ।
ततः स मुष्टिमादाय कुशानां च्यावनिस्तद।[१५५] ।।९२।।
स्वमाश्रममुपागम्य तिष्ठतिष्ठेत्यभाषत ।
जिज्ञासार्थं लोकपालानहं शरण मेयिवान्[१५६] ।।९३।।
अबलास्ते च सर्वेपि मय्येव बलमुत्तमम् ।
अद्य गर्वश्च दर्पश्च बलं यच्च[१५७] तवाद्भुतम्[१५८] ।
तत्सर्वं नाशयिष्यामि तिष्ठेदानीं जनार्दन ।।९४।।

सनत्कुमार उवाच

ततो युद्धं समभवत् तुमुलं लोमहर्षणम् ।
नारायणस्य च व्यास च्यावनेश्च महात्मनः ।।९५।।
यान्यस्त्राणि शरा ये च नारायणकरच्युताः ।
योगेन तान् दधीचोसौ कुशमुष्टौ न्ययेशयत् ।।९६।।

---

१४३ च्यावन (नि) उ - क. । १४४ त्वं विष्णो - क. । १४५ क्लिश्यसेनघ - ख., श्रकं समर्चसि - घ. । १४६ मन्यः - घ. । १४७ ध्या... - क. घ., ध्यायामि - ख. । १४८ प्रसादादभयं - क., १४९ प्रददावभत्यं - ख. । १५० तु - ख. । १५१ ...गाद् - ख. १५२ चास्याभय.द् - क. ख. । १५३ श्चास्य ? । १५४ ...गाद् - ख. । १५५ श्शुभः - क.,... ने स्थितः - घ. । १५६ मीयिवान् - घ. । १५७ यत्तो - ख. । १५६ तदाद्भुतम् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ततो विष्णोर्योगबलाद् गात्रेभ्यः संप्रजज्ञिरे ।
देवा युयुधिरे सर्वे[१५९] विष्णुना सह दंशिताः ॥९७॥
तानप्यशेषतः सर्वान् सायुधान् सह वाहनैः ।
कुशमुष्टौ स[१६०] संक्रुद्धो विष्णुवर्ज[१६१] न्यवेशयत् ॥९८॥
ततस्सर्वामरैर्व्यास कुशमुष्टौ[१६२] प्रवेशितैः ।
योगेन तेजसा चैव दधीचेन महात्मना ॥९९॥
विष्णुं संविग्नरूपं[१६३] तु कोपावेशात् प्रमोहितम् ।
तत्रागम्य स्वयं ब्रह्मा तदा वचनमब्रवीत् ॥१००॥
किन्त्वनेन गोविन्द वृथा यत्नेन[१६४] सद्द्विजे[१६५] ।
कृतेनाथ[१६६] दधीचस्य शर्वाल्लब्धवरस्य तु ॥१०१॥
किन्न वेत्सि यथा ह्येष प्रसादात् पारमेश्वरात् ।
अवध्यत्वं सुयोगित्वं गुणैश्वर्यत्वमेव च ॥१०२॥
वज्रास्थिसारताञ्चैव लब्धवान् स्वयमीश्वरात्[१६७] ।
न चैवं[१६८] त्वद्विधा देव ब्राह्मणेषु विकुर्वते ॥१०३॥
तस्मादाशु[१६९] निवर्तस्व क्षमयैनं[१७०] द्विजोत्तमम् ।
ततो ब्रह्मवचः[१७१] श्रुत्वा स विष्णुर्लोकभावनः ॥१०४॥
योगेन तद्बलं ज्ञात्वा दधीचस्य महात्मनः[१७२] ।
क्षामयामास[१७३] विप्रेन्द्रं स्वं चावासमथाभ्यगात् ॥१०५॥
ब्रह्मापि तमृषिं सान्त्व्य[१७४] पूजयित्वा त्रिलोकपः[१७५] ।
जगामादर्शनं व्यास सह सर्वामरैस्तदा ॥१०६॥
दधीचोपि महातेजास्तपस्तेपे स्वकाश्रमे[१७६] ।
महादेवप्रसादार्थमुग्रं वाय्वम्बुभोजनः[१७७] ॥१०७॥
अथास्य युक्तस्य तदा तपसा भास्करद्युतेः ।
तुतोष भगवान् त्र्यक्षस्तुष्टश्चैवाब्रवीदिदम् ॥१०८॥

---

१५९ तत्र - घ. । १६० सु - क. घ. । १६१ चक्रं - घ. । १६२ मुष्टि...- क. । १६३ संविघ्नरूपं - घ. ।
१६४ क्लेशेन - ख. । १६५ ...द्विजः- क. । १६६ कृतेनास्य- ख. । १६७... स्त्वयमीश्वरात्-ख. । १६८...व - क. ।
१६९ तस्मादेव - ख. । १७० क्षामयैनं – क. । १७१ ब्रह्मणो वचनं – ख. । १७२ च शंकरात् - क ।
१७३ क्षमयामास – घ. । १७४ शान्त्वा – घ. । १७५ च लोकपः – घ. । १७६ स्वके... – ख. ।
१७७... भोजनम् – क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

देवदेव उवाच

च्यावने तपसानेन तव तुष्टोस्मि सुव्रत ।
ब्रूहि यत्तो भिलषितं कृतमेव हि तन्मया ॥१०९॥

दधीचिरुवाच[१७८]

भगवन् यदि तुष्टोसि यदि देयो वरश्च मे ।
इच्छामि विष्णुना सार्धं सर्वान्देवाँस्त्वया जितान्[१७९] ॥११०॥

सनत्कुमार उवाच

तत प्रहस्य वरदो दधीचमृषिसत्तमम् ।
एवमस्त्विति तं प्राह प्रणतार्तिहरो हरः ॥१११॥
तस्मिन्दत्तो[१८०] तदा तेन त्र्यम्बकेण वरे शुभे ।
अमन्यत स्थितं[१८१] वैरं क्षुपेण सह वै ऋषिः ॥११२॥
ध्यायन्तं तं[१८२] तथा दृष्ट्वा भगवान् गोवृषध्वजः ।
उवाच वरमन्यच्च[१८३] ब्रूहि विप्र ददामि ते[१८४] ॥११३॥

दधीचिरुवाच

यस्मात् स्थितमिदं[१८५] वैरं वरदानात् तव[१८६] प्रभो ।
इह तस्मात्तव स्थानं नाम्नैतेन[१८७] भवत्वज ॥११४॥

देवदेव उवाच

स्थानेश्वरमिति ख्यातं[१८८] नाम्नैतत्[१८९] स्थानमुत्तमम् ।
भवितृ[१९०] क्रोशपर्यन्तं नानापुष्पलताकुलम् ॥११५॥
अत्र योभ्यर्चयेन्मां तु परं[१९१] नियममास्थितः ।
त्रिरात्रोपोषितः सम्यक् स्नात्वा नद्यां तु मानवः ॥११६॥
ब्राह्मणं[१९२] भोजयित्वा च चरुं[१९३] धर्मेण संयुतः[१९४] ।
सर्वपापविनिर्मुक्तो[१९५] मम लोकमवाप्नुयात[१९६] ॥११७॥

---

१७८ दधीच उ - घ. । १७९ सर्वे देवास्त्वया जिताः - घ. । १८० त्तस्मिन्नुक्ते - घ. । १८१ स्थिरं - क. ख. ।
१८२ ध्यानतस्तं - घ. । १८३... मन्यच्च - क. ख घ. । १८४ ...न्ददामि - क., ददानि - क. ख. घ. ।
१८५ स्थिरमिदं - घ. । १८६ भुवि - घ. । १८७ नाम्ना तेन - घ. । १८८ देव स्थानेश्वरमिति - घ. ।
१८९ नाम्नै व - घ. । १९० भवेच्च - ख., भवतु - घ. । १९१ सदा - घ. । १९२ ब्राह्मणान् - घ. ।
१९३ वर - घ. । १९४ संयुतं - क. घ. । १९५ स सर्वपापनिर्मुक्तो - क. । १९६ रुद्रलोकमवाप्नुयात् - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्थाणुतीर्थं[१९७] च भवितृ तथैतत्[१९८] पापनाशनम्[१९९] ।
अश्वमेधफलं ह्यत्र स्नातः प्राप्नोति पुष्कलम् ॥११८॥
अयञ्चापि वटः श्रीमान् स्थितोहं यत्र सांप्रतम् ।
वरं दातुं मदाख्यानो नाम्ना स्थाणुवटो महान्[२००] ॥११९॥
भविष्यति न सन्देहः फलञ्चाप्यस्य[२०१] मे श्रृणु ।
योत्र तिष्ठेदहोरात्रं संयतो[२०२] नियताशनः[२०३] ॥१२०॥
चीर्णं स्वयं भवेत्तेन स्थाणुव्रतमनुत्तमम् ।
सर्वपापविनिर्मुक्तो[२०४] गणपस्स[२०५] भवेन्मम ॥१२१॥
अकम्पनो नाम महान्[२०६] महायोगबलान्वितः ।
यश्च प्राणान्नियमवान् यमवानथवा[२०७] पुनः ॥१२२॥
परित्यजेत मनुजस्तस्य पुण्यफलं महत् ।
सर्वपापविनिर्मुक्तः[२०८] सर्वबन्धविवर्जितः[२०९] ।
गणेश्वरो[२१०] नन्दिसमः स मे भवति सर्वगः[२११] ॥ १२३॥
स्थानेश्वरे यस्त्विह चैकरात्रं[२१२] स्थित्वा क्षपेत्[२१३] सर्वमशेषतो हि ।
स सर्वपापप्रविमुक्तचेता[२१४] गणेश्वरो मे भवितातिभीमः[२१५] ॥१२४॥

⊙ इति स्कन्दपुराणे क्षुपदधीचविवादो नाम[२१६] एकत्रिंशत्तमोध्यायः ⊙

सनत्कुमार उवाच

एतस्मिन्नेव काले तु व्यास दक्षः प्रजापतिः ।
अयजत् सोश्वमेधेन राजा प्राचेतसात्मजः[१] ॥१॥
तत्र देवनिकायानां भागधेयानि सर्वशः ।
हव्यवाहस्तदा तत्रा[२] वहन्मन्त्रैस्स मीरितः[३] ॥२॥

---

१९७ स्थानं ... - घ. । १९८ तवैव - क. । १९९ ...नात् - घ. । २०० भवेत् - ख. । २०१ स्यापि - घ. ।
२०२ वाग्यतो - घ. । २०३ नियतासनः - घ. । २०४ स सर्वपापनिर्मुक्तो - ? २०५... श्च - ?
२०६ गणो - ख. । २०७ यत्नवान् सर्वथा - घ. । २०८ सर्वपातकनिर्मुक्तः - क. । २०९...बन्धनवर्जितः - घ. ।
२१० महेश्वरो - घ. । २११ नित्यशः - घ. । २१२ यस्त्विदमेकरात्रं - घ. । २१३ पठेत् - घ. । २१४ ...देहो -ख.
२१५ स तेन - ख. । २१६ दधीचमाहात्म्ये त्रिंशोध्यायः - घ ।
१ प्रचेतसात्मजः - घ. । २ तत्र - घ. । ३... स्समाहितः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वहन्तं[४] तमपश्यच्च[५] देवी गिरिवरात्मजा ।
अनुस्मरन्ती तद्वैरं शापकारणमेव च ॥३॥
उवाच चैनं गिरिजा बोधयन्ती पुरातनम् ।
शिलष्टं[६] मधुरया वाचा कारणेन समन्वितम् ॥४॥
त्वं देवः सर्वदेवानां गतिश्च[७] शरणं तथा[८] ।
त्वया विना कथं यज्ञो[९] वर्तते सर्वदेवप ॥५॥
देवानां भागधेयानि वहत्यग्निरयं भव[१०] ।
नायं तव महेशान किं कारणमतिद्युते ॥६॥
न साम्ना सिध्यते कार्यं[११] विक्रमेण विना प्रभो ।
अयं मूढोवलिप्तश्च राजा प्राचेतसात्मजः ॥७॥
अनुस्मरन् पूर्ववैरं नैव दास्यत्यशासिलः ।
दधीचस्य वरश्चापि त्वया दत्तस्तदा[१२] प्रभो ।
तस्यायमागतः कालस्तदर्थेन[१३] विधीयताम्[१४] ॥८॥

सनत्कुमार उवाच

एवमुक्तस्तदा व्यास भगवान् वृषभध्वजः ।
उवाच प्रहसन् देवीं पिता तव शुचिस्मिते ॥९॥
पूर्वजन्मनि सुश्रोणि प्रजापतिसुतः शुभे ।
मम त्वं भावविज्ञानं कुर्वती[१५] देवि भाषसे ॥१०॥
नहि दुःखं पितुर्लोके कश्चिदिच्छति भामिनि[१६] ।
एवमुक्ता तदा व्यास[१७] देवेन विमलात्मना ॥११॥
ललाटे भृकुटीं[१८] कृत्वा ततो देव्यायतेक्षणा ।
क्रोधात्[१९] करेण नासाग्रं संमर्द शुचिस्मिता ॥१२॥

---

४ तं वहन्तं - घ. । ५ अपश्न्ती - घ. । ६ श्लक्ष्णं - घ. । ७ त्वं गतिः - ख. । ८ शरणार्थिनां - घ. । ९ जज्ञे-- क. । १० तव - घ. । ११ साम्ना सर्वसुराध्यक्ष - घ., नाम्ना - क., न सत्वो - घ. । १२ स्वयं - ख.। १३ स्तदा तेन - घ., तदोर्ध्वेन - क. । १४ विधीयते - घ. । १५ कुर्वन्ती - ख. । १६ भाविनि - घ. । १७ देवी - घ. । १८ भ्रुकुटीं - क. । १९ क्रुद्धा - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तस्यां संमृज्यमानायां नासिकायामतिप्रभा ।
जज्ञे स्त्री भृकुटीवक्त्रा चतुर्दंष्ट्रा त्रिलोचना
बद्धगोधांगुलित्रा च कवचा[२०] बद्धमेखला ॥१३॥
सखड्गा सधनुष्का च[२१] सतूणीरा[२२] पताकिनी ।
द्वादशास्या दशभुजा तनुमध्या तमोनिभा[२३] ॥१४॥
घनस्तनी[२४] पृथुकटी नागनासोरुरव्यया[२५] ।
भद्रकालीति तां प्राह देवीं देवी[२६] शुभानना[२७] ॥१५॥
ततोऽब्रवीत् तदा देवमेषा सृष्टा मया प्रभो ।
त्वमप्यन्यं सृज गणमनुरूपं नमोस्तुते ॥१६॥
ततो देवस्तदा स्कन्धं स्वमवैक्षत भास्वरम्[२८] ।
तस्माज्जज्ञे पुमान् दिव्यस्त्रैलोक्यं प्रदहन्निव[२९] ॥१७॥
भृकुटीभूषितास्यश्च[३०] बद्धगोधांगुलित्रवान् ।
कवची बद्धतूणीरः[३१] शरी खड्गी शरासनी ॥१८॥
त्र्यक्षश्चतुर्भुजश्चैव[३२] वज्रसंहननो युवा ।
स सृष्टः[३३] प्रणतो भूत्वा हरिर्नाम्ना[३४] गणेश्वरः ॥१९॥
उवाच प्राञ्जलिर्भूत्वा देवदेवं सहोमया ।
आज्ञापय सुरेशान यत् कर्तव्यं मया विभो ॥२०॥
ततस्स भगवानाह[३५] हरिं तं गणनायकम् ।
प्राचेतससुतस्यास्य[३६] यज्ञं गच्छ विनाशय ॥२१॥
भद्रकाल्या सहाशु त्वमेतत् कृत्यं गणेश्वर[३७] ।
ततः स[३८] भगवान् देवो गणेशान्[३९] कामरूपिणः[४०] ॥२२॥
स्वगात्रेभ्योसृजद् धीमान्[४१] नाना[४२] रूपधरान् गणान् ।
पस्पर्श बाहुं[४३] सम्यक् च[४४] तस्मा[४५]ज्जाता महाबलाः[४६] ॥२३॥

---

२० सकवचा ? । २१ च सवाहा - घ. । २२ सतूली च - घ. । २३ ...तिमोहिनी - ख. । २४ तुंगस्तनी - घ.। २५ नागपासवरायुधा - घ. । २६ देव - घ. । २७ .. नाम् - घ. । २८ स्त्रमैक्षत सुभासुरम् - क., स्वभाश्वरं - ख., प्रभाश्वरं - घ. । २९ संहरन्निव - क. । ३० भ्रुकुटीभूषितास्यश्च - क. ख. । ३१ च - घ. । ३२ ... श्च सुभुजश्चैव - क. ख. । ३३ संतुष्टा - घ. । ३४ हरिर्नाम - घ. । ३५ भगवान्देवो - ख. । ३६ प्रचेतससुतस्यास्य - घ.,...स्येम - क । ३७ गणेश्वर - ख. । ३८ ततोस्य - क. । ३९ गणेश - ख., गणेशः - घ. । ४० ...णं - ख. । ४१ भीमान् - घ. । ४२ नाम्ना - घ. । ४३ बाहून् -घ.। ४४ तु - क. । ४५ तस्मि (न्) - क. ख. घ. । ४६ महात्मनः - क., ना - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कोटचस्ता नवतिश्चैव शतञ्चैव तदा प्रभोः[४७] ।
स तांश्चोवाच[४८] भगवान् यज्ञं प्रमथतानघाः ॥२४॥

सनत्कुमार उवाच

ततस्तौ तेन सैन्येन महताभिसमावृतौ ।
जग्मतुः सागरोन्नाद[४९]मेघाशनिनिनादितैः[५०] ॥२५॥
देवोपि सह पार्वत्या रैभ्याश्रमसमीपतः[५१] ।
स्थित्वापश्यद् गणेशानां कर्म तद् यज्ञनाशनम् ॥२६॥

सनत्कुमार उवाच

वृक्षाः कनखलेयास्तु गङ्गाद्वारसमीपगाः ।
सुवर्णशृंगश्च गिरिर्मेरुपर्वतसन्निभः ॥२७॥
तस्मिन् प्रदेशे दक्षस्य यज्ञोसावभवत्तदा[५२] ।
गणेश्वरबलं चागाद् भीमं कालीपुरोगमम् ॥२८॥
ते संप्राप्य महाभागाः सर्वे दीप्तानलप्रभाः ।
ऊचुस्तं यजमानञ्च ऋत्विजोथ मुनीन् सुरान् ॥२९॥
वयं ह्यनुचराः सर्वे शर्वस्य परमात्मनः ।
इहाभिलिप्सवः प्राप्ता भागान् यच्छध्वमीप्सितान् ॥३०॥
तपसा यज्ञभागार्हा बलेन[५३]नियमेन वा[५४] ।
ऐश्वर्येणाथ योगेन[५५] येन तेन पुरो हि वः[५६] ॥३१॥
सर्वञ्चास्मास्वपि हि तद्[५७] वयमप्यंशभागिनः[५८] ।
अथ चेत् स्वामिनो देवास्तेन भागार्हतां गताः ॥३२॥
स्वामित्वे च बलं हेतुस्तपो वा नात्र संशयः ।
अस्मास्वेवोभयं तच्च स्वामित्वं तेन नो वरम् ॥३३॥
अथ चेत् कस्यचिदियमाज्ञा मुनिसुरोत्तमाः ।
भागो भवद्भ्यो देयस्तु नास्मभ्यमिति कथ्यताम् ॥३४॥

---

४७ प्रभो - क. .घ । ४८ सर्वांश्चोवाच - क. । ४९ सागरैर्नादैः - घ. । ५० विनादितैः - क., तौ - क., नी (नौ ?) - ख. । ५१ वैश्वानरसमप्रभः - घ. । ५२ यज्ञोयमभवत्तदा - क. । ५३ बलेना - घ. । ५४ च - घ. । ५५ ...भियोगेन - घ. । ५६ वयं सुराः - घ. । ५७ श्चास्मासु पिहितं - घ. । ५८ तद्द्वयं ह्यंशभागिनः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तं ब्रूत यो ज्ञापयति वेत्स्यामो हि वयं ततः ।
एवमुक्तास्तु हरिणा सर्वे देवपुरस्सराः ॥३५॥
ऊचुर्मन्त्राः प्रमाणं वो भागं प्रति गणेश्वराः[५९] ।
मन्त्राप्यूचुः सुरान् यूयं तमोपहतचेतसः ॥३६॥
येन प्रथमभागार्हं[६०] नायजध्वं महेश्वरम् ।
मन्त्रैस्ते प्रोच्यमानापि नैव भागान् ददुर्यदा ॥३७॥
तदा यातास्ततो मन्त्रा ब्रह्मलोकं सनातनम् ।
ततः शक्रादयो देवाः सर्वे ऊचु[६१]र्गणेश्वरान् ॥३८॥
त्यक्त्वा (?) - - - - - - - - - - - - - - ।
युष्मान्निहन्मो विक्रम्य सर्वानेवागतान् युधि ॥३९॥
तेषां सगर्वं[६२] तद् वाक्यं श्रुत्वा हरिरमित्रजित् ।
उवाच प्रहसन् सर्वानिदं वचनमूर्जितम् ॥४०॥
मन्त्राः प्रमाणं न कृता युष्माभिर्बलगर्वितैः[६३] ।
यस्मात् प्रसह्य तस्माद्वो नाशयाम्यद्य गर्जितान्[६४] ॥४१॥
ऋत्विग्भिर्भागधेयैश्च सह यज्ञेन चोद्यतः[६५] ।
येषां च लवत्ता[६६] वस्तान् सर्वान्[६७] नाशयाम्यहम् ॥४२॥
एवमुक्त्वा स तेजस्वी हरिभद्रः प्रतापवान् ।
भद्रकाली च संक्रुद्धा अभिदुद्रुवतुः[६८] सुरान् ॥४३॥
गणेश्वराश्च संक्रुद्धा यूपानुत्पाट्य चिक्षिपुः ।
प्रस्थात्रा[६९] सह होतार[७०]मश्वं[७१] चैव गणेश्वराः ॥४४॥
गृहीत्वा कुपिताः सर्वे गङ्गास्रोतसि चिक्षिपुः ।
यजमानञ्च पाशेन बद्ध्वा निन्युर्यथासुखम् ॥४५॥

---

५९ महेश्वराः - ख. । ६० प्रमथभगार्हं - ख. । ६१ सर्वानूचु - क. । ६२ सवर्गं - क. । ६३ ...दर्पितैः ?
६४ गर्वितान् ? ६५ चोदितः - घ. । ६६ यद्वलं यत्तपो वापि - घ. । ६७ तत्सर्वं - घ. । ६८...वभिदुद्रुवातुः- क. ।
६९ प्रस्तोत्रा - ख. । ७० होत्रा च - घ. । ७१ मखं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वेदीमन्ये[७२] कुशानन्ये[७३] स्रुचोन्ये चमसान् परे[७४] ।
व्यनाशयँश्चिक्षिपुश्च शालाश्चान्येभ्यदीपयन्[७५] ।।४६।।
हरिभद्रोपि दीप्तात्मा शक्रस्योद्यच्छतः[७६] करम् ।
व्यष्टंभयददीनात्मा तथान्येषां दिवौकसाम् ।।४७।।
भगस्य नेत्रे पूष्णश्च दशनान् रुषिताननः[७७] ।
धनुष्कोटचा समाहत्य[७८] भिषतां[७९] संन्यपातयत्[८०] ।।४८।।
विष्णोश्चक्रं च तद् घोरं युगान्तादित्यवर्चसम्[८१] ।
व्यष्टम्भयददीनात्मा करस्थं न चचाल ह ।।४९।।
तुषितांश्च तथा[८२] देवानुद्युक्तान् युद्धलालसान् ।
वायव्यास्त्रेण संहृत्य पृथिव्यां तान्यपातयत् ।।५०।।
अन्यांश्च देवान् देवोसौ सर्वान्[८३] युद्धाय[८४] संस्थितान् ।
मोहनेनास्त्रवर्येण[८५] संमोहयदनिन्दितः ।।५१।।
राजानश्चापि ये केचित् तत्रायाता दिदृक्षवः[८६] ।
तान्सर्वानस्त्रवीर्येण स्वगृहाननयद् बलात् ।।५२।।
तद् प्रविध्वस्तकलशं भग्नयूपसतोरणम् ।
प्रदीपितमहाशालं दृष्ट्वा यज्ञोभिदुद्रुवे ।।५३।।
तं तदा मृगरूपेण धावन्तं गगनं प्रति ।
हरिः शरं स सन्धाय[८७] विशिरस्कमथाकरोत् ।।५४।।
शरं चापरमादाय[८८] वीरभद्रः प्रतापवान् ।
पलायमानं तं यज्ञं ससार मृगरूपिणम् ।
नक्षत्रसमतां यातुं द्रावद्धं वीतमभ्यगात् ।।५५।।

सनत्कुमार उवाच

एवं ते[८९] निकृता[९०] व्यास गणैः काल्या तथैव च ।
हरिणा चैव देवेन सर्वे[९१] शरणमागताः ।।५६।।

---

७२ ...मध्ये - ख. । ७३ ...मन्ये - क. । ७४...नपि - क. । ७५...न्यदीपयन् - क. । ७६...स्यामुच्चतः- घ । ७७ कुपिताननः - घ. । ७८ महासत्व - घ । ७९ मिथस्तां(न्) - घ. । ८० सन्यवारयत् - घ. । ८१ सन्निभम् - क. । ८२ ततो - घ. । ८३ स तान् - ख., यज्ञ - घ. । ८४ कौशल्य - घ., युद्धसमुत्थितान् - ख. । ८५ ...वीर्येण क. ख. घ. । ८६ तत्र तत्र समागतान् - घ. । ८७ समाधाय - क. घ., समादाय - ख. । ८८ सशरं चाप - घ., शरंचापं स - ख । ८९ निर्गता - घ. । ९० गणैर्भद्रा - क., सर्वेवै त्रिदिवौकसः - घ. । ९१ तं सर्वे - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तान् प्रपन्नान् तदा सर्वान् देवान्[९१] समुनिलोकपान् ।
हरिः काल्या सहैवाह गच्छध्वं सोममव्ययम् ।
प्रसादयध्वं देवेशं ततो वो भविता शमः[९२] ॥५७॥

सनत्कुमार उवाच

त एवमुक्ता[९३] हरिणा जग्मुर्देवं प्रमन्यवः ।
प्रसादयितुमव्यग्रा दुःखशोकसमन्विताः ॥५८॥
ततस्ते नातिदूरे तु[९४] साम्बं[९५] सगणमीश्वरम्[९६] ।
अपश्यन्त[९७] महात्मानः[९८] सर्वे तद्गतमानसाः ॥५९॥
ते तं दृष्ट्वा प्रणम्योच्चैः[९९] स्तुष्टुवुर्दीप्ततेजसम् ।
वाग्भिराहवनीयाभिः[१००] कृत्वा ब्रह्माणमग्रतः ॥६०॥

देवा ऊचुः

नमस्ते सुरशत्रुघ्न सुरयज्ञप्रमर्दक[१०१] ।
महायज्ञ महासत्व महाक्रतुशतस्तुत ॥६१॥
नमो यज्ञविनाशाय वेदसर्वस्वदाय[१०२] च ।
शिपि[१०३] विष्टकृते विष्णोर्नरसिंहाभिघातिने ॥६२॥
मन्दराद्रिनिवासाय[१०४] शुभसर्वस्वदाय च ।
महाविमानयानाय क्रतुविघ्नकराय च ॥६३॥
मन्त्रान्तः करणयैव[१०५] मन्त्रव्रतकराय च ।
पूष्णो दन्तविनाशाय भगनेत्रहराय च ॥६४॥
विष्टम्भनाय शक्रस्य विष्णोश्चक्रस्य चैव हि ।
नमो यज्ञप्रणेत्रे च[१०६] यज्ञोत्पत्तिकराय च ॥६५॥
वरदानाधिगम्याय[१०७] ब्रह्मणो जनकाय च ।
व्याघ्रचर्मभृते तुभ्यं[१०८] कृष्णचर्माम्बराय च ॥६६॥

---

९१ सदेवान् - ख., सर्वांश्च - ख. । ९२ समः - घ., मम - क. । ९३ एवमुक्तास्तु घ. । ९४ तं दुरारोहं - घ. । ९५ सोमं - घ. । ९६ शरणमीश्वरम् - घ. । ९७...न्तं - घ. । ९८...नं - घ. । ९९ प्रणम्योचु - घ. । १०० रादरणीयाभिः - घ., रावाहनियाभिः - क., संस्कृतयुक्ताभिः - घ. । १०१...प्रवर्तक - क. घ. । १०२ देवसर्वस्वदाय - घ. । १०३ शिखि...- ख., शिवि...- क. । १०४ मन्दरेन्द्रविनाशाय - क. घ. । १०५ मन्त्रान्त ...- घ., मन्त्रार्क... - ख. । १०६ यज्ञप्रणेतुश्च - क. । १०७ ...दिगम्याय - घ. । १०८ चैव - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नमः स्रग्वरमालाय नरपित्रे तथैव च ।
उत्पादकाय विष्णोश्च जयाय विजयाय च ॥६७॥
नमो मन्युविनाशाय वीरभद्रप्रजाय च ।
नमो हर्षाय कोपाय[१०९] गणेश्वरसृजे नमः ॥६८॥
नमो देवानुतापाय मृगबाणार्पणाय[११०] च ।
नमस्ते भगवन् देव नमस्ते भगवञ्छिव ॥६९॥
नमस्ते सर्वलोकेश नमस्ते लोकभावन[१११] ।
त्वया सृष्टमिदं विश्वं[११२] यज्ञो देवाश्च यज्ञहन् ।
प्रसीद मा क्रुधोस्माकं मा नः कृत्वा बिनाशय ॥७०॥

सनत्कुमार उवाच

य इमं पठते नित्यं प्रयतः[११३] प्रातरुत्थितः ।
न तस्य विघ्नरूपाणि कदाचित् संभवन्त्युत ॥७१॥

सनत्कुमार उवाच

स एवमुक्तो देवेशस्तदा[११४] तान् स्तुवतः स्थितान् ।
उवाच प्रहसन्[११५] वाक्यं सर्वात्मा सर्वभावनः[११६] ॥७२॥

देवदेव उवाच

नाहं क्रुद्धो भवन्तो मे नित्यमेवातिबल्लभाः[११७] ।
क्रुद्धे हि मयि युष्माकं न स्याज्जीवं[११८] क्षणान्तरे ॥७३॥

सनत्कुमार उवाच

एवमुक्त्वा तदा देवः सुराणां हितकाम्यया ।
प्रावेशयत् सुरान् सर्वान् ततस्तान् योगमायया[११९] ॥७४॥
स्वे शरीरे महादेवो विस्मापयितुमोजसा ।
ते प्रविष्टास्तदा देहमीश्वरस्य[१२०] महात्मनः ॥७५॥

---

१०९ रूपाय - ख. । ११० मृगमाणार्पणाय - ख. । १११ सर्वभावन - घ. । ११२ सर्वं - घ. । ११३ नियतः - ख. । ११४ सदा - घ. । ११५ च महादेवः - घ. । ११६ सर्वान्देवान् समागतान् - क. । ११७ नित्यमेव हि वल्लभाः - ख. । ११८ भ्रंस्याज्जीवं - घ., ...व्यं - घ. । ११९ प्रवेशयमास तदा योगेनापि-बलीयसा - घ. । १२०... मुमेशस्य - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सप्तलोकसमायुक्तमपश्यन् जगदद्भुतम्[१२१] ।
ते परिभ्रम्य[१२२] ताँल्लोकान् कृत्स्नान् सर्वे भयान्विताः[१२३] ॥७६॥
पञ्चाक्षं गणपं वीरं तत्रापश्यन् समागताः[१२४] ।
तेन ते सुरशार्दूलाः[१२५] सर्वे ह्यूर्ध्वमतन्द्रिताः[१२६] ॥७७॥
आक्षिप्तास्तन्मुहूर्तेन लोकमन्यमुपागताः ।
अपश्यँस्ते महाभागा नगरं सूर्यसन्निभम् ॥७८॥
स्फाटिकेनातिमहता प्राकारेणाभिसंवृतम् ।
शृंगैश्च विविधैश्चित्रैर्मणिहेमोज्ज्वलैः शुभैः[१२७] ॥७९॥
ततोपरमपश्यँस्ते तन्मध्ये सुरसत्तमाः ।
सप्तयोजनकोटीकं[१२८]समन्तान्नगरं शुभम् ॥८०॥
राजतेनावृतं दिव्यं प्राकारेणेन्दुवर्चसा ।
तस्य मध्येपरं चोर्ध्वं[१२९] षट्कोटया[१३०] विस्तृतं पुरम् ॥८१॥
जाम्बूनदमयेनैव प्राकारेण[१३१] सुसंवृतम् ।
तस्य मध्ये[१३२]ततश्चान्यत्[१३३] पंचकोटी[१३४]प्रमाणतः ॥८२॥
इन्द्रनीलोपलेनैव प्राकारेण समावृतम् ।
तस्य मध्ये ह्यपश्यँस्ते विबुधा[१३५] मुनिसत्तम[१३६] ॥८३॥
चतुर्योजनकोटीकं विस्तारायामतः समम्[१३७] ।
वैडूर्योपलयुक्तेन[१३८] प्राकारेणाभिसंवृतम् ॥८४॥
नगरं तस्य मध्ये च त्रिकोटीयोजनं[१३९] शुभम् ।
सर्वरत्नविचित्रेण प्राकारेणाभिसंवृतम् ॥८५॥
तेषां मध्ये जनपदाः सर्वदुःखविवर्जिताः ।
शुक्लाभिजनसंपन्नाः सर्वे च स्थिरयौवनाः ॥८६॥

१२१...मपश्यँश्च जगत्ततः - घ. । १२२ परिभ्राम्य - ख. । १२३ मर्यार्द्दिताः - ख. । १२४ समागतं - घ. । १२५ गणशार्दूलाः - ख. । १२६ वै सूर्यवर्चसः - घ. । १२७ सुशोभितमनोहरं - घ. । १२८ कोटया वै - घ. । १२९ चान्यं - घ. । १३०...कोटी - घ. । १३१ प्राकारेणैव - ख.,...णाति(भि)...- घ. । १३२ तस्योध्वर्तं - घ. । १३३ ...श्चास्यां - घ. । १३४... कोटया - घ. । १३५ विविधान् - घ. । १३६... मान् - घ. । १३७ शुभम् - ख. । १३८ वैडूर्योपलयुक्तेन - क. । १३९ ... कोटीयोजनं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

क्षुत्पिपासाविनिर्मुक्ता[१४०] रोगशोकविवर्जिता:[१४१] ।
अमरा जरया[१४२] त्यक्ता नित्यं मुदितमानसा: ।।८७।।
दीर्घिकाभिर्विचित्राभिर्वापीभिश्चाप्यलंकृता:[१४३] ।
वृक्षैर्नानाविधैश्चित्रैः सदा पुष्पफलोपगैः ।।८८।।
सर्वभक्षान्[१४४] प्रसूयन्ते वृक्षास्तत्रापरे शुभा: ।
अपरे चाप्यलंकारान्[१४५] सर्ववासांसि चापरे ।।८९।।
अपरे सर्वपुष्पाणि सर्वाण्येव फलानि च ।
सर्वभावाँस्तथा चान्ये मधु चामाक्षिकं[१४६] शुभम् ।।९०।।
अपरे क्षीरिणस्तत्र वृक्षा व्यास महाप्रभा: ।
क्षीरं क्षरन्ति ते नित्यं सर्वे[१४७] गव्यं[१४८] समन्विता:[१४९] ।।९१।।
सर्वा मणिमयी भूमिः शुभा काञ्चनवालुका[१५०] ।
उद्भिदान्युदकान्यत्र गिरि[१५१]प्रस्रवणानि च । ।।९२।।
न तेषु क्रोधो लोभो वा युद्धं द्वेषोथ मत्सर: ।
न मोहो[१५२] नैव च स्तम्भो न दोषास्तत्र चापरे ।।९३।।
तस्य मध्ये पुरं चान्यद् द्विकोटीविस्तृतं शुभम् ।
पद्मरागमयेनैव प्राकारेण परिष्कृतम् ।।९४।।
ईदृशानि पुराणि स्म व्यतिक्रम्य सुरास्तत: ।
कोटीयोजनविस्तीर्णं समन्ताद् वह्निनावृतम् ।।९५।।
संवर्तकानलाकारं दुर्निरीक्ष्यं पुरं महत् ।
अद्वारं ददृशुर्दिव्यमनन्तं ते सुरोत्तमा: ।।९६।।
दृष्ट्वा जग्मु: परं[१५३] चैव विस्मयं भयमेव च ।
तान् भीतवदनान् व्यास वेपमानान् सुरेश्वरान् ।
पञ्चाक्षो गणप: प्राह मा भीर्भवतु व: सुरा: ।।९७।।

---

१४० विमुक्ता हि - क. घ. । १४१ रागलोभविवर्जिता: - घ. । १४२ अजरा अमरा: - ख., अजरा - घ. । १४३ चप्यालंकृतं - घ. । १४४ सर्वभक्षं - क., ...क्षानि - ख. । १४५ चाप्यलंकारं - क. ख. घ. । १४६ मधुरैर्माक्षिकैः - घ. । १४७ सर्वं ... क. । १४८ दिव्यं - क ख. । १४९ ... तं - क. घ. । १५० ...चुल्लिका - क. । १५१ गिरेः - घ. । १५२ मानो - ख. घ. । १५३ पुरं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

इदन्तत् सुमहद् घोरं पुरं घोरानलावृतम् ।
द्रष्टव्यं वो महात्मनो यत्कृते चागतास्त्विह[१५४] ॥९८॥

सनत्कुमार उवाच

एवमुक्त्वा स पंचाक्षः[१५५] शूलेनानलवर्चसा ।
पश्यतां सुरसंघानां द्वारं चक्रे महाबलः[१५६] ॥९९॥
ते प्रविष्टा महात्मानः पञ्चाक्षसहिताः सुराः ।
दिव्यं ददृशिरे पूर्णं[१५७] सिंहानां तत् पुरं महत् ॥१००॥
मेरुमन्दरकल्पानां नखदंष्ट्रावतां तथा ।
घोराणामग्निवर्णानां क्रुद्धानामतितेजसाम् ॥१०१॥
तेषामेकस्तदा सिंहश्छित्वा बन्धनमूर्जितः[१५८] ।
अन्वधावत संक्रुद्धः प्रलम्बितमहासटः ॥१०२॥
तस्य सिंहस्य नादेन भैरवेण दिवौकसः ।
विषण्णवदनाः सर्वे पञ्चाक्षं शरणं ययुः ॥१०३॥

पञ्चाक्ष उवाच

न भेतव्यं सुरा देवं दर्शयाम्यधुना हि वः ।

सनत्कुमार उवाच

इत्युक्त्वा[१५९] ददृशुः शर्वं[१६०] सहसा ते सहोमया[१६१] ।
न चैव तत्पुरं व्यास न सिंहं[१६२] नापि किञ्चन ॥१०४॥
वेपमाना भयेनेशं शरणं पर्युपागताः ।
तान् शरण्यः[१६३] स भगवानुवाच प्रहसँस्तदा ॥१०५॥
आमन्त्य सर्वान्[१६४] देवेशो भयत्रस्तान्[१६५] दिवौकसः ।
दृष्टा[१६६] हि वो मम क्रोधाः सिंहरूपा भयानकाः ॥१०६॥
एकेन तेषां रौद्रेण यूयं सर्वेपि[१६७] तर्जिताः[१६८] ।
यदि सर्वानहं क्रोधाद्[१६९] विसृजेयं कदाचन[१७०] ॥१०७॥

---

१५४ नागतास्त्विह - क. ख. । १५५ पंचास्यः - घ. । १५६ महानदः - घ. । १५७ पूर्वं - ख. । १५८...तं - क. ख. । १५९...क्त्वा - क. ख. घ. । १६० सर्वे यूयं - क. ख. घ. । १६१ तैस्सहोमया - क. । १६२ सिंहो - घ, सिंहाँ (न्) - ख. । १६३ भयार्तान् - ख. घ. । १६४ सर्वा - क. । १६५ भया (त्) - क., भयार्तास्तान् - ख. घ. । १६६ दृष्ट्वा - क., दृष्टं - ख. । १६७ सर्वे यूयं - क. ख. । १६८ विनिर्जिताः - क. । १६९ क्रोधान् ? क्रोधे - घ. । १७० कथंचन - क. ख. घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

न भवेत न सन्देहः[१७१] सर्वे यूयं क्षणान्तरे[१७२]
इयन्तु देवी युष्माकं कुपिता पर्वतात्मजा ।
एतां प्रसादयत वै नाहं कुप्यामि वः[१७३] सुराः ॥१०८॥
सनत्कुमार उवाच
एवमुक्तवति स्वामिन्युद्धताताम्रलोचना[१७४] ।
देवी देवीं मुखाद् घोरां ससृजे भयवर्द्धनीम् ॥१०९॥
दंष्ट्राकरालवदनां[१७५] बहुपादकरांगुलिम्[१७६] ।
धनुःपरशुखड्गोग्र[१७७]चक्रशूलेषुधारिणीम्[१७८] ॥११०॥
ज्वलर्दकसहस्रांशुतेजसं[१७९] विश्वरूपिणीम् ।
दशयोजनसाहस्र[१८०]स्तस्या देहः प्रमाणतः[१८१] ॥१११॥
तयाभिभूतास्ते देवा वध्यमानाश्च[१८२] सर्वशः ।
न शेकुः[१८३] पुरतः स्थातुं व्याघ्राद् मृगगणा इव ॥११२॥
ततो व्यथितचितास्ते कालकर्णीभयात्[१८४] सुराः[१८५] ।
भस्मराशिं स्थितं पार्श्वे देवस्य[१८६] विविशुर्भयात् ॥११३॥
तान् दृष्ट्वा भस्मकूटं तु प्रविष्टान् शरणार्थिनः ।
सुरान् भस्मविलिप्ताङ्गान् देवी[१८७] देवीं[१८८] न्यषेधयत् ॥११४॥
देव्युवाच
कालकर्णि निवर्तस्व मा वधीः[१८९] सुरसत्तमान् ।
एते पाशुपती[१९०]भूता भस्मना दिग्धमूर्तयः[१९१] ॥११५॥
एतत् पशुपतिप्रोक्तं व्रतं पाशुपतं पुरा ।
यद् भस्मना पवित्रेण स्नानं स्नानेभ्य उत्तमम् ॥११६॥
एते भगवतोवश्य[१९२]मनुग्राह्याः[१९३] सुरोत्तमाः ।
भस्म येन प्रविष्टास्तु[१९४] तस्मान्मैतान् विनाशय ॥११७॥

---

१७१ भवेयुरसन्देहः - क. ख. । १७२ क्षणेपिच - ख. । १७३ वा - क. । १७४ युद्धवातम्रलोचना - क. ख. ।
१७५ ...दशनां - ख. । १७६ गतिं - घ. । १७७ ... ग्रां - क. । १७८ ...लासिधारिणीम् - क. ।
१७९ ...सां - ख. । १८० साहस्रां - ख. । १८१ देहं प्रकीर्तितम् - क. । १८२ वर्धमानाश्च - घ. ।
१८३ तत्यजुः - घ. । १८४ कालकर्णभयात् - क., न्या - ख., कल्प - घ. । १८५ पुरा - घ. ।
१८६ देवास्ते - घ. । १८७ देवो - क., देवीं - ख. । १८८ देवी - क. ख. । १८९ मा धाव - घ. ।
१९० पाशुपता- क. घ. । १९१ निर्दग्धमूर्तयः- घ. । १९२ वश्या - क. । १९३... गृह्या - ख. । १९४...स्ते - क.।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

रौद्राः पशव एते हि प्रवेशाद् भस्मसोधुना[१९५] ।
जाताश्च गणपाः सर्वे हन्तव्या न त्वयेश्वरि ॥११८॥
नैषां मृत्युः प्रभवति शङ्करार्पितचेतसाम् ।
मया ह्येतत्[१९६] व्रतं शर्वं चरितं सार्वकामिकम्[१९७] ॥११९॥
इत्युक्त्वा[१९८] कालकर्णी तु देव्या[१९९] भैरवरूपिणी ।
न्यवर्तत सुरेभ्यस्तु[२००] कोपं तत्याज चोत्थितम्[२०१] ॥१२०॥
कालकर्णीं निवृत्तां तु दृष्ट्वा तेपि[२०२] सुरास्ततः[२०३] ।
शान्तश्च भयमत्युग्रं तुष्टुवुर्हिमवत्सुताम् ॥१२१॥

देवा ऊचुः

हरवरमहिषीं महादेवपत्नीं
प्रियां त्र्यम्बकस्याम्बिकां वाचमेका-
क्षरां[२०४] लोकसंहारकर्त्रीमुमां दे-
वदेवस्य पत्नीं शुभां शंखकुन्दे-
न्दुहाराम्बुगौरोग्रदंष्ट्रां जयामा-
हवे दुर्निरीक्ष्यामचिन्त्योग्रदृष्टि-
विशालेक्षणां पीतकौशेयवस्त्रां
महाशूलघण्टापताकाध्वजां दि-
व्यगन्धाज्यधूपप्रियां कालदण्डा-
सिचर्मोग्रहस्तां[२०५] वपाशोणितान्त्र-
वसापूर्णभाण्डां दिशां दक्षिणां चा-
रुचामीकराबद्धपट्टां युगान्ता-
नलाभेक्षणामट्टहासान्सृजंतीं
यथाकामकर्त्रीं[२०६] मनङ्गायुधावि-

---

१९५ साधुना - ख. । १९६ ममाप्येतत् - घ. । १९७ सर्वकामिकम् - घ. । १९८ इत्युक्त्वा - क. ख. घ. ।
१९९ देवी - घ. । २०० श्च - घ. । २०१ त्यक्त्वा जवोत्थितम् - क. । २०२ तु - क. । २०३ सदा - घ. ।
२०४ त्रिचरणाक्षरां - घ. । २०५ ...चर्माग्रहस्तां - ख. । २०६ ... हन्त्रीं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

क्षतां शूरसेनां नदीं विश्रुतां म–
न्दरावासनित्यां दिविष्ठां[२०७] प्रपद्या–
महे[२०८] कानसी (ष्टि)[२०९] मसुरमहिषदा–
रणीं दारणीं दुन्दुभेः[२१०] सुन्दमारीं[२११]
निशुम्भस्य मृत्युं विभां सोमसूर्या–
ग्निभासां मृज[२१२]त्कान्तिमिष्टप्रदां शो–
कदुःखार्तिहर्त्रीं[२१३] विशेकामघोरां–
घनामन्तकस्या[२१४]न्तकर्त्रीं मुनेर्जा–
मदग्न्यस्य चोर्ज्जां तथा राजराज्ञीं
मनोज्ञां करालां क्षपां दण्डनीतिं
स्थितिं सिद्धिमिष्टां शुभां कालरात्री–
मपर्णां समाधिं शरण्यां नगेन्द्रा–
धिवासप्रियां क्षीरोदनित्यां[२१५] शुभां–
महाकिंकिणीकां प्रकीर्णोर्ध्वकेशीं
प्रदीप्ताग्निसन्ध्याभ्ररागत्विषं[२१६] ब–
द्धगोधाङ्गुलित्रां त्रिनेत्रां जटाके–
शरक्ताम्बुजाबद्धमालां विशल्या–
मनङ्गारिनेत्रोल्कजां[२१७] हेममाला–
निबद्धस्रजां[२१८] दीर्घवेणीं सुवेणीं
यशःकीर्तियुक्तां[२१९] मयूराङ्गजाब–
द्धचित्रध्वजां राजसां शान्तिकर्त्रीं
प्रपद्येहमेकां सदा भुजङ्गशतकृताङ्गदां
महादानवप्राणशौण्डां चिताभ–
स्मरूक्षाङ्गकेशीं महाजानुलम्बो–

---

२०७ दिर्ति ... - घ. । २०८ प्रपद्येमहे - घ. । २०९ कानसां - घ. । २१० दुन्दुभेर्मारणीं - घ. ।
२११ सु (शु) म्भमारीं - ख. घ. । २१२ सृजां - ख. । २१३ दुःखशोकापहर्त्री - घ., दुःखशोकापहन्त्रीं - घ. ।
२१४ शम्वरा - ख. । २१५ ...धिस्थां - घ. । २१६ ... त्विषां - क. । २१७ त्रिनेत्रोल्कजा - घ. ।
२१८ विनद्धस्रजां - ख. । २१९... कीर्तिमुक्ता - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दरां सर्पयज्ञोपवीतद्ध[२२०]वक्त्रो-
द्धृताक्षार्द्धपादार्द्रहस्तावतंसां
महामेखलादामलम्बद्विचित्रस्रजां
महामेघतूर्योग्रवादित्रनृत्त-
प्रियां[२२१] गीतहास्यप्रलापप्रमोद-
प्रियां जाप्यहोमोपवासादवासा-
प्रवासाधिवासातिरिक्तां महायो-
गविज्ञातसारा[२२२]नुसारोग्रसारां
धृतिं ज्यानुघण्टा[२२३]वबद्धोग्रशब्दां
महामेघवज्रप्रपातोदधिप्र-
ख्यतीव्रोग्रघोषां क्रियां दीक्षिताना-
ञ्च दीक्षां विरूपाक्षभार्यां हरस्या-
र्धदेहाधिवासां[२२४] प्रपद्ये मुखोल्को-
ज्ज्वलां देवीमाद्यां[२२५] परां पार्वतीं स-
र्वविद्याधिदेवीं गतिं यमनियमदमात्मभूतां
पितॄणां च कन्यां शुभां पर्वतेन्द्रा-
त्मजां दक्षयज्ञान्तकर्त्रीं[२२६] भवस्या-
र्धदेहाश्रितादित्यदन्तावपातां[२२७]
सुरेन्द्राग्रहस्तप्रतिस्तम्भनीं वि-
ष्णुकेशापहर्त्रीं महासिंहयुक्ता-
तिवाहां[२२८] महाभैरवां भीषितां स्क-
न्दचन्द्रारणीं मातरं हस्तिवक्त्र-
स्य चाग्र्यां विशाखस्य जन्मारणीं न-
न्दिनो नैगमेषस्य चोत्पादनीं स-

---

२२० सर्पयज्ञोपवीतान्त्रबक्त्रो ... - घ.। २२१ नृत्यप्रियां - ख.। २२२ ... विज्ञानसारा - घ.। २२३ जानुघण्टा - क.। २२४ हरस्य देहार्धाधिवासां - घ.। २२५ देविमाद्यां - क.-ख.। २२६ दक्षयज्ञान्तकारीं - क. घ.। २२७ दिग्यदन्तावपातां - घ., मादित्य ? । २२८ ...तिवादां - घ.।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

र्वलोकस्य चाद्यारणीं पूज्यां मातरं यो-
गिनां योगिनीं ध्यायमानां धृतिं दे-
वविप्रैर्महा[२२९]योगतर्कैरगम्यां
विशिष्टेष्टशिष्टाधिवासां च लक्ष्मीं
नरी (?) भूर्भुवःस्वर्जनस्सत्यवैरा-
जमाहात्म्यलोकारणीं[२३०]कारणीमिन्द्रियाणा-
महङ्कारतन्मात्रकर्त्रीं तमस्स-
त्वरागप्रवृत्ति[२३१] पराञ्च प्रवृत्तिं
महेशस्य शक्तिं तथा चेतनां स-
र्वविज्ञानचिन्त्यां प्रपद्याम देवी[२३२]-
मुमां मातरं, दिश त्वं सुखं मातरस्मासु तुष्टा
महादेवपत्नीं शुभां यां वयं चि-
न्तयामैकया संविदा ध्यायमानाः[२३३]
सदा दारुणं चापि सर्वं कृतं य-
त्वया (?) तच्च नो नाशयाम्बाद्य तुष्टा
यथा वै तुषारं महासूर्यदेहो-
द्भवा [२३४] तच्च नो जातिकोटीसहस्रे-
षु पूर्वं कृतं[२३५] यत् करिष्याम यत्कु-
र्म तत्सर्वमेवञ्च[२३६] दद्याश्च नः स-
र्वमर्थं सकामं तथारोग्यमूर्जां
श्रियं ज्ञानविज्ञानमेधास्तथा धा-
रणां तर्कमूहामपोहं धृतिं चा-
र्यभावं[२३७] गतिञ्चैव दिव्यां तथा ध-
र्मनित्यत्वमेतांश्च ये चाप्यतोन्ये
गुणास्तांश्च सर्वान् जुषस्वाद्य देवि
तुभ्यं नमः ॥१२३-१४४॥

---

२२९ देवदेवप्रियां - ख. । २३० जमहात्म्यलोकारणीं - क. । २३१ नमः सत्वरागप्रवृति - क., मनः - ख. ।
२३२ प्रपद्ये सदाहं - ख. । २३३ मोक्षबुद्धचा - ख. । २३४ महाशून्यदेहोद्भवां - ख. । २३५ सर्वं कृतं - क. ।
२३६ वरञ्च - ख. । २३७ ...मपोहां धृतिं धार्यतां - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

एवं सा संस्तुता देवी देवैर्हृष्टेन[२३८] चेतसा[२३९] ।
त्र्यम्बकानुग्रहाच्चैव देवाँस्तुष्टान्नवीदिदम् ॥१४५॥

देव्युवाच

गच्छध्वं विज्वराः सर्वे तुष्टाहं वो न[२४०] संशयः ।
मैवं कार्ष्ट पुनर्देवा मा विनाशो हि वो भवेत् ॥१४६॥

सनत्कुमार उवाच

ततः स देवः प्रहसन् कपर्दी नीललोहितः ।
प्रकृतिस्थान् सुरान् सर्वांश्चकार सुरशत्रुहा ॥१४७॥
उवाच चैतान् देवेशो गच्छध्वं विगतज्वराः ।
यज्ञश्चैव यदा कृत्यं तदायं भविता हि वः ॥१४८॥
सशिरस्को दितेः पुत्रा मन्त्रेणानेन सन्धितः ।
ततः स्तोत्रं च मन्त्रं च सन्धानकरमव्ययम् ।
ददावाथर्वणं देवः प्रोवाचेदं च[२४१] सुस्वरम्[२४२] ॥१४९॥

देवदेव उवाच

नक्षत्रसमतां यातु यज्ञोयं सुरसत्तमाः ।
मृगानुसारी देवोपि हरिरस्य भवत्वयम् ॥१५०॥
भद्रकाली हरिश्चैव[२४३] गणाश्चेमे महाबलाः ।
सर्वे भद्रा[२४४] भविष्यन्ति युष्माकममरास्सदा ॥१५१॥

सनत्कुमार उवाच

एवमुक्ता भगवता देवास्ते ब्रह्मणा सह ।
शिरोभिः प्रणतास्सर्वे शर्वमूचुरिदं वचः ॥१५२॥
एष तावत् क्रतु[२४५]श्रेष्ठस्तवैव भवतु प्रभो ।
सर्वः सुरपते देव शतमभ्यर्च्यते[२४६]व्यय[२४७] ॥१५३॥

---

२३८ दिव्येन - ख. । २३९ चक्षुषा - घ. । २४० वोहं - घ. । २४१ कोपेन च - ख. घ. । २४२ सत्वरं - घ. ।
२४३ हरश्चैव - घ. । २४४ रुद्रा - घ. । २४५ क्रतुः - क. । २४६ मन्यच्च ते - घ. ।
२४७ ,,,व्ययः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

भागानां सर्वयज्ञेषु तुभ्यं सर्वं ददामहे ।
एवमुक्तोथ देवेशः सुरैः सर्वैः सुरेश्वरः ॥१५४॥
चकार रूपं परमं सर्वदेवमयं शुभम् ।
स्वात्मानन्ते तदा देवा[२४८] ह्यपश्यन्त महेश्वरे ॥१५५॥
शिरोबाहूरुपादेषु वस्तिहस्तोदरादिषु ।
अवस्थितान् महात्मानो[२४९] मुनींश्चैव तपोधनान् ॥१५६॥
स तद्रूपं तदा कृत्वा देवान् प्रोवाच शंकरः ।
सर्वे यूयं महात्मानो मच्छरीरसमुद्भवाः ॥१५७॥
युष्माकञ्च शरीराणि मन्मयानि प्रपश्यत ।
ततस्ते देवता[२५०] व्यास सर्वं रुद्रात्मकं जगत् ॥१५८॥
आत्मानं[२५१] चाप्यपश्यन्त विस्मयापन्नचेतसः ।
एवं स[२५२] तेषां देवेशो दर्शयित्वात्मनो बलम् ॥१५९॥
उवाच सुरशार्दूलान् दृष्टा [२५३]ह्येता विभूतयः ।
यो यां[२५४] पूजयते मूर्ति भक्त्या परमया युतः ॥१६०॥
तस्य तां मूर्त्तिमास्थाय पूजां गृह्णाम्यहं सुराः ।
न भागधेयैः कृत्यं मे भागधेयानि वस्सुराः ।
सर्वाण्येव ददाम्यद्य[२५५] यात सर्वे गतज्वराः ॥१६१॥

देवा ऊचुः

गुह्यमेतत् परं देव त्वयास्माकं निर्दशितम्[२५६] ।
एवं यो वेत्स्यते मर्त्यः स लोकान् प्राप्स्यतेव्ययान् ॥१६२॥
इदं च भगवन् स्थानं भद्रेश्वरमिति श्रुतम्[२५७] ।
भविष्यति जगच्छ्रेष्ठं पुण्येभ्यः[२५८] पुण्यवत्तमम्[२५९] ॥१६३॥
समन्ताद् योजनं चैवं रुद्रक्षेत्रं सनातनम् ।
मृतोत्र गणपो देव बल्लभस्ते[२६०] भविष्यति ॥१६४॥

---

२४८ स्वयमन्यं ददौ देवो - ख. । २४९ देवानवस्थितात्मानो - घ. । २५० तेजसा - क. ।
२५१ आत्मन... - घ. । २५२ तेषां स - घ. । २५३ दृष्ट्वा - क. घ. । २५४ ...मां - घ. ।
२५५ ... न्यद्य - क. । २५६ विदर्शितम् - घ. । २५७ स्मृतम् - घ. । २५८ स्थानेभ्यः - क. ।
२५९ पुण्यकृत्तमम् - क. ख., पुण्यमुत्तममं - घ. । २६० समून्ते - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यश्चेदं[२६१] कीर्तयेन्नित्यं कल्य उत्थाय[२६२] यज्ञहन् ।
श्रावयेच्चापि विप्रेभ्यः[२६३] सर्वपापैः प्रमुच्यते ॥१६५॥
भद्रकर्णह्रदे चास्मिन् स्नात्वा योऽभ्यर्चयेद्धरम्[२६४] ।
साधयित्वा चरुं चैव भोजयेद् ब्राह्मणान् शुचिः[२६५] ॥१६६॥
स सर्वपापनिर्मुक्तो[२६६] यत्र तत्र मृतो नरः ।
मोदतेऽप्सरसां मध्ये दिवि देव इवापरः[२६७] ॥१६७॥
यत्र चोक्तं त्वया देव स्थितेन[२६८] भगवन् प्रभो ।
हरभद्रेति पुण्योयं त्वत्प्रसादाद् भवत्वज ॥१६८॥
अश्वमेधस्य यत्पुण्यं[२६९] सम्यगिष्टस्य यज्ञहन्[२७०] ।
तदत्र देव भवतु नरस्याभ्यर्चतः सदा[२७१] ॥१६९॥
परित्यक्ष्यति[२७२] यश्चात्र कश्चित् प्राणान् नरोत्तमः ।
हरिभद्रस्य स गणो भविष्यति महाबलः ॥१७०॥

सनत्कुमार उवाच

एवमस्त्विति स प्रोच्य मन्दरं चारुकन्दरम् ।
जगाम भगवान् शर्वः सोमो गणशतैर्वृतः ॥१७१॥
देवापि राज्ञा[२७३] सहितास्तस्मिँस्थाने यथासुखम् ।
तस्थुर्ब्रह्मा च विष्णुश्च जग्मतुर्देवपृष्ठतः ॥१७२॥
स गत्वा स्तोकमध्वानमुभाभ्यां सहितः प्रभुः ।
नातिदूरे ततः प्राह तिष्ठ विष्णो महाबल ॥१७३॥
स प्रणम्य ततः पादौ हरस्य पुरुषोत्तमः ।
तस्थावाम्रं समालम्ब्य[२७४] स कुब्जस्समपद्यत ॥१७४॥
यस्मादाम्रं समालम्ब्य तस्मिन् देशे स्थितो हरिः ।
निरीक्षमाणो देवेशं देशस्तस्मादभूदसौ ॥१७५॥

२६१...श्चेमं - क. ख. घ. ।' २६२...मुत्थाय - क । २६३ उपोष्य मानवः सम्यक् - ख., स्वयं वा मानवः सम्यक् - घ. । २६४ हरमर्चते - ख. । २६५ ब्राह्मणं शुभं ख., ...णं - घ. । २६६ सर्वपापविनिर्मुक्तो - ख. घ. । २६७ इवामरः - क. घ. । २६८ तिष्ठता - घ. । २६९ यज्ञस्य - क. । २७० यत्फलं - ख. । २७१ ...चर्य सर्वदा - क, नः सद्वा - ख. । २७२ त्यजति - घ. । २७३ यज्ञ... - घ. । २७४ समालक्ष्य - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कुब्जाम्रक इति ख्यातो विष्णोः क्षेत्रं समृद्धिमत् ।
पुण्यं निवर्तनाद्विष्णो[२७५]र्गोसहस्रफलप्रदम् ॥१७६॥
नातिदूरं ततो[२७६] गत्वा भूयो देवः पितामहम् ।
निवर्त्त्यब्रवीद्[२७७] व्यास गगनञ्च समाविशत् ॥१७७॥
तस्मिन् वियद्गते देवे ब्रह्मा प्राञ्जलिरुन्मुखः ।
प्रदक्षिणं समावृत्य प्रणम्य प्रययौ ततः ॥१७८॥
यस्मात्तत्र हरं तेन कुर्वता वै प्रदक्षिणम् ।
आवर्त्तः[२७८] स्वशरीरस्य प्रकृतः[२७९] पुण्यकर्मणा ॥१७९॥
तस्मात् स देशो विख्यातो ब्रह्मावर्त्तेति शोभनः ।
अश्वमेधफलं तत्र स्नातः प्राप्नोति मानवः ॥१८०॥
साधयित्वा चरुं चात्र भोजयित्वा तथा द्विजान् ।
प्राणान् परित्यज्य ततो[२८०] ब्रह्मलोकमवाप्नुयात् ॥१८१॥
ततोऽभ्येत्य सुरैस्सार्धं ब्रह्मा विष्णुपुरस्सरैः[२८१] ।
भद्रेश्वरे पशुपतेर्महिमानमथाकरोत् ॥१८२॥
स लिङ्गं तत्र संस्थाप्य पूजां कृत्वातिभास्वराम् ।
भद्रकर्णह्रदे स्नात्वा सह देवैर्दिवं ययौ ॥१८३॥
तं प्रयान्तं[२८२] तदा दक्षो ब्रह्माणमिदमूचिवान् ।
कर्त्तव्यं किं मया देव मम तद् ब्रूहि पृच्छतः ॥१८४॥

पितामह उवाच

प्रसादय महेष्वासं[२८३] शर्वमुग्रं कपर्दिनम् ।
ततो यज्ञसमाप्तिं च लोकांश्च प्राप्स्यसेक्षयान्[२८४] ॥१८५॥

सनत्कुमार उवाच

स एवमुक्तो देवेन ब्रह्मणा व्यास तत्त्वतः ।
लिंगं कनखले कृत्वा रुद्रमभ्यर्चयत् तदा ॥१८६॥

---

२७५ निवर्तनान्यष्टौ - क. । २७६ नातिदूरे ततो - ख. । २७७ निवर्तस्वाब्रवीद् - घ. । २७८ आवृत्य - ख., आवर्त्तातां - घ. । २७९ प्रकृतेः - घ., प्रकृतिः - ख. । २८० परित्यजेद्यस्तु - घ., तथा - क. । २८१ ...स्सुरेश्वरः - घ. । २८२ प्रयातं - क. घ. । २८३ महेशानं - ख. । २८४ ...श्चावाप्स्यसेव्ययान् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तस्य संवत्सरशते पूर्णे दिव्ये प्रजापतेः ।
महादेवोद्रिजां प्राह प्रहसन् गिरिमूर्धनि ॥१८७॥
प्राचेतसात्मजो देवि स्थितस्तपसि संयतः ।
पश्यैनं मद्गतेनेशे चेतसा समवस्थितम् ॥१८८॥
ततो दृष्ट्वा महादेवी वायुभक्षमवस्थितम्[२८५] ।
लिङ्गे परमथा भक्त्या पूजयन्तं महेश्वरम् ॥१८९॥
उवाच हृषिता देवी देवं सर्वसुरार्चितम् ।
कृताञ्जलिपुटा व्यास[२८६] सर्वदेवपतिं पतिम् ॥१९०॥

देव्युवाच

क्षुद्रोयं[२८७] दुष्टचेताश्च स्तब्धो मानी[२८८] च दुर्मतिः ।
दिष्ट्या त्वया[२८९] विनिकृत[२९०]स्त्वामेव शरणं गतः ॥१९१॥
तदस्य[२९१] दुष्टभावस्य[२९२] प्रपन्नस्य[२९३] महेश्वर ।
क्षन्तुमर्हसि भक्तस्य त्वामस्यार्थे प्रसादये[२९४] ॥१९२॥

देवदेव उवाच

त्वमेव देवि यच्छास्मै वरानिष्टान् यथासुखम् ।
अनुज्ञाता मया सुभ्रु त्वमेवास्य वरं दिश ॥१९३॥

सनत्कुमार उवाच

ततस्तौ देवदेवेशौ सङ्गतौ स्वगणैर्वृतौ ।
ऊचतुः पश्य दक्षावां तुष्टौ दिव्येन चक्षुषा ॥१९४॥
प्राचेतस महाभाग वरदौ स्वो[२९५] महातपः ।
- - - - - - - - - - - - - - - - - - - ॥१९५॥
शापशान्त्यर्थमेत्[२९६] ते वरं दद्मि तवेप्सितम् ।
यस्ते यज्ञो गणैर्ध्वस्तः फलं तस्य त्वमाप्नुहि ॥१९६॥

---

२८५ समास्थितम् - ख. । २८६ देवी - ख. । २८७ क्षत्रोयं - घ. । २८८ मौनी - घ. । २८९ चायं - घ. । २९० विनिहित - घ. । २९१ तत्तस्य - घ. । २९२ त्वं स्वभावस्य - घ. । २९३ प्रसन्नस्य - ख. । २९४ शरणं देहि देवेश नान्यव्रतरतस्य च - घ. । २९५ वरदो -ख., वरदोस्मि - क. । २९६ तपः शान्त्यर्थमेतत् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कामरूपधरः श्रीमान् गणेशश्च भवस्व मे ।
अक्षयश्चामरश्चैव[२९७] दुःखशोकविवर्जितः ।
भविष्यसि महाभाग मम चैव समीपगः ।।१९७।।

देव्युवाच

शृणुष्व[२९८] भूयः किं चान्यत् प्रयच्छतु महेश्वरः ।
सुदुष्करमपि ह्येष वरं दद्यात् त्वयार्थितः[२९९] ।।१९८।।

सनत्कुमार उवाच

एवमुक्तस्तदा दक्षो हिमवत्सुतया तया ।
प्राञ्जलिः प्रणतो[३००] भूत्वा इदमाह महामतिः[३०१] ।।१९९।।

दक्ष उवाच

यो देवस्त्रिभुवनजन्मनाशकर्ता यं मूढा न विदुरनुक्तमेकमेव[३०२] ।
भक्तानामशुभहरं पिनाकपाणिं तं देवं शरणगता वयं सभार्यम् ।।२००।।
योज्ञाना[३०३]दसुरतयातिमानमोहान्नास्माभिस्सह खलु पूजितोद्रिपुत्र्या ।
यश्शापं मम रुषितो ददौ सुरेशस्तं देवं शरणगता वयं सभार्यम् ।।२०१।।
यस्स्रष्टा सुरगणयक्षराक्षसानां[३०४] सिद्धानां दितिसुतदानवेन्द्रनॄणाम् ।
भूतानां पशुमृगपक्षिपत्तगानां तं देवं शरणगता वयं सभार्यम् ।।२०२।।
यः क्रोधान्महदसृजद् गणेश्वरेशं[३०५] सिंहेन्द्रं हरिममितप्रभावरूपम् ।
पत्नीं चाप्यमितगुणप्रभावयुक्तां तं देवं शरणगता वयं सभार्यम् ।।२०३।।
यो देवान्[३०६] सहवरुणान् सवित्तगोपान् सब्रह्मान् सशतमखान्[३०७] सविष्णुवायून् ।
इन्द्राग्न्यान् समुनिमहायुधान् विजिग्ये तं देवं शरणगता वयं सभार्यम् ।।२०४।।
यत्किञ्चित्त्वयि[३०८] कलुषं कृतं च दुष्टं ह्यज्ञानादपि च हि रागदोषमोहात् ।
तत्सर्वं मम[३०९] सह[३१०] भार्ययाद्य शर्वो[३११] विश्वात्मा क्षमतु महानुभावभावात्[३१२] ।।२०५।।

सनत्कुमार उवाच

तत एवं स देवेशं स्तुत्वा सास्राविलेक्षणः ।
प्रसार्य बाहू सर्वेण शरीरेणापतद् भुवि ।।२०६।।

---

२९७ ...श्चाव्ययश्चैव - ख. घ. । २९८ वृणुष्व - ख. । २९९ तवार्थितः - ख., सदाशिवः - घ. । ३०० प्रयतो -घ. । ३०१ महाद्युतिः - क. ख. । ३०२ ...र्व्यक्तमेकमेव - घ. । ३०३ अज्ञाना - क. । ३०४ नागानां - ख. । ३०५ ... श - क. । ३०६ देवानां - ख. । ३०७ सशतक्रतून् - क., सकुलिशपतीन् - ख. । ३०८ ...न्मयि - क. । ३०९ सह क. ख. । ३१० मम - क. ख. । ३११ सर्वो - क. । ३१२ ... युक्तः - ख. टि. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तं प्रपन्नं तदा देवो दक्षं सास्त्राविलेक्षणम् ।
देव्या सह[३१३] महाभाग[३१४] स्वयमुत्थापयद् बली ॥२०७॥
तस्याश्रूण्यपतन्भूमौ बिन्दुभूतानि तत्र वै ।
तानि संहृत्य[३१५] विप्रेन्द्र नदी तु समपद्यत ॥२०८॥
तामुवाच ततो देवो[३१६] नदीं वै पुण्यलक्षणाम् ।
अर्जुनादश्रुबिन्दोस्त्वं[३१७] यस्माद् देवि[३१८] विनिःसृता ॥२०९॥
तस्मात् ख्याता भवित्री त्वमर्जुना नामतः शुभा ।
पर्वपर्व समासाद्य वहिष्यसि[३१९] महायशे[३२०] ॥२१०॥
अश्वमेधफलं चापि त्वयि स्नातो ह्यवाप्स्यति ।
मृतश्च तव तीरेस्मिन् नियमेनेतरेण वा ॥२११॥
न पुनर्जन्म मानुष्ये दुर्गतिञ्चोपलप्स्यते ।
त्रिरात्रोपोषितो यश्च चरुं कृत्वा निवेद्य च ॥२१२॥
ब्राह्मणं भोजयेत् स्नातस्त्वयि सोपि गमिष्यति ।
गवां लोकं महातेजा न च तस्मात् पतिष्यति[३२१] ॥२१३॥

सनत्कुमार उवाच

एवं स सृष्ट्वा सरितं कृत्वा चैवाप्यनुग्रहम् ।
तमाश्वास्य[३२२] सुरेशस्तु[३२३] दक्षं प्राह नृपं तदा ॥२१४॥

देवदेव उवाच

गतं तस्माद् भयं तेस्तु गणेशो मे भव प्रियः ।
ब्रूहि किन्ते पुनस्साधो ददानि[३२४] वरमीप्सितम्[३२५] ॥२१५॥

सनत्कुमार उवाच

अथ दक्षस्तदोवाच प्रणम्य शुभया गिरा ।
भूयो भूयस्समाश्वस्य[३२६] निरीक्ष्य च पुनः पुनः ॥२१६॥

---

३१३ सह देव्या - घ. । ३१४ महाभागं - घ. । ३१५ संप्रति - क. ख. । ३१६ महादेवो - क. घ. ।
३१७ ... च्चाश्रुबिन्दोस्त्वं - ख. । ३१८ देव - क. घ. । ३१९ भविष्यसि - घ. । ३२० महायशाः - घ. ।
३२१ च्यविष्यति - ख. । ३२२ तदाश्वास्य - घ. । ३२३ सुरेशानो - घ. । ३२४ ददाम्मि - घ. ।
३२५ ...मुत्तमम् - ख. । ३२६ भूयः प्रणम्य निःश्वस्य - ख., ... श्वास्य - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दक्ष उवाच

यदि तुष्टोसि मे देव भवत्वेतद् तवाव्यय[327] ।
स्थानं पवित्रं पुण्यं च[328] वर एषोस्तु मे शिव ॥२१७॥

देवदेव उवाच

एते च मुनिकन्ये द्वे तप आस्थाय दुष्करम् ।
कर्णैस्संवत्सरे पूर्ण्णे खलेन च यतोशनम् ॥२१८॥
कृतवत्यौ महाभागे त्वं च दक्ष यतः स्थितः ।
इदं कनखलं तस्मान्मम स्थानं भविष्यति ॥२१९॥
तीर्थञ्चैव महत्पुण्यं गङ्गासागरसन्निभम्[329] ।
नात्र पापा न च शठा नास्तिका न च मानिनः ॥२२०॥
लप्स्यन्ते वै सदा गन्तुं न च वस्तुं कथंचन ।
मृतोत्र न पुनर्जन्म लप्स्यते मम तेजसा ॥२२१॥
अत्राभिगम्य स्नात्वा च चरुं कृत्वा तथैव च ।
सर्वपापविमुक्तात्मा[330] शक्रलोके महीयते ॥२२२॥
ततो गणपतिं तत्र हरिभद्रमयोजयत् ।
कालीश्चास्मै ददौ प्रीत्या[331] भार्यां सर्वगुणोदिताम् ॥२२३॥
वरांश्च विपुलान् दिव्यान् द्वीपश्चापि घृतोदकम् ।
बाहुजेभ्यश्च सुबहून् गणेभ्यः प्रददौ वरान् ॥२२४॥

सनत्कुमार उवाच

एवं स दक्षयज्ञो वै विध्वस्तो व्यास शम्भुना ।
यज्ञस्य च शिरश्छिन्नं यथैतत् कथितं तव ॥२२५॥

व्यास उवाच

सा देवीमुखजा घोरा दिव्या[332] देव भयंकरी ।
क्व वा गता कथं वापि ह्येतदिच्छामि वेदितुम् ॥२२६॥

---

३२७ तदाव्ययम् - घ. । ३२८ पुण्यं पवित्रं च - क. घ. । ३२९ संमितं - ख. । ३३० ...विनिर्मुक्तः - ख. । ३३१ प्रीतो (त्यै) - ख । ३३२ दिव्या घोरा - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

स्तुता यदा[३३३] भगवती प्रणतै[३३४]स्सुरसत्तमैः ।
तदास्य साम्बिका प्राह ब्रूहि किङ्करवाण्यहम् ॥२२७॥
ततो ब्रह्मा महादेवीं प्रणम्य बहुमानतः ।
उवाच दुहितृत्वे मे[३३५] भवत्वेषा सुरेश्वरि ॥२२८॥

सनत्कुमार उवाच

एवमस्त्वित्युमा प्रोच्य[३३६] तां देवीं प्रददौ सुताम् ।
मृत्युस्त्वमिति[३३७] सोप्युक्त्वा[३३८] घोरे कर्मण्ययोजयत् ॥२२९॥
सर्वप्राणभृतां[३३९] देवीं[३४०] प्राणापहरणे शुभाम्[३४१] ।
सापि तत्कार्यकरणे नियुक्ता ब्रह्मणा स्वयम् ।
ऊर्ध्वबाहुः[३४२] सदेवेशा[३४३] सदोद्युक्ता[३४४] त्वया मया ॥२३०॥
य इदं[३४५] दक्षयज्ञस्य विध्वंसनमनुत्तमम् ।
भद्रेश्वरप्रतिष्ठाञ्च दक्षानुग्रहमेव च ॥२३१॥
पठेद् वा[३४६] शृणुयाद्वापि श्रावयीत द्विजानपि ।
स सर्वपापविर्मुक्तः[३४७] स्वर्गलोके महीयते ॥२३२॥
भगनयननिपातं[३४८] दक्षयज्ञे दवाग्नि[३४९]
मदनपुरहुताशं चन्द्रलेखोज्ज्वलाङ्गम् ।
सुरगुरुमखकालं[३५०] सप्तलोकाधिपालं
शरणमुपगतोहं शङ्करं शर्महेतोः ॥२३३॥

⊙ इति स्कन्दपुराणे दक्षयज्ञप्रमथने द्वात्रिंशोध्यायः ⊙

---

३३३ हि सा - ख. । ३३४ प्रणम्य - ख. । ३३५ मे दुहितृत्वे - ख. । ३३६ ...ति प्रोवाच्य - क. ख. । ३३७...स्त्वमसि - ख. । ३३८ साप्युक्त्वा - क. ख. । ३३९ प्राणभृता - घ. । ३४० देवी - घ. । ३४१ शुभा - घ. । ३४२ उद्ववाह - क., उद्वाहस्तु - ख., उद्वाहः क्रियतां काल त्वयास्या दुहितुर्मम - घ. । ३४३ स देवेशो - ख. । ३४४ सद्योक्ता - ख. । ३४५ इमं - क. । ३४६ पठेत - क. । ३४७ सर्वपापविनिर्मुक्तः - ख. । ३४८ निपाती - क. । ३४९ दक्षयज्ञान्तकर्ता - ख. । ३५० मुखकालं - क., सुखकालं - ख. । आदितः प्रभृति सर्वैकत्वेन श्लोकसंख्या १५०४ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

यथा तु वृषभो देवमवहन्मुनिपुङ्गव ।
तत्तोहं[१] संप्रवक्ष्यामि नमस्कृत्य[२] वृषध्वजम् ॥१॥
पूर्वमेव महासत्वो धर्मो[३] यज्ञ[४]सहायवान् ।
ततापं विपुलं न्यासतपः परमदुश्चरम् ॥२॥
हिमवन्तं गिरिं प्राप्य वाय्वाहारौ बभूवतुः ।
वर्षाणान्तु सहस्राणि दश द्वादश चैव तौ[५] ॥३॥
मानुषाणि ततो भूयः शाकाहारौ बभूवतुः ।
ततोचिरात्[६] तयोर्देवो[७] गणैस्सह महाद्युतिः ॥४॥
सर्वैस्समानरूपैस्तैर्दर्शनं प्रददौ हरः ।
तांस्तौ महेश्वरान् दृष्ट्वा बहून् वै सदृशप्रभान् ॥५॥
परस्परममन्येतां कोन्वेषामीश्वरो भवेत् ।
तौ तदा वीक्ष्य संमन्त्र्य स्मृत्वा चैव पुनः पुनः ॥६॥
मध्ये महेश्वरं तेषां मेनाते तेजसां निधिम् ।
तौ तं मध्ये भवं[८] देवं प्रणम्य बहुमानतः ।
शिरसोरञ्जली[९] कृत्वा तुष्टुवाते[१०]मितौजसौ ॥७॥

धर्मयज्ञौ ऊचतुः

नमस्त्रैलोक्यनाथाय दिग्वासायामृतात्मने ।
चतुष्पथनिवासाय चतुष्पथरताय च[११] ॥८॥
चतुर्व्यूहाय देवाय त्रिनेत्राय[१२] भवाय[१३] च ।
चतुर्मुखाय शुद्धाय जालान्तर[१४]विचारिणे[१५] ॥९॥
इन्द्रानुग्रहकर्त्रे च[१६] ब्रह्मानुग्रहकारिणे ।
ऊर्ध्वलिङ्गाय देवाय[१७] मदनायामदाय च[१८] ॥१०॥

---

१ ततोहं - ख. । २ ... त्वा - क. ख. । ३ धीमान् - घ. । ४ यज्ञः - क., यज्ञसखा - घ. । ५ हि - क. घ., तु - ख. । ६ ततश्चि... - क., ततश्च भगवान् - घ. । ७ देवौ - क. । ८ भगवान् - ख. । ९ ...लिं - ख. । १० तुष्टा .. - ख. । ११ ...रथाय - घ. । १२ त्रिनेत्रिणे - क. । १३ तताय - क. । १४ जलान्तर - क. ख. । १५ शरीरिणे - ख. । १६ चन्द्रानुग्राहकर्त्रे च - घ. । १७ देवदेवाय - घ. । १८ मदनाय मदाय - क., चैव हि - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नमो हिरण्यवर्णाय सूर्याक्षाय तथैव च ।
नमः पवित्रकेशाय दीर्घजिह्वाय चैव हि ॥११॥
नमस्ते नैकपादाय एकाक्षाय नमो नमः ।
नमःसहस्रघण्टाय सहस्राक्षाय वै नमः ॥१२॥
नमः पिनाकिने चैव ध्वजिने च नमो नमः ।
नमः सहस्रशीर्षाय संवर्त्ताय नमो नमः ॥१३॥
नमः स्तव्याय वै नित्यं शत्रुघ्नाय नमो नमः ।
नमो भवाय भव्याय भावनाय नमो नमः ॥१४॥
नमो वराय वै नित्यं वरदाय तथैव च ।
गोकर्णाय नमो नित्यमैश्वर्यपतये नमः ॥१५॥
नमोस्तु विष्वक्सेनाय प्रभासाय नमो नमः[१९] ।
नमोस्तु तेन्नदायैव[२०] प्राणदाय[२१] नमोस्तु ते ॥१६॥
नमः प्रवर्तकायैव[२२] पद्ममालाय वै नमः ।
नमो महारथायैव[२३] भैरवाय नमो नमः ॥१७॥
नमश्चतुर्मुखायैव महादेवाय वै नमः ।
नमोस्तु ब्रह्मणे चैव ध्रुवायैव चलाय च ॥१८॥
नमोस्तु नारीरूपाय सुभगाय नमो नमः ।
मध्यमाय[२४] नमस्तेस्तु नमस्ते सर्वतस्तथा ॥१९॥
नमोनुमन्ता[२५] मन्ता त्वं सर्वभूतप्रवर्तक[२६] ।
आवयोरीप्सितान्[२७] कामान् विधत्स्व भुवनेश्वर ॥२०॥

सनत्कुमार उवाच

योनेन स्तौति वै नित्यं नियमेन समन्वितः ।
सर्वकामै[२८]स्स[२९] सम्पन्नो यथेष्टां गतिमाप्नुयात् ॥२१॥

---

१९ नमस्तथा - क. । २० नदायैव - ख, ...न्नदायै - च क. । २१ प्रणदाय - ख. । २२ प्रमर्तकायेव - ख. ।
२३ महारवायैव - ख. । २४ पध्यमाय - क. । २५ नमोस्तुमन्ता - ख. । २६ प्रवर्तकम् - क., प्रवर्तकः - ख. ।
२७ ...रीप्सितं - क. ख. । इतः परं - "सर्वलोकपतिः श्रेष्ठ ददासि भक्तये सदा" इति पाठोधिकः ... ख. पुस्तके ।
२८ सर्वैःकामैः - ख. । २९...श्च - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

अथ देवस्तु तान् सर्वाननयत्प्रकृतिं गणान् ।
नन्दिनं चैव देवीञ्च स्वयं चात्मानमप्युत[३०] ।
उवाच चैतौ तुष्टोस्मि गृह्यतामीप्सितो[३१] वर:[३२] ॥२२॥

देवौ ऊचतुः

यदि तुष्टोसि देवेश यदि देयो वरश्च नौ[३३]
जात्यन्तरगतौ नित्यं वहेव[३४] त्वां सुरेश्वर ॥२३॥
इदञ्च गुह्यं स्थानं नौ[३५] तपसातीव भावितम् ।
तव चैव प्रसादेन भवेत् पुण्यं सुरेश्वर ॥२४॥

देवदेव उवाच

इदं मम परं[३६] गुह्यं भवितृ स्थानमुत्तमम् ।
पञ्चेषुक्षेपमात्रं वै मृतोत्र गणपो भवेत् ॥२५॥
यस्मान्मध्ये भवोस्मीति युवयोरर्चितः स्थितः ।
तस्मान्नाम्ना तु विख्यातमिदं भवतु मध्यमम् ॥२६॥
युवां जात्यन्तरं प्राप्य पूजितौ बलवत्तरौ ।
वाहनत्वं समासाद्य[३७] लोकान् सन्धारयिष्यथ:[३८] ॥२७॥

सनत्कुमार उवाच

तत एवं तदा देवस्तावुक्त्वा देवसत्तमौ ।
जगाम गणपैस्सार्धं मन्दरं हेमकन्दरम्[३९] ॥२८॥
गतेथ देवे सगणे कालेन बहुना ततः ।
मन्वन्तरेस्मिन्[४०] सुरभी रुद्रमाराधयच्छुभा ॥२९॥
तया वर्षसहस्रेण तपसा तोषितो भवः ।
जगाम दर्शनं व्यास वरदोस्मीति चाब्रवीत्[४१] ॥३०॥

---

३० ...मच्युत - क., मच्युतः - ख. । ३१ ... तं - क. । ३२ वरम् - क. । ३३ नः - ख. ।
३४ वहेयं - क., वहेम - ख. । ३५ ते - ख. । ३६ वै परमं - घ. । ३७ समासाद्य - क. घ. ।
३८ वै विचरिष्यथः - घ. । ३९ देवकन्दरम् - घ. । ४० मन्वन्तरेण - घ. । ४१ ,..त्यथाब्रवीत् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सा वव्रे पुत्रमतुलं सर्वप्राणभृतां वरम् ।
पुत्रांश्चान्यान्महासत्वान् यज्ञियान्[४२] सुरसत्तमान् ॥३१॥
तथा[४३] दुहितॄ[४४]श्चान्याश्च जगद्धात्रीः[४५] सुशोभनाः ।
ततः सर्वं ददौ देवो[४६] ह्यदृश्यत्वं जगाम च ॥३२॥
तस्मिन् गते महादेवे सुरभी दीप्ततेजसम् ।
सर्वभूताग्रजं पुत्रं[४७] वृषभं समसूयत ॥३३॥
एकादश तथा रुद्रान् वृषभस्यानुजान् शुभान्[४८] ।
सप्त कन्याश्च ता गा[४९] वै[५०] जगद्धात्री[५१] प्रसूयत ॥३४॥
वृषभः स तु संगत्य[५२] नित्यं प्रातः[५३] कृताह्निकः ।
पितरं मातरं चैव तथैव च पितामहम्[५४] ॥३५॥
अभिवाद्यायते[५५] शुभ्रश्चतुर्दिग्गजसेवितम्[५६] ।
वनं सिद्धगणावासं[५७] यत्र सा ह्यमृतोद्भवा ॥३६॥
दूर्वामृतरसा[५८] दिव्या छिन्न[५९]दग्धप्ररोहणी[६०] ।
स कदाचिद्वने तस्मिँश्चरन् तृप्तस्तृर्डर्दितः[६१] ॥३७॥
जगाम सागरं पातुं वृषराट् सुरभीसुतः ।
सोवगाह्य महा[६२]ग्रासः सागरस्य तदा महत् ॥३८॥
मध्यं व्यादाय वदनं सझषं सतिमिंगिलम् ।
अपिबत् सागरजलं न च तृप्तिमुपागमत् ॥३९॥
तस्मिन् पिबति[६३] दैत्येन्द्राः सन्नद्धाः[६४] सासिमार्गणाः[६५] ।
सधनुष्पाणयस्सर्वे[६६] सहस्राणि चतुर्दश ॥४०॥
निष्पेतुश्शक्रसंकाशा यम[६७]कालानलोपमाः ।
मयपुत्रा[६८] महासत्वा वृषभं प्रति वेगिताः ॥४१॥

---

४२ याज्ञियान् - क. ख., याज्ञिकान् - क. टि., श्रेष्ठांश्च - घ. । ४३ तदा - क. । ४४ दुहितर - क. ख. घ. । ४५ जगद्धात्र्यः - क. ख. घ. । ४६ तत्सर्वप्रदो - घ. । ४७ पुण्यं - घ. । ४८ एकादशैते रुद्राणां व्यास तस्यां प्रजां शुभाम् - ख., रुद्रानेकादशान्यां - घ । ४९ सुभगा - घ. । ५० ... वो - क. ख. । ५१ ... त्र्यः - क. ख. । ५२ संगम्य - घ. । ५३ प्रातर्नित्यं - घ. । ५४ ...महान् - क । ५५ अभिगम्य - घ., ...द्य ययौ - क. ख., ययौ - घ. । ५६ शुभ्रश्चतुर्दिग्गजसेवितम् - घ. । ५७ ... कीर्णं - ख. । ५८ पूर्वामृतरसा - क. । ५९ भिन्न... - घ. । ६० प्ररौहिणी - क. ख. घ. । ६१ चरन्तं तृषयार्दितः - ख. । ६२ महद् - ख. । ६३ पीयति - क. ख. । ६४ सुसन्नद्धाः - घ. । ६५ सिद्धिमार्गणाः - घ. । ६६ ...सागरस्था- महासत्वाः - घ. । ६७ महा - घ. । ६८ यमपुत्राः - क. ख. घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ताँस्तथा रुषितान्दैत्यान् सासिमुद्गरतोमरान्[६९] ।
सहैव सागराम्भोभिरपिबत् स महाबलः ॥४२॥
तान् पीतान्[७०] पीयमानाँश्च दृष्ट्वा ह्यर्णववासिनः[७१] ।
वित्रेसुः सहसा सर्वे विनेदुश्चापि दुःखिताः ॥४३॥
ततस्समुद्रो भगवान् पीयमानः सुदुःखितः ।
वडवामुखमागत्य[७२] संवर्तं शरणं ययौ ॥४४॥
स चानलः सुसंरब्धो दत्त्वा तस्य[७३] महाबलः ।
अभयं वृषमागत्य प्रोवाचेदं कृताञ्जलिः ॥४५॥

संवर्त्त उवाच

सर्वभूतशरण्योयं दैत्यानाञ्चालयः शुभः ।
नैनं हीनं भवानद्भिः कर्तुमर्हति वीर्यवान् ॥४६॥

वृषभ उवाच

न मे मतिरभूदग्ने निःशेषं कर्तुमम्बुधिम् ।
भवान् त्वस्य[७४] यतो मन्ता[७५] करिष्येहं ततोह्यवै ॥४७॥
यस्ते दर्पश्च गर्वश्च यद्बलं यच्च पौरुषम् ।
तन्मे दर्शय हव्येश पिबास्येनं तवाग्रतः ॥४८॥

सनत्कुमार उवाच

एवमुक्त्वा वृषेन्द्रस्तु वडवामुखवासिनम् ।
संरम्भात्[७६] सागरं पातुं निःशेषमुपचक्रमे ॥४९॥

अनल उवाच

न मे त्वं प्रतिमः शक्तौ[७७] न च वैरं त्वया हि मे[७८] ।
यत्र[७९] कृत्येहमाबद्ध[८०]स्तत्करिष्ये तथा ह्यहम् ॥५०॥
न त्वं पास्यसि[८१] रक्षिष्ये सागरं मम सन्निधौ ।
अहं त्वां वारयिष्यामि सुरभीसुत कत्थन ॥५१॥

---

६९ ...वानरान् - घ. । ७० सर्वान् - ख. । ७१ ...नाम् - क. । ७२ ... मासाद्य - ख. । ७३ तस्मै - क. ख. । ७४ तस्य - क., ...श्चास्य - घ. । ७५ सक्ता - ख. । ७६ संरब्धः - क. ख. । ७७ शक्त - क., शक्र - ख. घ. । ७८ विचते हि ममाद्यवै - ख. । ७९ यत्तु - ख. । ८० कृत्यं समारब्ध - क., कर्तुं समारब्धो - ख. । ८१ नहि यास्यसि - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

ततस्तं भगवान् वह्निरुपप्लुत्य[८२] महाद्युतिः ।
गले जग्राह बलवान् न चचाल[८३] ततः स च ॥५२॥
यत् पीतं छर्दयामास तत्तोयं दानवैर्विना ।
औदरेणाग्निना तस्य[८४] ते दग्धाः[८५] सर्व एव हि ॥५३॥

सनत्कुमार उवाच

ततः संवर्तको वह्निर्निगृहीतं ककुद्मिनम् ।
विसृज्योवाच गच्छेति न त्वां[८६] हन्मि वृषेश्वर[८७] ॥५४॥
शक्तस्तवाहं दहने ह्यशक्तो मे भवान् वधे ।
तथाप्यहं[८८] न गर्जामि गर्जितैः किं बलीयसाम्[८९] ॥५५॥

सनत्कुमार उवाच

विसृज्य वृषभं वह्निराशु यातः स्वमालयम् ।
वृषभोपि जगामैव[९०] दुःखशोकाभिसंवृतः[९१] ॥५६॥
सोवमानेन[९२] तेजस्वी महोक्षः[९३] सुरभीसुतः ।
दुःखेन चाभिसन्नात्मा[९४] जगामैवं विचिन्तयन् ॥५७॥
अबलोहं बली वह्निर्येनाहं निकृतस्तथा[९५] ।
जीवितेशेन (?)[९६] भूत्वा च नाहं प्राणैर्वियोजितः[९७] ॥५८॥
मोघं मम बलं सर्वं तथा चैवाभिगर्जितम्[९८] ।
शरज्जलधरस्येव[९९] विहीनस्याद्भिरम्बरे ॥५९॥
अद्य प्राणानहं त्यक्ष्ये नियतो[१००] व्रतमास्थितः ।
यथा न पुनरेवं मे मानभङ्गो भविष्यति ॥६०॥
शत्रुणा[१०१] निगृहीतस्य दुर्बलस्य दुरात्मनः[१०२] ।
जीवितान्मरणं मन्ये विशिष्टं जीवितेन किम् ॥६१॥

---

८२ ...रुपसृत्य - क. ख. । ८३ नोच्चचाल - घ. । ८४ दग्धा - ख. । ८५ तस्य ते - ख. । ८६ ते - क. । ८७ वृषेश्वरः - ख., ...रं - क. । ८८ ह्यहं - क. । ८९ बलीयसा - क. । ९० जगादैव - घ. । ९१ जगामैवन्दुःखशोकाभिसंवृतः - क. । ९२ शोचमानेन - घ. । ९३ महोक्षा - क. ख. । ९४ च विषण्णात्मा - क. । ९५ येनास्मि विकृतस्तथा - क. । ९६ शेव(?)। ९७...तं - क. । ९८...तिगर्जितम् - ख. । ९९...स्यैव- क. ख. । १०० नियतं - ख., ...मं - घ. । १०१ शत्रूणां - क., शत्रुभिर्निगृहीतस्य - ख. । १०२ दुर्बलो बलवत्तरैः - ख., महात्मनः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

स एवं चिन्तयन्नुक्षा वाचं शुश्राव खाच्छुभाम्[१०३] ।
सौरभेय न भेतव्यं यद् ब्रवीमि कुरुष्व तत् ॥६२॥
रुद्रं सर्वसुरेशानं सर्वेभ्यो बलवत्तरम् ।
तं प्रपद्यस्व देवेशं ततो जेष्यसि पावकम् ॥६३॥
स स्रष्टा सर्वभूतानां ब्रह्मादीनां न संशयः ।
स ते दुःखमिदं सर्वं व्यपनेष्यति भो वृष[१०४] ॥६४॥

सनत्कुमार उवाच

एतच्छ्रुत्वा महातेजाः साध्यस्य[१०५] सुमहात्मनः ।
हिमवन्तं गिरिं प्राप्य ततापं विपुलं तपः ॥६५॥
तस्य वर्षसहस्रेण तत्परस्य तदाशिषः[१०६] ।
भगवान् सर्वभूतेशः साम्बः सगण ऊचिवान् ॥६६॥

देवदेव उवाच

सौरभेय महाभाग तुष्टोस्मि तव पुत्रक ।
इष्टान्[१०७] ब्रूहि वरान्[१०८] वत्स दास्ये तान् सुबहूनपि[१०९] ॥६७॥

सनत्कुमार उवाच

ततस्स देवं संदृश्य साम्बं सगणमीश्वरम् ।
प्रणम्य शिरसा पादौ प्राञ्जलिस्सुसमाहितः ॥६८॥
भूयो भूयो निरीक्ष्यैनं प्रणम्य च पुनः पुनः ।
उवाच तपसोक्षय्यमिच्छेयं वै जगत्पते ॥६९॥
बलञ्चानुत्तमं देव योगैश्वर्यन्तथाक्षयम् ।
त्वदीयो वाहनश्चाहमग्निनैवं विमानितः ॥७०॥
संवर्त्तकानलञ्चैव वडवामुखवासिनम् ।
द्रष्टुमिच्छामि देवेश निगृहीतं त्वयाव्यय[११०] ॥७१॥

---

१०३ एतस्मिन्नन्तरे प्राह साध्याः सुमधुरं वचः - घ., यच्छुभं वचः - क. ख. । १०४ गोवृष - ख. । १०५ सोध्यस्य - ख. । १०६ शिवः - ख. । १०७ इष्टं - घ. । १०८ वरं - घ. । १०९... हं चानुकूलवः - घ., सुवहून्यपि - ख. । ११० ...व्ययम् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

एवमुक्तस्तु तान्दत्त्वा वरान् सत्यवतीसुत ।
वामं पार्श्वं[111] तथा मृज्य रुद्रमेकं ससर्जह ॥७२॥
किरीटमालिनं त्र्यक्षं कुण्डलाङ्गदभूषणम्[112] ।
महोरस्कं कवचिनं धनुर्हस्तं महाबलम् ।
बद्धगोधाङ्गुलित्रं च खड्गदिव्यास्त्रधारिणम् ॥७३॥
तमाह रुद्रं[113] गच्छेति वडवामुखवासिनम् ।
संवर्त्तकानलं बद्ध्वा विस्फुरन्तमिहानय ॥७४॥

सनत्कुमार उवाच

वन्दित्वा चरणौ तस्य सोमस्य गणनायकः ।
जगाम सागरं वेगाद् ददर्श च हुताशनम् ॥७५॥
स युद्धं बलवत्[114] कृत्वा सुघोरं लोमहर्षणम् ।
संवर्त्तकानलं बद्ध्वा देवपार्श्वं[115]मुपानयत्[116] ॥७६॥

व्यास उवाच

कीदृक् तद्युद्धमभवत्[117] विट्पतेः पावकस्य च ।
एतदिच्छामि विज्ञातुं वद त्वं वदतां वर ॥७७॥

सनत्कुमार उवाच

स गत्वा गणपः क्रुद्धः संवर्त्तकमथानलम् ।
उवाच क्रोधरक्ताक्षस्तदा वचनमर्थवत् ॥७८॥

गणप उवाच

स्वामी सर्वस्य जगतो देवश्चन्द्रार्धभूषणः ।
आज्ञापयति वह्ने त्वां[118] वृषमेनं[119]प्रसादय[120] ॥७९॥
प्रणातोस्मीति तं ब्रूहि वृषभं ससुहृज्जनः ।
निदेशे तिष्ठ चैवास्य यत् कर्तव्यं च तत्कुरु ॥८०॥

---

१११ वामपार्श्वं - ख. । ११२ ...भूषितं - ख. । ११३ रुद्रो - घ. ख. (द्र?)। ११४ बलवान् - घ., महतः - ख., सुमहत् (?) । ११५ पार्श्वं देवस्य - ख. । ११६ तत्क्षणात् - ख., ...मिवानयत् - क., ... मथानयत् (?) । ११७ कीदृग युद्धं समभवत् - घ. । ११८ त्वं - क. ख. । ११९ ...मेवं - क. । १२० प्रसाधय - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

एवमुक्तोनलः श्रुत्वा देवदेवस्य तद्वचः ।
उवाच नातिसंहृष्टस्त्विदं वचनमर्थवत् ॥८१॥

अनल उवाच

नियोज्यो देवदेवस्य तस्यैवाहं सदानुगः[१२१] ।
न च मां स नियुक्त्वेह योक्ष्यतेऽन्यत्र कर्हिचित् ॥८२॥
गच्छ मद्वचनाद् ब्रूहि भगवन्तं त्रिलोचनम्[१२२] ।
यदि मां वक्ष्यति[१२३] पुनः करिष्येहं ततस्तथा[१२४] ॥८३॥

गणेश्वर उवाच

बालिशा वत ये प्राज्ञा बलज्ञानबहिष्कृताः ।
त एवमुक्ता[१२५] गच्छन्ति यथा मां त्वं प्रभाषसे ॥८४॥
सकृदाज्ञा बलवतां सकृत् प्रभवतामपि ।
दूतश्चापि स वै श्रेष्ठो यो भवेदर्थसाधकः[१२६] ॥८५॥
सोहं बलवता तेन लोककर्त्रा पिनाकिना ।
दूतः सर्वार्थसिद्ध्यर्थं प्रहितो बलवानिह ॥८६॥
न चेद्वचो मे कर्तासि बद्ध्वा त्वाहन्ततोद्य वै ।
विस्फुरन्तं महा[१२७]पाशैर्नेष्यामि धुभृतोन्तिकम्[१२८] ॥८७॥

सनत्कुमार उवाच

स एवमुक्तस्तेजस्वी क्रोधदीप्तानलेक्षणः[१२९] ।
गणपं प्रति दुद्राव तिष्ठतिष्ठेति चाब्रवीत् ॥८८॥
तमापतन्तं वेगेन पर्जन्यास्त्रेण सोस्त्रवित्[१३०] ।
ताडयामास बलवान् स[१३१] प्रजज्वाल वेगवान्[१३२] ॥८९॥

---

१२१ सहानुगः - घ । १२२ तृलोचनम् - क. ख. । १२३ रक्षति - घ. । १२४ शुभं तथा - घ ।
१२५ ...मुक्त्वा - ख. । १२६ भवेदर्ध (न्ध?) साधकः - क. । १२७ मुहुः - ख. । १२८ नेष्ये स्त्वाहं हरान्तिकं - ख., नेष्यमीन्दुभृतोन्तिकम् - घ. । १२९ .. यतेक्षण - ख. । १३० सोबली - क, सोप्रणः - ख. ।
१३१ सः - क. । १३२ वेगशः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ज्वलन्तं[१३३] तं तदाभ्यासमागतं क्रोधमूर्च्छितम् ।
अशन्यस्त्रेण महता स जघान स्तनान्तरे ॥९०॥
अभ्याहतस्ततोऽस्त्रेण वेगवानपि[१३४] मूर्च्छितः ।
तस्थौ मुहूर्त्तं संविग्नो विधूमो दहनेश्वरः[१३५] ॥९१॥
ततस्तं रुद्रपाशेन बबन्ध करयोस्तदा ।
विस्फुरन्तं महावह्निं[१३६] गणपः क्रोधमूर्छितः ॥९२॥
तं बद्धं पाशवर्येण पतितं वीक्ष्य चैव हि ।
तस्य पुत्रसुहृद्वर्गा[१३७] विविधायुधपाणयः ॥९३॥
दुद्रुवुर्गणपं क्रुद्धाः शतशोथ सहस्रशः ।
तानप्यसौ[१३८] विनिर्जित्य गणपस्तं[१३९] हुताशनम् ॥९४॥
उपनिन्ये हरायाशु पशुं मेध्यमिवाध्वरे ।
तमानीतं महादेवः संप्रेक्ष्यार्णवभोजनम् ॥९५॥
उवाच वृषभं ब्रूहि किमस्य[१४०] क्रियतामिति ।
स तं कृपणमालक्ष्य महोक्षा[१४१] दीनचेतसम् ॥९६॥
प्रणम्य शिरसा पादाविदमाह कृताञ्जलिः ।
भगवन् देवदेवेश[१४२] सर्वलोकमहेश्वर[१४३] ॥९७॥
दृष्टमेतत्तव विभो माहात्म्यं सदसस्पते[१४४] ।
दृष्टोयं[१४५] कृपणश्चापि[१४६] ह्यबलश्च[१४७] महाबल[१४८] ॥९८॥
विसृज्यतां सुरश्रेष्ठ हत एष न संशयः ।
पुत्रा ह्यस्य[१४९] हताः सर्वे सुहृदश्चैव सर्वशः ॥९९॥
दीनस्यास्य न मे देव वध इष्टो विमुच्यताम् ।
एतद्वचो महेशो[१५०] वै वृषभस्याभिभाषितम् ॥१००॥

---

१३३ प्रज्वलन्तं तदा - घ. । १३४ तेजवानपि - घ. । १३५ ज्वलनेश्वरः - ख । १३६ महानग्नि - ख. ।
१३७ ...द् भ्राता - घ. । १३८ अनेकशो - घ. । १३९ गणस्तं स - ख. । १४० किमद्य - ख. ।
१४१ महोक्षो - ख. । १४२ देवतारिघ्न - घ. । १४३ ...महेश्वरं - क. ख. । १४४ ते जगत्पते - ख. ।
१४५ दीनोयं - ख. घ । १४६ ...श्चैव - ख. । १४७ ह्यनलश्च - घ. । १४८ महात्मनः - क. ।
१४९ ...स्तस्य - घ. । १५० महेष्वासो - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

श्रुत्वा तुष्टः प्रहस्यैनं दहनं व्यसृजत् तदा[१५१] ।
रुद्रं तञ्च जराशोकजन्ममृत्युविर्जितम् ॥१०१॥
गणेश्वरपतिं कृत्वा द्वीपमस्मै ददत् प्रभुः ।
मनोरमणमित्येव[१५२] नाम्ना ख्यातं महर्द्धिमत् ॥१०२॥
दिव्यं कामगमं व्यास भवनैरुपशोभितम् ।
जाम्बूनदमयैः शुभ्रैः सर्वकामसमन्वितैः ॥१०३॥
तस्मिन् काले तदा देवाः[१५३] सर्वे ब्रह्मपुरस्सराः ।
देवदेवं समागम्य वाक्यमूचुर्यथार्थवत् ॥१०४॥
भगवन् देवतारिघ्न वृषोयं देवसत्तम[१५४] ।
त्वया ह्यध्यासितः[१५५] पूर्वं नादेनापूरयद्बली ॥१०५॥
त्रैलोक्यमखिलं दर्पादस्वस्थं कृतवान् प्रभो ।
वेगेन च दिशः सर्वा विमानैः सह भूतप[१५६] ॥१०६॥
भ्रामयन् त्रिदशान्[१५७] नादाद् गगने[१५८]संचचार ह[१५९] ।
अधुना वरलब्धश्च अस्मान्[१६०] भूयस्तथैव च ॥१०७॥
यथा न कुरुते देव उपायः स[१६१] विधीयताम् ।
त्वन्नो गतिश्च देवेश शरणं चैव भूतप ।
सदा भयाभिभूतानां त्वं त्राता[१६२] सर्वशः[१६३] प्रभो ॥१०८॥

देवदेव उवाच

यथा भयं न भवति यथा स्वस्थाश्च[१६४] नित्यशः ।
लोका भवन्ति सर्वे वै[१६५] तथाहं[१६६] विदधामि वः[१६७] ॥१०९॥

सनत्कुमार उवाच

ततस्स भगवान् व्यास देवदेवो महाद्युतिः ।
असृजद् वरदानाच्च[१६८] गणेशं चारुकुण्डलम् ॥११०॥

---

१५१ तथा - ख. । १५२ मालाचमनमित्येवं - घ., मरणमित्येवं - क. । २५३ व्यास - घ. ।
१५४ देवसत्तमः - ख. । १५५ नासादितः - घ. । १५६ भूतयः - ख. । २५७ द्विवश (ा) - क. ख. ।
२५८ गमने - क. । १५९ यं चचारह - ख. । १६० कृत्स्नान् - घ. । १६१ स - घ. । १६२ रक्षिता - घ., भ्राता - क. । १६३ सर्वतः - घ. । १६४ सुस्थाश्च - घ. । १६५ ...पि - (?) । १६६ हि - क ।
१६७ च - क., तथा करिष्ये वृषभं गच्छ त्वं च यथासुखम् - घ. । १६८ वरंदानेन - घ., ...नश्च - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

आकर्णाद् दारितास्यं च महाकायं[१६९] महाबलम् ।
महापरिघबाहुं च वज्रसंहननं दृढम् ॥१११॥
महादंष्ट्रं महोरस्कं महाखड्गधनुर्धरम् ।
दीप्ताङ्गारकनेत्रं च त्रिनेत्रं कवचोज्ज्वलम्[१७०] ॥११२॥
बिभ्रन्तं चाक्षयेत्यर्थमिषुधी चर्मवाससम्[१७१] ।
शरमेकेन हस्तेन धनुरेकेन बिभ्रतम्[१७२] ॥११३॥
ग्रहनक्षत्रचित्रेण तडित्सूर्यविभासिता[१७३] ।
उत्तरीयेण वियता भास्वन्तं मेरुकूटवत् ॥११४॥
प्रभाकरेति सुव्यक्तमामन्त्र्य भगवानिदम् ।
अब्रवीत्सर्वदेवानां समक्षं तं[१७४] प्रभाकरम् ॥११५॥
प्रभाकर मयाज्ञप्त[१७५]स्त्वं देवानां गुणाकर[१७६] ।
परमैश्वर्यसंयुक्तो वृषवेगं निवारय ।
निवासार्थश्च दिव्यन्तमिन्द्रद्वीपं ददामि ते ॥११६॥
ज्योत्स्ना भवित्री पत्नी ते तथा चैवाजरामरः[१७७] ।
भविष्यसि मयायज्ञप्तो[१७८] महागणपतिर्मम ॥११७॥

सनत्कुमार उवाच

ततस्तं देवतास्सर्वाः प्रणम्य ब्रह्मणा सह ।
जग्मुः स्वानि क्षयानि स्म देवोपि वृषवान् वभौ[१७९] ॥११८॥
मुखतोर्द्धं[१८०] वृषो धर्मो जघनं यज्ञ उच्यते ।
चक्षुषी चन्द्रसूर्यौ च[१८१]ब्रह्मा मूर्धानमाश्रितः ॥११९॥
जिह्वायां तस्य वरुणो वायुरन्तश्चरः स्वयम् ।
पादान् विष्णुर्भगश्चैव[१८२] पूषा शक्रश्च संस्थिताः[१८३] ॥१२०॥
जंघाः शेषास्तथा दित्या ऊरूश्चैव[१८४] समाश्रिताः ।
रुद्राः कर्णौ च नासाश्च ग्रीवोष्ठौ हनुमेव च ॥१२१॥

---

१६९ महाकालं - ख. । १७० वपुस्तस्य च पिङ्गलम् - घ. । १७१ ... श्चर्मवाससम् - क. ख. ।
१७२ चोद्वहन् - क. ख. घ. । १७३ तडित्सूर्यविभासिना - ख., ...त्सूर्यवता तथा - क. । १७४ स समक्षं - ख. ।
१७५ ज्ञात - क. । १७६ गुणाकरः - ख. । १७७ ... जरामरा - ख. । १७८ मयाज्ञाप्तो - क., यथाज्ञप्तं - ख. । १७९ वृषलाञ्छनः - ख. । १८० ... र्द्धं - क. ख. । १८१ तु - ख. ।
१८२ ...र्भवश्चैव - ख. । १८३ ...तौ - क. । १८४ ...श्चैव - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

आयुधानि खुरा[१८५]स्तस्य चक्रवज्रौ[१८६] च भृङ्गयोः ।
अपाने च स्वयं मित्रः पुच्छं दानानि[१८७] सर्वशः ॥१२२॥
अस्थीनि पर्वताः सर्वे पुरीषं श्रीरभूच्छुभा ।
मूत्रं चास्याभवद् दिव्यममृतं व्यास पावनम् ॥१२३॥
रोमाणि ऋषयस्सर्वे नक्षत्राणि च सर्वशः ।
ग्रहास्तस्याभवन् व्यास सन्धयः शुभदर्शनाः ॥१२४॥
इष्टयो वेदयज्ञाश्च मन्त्राः स्तोत्राः फलानि च ।
अभवँस्तस्य मांसानि रुधिरं सरिदर्णवाः ॥१२५॥
सप्तलोकं मुखं ह्यासीत् तस्याप्रतिमतेजसः ।
हस्ता मरीचयश्चैव मज्जा औषध्य एव च[१८८] ॥१२६॥
मन्त्रभूताश्च पशवः सकृत् (?) स्नायुश्च[१८९] वीरुधः ।
बल्ल्योथ वृक्षगुल्माश्च तथैवान्ये[१९०] नगाः शुभाः ॥१२७॥
नागा[१९१]स्तस्याभवन् नाड्यो वसवः शुक्रसंचयः ।
आमपक्वाशयौ तस्य तौ देवावश्विनौ स्मृतौ[१९२] ॥११८॥
मेघास्तस्याभवन् त्वक्च तडिन्माला - - - - ।
- - - - - - यक्षा गन्धर्वाप्सरसस्तथा ॥१२९॥
शिरा धमन्योथ मदो दर्पाश्चैवाभिजज्ञिरे ।
मानुषा मातरश्चैव भूतानि विविधानि च ॥१३०॥
रोमकूपाणि तस्यासन् वृषभस्य महात्मनः[१९३] ।
एवं स भगवान् देवः परमैश्वर्यसंयुतः ।
सौरभेयो महादेवः सर्वदेवमयोभवत्[१९४] ॥१३१॥
य इदं[१९५] सौरभेयस्य जन्म कर्म च तत्त्वतः ।
महात्म्यमखिलं चैव शृणुयाद्वा पठेत वा ॥१३२॥

---

१८५ क्षुरा - ख., क्षुरप्र - घ. । १८६ चक्रवज्रे - ख. घ. । १८७ नद्यश्च - ख., छन्दांसि - घ. ।
१८८ ...मेव च - क. । १८९ स्नानं च - क. घ. । १९० तथा चान्ये - घ. । १९१ गाव - घ. ।
१९२ ...वाश्विनीसुतौ - घ. । १९३ वृपस्य सुमहात्मनः - क. । १९४ महत् - क, । १९५ इमं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नित्यं शुचिरदीनात्मा सर्वपापैः प्रमुच्यते ।
मृतश्च कालेकाले वा रुद्रलोकमवाप्नुयात् ॥१३३॥
नेदं शठाय दातव्यं श्राव्यं वापि कथंचन ।
न नास्तिकाय दुष्टाय तथा वा पापकर्मणे[१९६] ॥१३४॥
इदं पुत्राय शिष्याय धार्मिकाय महात्मने ।
देयं श्राव्यञ्च शुचये गुह्यमेतत् सनातनम् ॥१३५॥
यो लोकवेदप्रभवेन[१९७] तेन सर्वार्थसिद्धेन महाबलेन ।
यात्यम्बुदाम्भोनिधिगर्जितेन स वोस्तु नित्यं सुमना महेशः ॥१३६॥

⊙ इति स्कन्दपुराणे वृषोत्पत्तिमाहात्म्यं नाम त्रयस्त्रिंशोध्यायः ⊙

सनत्कुमार उवाच

एवं स भगवान् व्यास मेघमुत्सृज्य[१] देवपः ।
वृषवाहः समभवद्[२] यथा ते कथितं मया ॥१॥

व्यास उवाच

कथं[३] भगवती देवी कृष्णा गौरत्वमागता ।
कारणं तत्र किं चापि[४] ह्येतदिच्छामि वेदितुम् ॥२॥

सनत्कुमार उवाच

आसीनौ मन्दरप्रस्थे उमाकामाङ्गनाशनौ ।
रेमाते[५] प्रमथैस्सार्धं नानारूपधरैस्तदा ॥३॥
अथ देवेन तत्रस्था क्रीडता सा कथान्तरे ।
कृष्णेत्युक्ता भगवती सा चुकोप मनस्विनी ॥४॥
कुपितां तां महादेवः परिष्वज्य महाद्युतिः[६] ।
उवाचासक्तदव्यग्रः[७] सांत्वयन् मधुरं वचः ॥५॥

---

१९६ पापकर्मिणे - क. । १९७ देवप्रभवेन - क. ।

१ जीमुतवं सृज्य - घ. । २ स भगवान् - क. घ. । ३ केयं - घ. । ४ वापि - घ. । ५ रेमतुः - क., रमतुः - घ. । ६ महामतिः - घ. । ७ ...दव्यग्रं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

देवदेव उवाच

देवि मा क्रोधमनघे कृथा[८] विश्वसृगव्यये ।
हास्यं प्रकृतमेतन्मे कृष्णेति समुदाहृतम् ॥६॥
अद्य प्रभृति नानेन वचसाहं शुभानने ।
वक्ष्यामि त्वां त्यज क्रोधं - - - -[९] - - - - ॥७॥

सनत्कुमार उवाच

तमेवंवदिनं देवं श्रुत्वा गिरिवरात्मजा ।
अगमत् परमां तुष्टिमिदं चोवाच सुस्वरम् ॥८॥

देव्युवाच

त्वं गुरुस्सर्वलोकस्य पूज्यो भर्त्ता ममैव च ।
- ॥९॥
- ।
- ॥१०॥

सनत्कुमार उवाच

इति तेनेष्टवचसा[१०] तुष्टो देव्याः पिनाकधृक् ।
वरेणच्छंदयामास तयैषोभ्यर्थितो वरः ॥११॥

देव्युवाच

यदा यदा वदसि मां कृष्णेति वदतां वर ।
तदा तदा मे हृदयं विदीर्यत इव प्रभो ॥१२॥
- ।
विज्ञापयामि सर्वेश गौरवर्णमनुत्तमम्[११] ॥१३॥
- ।
- ॥१४॥
- ।
जगद्भर्ता सुरेशान आत्मतुल्यपराक्रमः ॥१५॥

---

८ वृथा - क. । ९ तामुवाच पिनाकधृक् - क. । इतः परं पत्रद्वयं खण्डितं क. पुस्तके । १० ते नष्टवचसा - घ. । ११ गौरवं तमनुत्तमम् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अग्रणीः सर्वदेवानां सर्वदैत्यनिषूदनः[१२] ।
- ।।१६।।
यदि तुष्टोसि मे देव यदि देयो वरश्च मे ।
तपश्चरितुमिच्छामि तदनुज्ञातुमर्हसि ।।१७।।

सनत्कुमार उवाच

ततो भवः[१३] प्रहस्यैनामुवाच तपसा हि किम् ।
तपसा कांक्षितं यत्तु तदद्यैव ददामि ते ।।१८।।
इत्युक्ता गिरिजा प्राह तप्ते तपसि पुष्कले ।
त्वमेव दाता भगवन् वरान् मह्यं यथेप्सितान् ।।१९।।
- - - - - - - - - - - - - - - - - - ।
तदा[१४] विज्ञापितेनैवं[१५] सर्वकार्यार्थदर्शिना ।।२०।।
- - - - - - - - - - - - - - - - - - ।
चरणौ च नमस्कृत्य शिवस्यामिततेजसः ।।२१।।
सा क्षणादागता देवी हिमवन्तं नगोत्तमम् ।
ददर्श ऋषिमुख्यानामाश्रमैरुपशोभितम् ।।२२।।
सरो मानसमासाद्य तथा बिन्दुसरश्च तत् ।
दिव्यां पाण्डुशिलां चैव गङ्गा[१६]प्रभवमेव च ।।२३।।
- - - - - - - - - - - - - - - - - -
ततो महालयं प्राप्य देवदारुवनं तथा ।।२४।।
अन्यानि च ततोग्र्याणि[१७] वनान्यासाद्य सा सती[१८] ।
तस्योत्तरेण शैलस्य गत्वा[१९] चाति मनोहरम्[२०] ।।२५।।
अपश्यच्छिखरं दिव्यमेकमेकान्तमाश्रितम्[२१] ।
चामीकरमयं दिव्यं सर्वौषधिसमावृतम्[२२] ।।२६।।
इन्द्रनीलमहानीलनीलोपलतलैः[२३] शुभैः[२४] ।
वृक्षैर्मणिमयैश्चित्रैः सर्वतः परिसंवृतम्[२५] ।।२७।।

१२...देवविषूदन - घ. । १३ वरः - घ. । १४ तथा(?)। १५...व - घ. । १६ गदां - घ. । १७ तपोग्राणां - घ., ततोग्राणां... ग. घ. । १८ शाश्वती - घ. । १९ गता - घ. । २० सातिमनोहरम् - घ. । २१...ता - घ. । २२ ...समन्वितं -ग. घ. । २३ नीलोत्पलतलैः - ख. ...घ., ...तलं - ख. घ. । २४ शुभं - ख. घ. । २५ परिवारितम् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

क्वचिदञ्जनपुञ्जाभं स्फटिकोपलमेव च[२६] ।
क्वचिद्धेमोपलं दिव्यं क्वचिच्चित्रोपलं पुनः ॥२८॥
क्वचिन्मनःशिलाशृङ्गं[२७] हरितालोपमं क्वचित् ।
शालैस्तालैस्तमालैश्च[२८] प्रियालाम्रातकैरपि ॥२९॥
अशोकैश्चम्पकैर्लोध्रैः कदम्बाम्रातिमुक्तकैः[२९] ।
नागपुन्नागतिलकैः सुरभीचन्दनैरपि ॥३०॥
धातकीकेतकीभिश्च तथैवोद्दालकैरपि ।
कदलीभिश्च चित्राभिः खर्जूरैः पनसैरपि ॥३१॥
बकुलैर्नालिकेरैश्च पद्मषण्डैश्च शोभितम् ।
कपित्थैः खदिरैश्चैव भव्यैः[३०] पारावतैरपि ॥३२॥
मृद्वीकाखण्डपैश्चैव तथांकोठैः समावृतम् ।
सदा[३१] पुष्पफलोपेतैश्चारुचामीकरप्रभैः ॥३३॥
तथा प्रस्रवणैश्चैव[३२] नदीभिश्चोपशोभितम् ।
पक्षिभिर्मधुरालापैः[३३] समन्ताच्चाभिनादितम् ॥३४॥
मयूरचातकोपेतं हंसचक्राह्वसंकुलम् ।
सारसैःखञ्जरीटैश्च हारीतैश्चाभिनादितम् ॥३५॥
जीवंजीवसमाकीर्णं[३४] महिषर्क्षसमाकुलम् ।
सिंहशार्दूलचरितं[३५] शरभेभसमाकुलम् ॥३६॥
मेरुमन्दरसंकाशं सर्वपुण्यफलप्रदम्[३६] ।
रम्यं स्वर्गमिवागम्यं पापानां[३७] क्रूरकर्मणाम्[३८] ॥३७॥
श्रिया स्वलंकृतं साक्षा[३९]दुद्यानमिव सत्कृतम् ।
तत्र केचिन्मधुफला वृक्षाः सर्वर्तुकामदाः[४०] ॥३८॥

---

२६ स्फटिकोत्पलमेव च - ग. । २७ ...न्मणिच्छि (शि?)लाशृङ्गं - ग., मनच्छि... - ख. । २८ शालतालतमालैश्च - ख. ग. । २९...तमुक्तकैः - ख. घ । ३० भवैः - घ., धवैः (?) । ३१ मंजु - घ. । ३२ प्रसवनैश्चैव - ख. । ३३ ...भापैः - ख. । ३४ जीवंजीवकसंकीर्णं - घ. । ३५ ...चितं - ग. । ३६ सर्वपुष्पफलप्रदम् - ख. घ. । ३७ पापिनां - ख. । ३८ क्रूरकार्मिणाम् - ख. ग. । ३९ श्रियालंकृतामावासं - घ.. स्वयं कृतावासं (?) , स्वलंकृतावासं - ख. ग. । ४० सर्वत्र कामदाः - ख. घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अपरे क्षीरिणो नाम वृक्षास्तत्र मनोरमाः ।
अपरे सर्वपुष्पाणि फलानि च महीरुहाः ॥३९॥
पुष्प्यन्ते[४१] च फलन्ते च काञ्चनाश्चापरे द्रुमाः ।
फलन्ति भक्ष्याण्यपरे[४२] भोजनानि[४३] च सर्वशः[४४] ॥४०॥
मानुष्याण्यथ दिव्यानि षड्रसानि महाद्रुमाः ।
वस्त्राण्यन्ये प्रसूयन्ते फलेष्वाभरणानि च[४५] ॥४१॥
तथा बहुविधामन्ये शय्यां चा[४६]भरणद्रुमाः (?) ।
अमाक्षिकं[४७] मध्वपरे चामृतप्रतिमं नगाः ॥४२॥
भोगाँश्च विविधानन्ये तथैवाभरणानि च[४८] ।
अन्ये[४९] स्त्रीः संप्रसूयन्ते मनुष्याँश्च तथापरे ॥४३॥
सर्वा मणिमयी भूमिर्दिव्ये[५०] तस्मिञ्छिलोच्चये[५१] ।
सुगन्धिः[५२] पवनो वाति नात्यर्थं चोष्णशीतलः[५३] ॥४४॥
यावदेव[५४] महादेवी तं गिरिं[५५] नाभिगच्छति[५६] ।
प्रीत्यर्थं तावदेवासौ देव्या रुद्रेण निर्मितः ॥४५॥
तस्यैव च प्रसादेन नासौ गम्यः शिलोच्चयः ।
सर्वदेवनिकायानां भूतानाञ्चैव सर्वशः ॥४६॥

सनत्कुमार उवाच

तस्मिन् गिरिवरे देवी तपस्तेपे सुदुश्चरम् ।
वार्क्षे दधाना वसने रुचिरे[५७] धर्मसाधने ॥४७॥
कदाचित्सा फलाहारा कदाचित्पर्णभोजना ।
कदाचिदम्बुभक्षाभूत्कदाचिदनिलाशना ॥४८॥
कदाचिदेकपादेन सूर्यस्याभिमुखी स्थिता ।
निगृहीतेन्द्रियग्रामा सा बभूव वरानना ॥४९॥

---

४१ पुष्पन्ते - ख. घ. । ४२ भक्षाण्यपरे - ग. घ. । ४३ भाजनानि - ख. घ. । ४४ सर्वदा - ख. घ. ।
४५ फलेष्टाभरणानि च - ग. । ४६ वा - घ. । ४७ समाक्षीकं - ख. । ४८ अत्राभरणानीति पुनरुक्तम् ।
४९ अन्या - ख. । ५० दिव्या - ख. घ. । ५१ तस्मिन् शिलोच्चये - ख. घ. । ५२ सुगन्धः - ख. ग. घ. ।
५३...शीतता - ग. । ५४...द्देवं(?) । ५५ गिरिजा - घ. । ५६ नाभ्यगच्छति ग. घ. । ५७ रुचिरे वाससी - ग. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

महादेवनमस्कारा महादेवपरायणा ।
महादेवप्रिया देवी पुत्रार्थञ्च वरार्थिनी[५८] ॥५०॥
अजैकपादं रुद्रञ्च डिण्डिमुण्डेश्वरं[५९] तथा ।
कापालिनं भारभूति[६०]माषाढिञ्चैव सानुगम् ॥५१॥
निकुम्भं गतमन्युं[६१] च भूतमोहनमेव च ।
कालदण्डधरं चैव मृत्युदण्डधरं[६२] तथा ॥५२॥
ब्रह्मदण्डधरं चैव घोरचक्रधरं[६३] तथा ।
अन्तरिक्षचरान् घोरान् दिशासु विदिशासु च ॥५३॥
एतान् गुह्यान् गणाध्यक्षानदृश्यान् सर्वतोमुखान्[६४] ।
प्रागेव तस्या रक्षार्थं महादेवो नियुक्तवान् ॥५४॥
उपरिष्टादधस्ताच्च तं गिरिं ते गणेश्वराः ।
अदृश्याः सर्वतश्चैव[६५] ररक्षुरमितौजसः ॥५५॥
न तस्य गिरिशृंगस्य रक्ष्यमाणस्य तैस्तथा[६६] ।
देवदानवगन्धर्वाः शेकुर्गन्तु[६७]मुपान्तिकम्[६८] ॥५६॥
प्रागेव स्थापितवती यानि चारुशिलातले ।
भूषणानि नदी तेभ्यो[६९] जज्ञे पुण्यजलाश्रया ॥५७॥
तामलंकारधारेति विश्रुतां पापनाशिनीम्[७०] ।
पश्यन्त्यद्यापि[७१] च जनाः सर्वकालजलां शुभाम् ॥५८॥
यस्मिन्नेव दिने देवी सा तथातिष्ठदद्रिजा[७२] ।
तस्मिन्नेव दिने व्यास शार्दूलोपि जगाम[७३] ताम् ॥५९॥
महकायमुखो भीमः पिङ्गलामललोचनः ।
नखदंष्ट्रायुधो भीमस्त्रासनः सर्वदेहिनाम् ॥६०॥

---

५८ वस्तुहेतवे - घ, तपस्विनी (?) । ५९ दर्ति चण्डेश्वरम् - घ. । ६० भावभूति - घ. । ६१ शतमन्युं - घ. । ६२ घोरचक्रधरं - घ. । ६३ घोरं - ख., घोरवज्रधरं - घ. । ६४ ...मुखं - ख. ग. । ६५ ... ग (गा?) श्चैव - ख., ...श्चै नां - ख. । ६६... स्तदा - ख. । ६७ न शेकुर्गण (र्न्तु?) - घ. । ६८ ...मुमान्तिकम् - ख । ६९ तस्या - ख. । ७० पापनाशनीम् - ख. । ७१ ...पश्यन्ति च - ख, अद्यापि पश्यन्ति - घ. । ७२ ...दम्बिका - घ. । ७३ ...भिजगाम - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गुहामुखाद् विनिःसृत्य व्यजृम्भत महाबलः ।
- - - - - - - - - - - - - - - - - - ॥६१॥
ततः स देवीमालोक्य भक्षार्थमुपचक्रमे ।
तपसा स्तम्भितस्तस्या ह्येतदेवान्वचिन्तयत् ॥६२॥
नार्येषा दृष्टपूर्वा मे शर्वपार्श्वे सुशोभना ।
यादृशं तपसश्चास्या वीर्यं मन्ये न मानुषी ॥६३॥
अथवा नित्यमेवासौ महेश्वरमनुव्रता ।
मन्दरे[७४] सह देवेन रमते[७५] हिमवत्सुता ॥६४॥
तपसा किं तदा चास्या यस्या भर्त्ता पिनाकधृक् ।
तद्रूपिणीयं काप्यन्या[७६] तपोनियममास्थिता[७७] ॥६५॥
महता तेजसा[७८] युक्ता नेयं शक्या मया शुभा ।
हन्तुं भक्षार्थमद्येह ययाहं[७९] स्तम्भितः स्थितः ॥६६॥
तस्मादेनामुपासिष्ये यावत् कालस्य पर्ययः ।
स्वयमेतां मृतां पश्चाद् यथेष्टमबलामहम् ॥६७॥
भक्षयिष्ये बुभुक्षार्त्तो मुनिः फलमिवाश्रमे ।
विचिन्त्यैवं स शार्दूलो देव्यादूरे समास्थितः ॥३८॥
स्तब्धदृक्[८०] कर्णलाङगुल उपविष्टो निरीक्ष्य ताम्[८१] ।
सापि देव्यूर्ध्वदृष्टिन्तं दृष्ट्वा स्थितमसङ्गिनी ।
अनुग्रहकरीं बुद्धिं चक्रे तस्मिन् सदैव हि ॥६९॥

व्यास उवाच

तपश्चरणसक्तायां देव्यां देवस्त्रिलोचनः ।
किमकार्षीत् सुरेशान एतदिच्छामि वेदितुम् ॥७०॥

सनत्कुमार उवाच

- - - - - - - - - - - - प्रति भावितायाम् ।
पुत्रार्थमासक्तमनोरथायां देवोकरोद्यत्तदिदं शृणुष्व ॥७१॥

---

७४ मन्दरं - घ. । ७५ रमती - घ. । ७६ कानान्या - ग. । ७७ नियतमास्थिता - ख. । ७८ महादेवेन ते - ख. । ७९ तयाहं - घ., मया... - ग. । ८० शुद्धदृक् - घ. । ८१ निरीक्षतम् – ग., न्यमीक्षत - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

देव्यां तपसि सक्तायां[८२] भगवान् गोवृषध्वजः ।
जगामानुग्रहं कर्तुमुपमन्योर्महात्मनः ॥७२॥
- ।
स ऋषिर्मातुलगृहे कदाचित् क्षीरमुत्तमम् ॥७३॥
होमशेषमति स्वादु पीतवानग्निहोत्रिणः ।
तत् स्मृत्वा मातरं प्राह देहि[८३] मातः पयो मम ॥७४॥
तस्मै पिष्टं ददौ माता तोयेनालोड्य दुःखिता ।
क्षीरमित्युपनीतं तद् दृष्ट्वा पिष्टं तदा[८४] मुनिः ॥७५॥
नैतत् क्षीरमिति प्राह मातरं सा[८५] ततोब्रवीत्[८६] ।
वत्स क्षीरं कुतोस्माकं कुतश्चान्नं[८७] तपस्विनाम् ॥७६॥
आराधय महादेवं स ते सर्वं प्रदास्यति ।
इत्युक्तः स तदा मात्रा दुःखशोकपरिप्लुतः ॥७७॥
जगाम शरणं देवं सर्वभावेन शङ्करम् ।
आदित्याभिमुखो भूत्वा पादेनैकेन संयतः[८८] ॥७८॥
मनसाचिन्तयन्नित्यं प्रणतार्तिहरं हरम् ।
सहस्रमेकं वर्षाणां तस्थौ दिव्यं फलाशनः ॥७९॥
द्वितीयं शीर्णपर्णाशी[८९] तृतीयं चाम्बुभोजनः[९०] ।
महादेवपरो भूत्वा[९१] चतुर्थं यो जितेन्द्रियः ।
तस्थौ सहस्रं वर्षाणामनिलाशन[९२] एव च ॥८०॥
यदा चतुर्थं संपूर्णं[९३] सहस्रं शरदां मुनेः[९४] ।
तुष्टस्तदा ददौ शर्वः शक्ररूपेण दर्शनम् ॥८१॥

शक्र उवाच

उपमन्यो महाभाग तपस्ते बहु संचितम्[९५] ।
तुष्टोस्मि ते वरं ब्रूहि यद्यदिच्छसि पुत्रक ॥८२॥

---

८२ युक्तायां - घ. । ८३ देवि - घ. । ८४ क्षीरबिन्दूपनीतश्च दृष्ट्वोपरि तदा - ख. क. । ८५ स - ग. । ८६ तदाब्रवीत् - ख. क. । ८७ ...श्चार्थं - घ. । ८८ संयुतः - ख. क. । ८९ ...पत्राशी - घ. । ९० वायुभोजनः - घ. । ९१ ... भ्यर्च्य - ख. क. । ९२ मणिनाशन - घ. । ९३ गतवान् - घ. । ९४ मुने - ख. घ. । ९५ सञ्चयं - ख., संस्कृतम् (?) - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

उपमन्युरुवाच

स्वागतं देवराजस्य त्रैलोक्याधिपतेरिह ।
अद्य निष्कल्मषं मन्ये तपश्चीर्णं मया महत् ॥८३॥
योहं त्रैलोक्यदेवेशमिन्द्रं पश्यामि दिक्पतिम् ।
इदं पाद्यमिदं चार्घ्य[९६]मिदमासनविष्टरम् ॥८४॥
अयं च मधुपर्कस्ते गृह्यतां सदसस्पते ।
किं करोमि तदाख्याहि प्रार्थयस्व महाबल ।
कृतमेव[९७] हि तद्विद्धि यदि स्यात् सुकरं मया ॥८५॥

शक्र[९८] उवाच

भवतो मे पिता विप्र सखाभूत् परमः[९९] पुरा ।
तेन स्नेहेन दृष्ट्वाहं भवन्तं तपसि स्थितम् ।
क्लिश्यमानमिहायातो ब्रूहि किन्ते ददान्यहम्[१००] ॥८६॥

उपमन्युरुवाच

देवराज्यमपि[१०१] त्वत्तो नाहं कांक्षे सुरोत्तम ।
महादेवमहं भक्तस्तस्मादिच्छाम्यहं वरम् ॥८७॥

शक्र उवाच

महादेवं[१०२] न पश्यन्ति सुरापि सदसस्पतिम् ।
न तं द्रक्ष्यसि विप्रेन्द्र ब्रूहि यत्तो मनोगतम् ॥८८॥
अहं पितुस्ते स्नेहेन इहायातो महाव्रत ।
धर्मतो हि सुतो मे त्वं ब्रूहि तस्माद् ददाम्यहम्[१०३] ॥८९॥

उपमन्युरुवाच

कृतं स्वजनकृत्यं ते पूजितोस्मि त्वया प्रभो ।
गच्छ नाहमृते रुद्राद् वरं याचेन्यसंभवम् ॥९०॥

---

९६ चार्घं - ग. । ९७... मेवं - ख. घ. । ९८ इन्द्र - घ. । ९९ परमतः ख., परमं - घ. । १०० वरं ब्रूहि महाभाग यत्तो मनसि वांछितं - घ.,...म्यहं - ख. । १०१ देवराजमपि - ग. । १०२ महेश्वर - घ. । १०३ वरं वरं - ग. घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

एवमुक्तः स तेजस्वी शक्ररूपी महेश्वरः ।
उवाच तप्स्यसे[१०४] पश्चात् किं ते रुद्रः[१०५] करिष्यति[१०६] ॥९१॥
गच्छामि स्वस्ति ते चास्तु[१०७] निर्विघ्नस्ते भवत्वयम् ।
रुद्रं प्रति समारम्भः स्मरेथास्त्वं हि मां[१०८] विभो ॥९२॥

सनत्कुमार उवाच

गते तस्मिन् तदा हीन्द्रे रुद्रः स्वं रूपमास्थितः ।
तस्यादर्शयदव्यग्र इदं चोवाच सुस्वरम् ॥९३॥

रुद्र उवाच

उपमन्यो महाभाग पश्य मां विगतज्वरः ।
ब्रूहि निश्चित्य मनसा[१०९] वरं यावद्ददामि[११०] ते ॥९४॥

सनत्कुमार उवाच

ततः स दृष्ट्वा देवेशं शिरसाभिप्रणम्य[१११] च ।
उवाच प्रणतो वाक्यं[११२] मनसा संप्रधारयन् ॥९५॥
भगवन् यदि तुष्टोसि सदा सुरगणार्चित[११३] ।
यद् ब्रवीमि तदीशान[११४] मह्यं यच्छ नमोस्तु ते ॥९६॥
द्रव्यं[११५] किंचिदनाश्रित्य मानुषं दिव्यमेव वा[११६] ।
क्षीरोदनं समश्नीयामयाचितमुपस्थितम्[११७] ॥९७॥

देवदेव उवाच

अनाश्रित्येह नैवास्ति कस्यचिद् द्विजसत्तम ।
तृणमप्याश्रयं कृत्वा तस्माद्वद महामुने ॥९८॥

उपमन्युरुवाच

नैवाहमाश्रये किञ्चित् प्रसादाद् भगवँस्तव ।
तदर्थ[११८]श्चायमारम्भस्तत् प्रयच्छ यथार्थितम्[११९] ॥९९॥

---

१०४ तप्यसे - ख. । १०५ तप्यतो रुद्रात् - ख. । १०६ प्रदास्यति - घ. । १०७ चैवास्तु - घ. । १०८ मा - ख. । १०९ निश्चिन्तमनसा - ख । ११० ददानि - ख. । १११ प्रणिपत्य - ख. । ११२ वाक्यं - क., वाच्यं - ख. । ११३ यदि देयो वरश्च मे - ख. । ११४ तमीशानं - ख. । ११५ त्वां च - घ. । ११६ च - घ. । ११७ ...दयाचितमुपस्थितम् - क. ग. । ११८ यदर्थं - घ. । ११९ यथा स्थितं - क., स्वप्रार्थितम् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

देवदेव[१२०] उवाच

मुने किञ्चिदनाश्रित्य नास्ति क्षीरोदनं तव ।
इत्युक्त्वा तं महादेवस्तत्रैवान्तरधीयत ॥१००॥
अन्तर्धानं ततो गत्वा जिज्ञासार्थं पिनाकधृक् ।
ब्रह्मणो रूपमास्थाय[१२१] भूय एनं[१२२] ततोऽब्रवीत् ॥१०१॥

ब्रह्मोवाच

उपमन्यो महाप्राज्ञ[१२३] सुचीर्णं ते तपः शुभम्[१२४] ।
तुष्टोऽस्मि ते[१२५] वरं ब्रूहि प्रयच्छामि[१२६] यथेप्सितम्[१२७] ॥१०२॥

उपमन्युरुवाच

भगवन् सर्वलोकेश नमस्ते सर्वसृक् प्रभो ।
सुचीर्णं मे तपो देव यस्त्वां[१२८] पश्यामि लोकप ॥१०३॥
महेश्वरमहं भक्तस्तदाशीस्तत्परायणः ।
तस्माद्वरं वृणे देव त्वत्तो नाहमसंशयम् ॥१०४॥

ब्रह्मोवाच[१२९]

रुद्रस्ते नाददद्विप्र क्षीरौदनमदुर्लभम्[१३०] ।
स तेऽन्यत् कुत एवेह दास्यते वरमुत्तमम् ॥१०५॥
प्राजापत्यं सुरत्वं वाप्यमरत्वमथापि वा ।
इन्द्रत्वमथ सोमत्वं विष्णुत्वं[१३१] वा ददानि[१३२] ते ॥१०६॥
लोकपालो भवानस्तु सर्वलोकाभिपूजितः ।
ब्रूहि किन्ते ददान्यद्य विसृजस्व[१३३] महेश्वरम् ।
नासौ दाता तवेशानस्तृणमप्येकमल्पकम्[१३४] ॥१०७॥

उपमन्युरुवाच

न गृहीतं प्रभो[१३५] तेन मम किञ्चिन्महात्मना ।
ईश्वरः सर्वभूतानां न[१३६] स्वामी तस्य कश्चन ॥१०८॥

---

१२० सनत्कुमार - घ. । १२१ ब्रह्मरूपं समास्थाय- घ. । १२२ एवं - क. ख. । १२३ महाप्रज्ञ - ख. । १२४ शुभ - ख. । १२५ ब्रूहिवरं - क. ख. । १२६ तत्प्रयच्छ - घ. । १२७ यथास्थितं - क., तवानघ - ख. घ. । १२८ यस्त्वां - क. । १२९ पितामह उवाच - घ. । १३० क्षीरोदनमदुर्लभम् - ख. घ. । १३१ सविष्णुत्वं - ख. । १३२ ... मि - ख. । १३३ व्यसृजस्व - ख. । १३४ ...मल्पकमक्षतं - क., ...प्येकमक्षत - घ., ...प्येकमेव च - ख. । १३५ पुरा - घ. । १३६ नास्वामी - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

इच्छया कुरुते देवः सर्वकार्याणि कार्यिणाम् ।
ददाति यदि लाभो मे न ददाति तथापि च ॥१०९॥
बहुना किं प्रलप्तेन तेन दत्तमहं वृणे ।
नरकं वा पशुत्वं वा किं पुनर्यदतोन्यथा ॥११०॥
त्वत्तो नेच्छामि विष्णुत्वं न शक्रत्वं[१३७] पितामह ।
गच्छ[१३८] सर्वसुरेशान मा वृथा क्लेशमाचर ॥१११॥

सनत्कुमार उवाच

स एवमुक्तो देवेशस्तेन ब्रह्मर्षिणा तदा[१३९] ।
तस्य तत्र पुनर्वाक्यं वरार्थमवदत् प्रभुः ॥११२॥
उपमन्युरपीशाने मन आधाय[१४०] निश्चलम् ।
तूष्णीं बभूव देवोपि तत्रैवान्तरधीयत[१४१] ॥११३॥
तस्य तां भावनां ज्ञात्वा पिनाकीशस्त्रिलोचनः[१४२] ।
स्वमेव रूपमास्थाय दर्शयामास तत्क्षणात् ॥११४॥
त्र्यक्षो जटी विशालाक्षः कुण्डली दीप्तलोचनः ।
ज्वालामालाधरः श्रीमान् भुजगाबद्धमेखलः ॥११५॥
सर्पयज्ञोपवीती च व्याघ्रचर्माम्बरच्छदः ।
कृष्णाजिनोत्तरीयश्च कमण्डलुधरस्तथा ॥११६॥
दण्डी शूली महाहासो[१४३] गणवैर्बहुभिर्वृतः ।
उवाच पुत्र पुत्रेति तुष्टोस्मि तपसा तव । ११७॥
अमरो जरया त्यक्तः सर्वदुःखविवर्जितः ।
कामरूपधरः श्रीमान् मत्प्रसादाद् भविष्यसि ॥११९॥
द्वीपञ्चेमं[१४४] गृहाण त्वं मया सृष्टं हि कामगम् ।
क्षीरौदन[१४५] समुद्रेण सर्वतः परिवारितम् ॥११९॥
महायोगबलो भूत्वा सर्वज्ञः प्रियदर्शनः ।
भुंक्ष्व[१४६] क्षीरौदनं वत्स बन्धुभिस्सहितः सदा[१४७] ॥१२०॥

---

१३७ ब्रह्मत्वं वा - घ. । १३८ त्वंहि - ख. । १३९ तथा - घ. । १४० . आधाय - क., संधाय - ख. घ ।
१४१ ... तां - क. । १४२ स त्रिलोचनः - क. घ. । १४३ महाभागो - घ । १४४ द्विपं चैव - घ, ।
१४५ क्षीरोदेन - ख । १४६ क्षीरोदनं - क ख. । १४७ तदा - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सप्तपूर्वाणि सर्वाणि कुलानि तव तापस[१४८] ।
इदं चैव कुलं सर्वमनुगृह्णामि सुव्रत[१४९] ॥१२१॥
सर्वे भवन्तु विप्रर्षे[१५०] य इमे तव बान्धवाः ।
मत्प्रसादान्महासत्वा नित्यं क्षीरौदनाशनाः[१५१] ॥१२२॥

सनत्कुमार उवाच

स तु तं वरमादाय प्रणम्य शिरसा भवम् ।
शिरस्यञ्जलिमाधाय[१५२] अस्तौषीत् प्रयतात्मवान् ॥१२३॥

उपमन्युरुवाच

नमः सर्वामरेशाय विश्वेशाय नमो नमः ।
नमः सर्वार्तिहर्त्रे[१५३] च नमश्शोकहराय च ॥१२४॥
नमः पवनवेगाय नमः पवनरूपिणे ।
नमः काञ्चनमालाय पद्ममालाय वै नमः ॥१२५॥
नमः सुररिपुघ्नाय चण्डवेगाय वै नमः ।
नमः पितृसुरेशाय मखघ्नाय[१५४] च वै नमः ॥१२६॥
स्त्रीरूपाय नमस्तुभ्यं सर्वरूपधराय च ।
नमः कन्दर्पनाशाय[१५५] विश्वस्रष्ट्रे[१५६] नमो नमः ॥१२७॥
नमो विश्वाय पाशाय[१५७] नमोचिन्त्याय चैव हि[१५८] ।
त्वन्नो गतिश्च श्रेयश्च त्वमेव हृदयं सदा ॥१२८॥

सनत्कुमार उवाच

ततस्तं मूर्ध्न्युपाघ्राय[१५९] समाश्वास्य[१६०] विपूज्य च ।
जगाम भगवान् व्यास सुकेशं[१६१] प्रति स[१६२] प्रभुः ॥१२९॥

---

१४८ तपसा तव - ख. । १४९ तापस - क । १५० विपेन्द्र - ख. । १५१ क्षीरोदवासिनः - क. ख. घ. । १५२ मादाय - घ. । १५३ ...हन्त्रे - ग. । १५४ मुखघ्नाय - ख., महिष...- क. । १५५ स्कन्दविशाखाय - क., स्यन्दविशाखेच - ख. । १५६ विष्वक् स्रष्ट्रे - क. ख घ. । १५७ घस्राय - क. । १५८ ह - ख. । १५९ मूर्ध्नि चाघ्राय - क. घ. । १६० ...श्वस्य - ख. । १६१ सुरेश - घ. । १६२ प्रतिमः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

उपमन्युं ज्वलितानलप्रकाशं शतमन्युं[१६३] तपसा[१६४] जिगीषमाणम्[१६५] ।
स चकार नतं[१६६] हरोग्रमन्युं वरदानेन तदा व्यपेतमन्युम्[१६७] ॥१३०॥

⊙ इति स्कन्दपुराणे उपमन्युवरप्रदानं नाम चतुस्त्रिंशोऽध्यायः ⊙

सनत्कुमार उवाच

ततः स भगवान् देवः सुकेशं गणपं पुनः ।
चकार ब्राह्मणं व्यास तपः सत्यपरायणम् ॥१॥

व्यास उवाच

कथं स ब्राह्मणः पूर्वं गणेशत्वमुपागतः ।
केनास्य तपसा तुष्टो गणेशत्वं[१] ददौ प्रभुः ॥२॥

सनत्कुमार उवाच

आसीद्वसिष्ठकुलजो ब्राह्मणस्सत्यवाक् शुचिः[२] ।
तीर्थयात्रास्वभिरत[३] उपवासपरायणः ॥३॥
स कदाचिद्विदेशस्थो वने पश्यन् पथि स्थितम् ।
व्याघ्रं व्यात्ताननं घोरं नखदंष्ट्रायुधं तदा[४] ॥४॥
दृष्ट्वा तं स तदा विप्रस्त्यक्त्वा पन्थानमाशुगः ।
विवेश महतीं घोरामटवीं प्राणिवर्जिताम्[५] ॥५॥
तत्रापश्यत् स पुरतो वीरणस्तम्बमाश्रितान्[६] ।
पुरुषाँल्लम्बमानाँश्च क्रन्दमानान् सुदुःखितान्[७] ॥६॥
तानवाक्शिरसो दृष्ट्वा लम्बमानाँस्तदा द्विजान् ।
के यूयमिति पप्रच्छ ते चैन[८]मिदमूचिरे ॥७॥

---

१६३ गतमन्युं - क. । १६४ तमसा - ख. । १६५ विजिगीषमाणं - क. । १६६ ...रावनतं - क. ख. घ. ।
१६७ मन्युमिति - क, मन्युरिति - ख. ।

१ गणपत्वं - ख. । २ छुचिः - क,...ञ्छुचिः - ख. । ३...यात्रासु निरतः - घ. । ४ वरं - क. ख. । ५ शार्दूलं विपिने दृष्ट्वा मार्गमुत्क्रम्य मा (चा) शुगः । विवेशान्यद्वनं घोरं सर्वप्राणिविवर्जितम् । इति ख. पुस्तकपाठः । ६ स्तम्भ - ख. घ. । ७ ...नाँश्च दुःखितान् - घ. । ८ तमेवं... - घ., ते चैव - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पितर ऊचुः

तव स्मः पितरस्सर्वे नरकेस्मिन्नधोमुखाः ।
वीरणे त्वयि लम्बामस्तव दोषेण दुर्मते ॥८॥
पुत्रानिच्छन्ति मनुजास्तारयिष्यन्ति नस्त्विमे[९] ।
नरकादिति स त्वन्नः पातयिष्यसि दुःखितान् ॥९॥

विप्र उवाच

मया तीर्थाभिगमनात् तपो यत्[१०] समुपार्जितम् ।
जन्मप्रभृति यच्चापि मया किञ्चित् कृतं शुभम् ।
तेन यूयमितो गर्त्तादुद्धरध्वं[११] पितामहाः ॥१०॥

पितर[१२] ऊचुः

न वयं तपसा[१३] शक्या न यज्ञैर्नाप्यतोन्यथा[१४] ।
गर्त्तादस्मात्समुद्धर्तुं यद् ब्रूमस्तत्कुरुष्व नः ॥११॥
अपत्यं गुणसंयुक्तमुत्पादय तपोयुतम् ।
ततो वयमितो गर्त्तान्मुच्येम यदि मन्यसे ॥१२॥

विप्र उवाच

ऊर्ध्वरेताहमित्येतन्मया व्रतमुपाकृतम्[१५] ।
न दारानाहरिष्यामि तारयिष्ये च वै पितॄन् ॥१३॥
ततस्स तान् तथोत्सृज्य[१६] दुःखेन महता वृतः ।
जगाम रुद्रं शरणं पितरोन्तर्हितास्ततः ॥१४॥
पितृष्वन्तर्हितेष्वेवं वायुभक्षस्तदा द्विजः ।
काष्ठलोष्ठोपलीभूतो निरुच्छ्वासोवतिष्ठत[१७] ॥१५॥
सन्धाय[१८] मानसं[१९] रुद्रे[२०] निश्चलः[२१] सुसमाहितः[२२] ।
हृदयेन जपन् रुद्रानाकाशे समतिष्ठत ॥१६॥

---

९ नास्ति मे - घ. । १० यत्तपः - घ. । ११... सर्वानुद्धरध्वं - ख. । १२ पितामहा - घ. । १३ युष्मत्तपसा - ख. । १४ यज्ञेनाप्यतोन्यथा - क. ख., शक्त्या त्वया ज्ञात्वा - घ. । १५... मुपावृतं(?),... मुपाहृतं - क.,... मनुत्तमं- घ. । १६ ततो (दो) त्सृज्य - क. ख. घ. । १७... तिष्ठति - ख. । १८ ध्याय मानस्ततो - ख., स ध्यायमानो रुद्रेति - घ. । १९ मनसो - क. । २० रुद्ध - ख. । २१ निश्चलं - ख. । २२ ...स्थितः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तस्य पूर्णे तदा मासि वातवर्षमभून्महत् ।
सर्वसत्वप्रमथनं दुस्सहं भीमशब्दवत् ॥१७॥
तेन वर्षेण[२३] महता नैव[२४] तस्याभवत्तदा ।
दुःखं वाप्यथवा भङ्गः[२५] सम्यगेवावतस्थिवान् ॥१८॥
अथ तं भगवान् देवो मासे वर्तति सप्तमे ।
विष्णुरूपधरो भूत्वा प्रोवाच द्विजसत्तमम् ॥१९॥
तुष्टोस्मि तव भद्रन्ते तपसानेन सुव्रत ।
वरं वरय विप्रर्षे यस्ते[२६] मनसि वर्तते ॥२०॥
सुकेशस्तु ततो दृष्ट्वा नारायणमुपागतम् ।
अब्रवीच्छङ्करादिच्छे[२७] वरं न भवतो ह्यहम् ॥२१॥

विष्णुरुवाच[२८]

अलमेतेन विप्रर्षे निर्बन्धेन हरं प्रति ।
देवैरपि न शक्योसौ द्रष्टुं किमुत मानुषैः ॥२२॥

सुकेश उवाच

द्रष्टुं शक्यो न वा शक्यः किमेभिर्वो विचारितैः ।
कुग्रहः सुग्रहो वाहं तथापीशे मनो मम ॥२३॥
शंकरादेव चक्रेश शुभं वा यदि वाशुभम् ।
वरं कांक्षे न च त्वत्तो[२९] न चान्यस्मात् कथञ्चन ॥२४॥
भवन्तोपि हि तं देवं यस्मात् सर्वे समाहिताः ।
अर्चयध्वे[३०] स्तुवध्वे[३१] च तस्माच्छ्रेष्ठः स उच्यते ॥२५॥

सनत्कुमार उवाच

तस्य तन्निश्चयं ज्ञात्वा संतुष्टो[३२] भगवान् हरः ।
विष्णुरूपं परित्यज्य स्वं रूपं प्रत्यपद्यत ॥२६॥
उवाच चैनं विप्रेन्द्र[३३] गणपो[३४] मे भवाक्षयः ।
अमरो जरया त्यक्तः सर्वदुःखविवर्जितः ॥२७॥

---

२३ मासेन - घ. । २४ नैवं - ख. घ. । २५ भङ्गं - घ. भंगो - क. । २६ यत्ते - क. घ. । २७ ...त्तां हरादिच्छे - घ. । २८ देवदेव - घ. । २९ ...ह शत्रुघ्न - घ. । ३० अर्चयध्वं - क. ख. घ., अर्चयध्वं सुरेशं च - घ. । ३१ स्तुवध्वं - क. ख. । ३२ तुतोष - क. ख. घ. । ३३ विपेन्द्रं - क. घ. । ३४ गणपस्त्वं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ऐश्वर्येण च संयुक्तः प्रियो मम पुरस्सरः ।
इमं च[३५] मत्कृतं दिव्यं त्रिकूटं नाम पर्वतम् ॥२८॥
भवनैः काञ्चनैर्युक्तं कामगं ते ददाम्यहम् ।
येषां कृते च पुत्र त्वं मां तोषयितुमुद्यतः ॥२९॥
ते चेमे[३६] पितरस्सर्वे सुपुत्रेण त्वयानघ ।
तारिता नरकाद् घोराद् गणेशं त्वा[३७]मुपस्थिताः ॥३०॥
किंकरास्ते भविष्यन्ति नित्यं दुःखविवर्जिताः ।
गणेश्वरास्तवैवेमे[३८] भविष्यन्ति वशानुगाः[३९] ॥३१॥
सुकेश इति नाम्ना च प्रथितस्त्वं भविष्यसि ।
सदा चाष्टगुणै[४०]श्वर्यसमायुक्तश्चरिष्यसि ॥३२॥

सनत्कुमार उवाच

ततस्स दृष्ट्वाथ पितॄन्नरकात् ससुहृज्जनान्[४१] ।
तीर्णान्[४२] गणेश्वरत्वेन पुनः पूज्येन संयुतान्[४३] ॥३३॥
महेश्वरं हृष्टमनाः शिरसा प्राञ्जलिर्नतः ।
उवाच हृष्यमाणास्यस्तदा[४४] वचनकोविदः ॥३४॥

सुकेश उवाच

भगवन् गणपत्वं च लब्धमैश्वर्यमेव च ।
अमरत्वं तथाक्षय्यं तथैवाजरता वरा[४५] ॥३५॥
पितरस्तारिताश्चेमे[४६] गणपाश्चैव मे कृताः ।
नगश्च कामगो[४७] ह्येष लब्धो मे त्वत्प्रसादतः[४८] ॥३६॥
इच्छामि त्वां[४९] महादेव सोमं सप्रवरेश्वरम्[५०] ।
सदा सुमुख[५१]मत्यर्थं सुदृश्यं[५२] चैव कामद[५३] ॥३७॥

सनत्कुमार उवाच

स एवमुक्तो भगवान् सुकेशेन महात्मना ।
उवाचैव[५४]मिदं सर्वं भविष्यति गणेश्वर ॥३८॥

---

३५ इदं च - क. ख. घ. । ३६ त इमे - घ. । ३७ गणेशत्व - ख. घ. । ३८ ... स्तमेवैते - ख. घ. ।
३९ सदानुगाः - घ. । ४० नित्येष्ठ (नित्यमष्ट?) गुणै - ख. । ४१ ससुहृज्जनः - ग. । ४२ तीर्णो - ग. ।
४३ संयुतः - ख. ग. । ४४ हर्षमाणश्च तदा - ख. । ४५ ...य्यमजरत्वमवाप्य च - ख. । ४६...श्चैव - ख. ।
४७ कामतो - ख. । ४८ त्वत्प्रसादजः - क. । ४९ त्वं - क., त्वा - ख. । ५० सहगणेश्वर - घ. ।
५१ सुसुख - ख., स्वसुख - घ. । ५२ स्वदृश -ग., निकामं दर्शनं तव - ख. । ५३ कामदं - क. । ५४...न - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

इमं गिरिं समाश्रित्य सहैभिः प्रवरैर्वरैः[५५] ।
गच्छ स्वेष्टां[५६] गतिं वत्स देवान् विप्रांश्च पालय ॥३९॥
विसृज्य तं ततो[५७] देवः सुकेशं गणनायकम्[५८] ।
जगामादर्शनं सोमः[५९] सर्वेषामेव पश्यताम् ॥४०॥
सुकेशोपि गिरौ तस्मिन्नगरे स्वर्गसन्निभे ।
नरकाणां[६०] स तत्त्वार्थं[६१] पितॄन् पप्रच्छ यत्नतः ॥४१॥

व्यास उवाच

किमर्थं गणपो ब्रह्मन् तान् पितॄन् पर्यपृच्छत ।
कथञ्च पितरस्तत्र आचख्युस्तस्य धीमतः ॥४२॥
एतद्विस्तरशस्तात संक्षेपाद्वा यथातथम् ।
त्वत्तोहं श्रोतुमिच्छामि हितं सर्वसुखावहम् ॥४३॥

सूत उवाच

स एवमुक्तः सुरसृक्सुतः प्रभु[६२]र्विमानकर्ता[६३] विगतप्रयोजनः ।
जगाद वाक्यं सुरलोक[६४]वर्धनः[६५] पुराकृतं (?) दुष्कृतसर्वनाशनम् ॥४४॥

⊙ इति स्कन्दपुराणे सुकेशवरप्रदानं नाम पंचत्रिंशोध्यायः ⊙

सनत्कुमार उवाच

त्रिकूटशिखरे तस्मिन्नगरे देवनिर्मिते ।
आसीनः[१] काञ्चने दिव्ये विमाने स्त्रीसमाकुले[२] ॥१॥
पितॄन् सर्वान्[३] समाहूय संपूज्य विधिवत्तदा[४] ।
सुखोपविष्टान् तान्[५] दृष्ट्वा इदं वचनमब्रवीत् ॥२॥

---

५५ सगणप्रवरै भृंशम् - घ. । ५६ श्रेष्ठां - घ. । ५७ महादेव - क. ख. घ. । ५८ कुलनायकम् - घ. । ५९ देवः - घ. । ६० नारकाणां - (?) । ६१ मुक्त्यर्थं - घ. । ६२ परमादरेण - घ. । ६३ विधानकर्ता - घ. । ...मग्रे - ख. । ६४ मुनिदेव ... - घ. । ६५ ...वन्धु (वान्धव?) - ख., ... बल्लभः - घ. ।

१ आसने - घ. । २ स्त्रीजनाकुले - क. ख. । ३ स्वाँश्च - घ. । ४ विधिवत्तया - घ. । ५ उपविष्टानासनस्थान् - घ., उपविष्टान् सुखं - क. ग. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सुकेश उवाच

युष्माकं तेजसा सर्वमिदमैश्वर्यमीदृशम् ।
भवद्भिस्तत्कृतं देवा येनास्मि सुखभाक्कृतः ॥३॥

पितर ऊचुः

मैवं वदानृतं[६] पुत्र साधर्मस्ते भवेदिह[७] ।
नास्मत्प्रसादादैश्वर्यं तव पुत्र कदाचन ॥४॥
वयन्तु निरये घोरे यात्यमानाः[८] सुदारुणे ।
तपसा तव वीर्येण[९] सुखमाप्म[१०] सुदुर्लभम् ॥५॥
त्वया वयं सुपुत्रेण तारिता निरयाद् यथा[११] ।
तथा[१२] नान्यं प्रपश्यामो[१३] धन्यो हि[१४] त्वं सुतो हि नः ॥६॥
अद्य[१५] वर्षसहस्राणि बहूनि निरये वयम् ।
पच्येम[१६] घोरे दुर्वृत्ता बन्धुः स्यास्त्वं न नो यदि ॥७॥
बहवः प्राणिनः पुत्र यात्यन्ते[१७] तत्र[१८] संयताः[१९] ।
अति[२०]घोरे सुदुर्वृत्ता[२१]स्तपो येषां[२२] न विद्यते ॥८॥

सुकेश उवाच

पितरो नोक्तपूर्वं[२३] मे मृषा न च वदामि वै[२४] ।
यथा प्रभावाद्युष्माक[२५]मैश्वर्यं मम तत्तदा ॥९॥
शृणुध्वं वदतः[२६] सम्यङ् मावमध्वं[२७] वचो मम ।
न चावमन्ये पितरो[२८] देवताः[२९] कोवमन्यते ॥१०॥
पितरः कर्म कुर्वन्ति सतां यत् संमतं भुवि ।
नित्यं चाशासते चैव[३०] प्रजा नः सन्तु पुष्कलाः ॥११॥

---

६ वाचानृतं - ख. । ७ व्यनीनशत् - ख. । ८ पात्यमानाः - क. । ९ तव देवस्य - क., देवदेवस्य - घ. । १० ...माप्ताः - घ, ...मायुः (पुः?) - क. ख. । ११ वयं - ख. । १२ तस्मात् - ख. । १३ प्रपश्याम - क. ग., ...मि - ख. । १४ धन्यानां - ख. । १५ अन्य .. - ख. । १६ पच्यामि (म) - ख. । १७ पात्यन्ते - घ. । १८ यत्र - ख. । १९ संयुताः - घ. । २० अपि - घ. । २१ घोरेषु दुर्वृत्ता - क. घ. । २२ ... स्तपस्ते-(षां) ... क. घ., ... स्तप्यन्ते - ख. । २३ नोक्तपूर्वोस्मि - क. । २४ मृषा वाद कदाचन - घ. । २५ प्रभावमस्माकं - घ. । २६ वेदतः - ख. । २७ मावमंस्था - क. ख. ग. घ. । २८ पितरं - घ. । २९ देवतां - घ. । ३० तेन - ख. ग., ते च - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

धार्मिकाश्च कृतज्ञाश्च सत्कर्मरतयस्तथा ।
ये नो नरकगर्तस्थान्[३१] तारयिष्यन्ति नित्यशः ॥१२॥
तेषां तत्कार्यकरणात् स्वधर्माच्यवनेन च[३२] ।
स धर्मोनुष्ठितः[३३] सम्यक् प्रजा जनयते शुभाः ॥१३॥
धार्मिकाश्च वदान्या[३४]श्च कृतज्ञाः सत्पथे[३५] स्थिताः ।
पितृभक्ताश्च सर्वत्र[३६] पितृणां तारणे रताः[३७] ॥१४॥
सोहं भवद्भि[३८]र्धर्मेण परेण च समाधिना ।
जनितस्तपसा युक्तो भवतामेव[३९] सर्वशः[४०] ॥१५॥
देवमाराध्य नरकात् पितॄँस्तारितवान् पुनः[४१] ।
एष प्रभावो युष्माकं तपः सुचरितं च ह ॥१६॥
ममात्र[४२] किं महाप्रज्ञा[४३] अनृतं वात्र किं वद[४४] ।
इयञ्च वैदिकी शुभ्रा श्रुतिर्वेदविदां वराः ॥१७॥
प्रमाणं यदि मन्यध्व आत्मना[४५] कृतमित्युत ।
अङ्गादङ्गात् संभवसि हृदयादधिजायसे ॥१८॥
आत्मा वै पुत्रनामासि स जीव शरदां[४६] शतम्[४७] ।
अङ्गेभ्योहं समुत्पन्नो युष्माकं हृदयाच्च ह ॥१९॥
आत्मनाहं[४८] तथात्मानं युष्माँस्तारिवाँस्ततः ।
तस्माद् भवन्तो मन्यन्तां[४९] सर्व एव समाधिना ॥२०॥
तस्माद्धि घोरान्नरकात्तारिताः स्वेन कर्मणा ।
न चान्यकर्मणा[५०] कश्चिदन्यस्तरति दुर्मतिः[५१] ।
स्वकर्मणा[५२] हि जन्तूनां फलपाको विधीयते ॥२१॥

सनत्कुमार उवाच

ततस्त एवं पितरस्तेन प्रोक्ता महात्मना ।
हर्षेण साश्रुनयना इदमूचुस्तदा वचः ॥२२॥

---

३१ निरयघोरम्यान् - ख. । ३२ स्वधर्मं कुरुते नरः - घ । ३३ धर्मानुष्ठितः - घ. । ३४ वदन्याश्च - क. ख. ग. । ३५ सत्पथि - क ख. ग. । ३६ सर्वत्र - ख. । ३७ सदा - ख । ३८ नैवं भवति - घ. । ३९ युक्तैर्भवतामेव - ख, चैव - घ. । ४० नान्यथा - ख. । ४१ ... नहं - घ. । ४२ मयात्र - घ. । ४३ प्रतिज्ञात - घ., प्राज्ञा - क. । ४४ न वदाम्यहं - ख. । ४५ ...मात्मना - क. ख., सा... - ग, ...गर्थिना - घ. । ४६ शरदः - ख. घ. । ४७ श्रुतं - क. । ४८ तं - ख. । ४९ मन्यन्त - ख, घ. । ५० ...त्कर्मणा - क. ख, घ. । ५१ दुर्गति - क. घ. । ५२ स्वकर्मणो - ख ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पितर ऊचुः

त्वदन्यः को वदेदेवं यो न स्यादीशसंमतः ।
युक्तमेतत्तव वचो धार्मिकस्य महात्मनः ॥२३॥
यो न स्यादीदृशः पुत्र[५३] कथं तं सर्वदेवपः ।
इष्टैस्तु[५४] योजयेत्[५५] सम्यग् यथा त्वां गोवृषध्वजः ॥२४॥
त्वं धाता त्वं हि नो[५६] बन्धुस्त्वं जनेता[५७] महामते ।
पिता त्वमेव पुत्रा हि वयं तव न संशयः ॥२५॥
अत्र ते वर्तयिष्यामः पुरावृत्तं महामते[५८] ।
श्रुतौ स्मृतौ च यद् गीतं तन्नस्त्वं[५९] मन्तुमर्हसि[६०] ॥२६॥

पितर ऊचुः

पुत्रा हि ब्रह्मणा सृष्टा देवा यजत मामिति ।
ते यजन्त[६१] तदात्मानं[६२] तेषां ब्रह्मा चुकोप ह ॥२७॥
उवाच चैनान्[६३] संरब्धो नष्टसंज्ञा भविष्यथ ।
ते शप्ता[६४] ब्रह्मणा सर्वे समेत्य च[६५] दिवौकसः ॥२८॥
दुःखशोकसमायुक्ता दीनास्तं[६६] तुष्टुवुस्तदा[६७] ।
प्रसन्नं तं समालक्ष्य त ऊचुः शिरसा नताः ॥२९॥
नष्टसंज्ञा वयं देव तान्नो[६८] यच्छ पुनः प्रभो ।
तत् क्षमस्व च देवेश अज्ञानाद्यत् कृतं हि नः ॥३०॥
अथैवमुक्तो देवै[६९]स्तैर्ब्रह्मा लोकपितामहः ।
उवाच प्रणतान् देवान् सानुक्रोशमिदं वचः ॥३१॥

ब्रह्मोवाच

प्रायश्चित्तं महासत्वाश्चरध्वं नियमेन ह[७०] ।
व्यभिचारकृतं[७१] सर्वं ततः पापं प्रहास्यथ ॥३२॥

---

५३ पुत्रं क., पुत्र· - घ । ५४ ...स्त्व - क ख. । ५५ योजयत् - क ख. । ५६ हितो - क. ।
५७ जनिता त्वं (?) । ५८ महात्मने - घ. । ५९ ततस्त्वं - घ. । ६० स्मर्तुमर्हसि - क., संस्मर्तुमर्हसि - घ. ।
६१ जयन्त - क. ख. । ६२ . स्तदात्मानं - क. । ६३ चैनं - क. ख. । ६४ ... स्तं तदा देवं - क. घ. ।
६५ सर्व एव - क. घ. । ६६ ब्रह्माणं - क. घ. । ६७ ... स्सदा - क. ग. । ६८ तन्नो - क. ख. घ. ।
६९ देव - ख. । ७० कुरुध्वं भो युष्माच्चीर्णं ददाम्यहं - ख. । ७१ कृते चावकृतं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

देवा ऊचुः

सैव संज्ञा न नो देव विद्यते[७२] सर्वसृक् प्रभो ।
यया ज्ञास्यामहे तानि प्रायश्चित्तानि लोकप ॥३३॥

ब्रह्मोवाच[७३]

स्वान् पुत्रान् परिपृच्छध्वं ततः श्रेयमवाप्स्यथ[७४] ।
पुनः संज्ञां च धर्मज्ञा मा कुरुध्वमतोन्यथा ॥३४॥

पितर ऊचुः

ततस्ते सुरशार्दूलाः पप्रच्छुः स्वान् सुताँस्तदा ।
प्रायश्चित्तानि धर्माँश्च वेदान् साङ्गान् सविस्तरान्[७५] ॥३५॥
ते च तेभ्यस्तदा पुत्रा आचुख्युः[७६] प्रयताः शुभाः ।
याथातथ्येन तत्सर्वं परमेण समाधिना ॥३६॥
अथ ते लब्धसंज्ञाश्च लब्धकामास्तथैव च ।
स्वान्पुत्रानभ्यभाषन्त प्रीयमाणा मुदा युताः ॥३७॥

देवा ऊचुः

पुत्रा न यूयमस्माकं वयं पुत्रा हि वः सुताः[७७] ।
यैर्ज्ञानं नष्टसंज्ञानां कृतमस्माकमव्ययम् ॥३८॥
तैरेवमुक्ते तत्रागाद्[७८] ब्रह्मा लोकपितामहः ।
उवाच चेदं तान्देवान् सर्वानेव महायशाः ॥३९॥

ब्रह्मोवाच[७९]

वदन्ति नानृतं देवाः सत्यं देवेषु वर्तते[८०] ।
सुताश्चोक्ता हि वः सर्वे पितरो नानृतं हि तत् ॥४०॥
तस्मात्[८१] पितृत्वं युष्माकं[८२] पुत्राणां नित्यमव्ययम् ।
भविष्यति न सन्देहो यूयं पुत्राश्च सर्वशः ॥४१॥

---

७२ प्रपश्येत् (श्यत्) - ख. । ७३ पितामह - क. घ. । इतः परवर्ति पत्रमेकं खण्डितम् (नष्टं) - क. पुस्तके । ७४ योप्यवाप्स्यथ - घ. । ७५ वेदाज्ञा (ङ्गाँ) श्च सुविस्तरान् - घ. । ७६ आचक्षुः - ख. घ. । ७७ पुत्राणां नित्यमव्ययं - ग. । ७८ ... क्तै स्तत्रागाद् - ग. । ७९ पितामह - घ. । ८० नानृतं - घ. । ८१ अस्मत् - घ. । ८२ पितृृणां - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नह्य[८३] शिष्याय कथ्यन्ते रहस्यानि कथंचन ।
एकार्थौ पुत्रशिष्यौ च तस्मात् पुत्राःस्थ सर्वशः ॥४२॥
तरन्ति पुत्रैः पितरः पुत्राँस्तान् तारयन्ति च ।
तारयित्वा पितृत्वञ्च[८४] कर्मणा तेन यान्ति ते ॥४३॥
यूयञ्च तारिताः पुत्रैरज्ञानान्नरकात्तथा[८५] ।
तस्मादिमे हि[८६] पितरो यूयं पुत्राश्च सर्वशः ॥४४॥
पाति यस्मात् पिता तस्माज् जनयत्यपि[८७] वा पिता[८८] ।
पुत्रेषु चैतदुभयं पितरस्तेन वो[८९] मताः ॥४५॥
ततस्ते ब्रह्म - - - - - - - - - - - - ।
- - - - - - - - - - - - - - - - - - ॥४६॥
- - - - - - - - - - - - - - - - बलाः ।
पितरस्तान् वरैरिष्टैश्छन्दयामासुरव्यथाः ॥४७॥
पितरश्च ततो वव्रुरग्रे यजनमात्मनः ।
यो नोनिष्ट्वा यजेद्देवान्[९०] न स तत्फलमाप्नुयात्[९१] ॥४८॥
एनसा चाभिसंयुक्तो सह - - - - - - ।
- - - - - - - - - - - - - - - - - ॥४९॥
- - - - - - - - - - - - - - - - - ।
यथागतं ततो जग्मुर्ब्रह्मणा सह सर्वशः ॥५०॥

पितर ऊचुः

यथा[९२] वयं त्वया पुत्र नरकान्नष्टचेतसः ।
तारिताश्चेतनावन्तः पुनश्च प्रवरीकृताः[९३] ॥५१॥
पिता ततो भवान् पूज्यो योनुयासि महा - - ।
- - - - - - - - - - - - - - - - - - ॥५२॥
- - - - - - - - - - - - - - सत्तमः ।
प्रणतः प्राञ्जलिर्भूत्वा पितॄन् वचनमब्रवीत् ॥५३॥

---

८३ नहि - ख. । ८४ पितॄन् पुत्राः - घ. । ८५ ... रज्ञाने नरकात्तथा - ख. । ८६ ... त्तोपीह - घ. ।
८७ जनयँश्चापि - घ. । ८८ तान् - ग. । ८९ चो - ग., वा (?) । ९० यजन्देवान् - ख. ।
९१ तत्फलमवाप्नुयात् - ख. । ९२ तथा - ख. । ९३ प्रचरीकृताः - ख. ग. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एवमेतद्यथोक्तं वो नानृतं वो वचः शुभम् ।
परस्पर[९४]पितृत्वं हि सर्वेषां समुदाहृतम् ॥५४॥
वरं भूय इमं[९५] मह्यं प्रयच्छत गणेश्वराः ।
- - - - - - - - - - - - - - - - - - - -।
एतेन प्रश्नमिष्टं हि कथितं द्विजसत्तम (?) ॥५५॥

पितर ऊचुः

नास्ति किंचिदविदितं भवतः प्रवरेश्वर[९६] ।
भवानस्मत्प्रमाणार्थं व्याख्यातत्त्वमिहेच्छसि ॥५६॥
ब्रूहि यद्विदितं नोस्ति कथयिष्याम तद्धि ते[९७] ।
श्रुतं वाप्यनुभूतं[९८] वा यथाशक्ति[९९] यथातथम्[१००]
- - - - - - - - - - - - - - - - - - - -। ॥५७॥

सुकेश उवाच

भवन्तो नरके घोरे परिक्लिष्टाः सुदारुणे ।
अतः श्रुतिज्ञाः सर्वेषां नरकाणामसंशयम् ॥५८॥
तेषां सतत्त्वं योगञ्च[१०१] कालभेदं तथा क्रमम् ।
तत्सर्वं श्रोतुमिच्छामि परं कौतूहलं हि मे ॥५९॥
कियन्तो[१०२] नरकास्ते च किं प्रमाणाः किमाश्रयाः[१०३] ।
किं रूपाः के च यात्यन्ते[१०४] कथं चैव सुदुःखिताः ॥६०॥
- - - - - - - - - - - - - - - - - - - ।
- - - - - - - - - - - - - - - - - - - ॥६१॥
कथं च तप्यते जन्तुर्वाच्यते (?) च कथं तथा ।
कियता चैव कालेन नरकात् स विमुच्यते ।
मुक्तश्चोत्तिष्ठते केन कथं संसरते[१०५] पुनः ॥६२॥

---

९४ परस्परं - घ. । ९५ वरन्तुदत्तं - ख. । ९६ प्रचरेश्वर - ग. । ९७ तद्विभो - घ. । ९८ वा अनुभूतं - ख., यदनुभूतं वा - ग. । ९९ वृष्टं वापि - ख. । १०० यथावलम् - घ. । १०१ त्वं - घ. । १०२ कीर्त्यन्ते - घ. । १०३ किमाश्रयात् - ख. । १०४ पात्यन्ते - घ. । १०५ सन्तरते - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एतत्सर्वमशेषेण विस्तरेण यथातथम् ।
कथयध्वं महाप्रज्ञाः परं कौतूहलं हि मे[१०६] ॥६३॥
तमुपेन्द्रपितामहेश्वरेशप्रवरेशं विदितार्थतत्त्वकोशम् ।
दुरितांकित - -मुक्तयोगं प्रतियोगं त्विदमाहुरग्रयोगम् ॥६४॥

⊙ इति स्कन्दपुरणे सुकेश[१०७] महाभाग्यं नाम षट्त्रिंशोध्याय: ⊙

सनत्कुमार उवाच

ततस्ते पितरस्तस्य प्रतिष्ठां[१] स्वसुतं प्रति[२] ।
सुशर्माणमिति ख्यातं कथयामासुरव्ययाः ॥१॥

पितर ऊचुः

अयन्ते[३] जनकः पुत्र[४] सुशर्मा लोकविश्रुतः ।
कथायिष्यति तत्त्वेन यत्त्वया समुदाहृतम् ॥२॥

सनत्कुमार उवाच

ततः सुशर्मा विप्रर्षे तमामन्त्र्य[५] महामना:[६] ।
उवाचेदं महासत्त्वं[७] सुकेशं गणसत्तमम् ॥३॥

सुशर्मोवाच

सुकेश न वयं साक्षात् पतिता नरकार्णवे ।
त्वय्यालम्बितचित्तास्तु पतिष्यामस्त्वया विना ॥४॥
किन्तु तद्यातनाभीताश्रितयामस्त्वहर्निशम् ।
कीदृशास्ते महाघोरा नरकाः श्रुतिदारुणाः ॥५॥
ततस्ते कथयिष्याम यथाप्रज्ञं यथाश्रुतम् ।
गणेश्वरेश[८] शृणु मे[९] नरका ये[१०] प्रकीर्तिताः ॥६॥

---

१०६ ...स्ततसर्वं विस्तरेण तु - घ. । १०७ पितृपक्षे - घ. ।

१ पितरं - घ. । २ सुमहाप्रभं - घ. । ३ अयन्नो - घ. । ४ पुत्रः - ग. । ५ तमोहंता - घ. ।
६ महाबलाः - घ. । ७ ... त्वं - घ. । ८ गणेश्वर त्वं - घ. । ९ ये - ख. । १० मे - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दुरासदा महादुर्गाः सर्व[११]प्राणिभयंकराः ।
प्रथमो नरकस्तत्र विश्रुतो यमलाचलः[१२] ॥७॥
द्वितीयः शालमलो नाम तृतीयः कालसूत्रकः ।
कुम्भीपाकश्चतुर्थश्च असिपत्रवनोपरः[१३] ॥८॥
तथा वैतरणी षष्ठः सप्तमश्चाप्ययोघनः[१४] ।
अष्टमः पद्म इत्येव महापद्मस्तथापरः ॥९॥
रौरवो दशमश्चैव महारौरव एव च ।
द्वादशश्च तमो नाम तमस्तमतरस्तथा[१५] ॥१०॥
एते महान्तो नरका उच्छ्रायाश्च तथापरे ।
एकैकस्योच्छ्र्या ह्यष्टौ नरकास्तेपि कीर्तिताः ॥११॥
उच्छ्रयेषु सविश्रामा यातना भवतीश्वर[१६] ।
इतरेषु त्वविश्रामो विशेषो ह्येष[१७] कीर्तितः ॥१२॥
तेषां सततदुःखं तु नृणां पापेन कर्मणा[१८] ।
भेदः क्षयाच्च[१९] पापस्य क्रमस्तेषां प्रवक्ष्यते[२०] ॥१३॥
प्रमाणं तु गणेशेह न शक्यं[२१] वक्तुमेकशः ।
विभुत्वात् कर्मणस्तस्य क्षयादन्तं प्रपश्यति[२२] ॥१४॥
नरके पतितः[२३] सर्वो नान्तं तस्य प्रपश्यति ।
क्षीणपापाः प्रपश्यन्ति यथा तच्छृणु मेव्यय ॥१५॥
पतितो[२४] नरके घोरे दुष्कृती स्वेन[२५] कर्मणा ।
यात्यमानो[२६]तिकरुणं[२७] दिशमेकां प्रपद्यते ॥१६॥
स गत्वा शीघ्रमध्वानं बहुयोजनविस्तृतम् ।
बहूनन्या[२८] ननासाद्य तस्यान्तं[२९] विनिवर्तते ॥१७॥

---

११ सर्वे - घ. । १२ यमलोचनः - घ. । १३ ...स्ततः परः - घ. । १४ यमः - घ. । १५ ततस्तमपरस्तमः - घ., स्तमोत्तमः - ग. । १६ त्वरः - ग. । १७ ह्यत्र - ख. । १८ तु पापकर्मणाम् - घ. । १९ भेदक्षयश्च - ख. । २० प्रवर्तते - घ. । २१ न शक्यं - क. ग., वै शक्यते - घ. । २२ प्रयस्यति - ग. । २३ ...तितवः - क. ग. । २४ पातितो - ख., पतते - घ. । २५ दुष्टतित्वेन - घ. । २६ पात्यमानो - घ., पात्यंमानो पि - ख. । २७ करुणां - क. । २८ ...ध्या - क. ग. । २९ तस्मातं - ग. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विनिवृत्य ततो भूयो यात्यमानो विचेतनः ।
अन्यां दिशं[३०] पुनर्गत्वा तथैव विनिवर्तते ॥१८॥
एवं सर्वा दिशो[३१] गत्वा ह्यन्तमप्राप्य दुःखितः ।
यात्यतेकरुणं तत्र न कश्चिदिह विद्यते ॥१९॥
यातनान्ते त्वकरुणं[३२] पापस्यान्ते ततः पुनः ।
प्रपश्यते[३३] परिमितं परिच्छिन्नं च सर्वशः ॥२०॥
द्वारेण महता युक्तं ततस्तस्माद्विमुच्यते ।
एवं हि नरकास्सर्वे ह्यनन्ताश्चाक्षयाव्ययाः ॥२१॥
न तेषां परिसंख्यानं योजनैस्संविधीयते ।
येन कालेन तु पुनर्जन्तुः पतति[३४] दुःखितः ॥२२॥
यथा[३५] चैतच्छृणु विभो कथ्यमानं मयानघ[३६] ।
कृत्वा पापानि कर्माणि क्षयान्ते[३७] दुष्टचेतनः[३८] ॥२३॥
व्याध्याधियुक्तः क्लेशेन त्यजति स्वान्तनून् ततः ।
यमदूतैर्महापाशैर्बद्ध्वा दुःखसमीरितः ॥२४॥
विषमेण पथा देव नीयते विकृताकृतिः[३९] ।
अयोमयैः कण्टकैश्च विध्यमानस्ततस्ततः ॥२५॥
केशमज्जास्थिपंकैश्च[४०] दिह्यमान[४१]स्समन्ततः ।
विषमेषु च गर्तेषु प्रपतन्भिद्यते पुनः[४२] ॥२६॥
क्वचिच्चोपलवर्षेण महता सन्निकीर्यते ।
तत्र भिन्नशिरोजानुपादबाहूरूबन्धनः ॥२७॥
कृष्यते यमदूतैश्च पुनः कण्टकिभिर्द्रुमैः[४३] ।
यात्यते[४४]भिद्यते चैव वल्लीभिश्चा[४५]वबद्ध्यते[४६] ॥२८॥
एवं बहुविधाकारैर्दुःखदैः पथिभिः प्रभो ।
नीयमानो वशः[४७] क्लेशान् प्राप्नोति यमसादनम्[४८] ॥२९॥

---

३० दिशां - क. ग. । ३१ सर्वदिशो - ग. । ३२ तु करुणं - ख. । ३३ प्रपश्यन्ते - क. ख. ।
३४ काले पुनः जन्तुः पथिमिः पथि - ख.। ३५ तथा - घ., वै - ख. । ३६ पतन्ति घोरेस्मिन् तत् श्रृणु ह्यपरं विभो - घ., तयानघ - ख. । ३७ क्षमन्ते - घ. । ३८ .. चेतसः - ख.,...चेतसां - घ. । ३९ ... ति - क. ग. ।
४० केशामेध्यास्थिपंकैश्च - क. घ. । ४१ दह्यमानः - क. ख. घ. । ४२ प्रतापा (प्रपाता) विष्टचेतनः - घ. ।
४३ ...वृंतः - घ. । ४४ पात्यते - ख., पाद्यते - घ. । ४५ वलिभिश्चा - घ. । ४६ .. पि वध्यते - घ. ।
४७ नीयमनः स वै - घ., वशं - क. । ४८ मयसाधनं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स ततो यममप्राप्य दूरादेव यमाज्ञया ।
चित्रगुप्तमुपागम्य श्राव्यते कर्म यत्कृतम् ॥३०॥
सोमोग्निर्वरुणो वायुः सूर्यश्चेति तदा नरम्[४९] ।
साक्षिणस्तत्र जन्तूनां[५०] ब्रुवते यत् कृताकृतम्[५१] ॥३१॥
उक्तो विभावितश्चैव चित्रगुप्तेन चोदितः ।
नरके पात्यते आर्त्ता[५२] ऊर्ध्वपादो ह्यधःशिराः[५३] ॥३२॥
तोमरै[५४]श्चातितीक्ष्णाग्रैः शरैश्चाथ परश्वधैः ।
भिन्दिपालैर्मुद्गरैश्च असिभिर्दीघवेधनैः[५५] ॥३३॥
परिघैः करपत्रैश्च वज्रैष्टंकैर्हलोपलैः[५६] ।
कीलैश्च मुशलैश्चैव क्षारपिष्टेन चैव हि ॥३४॥
प्रदीप्तैश्चायुधैर्घोरैरग्निवर्षेण चाप्युत ।
हन्यमानो दिवारात्रं विनदन्[५७] करुणं बहु ॥३५॥
वर्षाणां तु सहस्रेण नरकं प्राप्नुते शुभम् ।
स तत्र पतितो भूयो यात्य[५८]मानः सुदुःखितः ॥३६॥
वर्षकोटिमविश्रान्तं[५९] निरयान्तं प्रपद्यते ।
महानरकमुक्तश्च उच्छ्र्यान्तरमाश्रितः ॥३७॥
शीतेन वायुना स्पृष्टः सुखं[६०] तत्र स विन्दति ।
स तं विश्राममासाद्य विस्मृतो यातनां तदा ॥३८॥
मुहूर्त्तमाहृते[६१] स्वप्ने राक्षसेनापकृष्यते ।
स तेन कृष्यमाणश्च भूयो दुःखशुचार्दितः[६२] ॥३९॥
करुणं बहुधातीव[६३] प्रविलप्यावतिष्ठते[६४] ।
ततो भूयः समाकृष्य यातनायां स राक्षसः ॥४०॥
यातयत्येव[६५] तं जन्तुं सविश्रामं[६६] सचेतसम्[६७] ।
तत्र वर्षसहस्रं वै यातितः पुनरेव सः ॥४१॥

---

४९ तदान्नम् - घ. । ५० .. स्सर्वजन्तूनां - घ. । ५१ कर्म यत् - क. ग. । ५२ निपतत्यार्त - क. ग., निपतत्याशु - घ. । ५३ ...त्यधशिराः - ख., ह्यधोमुखः - घ । ५४ तैरेतै - घ. । ५५ ऋष्टिभिर्दीर्घवेधनैः - घ., ...भेदनैः - ख. घ. । ५६...जर्त्रलोपलैः - क घ. । ५७ विलपं (न्) - घ । ५८ याप्य... - घ. । ५९ ...मविश्रम्य - क. ग., स विश्राम्य - घ. । ६० दुःखं - क । ६१ मुहूर्ते प्रगते - घ. । ६२ दुःखेन चार्दितः - क. ख. । ६३ चैव - क. । ६४ विप्रलप्यावतिष्ठते - क. । ६५ पातयत्येव ? । ६६ जन्तुमविश्रामं ? । ६७ सचेतनम् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अन्यस्मिन्नुच्छ्रये घोरे यात्यते[६८] तावदेव हि ।
एवं स उच्छ्रयान् प्राप्य अष्टौ पापेन कर्मणा ॥४२॥
संसारे[६९] कृमिकीटादिजन्तुः संप्रतिपद्यते ।
ये तु गच्छन्ति तान् घोरान् नरकान्[७०] पुरुषाधमाः॥४३॥
तानहं संप्रवक्ष्यामि तव पुत्र समासतः ।
प्रथमो यो मया प्रोक्तो नरको यमलाचलः ॥४४॥
यात्यन्ते[७१] तत्र पुरुषा महानिरयगामिनः ।
पर्वतौ द्वौ महासत्वसिंहव्याघ्रसमाकुलौ ॥४५॥
शरभेभसमाकीर्णौ[७२] बहुसर्पसमाकुलौ[७३] ।
पक्षिभिर्विविधाकारैः पुरुषैश्चोद्यतायुधैः ॥४६॥
वृक्षैरपर्णैस्संयुक्तौ सूचीभिर्वज्रकण्टकैः ।
तयोरन्तरमेकं वै समं सूचीभिरावृतम् ॥४७॥
ऊर्ध्वाभिर्वज्रतुण्डाभिरभेद्याभिस्तथैव च ।
अन्यतः पुरुषैर्घोरैःशस्त्रपाणिभिरावृतौ[७४] ॥४८॥
प्राकारेण च लौहेन[७५] समन्तात् परिवारितौ ।
आकाशे चापि लौहेन तौ जालेन[७६] समावृतौ ॥४९॥
यात्यन्ते तत्र पुरुषा ये वै स्त्रियमनिच्छतीम् ।
आक्रमन्ति परक्यां[७७] वै कन्यादूषक एव च ॥५०॥
न्यासापहारकश्चैव तथा मांसापहारकः[७८] ।
रसापहारकश्चैव यश्चापि परदूषकः ॥५१॥
इन्द्रियग्रामघाती च मिथ्यालिङ्गी तथैव च[७९] ।
मृगश्वापदहन्ता च पृष्ठमांसाशिनश्च ये ॥५२॥

---

६८ पात्यते - घ. । ६९ संसारं - क. घ., ...र - ख. ग. । ७० तं घोरं नरकं - क. ख. घ. । ७१ पात्यन्ते - घ. । ७२...र्णँ - ग. । ७३ समाकुलैः - ग. । ७४ ...रावृतैः - क. । ७५ लोहेन - क. ख. ग. । ७६ तोजलेन - ख. । ७७ पराक्यां - क., पाराक्य - ग., परकीयां ? ७८ मांसागहारका: - घ. । ७९ मिथ्यालापिन एव च - घ, मिथ्यालिङ्ग - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वृथामांसाशिनो ये च हिंसां[८०] ये च प्रकुर्वते ।
एते नराधमाः पुत्र गच्छन्ति यमलाचलम्[८१] ॥५३॥
यमलेषु[८२] च जातेषु[८३] यो न कुर्यान्नराधमः ।
प्रायश्चित्तमशुद्धात्मा स च तं प्रतिपद्यते ॥५४॥
स प्रसन्नो यथोक्तैस्तैः पुरुषैः समभिद्रुतः ।
आयुधैश्छिद्यमानश्च[८४] पर्वतं तं प्रपद्यते[८५] ॥५५॥
तत्र व्याघ्रैश्च[८६] कुपितैः शरभैश्च[८७] तरक्षुभिः ।
सर्पैर्विडालैः पतगैरयस्तुण्डैश्च भक्ष्यते ॥५६॥
तैर्भक्ष्यमाणो यदि च वृक्षं समधिरोहति ।
तत्र तैः कण्टकैस्तीक्ष्णैर्भिद्यते[८८] पक्षिभिश्च ह ॥५७॥
अथ चेत् कन्दरां तस्य गुहां वा यातुमिच्छति ।
तत्रापि ह्यग्निना दग्धो दुःखार्त्तो विनिवर्तते ॥५८॥
अथ चेदन्तरं घोरं तयोः संप्रतिप्रद्यते ।
तत्र सूचीभिरुग्राभिः[८९] पादयोर्भिद्यते नरः ॥५९॥
भिन्नश्च तं समालक्ष्य[९०] ह्यशक्तमपसर्पणे ।
समागमस्याचलौ क्षिप्रं पीडयेतामतीव हि ॥६०॥
पीड्यमानोचलाभ्यां स[९१] यन्त्रेणेक्षुवदातुरः ।
करुणं क्रन्दमानस्तु यातनां तां समश्नुते ॥६१॥
भक्षितस्याथ भिन्नस्य विलुप्तस्य च पक्षिभिः ।
दग्धस्य च नवं भूयः शरीरमभिजायते ॥६२॥
एवं स यात्यमानो[९२] वै बहूनब्दान् सुःदुखितः ।
द्वारं लब्ध्वा विनिर्यात[९३] उच्छ्रायेषु[९४] निपात्यते ॥६३॥

---

८० वृपं - क. ग, विंश - ख । ८१ यमलोचनं - घ. । ८२ अपराधेपु - घ. । ८३ यातेषु - घ. ।
८४ ...शिछद्यमानाश्च - क. ग., छिद्यतेतमं - ख. । ८५ स च तं प्रतिपद्यते - ख. । ८६ सिंहैश्च - ख. ।
८७ शार्दूलैस्स - ख. । ८८ ...र्भक्ष्यते - ब. । ८९ सूचिभिरुग्राभिः - ग. । ९० ससालोक्य - घ ।
९१ च - क. ख. । ९२ पात्यमानो - घ. । ९३ विनिःसृत्य - क. ख. घ. । ९४ उच्छ्रयेपु - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यमलाचलमेतमुग्रवेगं बहुधापापसमेत[९५]कर्मयोगम् ।
शृणुयाद्य अभीक्षणशोतिवेगं स न यात्येव[९६] तमुग्रपापयोगम् ।।६४।।

⊙ इति स्कन्दपुराणे नरकवर्णने यमलाचलकथनं नाम सप्तत्रिंशोध्यायः ⊙

सुशर्मोवाच

अतः परं प्रवक्ष्यामि शाल्मलीनरकं पुनः ।
यात्यन्ते[१] तत्र पुरुषाः सुभृशं[२] पापकर्मिणः ।।१।।
शाल्मलीनां सहस्राणि बहूनि प्रवरेश्वर ।
उच्चास्सर्वाश्च ता घोरा बहुयोजनविस्तृताः ।।२।।
महाशाखा महापत्रा महाकण्टकसंयुताः[३] ।
लौहेन महता चैव प्राकारेणाभिसंवृताः ।।३।।
जालेन महता सर्वा[४] उपरिष्ठान् समावृताः ।
पुरुषास्तत्र तिष्ठन्ति बहवो रुषिताननाः ।।४।।
वज्रदण्डोपलधरा[५] असिमुद्गरधारिणः ।
अन्यैश्च विविधाकारैरायुधैर्वृतपाणयः[६] ।।५।।
यातयन्ति[७] भृशं जन्तूनवशास्ते[८] सुदारुणाः[९] ।
छिद्यमानाश्च तत्रापि राक्षसैः क्रूरकर्मभिः ।।६।।
दिशः प्रपद्यते सर्वा वेदनार्तः सुदुःखितः ।
व्रजते यत्र यत्रासौ तत्र तत्राभिहन्यते ।।७।।
गर्तेषु पतितं चैव राक्षसाः प्राप्य सर्वशः ।
शस्त्रैश्च विविधाकारै[१०]र्निकृन्तन्त्यतिदारुणाः[११] ।।८।।

---

९५ वहु पापस्य सहैत - ख. । ९६ याति - क. ख. ग. ।

१ पतन्ति - घ. । २ स्वदृशं - घ. । ३ महाकंटकिभिद्रु॑माः - ख. । ४ सर्वमुपरिष्टात् - घ. । ५ टंकोपलधारा - ख. ग. । ६ धृ (धूं) तपाणयः - ख. घ. । ७ पातयन्ति - क. ख. ग., घातयन्ति - घ. । ८ मुखरास्ते - घ. । ९ सदावशाः - घ. । १० अन्यै नानाविधाकारै - क. । ११ निकृत्यन्तेतिदारुणैः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

श्रावयन्तः[१२] पुरानेन[१३] कृतं पापं दुरात्मना[१४] ।
भर्त्सयन्तश्च[१५] दुर्वृत्तं पतितं क्वचिदेव हि[१६] ॥९॥
तत उत्थाय भिन्नाङ्गः सोनुबद्धश्च राक्षसैः ।
सूचीकण्टकसंयुक्तं देशमन्यं प्रपद्यते ॥१०॥
तत्र सूचीभिरुग्राभिः कण्टकैश्चायसैः पुनः ।
भिद्यमानो नदन्[१७] दुःखान्निपतत्यतिदुःखितः ॥११॥
तत्राप्येनं समासाद्य विविधायुधपाणयः ।
राक्षसाभिद्रवन्त्येव[१८] वैरिणो[१९] वैरिणं[२०] यथा ॥१२॥
तस्मादुत्थाय[२१] वेगेन वृक्षं यद्यभिरोहति ।
तत्र[२२] तैः कण्टकैस्तीक्ष्णैर्भिद्यते छिद्यतेपि च[२३] ॥१३॥
पत्रैश्च[२४] विविधाकारैरयस्तुण्डैश्च पक्षिभिः ।
हृतकर्णाक्षिनासोष्ठः पतितो धरणीतले ॥१४॥
तत्र सूचीभिरुग्राभिः सर्वाङ्गेषु विभिद्यते ।
एवं बहुविधाकारा यातनास्तत्र दुःखिताः ॥१५॥
प्राप्नुवन्ति दुराचारा ये तान्निगदतः[२५] शृणु ।
अग्निदो गरदाता च वियोनौ[२६] यश्च गच्छति ॥१६॥
पुंसि यो वोच्छृजेच्छुक्रं[२७] विषदो मांसविक्रयी ।
समुद्रयायी दुष्टात्मा यश्चैको मिष्टमश्नुते[२८] ॥१७॥
अतिथिन्नार्चयेद्यश्च[२९] यश्च मिथ्याव्रती भवेत्[३०] ।
ब्रह्मोज्झश्च[३१] विवासाश्च[३२] योपः प्रविशते द्विजः[३३] ॥१८॥
घण्टिको ग्रामयाजी च शूद्राध्यापक एव च[३४] ।
तथा वार्धुषिको लुब्धो[३५] ब्रह्मणश्चैव विक्रयी[३६] ॥१९॥

---

१२ श्रावयन्ते - ख. । १३ पुराणानि - घ । १४ महाबलाः - क. ग. घ. । १५ ...न्त्येव - ख. । १६ केचिदेव हि - क. । १७ रुदन् - घ. । १८ ...भिभवन्त्येवं - घ. । १९ वैरिणं - घ. । २० वैरिणो - घ. । २१ अस्मादुत्याय - ख. घ. । २२ अत्र - ख. । २३ वा - ख. । २४ यन्त्रैश्च क. ख. । २५ तान्मे निगदतः - ग.,...मेतान्निगदितान् - घ. । २६ अयोनौ - क. घ. । २७ विन्यसे... - क. घ., च्छृजते शुक्रं - ख., गर्भं - घ. । २८ मृष्टमश्नुते - क. । २९ अतिथीन्नार्चयेद्यश्च - घ., यस्तु - ख. घ. । ३० मिथ्याचरति यो व्रती (तं) - ख., मिथ्याप्रवी (ब्रुवो) - क. । ३१ ब्रह्महा - घ. । ३२ विवस्त्रश्च - ख. । ३३ नरः - ख. । ३४ देवद्रव्यापहारकः - घ. । ३५ ..कान्नाध्वा - घ. । ३६ विक्रेता चैव ब्रह्मणः - ?...विक्रेता ब्रह्मणस्तु- यः घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एते गच्छन्ति दुर्वृत्ताः कूटशाल्मलिसंज्ञकम्[३७] ।
कोटीद्वयेन तूत्तीर्णा[३८] वर्षाणां वै पुनश्च[३९] ते ॥२०॥
उच्छ्रये[४०] पातिताः[४१] स्तोकं कालं विश्राम्य वै पुनः ।
पात्यन्ते नरके तस्मिन् यावत् क्षीणं तदेनसम् ।
एषैव विधिरन्येषां नरकाणां मुने स्मृतः[४२] ॥२१॥
य इमं[४३] भृशदुःखितोपलम्भं[४४] सुकृतीनामतिदुर्गमाचलम् ।
शृणुयात् प्रयतः कुतूहलात्मा न स गच्छेन्निरयं हि शाल्मलम्[४५] ॥२२॥

⊙ इति स्कन्दपुराणे नरकवर्णने कूटशाल्मलिकथनं नाम अष्टत्रिंशोध्यायः ⊙

सुशर्मोवाच

अतः परं प्रवक्ष्यामि[१] नरकं कालसूत्रकम्[२] ।
समन्तान्महतोच्चेन प्राकारेण सुसंवृतम्[३] ॥१॥
लोहजालेन च तथा आकाशेप्यभिसंवृतः ।
यथैकश्च तथा सर्वे नरका अभिसंवृताः ॥२॥
सोच्छ्रयाश्चैव विज्ञेया न वक्ष्ये तानहं[४] पुनः ।
लोकद्रुहो[५] जनास्तत्र यात्यन्ते[६] पुरुषाधमाः ॥३॥
ये हरन्ति स्त्रियं[७] वापिविक्रेता[८] यस्तथा[९] गवाम् ।
धर्मस्य चात्मनश्चैव ब्राह्मणानां च निन्दकः ॥४॥
छद्मना यश्च शास्त्राणि[१०] गुरुभ्योपह्नवेत्[११] पुनः ।
गुरुं निन्दति यश्चापि[१२] पितरं मातरं तथा ॥५॥

---

३७ ...संज्ञके - ख. । ३८ ...द्वयं तु संयात्य - ख., द्वयं तु तत्तीर्णा - घ. । ३९ पुरं च - ख. । ४० उत्थाय - घ. । ४१ पतिताः - घ. । ४२ ... णामुपस्मृतः - घ. । ४३ इदं - ख. । ४४ ...पलभ्यं - घ । ४५ सांप्रतं - घ., शाल्मलिम् - ख. ।

१ अतः परस्तृतीयस्तु - क., तृतीयन्तु - ख. । २ नरकः कालसूत्रकः - क. । ३ सुसंवृतः - क. । ४ तदहं - क. । ५ शोकद्रोहं - क. ख., शोकद्रोहकरा - घ. । ६ पात्यन्ते - घ. । ७ श्रियं - घ. । ८ वाजिविक्रेता - ख., चाश्वं - घ. । ९ विक्रेतारस्तथा - घ. । १० दत्त्वा चैव महद्द्रव्यं - घ. । ११ शिक्षा निह्नुवेत् - ख. । १२ यो गुरुं निन्दते चापि - क., शास्त्रं गृह्य गुरुं निन्देत् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

श्वशुरं भ्रातरं ज्येष्ठं[१३] तथा चान्यान् गरीयसः ।
आक्रोशयति[१४] यस्तान्वै तथा चाप्यवमन्यते ॥६॥
आश्रमाणां तथा भेत्ता रहस्यानां च सर्वशः ।
अदत्तां यः समादद्यात् स गच्छेद् द्विज तत्र वै[१५] ॥७॥
ते तत्र पतिता घोरे नरके पापचेतसः ।
तिस्रः कोटीस्तु संपूर्णा वर्षाणान्तु नराधमाः ।
यात्यन्ते मृत्युवचनात्[१६] क्रन्दमाना विचेतसः ॥८॥
कालसूत्रेण महता भित्वा भित्वा तु दुष्कृतम् ।
छिन्दन्त्यङ्गानि जन्तूनां कुण्ठाग्रै रायुधैर्भृशम् ॥९॥
किंकरैस्तैरविश्रान्तं[१७] दिवारात्रमतन्द्रितैः[१८] ।
पूर्णे काले[१९] ततो जंतुरुच्छ्रयान्[२०] प्रतिपद्यते ॥१०॥
विश्राम्य स तदा जन्तुः पात्यते[२१] नरके पुनः ।
यावदस्य कृतं पापं क्षीणं सर्वमशेषतः ॥११॥
य इमं बहुपापकर्तृ सूत्रं शृणुयाद् दुष्करलोककर्मसूत्रम् ।
न स याति[२२] तदुग्रदुःखसूत्रं नरकं तद् यमलोककालसूत्रम् ॥१२॥

⊙ इति स्कन्दपुराणे नरकवर्णने कालसूत्रं नाम ऊनचत्वारिंशत्तमोध्यायः ⊙

सुशर्मोवाच

अतः परं प्रवक्ष्यामि कुम्भीपाकं महाभयम् ।
श्रोतॄणामपि तत्कालं[१] भयदं ह्यकृतात्मनाम् ॥१॥
आयस्यस्तत्र बह्वयश्च अञ्जनाचलसन्निभाः ।
कुम्भ्यस्तैलेन[२] संपूर्णा वह्निवर्णाः[३] सुदुःसहाः ॥२॥
दुष्कृतीन्[४] तासु तप्तासु[५] बद्ध्वा बद्ध्वा महाबलाः[६] ।
क्षिपन्ति[७] राक्षसा घोराः[८] क्रन्दमानाः सुभैरवम् ॥३॥

---

१३ श्रेष्ठं - घ. । १४ आक्रोश...- क. । १५ कालसूत्रकम् - ख. । १६ मृत्युवदनात् - ख. । १७...रविश्रान्तै - ख. ।
१८ रात्रावतन्द्रिताः - ख., ...तं - क. । १९ गते काले - घ. । २०...राश्रयं - घ. । २१ जन्तुर्जायते - घ. ।
२२ गच्छति - ख. ।

१ यं श्रुत्वा - ख. । २ कुम्भास्तैलस्य - क. । ३ वह्नितप्ताः - ख. । ४ दुष्कृतीनां - क. । ५ सुतप्ताश्च - क.,
६ भयावहाः - क., महाबलैः - ख. । ७ क्षिप्यन्ते - ख. । ८ राक्षसैर्घोरैः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वर्षकोटीश्चतस्रश्च[९] पच्यन्ते तत्र जन्तवः ।
ये तानिमान्निबोध त्वमुच्यमानान्मया विभो ॥४॥
इष्टकापाककारी[१०] च कुम्भपाककरस्तथा[११] ।
तौ विनाशयते यश्च अग्निदो यो[१२] गृहेषु च ॥५॥
वने खलेथ गोष्ठे वा अन्नपानविनाशकः ।
भोजने विघ्नकारी च यज्ञहा यज्ञदाहकः ॥६॥
कूटकर्मकरो यश्च कूटसाक्षी तथैव च ।
मिथ्याग्निचयनी चैव मिथ्याग्न्याहरणी तथा ॥७॥
मिथ्यापाकप्रदाता च वेदानां यश्च दूषकः ।
हर्तोपकरणानां च शिल्पिनां यो नराधमः ॥८॥
एवं ते यातितास्तत्र विश्रामं पुनरुच्छ्रये ।
संप्राप्य नरके भूयो निपतन्ति क्षयान्तिकम् ॥९॥
य इमं बहुदुष्कृतान्तपाकं शृणुयाद्वा मनुजो हि कर्मपाकम् ।
न स गच्छति तं दुरात्म[१३]पाकं[१४] नरकं साधनदुःखकुम्भिपाकम्[१५] ॥१०॥

⊙ इति स्कन्दपुराणे नरकवर्णने कुम्भीपाको नाम चत्वारिंशोध्यायः ⊙

सुशर्मोवाच

अतः परं प्रवक्ष्यामि असिपत्रवनं पुनः[१] ।
नरकं पापकृद्दुःखं[२] सर्वसत्वभयंकरम् ॥१॥
असिपत्र[३] इति ख्याता वृक्षास्तत्र दुरासदाः ।
बहवः सुमहाशाखा घनाश्चोच्चाश्च[४] ते भृशम् ॥२॥
तेषां पत्राणि घोराणि तीक्ष्णान्यसिनिभानि च ।
आयसेभ्यो विशिष्टानि न च तान्यायसानि हि[५] ॥३॥

---

९ सहस्रं च - घ.,...श्च चतुरः - ख. । १० ...पात्रकारी - क. । ११ कुम्भपाचक एव तौ (च) - क. घ. ।
१२ अग्निदाता - ख. । १३ दुरन्त (?) । १४ तापं - क. ।
१५ कुम्भिससाख्यदुःखपाकं - क. ।
१ ततः - ख. । २ पापिनां दुःखं - ख. । ३ असिपत्रा - घ. । ४ मनोदुःखकराश्च - घ. ।
५ तान्यायतानि च - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तैक्ष्ण्यात्तानि विशिष्टानि छेदने च महामते ।
तैः पत्रैराचिताश्चैव तथा कण्टकिनश्च[६] ते ॥४॥
जन्तवस्तत्र रक्षोभिः पापकर्मनिबन्धनाः[७] ।
बध्यमानासिमुशलैस्तथैवान्यैर्महायुधैः[८] ॥५॥
अग्निना दह्यमानाश्च वृक्षाँस्तान् संप्रयान्ति[९] ते ।
तानागतान् समीक्ष्यैव पर्णानि प्रपतन्त्युत[१०] ॥६॥
महागुरूणि तीक्ष्णानि विनिकृन्तन्ति[११] ताँश्च ह ।
ते निकृत्तशिरोग्रीवा देशात्तस्मात् प्रयान्ति वै ॥७॥
ते गता[१२] राक्षसैर्भूयो भूयो वृक्षैर्दुरासदैः ।
यात्यन्ते[१३] वर्षकोटीस्तु तत्र पञ्च सुदुःखिताः ॥८॥
ततो विमुक्तास्तेभ्यस्ते उच्छ्र्यान् संविशन्ति हि ।
विश्रान्तास्तत्र ते सर्वे[१४] उच्छ्र्यान्नरके पुनः ॥९॥
पात्यन्ते विवशा मूढा यावत् पापं क्षयं गतम् ।
ये तु तं नरकं घोरं नरा गच्छन्ति पापिनः ॥१०॥
ताँस्तेहं संप्रवक्ष्यामि शृणुष्वावहितो द्विज ।
वृक्षं यः पुत्रकृतकं विनाशयति दुर्मतिः ॥११॥
आरामे वाथ ग्रामे वा विक्रीणाति च दुर्मतिः ।
निष्पादितं तथा वृक्षमाश्रमे पथि वा पुनः ॥१२॥
तडागे वा तथोद्याने देवतायतनेषु वा ।
गृहे प्रपायामथवा नद्यास्तीरे चतुष्पथे ॥१३॥
यत्र वा तत्र वा जातं[१५] यो नाशयति दुर्मतिः ।
पादपान् गुल्मवल्लीर्वा क्षुपानथ तृणान्यपि ॥१४॥
छायापुष्पफलार्थं हि[१६] स्वकार्यकरणाय वा[१७] ।
विनाशयति यो मूढः स च तं प्रतिपद्यते ॥१५॥

---

६ वै कटकेन - क. । ७ कर्मपाकनिबन्धनाः - ख. । ८ पात्यंते च महायसि - घ. । ९ संश्रयन्ति - ख. । १० स्म पतन्त्युत - क. । ११ विनिवृत्तानि - ख. । १२ गत्वा - घ. । १३ पात्यन्ते - घ. । १४ सत्वा - घ, सर्वादुच्छ्र्या... - क. । १५ तान् - घ. । १६ फलैर्युक्तं - घ. । १७ च - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यश्चापहरते[१८] मूलं[१९] पुष्पाणि च फलानि च ।
आत्मार्थं कामसंपत्तौ[२०] न देवपितृकारणात्[२१] ॥१६॥
नदीं यश्चावरुध्नीयात् कूपान्यश्च प्रपूरयेत् ।
यश्च पर्णत्वचामर्थे[२२] वृक्षं छिन्द्यान्नराधमः ।
विनाशयेद्वा तं वृक्षं स च तं प्रतिपद्यते ॥१७॥
यश्च छायासमासन्नान्[२३] जन्तून् वै संप्रबाधते ।
स्वस्थानं च समासन्नान् त्रासयेद्वारयेदपि ॥१८॥
सर्वे ते तं प्रपद्यन्ते[२४] सोच्छ्रयं नरकं महत् ।
उत्तीर्णाश्च ततो भूयः संसारं यान्ति तेशुभाः[२५] ॥१९॥
य इमं श्रृणुयादतन्द्रितात्मा नरकं पापकृतामशर्मभूतम् ।
न स तं समुपैति पुण्यकर्मा[२६] विदितात्मा ह्यसिपत्रनामधेयम् ॥२०॥

⊙ इति स्कन्दपुराणे नरकवर्णने असिपत्रवनं नाम एकचत्वारिंशोध्यायः ⊙

सुशर्मोवाच

अतः परं वैतरणीं नदीं पापप्रणाशनीम्[१] ।
श्रृणुष्वावहितः[२] पुत्र पापकर्मभयावहाम्[३] ॥१॥
नदी वैतरणी पुत्र टङ्कच्छिन्नतटा शुभा ।
केशास्थिरुधिरापूर्णा महाक्षाररसा तथा[४] ॥२॥
उल्लुम्पकै[५]र्गर्दभकैर्मकरैः कच्छपैरपि ।
शिशुमारैश्च नक्रैश्च तन्तुकै राक्षसैरपि ॥३॥
महादंष्ट्रैर्महाकायैः पिशिताशैः समाकुला[६] ।
असिपत्रैश्च तैर्वृक्षै[७]स्तीरजातैः[८] समावृता ॥४॥

---

१८ यश्चापि हरते - ख., यस्याप... - घ. । १९ मूढः - क. ख. । २० कामसम्पन्नो - घ., ... सन्मत्तो - क. । २१ द्विजकारणात् - घ. । २२ ... र्थेन - ख. । २३ छायां - क. । २४ तं प्रतिपद्यन्ते - ख. । २५ शुभ - घ. । २६ ...मुग्रकर्मा - घ. ।

१ सर्वपापप्रणाशनीम् - घ. । २ श्रृणुमेव हितः - क. । ३ भयावहं - ख. । ४ ...स्तथा - क. ख. । ५ उल्म्पकै - क., उच्चपक्षै - घ. । ६ समाकुलं - ख. । ७ स्तथा वृक्षै - घ. । ८ तीरजैश्च - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शैवलेन च दीर्घेण वितानेनेव संवृता[९] ।
तस्यास्तीरे वनं घोरं शरभर्क्षसमाकुलम् ॥५॥
व्याघ्रद्वीपिसमाकीर्णं सिंहेभखरसंकुलम्[१०] ।
तत्र दुष्कृतकर्माणस्तैर्व्याघ्रादिभिरर्दिताः ॥६॥
तां नदीं सुमहाघोरां पात्यन्ते[११] दुःखितास्ततः[१२] ।
तत्र ते पतिता वत्स तन्तुकैः[१३] शैवलेन च ॥७॥
वितानेन च संनद्धा[१४] भक्ष्यन्ते तैर्झषादिभिः ।
क्षारोदकेन दह्यन्तो[१५]नादयन्तश्च दुःखिताः[१६] ॥८॥
षड् वर्षकोटीः[१७] यात्यन्ते[१८] यावत् पापस्य संक्षयः ।
ततो मुक्तास्तूच्छ्रयेषु पात्यन्ते[१९] वै पुनः पुनः ॥९॥
विश्रान्तास्तत्र ते सर्वे[२०] उच्छ्रयान्[२१] नरके[२२] पुनः ।
पात्यन्ते विवशा मूढा यावत् पापं[२३] क्षयं गतम्[२४] ॥१०॥
उत्तीर्णः सोच्छ्रयानेतान् संसारं प्रतिपद्यते ।
तीर्णोन्तिमेषु[२५] च पुनर्नरकेषु पृथक् पृथक् ।
कोटिरेका तु कालस्य वर्द्धते ह्युत्तरोत्तरम् ॥११॥
उच्छ्रयाणान्तु सर्वेषामेकैकस्य पृथक् पृथक् ।
सहस्रं वर्द्धते पुत्र वर्षाणां वै समासतः ॥१२॥
ये तु गच्छन्ति तं घोरं नरकं दुष्टचेतसः ।
शृणुष्व[२६] तानिमान् सम्यगुच्यमानान्मयानघ ॥१३॥
सरितं योभिशपते यश्चैनामवमन्यते ।
यश्च नग्नः प्रविशति स्त्रियं यश्चात्र गच्छति[२७] ॥१४॥
निष्ठीवेदथ मूत्रं वा पुरीषं वाप्यथोत्सृजेत् ।
अपश्च[२८] हरते यस्तु क्षेत्रारामजनोपगाः ॥१५॥

---

९ ...नाभिसंवृता - क. घ., न च (?) । १० ...नरसंकुलम् - क. ख. घ । ११ यात्यन्ते - घ. । १२ ...स्तथा - ख. । १३ उल्वकैः - घ. । १४ संबद्धा - क. । १५ दह्यन्ते - ख. । १६ रावयन्तस्सु दुःखिताः - ख. । १७ वर्षकोटिं भृशं तद्वै - क. । १८ पाच्यन्ते - क., पात्यन्ते (?) । १९ यात्यन्ते - ख. । २० सर्वा - क., गत्वा - ख. । २१ उच्छ्रये - क. । २२ नरकं - क. ख. । २३ पापः - ख. । २४ गतः - ख. । २५ तीव्रोत्तमेषु - घ. । २६ शृणुष्वे (ष्वै) - क. ख. । २७ ...नुगच्छति - क. घ. । २८ आपश्च - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अपां सेतुहरश्चैव तडागस्य च भेदकः ।
तथा पुष्करिणीनां च दूषको यश्च मानवः ॥१६॥
दुष्टामदुष्टामथवा यश्च नारीं प्रदूषयेत् ।
पद्मिनीं यश्च[२९] हरति नाशयेद्वापि[३०] दुर्मतिः ॥१७॥
सार्थस्य वाथ जन्तोर्वा यो जन्तुर्भयमावहेत्[३१] ।
ते सर्वे नरकं घोरं प्रपद्यन्ते नराधमाः ॥१८॥
य इमामशुभप्रणाशनीं शृणुयान्नित्यमशुद्धवाधनीम्[३२] ।
प्रयतः स न याति भावनीं[३३] सरितं वैतरणीमसङ्गिनीम्[३४] ॥१९॥

⊙ इति स्कन्दपुराणे नरकवर्णने वैतरणीनाम द्विचत्वारिंशोध्यायः ⊙

अतः परं प्रवक्ष्यामि नरकं पापनाशनम्[१] ।
अयोघनमितिख्यातं[२] सर्वप्राणिभयङ्करम्[३] ॥१॥
यत्र ते पुरुषा घोरा यमाभा यमकिङ्कराः ।
महाबला महासत्वाः सर्वेयोगेश्वरास्तथा ॥२॥
अयस्कारा यथा पिण्डमयसोग्निप्रतापितम् ।
संदंशेनाभिसंगृह्य[४] स्थापयित्वायसे घने ॥३॥
अभिघ्नन्ति घनैरन्यैस्तथा तत्रापि जन्तवः ।
हन्यन्ते राक्षसैर्घोरैस्तर्जयद्भिः[५] सुदारुणम् ॥४॥
वर्षकोटीस्तथा[६] सप्त यातिताः[७] स्वेन कर्मणा ।
उच्छ्र्येषु[८] तथा घोरां यातनां प्राप्नुवन्ति ते ॥५॥
एतद्[९] ये यान्ति पुरुषाः सोच्छ्र्यं नरकं महत् ।
तानहं संप्रवक्ष्यामि अनिर्देश्यान् नराधमान् ॥६॥

---

२९ यस्तु - ख. । ३० नाशयेद्वाथ - ख. । ३१ पथि स्थां वा गृहे वापि सर्पानां वा भयंकरः - ख. । ३२ ...मधर्मवाधन्नीम् - ख., ...वाहिनीम् - घ. । ३३ भाविनीं - घ. । ३४ विमर्दिनीं - घ. ।

१ चातिदारुणं - घ. । २ अयोजनमितिख्यातं - क. ग., ...सन - घ. । ३ ...पापिभयङ्करम् - घ. । ४ ...पि संगृह्य - क. । ५ तर्जयन्ति - ख. घ. । ६ कोटिसमा - घ. । ७ पातिताः - क., जायंन्ते - घ. । ८ जातेषु च - घ. । ९ एते - क., एवं - घ., एतं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पादेन[१०] हन्यात् पितरं मातरं पूज्यमेव वा ।
अन्यां[११] काञ्चित्[१२] स्त्रियं[१३] वापि हस्तेनाथ कशादिभिः[१४] ॥७॥
तथा प्रवजितं[१५] चैव अग्नि वाप्यथ लंघयेत् ।
बालमर्थकृते यश्च मृत्युना योजयेत्तथा ॥८॥
स्त्रियं वाथ पुमांसं वा क्लीवं वान्यन्नराधमः ।
भ्रातॄन् यश्चाभि[१६]सन्धत्ते[१७] द्रव्ये कस्मिश्चिदेव हि ॥९॥
पितरं वाथ दुर्बुद्धिर्मातरं भगिनीमपि ।
पतिर्यश्चैव भार्यां स्वां पुत्रांश्चैवाभिसंधयेत्[१८] ।
भार्या पतिं वा पुत्रान्[१९] वा तेषां सा[२०] गतिरुच्यते ॥१०॥
कीलयेद्यश्च देवार्चा[२१]स्तीर्थानि च दुरात्मवान् ।
विद्याः शास्त्राणि दिव्यानि तेषां सा गतिरुच्यते ॥११॥
य इमं बहुपापयोगकारणं शृणुयान्नित्यमसौख्यसर्वदारणम् ।
प्रयतस्स[२२] न याति तं भयानकं नरकं दुर्गमयोघनावतानकम् ॥१२॥

⊙ इति स्कन्दपुराणे नरकवर्णने अयोघनं नाम त्रिचत्वारिंशोध्यायः ⊙

सुशर्मोवाच

अतः परं पद्ममहं प्रवक्ष्यामि सुदुर्गमम् ।
सुकृतीनामलभ्यं च दुष्कृतीनां भयावहम् ॥१॥
तत्राग्निस्तापनो नाम धम्यमान[१] इव ज्वलन् ।
जन्तवस्तत्र ताप्यन्ते[२] वह्निवर्णा[३] भवन्ति च ॥२॥
पद्मपत्रनिभास्सर्वे धाम्यमानास्ततस्ततः ।
तस्य मध्ये महास्तम्भो[४] लौहः[५] समवतिष्ठते ॥३॥

---

१० पानेन - घ. । ११ अन्यं - क. घ. । १२ कश्चित् - क., किंचित् - घ. । १३ प्रियं - घ. । १४ कशादिना - ग. । १५ प्रव्रजितां - ख. । १६ भ्रातृव्यं वा - ख., भ्रातृभ्यश्चा - ग. । १७ ...श्चापि न्धत्ते - क. ग., ...तिसंधत्ते - ख., ...पिसवृते - घ. । १८ ...तिसंधयेत् - क. । १९ स्वपुत्रान् - घ., स्वपुत्रं - ख. घ. । २० का - घ. । २१ देवान् कीलयते यश्च - ख. । २२ प्रणतः स - क. ग. घ. ।

१ धूप्मान - घ. । २ पात्यन्ते - घ. । ३ वर्म - ख. । ४ महान् स्तम्भो - घ. । ५ लोहः - क. ख. घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तं ते गत्वा प्रगूहन्ति[६] सोप्यग्निरतिदारुणः ।
एवं तत्रानिशं घोरं यातिता[७]स्तूच्छ्र्येष्वपि ॥४॥
नरास्तं यान्ति निःसङ्गं[८] ये तान्मे[९] त्वं निशामय ।
गुरुभार्यां च यो गच्छेद् गुरुस्वं वा[१०] हरेत यः ॥५॥
देवद्रव्यं भक्षयेद्यो[११] नाशयेद्वा[१२]प्यभीक्ष्णशः ।
ब्राह्मणस्वं हरेद्यश्च बलाद्धारयतेपि वा ॥६॥
बालद्रव्यापहारी च हर्ता वा स्त्रीधनस्य च ।[१३] ।
क्लीबाँश्च[१४] त्यजते यश्च यो हन्याच्छरणागतम्[१५] ॥७॥
धनं चास्याभिमन्येत[१६] देवद्रव्यहरश्च[१७] यः[१८] ।
सर्वभक्ष यः स्याद् वै यश्च पानीयविक्रयी ॥८॥
सोमविक्रयिकश्चैव अग्नयुत्सादक[१९] एव च ।
अग्निप्रहरणो[२०] यश्च विषप्रहरण[२१]श्च यः ॥९॥
अशस्त्रं यश्च संग्रामे हन्याच्छस्त्रेण मानवः[२२] ।
याचमानं तथा[२३] चैव उपविष्टमथापि वा[२४] ॥१०॥
पराङ्मुखं च संसक्तमन्येन[२५] सह वादिनम् ।
एते सर्वे नरास्तत्र गच्छन्त्यकृतबुद्धयः ॥११॥
य इदं[२६] शृणुयात् कृतान्तसद्म प्रयतो नित्यमनेकदुःखसद्म[२७] ।
स न याति तमुग्रशोकपद्मं[२८] नरकं मृत्युमिवाति[२९] कालसद्म ॥१२॥

⊙ इति स्कन्दपुराणे नरकवर्णने पद्मो नाम चतुश्चत्वारिंशोध्यायः ⊙

---

६ प्रगृह्णन्ति - क. ग., तें गत्त्वा प्रतिगृह्णन्ति - ख., तु गृह्णन्ति - घ. । ७ पातिता - क. । ८ निःशंका - घ. । ९ पतन्ति - ग., ये पापस्तान् - घ. । १० गुरुः श्वश्रुं - घ., गुरोर्वित्तं - ख. । ११ ...च्च - क. ख. ग. । १२ ...च्चा - ख., ...न्ना - घ. । १३ स्त्रीधनस्य तथैव च - क. ख. घ. । १४ क्रीडांश्च - घ. । १५ हन्याच्छरणमागतां - ख., ...मागतान् - घ. । १६ धर्मिष्ठां चावमन्येत - ख., धनंवाप्य... - घ. । १७ परद्रव्यहरश्च - घ., ...हराश्च - घ. । १८ ये - क. । १९ अग्न्युत्सादी च - ख । २० अग्नि प्रहरते - ख., प्रहराणश्चैव - घ. । २१ विप्रांश्च ते च - ख. । २२ वा - पुनः - घ. । २३ याचमानस्तथा - घ. । २४ च - क. टि. । २५ न्यैश्च - ख. । २६ इमं - क. ख ग । २७ ...सद्मं - क. ख. । २८ पद्म - ग. । २९ ...रिवाति - क. ख. ग, ...रिवादि - ग. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सुशर्मोवाच

महापद्मस्ततश्चान्यो निरयो रोमहर्षणः ।
यत्र[१] ते किङ्करा घोरा[२] यमस्य यमसंनिभाः[३] ॥१॥
जन्तूनामायुधैः कुण्ठै[४]र्निघृणाः पापकर्मिणाम् ।
उत्कृत्योत्कृत्य मांसानि तेभ्यो यच्छन्ति वै पुनः ॥२॥
ते भक्षयित्वा मांसानि स्वानि दुष्कृतकारिणः ।
पद्मपत्रनिभा जाता धाम्यन्ते[५]ऽग्नौ दिवानिशम् ॥३॥
अनलेन च घोरेण द्रवीकृतमयः पुनः ।
मुखेपावृत्य यच्छन्ति दारुणा यमकिङ्कराः ॥४॥
अयोमया[६]स्तथा नार्यो नराश्चाग्निसमप्रभाः ।
समाश्लिष्यन्ति सङ्गत्य द्रवमाणास्ततस्ततः ॥५॥
वृक्षाश्च बहव[७]स्तत्र[८] सुपुष्पाःफलपत्रिणः[९] ।
तानाश्रयन्ति दुःखार्त्ता अग्नि वर्षन्ति तेपि च[१०] ॥६॥
शिलाश्च बह्वचस्तत्रान्यास्ताः[११] श्लिष्यन्ति यदा च ते ।
तदा ताश्चाग्निवर्णाभा दहन्ते तान्भृशं[१२] नरान् ॥७॥
एवमेष महापद्मो नरकः संप्रकीर्तितः ।
सुवर्णहारी यश्चैव मातृयायी[१३] च यो नरः ॥८॥
माता पुत्रं च योभ्येति वेददूष्यवकीर्णिकः[१४] ।
मत्सरी यश्च दुर्वृत्तः श्रमणानाञ्च[१५] पूजकः ॥९॥
वृषलो यः[१६] श्रुतिं ब्रूयाच्छृणुयादपि वा पुनः ।
गृहणीयाद्वापि दुर्बुद्धिर्ब्राह्मणान् वावमन्यते[१७] ॥१०॥
ब्राह्मणेभ्यो रहस्यानि आश्रमान्तरजानि च ।
यस्मिन्नधिकृतो न स्याच्छृणुयाद्वा पठेत वा ॥११॥

---

१ तत्र - ख. । २ रौद्रा - ख. । ३ वेगिताः - घ. । ४ ...र्दण्डै - घ. । ५ ध्मायन्ते (?) । ६ अयोमयी (य्य?) - ख. । ७ तत्र वहवः - क. । ८ पुत्र - घ. । ९ सुपुष्पफलपत्रिणः - क. । १० अग्निना मुह्यते पुनः - घ. । ११ ...श्चा - घ. । १२ सदृशं - घ. । १३ मातृगामी - घ. । १४ दोषांवकर्णिकः ... - क., ...कीर्त्तिकः - क, ...कीर्त्तकः - ख., दोषानुकीर्तनः - घ. । १५ श्रवणानाञ्च - क. ख., गुरूणां चाप्यपूजकः - घ. । १६ वृषलाय - घ. । १७ ...नवमन्यते - घ., वापमन्यते - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दुष्टश्रमणनिर्ग्रन्था[१८] तथैवाजीवकाश्च ये ।
भक्तस्तेभ्यो द्विजो यश्च[१९] नरकं स प्रपद्यते ॥१२॥
योगं[२०] परिवदेद्यश्च पितॄन्नथ पितामहान् ।
योगेश्वरांश्च दुर्वृत्तो[२१] योगधर्ममथा[२२]पि वा ॥१३॥
वेदवर्णाश्रमा[२३] यज्ञा[२४]स्तन्निन्दाभिरतः शठः ।
नास्तिको हेतुवादी च[२५] सर्वस्तं प्रतिपद्यते ।
तथ्यमुक्तं[२६] मया सर्वमेवमेतन्न संशयः ॥१४॥
एवन्ते यातितास्तत्र स्वकर्मफलबन्धनाः[२७] ।
ततः शेषेण संबद्धा जायन्ते कीटयोनिषु[२८] ॥१५॥
शृणुयाद् य इमं विचिन्त्य[२९] धीमान्[३०] मतिमान्नित्यमलोभमोहशोकः ।
स तु दैवविधिप्रचोदितात्मा[३१] दिवमेवैति न याति तं कदाचिद्[३२] ॥१६॥

⊙ इति स्कन्दपुराणे नरकवर्णने महापद्मो नाम पंचचत्वारिंशोध्यायः ⊙

अतः परं प्रवक्ष्यामि रौरवं नरकं पुनः ।
यत्र ते विवशा बद्धाः कर्मणा स्वेन जन्तवः॥१॥
यात्यन्ते[१] दुःखशोकार्त्ता महानिरयगामिनः ।
रु इति प्रोच्यते शब्दस्तत्रासौ श्रूयते यतः ॥२॥
पुनः पुनर्वा भीमो हि[२] रौरवस्तेन कथ्यते[३] ।
पूर्णस्तु सर्वः[४] कारीष्याज् ज्ज्वलते सोतिदारुणः[५] ॥३॥
मध्ये स्तम्भोस्य लौहो वै तप्तकाञ्चनसप्रभः ।
तत्र जंतुर्भृशं मग्नः प्रविशन्[६] दह्यतेवशः[७] ॥४॥
आर्तनादान्[८] प्रकुर्वाणो मूर्च्छितः पतितःपुनः ।
ततः क्लेशेन[९] महता उध्दृत्यात्मानमात्माना ॥५॥

---

१८ श्रवणनिर्ग्रन्या - क. ख. घ. । १९ द्विजान् हित्वा - ख. । २० गुरून् - घ. । २१ निन्दन्ते - ख. । २२ योगधर्मास्तथापि च - घ. । २३ देवधर्माश्रमा - घ. । २४ ...श्रमज्ञाश्च - क. घ. । २५ हेतुको नास्ति वादी च - क. घ. । २६ तथाप्युक्तं - घ. । २७ ...नात् - ख. । २८ कीटकादिषु - क., कीचकादिषु - घ. । २९ विजित्य - घ. । ३० दोषान् - ख. । ३१ प्रवेदिमातमा - क. ख., प्रेरितात्मा - घ. । ३२ ...दपीति - ख.. ।
१ पात्यन्ते - घ. । २ भूयो - ?, भूयोपि - ख. । ३ कीर्त्यते - क. । ४ सर्व... - क. । ५ ज्वलत्पाशोतिदारुण: - घ., ज्वलत्यसो - ख. । ६ प्रविष्टो - घ. । ७ रुदते भृशं - ख. । ८ आर्तनादं - ख. । ९ शोकेन - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

भूयोन्यं देशमासाद्य तथैव प्रविशेच्च सः ।
ततस्तस्मादुपोत्पत्य[१०] स्तम्भमाश्रयते यदि[११] ॥६॥
तेनापि दह्यते भूयो विसृज्य प्रविशेत्पुनः[१२] ।
एवं स यात्यते तत्र बहूनब्दान् सुदुःखितः ॥७॥
ततो विसृष्टो भूयश्च उच्छ्र्यान्प्रतिपद्यते ।
तं हि गच्छन्ति पुरुषाः सुरापा धर्मदेशकाः ॥८॥
पितृहा मातृहा चैव भ्रातृहा गुरुहा तथा ।
- - - वादेभिरतास्तेषामेव च निन्दकाः ॥९॥
गोघ्नोथ दमकश्चैव जन्तूनां भृशदारुणः ।
गलकर्ता[१३] कूटमानी कर्मणानु[१४]करोति यः ॥१०॥
परिवित्तिः परिवेत्ता श्मशानरतिरेव[१५] च ।
पुनर्भूसुतसंयोगी[१६] यस्या चोपपतिर्गृहे।
एते सर्वेभिगच्छन्ति[१७] नरकं रौरवं नराः ॥११॥
य इमं शृणुयाच्च रौरवं[१८] नरकं पापकृतां सुरौरवम् ।
नियतं प्रयतो[१९]तिरौरवं न स गच्छेन्मनसापि रौरवम्[२०] ॥१२॥

⊙ इति स्कन्दपुराणे नरकवर्णने रौरवं नाम षट्चत्वारिंशोध्यायः ⊙

सुशर्मोवाच

महारौरवमन्यच्च शृणु मे दुष्टयातनम् ।
यत्र धाराश्च तोयं च तडागानि च पुत्रक ॥१॥
कारीषी कनकाभाश्च कुल्याश्चाग्निप्रपूरिताः ।
आयसा बहवः स्तम्भा वृक्षाश्च बहुकण्टकाः ॥२॥

---

१० द्रुतोत्पत्य - ख. । ११ यदा - घ. । १२ विसृज्योपविशेत्पुनः - ख. । १३ छलकर्त्ता - घ., छलगर्तः - ख. ।
१४ कर्मणाच - क.,...तिकरोति-घ. । १५...पतिरेव - घ. । १६ ...रथसंयोगी - घ. । १७ सर्वे पि गच्छन्ति - घ ।
१८ ...दरौरवं - क. । १९ पठते च रौरवं - ख. । २० ...तिरौरवम् - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

राक्षसा विविधाकारास्तीक्ष्णशस्त्रास्त्रधारिणः ।
तत्र[1] पापेन बहुना जन्तुःसमभिपाशितः ॥३॥
निपतेद्विकृताकारः क्रन्दमानो मुहुर्मुहुः ।
स तत्र पतितः क्षिप्रं राक्षसैर्भिन्नमस्तकः ॥४॥
कारीष्यामग्निवर्णायां पच्यते भृशदारुणम् ।
ततस्स तेन दाहेन दुःखितः परमार्तिमान् ॥५॥
दाहप्रशमनार्थाय तडागे विनिमज्जति[2] ।
तत्र क्षारेण तप्तेन[3] द्विगुणं वेदनार्दितः[4] ॥६॥
वेगेनोत्थाय वृक्षं[5] वा स्तम्भं वाप्यधिरोहति[6] ।
तत्र तैः कण्टकैस्तीक्ष्णैरायसैश्चावतक्षितः[7] ॥७॥
पतते ह्यग्निकुल्यायां[8] करुणं बहुधा नदन् ।
एवं स यात्यमानस्तु तृषार्त्तो विलपन् बहु ॥८॥
धारामाश्रयते पातुं[9] सापि तस्यायसं[10] तदा[11] ।
अग्निवर्णं वहत्यम्भस्ततो मूर्च्छार्दितो म्रियेत् ।९॥
संपूर्णयातनश्चापि मुक्तस्तस्मान्महाभयात्[12]
उच्छ्रयेषु तदा जन्तुर्यात्यते भृशदारुणम् ॥१०॥
तत्र गच्छति[13] राजघ्नो[14] राजभार्याविमानकः[15] ।
आशां दत्त्वा न दद्याद्यो यश्च तीर्थविदूषकः ।११॥
मोषकः सूचकश्चैव स्त्रीभृतो यश्च पापकृत् ।
अग्नौ गवि च[16] यो दानं[17] ब्राह्मणे चापि वारयेत्[18] ॥१२॥
विक्रीणीयात् स्वभार्यां यो ह्यपत्यं वा नराधमः[19] ।
हरते चाग्निभण्डानि योगिनां चैव किञ्चन ॥१३॥
चोरान् वा योनुगृह्णाति मनुष्यास्तस्य ये च ह ।
ब्राह्मणाधिकृतश्चैव धर्माधिकृत एव च ॥१४॥

---

१ अत्र - क. । २...ति निमज्जति - क., ...भिनिमञ्जति ...- ख., ते - क. ख. । ३ कष्टेन - क., कोष्टेन - घ. । ४ वेदनान्वितः - घ. । ५ ...च्छ्रायवृक्षं - क. । ६ थाथिरोहति - ख., ...मि - क., ...व - घ. । ...७राह्यार इव भेंदितः - घ. । ८ तुल्यायां - घ. । ९ जातु - घ., जन्तुः ? । १० तत्रायसं - ख. । ११ तथा - घ. । १२ ...द्भूयावहात् - क., .. द्भूयावहः - घ. । १३ गच्छन्ति - ख. । १४ राजघ्ना - (?) । १५ मन्यकः - क., मन्यकाः - ख. । १६ गवां विप्रांस्तथाग्नीनां दीयमानं तु - ख. । १७ यज्ञानां - घ. । १८ यो हरेत् - घ. । १९ संकीर्णं प (r) रनार्यं वा तास्त्रगत्यान्यजीजनत् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कपिला यस्य गौः स्याच्च अनग्नेर्ब्राह्मणस्य ह[२०] ।
मिथ्याग्निहोत्री यश्चैव नैत्यके परिवेषकः[२१] ॥१५॥
राजपुत्रवधं[२२] चैव[२३] दुर्भिक्षं यच्च चिन्तयेत्[२४] ।
राष्ट्रलोपं दारलोपं धनलोपं च यो नरः ॥१६॥
देशविद्र (१) वणं चैव यः कुर्य्याड्डामराणि वा[२५] ।
सर्वे ते नरकं यान्ति महारौरवसंज्ञकम् ॥१७॥
य इमं शृणुयादभीक्ष्णशो नियतं धर्ममतिश्च तिष्ठति ।
न स गच्छति तं भयावहं नरकं रौरवमुग्ररौरवम् ॥१८॥

⊙ इति स्कन्दपुराणे नरकवर्णने महारौरवं नाम सप्तचत्वारिंशोध्यायः ⊙

सुशर्मोवाच

तमो नामापरो घोरो नरकोति भयंकरः ।
तत्र सोभिपतन्नेव[१] राक्षसैरभिहन्यते ॥१॥
असिमुद्गरशंक्त्वग्रै[२]र्गदामुशलपट्टिशैः[३] ।
भयदैः परिघैष्टङ्कैर्वज्रैर्ऋष्टिपरश्वधैः ॥२॥
अन्यैश्च विविधाकारैर्हतःक्रुद्धैः सुनिर्दयैः[४] ।
मूर्छितस्तमसा ग्रस्तो नरकं तं प्रपद्यते[५] ॥३॥
स देहेन विनष्टेन तमसा[६] मूर्च्छिताकृतिः ।
दुःखसन्ततिसंनद्धो[७] यातनामश्नुते भृशम् ॥४॥
यस्मात् स तमसा ग्रस्त अनाश्वस्तोतिदारुणाम्[८] ।
यातनामश्नुते जन्तुस्तमस्तस्मात् स उच्यते ॥५॥
सर्वा बहुविधाकारा यातना याः प्रकीर्तिताः ।
तास्तत्र[९]समवाप्नोति स्वेन पापेन[१०] दुर्मतिः ॥६॥

---

२० अनग्निहोत्री ये चान्यत् कपिलाक्षीरपायकः - ख. । २१ परिलोपकः - ख. । २२ हर... - क., हत... - ख. । २३ ...चैव - क. ख. घ. । २४ दुर्भिक्षस्य च कारकः - ख. । २५ देशस्य डामरं चैव सततं य इहेच्छति क. । १ सोपि पतन्नेव - घ. । २ शक्त्यग्रै - ख., शक्त्युग्रै - घ. । ३ पदृश्यै - क. । ४ सुदुजर्म्यैः । घ. । ५ प्रतिपद्यते - ख. । ६ तपसा - ख. । ७ संबद्धो - क. ख. । ८ अनाशस्तोतिदारुणाम् - क, अनाग्रस्तो... - घ. । ९ ...स्सर्वाः - क. । १० शापेन - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

समाप्तयातनश्चापि सन्तीर्णस्वेन कर्मणा ।
उच्छ्रयेषु पुनर्जन्तुर्यात्यते कर्मबन्धनः[११] ।।७।।
ब्रह्महा भ्रूणहा चैव सुरापो ब्राह्मणश्च यः ।
गवां निपाने यश्चैव पिपासूनां नराधमः[१२] ।।८।।
विघ्नं करोति मोहान्ध[१३] आहूय भर्त्सयेत्तु यः[१४] ।
ब्राह्मणान् द्वेष्टि नित्यं[१५] य अर्थिनं यश्च दूषयेत् ।।९।।
शास्त्राणि हरते यश्च गोघ्नो यश्च नरः स्मृतः[१६] ।
कापिलश्च वृथादृष्टिर्वेदधर्मार्थदूषकः[१७] ।।१०।।
ब्राह्मणाक्रोशकश्चैव वेदधर्मार्थदूषकः ।
नास्तिकाश्च दुरात्मान इत्येते तं प्रयान्ति वै[१८] ।।११।।
य इमं शृणुयात्तमोमयं तमसा नित्यमतन्द्रितेन्द्रियः[१९] ।
न स याति तमोमयं सदा नरकं दारुणजन्तुशोकदम्[२०] ।।१२।।

⊙ इति स्कन्दपुराणे नरकवर्णने तमोनाम अष्टचत्वारिंशोध्यायः ⊙

सुशर्मोवाच

तमस्तमतरं घोरं नरकं शृण्वतः परम्[१] ।
प्रकाशो यत्र नैवास्ति नैव दृष्टिः प्रवर्तते ।।१।।
पतन्नेव नरस्तत्र[२] विसंज्ञः क्रियते तदा[३] ।
राक्षसैर्विकृताकारैस्तमस्तेन स चोच्यते ।।२।।
तत्रासौ पतितो मूढो वह्निना दह्यते भृशम् ।
ततोपि[४] वेगादुत्थाय दृष्टिहीनो विचेतनः ।।३।।
छिद्यते भिद्यते चैव[५] राक्षसैः क्रूरकर्मभिः ।
तस्मादपि तथैवार्त्तः सोन्यं[६] देशं प्रपद्यते ।।४।।

११...नैः - घ. । १२ निपातनस्थाने - ख., ...निपाते पिपासुं विनिवारयेत् - घ. । १३ बिघ्नकरो विमोहश्च - घ. । १४ चक्रुशं - ख., भृशं - घ. । १५ ब्राह्मणे न ददात्यर्थं - घ., ... र्णं... त्यस्य - ख. । १६ ...स्तथा - ख. । १७ कपिलांश्च वृथा दुह्य आत्मार्थं यश्च कुर्वंति - ख. । १८ यान्ति ते तमसं नराः - ख. । १९ ...मसंयतेन्द्रियः - घ. । २० शोककारकम् - ख., शोकम् - क., मोदकम् - घ. ।
१ शृणुमे पुनः - क. । २ स पतन्नेव नरके - ख. । ३ क्रियन्तेप्रभुः - क. । ४ मृतोपि - ख., मृतो वेगादुत्थित श्च - क. । ५ ...चापि - क. । ६ सौम्य... - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तत्रापि निगृहीतस्तैः पशुमारेण मार्यते[७] ।
ततो भूयश्च कूपेषु क्षिप्तो दुर्गेष्वचेतनः ।।५।।
निमग्नश्चाग्निकारीष्वां निष्कूजन्[८] सोभिजायते[९] ।
एवं स यातना बह्वीस्त्वनुभूय सुदुःखितः ।।६।।
नरकान्तमनुप्राप्य उच्छ्रयेष्वभिपात्यते[१०] ।
गर्भपातनकारश्च राज्यकामश्च यो भवेत् ।।७।।
इहैवानर्हमानोसौ[११] (?) भृत्यो राजवधे रतः[१२] ।
अनाचार्यश्च यः[१३] कर्म आचार्याणां[१४] प्रपद्यते[१५] ।।८।।
शास्त्रविद्यौषधीनां च गदानामगदैः सह ।
यो विनाशयिता[१६] कश्चिद्यः प्रशंसति दानवान् ।।९।।
उपदेशं च यो द्वेषादाचार्यो न प्रयच्छति ।
स याति नरकं घोरं दुस्तरं तं तमोमयम्[१७] ।।१०।।
कृतघ्नं तु समादाय नारकाः[१८] सर्व एव ते ।
यमं प्रणम्य ब्रुवते[१९] सह तैर्यमकिङ्करैः ।।११।।
भगवन्न वयं शक्ताः[२०] पापस्यास्य विनाशने[२१] ।
उपायमन्यं पश्येह[२२] प्रसादं कुरु नः प्रभो ।।१२।।
स एवमुक्तो भगवान् यमः प्रेताधिपस्तदा[२३] ।
सर्वधर्मार्थकुशलान् पृच्छति स्मर्षिसत्तमान्[२४] ।।१३।।
भगवन्तः कथं त्वस्य कृतघ्नस्य दुरात्मनः ।
निष्कृतिः सुमहाघोराद् भवेत् पापस्य कर्मणः ।।१४।।
ततस्ते ऋषयस्सर्वे दृष्ट्वा दीर्घेण चक्षुषा ।
यमं धर्मभृतां श्रेष्टमिदं वै ब्रुवते वचः ।।१५।।

७ वध्यते - घ. । ८ निष्कुञ्जन् - क., निष्कूटः - ख. । ९ सोभिहन्यते - ख. । १०...ष्वेव यात्यते - घ. ।
११ इहैवानश्नमानोसौ - ख. । १२ राजा वधे - क. । १३ अनार्यस्य च - ख. । १४ ...मार्याणां - ख. ।
१५ प्रतिपादितः - ख. । १६ विनाशयते - ख. । १७ स याति नरकान् घोरान् दुस्तरात् तान्तमोमयान् - क. ।
१८ नरकाः - क., नरका (त्) - ख. । १९ (सं) प्राप्य - ख. । २० मया शक्यं - ख. ।
२१ वि (मोचन) - ख. । २२ पश्यस्व - क. ख. । २३ तथा - ख. । २४ पृच्छते ऋषिसत्तमान् - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ब्रह्मघ्ने च सुरापे च चोरे भग्नव्रते तथा ।
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥१६॥
ततः स भगवान्देवो मार्तण्डतनयो वरः ।
नारकेभ्यो[२५] ददात्याज्ञां सर्वे यूयमिमं नरम्[२६] ॥१७॥
शोधयिष्यथ गच्छध्वं नैका[२७] ह्यस्य गतिः स्मृता[२८] ।
ततस्ते तस्य वचनान्नारकाः पापकर्मिणम्[२९] ॥१८॥
सर्वेष्वेवानुपूर्व्येण[३०] यातयन्त्यतिदारुणाः[३१] ।
भर्तृपिण्डापहर्ता च पितृपिण्डापहारकः ॥१९॥
- - - - - - - - - - - - - - - - - - -।
तस्माद् गृहीत्वा विद्याञ्च दक्षिणां यो न यच्छति[३२] २०॥
पुष्टश्च यस्तं नान्वेति यश्च तं घातयेन्नरः ।
कृतस्य दोषं वदति सकामं[३३] न करोति च ॥२१॥
न स्मरेच्च कृतं यस्तु आश्रमान् यश्च दूषयेत् ।
न पुष्णाति तथा वाहानाश्रितांश्चोपकारिणः[३४] ॥२२॥
भृत्यांश्च कर्मनिरतांस्तथैव हितकारिणः ।
भार्यां कर्मकराणां[३५] च नर्माणि वदते च यः ॥२३॥
न दत्तं न हुतं किञ्चिदमुष्मिन्निति[३६] यो वदेत् ।
सर्वांस्तानृषिभिः सार्धं कृतघ्नानब्रवीन्मनुः ॥२४॥
कृतघ्नश्च शठश्चैव नास्तिकोच्छिन्नसंशयः ।
एतान् सर्वेभिगच्छन्ति य एते कीर्तिता मया ॥२५॥
जनेता[३७] चोपनेता च यश्च विद्यां प्रयच्छति ।
भयत्रातान्नदाता च पंचैते पितरः स्मृताः ॥२६॥
यस्तेषान्दोषवक्ता च अभ्यसूयक एव च ।
तथा द्रोहप्रवृत्तश्च सन्त्यजेत्तान्नराधमान्[३८] ॥२७॥

---

२५ नरकेभ्यो - क. ख. । २६ नदं - क. । २७ नैवा... - ख. । २८ सदा - ख. ।
२९ पापकर्मिणां - क. घ. । ३० पूर्वेण - क. ख. घ. । ३१ दारुणं - क. । ३२ न प्रयच्छति - ख. ।
३३ स्वकर्म - ख. । ३४ ...श्चोपकारिणं - क. । ३५ कर्मकारिणां - क. ख. । ३६ अविर्थि नास्ति - घ. ।
३७ उत्पादको - क. ख. घ., जनकश्चचोपनेता (?) - । ३८ तान्निन्दति नराधमः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मित्रधुग्[३९] यश्च दुष्टात्मा तस्य रन्ध्रावकीर्तनः ।
कृतोपकारिणे पूर्वं न करोति प्रियं च यः ।।२८।।
एते सर्वे नरा दुष्टाः सर्व एवाशुभे रताः ।
नरकान् संप्रपद्यन्ते[४०] बद्धाः पापेन कर्मणा ।।२९।।
एते सर्वे मया प्रोक्ता महानिरयगामिनः ।
उच्छ्र्यानेव[४१] गच्छन्ति येऽन्ये पापकृतो जनाः ।।३०।।
य इमं तामसं घोरं शृणुयाद्वा पठेत वा ।
अधर्मश्च[४२] निवर्तेत स गच्छेद् ब्रह्मणः पदम् ।।३१।।

⊙ इति स्कन्दपुराणे नरकवर्णने तमोतितमं नाम ऊनपंचाशत्तमोध्यायः ⊙

अतः परं प्रवक्ष्यामि संसारपरिवर्तनम् ।
यथा वै[१] नरकात्तीर्णाः संसरन्ति समासतः[२] ।।१।।
प्रथमे नरके प्रोक्ता ये मया पापकर्मिणः ।
शेषेण कर्मणा ते तु जायन्ते[३] कृमियोनिषु ।।२।।
कृमियोनौ परावृत्ताः सहस्राणां[४] शतं समाः[५] ।
ततः पुनर्मर्कटास्ते जायन्तेथ तरक्षवः ।।३।।
तत्र[६] तावत् परावृत्ता जायन्ते गोषु ते यदा[७] ।
तदा[८] तत्र शतेनैव जन्मनां शेषतस्ततः ।।४।।
मानुषेषूपजायन्ते तावदेव न संशयः[९] ।
तत्र ते कुर्वते भूयो यदि किंचिन्न किल्विषम् ।।५।।
ततो विशुद्धां जातिं ते लभन्ते पुनरेव तु[१०] ।
न च[११] भूयोपि ते घोरं संसारं प्राप्नुवन्ति वै ।।६।।

---

३९ ...द्रुह्य - क ,...द्रोह - ख. । ४० प्रतिपद्यन्ते - ख. । ४१ ...न्नैव - घ. । ४२ अधर्मान्चि - ख. ।
१ ये वै नरकसंप्राप्ताः - घ. । २ समन्ततः - घ. । ३ ते तु जायन्ते सततं - ख. । ४ सहस्राणि - ख. घ. ।
५ यदा - ख. । ६ तेषु - ख. । ७ तदा - ख. । ८ तथा - ख. । ९ कुत्सितानां च योनिषु - ख. ।
१० पुनरेव लभन्त्युत - क. ख. । ११ महद् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

द्वितीये ये मया प्रोक्तास्ते मुक्ता:[१२] शेषकर्मणा ।
कृमिकीटेषु जायन्ते सहस्राणां शतानि[१३] षट्[१४] ।।७।।
तथा शतसहस्रं च शतानां ते पुनर्गता: ।
मत्स्ययोनौ प्रसूयन्ते तावदेव न संशय: ।।८।।
ततो व्याघ्राश्च ऋक्षाश्च ततो गोत्वमवाप्यते ।
मानुषेषूपपद्यन्ते कुत्सिता: स्वेन कर्मणा ।।९।।
तृतीये त्वथ ये प्रोक्ता मया दुष्कृतकारिण: ।
ते मुक्ता: कर्मणस्तस्माच्छेषेण समवेष्टिता: १०।।
कृमिकीटेषु जायन्ते सहस्राणां शतानि षट् ।
तथैव दश चान्यानि पक्षिणस्तावदेव च ।।११।।
तत: सिंहाश्च सर्पाश्च गाव: पश्चाच्च मानुषा: ।
चतुर्थे त्वथ ये प्रोक्ता मया दुष्कृतकारिण: ।।१२।।
ते सर्वे शेषवन्तस्तु जायन्ते कृमियोनिषु ।
सहस्राणां शतान्यष्टौ तथा चान्यानि षोडश ।।१३।।
योनीनां हि तथा[१५] भूयो जायन्ते ते[१६] ततो मृगा: ।
मृगभावाद्विनिर्मुक्ता जायन्ते च पुन: खरा:[१७] ।।१४।।
ततोजा गवयाश्चापि गावो मानुषतां तत: ।
पंचमे ये मया प्रोक्तास्तेपि शेषेण कर्मणा ।।१५।।
कृमिकीटेषु जायन्ते जन्मनां कोटिमेव हि ।
हस्तियोनौ च तावद्धि उष्ट्रेष्वश्वेषु चैव हि ।।१६।।
ततो गोत्वं समासाद्य मानुष्यं प्राप्नुवन्ति ते ।
षष्ठाच्चैव[१८] विनिर्मुक्तास्तत: शेषेण कर्मणा ।।१७।।
जायन्ते कृमिकीटेषु जन्मनां[१९] द्विगुणेन हि ।
कोटिमेकां ततो यूका ततो मत्स्योथ[२०] सूकर:[२१] ।।१८।।

---

१२ नरके - घ. । १३ सहस्राणि ख. । १४ वै - घ. । १५ ततो - घ. । १६ च - घ. ।
१७ खगा: - घ. । १८ षष्टेन तु - ख. । १९ जन्मना - घ. । २० मत्स्याश्च - घ. २१ सूकरा: - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

महिषत्वं ततः प्राप्य गोत्वाज्जायेत मानुषः[२२] ।
मानुषत्वे कुत्सितश्च[२३] व्याधितश्चैव जायते ॥१९॥
सप्तमाच्च विनिर्मुक्तः[२४] कृमिकीटेषु जायते ।
कोटीत्रयं तावदेव वृक्षत्वमधिगच्छति[२५] ॥२०॥
ततो लता ततो गुल्मस्ततो हस्ती प्रजायते[२६] ।
गोत्वं च समनुप्राप्य जायते मानुषस्ततः ॥२१॥
अष्टमाच्च विनिर्मुक्तो बद्धः शेषेण कर्मणा ।
जायते कृमिकीटेषु द्वे कोट्यौ द्विगुणे च सः ॥२२॥
ततश्चोषधिभावेन[२७] वीरुत्सु च कुशेषु च ।
ततो गोत्वाद्विनिर्मुक्तो[२८] जायते कुत्सितो[२९] नरः ॥२३॥
नवमादपि चोत्तीर्णो बद्धः शेषेण कर्मणा ।
जायते कृमिकीटेषु पञ्चकोटीस्ततः खगः ॥२४॥
ततो मत्स्यश्च तावद्वै तावदेव सरीसृपः ।
श्वा ततस्तावदेवाथ ततो भवति किन्नरः ॥२५॥
किन्नरत्वाद्विनिर्मुक्तस्ततो गोषूपजाते[३०] ।
ततो गोयोनिनिर्मुक्तो मानुषेषूपजायते[३१] ॥२६॥
दशमादपि चोत्तीर्णः षट् कोटीर्जन्मनां[३२] कृमिः ।
शेषेण कर्मणा जातस्ततो भवति वानरः ॥२७॥
वानरस्तावदेवेह तावदेव च[३३] कुक्कुटः ।
तावदेव च काकस्तु जीवंजीवक एव च ॥२८॥
वृक्षदारकमार्जारपिपिलीका[३४]श्च जायते[३५] ।
ततो गोषु प्रजातोसौ[३६] मानुषेषूपजायते[३७] ॥२९॥

---

२२ ततो गोर्मानुष्षस्ततः - ख. । २३ कुत्सितं मनुषे जन्म - ख. । २४ ...माद्य (द)पि निमुर्क्त - ख. ।
२५ ...गम्य च - क. । २६ च जायते - क ख. । २७ ... भावेषु - ख. । २८ गोभावनिर्मुक्तो - ख. ।
२९ कुत्सितो जायते - ख. । ३० जायन्ति गोषु ते - ख. । ३१ गवां योनौ विजायते - ख. ।
३२ कोटीर्जन्मतः - ख. । ३३ तु - ख. । ३४ पिरिलीका - क., पिप्रिता - ख. । ३५ जायते ततः - ख. ।
३६ प्रजायेत - ख. । ३७ ...पु ततः परं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

महारौरवनिर्मुक्तः सप्तकोटीः[३८] सुदुःखितः ।
जन्मनां[३९] कृमिकीटेषु जातो[४०] मत्स्यत्वमश्नुते[४१] ॥३०॥
ततः[४२] श्वा गर्दभश्चैव भैनाशी[४३] (?) शुक एव च ।
ततो भवति गौश्चापि ततः षण्ढश्च मानुषे[४४] ॥३१॥
तमोनरकनिर्मुक्तस्त्वष्टकोटीः सुदुःखितः ।
जन्मनां प्राप्नुते जन्तुर्विष्ठायां कृमियोनिषु ॥३२॥
ततः श्वा जायते भूयश्चक्राह्वश्च पुनः पुनः[४५] ।
ततो मण्डूकतां प्राप्य जायते मृगपक्षिषु[४६] ॥३३॥
जायते किन्नरश्चापि[४७] द्वीपी शरभ एव च ।
ततो गोत्वं समासाद्य मानुषत्वमवाप्नुते[४८] ॥३४॥
तमोनरकनिर्मुक्तः शेषेणैव हि कर्मणा ।
जायते कृमिकीटेषु नवकोटिः स जन्मनाम्[४९] ॥३५॥
ततो भवति काकश्च भासश्चैव ततः परम्[५०] ।
वान्ताशी च ततः पक्षी उलूकश्च ततः पुनः[५१] ॥३६॥
पुनर्वृक्षश्च गुल्मश्च ततो भवति वै मृगः ।
ततो गौर्मनुजश्चापि गर्भस्थः स विपद्यते[५२] ॥३७॥
पुनःपुनर्जायमानः सहस्राणां शतं समाः[५३] ।
व्याधितः[५४] कुत्सितश्चैव[५५] जायते च पुनः[५६] पुनः ॥३८॥
यस्तु सर्वानिमान् प्राप्य नरकानिह जायते ।
स योनिषु समस्तासु सर्वसंसारमश्नुते ॥३९॥
यदि मानुषतां[५७] याति कदाचित् कालपर्ययात् ।
तत्रापि कुत्सितां योनिं भूयो भूयः प्रपद्यते ॥४०॥

---

३८ ...कोटी - ख. । ३९ जन्मानि - ख. । ४० ततो - ख. । ४१ ...मेष्यति - ख. । ४२ तत्र - क. ।
४३ तैलाकी - ख. । ४४ षण्ढः प्रजायते - क., षण्ढत्व ... - ख. । ४५ तत्र चक्राह्वो जाथते - ख. ।
४६ ...योनिषु - ख. । ४७ ततः किन्नरतां चापि - ख. । ४८ मानुष्यमवाप्यते - ख. । ४९ जन्मना - ख. ।
५० स जायते - क. । ५१ उलूको जायते ततः - ख. । ५२ तत्र गर्भे स वै मृतः - क. । ५३ स तु - क. ।
५४ व्यधिना - ख. । ५५ सततग्रस्तो - ख. । ५६ स नरः - क. । ५७ मनुष्यतां - क ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अनिष्टः[५८] सर्वभूतानां दुःखितो व्याधितस्तथा[५९] ।
विकृतं रूपमाप्नोति कर्मणा स्वेन दूषितः ॥४१॥
देवब्राह्मणविद्वेष्टा सर्वव्रतवहिष्कृतः ।
सर्वधर्मविनिर्मुक्तः साध्वाचारविवर्जितः ॥४२॥
निर्नमस्कारदुश्शीलः किम्भक्षो[६०] ब्रह्मनिन्दकः ।
न तीर्थदेवायतनः स्वधास्वस्तिविवर्जितः ।
अकीर्तनीयो लोकानां जायते स्वेन कर्मणा ॥४३॥

सुशर्मोवाच

एतत्ते कथितं सर्वं समासात् पुत्र सर्वशः[६१] ।
नरकाणां सतत्त्वं च क्रमभेदो यथामति[६२] ॥४४॥

सनत्कुमार उवाच

य इमं शृणुयाद् युक्तः[६३] सदा पर्वसु पर्वसु ।
श्रावयेद्वा द्विजान् सम्यक् सर्वपापैः[६४] प्रमुच्यते ॥४५॥
धन्यं यश[६५]स्यमायुष्यं स्वर्ग्यं सर्वार्थसाधकम् ।
श्रव्यं[६६] च पठितव्यं च सततं भूतिमिच्छता[६७] ॥४६॥
इदं तु सर्वार्थसुखावहं ध्रुवं महानुभावं सुगतिप्रदं[६८] शुभम् ।
सदैव विप्रेण समाहितात्मना अधीत्य धार्यं श्रुतिसम्मितं ध्रुवम् ॥४७॥

⊙ इति स्कन्दपुराणे संसारगतिवर्णनं[६९] नाम पञ्चाशोध्यायः ⊙

सनत्कुमार उवाच

सुकेशस्तु ततो व्यास पितुः श्रुत्वा सुदीनवत्[१] ।
दुःखित[२]श्चिन्तयामास जन्तूनां तां गतिं तदा[३] ॥१॥

---

५८ विद्विष्टः - ख. । ५९ ...स्तदा - ख. । ६० ... भक्ष्यो - ख. । ६१ तव पुत्रक - क. । ६२ यथागति - क., यथामति - ख. । ६३ भक्तः - घ. । ६४ सर्वयस्यैः - ख. । ६५ धन्यैर्विशस्यमायुष्यं - ख. । ६६ श्राव्यं - क. ख. । ६७ स्वर्गमिच्छता - ख. । ६८ सुमतिप्रदं - घ. । ६९ नरककीर्तनं समाप्तं - घ. ।

१ दीनवाक् - क.,...वान् - ख. घ. । २ दीनवत् - क. घ. । ३ गतिचिन्तकः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

चिन्तयाभिपरीतात्मा दुःखेन च समाहतः[४] ।
जन्तूनां मोक्षणोपायं मूढचेता न जज्ञिवान्[५] ।।२।।
चिन्तापन्नः[६] स तु यदा पितॄँस्तान्नाभ्यभाषत[८] ।
तदा ते पितरः सर्वे सुकेशमिदमूचिरे ।।३।।

पितर ऊचुः

अतीव किं चिन्तयसि कुतश्चिन्ता तवानघ ।
ईश्वरस्य सतःपुत्र[९] नेदं तव विधीयते ।।४।।

सुकेश उवाच

जन्तूनां कर्मजं क्लेशं श्रुत्वा युष्माभिरीरितम् ।
चिन्तयामि कथं तेषां मोक्षोपायो भवेदिति ।।५।।

पितर ऊचुः

अनादृत्य क्षयं[१०] पुत्र मोक्षस्तेषां न विद्यते ।
कर्मणः स्वकृतस्येह स च भोगात् क्षयो मतः ।।६।।
भोगश्च नरकेवश्यं जन्तूनां सं[११]विधीयते ।
न च ते नारकाः[१२] शक्या हर्त्तुं[१३] कर्मक्षयं विना ।।७।।
अशक्याः खलु ये ह्यर्था न तान् प्राज्ञस्समारभेत् ।
अर्णवस्य[१४] प्रतरणं यथा त्वां मृत्युमृच्छति[१५] ।।८।।

सनत्कुमार उवाच

एवमुक्तः स[१६] तेजस्वी पितॄँस्तान् हृच्छयावृतः[१७] ।
उवाच प्रणतो भूत्वा मावमध्वं[१८] सुतं हि माम् ।।९।।

---

४ सर्वेषां करुणात्मनां - ख., समाहितः - घ. । ५ गूढचेता - क., कथं स्यादिति निश्चयं - ख., चिंतयामास वै वदा - घ. । ६ चिन्तयानः - घ. । ७ तदा - ख. । ८ तान्यु (नु) वाच पितॄन् स तु (सुतः?) - ख., नाभ्यभाषत - क. ख., ...श्चागत्य भाषते - घ. । ९ महादेवप्रसादाद्धि - ख. । १० ... मनादृत्य - घ., पापक्षयं विना - ख. । ११ स - क. ख. । १२ नरकाः - क. घ. । १३ हन्तुं - घ. । १४ अर्णवस्येव - ख. । १५ तीरमप्राप्य नश्यति - ख. । १६ ...श्च - ख. । १७ कृपया वृतः - घ. । १८ मावमंस्था - क. ख. घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

का शक्तिर्मम[१९] तान् जन्तून् बलात् तारयितुं शुभान्[२०] ।
महादेवप्रसादस्तान्[२१] तारयिष्यति[२२] दुर्गतीन्[२३] ॥१०॥
यूयं यथैव[२४] तीर्णाः स्थ नरकस्था विचेतसः[२५] ।
तथा ते[२६] जन्तवस्सर्वे तरिष्यन्ति[२७] न संशयः ॥११॥

सनत्कुमार उवाच

ततस्तान् स तदा[२८] मन्त्र्य महात्मा गणनायकः ।
संप्रविश्य समुद्राम्भो ह्यन्तर्जलगतस्तदा[२९] ॥१२॥
जजाप रुद्रान् शुद्धात्मा निश्चलः सुसमाहितः ।
जपतस्तस्य योगेन युक्तस्य च महात्मनः ॥१३॥
त्रैलोक्यमखिलं व्यास[३०] तपसाभूत् प्रतापितम्[३१] ।
ततो देवास्तदा सर्वे पितामहमथाब्रुवन् ॥१४॥
किमिदं भगवन् सर्वे तप्याम विवशा वयम् ।
कस्येदं तपसो वीर्यं कस्य योगोयमीदृशः ॥१५॥
क एष सुरशार्दूल तपस्तप्यति[३२] दारुणम्[३३] ।
यावदेवं न दहति यावच्चैव न कुप्यते ॥१६॥
तावत् सर्वानभिप्रायान् तस्य संपादय प्रभो ।
स एवमुक्तो[३४] देवैस्तैर्भगवान् देवसत्तमः[३५] ॥१७॥
उवाच मा भयं वोस्तु नायं कश्चिदसंमतः ।
स एष देवदेवस्य[३६] महात्मा[३७] गणनायकः ॥१८॥
समुद्रान्तर्जलासीनो[३८] रुद्रान् जपति योगवान् ।
न चास्य दुष्टोभिप्रायो लोकान्प्रति महाबलाः[३९] ॥१९॥

---

१९ का गतिर्मम - ख. । २० पितः - घ. । २१ ...प्रसादात्तान् - क., प्रसादात्तां - घ. । २२ नाशयिष्यति - घ., नाशयिष्यामि - क. घ. । २३ दुर्गतिम् - घ. । २४ तथैव - क. । २५ पितामहाः - ख. । २६ तथैव - घ. । २७ भविष्यान्ति - घ. । २८ पितरो - ख. । २९ ...स्तथा - क. । ३० सर्वं - क. । ३१ प्रधूपित इ (मि) वाभवत् - ख. । ३२ ...स्तप - क., स्तपस्यति - ख. । ३३ सुदारुणम् - ख. । ३४ एवमुक्तः सः - घ. । ३५ कमलासनः - ख. । ३६ एष देवस्य रुद्रस्य - क. घ. । ३७ सुकेशो - ख. । ३८ जंले सम्यक् - ख. । ३९ परिपूर्णोर्थः सर्वेषां करुणात्मकः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नारकानेष नरकादुद्धर्तुमभिमन्यते ।
तद्[४०] यूयं यदि[४१] मन्यध्वे[४२] गत्वा रुद्रं प्रणम्य च ॥२०॥
अर्थयामोस्य देवस्य क्रियतामीप्सितो वरः ।
एवमस्त्विति ते सर्वे ब्रह्मणा सह संगताः ॥२१॥
गता मन्दरमव्यग्रा[४३] नन्दिना संप्रवेशिताः ।
ते दृष्ट्वा देवमीशानं स्तुत्वेदमब्रुवन्[४४] विभुम्[४५] ॥२२॥
सुकेशो भगवन् तुभ्यं बल्लभो गणनायकः ।
कारुण्यं[४६] प्राणिनां कृत्वा तपस्तप्यति दुश्चरम् ॥२३॥
तस्य कामं सकामं[४७] त्वं कुरुष्व भुवनेश्वर ।
तेषां विज्ञप्तिमाकर्ण्य देवदेवस्ततो[४८] भवः ॥२४॥
ब्रह्माद्यैः सहितोभ्यागात्[४९] सुकेशस्य तदान्तिकम्[५०] ।
समुद्रस्तत्र ये चान्ये[५१] मुनयः[५२] शंसितव्रताः ॥२५॥
अर्घ्यमादाय शतशो[५३] नेमुः शङ्करमागतम् ।
तमसौ गणपश्रेष्ठं देवदेव इदं वचः ॥२६॥
प्रोवाच मधुरं व्यास मनःश्रोत्रसुखावहम् ।
वत्सोत्तिष्ठ सुकेश त्वं प्रार्थयस्व यथेप्सितम् ॥२७॥
सर्वं तत्[५४] संप्रदास्यामि त्वं हि[५५] नन्दिसमो मम ।
ततः सुकेश उत्थाय स्तुत्वा च[५६] वृषभध्वजम् ॥२८॥
प्रणिपत्य पुनर्वव्रे कामं पूर्वसमीहितम्[५७] ।
नरकेषु नरा देव यात्यन्ते पापकारिणः[५८] ॥२९॥
तेषामुपरि[५९] चेतो मे दुःखेनार्दितमीश्वर[६०] ।
ते यथा प्रतिमुच्यन्ते सर्व एव जगत्प्रभो[६१] ॥३०॥

---

४० ते - क. । ४१ ...मभि - ख. । ४२ मन्यध्वं - क. ख. घ. । ४३ मन्दिरमव्यग्रा - क. । ४४ ...त्वैवमब्रुवन् - घ. । ४५ चिरम् - घ. । ४६ करुणां - ख. । ४७ सकाम - क., प्रकाम - ख. । ४८ ... सदा - क. । ४९ ह्यागात् - ख. । ५० महात्मनाः (नः) - क. । ५१ समुद्रा - क., समुद्रो मुनिभिस्सार्धं - ख. । ५२ यत्र ये - ख. । ५३ सततं - क. । ५४ तत्सर्वं - घ., सर्वं हि त्वत् - ख. । ५५ तु - ख. । ५६ तं - क. । ५७ तन्निष्पत्ति न संशयः - क. । ५८ स्वेन कर्मणा - ख., पापकर्मिणः - घ. । ५९ तेषामर्थे - घ. । ६० मे चिन्ता कृपया परमेश्वर - ख., मनो मेद्य - घ. । ६१ सुदुःखिताः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तथा कुरु ममाद्यैव वर एष मयार्थितः[६२] ।
ये चाधुना नरा देव यात्यन्ते नरकेषु वै ॥३१॥
तेषान्तु प्रतिमोक्षार्थं याचेहं त्वां सुरेश्वर[६३] ।
ततस्तदर्थितं[६४] देवः प्रयच्छन्निदमब्रवीत् ॥३२॥
एवं भवतु ते वत्स मुक्ता[६५] नारकिणो नराः ।
अनयापि च भक्त्या त्वं कारुण्येन च वल्लभः[६६] ॥३३॥
सुतरां भव निर्व्यग्रःपरमैश्वर्यसंयुतः ।
ततस्ते नारकाः सर्वे[६७] विमानानि समाश्रिताः ॥३४॥
देवदेवं ततोभ्येत्य सुकेशश्च प्रणेमिरे ।
तमुवाच पुनर्देवः सुकेशं गणनायकम् ॥३५॥
यो हि[६८] तारयते जन्तूनापदः[६९] काँश्चिदेव तु ।
तेषां धर्मपिता भूत्वा संसारं न स पश्यति[७०] ॥३६॥
मनसापि हि यः प्राणी क्लेशाज्जन्तून्सदेच्छति[७१] ।
विमोक्तुं[७२] सोपि धर्मातमा सर्वदुःखैः प्रमुच्यते ॥३७॥
यश्चोपार्ज्य स्वयं धर्मं जन्तुभ्यः संप्रयच्छति ।
सुखार्थं सोपि सर्वेभ्यो[७३] दुःखेभ्यः[७४] संप्रमुच्यते[७५] ॥३८॥
स त्वं परेण योगेन ऐश्वर्येण च संयुतः ।
जन्तूनां तारणे युक्तस्त्वयान्यः कः समो[७६] भुवि ॥३९॥

सुकेश उवाच

भगवन् त्वत्प्रसादान्मे सर्वमेतद् भविष्यति ।
शक्तिर्मम कुतो देव त्वयैवैतत् कृतं विभो ॥४०॥

---

६२ वृतः - घ. । ६३ याचयेयं - क. घ., याचयेयन्त्वत्सकाशतः - ख. । ६४ स्तुष्टस्तदार्थितं - ख. । ६५ युक्ता - क. । ६६ सत्वानां करुणाय च - ख. । ६७ सत्वा - घ., सत्वा मुक्ता यातनसंस्थिताः - ख. । ६८ मे (यो) पि - क. । ६९ जन्तूनापदं - क., ...दा - ख., ...पादं - घ. । ७० प्रयच्छति - ख. घ. । ७१ समुद्धरेत् - घ. । ७२ विमुक्तः - घ. । ७३ धर्मात्मा - ख. । ७४ सर्वदुःखै... - ख. । ७५ संप्रयुज्यते - घ. । ७६ नरः - ख., भवेत् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

द चान्यदस्ति कर्त्तव्यं[७७] कृत्यं[७८] यन्मे मनोगतम् ।
त्वास्मि किङ्करो दासो नाश्चर्यं यन्ममेदृशम्[७९] ॥४१॥

सनत्कुमार उवाच

ततः स भगवान् देवो विसृज्य गणनायकम् ।
अभ्यगात् मन्दरं[८०] व्यास वृतः सर्वामरैस्तदा ॥४२॥
देवा अपि विमानस्थान्[८१] नारकान् वीक्ष्य सर्वशः ।
शान्तं च जगतो दुःखं दृष्ट्वा जग्मुर्यथागतम् ॥४३॥
य इमं नारकोत्तारं शृणुयाद्वा पठेत वा ।
स दुःखं समनुप्राप्य[८२] नावसीदति कर्हिचित् ॥४४॥
एतद्योगविधानसर्वसमयं[८३] श्रुत्वा नरो नित्यशः
पापात्मापि सुनिर्घृणं प्रतिभयं नाभ्येति पापाश्रयम् ।
किन्त्वेतद् य इहाभ्युपेत्य सततं शौचान्वितः श्रावयेत्
देवब्रह्मणवैद्यसंसदि दृढं भक्तः[८४] सदा शङ्करम्[८५] ॥४५॥

⊙ इति स्कन्दपुराणे नारकीयमोक्षणे[८६] एकपंचाशोध्यायः ⊙

व्यास उवाच

के पुनस्तं न गच्छन्ति नरकं शुभकर्मिणः ।
पापेष्वपि रता[१] ब्रह्म[२]न्नेतदिच्छामि वेदितुम् ॥१॥
तथा स्त्रीणां च का युक्ता गतिः परमिका शुभा ।
केन कर्मविपाकेन एतदिच्छामि वेदितुम् ॥२॥

---

७७ कर्ता मां - ख. । ७८ कृतं - ख. । ७९ नाश्चर्याय ममेदृशम् - ख. । ८० मन्दिरं - घ. ।
८१ विमानस्था - ख. घ. । ८२ महद्प्राप्य - घ. । ८३ ...मभयं - ख. । ८४ भक्त्या - ख. ।
८५ शङ्करेति - ख. । ८६ सुकेशमाहात्म्यं - घ. ।
१ ... भिरताः पापे - क. ख., ...षु निरता - घ. । २ ...श्चैव - क., देव - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

न गच्छन्ति नरा येन[३] नरकं तं सुदुःखिताः[४] ।
पापकर्मण्यपि रता[५]स्तानिमान्[६] शृणु मानद[७] ।।३।।
नाग्निचिन्नरकं याति न त्रिसूत्री[८] न गोव्रती[९] ।
नाश्वमेधेन यो यष्टा[१०] गो सहस्रप्रदो न च[११] ।।४।।
न च स्वाध्यायनित्यो यो रुद्रजापी च यो द्विजः[१२] ।
ब्राह्मणान्[१३] तारयेद्यश्च[१४] आपदो मरणान्तिकात् ।।५।।
ब्राह्मणं[१५] व्याधितं दीनमनाथं दुःखपीडितम्[१६] ।
शुश्रूषेद्यावदेतेन युक्तो धर्मेण मानवः[१७] ।।६।।
ब्राह्मणं वासयेद्यस्तु गृहवासपरिच्छदैः ।
निःस्वं स्वाध्यायसंपन्नं नरकं न स पश्यति ।।७।।
तथा गाश्चैव संमग्नां[१८] पतितां शक्तिवर्जिताम् ।
संरक्षति च युक्तात्मा स च तं नैव गच्छति ।।८।।
महेशं यश्च भावेन परमेण समाधिना ।
भक्त्या[१९] समर्चयेन्नित्यं स च तं[२०] नैव गच्छति ।।९।।
इतरेषां तु संसारो भवत्येव न संशयः ।
ब्राह्मणास्तं न गच्छन्ति वेदवेदाङ्गपारगाः ।।१०।।
षट्कर्मनिरता व्यास आत्मधर्मव्यवस्थिताः[२१] ।
तपःशौचसमायुक्ता दयावन्तो दृढव्रताः[२२] ।।११।।
प्रतिग्रहनिवृत्ताश्च ईशभक्ताश्च ये द्विजाः ।
क्षत्रिया ये च रक्षार्थं प्रजानां[२३] नित्यमुद्यताः ।।१२।।
त्यजन्ति समरे प्राणान् न ते नरकगामिनः ।
वैश्या वार्तासमायुक्ता[२४] न्यायधर्मव्यवस्थिताः ।।१३।।

---

३ तु भूतानि - घ. । ४ सुदुःखितं - घ. । ५ ..भिरता - ख., निरता - घ. । ६... निमान् - घ. । ७ महामते - घ. । ८ न सपुत्रो - ख., न सपुत्री - घ. । ९ गोप्रदी - घ. । १० येन यष्टोश्वमेधेन - ख. । ११ गोपालनरतश्च यः - घ. । १२ नरः - क. । १३ ब्राह्मणं - क. घ. । १४ यस्तु - घ. । १५ तमेव - क., तमेवं वादिनं - घ. । १६ न कर्मण्यं तथैव च - क. घ. । १७ मुक्तः स्यादिह मानवः - ख. । १८ संभग्नां - क. ख. । १९ भक्तः - क. घ. । २० तान् - घ । २१ शान्त(ा)दान्त (ा)जितेन्द्रियाः - ख. । २२ ह्यलोलु (पाः) - ख. । २३ प्रजाया - घ. । २४ स्ववृत्तिसंयुक्ता - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

येषां वृत्तिरविच्छिन्ना[२५] देवब्राह्मणपूजका:[२६] ।
नरकं ते न पश्यन्ति स्वर्गगास्ते प्रकीर्तिता:[२७] ॥१४॥
भक्ता वर्णत्रयं[२८] ये च शूद्रा दर्पविवर्जिता: ।
ब्राह्मणाँश्च विशेषेण नित्यं ये समुपासते[२९] ॥१५॥
ते न[३०] पश्यन्ति नरकं[३१] सुगतिश्च[३२] मृता ययु: ।
चतुर्ष्वपि च वर्णेषु मनुजा भावत:[३३] शिवम् ॥१६॥
शर्वार्पितक्रियावस्था[३४] भक्ता नित्यमनुव्रता: ।
न ते प्रयान्ति नरकं प्राप्नुवन्ति परां गतिम् ॥१७॥
प्रासादं चैव ये कृत्वा देवदेवमुपासते ।
अन्यानपि पितॄँस्ते तु नरकादुद्धरन्त्युत ॥१८॥
खनिता: पुष्करिण्यो यैस्तडागानि ह्रदानि च ।
रोपिता वृक्षषण्डाश्च[३५] तेपि तान्[३६] न प्रयान्ति[३७] हि ॥१९॥
परित्राणं द्विजातीनामन्येषां चैव दु:खिनाम् ।
नित्यं प्रकुर्वते ये च तेपि तान्[३८] न व्रजन्ति हि ॥२०॥
अक्रोधनाश्च ये नित्यं देवब्राह्मणपूजका: ।
नित्यं दानरताश्चैव[३९] न ते गच्छन्त्यधोगतिम् ॥२१॥
सत्याभिधानसंयुक्ता दुष्टारम्भविवर्जिता:[४०] ।
स्वधर्माचारसंयुक्ता:[४१] पश्यन्ति नरकं न ते ॥२२॥
लिङ्गार्चनरतस्तस्मात्[४२] सर्वस्मात् परिमुच्यते ।
ध्यानी त सर्वदा यो वै गणाञ्जपति वा शुचि: ॥२३॥
योगी तु[४३] सर्सपापानि कुर्वन्नपि न लिप्यते ।
स्त्रीणां तु परमो देव: पतिर्भवति सर्वदा ॥२४॥

---

२५ सततं न व्यवच्छिन्ना - ख. । २६ ...पूजने - क. घ. । २७ गोप्ता गोब्राह्मणस्य च - ख. । २८ ... वर्णत्रये - ख. । २९ ये नि त्यमुपसेवते - क. । ३० न ते - ख. । ३१ नरकान् - क., नरकानागतिश्च - घ. । ३२ ...रवा - घ., खनन्ति - ख. । एतदनन्तरं - त्रिसंध्यं सततं भक्त्या इति मे व्रतमास्थिता, ब्राह्मणा ये न पश्यन्ति (?) नरकं न स गच्छति, इति पाठाधिक: ख. पुस्तके । ३३ पुण्यश्च - क. ख., पुण्यो ये (?) । ३४ तानि - क., शर्वार्पितानि च पुष्पाणि - घ । ३५ ... नि - ख. । ३६ ...नि - क., तत्र - ख. । ३७ न यान्ति - क. ख., न व्रजन्ति - घ. । ३८ तं - ख. । ३९ ये च - घ. । ४० दुष्टता - क., ये नरा धर्मशीलिन: - घ. । ४१ स्वधर्मकरणे शक्ता - क. घ. । ४२ नित्यं लिङ्गार्चनरत: - ख. । ४३ योगज्ञ: - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तस्मान्नान्यं[४४] प्रपश्यन्ति याः काश्चि[४५]द्धर्मचिन्तिकाः[४६] ।
कर्मणा मनसा वाचा यद् ददाति[४७] जुहोति वा ॥२५॥
परित्यज्य पतिं नारी न तस्य फलमश्नुते ।
पतिशुश्रूषणे रक्ता मनोवाक्कायकर्मभिः[४८] ॥२६ ।
पतौ[४९] मृतेपि मनसा नान्यमिच्छति या नरम्[५०] ।
करोति पुण्यं यच्चापि पत्युः सर्वं[५१] प्रयच्छति ।
सा नारी नरकान् सर्वान् मनसापि न गच्छति[५२] ॥२७॥
संसारं नैव सा घोरं[५३] सर्वं संप्रतिपद्यते[५४] ।
अन्यासां तु न संदेहो नरकं प्रति सुव्रत[५५] ॥२८॥

सनत्कुमार उवाच

सुकेशं त्वनुगृह्यैवं देवोपि वृषवाहनः ।
- - - - - - - - - काष्ठकूटाश्रमं गतः ।
अनुजग्राह तं विप्रं काष्ठकूटं तपोधनम् ॥२९॥

व्यास उवाच

किं तपस्तस्य भगवन् ब्राह्मणस्य महात्मनः ।
कियता चैव कालेन वरं लेभे महेश्वरात् ॥३०॥
कस्य पुत्रः कस्य नप्ता किन्नामा स च सत्तमः ।
एतदिच्छामि कथितं भगवन् विस्तराच्छुभम्[५६] ॥३१॥

सनत्कुमार उवाच

गौतमस्यान्वये[५७] विप्रो नाम्ना कृष्ण इति प्रभुः[५८] ।
तस्य पुत्रोभवत् ख्यातो भूमन्युरिति नामतः ॥३२॥
तस्य पत्न्यभवत् सुभ्रूरात्रेयी नामतो यशाः ।
स कदाचित् कृतोद्वाहो भूमन्युर्नाम गौतमः ॥३३॥

४४... वन्यत् - क. । ४५ ये केचिद् - क. ख. । ४६ ...चिन्तकाः - क. ख. घ. । ४७ करोति - घ. । ४८ त्रिविधेनापि कर्मण। - क. घ. । ४९ पत्यौ (?) । ५० न चान्यं सेवते पतिं - घ. । ५१ कृत्वा पुण्यानि सर्वाणि फलं पत्युः ... - ख. । ५२ न पश्यति - ख. । ५३ घोरान् - ख. । ५४ न प्रतिपद्यते - ख. । ५५ प्रतिपद्यते - घ. । ५६ ...वृतं - घ. । ५७ गौतमस्यानुजो - घ. । ५८ प्रभो - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नाविन्दत सुतं तस्यां जरया चाभिसंवृतः ।
स भार्यामाह दुःखार्त्त इदं वचनकोविदः ॥३४॥
पुत्रेणेच्छन्ति लोकाँश्च अनृणाश्च भवन्त्युत ।
जरां परिगत[५९]श्चाहं न च मे दृश्यते सुतः ॥३५॥
सा त्वं कश्चित्[६०]सगोत्रं मे अनुज्ञाता मया शुभे ।
अभिपद्यस्व[६१] पुत्रार्थं याचे त्वां[६२] प्राञ्जलिर्न्नतः ॥३६॥

सुयशोवाच[६३]

न मया श्रुतमेतत्तो तथा नोक्तं त्वयानघ ।
मादृशी कथमेतद्धि मनसाप्यभिचिन्तयेत् ॥३७॥
अत्रीणान्तु कुले जाता गौतमं कुलमागता ।
मद्विधा कथमेतद्धि कुर्यात् सद्भिर्विगर्हितम् ॥३८॥
तपसा धनमन्विच्छेज्जीवितानि सुखानि च ।
पुत्रान् कुलञ्च लोकाँश्च तपः कुरु महामुने ॥३९॥
तपसा[६४] हि सुतो[६५] लब्धः शक्तिना स पराशरः ।
और्वश्च तपसा स्वेन च्यवनेन महामुनिः ॥४०॥
वसिष्ठेन कपिञ्जल्यामिन्द्रप्रमतिरेव च ।
शिलादोजनयच्चैव तपसा नन्दिनं सुतम् ॥४१॥
तथा भवानपि तपः करोतु सुसमाधिना ।
लप्स्यसे त्वं सुतं श्रेष्ठं महायोगबलान्वितम् ॥४२॥
मां हि दृष्ट्वा पुरा प्राह अत्रिर्ब्रह्मसुतः स्वयम् ।
सत्पुत्रिणी[६६] भवित्रीयं न मिथ्या तद् भविष्यति ॥४३॥
तपोस्ति मयि यत्किञ्चित् त्वत्प्रसादात् सर्माजितम्[६७] ।
तेन स्वेन च संयुक्तो रुद्रमाराधय प्रभो[६८] ॥४४॥

---

५९ जरा - क., जरापरिणतः - ख. । ६० किञ्चित् - क. । ६१ मन्यस्व - क. । ६२ ये त्वं - क. ।
६३ यशोवाच - क., आत्रेय्युवाच - ख. । ६४ तपसो - क. । ६५ सुता - क. । ६६ सुपुत्रिणी - ख. ।
६७ समांर्जितम् - क. ख. । ६८ प्रभो - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

एवमुक्तस्स[६९] तेजस्वी ह्रिया[७०] परमया युतः ।
तथैवं[७१] समनुज्ञातो रुद्रं शरणमीयिवान्[७२] ॥४५॥
त्वरितं स[७३] समागम्य[७४] नर्मदां हर्षसंयुतः ।
तस्यास्तीरे[७५] समुद्दिश्य[७६] तस्थौ वाय्वाशनः[७७] समाः ॥४६॥
स तु नैवाभवद्विप्रः कृतार्थस्तेन कर्मणा ।
ततस्स दुःखितो[७८] भूयः प्राणायामेन तस्थिवान् ॥४७॥
वर्षमेकं ततो देवस्तमुवाच तदा विभुः ।
किमेवं क्लिश्यसे विप्र न तवास्ति सुतः क्वचित् ॥४८॥
व्यर्थस्तेयं श्रमस्तावन्नास्ति पुत्रस्तवानघ ।
स एवमुक्तो निर्विण्णो[७९] निराशः पुत्रजन्मनि[८०] ॥४९॥
चिन्तयामास मरणं न गन्तुं स्वं गृहं[८१] प्रति
स काष्ठकूटं संभृत्य गृहीत्वाग्निं सुदुःखितः[८२] ॥५०॥
विलप्य बहुदुःखार्त्त आत्मानं दग्धुमैच्छत[८३] ।
तस्य रुद्र[८४]स्तमालक्ष्य[८५] व्यवसायं सुदुष्करम् ॥५१॥
पुत्र पुत्रेति गम्भीरमदृश्य इदमब्रवीत्[८६] ।
पुत्रस्ते भविता गच्छ मा चैवं[८७] साहसं कृथाः ॥५२॥
काष्ठकूटेति नाम्ना च[८८] भविष्यति स ते सुतः ।
अथ हृष्टमना विप्रो गत्वा पत्न्यां[८९] महातपाः ॥५३॥
उत्पादयामास सुतं[९०] काष्ठकूटं महामुनिम् ।
संस्कृतस्य तु कालेन तस्य बुद्धिरभूत् ततः[९१] ॥५४॥

---

६९ ...श्र - ख. । ७० क्रि (श्रि या) ? - ख. । ७१ तथैव - क. ख. । ७२... मेयिवान् - क. ख. । ७३ तु - ख. । ७४ समागत्य - ख. । ७५ तस्यास्तटे - ख. । ७६ समुद्दिश्य - क. ख. । ७७ वाय्याशनः - क. । ७८ ततस्सुदुःखितो ? । ७९ ...विप्रर्षि - ख. । ८० पुत्रमात्नः - ख. । ८१ स्वगृहं - घ., स्वां (न् गृहान् ?) - क. ख. । ८२...ञ्व दुःखितः - क. ख. घ. । ८३ ... मिच्छति - घ. । ८४ वज्रः - घ. । ८५ ... स्समालक्ष्य - ख. । ८६ चाभाष्यवचनं चेदमब्रवीत् - घ. । ८७ मा च त्वं - क घ., मैवं त्वं - ख. । ८८ वै - घ. । ८९ पत्नीं - घ. । ९० पुत्रं - घ. । ९१ परा - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अशक्तोयं वृद्धभावान्मामध्यापयितुं[६२] पिता ।
तस्माद् यास्यामि चामन्त्र्य[६३] पितरं वेदकारणात् ॥५५॥
स गत्वा मातरं विप्रः पितरञ्च महायशाः ।
प्रणम्य शिरसा सम्यगिदं[६४] वचनमब्रवीत् ॥५६॥
सुतो युवाभ्यां जातोहं धर्महेतोर्नकामतः[६५] ।
आवां[६६] तारयिता चायं[६७] तथैव च पितामहान् ॥५७॥
सन्ततिश्चाप्यविच्छिन्ना भविष्यति न संशयः ।
इष्टाँश्च लोकान् प्राप्स्याव सुपुत्रेणेति[६८] सर्वथा ॥५८॥
पितृणाञ्चानृणौ स्याव इत्यभीष्टोस्मि वां सुतः ।
सोहं धर्मेष्वकुशलः[६९] श्रुतिस्मृतिबहिष्कृतः ॥५९॥
कर्त्ताज्ञानेन[१००] तत्कर्म पितरो येन दुःखिताः ।
भवाँश्च निरये मग्न[१०१]श्चिरं वत्स्यति[१०२] दुष्टवत् ॥६०॥
भवान्नाध्यापने[१०३] शक्तः स्थविरत्वाद्[१०४] दिने दिने ।
पुत्रस्नेहाच्च कार्याच्च[१०५] न सम्यग् धारयिष्यासि[१०६] ॥६१॥
इयं[१०७] च जननी नित्यमेकपुत्रोयमित्युत[१०८] ।
त्वया सम्यक् प्रशास्यन्तं नैव मामनुमंस्यते ॥६२॥
सोहमन्यं तपो नित्यं निरनुक्रोशमेव च ।
आचार्यं मतिसंपन्नं[१०९] संश्रयामीति मे मतिः ॥६३॥
न चापि तद्[११०] व्यवस्यामि युवयोर्नास्ति कश्चन ।
कुर्याद्यः पादयोर्नित्यं शुश्रूषामिति चिन्तयन्[१११] ॥६४॥
न च नाख्येयमेतद्[११२] वां मया चिन्ता कृता[११३] शुभम्[११४] ।
अशुभं वापि यत्किंचिद्युवां मम गतिः परा ॥६५॥

९२ ममाध्यापयितुं - क. घ. । ९३ यास्येहमामन्त्र्य - घ. । ९४ पादौ इदं - ख. । ९५ पा(प्रा)र्थित-श्चैव कामतः - घ. । ९६ युवां - घ. । ९७ चाहं - घ. । ९८ सुपुत्रेणैव - घ. । ९९ धर्मेषु कुशलः - घ. १०० कर्तुं ज्ञाने न - घ., स ज्ञानैर्विरहितः - ख. । १०१ दुःखं - ख. । १०२ वत्स्याम - ख. । १०३ न ध्यापने - घ. । १०४ स्थविरश्च - ख । १०५ ...दहार्यश्च - ख. । १०६ वारयिष्यसि - घ. । १०७ इद - क. ख. । १०८ नित्यं ममैकः पुत्र इत्युत - घ. । १०९ ...र्यमभिसम्पन्नं - घ. । ११० तं - क. ख. । १११ चिन्तया - घ. । ११२ वचनाख्येयमेतद् - घ. । ११३ कथं - खं., कृतं - घ. । ११४ शुभां - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एवमुक्तौ तु पितरौ पुत्रेण सुमहात्मना ।
अश्रुपूर्णेक्षणौ[११५] स्थित्वा[११६] मुहूर्तमिदमूचतुः ।
आघ्रायालिङ्ग्य[११७] संमृज्य[११८] स्नेहात् प्रियसुतौ[११९] तदा ॥६६॥

भूमन्युरुवाच

शुश्रूषा द्विविधा पुत्र पितॄणां धर्मसंमिता[१२०] ।
या कर्तव्या प्रयत्नेन सुतेन सुमहात्मना ॥६७॥
ऐहिकी चाङ्गशुश्रूषा या परत्र च धर्मदा ।
यथा तरन्ति पितरः कामाँश्चाप्नुवतेक्षयान् ।
तत्रैहिकं न नो[१२१] ह्रीष्टं[१२२] यथा ह्यामुष्मिकं हितम्[१२३] ॥६८॥
तस्मादामुष्मिकं कर्म यद् भवेत्तत् समाचर[१२४] ।
गच्छाधीष्व श्रुतिञ्चैव स्मृतिञ्चैव सुकर्मणाम् ॥६९॥

सुयशोवाच[१२५]

यथा[१२६] तेयं पिता पुत्र ब्रवीति विदितात्मवान्[१२७] ।
तथा कुरु यथा देवो वरदस्ते[१२८] भवेद्[१२९] भवः ॥७०॥
उदरेण[१३०] मया दुःखं[१३१] धारितस्त्वं महामते[१३२] ।
तथा च बहुभिः क्लेशैर्लब्धः सर्वार्थसिद्धये ॥७१॥
पित्रा च तपसोग्रेण प्राणाँस्त्यक्त्वातिदुस्त्यजान् ।
महादेवाद् भवाँल्लब्धस्तस्य[१३३] युक्तं समाचर ॥७२॥
यथा तुष्टौ त्वया पुत्र जीवौ जीवेन संगतौ[१३४] ।
आवामुभावपि स्याव[१३५] तथा सम्यक् समाचर[१३६] ॥७३॥

---

११५ साश्रुपूर्णेक्षणौ - क. ख. । ११६ दीनौ - घ. । ११७ आघ्राय्यालिङ्ग्य - क., आध्याय्या... - ख. । ११८ संमार्ज्य - क. ख. । ११९ ...सुतं - ख. । इतः परं - "तथा कुरु यशो नित्यं येन नौ दुःखमाप्तवान्" इति पाठोधिको घ. पुस्तके । १२० धर्मसंहिता - क. ख. । १२१ न मे - ख. । १२२ ... भीष्टं (?) । १२३ कृतं - ख. । १२४ समाचरेत् - क. । १२५ मातो ... - घ. । १२६ अथ - घ. । १२७ विदितार्थवान् - घ. । १२८ वदते - घ. । १२९ भवो - ख., यमुक्तवान् - क., करुणात्मवान् - घ. । १३० सुदारुणं - घ. । १३१ दुःखाद् - घ. । १३२ महामुने - घ. । १३३ तपस्तस्माद् - घ. । १३४ संयुतौ - क. । १३५ आवां नैव मरिष्याव - घ., ... स्यातां - क. । १३६ त्वमाचरेः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

ततस्ताभ्यामनुज्ञात आघ्रातश्चैव मूर्धनि ।
प्रदक्षिणमुपावृत्य जगाम स कृतात्मवान्[१३७] ॥७४॥
स जगाम[१३८] तदा ताभ्यां विसृष्टश्च्यवनं[१३९] प्रति ।
ऋग्यजुर्भ्यामिवोत्सृष्टा स्वाहुतिर्वरुणं प्रति ॥७५॥
स तमासाद्य तुष्टेन तेनासौ सफलः[१४०] कृतः ।
भागधेयमिव प्राप्य देवैर्मन्त्रः पुरस्सरः[१४१] ॥७६॥
अथ पुत्रे गते तस्मिन् पिता दिष्टान्त[१४२]मीयिवान्[१४३] ।
काष्ठकूटस्ततोऽभ्येत्य कृतविद्यः सुधार्मिकः ॥७७॥
अपश्यन्मातरं दीनां वितोयामिव[१४४] पद्मिनीम्[१४५] ।
सोमहीनामिव[१४६] निशामाज्ञाहीनामिव श्रियम्[१४७] ।
रुदतीमश्रुपूर्णाक्षीं[१४८] विलपन्तींसुदुःखिताम् ॥७८॥
काष्ठकूटस्तु तां दृष्ट्वा दुःखेन समभिप्लुताम्[१४९] ।
जयंत[१५०] इव पौलोमीं शक्रे नष्टेब्रवीदिदम् ॥७९॥

काष्ठकूट उवाच

श्रुतं मयेदं प्रागेव कृतं चैवोर्ध्वदेहिकम्[१५१] ।
मा शोके मन आधत्स्व एष धर्मःसनातनः ॥८०॥
देवानाञ्च ऋषीणां च योगिनाञ्च महात्मनाम् ।
मर्त्यानां किं पुनर्मातर्मा[१५२] शुच[१५३]स्तं तपोधनम्[१५४] ॥८१॥
अहं तेनात्मनात्मा वै[१५५] सृष्टः[१५६] स्वेनैव[१५७] तेजसा ।
पश्य मां कृतकृत्यं त्वं गायत्रीवात्मनः सुतम् ॥८२॥

---

१३७ सुकृतात्मवान् - क. ख., स कृतार्थवान् - घ. । १३८ आजगाम - ख. । १३९ विशिष्टश्चार्चनं - घ. । १४० फलदः - ख. । १४१ मन्त्रपुरस्सरः - क. ख. घ. । १४२ कालेन - क. घ. । १४३ मेयिवान् - ख., संयुक्त - क., संमृत - घ. । १४४ निस्तोयामिव - घ., नामतो - ख. । १४५ पक्षिणीम् - घ. । १४६ चन्द्रहीनामिव - ख. । १४७ यज्ञहीनमपाश्रमम् - घ., प्रियां - क., प्रिये - ख. । १४८ साश्रुपूर्णाक्षीं - क. ख. घ. । १४९ प्लुतः - घ. । १५० यजंत - ख. । १५१ कृता चैवोदकक्रिया - क. ख. । १५२ किमु तन् मातर्मा... - ख. । १५३ मा रुद - क., मा रोदी - घ. । १५४ तपोधने - क. । १५५ सृष्टः - ख, भावः - घ. । १५६ स्वेन - ख. । १५७ तेनैव - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वेदाः सर्वे मयाधीताः साङ्गोपाङ्गास्सविस्तराः ।
तथोपवेदास्सर्वे च[१५८] अध्यात्मञ्चैव कृत्स्नशः ॥८३॥
यत्किंचित् पुरुषैर्ज्ञेयं तत्सर्वं ज्ञानमेव च ।
श्रोतव्यं च श्रुतं सर्वमुपास्ताश्चापि[१५९] योगिनः ॥८४॥
अनेनापि[१६०] प्रकर्षेण हृष्यमाणा मुदान्विता ।
मां पालय महासत्वे गायत्रीव सदा क्रतुम् ॥८५॥

सनत्कुमार उवाच

श्रुत्वा तस्य वच[१६१]स्तस्तद्वै[१६२] माता[१६३] तथ्यं[१६४] महात्मनः ।
भूयस्तरेण[१६५] दुःखेन[१६६] रुदती[१६७] तमुवाच ह ॥८६॥

सुयशोवाच[१६८]

पुत्र नैतद्धि दुःखं मे मृतः स इति[१६९] संमतः ।
सर्वेषां प्राणिनामेतद्विहितं सत्यधर्मिणाम् ॥८७॥
स चापि कृतकृत्यश्च महात्मा तपसान्वितः ।
न तस्य[१७०] शोच्यमस्माभिरिह किञ्चिद्धि[१७१] विद्यते ॥८८॥
आत्मानं पुत्र शोचामि याहं तेन विना कृता ।
तमेवानु मृता नास्मि तवागमनकांक्षिणी ॥८९॥
नार्था न भोगस्वजना न पुत्रा नैव[१७२] बान्धवाः ।
योषितां[१७३] तत्र तिष्ठन्ति पतिर्यत्रावतिष्ठते ॥९०॥
पतिर्यदि[१७४] ततः सर्वं[१७५] नास्ति किञ्चित् पतिं विना[१७६] ।
सर्वं हि दुःखदं तासां[१७७] यासां नास्ति पतिः सुत[१७८] ॥९१॥

---

१५८ तु - ख । १५९ ...श्चैव - ख. । १६० अनेन हि - क. ख. । १६१ तत - घ. । १६२ सर्वं - ख. । १६३ याथातथ्यं - घ. । १६४ तस्य - क. । १६५.. स्तारेण - ख. । १६६ दुःखार्ता - ख. । १६७ रुदन्ती - ख. । १६८ यशो - क. ख. । १६९ इत्येव - ख., स श्रुतिसागरः - घ. । १७० तस्या घ. । १७१ किञ्चिन्न - घ. । १७२ न ममाद्याखिला भोगाः स्वजनाः पुत्र नाखिलान्भोगान् स्वजनाः ... - घ. । १७३ योजिता - घ. । १७४ पतिर्यत्र - घ. । १७५ न तत् सर्वं - ख, गतिः सर्वा - घ. । १७६ पतिव्रता - घ । १७७...मेतासां - ख. । १७८ सुतः - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

इदं च[१७९] मे पुनर्दुःखं यत्त्वां तेन[१८०] सहाद्य वै ।
नाभिनन्दामि संहृष्टा सुतं[१८१] श्रीरवि विष्णुना ॥९२॥
बहुशः स हि मामाह[१८२] काष्ठकूट इहैष्यति[१८३]।
कृतविद्यस्ततस्तस्य वरयिष्ये स्नुषां शुभाम्[१८४] ॥९३॥
काश्यपस्योदलस्येयं सुता[१८५]गुणवती भृशम्[१८६] ।
तामहं वरयिष्यामि काष्ठकूटस्य सुव्रताम् ॥९४॥
तदा[१८७] द्रक्ष्यामि तं पुत्रं सपत्नीकं दृढव्रतम् ।
अग्नीँश्चैवाहरिष्यामि[१८८] पत्नीवन्तं[१८९] समीक्ष्य वै[१९०] ॥९५॥
पत्न्याः[१९१] कदाहं पुत्रस्य पाणिग्रहणतोषितः ।
शुभानि मनसा वाचा विधास्यामि बहून्यपि ॥९६॥
एवं मनोरथवतस्तस्य पुत्रवतस्तथा[१९२] ।
प्रियपुत्रस्य[१९३] नैवाभूदेतद् दहति मां सुत ॥९७॥
मया त्वमुक्तपूर्वश्च[१९४] गच्छन्वै तस्य[१९५] सन्निधौ ।
जीवौ[१९६] यथा त्वां[१९७] पश्यावस्तच्च[१९८] नैवाभवत्तथा[१९९] ॥९८॥
वज्रसारमयं मेद्य[२००] हृदयं न हि[२०१] दीर्यते
या त्वां पश्यामि पुत्रेह विना तेनासती[२०२] पुनः ॥९९॥

सनत्कुमार उवाच

ततः सा कुररी यद्वद्विना पत्या महायशा ।
विलप्य बहुदुःखार्त्ता पपात धरणीतले ॥१००॥
तां काष्ठकूटो दुःखार्तां पतितां गतजीविताम् ।
विसंज्ञामग्निना दग्ध्वा विललाप सुदुःखितः ॥१०१॥

---

१७९ ततश्च - क. । १८० त्वयानेन - ख. । १८१ सुखं - क. ख., कामं - घ. । १८२ तामाह - घ. । १८३ इहेष्यति - क. ख. । १८४ सुतां - ख. । १८५ शुभा - ख. । १८६ ...रिह - ख. । १८७ कदा - ख. । १८८ अग्निं चैवाहरिष्यामि - ख. । १८९ पत्नीरत्नं - क. ख. । १९० वे - क., ह - ख. । १९१ पत्न्या - क. ख. । १९२ ... स्तस्य पुत्र तव पितुः ... - घ. । १९३ प्रियश्च तस्य - घ. । १९४ ...स्सर्वश्च - क. । १९५ स्वै... - ख., ... न्नै तस्य - ख. । १९६ शिवौ - घ. । २९७ ...वां - घ. । १९८ स्तत्र - घ. । १९९ त्तदा - घ. । २०० पुत्र - घ. । २०१ यत्र - क. घ. । २०२... नेनासती - क, तेनासतां - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

हा तात मम दुर्बुद्धेरधर्मज्ञस्य चैव हि[२०३] ।
- - - - - - - - - - - - - - - - - - - ।।१०२।।
क्व गतोसि न मेद्य त्वं सभार्यः संप्रभाषसे ।
ननु त्वयाहं निर्दिष्टो[२०४] गच्छाधीष्वेति हृष्टवत्[२०५] ।।१०३।।
सोहमद्यागतोधीत्य[२०६] कस्मान्मां नाभिभाषसे ।
ननु[२०७] ते तपसा लब्धः परेण च[२०८] समाधिना ।।१०४।।
पुत्रोहं देवदेवाद्धै रुद्रात् किं नाभिभाषसे ।
किं मयापकृतं[२०९] तात सहभार्यस्य तेनघ[२१०] ।।१०५।।
यन्मां सहाम्बयागत्य[२११] दृढं नैवाभिनन्दसि[२१२] ।
हा हतोसि मयैकेन दुष्पुत्रेण दुरात्मना ।।१०६।।
अराजकमिदं मन्ये पितृघ्नं मां न हन्ति यत् ।
एवं स विलपन् व्यास ऋषिभिर्बहुभिस्तथा ।।१०७।।
संस्थापितः समाश्वस्ते नाकरोदुदकक्रियाम् ।
इमां प्रतिज्ञां चक्रे च[२१३] ऋषिमध्ये महातपाः ।।१०८।।
दुष्करां[२१४] सर्वभूतानामुपस्पृश्य कृताञ्जलिः[२१५] ।
अद्यप्रभृति नोच्छ्वासं करिष्यामि कथञ्चन ।।१०९।।
वायवो मे शरीरस्था न चरिष्यन्ति[२१६] कर्हिचित् ।
निमेषोन्मेषरहित एकपादोर्ध्वबाहुमान्[२१७] ।।
काष्ठलोष्ठोपलीभूतो भविष्यामि न संशयः ।।११०।।
रुद्रं द्रक्ष्यामि[२१८] यावच्च यावच्च पितरं तथा ।
सभार्यं सं[२१९]प्रपश्यामि तावद् व्रतमिदं मम ।।१११।।

---

२०३ हृ - क. टि. । २०४ त्वयाहमुद्दिष्टो - क., ...हमादिष्टो (?) । २०५ ...वान् - क. ।
२०६ ...धीत्वा - क. ख. । २०७ अम्ब - घ. । २०८ परेणैव - घ. । २०९ न कृतं - घ. ।
२१० सभार्यस्य स (तो?) नघ - ख., ... तेन वै - घ. । २११ ...गत्वा - क. ख. । २१२ ...नन्दसे - ख. ।
२१३ स - ख. । २१४ पुष्करात् - ख. । २१५ कृतांजलिम् - क. । २१६ करिष्यन्ति - ख. ।
२१७... वाहुना - ख. । २१८ वक्ष्यामि - क. । २१९ च - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

ततः स ऋषिभिस्तैस्तु[२२०] दृश्यमानो महातपाः ।
महेश्वरं सदा ध्यायन् तत्रैव समतिष्ठत[२२१] ॥११२॥
तस्य देवः[२२२] स्थितस्यैवं पितृभक्त्या[२२३] तथापि च ।
तुष्टो दिनेष्टमे व्यास स्वयमेवाह शङ्करः ॥११३॥

देवदेव उवाच

काष्ठकूट प्रयच्छामि दिव्यं चक्षुस्तवानघ ।
पश्य मां त्वं सुविश्रब्धमदृश्यं योगिनामपि ॥११४॥
ब्रूहि पुत्र वरं चापि यस्ते हृदि समाहितः ।
प्रदास्यामि न सन्देहः सुनिश्चित्याभिधत्स्व[२२४] माम्[२२५] ॥११५॥

सनत्कुमार उवाच

ततः स दृष्ट्वा देवेशमुद्यन्तमिव भास्करम् ।
पपात पादयोर्हृष्ट इदञ्चोवाच सुस्वरम्[२२६] ॥११६॥

काष्ठकूट उवाच

भगवन् मृत्युना माता पिता च मम योजितौ ।
जीवेतां तावुभौ देव एतदिच्छाम्यहं वरम्[२२७] ॥११७॥

देवदेव उवाच

तावुभौ[२२८] नरकं घोरं प्रपन्नौ[२२९] मृत्युनार्दितौ ।
न तौ शक्यौ पुनर्जीवौ[२३०] कर्तुमन्यद्वृणीष्व मे[२३१] ॥११८॥

काष्ठकूट उवाच

नाहमन्यं वरं देव कथञ्चिदपि कामये ।
पित्रर्थोयं समारम्भस्तद्विधत्स्व नमस्तव ॥११९॥

---

२२० त(तो) महर्षिभिस्तैस्तु - ख. । २२१ ... तिष्ठति - ख. । २२२ देवे - क., ह्यव... - ख. । २२३ पितृभक्त - ख. । २२४ सन्देहं - क., अचिरेणाभिधत्स्व तत् - घ., इतः पूर्वं "एतस्मिन्तरे तत्र देवो रुद्रः समभ्यगात्" इति पद्यार्धं दृश्यते घ. पुस्तके । २२५ तम् - क. । २२६ सत्वरम् - घ. । २२७ एतदिच्छामि वेदितुं - घ. । २२८ तौ मृतौ - क. घ. । । २२९ प्रयातौ - ख. । २३० प्रणेतारौ -घ. । २३१ मया दुष्कृतकर्मणा - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

देवदेव उवाच

शरीरं चेन्मृतस्यास्ति तच्छक्यं[२३२] जीवितेन हि ।
संयोजयितुमद्यैव[२३३] दग्धस्यैतन्न विद्यते ॥१२०॥
तयोर्नचास्ति वै देहो[२३४] न चान्यत् करणं[२३५] तथा ।
यादृक् च स पिता तुभ्यं भवाँस्तादृक् छरीरतः[२३६] ।
शरीरमेतत्त्वं यच्छ ततो जीवौ[२३७] भविष्यतः[२३८] ॥१२१॥

काष्ठकूट उवाच

ताभ्यां[२३९] वै नास्त्यकर्तव्यं[२४०] कर्तव्यं चेन्मतं भवेत् (?) ।
शरीरं च विना दृष्टमुत्थानं वै ध्रुवस्य[२४१] तु (?) ॥१२२॥
न चापि मे शरीरेण विना ताभ्यां[२४२] रतिः प्रभो ।
तस्माद् गृहाण देवश शरीरं यदि मन्यसे ॥१२३॥
तस्यैवेदं तदादेव अङ्गादङ्गं समुत्थितम् ।
तस्माद्यच्छस्व देवेश न मे कार्यमनेन हि ॥१२४॥

सनत्कुमार उवाच

ततः स भगवान्देवः प्रहस्य[२४३] ऋषिसत्तम[२४४] ।
प्रीतात्मा प्रत्युवाचेदं युयुक्षुस्तं[२४५] शुभेन हि ॥१२५॥

देवदेव उवाच

परीक्षेयं कृता पुत्र तव धर्मवृतां वर[२४६] ।
पितृभक्त्यानया सम्यक् तुष्टोस्मि शृणु मे वचः ॥१२६॥
अक्षयश्चाव्ययश्चापि जरामृत्युविवर्जितः[२४७] ।
ऐश्वर्येण च संयुक्तः प्रियो मे गणपो भवान्[२४८] ॥१२७॥
काष्ठकूट इति ख्यातः सर्वयोगबलान्वितः ।
कामगेन विमानेन मत्कृतेन चरिष्यसि ॥१२८॥

---

२३२ न शक्यं - घ. । २३३ ...मन्येन - ख. घ. । २३४ देहो वै - घ. । २३५ कारणं - क. ख. घ. । २३६ समीरितः - घ. । २३७ जीवो - घ. । २३८ भविष्यति - घ. । २३९ तुभ्यं - घ., नान्यं - क. । २४० नास्ति कर्तव्यं - घ. । २४१ चाध्रुवस्य - घ. । २४२ विज्ञानाभ्यां - घ. । २४३ प्रहृष्ट - घ. । २४४ सत्तमं - घ. । २४५ मुमुक्षुस्तं - घ. । २४६ पुत्रवतां - घ. । २४७ अजरो मृत्युवर्जितः - क. । २४८ भव - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

इमे चऋषयः सर्वे आश्रमेस्मिन् तपस्विनः ।
तवैवानुचरा भूत्वा भविष्यन्ति गणेश्वराः ।।१२९।।
अक्षयाश्चाव्ययाश्चैव[२४९] महायोगबलान्विताः[२५०] ।
ऐश्वर्येण च तुल्यास्ते भविष्यन्ति न संशयः ।।१३०।।
अयञ्च ते पिता पुत्र भूमन्युः सह भार्यया ।
तवैवानुचरो[२५१] भूत्वा त्वत्समः समुपस्थितः ।।१३१।।
श्वेतञ्च पर्वतं दिव्यं विमानैरुपशोभितम् ।
कामगं सं[२५२]प्रयच्छामि निवासं स्वर्गसन्निभम् ।।१३२।।

सनत्कुमार उवाच

ततः स भगवान्देव अनुगृह्य तमूर्ज्जितम् ।
जगाम मन्दरं भूयः सोपीष्टं देशमाव्रजत् ।।१३३।।
यावद् देवी तपोयुक्ता पितुः[२५३] शिखरमास्थिता[२५४] ।
तावद् देव[२५५] इदं सर्वं चकार कथितं हि यत्[२५६] ।।१३४।।
य इदं[२५७] देवदेवस्य चेष्टितं शृणुयान्नरः ।
श्रावयीत द्विजान् वापि[२५८] न स दुर्गतिमाप्नुयात्[२५९] ।।१३५।।
नित्यमेतदधीयानः[२६०] शुचिः प्रयतमानसः ।
देहभेदं समासाद्य रुद्रलोकं स गच्छति ।।१३६।।
य इमं बहुपापनाशनं परमं रुद्रसमीपयोजनम् ।
पठते च गुणप्रसाधनं स मृतो याति न दीनसंभवम् ।।१३७।।

⊙ इति स्कन्दपुराणे काष्ठकूटमहाभाग्यं नाम द्विपञ्चाशोध्यायः ⊙

व्यास उवाच

देवी भगवती सा हि हिमवत्तनयाव्यया ।
कियन्तं कालमचरत्तपः परमदुश्चरम् ।।१।।

---

२४९ अक्षयश्चाव्ययश्चैव - क. ख. । २५० ... न्वितः - क. । २५१ तथैवानुचरो - घ. । २५२ तं - क. । २५३ गिरेः - घ. । २५४ ... माश्रिता - क. । २५५ तावदेव - क. ख. घ. । २५६ च - घ. । २५७ इमं - क. ख. घ. । २५८ पापा - घ. । २५९ न दुर्गतिमवाप्नुयात् - ख., स सद्गतिमवाप्नुयात् - घ. । २६० मेतदधीयँश्च - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कथं लब्धवती चापि वरं वरशतारणि:[१] ।
एतदिच्छामि कथितं सर्वं वै द्विजसत्तम[२] ।।२।।

सनत्कुमार उवाच

शृणु काले व्यतीते हि तपो देव्याः सुदुश्चरम् ।
प्रयता[३] प्राञ्जलिर्भूत्वा समाधाय मनस्तथा ।।३।।
दिवाकरेभिसन्धाय[४] चक्षुषी[५] मन एव च ।
तस्थौ वृक्षावबद्धेव दार्वच्चर्चानिमिषेक्षणा[६] ।।४।।
सुवर्चलेन[७] सादित्यमीक्षती पर्यवर्तत[८] ।
एकपादोर्ध्वबाहुश्च निरुच्छ्वासा बभूव ह[९] ।।५।।
दिव्यं वर्षसहस्रं सा निश्चलोपलवत् स्थिता ।
व्याघ्रद्वितीया रुद्राणी तपोयुक्ता[१०] शुभव्रता ।।६।।
न चास्या ग्लानिरभवन्न बलक्षय एव वा ।
पूर्ववच्च हि[११] सा देवी तपसो वावतिष्ठत[१२] ।।७।।
तस्यास्तपःप्रभावेण सर्वं सस्थाणुजंगमम्[१३] ।
अभावोपहतं[१४] यद्वज्जगदार्त्तमतिष्ठत[१५] ।।८।।
नातिदीप्तोभवत् सूर्यश्चन्द्रमा न प्रकाशते[१६] ।
ज्योतींषि तिमिराण्यासन् व्योम्नि सिद्धा न यान्ति च ।।९।।
मम्लुश्च देवमाल्यानि विमानानि च पेतिरे[१७] ।
स्वर्गेपि न सुखं तेषामौत्सुक्यं चापि जायते[१८] ।।१०।।
धूमायन्ति दिशः सर्वास्त्रैलोक्यञ्चैव कृत्स्नशः ।
विद्याधृतां गतिर्भग्ना प्रज्वलन्त्यायुधानि च[१९] ।।११।।
मृगा व्याघ्राश्च सिंहाश्च विडालोलूकमूषिकाः[२०] ।
पन्नगा[२१] नकुलाश्चैव एकस्थाः सञ्चरन्त्युत ।।१२।।

---

१ त्वन्यदुरासदं - घ., ...रणी - ख. । २ च विप्रसत्तम - घ. । ३ प्रयतः - क. ख. । ४ ...तिसन्धाय - घ. । ५ चक्षुश्च - क. ख. । ६ सा तदानिमिपेक्षणा - घ. । ७ शनैः शनैः - घ. । ८ पर्यवर्तते - क. । ९ च - क. । १० तेन युक्ता - ख. । ११ ...च्चापि - घ. । १२ तपसैवावतिष्ठत - क., तपसे चावतिष्ठत - घ. । १३ स्थावरगंगमम् - घ. । १४ अभवोपहतं - ख. । १५ ...र्त्तं व्यतिष्ठत - ख. घ. । १६ कान्तिहीनश्च चन्द्रमाः - ख. । १७ निपेतिरे - ख., निपेदिरे - क. । १८ चोपजायते - ख. । १९ न ज्वलन्त्यायुधानि च - घ. । २० ...पक्षिणः - ख. । २१ पक्षिणो - क. घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ततो देवाः समागत्य ऊचुः सर्वे परस्परम् ।
विपर्ययोयं नाकस्मात्[२२] त्रैलोक्यस्यास्य दृश्यते[२३] ॥१३॥
कारणं महदत्रास्ति नेदं निष्कारणं भवेत् ।
तस्माद्वयमजानन्त एतं[२४] सर्व[२५] विपर्ययम्[२६] ॥१४॥
किन्तिष्ठामः समुद्विग्ना गच्छाम[२७] ब्रह्मणोन्तिकम् ।
इत्युक्त्वा ते सुराः सर्वे बृहस्पतिपुरोगमाः ॥१५॥
वैराजभवनं गत्वा ब्रह्माणं[२८] संप्रणेमिरे[२९] ।
पूजिता ब्रह्मणा सम्यगुपविष्टा यथार्हतः ॥१६॥
पृष्टास्तेनागमे हेतुमूचु[३०]र्हृच्छोकपीडिताः ।
भगवन् लोकतत्त्वं च[३१] सर्वं प्रत्यक्षवद्[३२] विभोः[३३] ॥१७॥
लोकोयं विपरीतोद्य किमर्थं शंस नः प्रभो[३४] ।
तेषां तद्वचनं श्रुत्वा भीतानां सर्वयोगवित् ॥१८॥
उवाच मधुरं श्लक्ष्णमिदं गम्भीरवद्वचः ।
एषा हैमवती देवी रुद्राणी लोकधारणी[३५] ।
तपश्चरति युक्तात्मा योगमास्थाय निश्चलम् ॥१९॥
अद्य वर्षसहस्रं हि दिव्यं तस्याः समाधिना ।
वर्षाणां द्वे शते चैव तथान्यच्छरदां शतम् ॥२०॥
तपश्चरन्त्या[३६] योगेन तस्यैव[३७] तपसः सुराः ।
प्रभावो येन लोकानां विपरीतत्वमागतम् ॥२१॥

देवा ऊचुः

यदि तस्याः प्रभावेण महोत्पातभयं त्विदम् ।
अतो भूयो दहेल्लोकाँस्तस्मात्तां सन्निवारय ॥२२॥

---

२२ त्रैलोक्ये - ख., चास्य - घ. । २३ अकस्मात्संप्रदृश्यते - ख. । २४ एतान् - ख., एतत् - घ. ।
२५ सर्वं - घ., सर्वे - ख. । २६ विपर्ययान् - ख. । २७ गच्छामो - क. ख. । २८ वैराजं - घ. ।
२९ संप्रपेदिरे - घ., च... - ख. । ३० हेतुं तमूचुः - घ. । ३१ लोकतत्वज्ञ - घ. । ३२ सर्वदृगक्षवद् - ख. ।
३३ विभो - क. ख. । ३४ किंच तत्कारणं ब्रूहि येन सर्वे विमोहिताः - घ. । ३५ लोकधारिणी - घ. ।
३६ तपश्चरत्या - क. ख. । ३७ तस्यैव - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सा हि देवी तपोयुक्ता अतो भूयो विभावरी ।
लोकानिमान् सहास्माभिर्दहेदपि न संशयः ॥२३॥
तस्माल्लोकहितार्थाय अस्माकं वचनादपि ।
तथा कुरु यथा साध्वी[३८] विनिवर्त्तेत[३९] शोभना ॥२४॥

पितामह उवाच[४०]

एवं भवतु गच्छध्वं निर्वृता[४१] भवता[४२]नघाः ।
वरप्रदानेनेष्टेन[४३] रुद्राणीं[४४] स्थापयाम्यहम् ॥२५॥
गतेष्वथ तु[४५] देवेषु ब्रह्मा लोकपितामहः ।
विमानं काञ्चनं शुभ्रं[४६] वेदिकाशतसंकुलम् ॥२६॥
किङ्किणीजालसन्नद्धं मुक्तादामावभासितम् ।
इन्द्रनीलमयैः स्तम्भै[४७]र्जालैर्जाम्बूनदैस्तथा[४८] ॥२७॥
घंटाभिर्विश्वरूपाभिः[४९] समन्तात् परिवारितम्[५०] ।
वज्रेन्द्रनील[५१]वैदूर्यमहानीलादिभासितम् ॥२८॥
स्तूपिकाभिश्च योग्याभिः स्फाटिकाङ्काभिरावृतम्[५२] ।
सर्वलोहमयं[५३] तद् वै स्वयं देवेन निर्मितम् ॥२९॥
पञ्च भूतमयं[५४] तद्धि प्रकृतिस्थमथापि च ।
शब्दाभिजालसम्बद्धं घण्टेन्द्रियसुशब्दवत् ॥३०॥
मुक्तादामाष्टकैर्युक्तं किङ्किणीषोडशावृतम् ।
विंशति[५५]र्वेदिकाश्चात्र विमानं[५६] तन्महाप्रभम् ॥३१॥
शतार्द्धलक्षणै[५७]र्दिव्यैर्मणिभूभि[५८]स्तथाचितम् ।
आसनैर्बहुभिर्युक्तं लोकस्थानैः[५९] समन्ततः[६०] ॥३२॥

---

३८ हि - घ. । ३९ विनिवर्त्तेति - क. ख. घ. । ४० ब्रह्म उ - ख. । ४१ निवृत्ता - क. ख, निर्वृत्ता - क. । ४२ ... था - क. । ४३ वरदानेन हस्तेन - घ. । ४४ रुद्राणां - घ. । ४५ गतेषु तेषु - घ. । ४६ शुभं - घ. । ४७जालैः - ख. । ४८ जम्बुनदमयैस्तथा - ख. । ४९ वेंशमरूपाभिः - घ., दिव्य... - घ. । ५० परिनादितम् - ख. । ५१ वज्रीनेन्द्र - क. ख. घ । ५२ स्फटिकाङ्काभिरावृतम् - ख. । ५३ सर्वलोकमयं - ख. घ. । ५४ पञ्चचूडमयं - घ. । ५५ त्रिशन्ति - ख. । ५६ किंमानं - क., विहायं - ख. । ५७ शातकुम्भमयै - घ. । ५८... भूतै - क. ख. । ५९ स्थाने - क. । ६० सुसंमितम् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

आरुरोह विमानं तद् ब्रह्मा स्वमुनिभि[६१]स्सह ।
वेदैः[६२] सह[६३] तथा मन्त्रैः शास्त्रैः[६४] सर्वै[६५]स्तथैव च ।।३३।।
मध्ये तस्यासनं दिव्यं[६६] स्वर्णपद्मोपगं[६७] दृढम्[६८] ।
सुखोपविष्टस्तत्रासौ[६९] ब्रह्मा लोकपितामहः ।।३४।।
तस्य पार्श्वे तु सावित्री गायत्री चैव सुप्रभा ।
ऋग्वेदो दक्षिणेनास्य यजुर्वेदश्च[७०] पश्चिमे ।।३५।।
उत्तरे सामवेदस्तु अग्रतोथर्वणस्तथा ।
प्रायश्चित्तानि धर्माश्च नियमाश्च तपांसि च[७१] ।।३६।।
दानानि च विचित्राणि ऋतवः सेष्ट्यस्तथा[७२] ।
सप्तव्याहृतयः[७३] पुण्यास्तथा लोकाश्च सर्वशः ।।३७।।
पर्वताश्चैव नद्यश्च तथा लोकस्य मातरः ।
लोकपालाः प्रजाध्यक्षा दक्षो धर्मस्तथैव च ।।३८।।
भृगुरत्रिर्वसिष्ठश्च[७४] पुलस्त्यः पुलहः क्रतुः ।
मरीचिरङ्गिराश्चैव रुचिश्चैव महायशाः ।।३९।।
ऋभुः सनातनश्चैव विराजश्च महातपाः ।
पितरश्चैव देवाश्च ब्रह्मणो याः[७५] प्रसूतयः ।।४०।।
पृथिवी वायुराकाशमापो ज्योतिस्तथैव च[७६] ।
एते चैव यथोद्दिष्टाः सागरादिश एव च ।।४१।।
विद्याश्च धर्मकाराश्च अग्रतस्तेवतस्थिरे ।
ब्रह्मदण्डश्च दण्डश्च कलशः काञ्चनस्तथा ।।४२।।
कमण्डलुश्च तस्यासीत् पार्श्वयोरुभयोरपि ।
यज्ञोपवीतं श्रीमच्च ओङ्कारश्च तथाग्रतः ।।४३।।

---

६१ स मुनिभिः - क.. ख. घ. । ६२ देवैः - ख. । ६३ ...रिह् - घ., महाभागैः - ख. । ६४ चापि - क. । ६५ सर्वैः शास्त्रै - घ. । ६६ हैम - ख. । ६७ पम - घ., रि - ख. । ६८ प्रभुः - ख. । ६९उग्रोपविष्टस्तत्रासौ - क. ख. । ७० ...दोस्य (दस्य) - ख. । ७१ तपांसि विविधानि च - क. घ. । ७२ सह इष्टिभिः - ख., तपस - घ., । ७३ सर्वव्याहृतयः - घ., तथा व्याहृतयः - क. ख. । ७४ भृगुर्वसिष्ठ-अत्रिश्च - क. । ७५ ये - क., ब्रह्मणोपि - घ., ये च सृष्टयः - ख. । ७६ ...श्च पञ्चमः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अक्षसूत्रं[७७] च योगश्च[७८] जप्यं[७९] चैवाग्रत: स्थिता:[८०] ।
स्वाहा स्वधा वषट् वौष[८१]डग्निश्चैतानि पार्श्वत:[८२] ॥४४॥
यमाश्च नियमाश्चैव साधनानि[८३] बहूनि च ।
धर्मस्यैतानि[८४] सर्वाणि[८५] पार्श्वस्थान्यभवँस्तत:[८६] ॥४५॥
दया कृपाथ[८७] दानञ्च श्रद्धा चैव ह्रिया[८८] सह ।
ऋषीणां पार्श्वगा: सर्वा दक्षिणा यज्ञपार्श्वगा[८९] ॥४६॥
ततो देवाश्च ये केचिद् ब्रह्मलोकनिवासिन: ।
सर्वे समधिरुह्याशु समन्तादवतस्थिरे ॥४७॥
एवं तेषु विमानं तत्[९०] समारूढेषु सर्वश: ।
सुखासीनेषु सर्वेषु ब्रह्मा समनुचोदयत् ॥४८॥
तच्चोदितं योगविदग्रगामिना[९१] महाविमानोत्तमसर्वगामिना[९२] ।
ययौ प्रभावेण मनोनुगामिना यथा मन: सर्वसृजेव[९३] हेतुना ॥४९॥

⊙ इति स्कन्दपुराणे देवीवरप्रदाने ब्रह्मण: प्रयाणं नाम त्रिपञ्चाशत्तमोध्याय: ⊙

सनत्कुमार उवाच

ततस्तेन विमानेन सर्वसृक् चतुरानन:[१] ।
जगाम मन्दरं[२] धीमान् विचित्रोपलकन्दरम्[३] ॥१॥
स तमासाद्य विस्तीर्णमनौपम्यमतिप्रभम् ।
दूराद् दृष्टिसुखं[४] दृष्ट्वा सभास्था[५]निदमब्रवीत् ॥२॥
इदं रुद्रगृहं शुभ्र[६]मदृश्यं[७] सुकृतामपि[८] ।
देवानामपि पश्यध्वं भास्कराकारवर्चसम् ॥३॥

---

७७ ब्रह्मसूत्रं - घ. । ७८ योगश्च - क. ख. । ७९ जाप्यं - ख. । ८० स्थितं - घ. । ८१ वषट् चैव - ख., कार: - घ. । ८२ श्वँकपार्श्वत: - ख. । ८३ सध(व)नानि - ख. । ८४ धर्माण्येतानि - क. । ८५ मार्गाणि - घ. । ८६ ... नि समंतत: - घ, ...न्यभवँस्तत: - क ख., तथा - ख. । ८७ क्षमा दीक्षा थ - घ. । ८८ क्रिया - ख. । ८९ पार्श्व त: - घ. । ९० तं - क. ख. घ. । ९१ योगविदा समाधिना - क. । ९२ महाविमानं वृपसर्वगामिना - घ. । ९३ सर्वसृजेन - ख. घ. ।
१...सूक्ष्मचतुर्मुख: - घ. । २...मक्षरं - घ. । ३ शोभितोत्पलकन्दरम् - घ. । ४ मुखं - घ. । ५ सद्यस्ता - घ. । ६ शुभ - घ. । ७ सदृष्यं - घ. । ८ न कृतात्मभि: - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

इदं प्रविश्य देवानां[९] यज्ञश्री[१०]र्नापसर्पति ।
जयश्च नित्यं युध्देषु धर्मश्च सुमहानपि ।।४।।
एतत् सृष्टं स्वयं तेन[११] मनसानुपमद्युति ।
न ह्यस्य सदृशं किञ्चिदण्डेस्मिन् विद्यते गृहम् ।।५।।
इदं प्रविश्य धर्मात्मा भूयो[१२] दुःखं[१३] न विन्दति[१४] ।
न चापि जन्म प्राप्नोति[१५] नित्यमैश्वर्यगो हि सः ।।६।।
अनिर्देश्यमिदं योगाद् योगिनामपि नित्यशः ।
अन्यस्तु कुत एवेदं वर्णयीत महानपि ।।७।।
एतदस्मद्विमानस्य वायुनाभ्याहतं रुषा ।
वर्धते गिरिणा सार्धं विन्ध्यस्य शिखरं यथा ।।८।।
एतदस्मद्विमानस्य मार्गमावृत्यधिष्ठितम् ।
ऊर्ध्वं तिर्यगधस्ताच्च देवदेवस्य तेजसा ।।९।।
एतदन्धं[१६] तमः कृत्वा मेघोसौ जीवनः स्वयम् (?) ।
वज्रोद्यतकरः स्रग्वी प्रत्युद्यात्यभिनादयन् ।।१०।।

सनत्कुमार उवाच

ततः स भगवान्देवो ब्रह्मा लोकपितामहः ।
विष्टभ्य तत्[१७] विमानाग्र्यमवतस्थे कृताञ्जलिः ।।११।।
तुष्टाव च[१८] तदा देवं शर्वमुग्रं कपर्दिनम् ।
ते चैव ऋषयः सर्वे विमानस्थाः सुसंयताः ।।१२।।
प्रकाशं चक्रिरे सर्वं जगत् स्थावरजंगमम् ।
ततस्स मेघः स्वं स्थानमगमद् वृष्टिसर्जनः ।।१३।।
दिशश्च विमलाः सर्वाः प्रकाशश्चाभवद् भृशम् ।
तं जपन्तं विदित्वा च भगवान् गोवृषध्वजः[१९] ।।१४।।

---

९ प्रविश्य तां देव - घ., देवाश्च - क. । १० यद्भीतो - घ., ...र्नो - ख. । ११ दुरारोहं - घ. । १२ दुःखं - ख. । १३ भूयो - ख., विन्देन्न - क. । १४ न विद्यते - ख., दुःभाक् - क. । १५ जायते भूयो - ख. । १६ एतदन्तं - ख. । १७ तं - क. ख. । १८ स - घ., तदेवं हि - ख. । १९ स वृषध्वजः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नन्दिनं द्वारदेशस्थमिदमाह सुरेश्वरः[२०] ।
एष ब्रह्मा विमानेन मामिह द्रष्टुमागतः ॥१५॥
ब्रूहि येनागतोसीह कार्येण विदितोसि मे ।
कुरु तद् गच्छ शीघ्रं तु[२१] कालस्तस्यायमागतः ॥१६॥

सनत्कुमार उवाच

स एवमुक्तो रुद्रेण नन्दी प्रमथनायकः[२२] ।
द्वाःस्थ[२३] एव[२४] विमानस्थं ब्रह्माणमिदमब्रवीत्[२५] ॥१७॥

नन्द्युवाच

यूयं ज्ञाता भगवता येन कार्येण चागताः ।
कुरुध्वं किल[२६] तच्छीघ्रं कालोयं[२७] तस्य वर्तते ॥१८॥

सनत्कुमार उवाच

ततः स कृत्वा मनसा नमस्कारं हि शम्भवे ।
प्रदक्षिणमुपावृत्य[२८] मन्दरं प्रजगाम ह ॥१९॥
स मन्दरगिरिं सर्वं परिहृत्य महामनाः ।
शाकद्वीपस्य मध्येन जम्बूद्वीपमुपागमत्[२९] ॥२०॥
स दृश्यमानो देवैश्च[३०] मुनिभिश्च यतव्रतैः ।
हिमवन्तं गिरिश्रेष्ठमुपागम्येदमब्रवीत्[३१] ॥३१॥
एतद्धिमवतः शृङ्गमुच्छ्रितं कान्तिमत् स्थितम् ।
युगान्तादित्यसंकाशं दूरात् समभिलक्ष्यते ॥२२॥
अत्र[३२] सा जगतो[३३] धात्री धात्री[३४] पुत्रमिवौरसम् ।
पालयन्ती जगत् सर्वं तपस्तप्यति[३५] शैलजा ॥२३॥
अहो नु[३६] शिखरं पुण्यं भाग्यवच्चापि सर्वथा ।
यदेनं[३७] गिरिपुत्र्यर्थे[३८] वरैर्योक्ष्यति कामहा ॥२४॥

---

२० महेश्वरः - ख. । २१ त्वं - ख. । २२ प्रथमनायकः - क. । २३ स्वयं - घ. । २४ ...मेव - क. ख. घ. । २५ ... स्थमिदं ब्रह्माणमब्रवीत् - क. घ. । २६ किं न - घ. । २७ किल तच्छीघ्रकालोयं तपसः - ख. । २८ मुपासृत्य - ख. । २९ मथागमत् - क. । ३० देवेशः - ख. । ३१ मुपगम्येदमब्रवीत् - ख. । ३२ यत्र - घ. । ३३ जगतां - घ. । ३४ कालं - घ. । ३५ स्तप्स्यति - क. । ३६ महांतं - घ. । ३७ यदेतद् (?) । ३८ गिरिपुत्र्यर्थं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पश्यध्वं तपसो वीर्यं देव्याः सुचरितस्य वै ।
यदेतच्छिखरं दृष्ट्वा न पश्याम[३९] पुनर्भवम्[४०] ॥२५॥
स एवं कथयन्नेव विमानेन[४१] चतुर्मुखः ।
ऋषिभिः सहितः सर्वैः शिखरद्वारमागतः ॥२६॥
तत्रैनं[४२] रुद्रसचिवा उद्यतायुधपाणयः[४३] ।
भर्त्सयन्तोभ्यवर्तन्त तिष्ठतिष्ठेतिवादिनः ॥२७॥
तान् ब्रह्मा श्लक्ष्णाया वाचा सान्त्वपूर्वमुवाच ह ।
प्रशंसमानस्तान्सर्वान्[४४] प्राञ्जलिर्युक्तमानसः ॥२८॥

ब्रह्मोवाच

यूयं सर्वे महात्मनान एश्वर्येण समन्विताः ।
अक्षया[४५] ह्यनराश्चैव तथाप्रतिहताश्च ह ॥२९॥
महायोगबलोपेता अजय्या युधि केनचित् ।
को युष्मानतिवर्तेत[४६] शक्रोपि[४७]प्रवरेश्वराः[४८] ॥३०॥
देवदेवाज्ञया योहमागतो[४९] मन्दरादिह ।
देव्या वरप्रदानार्थमनुज्ञा क्रियतां मम[५०] ॥३१॥

गणेश्वरा ऊचुः[५१]

देव्या दाता स्वयं देवो वरानिष्टान् महामनाः ।
वरं हि[५२] देवी त्वन्यस्मान्[५३]मनसापि[५४] न चिन्तयेत् ॥३२॥
शक्तो देवोनुग्रहीतुं जगत्सर्वं महेश्वरः[५५] ।
त्वामप्येषोनुगृह्णाति किमु देवीं[५६] जगत्पतिः[५७] ॥३३॥

पितामह[५८] उवाच

अशक्तो न महादेवो वरं दातुं महामनाः ।
य एवं चिन्तयेद् देवं न भवेत् स कथञ्चन ॥३४॥

---

३९ पश्यामः - घ. । ४० पार्वतीं पुनः - घ., ...र्भयं - क., ...वंयं - ख. । ४१ विमानेव (वै) - क. । ४२ तत्र ते - घ. । ४३ आयुधोद्यतपाणयः - क. ख. घ., उक्षतायुध... (?) । ४४ प्रवेपमानस्तान् सर्वान् - क. । ४५ अक्षरा - ख. । ४६ ..नभिवर्तेत - ख. । ४७ शक्तोपि - (?) । ४८ ... श्वरः - क. । ४९ सोहमायातो - ख. । ५० ... तामिति - ख । ५१ गणेश उवाव - क., गणेश्वर उवाच - ख. । ५२ न चैव - क. घ. । ५३ युष्मत्तो - ख., त्वद्विधान् - घ. । ५४ तु - क., हि - घ. । ५५ सर्वमशेषतः - ख. । ५६ किमुतांवै - ख., किन्न - घ. । ५७ जगस्थितिम् - क. । ५८ ब्रह्मो - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

न देवी भगवत्पार्श्वादिच्छते किल पार्वती[५९] ।
वरानिष्टाँस्ततो देवो मामिह प्रेषयच्छिवः[६०] ॥३५॥

सनत्कुमार उवाच

अथ ते[६१] युक्तमनसो[६२] युक्तं प्रत्यक्षमीश्वराः ।
सहेश्वरमपश्यन्त कृतानुज्ञं च[६४] लोकपम्[६५] ॥३६॥
नियुक्ताश्च[६६] पुनः[६७] सर्वे ब्रह्माणं लोककारणम् ।
ऊचुर्गणेश्वराँस्तत्र[६८] विदितार्था[६९] महामुने[७०] ॥३७॥
प्रेषितो देवदेवेन ज्ञातोस्माभिः पितामह ।
त्वं विशस्वाधुना देव पार्वत्या वरदित्सया[७१] ॥३८॥
अवतीर्य विमानात्तु ततः शीघ्रं पितामहः ।
निलिल्ये[७२] शिखरे तस्मिन्नानाधातुविचित्रिते ॥३९॥
अथ सोपलधातुनिर्झरो[७३] गिरिराजोतिमहाशिलोच्चयः[७४] ।
विनिसृष्टदिवाकरामलो[७५] ददिवे[७६] दिव्य इवोदयाचलः[७७] ॥४०॥

⊙ इति स्कन्दपुराणे देव्या वरप्रदाने ब्रह्मागमनं नाम चतुष्पञ्चाशत्तमोध्यायः ⊙

सनत्कुमार उवाच

अथ तं सहसायातमपश्यत्साचलात्जा ।
ऋषिभिस्तैर्महाभागैस्समन्तात्परिवारितम् ॥१॥
रश्मिभिस्तेजसां योनिं मध्याह्न इव भास्करम् ।
सा तमर्घेण[१] पाद्येन मधुपर्केण चैव हि[२] ।
पूजयामास रुद्राणी चतुर्वक्त्रमुपागतम् ॥२॥

---

५९ न देवीं भगवान् दद्यान्नेच्छते किं न पार्वती - घ. । ६० प्रेशयच्छिवः - क. ख. । ६१ तं - क. ख. ।
६२ युक्तमनसा - घ. । ६३ युक्ता - घ. । ६४ कृतानुज्ञाश्च - ख. घ. । ६५ लोकपः - ख. ।
६६ बुद्ध्वा कार्यं - ख. । ६७ ततः - घ. । ६८ .. स्सर्वे - क. ख. घ. । ६९ विदितात्मा - घ. ।
७० महात्मनि - घ. । ७१ ...लिप्सया - ख. । ७२ निलिख्य क. । ७३ सोत्पलधातुनिर्झरो - ख. ।
७४ शिलोच्चये - क. । ७५ ...लः - ख.,...लं - क., ...लः - घ. । ७६ स गिरिं - क., स गिरिर्दिव्य - ख. घ. ।
७७ इवोदयाकरः - क. ख. घ. ।

१ ...मर्घ्येण - क. । २ ह - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ब्रह्मोवाच

लोकस्य जननी भूत्वा धारयित्वा जगत्तथा ।
किमिदं तपसा भूयो लोकं दग्धुमिहेच्छसि ॥३॥
मा सृष्ट्वा जगदेतत्त्वं तपस्यन्ती विनाशय ।
बुद्ध्वैवं[3] धारयस्वेमं लोकं देवि नमस्तव ॥४॥
त्वत्तो रुद्रेण लोकोयमहञ्चैव पुरानघे ।
सृष्टाः स्मो[4] वरदे देवि मा नः कृत्वा विनाशय ॥५॥
तपसा तव[5] रुद्राणि जगत् स्थावरजङ्गमम् ।
तप्यते ग्रीष्ममध्याह्ने जलात्[6] पद्ममिवोद्धृतम् ॥६॥
किं वा ते हृदये देवि यद्यपि[7] स्यात् सुदुष्करम् ।
वरं वृणीहि सर्वाणि दातास्मि हिमवत्सुते ॥७॥

देव्युवाच

वरदोसि यदीशान मम देव चतुर्मुख ।
अयं भक्तोनुरक्तश्च मम नित्यं प्रियः प्रभो ॥८॥
व्याघ्रोस्य[8] तावद्यच्छस्व ततो दास्यसि मे वरम् ।
अद्य वर्षसहस्रं वै स्थितस्यास्य ममाग्रतः ॥९॥
ध्यायतो निमिषस्यैव स्तब्धकर्णस्य लोकप ।
अस्मै धत्स्व वरं देव नास्मि तावद्वरार्थिनी ॥१०॥

पितामह[9] उवाच

एष तिर्यग् दुरात्मा च त्वां भक्षयितुमागतः ।
नास्य शुद्धं मनो देवि क्रूरोयं पापचेतनः[10] ।
पश्यैनं दुष्टमनसं[11] नास्य श्रेयो मनस्त्वयि[12] ॥११॥

---

३ ... मं - क., ...व - घ. । ४ स्म - क. ख. घ. । ५ ...तीव - क. । ६ दिनात् - घ. । ७ यदपि ? ।
८ व्याघ्रस्य - क. ख. । ९ ब्रह्म - ख., देव - घ. । १० पापचेतसः - घ. । ११ दुष्टचेतासौ - ख. ।
१२मनस्विनि - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

अथ सा तद्वचः श्रुत्वा रुद्राणी लोकभावनी[१३] ।
दिव्येन चक्षुषापश्यदज्ञानात् कृतसाहसम् ॥१२॥
अनन्यभक्तः[१४] पूर्वञ्च[१५] जातिदोषेण दूषित[१६]: ।
विदितार्था ततो भूत्वा उवाच हिमवत्सुता ॥१३॥
भगवन् को[१७] हि लोकेषु[१८] तिर्यक्त्वे सति निश्चल:[१९] ।
स्तब्धकर्णेक्षणो दिव्यसहोप्येकमभोजनः ॥१४॥
अवतिष्ठेत किं योयं सहस्रमवतिष्ठत ।
वर्षाणां सुमहातेजा नायं तिर्यक्षु संस्कृतः[२०] ॥१५॥
भवत्वयं दुष्टचेतास्त्वदुष्टो[२१] वा महाबलः[२२] ।
ममानुग्राह्य इत्येव[२३] वरो ह्यस्य[२४] प्रदीयताम् ॥१६॥

सनत्कुमार उवाच

ततःस भगवान् देवश्चतुर्वक्त्रः पितामहः ।
उवाच वचनं देवीमृषीणां शृण्वतां तदा ॥१७॥
आर्याणां दस्यवोपीह[२५] संसर्गात् सिद्धिमाप्नुयुः ।
यथायं क्रूरकर्मापि[२६] सिद्धिं प्राप्स्यत्यनुत्तमाम्[२७] ॥१८॥
तस्मादार्याः सदा सेव्या नित्यं पापकृतापि[२८] हि ।
सिद्धिमेति नरः क्षिप्रमपापानां समीपगः[२९] ॥१९॥
अनुग्राह्यस्तवानिन्द्ये पापोयं दुष्टचेतनः ।
अतोस्मै[३०] ब्रूहि देवेशे वरो यस्तव रोचते ॥२०॥

देव्युवाच

अमरो जरया त्यक्त अक्षयश्चाव्ययस्तथा ।
महायोगबलोपेतो महदैश्वर्यसंयुतः[३१] ।
गणेश्वरो ममेष्टश्च भवत्वेष यदीच्छसि ॥२१॥

---

१३ भाविनी - घ. । १४ अत्यन्तभक्तः - ख. । १५ पूर्वम्मे - ख. । १६ दूषित - ख. । १७ भगभक्षो - क. । १८ लोकोयं - क. । १९ निश्चलं - क. । २० संवृतः (संभृताः) - ख., स्वयं गतः - घ.। २१ अ दुष्टो - ख. घ. । २२ महामनाः - घ. । २३ इत्येवं - ख. । २४ ह्यस्मै - ख., ह्येप - घ. । २५ दर्प(र्शं) नादेव - ख. । २६ हि कुकर्मापि - ख, कुरुतेकर्म - घ. । २७ याप्यत्यनुत्तमाम् - ख. घ. । २८ पापकृतोपि - क. घ. । २९ समीपतः - घ. । ३० अतो मे - घ. । ३१ महदाश्चर्यसंयुताः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पितामह[३२] उवाच

एवं भवतु भद्रं ते सर्वमेतद् भविष्यति ।
जानासि ब्रह्मबन्धूनां ब्रह्मदत्तस्य मंत्रिणम् ।।२२।।
त्वयि भक्तिः[३३] पुराप्यस्य शापाद् व्याघ्रगतिं गतः ।
पश्चालस्य च यक्षोयं प्रतीहारोभवत् पुरा ।।२३।।
त्वया मया यदद्यास्य कृतेयं नन्दिरीदृशी ।
तस्माद् गमिष्यति ख्यातिं सोमनन्दीति नामतः ।।२४।।
यश्चैनं[३४] कीर्त्तयेद् दुर्गे कान्तारेषु भयेषु[३५] च ।
शार्दूलसिंहद्वीपिभ्यो न भयं तस्य जायते ।।२५।।
वद[३६] त्वमपि चेशानि[३७] यस्ते प्रियमनोरथः ।
यावद्[३८]ददामि[३९] सर्वन्ते[४०] नियोगात् पारमेश्वरात्[४१] ।।२६।।

देव्युवाच

इच्छामि भगवन् दिव्यं वर्णं कनकसप्रभम् ।
गौरीति[४२] लोके ख्याता च भवेयं कमलोद्भव ।।२७।।

पितामह[४३] उवाच

एवमस्तु जगन्मातर्यदिच्छसि तपोधने[४४] ।
अन्यं वरय भद्रन्ते[४५] वरं[४६] देवि ददामि[४७] ते ।।२८।।
महद्धीदं तपस्तप्तं भवत्या लोकभावनम् ।
नानुरूपो वरस्तस्य तस्मादन्योपि मृग्यताम् ।।२९।।

देव्युवाच

इच्छामि भगवन्पुत्रं सर्वधर्मभृतां[४८] वरम् ।
महाबलं महोत्साहं[४९] सर्वलोकनमस्कृतम् ।।३०।।

---

३२ ब्रह्मो - ख. । ३३ भक्ति - घ. । ३४ यश्चैवं - ख. । ३५ वनेपु - घ. । ३६ वरं - घ. । ३७ याचस्व - घ. ।
३८ तावद् - घ. । ३९ ददानि - क. घ. । ४० देवेशि - घ. । ४१ परमेश्वरात् - घ. । ४२ सौरीति - ख. ।
४३ ब्रह्मो - ख. । ४४ महामते - ख., महाधने - घ. । ४५ वरं प्रयच्छामि - ख. । ४६ ब्रूहि - ख. ।
४७ यत्प्र ददानि - क. ख. । ४८ लोकधर्मभृतां - ख. ४९ महात्मानं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पितामह उवाच

पुत्रस्ते भविता देवि महायोगबलान्वितः ।
अजेय[५०]स्सर्वभूतानामष्टैश्वर्यगुणान्वितः[५१] ॥३१॥
जेता हन्ता तथा देष्टा[५२] अजरोबध्य एव च ।
अनादेश्यश्च[५३] सततं सर्वेषां प्राणिनां वरः ॥३२॥
सदा बालोथ सुभगो धर्मज्ञो धर्मवत्सलः ।
देवब्राह्मणगोप्ता च विद्वान् सर्वज्ञ एव च ॥३३॥
षण्मुखो द्वादशभुजः शक्तिपाणिस्तथैव च ।
ब्रह्मण्यश्च शारण्यश्च[५४] देवद्विट्संघहा तथा ॥३४॥
अयोनिजो महातेजा[५५] लोकानां सुखकृच्च हि[५६] ।
शनैरेतदुवाचासौ ततश्च विरराम ह ॥३५॥

सनत्कुमार उवाच

वरान् स[५७]दत्त्वा देवेशः कृत्वा चापि[५८] प्रदक्षिणाम्[५९] ।
विमानं तं समारुह्य स्वं लोकमगमत्तदा[६०] ।३६॥
रुद्राण्यपि गते तस्मिन् सोमनन्दिपुरःसरा ।
स्थिताकाशं समास्थाय रोहिणीव बुधानुगा ॥३७॥
मन्त्रानुगेव गायत्री जयन्तेन शची यथा ।
तथा सा भाति रुद्राणी सोमनन्दिपुरःसरा ॥३८॥
य इमं पठते सदा विपश्चित् पुरुषः प्रातरतन्द्रितो हि कश्चित्[६१] ।
कुरुते न भयं हि सोमनन्दिर्वरदस्तस्य हरश्च सोमनन्दी[६२] ॥३९॥

⊙ इति स्कन्दपुराणे सोमनन्दिदेव्योर्वरप्रदानं नाम पंचपंचाशत्तमोध्यायः ⊙

---

५० अजय्यः - ख. । ५१ समन्वितः - क. । ५२ तथा चेष्टा - क. । ५३ अनावेश्यश्च - ख. ।
५४ सदा देवि - घ. । ५५ महातेजो - क. ख । ५६ त्सदा - (?) । ५७ दत्त्वा च - घ. ।
५८ चाभि ... - घ. क. । ५९ प्रदक्षिणं - क. ख. घ. । ६० स्वर्लोकमगमत्तदा - घ. । ६१ कर्हिचित् - घ. ।
६२ सोमनन्दिरिति - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

व्यास उवाच

भगवन् यत्त्वयाख्यातं पूर्वं नरकवर्णने[१] ।
दुष्कृतं कर्म कृत्वा तु नरा नरकगामिनः[२] ॥१॥
भवन्ति[३] सुकृताः सर्वे[४] स्वर्गसौख्यसमायुताः[५] ।
ब्राह्मणा[६] दुष्कृतं कृत्वा गत्वा दुर्गतिमापदम् ॥२॥
कथं भूयः समायन्ति स्वर्ग[७]सौख्यफलं महत् ।
योनीर्वा कथमागम्य बह्वीः संकरजातिषु ।
भूयः सुकृतिनो भूत्वा प्राप्नुवन्ति शुभां गतिम् ॥३॥

सनत्कुमार उवाच

शृणु व्यास पुरावृत्तं[८] दशार्णेषु तु यच्छ्रुतम्[९] ।
सप्तानां[१०] द्विजशिष्याणामशुभं शुभमेव च ॥४॥
आसीत् सुपर्वा विख्यातः कौशिको ब्राह्मणः शुचिः ।
धार्मिकश्च वदान्यश्च विद्वान् विप्रैः सपूजितः ॥५॥
तस्य शिष्या बभूवुर्हि सप्त दुर्मेधसश्च ते[११] ।
गुरुशुश्रूषणेसक्ता[१२] नामतस्तान्निबोध मे ॥६॥
आत्रेयः कण्डरो[१३] नाम उपमन्युश्च दामनः[१४] ।
शाण्डिल्यश्चैव हालोभूद् गार्ग्यश्च[१५] विदलस्तथा ॥७॥
शैशिरो गौतमश्चैव दण्डकीलश्च काश्यपः ।
विदर्भश्चैव हारीत इतीमे सप्त विश्रुताः ॥८॥
उपाध्यायोथ तान्विप्रान् प्रोवाचेदं महातपाः ।
अचिराद् गामितो गत्वा याज्यदत्तां सुरूपिणीम् ॥९॥
गत्वानयत होमार्थे[१६] शीघ्रं माहिष्मतीं पुरीम् ।
त एवमुक्तास्तेनैव माहिष्मत्यास्त्वतन्द्रिताः ॥१०॥

---

१ नरकवर्णनं - घ. । २ ...निर्भयाः - ख. । ३ तरन्ति - घ. । ४ स्वर्गे - क. ख । ५ सर्वसौख्यसमायुताः - क. ख. ।
६ ब्राह्मणं - क. । ७ स्वर्गे - क. । ८ यथावृत्तं - घ. । ९ यच्छुभं - क. ख., द्विजन्मनां - घ. ।
१० मर्त्यानां - घ. । ११ स्तु - ख., स्तथा - घ. । १२ भक्ता - क., रक्ता - ख., शुश्रूषणरताः - घ. ।
१३ कुंडुरो - घ. । १४ नामतः - क. ख. घ. । १५ ...दर्भश्च - घ. । १६ होमार्थं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गामादाय निवर्तन्तो[१७] मृत्तिकावतिमन्तशः[१८] ।
अनावृष्ट्या ततस्तेतु दुर्भिक्षे परिवर्तति[१९] ॥११॥
क्षुधापरिगताः सर्वे किंभक्षाः संबभूविरे ।
सप्तमेहनि[२०]संजाते[२१] निराहाराः सुदुःखिताः ॥१२॥
अमन्त्रयन्त[२२] गामेतां भक्षयाम किमास्यते ।
तेषां यः कण्डरो[२३] नाम आत्रेयकुलसंभवः ॥१३॥
स तानुवाच मा धेनुं भक्षयाम गुरोरिमाम् ।
गुरोरर्थे हि नः श्लाघ्या[२४] मृत्युरप्यविचक्षणाः ॥१४॥
मा गुरोः क्रोधनिर्दग्धा यास्याम निधनं वयम् ।
ते यदा तद्वचो नैव जगृहुः क्षुत्प्रपीडिताः ॥१५॥
स तदोवाच भूयस्तानिदं वचनमर्थवत् ।
यदि वोवधृतं[२५] विप्रा भक्षणेस्यास्तपोधनाः ॥१६॥
मा वृथा भक्षयामैनां पित्रर्थे[२६] प्रोक्षयामहे ।
मा नो दोषद्वयेनेह लोपो[२७] भवतु शोभनाः ॥१७॥
एवं ह्यल्पेन दोषेण[२८] वयं योक्ष्येम[२९] सर्वथा ।
त एवमुक्ताः सम्यक्तु वचस्तस्यावधार्य च[३०] ॥१८॥
प्रोक्षयामासुरव्यग्रा पित्रर्थे तां[३१] पयस्विनीम्[३२] ।
ततः संस्कृत्य विधिवद् निवेद्य च महामुने[३३] ॥१९॥
हुताग्नयस्ततो भूत्वा प्रत्येकमुपभुज्य[३४] च ।
वत्समेकं गले बद्ध्वा आनिन्युर्गुरवे[३५] तदा ॥२०॥
अथ दृष्ट्वा स[३६] तं वत्सं धेनुं पप्रच्छ[३७] तान्द्विजः ।
त ऊचुः पथि शार्दूलोवधीत्तामिति निर्घृणाः[३८] ॥२१॥

---

१७ वर्तन्ते - घ. । १८ मृत्युकालवशं गताः - घ., ... तरः - क. । १९ परिवर्तत - क. । २० मासि - ख. । २१ जाते च - क., एते च - ख. । २२ आमन्त्रयन्त - ख. घ. । २३ काण्डरो - क. । २४ श्लाघ्यो - ख. । २५ वोवभृतं - क., वा निश्रितं - घ । २६ पित्र्यर्थे - क., पित्र्यर्थं - ख., पितृणां - घ. । २७ लेपो - क., लोभाद् - घ. । २८ श्रिया पुष्टचा ततस्ते तु - घ., त्व (स्व) - क. । २९ योक्ष्य - ख., योक्ष्या - क., मोक्षा -घ. । ३० वचस्तस्य प्रधार्य च - घ. । ३१ तु - ख. । ३२ तपस्विनीम् - ख. । ३३ महात्मने - क. ख. । ३४ मुप...- व. । ३५ वद्धमानिन्युर्गुरवे(?)। ३६...धार्य च - ख. । ३७ मच्छ मे - ख. । ३८ तमूचूस्तस्य वै शिष्या न लब्धा गौरितस्ततः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ तेषां वचः श्रुत्वा शंकया च दुरात्मनाम् ।
दिव्येन चक्षुषापश्यद् भक्षितां तैर्महातपाः ॥२२॥
सतः स रोषाद् रक्ताक्षो[३९] निर्दहन्निव तांस्तदा[४०] ।
उवाच वत्सं दृष्ट्वा च[४१] कृपया भृशदुःखितः[४२] ॥२३॥
युष्माभिर्भक्षिता सा हि तथ्यं[४३] न कथितं च मे ।
कर्मणा तेन तस्माद्वो गतिः कष्टा[४४] भविष्यति[४५] ॥२४॥
प्रसादितः स तैः शिष्यैर्ब्राह्मणः सुमहाद्युतिः[४६] ।
कृपया स च तानाह भूयः सर्वानिदं वचः ॥२५॥
यदुक्तं[४७] तन्मया तथ्यं[४८] न[४९] तन्मिथ्या[५०] भविष्यति ।
येषां तु कृतवन्तः[५१] स्थस्तेध्यवस्यन्ति[५२] यच्छुभम्[५३] ॥२६॥
मत्समीपे च न स्थेयमिदानीं वः कथञ्चन ।
दृष्ट्वा वत्सामिमं बालं मा वो धक्ष्यामि गच्छत[५४] ॥२७॥
अथ ते सहिताः सर्वे नष्टसंज्ञा विचेतसः[५५] ।
कालेन समयुज्यन्त चिन्तयन्तो गुरोर्वचः ॥२८॥
दशार्णा नाम सा व्यास सरित् पुण्यजला शुभा[५६] ।
तस्यास्तीरे वनं दिव्यं विश्रुतं तत् सुभास्वरम् ॥२९॥
तत्र व्याधोभवच्छूरः क्षुपको[५७] नाम वीर्यवान् ।
तस्य पुत्राभवँस्ते वै चितकायां महाबलाः ॥३०॥
चितका संप्रसूता[५८] तु पुत्राँस्तान् सप्त संमतान् ।
व्याधाः सर्वेभवंस्ते वै चैतका इति विश्रुताः ॥३१॥
चरन्ति सधनुष्कास्ते निघ्नन्तो[५९] मृगपक्षिणः ।
सिंहान् व्याघ्रान् गजाँश्चैव[६०] वराहादीँश्च सर्वशः[६१] ॥३२॥

---

३९ रोषताम्राक्षो - घ. । ४० तेजसा - ख. । ४१ तु - घ. । ४२ च सुदुःखितः - ख., दुःखपीडितः - क. घ. ।
४३ तया - घ. । ४४ नष्टा...- घ.। ४५ सं तारान् प्रतिपद्य(तत्र)थ - ख। ४६ ब्राह्मणैस्स महाद्युतिः - क. ख. घ।
४७ यद्युक्तं - घ. । ४८ चोक्तं - घ. । ४९ च - ख. । ५० ...थ्यं - क. । ५१ ...न्तो - क. ।
५२ योध्य... - क. । ५३ योध्यवस्यत - ख. । ५४ व्याधत्वं समगच्छत - घ. । ५५ विसंज्ञा नष्टचेतसः - क. घ. ।
५६ पुण्यजला सदा - क. । ५७ क्षुपजो - ख. । ५८ ...ते - घ. । ५९ घ्नन्तो वै - क. ख. ।
६० गणाँश्चैव - घ. । ६१ वराहाँश्च सुदारुणः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तेषां नामानि यानि स्म व्याधत्वे[६२] तानि मे शृणु ।
काण्डारोर्जुनको नाम दमनः सिंहकोभवत्[६३] ॥३३॥
हालोभूद् व्याघ्रकश्चैव विदलः[६४] शरभस्तथा ।
शैशिरो हिमवाँश्चैव हस्तिको दण्डकोलकः ॥३४॥
विदर्भो[६५] वज्रकश्चैव नामान्येतानि तेषु हि[६६] ।
एकश[६७]स्तेटवीं घोरां चरन्ति[६८] पिशिताशनाः[६९] ॥३५॥
हिंस्राः सत्वान्तकाः सर्वे योनिं दुष्टामुपागताः ।
कदाचिद्विचरन्तस्ते मृगान् घ्नन्तस्तथैव च ॥३६॥
उपाध्यायाश्रमं प्राप्ताः कर्मणा[७०] सुकृतेन ह ।
तत्र[७१] तेषां भयोद्विग्नाः सर्व एवाभवन् मृगाः ॥३७॥
मृगान् भीतान् समालक्ष्य स विप्रः सुमहातपाः ।
न्यवैक्षत[७२] दिशः सर्वा व्याधाँश्चापश्यदागतान् ।३८॥
स्वशिष्याँस्तान्[७३] परिज्ञाय ध्यानाद् व्याधत्वमागतान्[७४] ।
प्रोवाच करुणाविष्टस्तेषामेव शुभेप्सया[७५] ॥३९॥
शुश्रूषितः पुरा विप्रैर्युष्माभिरहमादरात्[७६] ।
कर्मणा तेन चेदानीं गोवध्याकृतशापतः ॥४०॥
व्याधत्वमिह संप्राप्ताः कुत्सितं हिंस्रवृत्ति यत्[७७] ।
सा च[७८] गौः पितृकार्येण भक्षिता वो न हिंसया ॥४१॥
तस्माद् यूयमितो भ्रष्टा[७९] जातिस्मरणसंयुताः ।
मृगाः कालञ्जरे भूत्वा[८०] चक्रवाकाः पुनः[८१] सरे ॥४२॥
द्वीपे ततः पुनर्हंसा भूत्वा वै मानसे ह्रदे ।
भूयश्च मानुषा भूत्वा जातौ जातौ[८२] सचेतनाः ॥४३॥
योगयुक्ता महात्मानो मत्प्रसादादतन्द्रिताः ।
सर्वकिल्विषनिर्मुक्ता ब्रह्मलोकमवाप्स्यथ ॥४४॥

---

६२ व्याधानां -घ. । ६३ शिशिरो हिमवाँश्चैव विरूपो विश्वरेतनः । वीरो वीरतरुः स्वेदो नामान्येतानि तेषु च- घ. ।
६४ विशदः - ख. । ६५ विभर्गो - क, विभग्नो - ख. । ६६ च - घ. । ६७ एकदा - क. घ. ।
६८ चरन्तः - घ. । ६९ पिपितैपिणः - घ. । ७० कर्म स्म (स्व?) - घ. । ७१ तस्य - घ. ।
७२ अवैक्षत - ख. । ७३ स शिष्याँस्तान् - ख., स मुनि - घ. । ७४ ध्यानात्मा समुपस्थितान् - घ. ।
७५ शुभं वचः - घ. । ७६ ...रिदमातरात् - घ. । ७७ हिंस्रवृत्तिमत् - ख. घ. । ७८ साधु - घ. ।
७९ भूय इयमितो - ख., तस्मात् शापात् परिभ्रष्टा - घ. । ८० भूता - घ. । ८१ पुरा - घ. ।
८२ याताः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एतच्छ्रुत्वा ततस्तेषां पूर्वा स्मृतिरजायत ।
उपाध्यायोयमस्माकमिति बुद्धौ[८३] तदा[८४]भवत् ॥४५॥
ततः कर्म जुगुप्सन्तः पूर्व[८५]जातिकृतं च यत्[८६] ।
प्रदक्षिणमुपावृत्य दशार्णामभितो[८७] ययुः ॥४६॥
दशार्णातीरमासाद्य संमन्त्र्य च परस्परम् ।
जातिं पूर्वां[८८] स्मरन्तस्ते मृत्युमेव प्रवव्रिरे ॥४७॥
निश्चितानां[८९] ततस्तेषां काण्डरो[९०] योऽभवद् द्विजः ।
व्याधोर्जुनकनामा[९१] स इदं वचनमब्रवीत् ॥४८॥
भवन्तो यन्मया[९२] पूर्वमुक्तास्तत्र कृतं हि वः ।
इदानीं समनुप्राप्तं मावमन्यत मे वचः ॥४९॥
श्रेयो वोहं प्रवक्ष्यामि शृणुध्वं कुरुतैव च ।
जातिमेतां विमोक्ष्यामि येन हास्याम न स्मृतिम् ॥५०॥
पुत्रानिच्छन्ति पितरः पुष्टचर्थं तारणाय च ।
वयं च जनितास्तेन व्याधेन सुमहात्मना ॥५१॥
संवर्द्धिताश्च क्लेशेन मात्रा पित्रा तथैव च ।
अनापृच्छ्य[९३] कथं तौ तु मृत्युमिच्छामहे वयम् ॥५२॥
ते यूयं[९४] यदि मन्यध्वं तावापृच्छ्य[९५] विसर्जिताः[९६] ।
योक्ष्याम श्रेयसात्मानमेतद्वो[९७] हितमुत्तमम् ॥५३॥
न चेद्विसर्जयेतां तौ[९८] तयोः[९९] शुश्रूषणे रताः ।
ततस्तावद्धि तिष्ठामो यावत् कालेन तौ मृतौ ॥५४॥
ततो वयं कृतात्मानो ह्यनृणाः[१००] सर्वथापि च ।
गमिष्यामो गतिं[१०१] पुण्यामेतन्नः श्रेय उत्तमम् ॥५५॥
एवमस्त्विति ते सर्वे गृहीत्वा तस्य तद्वचः ।
चिन्तयन्तः पुरो[१०२] जन्म गृहानेवाभिजग्मिरे ॥५६॥

---

८३ बुद्धि - घ. । ८४ ...स्ततो - घ. । ८५ जुगुप्समानास्ते पूर्वं - ख. । ८६ तत् - घ. । ८७ दशार्णमभितो - क. घ. । ८८ पूर्वां जातिं - ख. । ८९ निश्चिन्तानां - क. । ९० काण्डारो - ख. । ९१ जनकनामा - घ. । ९२ ये मया - ख. । ९३ दृष्ट्वा - क., दृष्टा - ख. । ९४ तद्यूयं - ख., ते मृत्युं - घ. । ९५ मा पृष्ट्वा तौ - क. ख. घ. । ९६ विवर्जिताः - ख. । ९७ श्रेयसे मानमेतद्वो - ख. । ९८ तं - घ. । ९९ ताभ्यां - क. ख. घ. । १०० कृतात्मान अनृणाः - क. ख. । १०१ मतिं - क. । १०२ पुरा - क. घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तानागतान् पिता दृष्ट्वा माता च चितका तदा ।
तुष्ट्या परमया[१०३] युक्ता इदं तानूचतुर्वचः[१०४] ॥५७॥
पुत्रकाः सुचिरादद्य यूयमभ्यागता गृहम्[१०५] ।
अद्यावां[१०६] सुदृढं मूढौ[१०७] किं चिरं कृतमित्युत[१०८] ॥५८॥

चितकोवाच

क्षुधाविष्टः पिता वोद्य[१०९] पुत्रस्नेहेन पुत्रकाः ।
नास्ति मांसमिदं[११०] पक्वं सुराञ्च न पिबत्ययम् ॥५९॥

सनत्कुमार उवाच

तेपि जातिं जुगुप्सन्तः सर्वे वै पापयोनयः ।
इदमूचुः क्षुपं चैव चितकाञ्च शुभं वचः ॥६०॥
भवन्तोश्नन्त्वविघ्नेन पुष्टये शान्तयेपि च ।
नाश्नीमो[१११] वयमद्येह[११२] श्वो भोक्ष्यामो[११३] न संशयः ॥६१॥
ततस्तौ वृद्धभावेन न बुभुक्षासहौ तदा ।
आहारयेतामाहारं सुतुष्टौ च बभूवतुः ॥६२॥
तौ तु तुष्टौ समालक्ष्य सर्वेथ शिरसा नताः ।
ऊचुः प्रयत्नतो[११४] वाक्यमैक[११५]मत्येन ते तदा ॥६३॥
पितरौ परिनिर्विण्णा वयमेतेन जन्मना ।
इच्छामस्तत् परित्यक्तुं[११६] तन्नः संमन्तुमर्हथः[११७] ॥६४॥
तेषां तद्वचनं श्रुत्वा पिता तानिदमब्रवीत्[११८] ।
परिष्वज्य सुतान्[११९] सर्वान् बाष्पपर्याकुलेक्षणः[१२०] ॥६५॥
अहमासं पुरा पुत्रा ब्राह्मणः शंसित[१२१] व्रतः[१२२] ।
दिवोदासस्य राजर्षेः सखा परमसंमतः ॥६६॥

---

१०३ च परया - घ. । १०४ तावूचतुर्वचः - क. । १०५ गृहान् - क. । १०६ अद्य वः - ख. ।
१०७ किंचित् - ख., भूमौ - घ. । १०८ चैवं कृत्यमित्युत - घ., चिरादागम्यतेत्युत - ख. ।
१०९ चाद्य - घ. । ११० मांसमिमं - क. ख. । १११ ...म - क., नाश्नीयां - ख. । ११२ ...मद्याहं - क. ख. ।
११३ वयमद्य न भुंजाना भक्षात्मानो - घ., ...म - क. ख. । ११४ प्रयततो - क, प्रमनसो - ख. घ. ।
११५ मेकमत्येन - क. ख. । ११६ ..स्तं परित्यक्तुं - क.,...स्तौ - ख., इदं तु सं...- घ. । ११७ शंसितुमर्हथः - घ. ।
११८ माता समब्रवीत् - ख. । ११९ स तान् - घ. । १२० ,.. लेक्षणौ - ख. । १२१ संशितव्रतः - घ ।
१२२ ...व्रताः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स कदाचिद्वने रम्ये धनुषा कुरुते भृशम् ।
- - - - - - - - - - - - - - - - - - ॥६७॥
योग्यात्तमहमाहेदं[१२३] न त्वं[१२४] वेत्सि धनुर्नृप ।
अजानन्[१२५] किमिदं क्लेशं व्यर्थमेव[१२६] करोषि च ॥६८॥
प्रोवाच राजा विप्राणां मन्त्रज्ञानं विधीयते ।
आमन्त्रणे भोजने च वाचा च कुशला द्विजाः[१२७] ॥६९॥
- - - - - - - - - - - - - - - - - - -।
स मया हसता[१२८] प्रोक्त आनयस्व धनुर्मम ॥७०॥
यावत् क्षिपामि लक्ष्याय[१२९] शरं यत्र ब्रवीषि माम्[१३०] ।
स तथोक्तस्तदा[१३१] मह्यं सशरं धनुरर्पयत् ॥७१॥
तेनोक्तं लक्ष्यमुद्दिश्य[१३२] शरः क्षिप्तो मया ततः ।
तत्राभवत् स्थितो विप्रो मृगचारी दृढव्रतः ॥७२॥
स तेन विद्धस्तेजस्वी ममार सहसैव च ।
सोहं[१३३] तं मृतमालक्ष्य[१३४] राज्ञा तेन विसर्जितः ॥७३॥
ब्रह्मबध्याभयाद् घोरात् पितरं परिपृष्टवान् ।
प्रोवाच न भयं तेस्ति ब्रह्मबध्या कुतस्तव ॥७४॥
जात्यन्तरशतं[१३५] गत्वा दृष्टमेतत्[१३६] स्वयंभुवा ।
ततोहं परया भक्त्या पितृशुश्रूषणे रतः ॥७५॥
अनया भार्यया सार्धं[१३७] स्थितो वै[१३८] बहुलाः समाः ।
स कदाचित् पिता चापि मम कालेन संयुतः[१३९] ।७६॥
अवतस्थे च तत्रैव अनयैव सहानघाः ।
अथ कालेन महता गवाहं विनिपातितः ॥७७॥

---

१२३ यो स्यान्त... - ख., यो ध्यातु मृगकामे - घ. । १२४ तत्त्वं - ख. । १२५ न जानन् - घ., अज्ञानं-(नात्) - घ. । १२६ व्यर्थं कर्म - घ. । १२७ सदा - क. घ., तदा - ख. । १२८ सहसा - ख. । १२९ लक्षाय - क. ख. घ. । १३० हि - ख. । १३१ तदोक्तस्तदा - क. ख. घ. । १३२ लक्षमुद्दिश्य - क. ख. । १३३ साह - ख. । १३४ मृगमालक्ष्य - क. ख. घ. । १३५ जात्यन्तारगतं - ख., ज्ञातं - घ. । १३६ हृष्टमेतत् - क., दृढमेतत - ख. । १३७ साकं - घ । १३८ ,..हं - ख. । १३९ संवृतः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अग्निस्थं चावरूढैषा रुदन्ती मां[१४०] शुभेक्षणा ।
सोहं गवा हतश्चेति मृगचारिवधेन च ।।७८।।
व्याधजन्मनि विप्रत्वाद् भ्रष्टः[१४१] पापेन जज्ञिवान् ।
जातोस्मि[१४२] जन्मनां पुत्राः सहस्रं भृशदारुणम् ।।७९।।
पितृभक्त्या च हि तया सम्यगाराधनेन च ।
नानशन्मे[१४३] स्मृतिः पुत्रा ज्ञानं चापि प्रवर्तते[१४४] ।।८०।।
जानामि ब्राह्मणान् भ्रष्टान्[१४५] सर्वान् वै गोकृतेन वः[१४६] ।
गुरोश्चैवानुशापेन भ्रष्टसंज्ञाँस्तथैव च[१४७] ।।८१।।
पश्चात्तदाज्ञया पुत्रान् सर्वान्वै मुक्तचेतसः ।
लब्धसंज्ञाँस्तथा चैव सर्वानिद्य महाबलाः[१४८] ।।८२।।
माता चेयं[१४९] हि वो[१५०] वेत्ति साध्वी नित्यं प्रतिव्रता ।
यदहं वो ब्रवीम्यद्य तत्कुरुध्वं मम प्रियम्[१५१] ।।८३।।
अवाप्स्यथ[१५२] ततः श्रेयः सर्वे यूयमतन्द्रिताः[१५३] ।
अनामया विशोकाश्च[१५४] न च संज्ञां प्रहास्यथ[१५५] ।।८४।।
पुत्रा जन्मेदमन्त्यं मे[१५६] मनुष्येषु[१५७] न संशयः ।
इतो मृतेन गन्तव्यं मया ब्रह्मसदः शुभम् ।।८५।।
ते[१५८] यूयं मां प्रतीक्षध्वं कंचित्काल[१५९]मतन्द्रिताः[१६०] ।
स्वर्गते मयि यच्छ्रेयस्तत्करिष्यथ मा शुचः । ।।८६।।
अवश्यञ्च सुतैर्माता पिता चैव सुदुःखितौ[१६१] ।
शुश्रूषितव्यौ[१६२] नान्योस्ति धर्मोस्माद्[१६३] बलवत्तरः ।।८७।।

सनत्कुमार उवाच

ततस्ते विस्मिता भूत्वा नष्टशोका विमत्सराः ।
तं[१६४] कालं पर्युपासन्त यावत्तौ जहतुस्त्वसून्[१६५] ।।८८।।

---

१४० रुदती - क. । १४१ विप्रत्वभ्रष्टः - ख. । १४२ ...स्मिन् - ख. ख. । १४३ न नाशं मे - क. । १४४ मे संप्रवर्तते - ख., चाप्यप्रवर्तते - क., प्रवर्तत - क. । १४५ तुष्टान् - घ. । १४६ सर्वानाग(स्) कृतेन वः - घ. । १४७ भ्रष्टसंगाँस्तथैव च - घ. । १४८ महावलान् - घ. । १४९ मात्रेयं(यी) - ख. । १५० नो - घ. । १५१ कुरुध्वमतन्द्रिताः - क । १५२ अवाप्स्यत - घ. । १५३ .. मतन्त्रिताः - घ. । १५४ विकोशाश्च - ख. । १५५ प्रहास्यते - घ । इतः पूर्वं क्षुप उ. इति क. - घ. । १५६ ममेदं-यज्जन्म - घ. । १५७ मनुष्यत्वे - ख. । १५८ तद् - ख. । १५९ किंचित्काल... - क. ख. घ. । १६० ...मतंत्रिताः - घ. । १६१ सुदुःखितैः - क., सुखेधितैः - ख. । १६२ शुश्रूषितव्यो - क. ख. घ. । १६३ धर्मोन्यो - ख. । १६४ तत् - क. ख. । १६५ ...स्तनूम् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तयोरतीतयोः सम्यक्[१६६] कृत्वा ते ह्यौर्ध्वदेहिकम्[१६७] ।
दशार्णायां महानद्यां विधिनानशनेन[१६८] ह ॥८९॥
असाधयन्त आत्मानं व्याधाः सप्तापि ते तदा[१६९] ।
कालञ्जरे गिरौ[१७०] भूयो मृगाः सप्तैव जज्ञिरे ॥९०॥
स्मरन्तस्तत्र ते जातिं मरुत्प्रपतनेन ह ।
साधयित्वा तदात्मानं चक्रवाकेषु[१७१] जज्ञिरे[१७२] ॥९१॥
मृगत्वे यानि नामानि तेषां तानि निबोध मे ।
दीर्घजीवी ह्यनाधृष्टो वायुवेगोभिकम्पनः[१७३] ॥९२॥
श्रीपार्श्वः शंखपाच्चैव सोमलक्ष्यश्च[१७४] सप्तमः ।
जातिं स्मरन्तस्ते पूर्वामन्योन्यमभिमान्य[१७५] च ॥९३॥
सहिताः सहसा प्राणान् मरुत्प्रपतनाज्जहुः ।
ते सप्तसंख्या व्याधेषु मृगेषु च तथा पुनः ॥९४॥
जन्म प्राप्य पुनर्जाताः शरद्वीपे खगास्ततः ।
शरद्वीपमिति ख्यातं[१७६] काम्पिल्येषु सरः शुभम् ॥९५॥
तत्रापि चक्रवाकास्ते सप्ताजायन्त सोदराः ।
मरुद्देवः[१७७] शिखंडी च रथनेमिस्वरस्तथा[१७८] ।
शिखी जीवोथ वृक्षश्च ध्वज इत्येव ते स्मृताः ॥९६॥
तेषां तत्रोपपन्नानां कदाचिदणुहः स्वयम् ।
काम्पिल्यको महातेजा राजा तं देशमागमत् ॥९७॥
स तत्सरःसमासाद्य स्त्रीभिः सह[१७९] मुदान्वितः ।
रेमे मन्दाकिनीं प्राप्य अप्सरोभिरिवामरः ॥९८॥
तं क्रीडमानं संदृश्य मरुद्देवस्य तत्र वै ।
चक्रवाकस्य तस्यासीत्[१८०] स्पृहा तान् विषयान् प्रति[१८१] ॥९९॥

---

१६६ सद्यः - क. । १६७ ह्यूर्ध्वदैहिकम् - क., ह्यूर्ध्वदेहिकम् - ख. । १६८ नसनेन - घ., ना शकेन - क. ख. ।
१६९ सप्तव्याधास्तथापि ते - ख. । १७० कालाञ्जरगिरौ - ख. । १७१ चक्रवाकाश्च - ख. ।
१७२ जग्मिरे - घ. । १७३ ...तिकोपनः - ख । १७४ ... क्ष्योथ - क. । १७५ मतिमान्य - ख. ।
१७६ इति ख्यातः - क. ख. । १७७ मनोदेव - घ. । १७८ रथनेमिस्वनस्तथा - घ. । १७९ सहस्त्रीभिः - ख. ।
१८० तत्रासीत् - ख. । १८१ विषयानपि (भि) - क., विषयं प्रति - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यद्यस्याहं[१८२] सुतः स्यां वै प्राप्नुयां राज्यमेव च[१८३] ।
ततोहं विषयानेतान् प्राप्नुयां नात्र संशयः ।।१००।।
तस्य तच्चिन्तितं ज्ञात्वा द्वितीयश्चक्रसाह्वयः ।
शिखंडीति समाख्यातः स तमाह तदा हसन् ।।१०१।।
भवता राजपुत्रत्वं राज्यं चैव विचिन्तितम् ।
तत्राहं ते[१८४] पुरोधाः स्यां ममाप्येष मरोरथः ।।१०२।।
ताभ्यां[१८५] तच्चिन्तितं ज्ञात्वा रथनेमिस्वरस्ततः[१८६] ।
अचिन्तयत तत्राहं सचिवः स्यां तव प्रभो[१८७] ।।१०३।।

सनत्कुमार उवाच

तेषां तथा चिन्तयतां त्रयाणामितरे ततः[१८८] ।
चक्राह्वयास्तदा क्रुद्धा इदं तानब्रुवन् वचः ।।१०४।।
अचिन्तनीयं युष्माभिश्चिन्तितं विषयार्थिभिः ।
तस्माद् यूयमितो[१८९] मुक्ता अवाप्स्यथ मनोरथम् ।।१०५।।
ताञ्छप्त्वा[१९०] दीनमनसः समालक्ष्य पुनश्च ते ।
येन तद्राजपुत्रत्वं चिन्तितं राज्यमेव च ।।१०६।।
कृपया तमिदं वाक्यमब्रुवन्नष्टचेतसम् ।
बहुसान्त्वगुणोपेतं[१९१] स्वयं दुःखितवद्यथा[१९२] ।।१०७।।
वयं तव प्रभावेण तीर्णाः कृच्छ्रमिदं प्रभो ।
भवान् मतिप्रदोस्माकं सेतुभूतो मतो हि नः ।।१०८।।
भवान् यदि[१९३] हि न ब्रूयात् पितॄणां गौर्निवेद्यताम् ।
शुश्रूषेमश्च न[१९४] पितॄन् न स्म[१९५] संज्ञा ततो भवेत् ।।१०९।।
तव प्रभावादेतन्नो[१९६] योगैश्वर्यप्रवर्तनम् ।
ततो वयं पुनः[१९७] श्रेयस्तव ब्रूमः शृणुष्व नः[१९८] ।।११०।।

---

१८२ अद्यास्याहं - क. । १८३ प्राप्नुयाद्राज्यमेव च - क. ख. । २८४ त्वत् - घ. । १८५ तस्य - घ. ।
१८६ ...स्वनस्ततः - घ. । १८७ प्रभोः - ख. । १८८ ...मितरेतरं - घ. । १८९ भूय इतो - ख. ।
१९० तान्दृष्ट्वा - घ. । १९१ बहुशास्त्रगुणोपेतं - घ. । १९२ ...त्तथा - घ. । १९३ भवानपि - घ. ।
१९४ शुश्रूषध्वमपि - घ. । १९५ नष्ट ा)संज्ञा -क. । १९६ तस्मात्तव प्रभावान्नो - घ. । १९७ भूयोप्ययं वयं - घ. ।
१९८ ...स्तु शृणत्त - ख., तत् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तावत्त्वं सक्तहृदयो[१९९] भविष्यसि नराधिपः ।
यावदस्मद्वचस्तत्थ्यं न श्रोष्यसि सहायवान् ।
योगज्ञानमवाप्यैव[२००] प्राप्स्यसे च गतिं शुभाम्[२०१] ॥१११॥

सनत्कुमार उवाच

ततस्ते सहिताः सर्वे युक्तात्मानो[२०२] महाखगाः ।
खगत्वं संपरित्यज्य[२०३] योनिमन्यां[२०४] प्रपेदिरे ॥११२॥
सर्वे ततस्ते मुनिकोपदग्धा व्याघा मृगाश्चक्रसमाह्वयाश्च ।
जाताः पुनर्मानुषविग्रहेषु योगेश्वरास्ते त्रय एव राज्ये ॥११३॥

⊙ इति स्कन्दपुराणे सप्तव्याधोपाख्याने कौशिकशापे षट्पञ्चाशोध्यायः ⊙

सनत्कुमार उवाच

चत्वारस्ते तु शास्तारः[१] खगाः स्वच्छन्दतः पुनः ।
यायावरस्य विप्रस्य सुता जाता[२] महात्मनः ॥१॥
तेषु जातेषु विप्रोसावक्लेशेन[३] महातपाः ।
वृत्तिं समानयामास[४] तेषां भाग्यपुरःसरः ॥२॥
चीर्णवेदव्रतास्ते[५] तु वेदान्साङ्गानधीत्य च ।
योगमेव न्यषेवन्त[६] तन्निष्ठास्तत्परायणाः ॥३॥
इतरेपि[७] त्रयो व्यास कर्मणा स्वेन चोदिताः[८] ।
प्रत्यपद्यन्त तज्जन्म यत् पुरा तै[९] र्विचिन्तितम् ॥४॥
प्रथमो ह्यणुहाज्जज्ञे ब्रह्मदत्त इति स्मृतः ।
एकोणुहस्य पुत्रोभूद् द्वितीयस्तत्पुरोधसः ॥५॥

---

१९९ सत्वहृदयो - ख, शक्रभवने - घ. । २०० मथाप्येवं - घ., ...मवाप्यैनं - क. ख. । २०१ शुभां गतिं - ख. । २०२ ...मुक्तात्मानो - घ. । २०३ योगज्ञत्वं परित्यज्य - ख. । २०४ गतिमन्यां - ख. ।
१ शप्तारः - ख. । २ जज्ञे - क., जज्ञु... - ख., जग्मु .. - घ. । ३...सौ क्लेशेन च - क., सा बहुमान-पुरःसरः - घ. । ४ संजनयामास - ख. । ५ दांता देवव्रतास्तेपि - घ. । ६ ... वाभ्यसेवन्त - ख. । ७ अपरेपि - घ. । ८ तेजसा - ख. । ९ पुरा तैर्यत् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तृतीयः सचिवस्याथ त्रयस्ते जन्म तद्[१०]गताः ।
त्रयोऽग्नय इवासंस्ते लोकास्त्रय[११] इवाथवा ।
अवर्द्धन्त महात्मान[१२]स्त्रयस्ते सागरा इव ॥६॥
तेषामवाप्तविद्यानां योग्यानां च स्वकर्मणि[१३] ।
पितरः स्वानि कर्माणि[१४] प्रददुर्हृष्टमानसाः ॥७॥
अणुहः प्रददौ राज्यं ब्रह्मदत्ताय पुष्कलम् ।
कीर्तिमत्या च सहितस्ततो वनमगाच्च सः ॥८॥
पुरोधा धृतरातस्तु[१५] पुत्रं स्वे कर्मणि प्रभुः ।
स्थापयित्वा जगामाथ[१६] पंचालं शंसितव्रतः ॥९॥
सचिवोऽपि सुधन्वा तु ब्रह्मधन्वानमच्युतम्[१७] ।
पुत्रं स्वे कर्मणि स्थाप्य जगाम सह भार्यया ॥१०॥
गतेषु तेषु स्वाँल्लोकान्[१८] ब्रह्मदत्तः प्रतापवान् ।
पञ्चालब्रह्मधन्वभ्यां[१९] सह राज्यं चकार ह ॥११॥
प्रशासतस्तथा राज्यं यजतो भुञ्जतश्च ह[२०] ।
जग्मुः सुखेन बहुलाः समाः सुकृतिनस्तदा[२१] ॥१२॥
अथ कालेन महता सभार्यः ससुहृज्जनः ।
तस्थौ स वेश्मनि[२२] सुखं कुबेर इव पुष्पके[२३] ॥१३॥
ततः सर्वरुतज्ञाता[२४] पिपीलं कामकारणात्[२५] ।
पिपीलिकायाश्चाटूनि[२६] कुर्वाणं सोऽन्वपश्यत[२७] ॥१४॥
स तु ज्ञानाद्[२८] विनिश्चिन्त्य[२९] कृमियोनावपीदृशम् ।
विवृतं[३०] शब्दवच्चैव हासमुत्सृजतानघः[३१] ॥१५॥

---

१० तां - घ । ११ लोकपाला घ., भूयस्ते - क. । १२ शिवात्मान - घ. । १३ स्वेन कर्मणा - घ. । १४ स्वामिकर्माणः - घ. । १५ धृतराष्ट्रस्तु - ख., श्रुतवागस्तु - घ. । १६ जगामाशु - ख. । १७ ...मच्युतः - घ. । १८ स्वर्लोकान् - घ. । १९ ... न्याभ्यां - क. ख., सत्वाभ्यां - घ. । २० जयतस्तस्य तैः सह - घ. । २१ स्तथा - ख घ. । २२ स्ववेश्मनि - क. । २३ पुष्करे - घ. । २४ सर्वरुतं ज्ञात्वा - क. ख. घ । २५ पिपीलकमकारणात् - घ., कामकारिणं - क. । २६ ... श्चाटूनि - क. ख., ...श्चाशक्तमानसं - घ. । २७ सोनुपश्यत - क. घ. । २८ ज्ञात्वा - क. ख. घ. । २९ विनिश्चित्य - ख. घ. । ३० ... निमित्तं - ख. । ३१ ...नघ - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तत्तस्य हसितं दृष्ट्वा पत्नी नीलोत्पलेक्षणा[३२] ।
चुकोप किमिदं मेद्य विकृतं लक्षितं त्वया ॥१६॥
तां स राजा स[३३]माविग्नः[३४] प्रियां प्राणैर्गरीयसीम् ।
प्रसादय[३५]न्न चैवास्य प्रसीदत[३६] शुभानना ॥१७॥
सा यदा बहु तथ्यञ्च[३७] उच्यमाना न तुष्यति ।
तदा तस्याः प्रसादार्थे[३८] स विष्णुं संप्रसादयत् ॥१८॥
देवं[३९] सालवनं[४०] गत्वा पञ्चालेन सहैव सः ।
ब्रह्मधन्वपुरोवाहो रथेन महता महान्[४१] ॥१९॥
तत्रासौ सप्तमे त्वह्नि[४२] विष्णुनाभिविसर्जितः ।
जगाम नरशार्दूलः काम्पिल्यं[४३] स्वं पुरोत्तमम्[४४] ॥२०॥
एतस्मिन्नेव काले तु चत्वारो ब्राह्मणाः शुभाः ।
योगेन महता युक्ता इदमूचुः परस्परम् ॥२१॥
वयं कृतार्थाः किं कार्यमिह तिष्ठाम मानुषे ।
गच्छाम[४५] ब्रह्मयोनिं स्वां मुच्यामोस्मान्महाभयात्[४६] ॥२२॥
अवसीदन्ति ते चैव[४७] त्रयोस्माकं[४८] सहव्रताः ।
बोधयामेह[४९]तांश्चैव यथा नेयुः पराभवम्[५०] ॥२३॥
ततस्ते पितरं सर्वे प्रणम्योचुर्द्विजातयः ।
वयं योगेश्वरास्तात सिद्धा वै[५१] स्वेन कर्मणा ॥२४॥
आपृच्छामो गमिष्यामः स्वां योनिं ब्रह्मनिर्मिताम् ।
त्यक्त्वेमान्[५२] मानुषान् देहान्[५३] विसर्जय नमस्तव ॥२५॥

---

३२ निलोत्पलेक्षणं - घ. । ३३ राजान - ख. । ३४ समाश्वास्य - घ., समाविग्नां - ख. ।
३५ अडभाव आर्ष ? । ३६ प्रसीदति - घ. । ३७ बहुधा तेन - घ. । ३८ प्रसादार्थं - घ. । ३९ देव - क. ।
४० सप्तनदं - घ. । ४१ तदा - घ. । ४२ चाह्नि - घ. ख. । ४३ कम्पिल्यं - क. ख. ।
४४ स्वपुरोत्तमम् - क. । ४५ गच्छामो गतिमिष्टां स्वां - घ. । ४६ ...पि मुच्यामो महाभयात् - घ. ।
४७ चैवात्र - घ. । ४८ येस्माकं च - घ. । ४९ अवबोधेम - क. ख., आराधयाम - घ. । ५० पराभवः - घ. ।
५१ सिद्धाश्च - घ. । ५२ त्यक्त्वेमं - ख. । ५३ मानुषं देहं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पितोवाच

पुत्रानिच्छन्ति पितरस्तारयिष्यन्ति नो भयात् ।
भयं तच्चैहिकं पुत्राः परत्र च दुरासदम् ॥२६॥
ते यूयमृणसंयुक्ता[५४] अमुक्त्वा स्वं[५५] निबन्धनम् ।
कथं गच्छथ[५६] भद्रं वो नाधर्मं परिपश्यथ[५७] ॥२७॥

सुता ऊचुः

वयं योगेश्वरास्तात लोकाँस्तुभ्यमनामयान्[५८] ।
प्रयच्छामो[५९] न संदेहो यत्र[६०] गत्वा न शोचसि[६१] ॥२८॥
अस्माभिस्त्वं कथं पुत्रैर्ब्रह्मत्वं नाप्नुयाः पितः ।
इहापि लोके द्रव्यं ते विधास्यामस्तथा[६२] शृणु ॥२९॥
इदं[६३] त्वं[६४] पत्रमादाय[६५] ब्रह्मदत्तस्य दर्शय ।
स वाचयन्नेव[६६] नृपो वृत्तिं ते संविधास्यति ॥३०॥

सनत्कुमार उवाच

प्रभावज्ञस्ततस्तेषां[६७] पिता स मुनिपुङ्गव[६८] ।
मेने तद्वै[६९] तथा सर्वमनुमेने च तान्पुनः ॥३१॥
अथासनानि बद्ध्वा ते युक्ता जग्मुस्तपोधनाः[७०] ।
ज्योतिर्भूतानपश्यच्च पिता तेषामतिद्युतिः ॥३२॥
स तु लेखं समादाय पुत्रान्स्वानभिचिन्तयन्[७१] ।
काम्पिल्यमगत्तूर्णं दिदृक्षुर्नृपसत्तमम् ॥३३॥
स च राजा सालवना[७२]दागतः प्राविशत्[७३] पुरम् ।
ब्राह्मणो दूरत[७४]श्चास्य तं लेखं समदर्शयत् ॥३४॥

---

५४ यूयं मृगसंयुक्ता - घ. । ५५ अनुक्रोश - घ. । ५६ गच्छत - घ. । ५७ परिपश्यत - क. ख., परिपष्यतः - घ । ५८ ...स्त्वद्य निरामयान् - घ. । ५९ प्रयच्छाम - क. ख. । ६० येपु - क. घ. । ६१ न शोचति - घ. । ६२ तथा - ख. । ६३ इमं - क. ख. । ६४ तं - घ. । ६५ पुत्रमादाय - क. ख., मंत्रमादाय - घ. । ६६ धारयन्नेव - घ. । ६७ प्रभावान्निर्गतस्तेषां - घ. । ६८ मुनिपुङ्गवः - क. ख. । ६९ तच्च - घ. । ७० युक्तात्मानस्तपोधनाः - घ. । ७१ परिचिन्तयन् - घ । ७२ राजा सालवनात् तस्मात् - घ । ७३ प्रविशन् - क. । ७४ ब्राह्मणैर्दूरत - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

निमित्तानि च संलक्ष्य शुभानि स नराधिपः ।
लेखमानयतेत्युक्त्वा धारयामास तं रथम् ।।३५।।
स पुरद्वारसंस्थस्तु रथेन महता तदा ।
ब्रह्मधन्व[७५] धृतच्छत्रः[७६] पञ्चाला[७७] वीजितानन: ।।३६।।
गृहीत्वा लेखमव्यग्रमवाचयत[७८] तं तदा ।
श्लोकद्वयं[७९] चाप्यभवत्तस्मिँल्लेखे शुभप्रदम् ।।३७।।
ये ते गुरुकृताच्छापाद् गोवधेनावपीडिताः ।
पितृभक्त्या कृतज्ञाना[८०] जाताः सर्वे शुभोदयाः ।।३८।।
सप्तव्याधा दशार्णेषु[८१] मृगाः कालञ्जरे गिरौ ।
चक्रवाकाः शरद्वीपे[८२] हंसाः सरसि मानसे ।।३९।।
तेपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः ।
प्रस्थिता दीर्घमध्वानं यूयं[८३] किमवसीदथ ।।४०।।

सनत्कुमार उवाच

श्लोकद्वयं[८४] तथा[८५] श्रुत्वा त्रयस्ते विषपीतवत् ।
मोहं तदा तु[८६] संप्राप्य लब्धसंज्ञा विशन्पुरम् ।।४१।।
ते प्रविश्य पुरञ्चैव वेश्म[८७] चैवाप्यतन्द्रिताः ।
इति चेति च संचिन्त्य[८८] वनाय दधिरे मनः ।।४२।।
सा च[८९] पत्नी महाभागा अभिगम्य[९०] नराधिपम् ।
इदमाह मुदा युक्ता राजानं ससुहृज्जनम् ।।४३।।
भवान् योगेश्वरो भूत्वा सक्तो भोगेषु सर्वशः ।
प्रबोधार्थं ततोहन्ते क्रोधमाहारयन्तदा ।।४४।।

---

७५ पुरोधसा - ख. । ७६ धृतं छत्रं - क. । ७७ पाञ्चालीं - ख. । ७८ अवाचयत् - क. ।
७९ श्लोकत्रयमित्यन्यत्र । ८० हृतज्ञाना - क. । ८१ तु - क. । ८२ सरद्वीपे । ८३ तेभ्यः - क. ख. ।
८४ श्लोकत्रयमित्यन्यत्र । ८५ तदा - ख. । ८६ नु - ख. । ८७ वेश्यं - ख. । ८८ ...नुता - क., वेनाय - ख. ।
८९ सापि - क. । ९० अधिगम्य - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जानामि त्वां कृतज्ञञ्च[९१] जानामि त्वां खगन्तथा ।
अतोहं जानती राजन् प्रतिबोधार्थमुद्यता ॥४५॥
तस्माद्विप्रमिमञ्चैव तेषां पितरमव्ययम् ।
धनेन योजयस्वाद्य पुत्रं[९२] राज्येभिषिच्य च[९३] ॥४६॥
श्वो गच्छाव[९४] वनं राजन्[९५] मा कालं प्रतिपालय ।
राजा तत्कृत्यमखिलं[९६] कृत्वा पत्न्या सहव्रतः[९७] ॥४७॥
जगाम वनमुद्दिश्य योगेन च दिवं ययौ ।
पंचालोपि गते तस्मिन् तपः कृत्वा सुदुश्चरम्[९८] ॥४८॥
चकार पारणं[९९] चैव यक्षत्वं[१००] चाप्यवाप[१०१] ह ।
ब्रह्मधन्वा च कालेन[१०२] सुमहात्मा[१०३] दृढव्रतः ॥४९॥
हिमवत्तनयां देवीं तपसा समपश्यत[१०४] ।
वरदां तां तदा दृष्ट्वा[१०५] ब्रह्मधन्वाब्रवीच्छुभाम् ॥५०॥
इच्छामि कामरूपित्वं[१०६] त्वद्भक्तिं चैव[१०७] नित्यदा ।
कृच्छ्रं महच्च प्राप्तस्य[१०८] त्वयैवोद्धरणं ततः ॥५१॥
एवमस्त्विति सा चोक्त्वा जगामेष्टां गतिं तदा ।
ब्रह्मधन्वापि मत्तोभून्मदनेन दुरात्मवान्[१०९] ॥५२॥
स भूत्वा धार्मिकः पूर्वमधर्मेणाभिपीडितः[११०] ।
अभिमेने[१११] स कन्याश्च[११२] ऋषीपत्नीश्च सर्वशः ॥५३॥
भर्तृरूपेण गत्वा च कामेन स विमोहितः ।
न च कश्चिद्विजानाति[११३] तथा[११४] वर्तन्तमन्तशः ॥५४॥
अथ हाल[११५] इति ख्यातो मृगचारी महातपाः ।
तस्य पत्नी सुधर्माभून्नाम्ना रूपवती[११६] दृढम् ॥५५॥

---

९१ मृगी तं च - घ. । ९२ पुत्रो - ख. । ९३ ...भिषेच्यतां - ख.,...ते - घ. । ९४ गच्छावो -क., गच्छाम - ख. घ. । ९५ राज्या(त्) - क. । ९६ तत्सर्वमखिलं - घ. । ९७ दृढव्रतः - घ. । ९८ सुदुस्तरम् - घ. । ९९ परमं - ख., पावनं - घ. । १०० पञ्चत्वं - घ. । १०१ चैवमाप - घ. । १०२ कामेन - घ. । १०३ स महात्मा - घ. । १०४ तामपश्यत - घ. । १०५ ब्रह्मन् - घ. । १०६ कामरूपत्वं - घ. । १०७ त्वद्भक्तत्वं च - ख । १०८ कृच्छ्रे महति संप्राप्ते - घ. । १०९ दुरात्मना - घ. । ११० ...तिपीडितः -ख । १११ अभिमाने - ख., अभिरेमे - घ. । ११२ शकल्याश्च - घ., कामाच्च - ख. । ११३ न कश्चित्तां-विजानाति - घ. । ११४ वृत्तं - घ. । ११५ काल - घ. । ११६ धर्मवती - क. । ....

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कथयन्ति हि तां देवाः सिद्धाश्च सह चारणैः ।
असमा रूपतोन्याभि[११७]स्त्रिषु[११८] लोकेषु भामिनी[११९] ॥५६॥
न च तस्य सभार्यस्य[१२०] अन्तरं स बुबोध ह ।
कस्मिन्[१२१] काले भवेत्तस्या[१२२] विरहः[१२३] पतिना सह ॥५७।
स ब्रह्मधन्वा तां श्रुत्वा तथा रूपवतीं सतीम् ।
पत्यास्या विरहाकांक्षी व्याघ्ररूपं चकार ह ॥५८॥
कृत्वा च सुमहद्रूपं विकृतं भैरवं तदा ।
अत्रसयत् मृगान् व्यास दर्शनेन सुबालिशः[१२४] ॥५९॥
तद्[१२५] व्याघ्रभयसंत्रस्तमृगयूथं तदा विभो ।
मनोनिलजवव्यग्र[१२६]मदृश्यं संप्रपद्यत ॥६०॥
मृगैः सह च हालोपि[१२७] जीवितैषी तदा गतः ।
सुर्धमा[१२८] ब्राह्मणी सापि[१२९] भयाद् व्याघ्रस्य भामिनी[१३०] ॥६१॥
स्त्रीस्वभावाच्च पतिता[१३१] नान्वगच्छन्मृगव्रजम् ।
एकाकिनीञ्च तां दृष्ट्वा ब्रह्मधन्वा दुरात्मवान् ॥६२॥
व्याघ्ररूपं समुत्सृज्य तामिदं प्रत्यभाषत ।
मृदुना सान्त्वयुक्तेन[१३२] वचसा भयपीडिताम् ॥३३॥
मा भीर्भवतु ते भद्रे[१३३] पतिस्तेहं सुमध्यमे ।
मृगराजो गतोसौ च समाश्वस मम प्रिये ॥६४॥
तं समाश्वस्य सापश्यत् पतिरूपं महायशा ।
हृदा चाचिन्तयद्[१३४] दृष्टो मयासौ तैर्मृगैः सह ॥६५॥
जीवितैषी पलायन् वै[१३५] कुतोयं पुनरागतः ।
देवेन्द्रो मां दुराचारः सदा धर्ष[१३६]त्यतन्द्रितः ॥६६॥

---

११७ रूपेणासमतां - ख., अभिरेमे स तां चापि - घ. । ११८ स्त्रीषु - घ. । ११९ भाविनी - ख. घ. ।
१२० न स तस्याः शुभापांग्या - ख. घ. । १२१ तस्मिन् - क., यस्मिन् - ख. घ. । १२२... भवत्तस्या - घ. ।
१२३ विवाहः - घ. । १२४ दिवानिशं - घ. । १२५ तं - घ. । १२६ मनोनिलवदव्यग्र - क. ख., मनोनी... - घ. ।
१२७ सहचरः सोपि - घ. । १२८ सुधन्वा - घ. । १२९ चापि - घ. । १३० कामिनी - ख. । १३१ पतिना- घ. ।
१३२ शान्तयुक्तेन - घ. । १३३ भद्रं मे (ते) - क. ख. । १३४ ...पचिन्तयद् - ख. । १३५ पलायंश्च - ख. ।
१३६ धर्त्तु - क. ख. । धर्ष ? ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सोयं कामयितुं प्राप्तः किन्न स्यादन्तरैषिवान् ।
तस्माद् द्रक्ष्याम्यहं सम्यग् दुष्टं दिव्येन चक्षुषा ॥६७॥

सनत्कुमार उवाच

एतस्मिन्नन्तरे सोथ ब्रह्मधन्वा करेग्रहीत् ।
तामिदं चोचिवान् हृष्टः[१३७] किं त्वं चिन्तयसे हृदा ॥६८॥
न मामालिङ्गसेद्य त्वं[१३८] मृत्योरास्याद्विनिर्गतम्[१३९] ।
ननु तेहं प्रियो भर्ता मा क्रुधो वरवर्णिनि ॥६९॥
ततस्तां स तदा दौष्ट्यात् कपोले समजिघ्रत ।
परिष्वज्य च दुष्टात्मा गात्रैर्गात्राण्यपीडयत् ॥७०॥
नीवीं व्यस्त्रंसयच्चैव[१४०] अधरं चापिबद् बलात् ।
बुबुधे सा च तं दुष्टं कर्मणा तेन शोभना ॥७१॥

सुधर्मोवाच

न त्वं मम पतिर्मूढ शक्रस्त्वं नात्र संशयः ।
न भूयो[१४१] मदनस्यास्मि[१४२] विषयोहं[१४३] सुदुर्मते ॥७२॥
स तयाप्येवमुक्तस्तु अवधूतश्च सर्वशः ।
पपात धरणीपृष्ठे स्वं च रूपं प्रपद्यत ॥७३॥
ततः सा क्रोधताम्राक्षी धक्ष्यमाणेव चक्षुषा ।
निरीक्ष्य वदनं सुभ्रूरिदं वचनमब्रवीत् ॥७४॥
ऋषिपत्न्यस्त्वया बह्व्यो व्यंसिता दुष्टचेतसा[१४४] ।
न मादृशी त्वया काचिदन्या ह्यासादिता[१४५] पुरा ॥७५॥
इदानीं कर्मणस्तस्य पूर्वमाचरितस्य ते[१४६] ।
फलं प्राप्तमिदं पश्य मत्सकाशाद् दुरासदम्[१४७] ॥७६॥

---

१३७ दृष्ट्वा - ख., धृष्ट ? । १३८ सोहमालिग हेभद्रे - ख. । १३९ विनिर्गतः - ख. ।
१४० विस्त्रंयच्चैव - क. ख., विस्त्रंसयँश्चैव - ख. । १४१ न भये - ख., उभयो... - क. ।
१४२ ...स्ति - क. ख. । १४३ बिक्षयोर्ध्वं - ख., विषमेर्ध्वं - क. । १४४ दुष्टचेतसः - क. ।
१४५ ...प्यासादिता - ख. । १४६ च - ख. । १४७ दुरासद - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यदेव रूपं कृत्वा त्वं[१४८] मृगानत्रासयो[१४९]बलात् ।
विचरिष्यसि तेनैव रूपेण बहुलाः समाः ॥७७॥
अशक्तश्चापि हन्तुं त्वं भविता मानुषं[१५०] क्वचित् ।
षष्ठे च काले संप्राप्ते मृगं भक्ष्यमवाप्स्यसि ॥७८॥

सनत्कुमार उवाच

अभिव्याहृत्य तं क्रूरं शुभाचारा मनस्विनी ।
जगाम तान्मृगाँस्त्वेव ततः पतिमपश्यत ॥७९॥
सोपि दुःखेन सन्तप्तो मन्वानस्तां हतेति[१५१] च ।
विलपन्नेव[१५२] तां दृष्ट्वा परिष्वज्येदमब्रवीत् ॥८०॥
दिष्ट्या त्वमसि संप्राप्ता मृत्योरास्याद्विनिःसृता ।
कच्चिन्न तेन दृष्टासि मृगराजेन शोभने ॥८१॥

सुधर्मोवाच

नासौ मृगेन्द्रो दुर्बुद्धिः कोप्यसौ कामरूपवान् ।
मदर्थं[१५३] समनुप्राप्तो मया[१५४] दग्धः पतङ्गवत् ॥८२॥
स शापान्मम दुष्टात्मा[१५५] शार्दूलप्रकृतिं गतः ।
राजेव शक्तिशापेन सौदासो राक्षसीं तनुम् ॥८३॥

सनत्कुमार उवाच

तस्यास्तद्वचनं श्रुत्वा हालो धर्मार्थतत्त्ववित् ।
दिव्येन चक्षुषापश्यद् ब्रह्मधन्वानमव्ययम्[१५६] ॥८४॥
तामुवाच सतीं भार्यामिदं स करुणात्मकः ।
कृतं दुष्टं त्वयात्रेयि सद्भिः कर्म विगर्हितम्[१५७] ॥८५॥
महतस्तपसस्तेद्य क्षयोयं सुमहान् कृतः ।
न दुष्यन्ति स्त्रियः साध्वि नद्यो यद्वद् विगाहनैः[१५८] ॥८६॥

---

१४८ सो (दौ ?) - क., तु - ख. । १४९ ...नत्रासयद् - क. ख । १५० मानुषान् - क. । १५१ मत्वातस्तां हतेति च - क., प्रियां पत्नीमचिन्तयत् - ख. । १५२ विललाप च - क. । १५३ मदनं - क. । १५४ समनुप्राप्तस्ततो - क. । १५५ शापाद् दुष्टकर्मासौ - ख. । १५६...मप्युत - ख. । १५७ सर्वं - क. । कर्मसङ्गिन् विगर्हितम् ? । १५८ द्विजन्तुभिः - क., द्विजान्तवैः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

न चैव शक्यं[१५९] धर्मेण संगुप्तां त्वां प्रमर्दितुम्[१६०] ।
यथा विषेण संछन्नमन्नं भोक्तुं हि मानवैः ॥८७॥
अत्र ते वर्त्तयिष्यामि पुरावृत्तं महातपे ।
यत् पतिव्रतया पूर्वं कृतं दीप्तेन तेजसा ॥८८॥
आसीद् भलन्दनो[१६१] नाम ऋषिः परमधार्मिकः ।
विद्वाँश्चैव[१६२] दयावाँश्च पृथिवीवद् व्यवस्थितः[१६३] ॥८९॥
ऋग्नाम्नी[१६४] तस्य भार्याभूद् वासिष्ठी पुण्यलक्षणा ।
रूपेणाप्रतिमा साध्वी न तस्याः स्त्रीः[१६५] समा क्वचित् ॥९०॥
प्रतिव्रता महाभागा सर्वधर्मविदुत्तमा ।
तस्याः पतिमृते नान्यद्दैवतं भुवि विद्यते ॥९१॥
अपश्यंत कदाचिद्वै देवास्तां कमलेक्षणाम् ।
तस्या रूपगुणोन्मत्ता[१६६] लेभुर्न[१६७] धृतिमेकशः ॥९२॥
न शक्यते च सा प्राप्तुं न दूतीभिर्न कर्मणा[१६८] ।
न दानेन[१६९] न संमानै[१७०]र्न बलेन न सेवया ॥९३॥
वह्निस्तामग्न्यगारस्थां[१७१] प्रविष्टामग्रहीच्छुभाम्[१७२] ।
न चापि[१७३] साहमस्मीति[१७४] न च नास्मीत्यथा[१७५]ब्रवीत् ॥९४॥
न क्रोधो नापि दर्पोस्या न मानो[१७६] न च मत्सरः[१७७] ।
तस्याः प्रियमभून्नान्यत् पतिमेवान्वचिन्तयत्[१७८] ॥९५॥
विभावसुरपि[१७९] व्यक्तमियं मामिच्छतीति ह ।
अभ्युपेत्य न[१८०] दुष्टेति[१८१] भावेन सुरसत्तमः[१८२] ॥९६॥
अथ हित्वा स्वकं देहमदेहः[१८३] समपद्यत ।
एवं वै भास्करो वायुर्वरुणश्चन्द्र एव च ॥९७॥

---

१५९ शक्तो - क. ख. । १६० प्रधर्षितुं - ख. । १६१ भलन्दलो - क., भगन्दलो - ख. । १६२ सिद्धश्चैव - ख. । १६३ पृथिव्यामध्यवास्थितः - ख. । १६४ ऋन्नाम - क., ऋग्नामा - ख. । १६५...सीत् - ख. । १६६ रूपगुणैर्मत्ता - ख. । १६७ लेभिरे नैकशो धृतिमिति लेभिरे नैव ते धृतिमिति वा पाठः साधीयान् स्यात् । १६८ ... भूतैर्न कर्मणा - क. घ. । १६९ ...दान्येन - क. । १७० चान्येन - क. । १७१ ... मग्रतीरस्थां - ख. । ...स्थः ? । १७२ मतनीच्छुभाम् - ख. । १७३ चाह् - ख. । १७४ मस्तीति - क., मास्मेति (?), १७५ तथा - ख. । १७६ न च मानो - क. ख. । १७७ न मत्सरः - क. ख. । १७८ ...भ्यचिन्तयत् - घ. । १७९...गपि - ख । १८०...न्न - क., नु - ख. । १८१ न - ख. । १८२...मं - ख. । १८३ देहं विदेहः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सर्वे विदेहाःसंवृत्तास्ततस्तां संप्रसादयन् ।
सापि तान्नावदत् किञ्चित् पुरुषानघशंकया[१८४] ॥९८॥
भर्तुश्चाकथयत् सर्वं स तानिदमुवाच[१८५] ह ।
इयं पत्नी महाभागा मम सर्वाङ्गसुन्दरी ॥९९॥
नेयं कुप्यति युष्माकं जाने[१८६] ह्यस्या व्रतं शुभम् ।
मत्तोपि वो भयं नास्ति नाहं कुप्ये कथञ्चन ॥१००॥
मत्प्रसादाद्विदेहापि देहवन्तो भविष्यथ ।
ततस्ते देहवन्तो वै तुष्टुवुस्तं भलन्दनम्[१८७] ॥१०१॥
ऊचुर्वरं वृणीष्वाद्य तुष्टाः स्मस्तव[१८८] सर्वथा ।
सोवाच रजसा[१८९] नार्यः[१९०] शुद्ध्यन्तु[१९१] मदनुग्रहात् ॥१०२॥
कर्मणा च विमुच्यन्तां[१९२] व्यवहार्या भवन्तु च ।
सर्वशौचा भवेयुश्च अदुष्टाः सर्वकर्मसु[१९३] ॥१०३॥

हाल[१९४] उवाच

ततस्ते तं नमस्कृत्य सभार्यं[१९५] ब्रह्मवादिनम् ।
जग्मुर्देवाः प्रशंसन्तः सर्वे[१९६] वह्निपुरोगमाः ॥१०४॥
एवं त्वमपि धर्मज्ञे[१९७] नित्यं पतिमनुव्रता ।
कस्त्वां समर्थो देवोपि स्प्रष्टु[१९८]मन्ये[१९९] कुतो जनाः[२००] ॥१०५॥
तीर्थभूताः स्त्रियश्चापि न दुष्यन्ति कथञ्चन ।
मद्रूपं कृतवान् यस्मात्तस्माच्छापं न चार्हति[२०१] ॥१०६॥
तस्मात्करिष्ये तस्याहमदृष्टस्यापि[२०२] शोभने[२०३] ।
अनुग्रहं धर्मयुक्तं येन श्रेयो ह्यवाप्स्यति[२०४] ॥१०७॥

---

१८४ न्यर्त्ति... - क., ...त्मनः - ख, परिशंकया - घ. । १८५ तामिदमुवाच - क. । १८६ सत्वं - घ. । १८७ भलन्दलं - क., भगन्दलं - ख. । १८८ तव - क. । १८९ वचनं - घ. । १९० स्त्रीणां - ख. । १९१ शुद्धिः स्यान्... - ख. । १९२ मनोवाक्कर्मभिर्मुक्ता - ख. । १९३ पवित्राःसर्वतः शुद्धाः स्त्रियएव हि कर्मसु - ख. । १९४ सन... - क. । १९५ संभाष्य - घ. । १९६ इन्द्रपुरोगमाः - घ. । १९७ धर्मज्ञा - क. । १९८ द्रष्टुं - घ. । १९९...मन्यत् - क. ख., मन्यः - घ. । २०० जनः - क. घ. । २०१ च नार्हति - क. घ. । २०२ ...मदुष्टस्यापि - घ., ...न्दुष्टस्यापि करिष्यति - ख. । २०३ हि शोभने - ख. । २०४ यमाप्स्यसि - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

व्याघ्रस्यापि प्रिये तस्य स्मृतिर्नित्यं भविष्यति ।
सर्वकार्येषु[२०५] धर्मेषु[२०६] धर्मेण च चरिष्यति[२०७] ॥१०८॥
यतोऽस्य[२०८] कामरूपित्वं येन मत्तः सदा ह्यभूत् ।
तत एव पुनः श्रेयः प्राप्स्यते मदनुग्रहात् ॥१०९॥

सनत्कुमार उवाच

स एष व्यास[२०९] दुष्टात्मा विश्वामित्राश्रमे रतः ।
अग्रारण्ये[२१०] सदा ह्यासीद्देव्या गणापतिः कृतः ॥११०॥
य इदं[२११] तस्य माहात्म्यं धारयेच्छ्रावयीत वा ।
सततं ब्राह्मणं[२१२] व्यास योगैश्वर्यमवाप्नुयात् ॥१११॥
योगेश्वरत्वं कांक्षद्भिरेतदध्येयमन्तशः ।
जन्मान्तरं समासाद्य प्राप्नुवन्ति न संशयः ॥११२॥
शृणुयाद्य इमं सततं प्रयतः शुचिरेकमना मनुजः[२१३] ।
प्रियवत्स हि शक्रसमानवपुः सुकृतेन कृतेन पुमान्[२१४] ॥११३॥

⊙ इति स्कन्दपुराणे सप्तपंचाशोध्यायः ⊙

व्यास उवाच

वरान् गृहीत्वा रुद्राणी[१] तस्मिञ्छिखरिसत्तमे[२] ।
अकरोत् किमिति ब्रूहि सर्वं देव्या[३] विचेष्टितम् ॥१॥

सनत्कुमार उवाच

स्वयम्भुवि गते देवी तपसो विरराम ह ।
सा तुष्टा वरलाभेन[४] चिन्तयन्ती तदा वरम् ॥२॥
न्यवैक्षत[५] दिशः सर्वाः प्रसन्नवदनेक्षणा ।
कस्यैतत्[६] कथयामीति देवं हित्वेति चाब्रवीत् ॥३॥

---

२०५ सर्वाः कार्येषु - क. । २०६ . ष्वधः?, धर्म्येषु ? । २०७ करिष्यति च - घ., करिष्यति - क, तत्तथा - घ. । २०८ जातोस्य - घ. । २०९ एप एव स - घ. । २१० अग्न्यारण्ये - घ. । २११ इमं - क ख. घ. । २१२ ब्राह्मगान् - घ. । २१३...प्रिय ..- क. । २१४ मनुजस्स जहाति अधर्मकृतं ससुरेन्द्रपुरं व्रजते - क. घ ख. ।

१ शर्वाणी - घ. । २ शिखर - क. । ३ देव्या सर्व - घ. । ४ वरदानेन - क ख, घ । ५ न्यवेक्षत - ख, न्यरीक्षत - क., निरीक्ष्य च - घ. । ६ कस्यैनं (नत्?) - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शास्त्रज्ञं कञ्चिदुद्दिश्य[७] यथार्थं[८] शास्त्रचिन्तकः[९] ।
पुत्रलभ्भकृतं[१०] हर्षं चिन्तयन्त्या मुहुर्मुहुः ।।४।।
अपतज्जलमत्यर्थ[११]शीतलं सु[१२]सुगन्धि च ।
बह्वभूत् सरसि स्वच्छं तस्यास्तत्तेजसा जलम् ।।५।।
शिष्ये बुद्धिगुणेनेव[१३] गुरुणा ज्ञानमाहितम् ।
विगाहमाना सा देवी तत्सरो विमलोदकम् ।।६।।
रेजे वियन्मध्यगता दीप्तेव सवितुः प्रभा ।
विगाहमाना व्यजहत् कृष्णां कोशीं तदानघा ।।७।।
सा विरेजे तया मुक्ता कलेवेन्दोर्घनात्यये ।
तस्याः[१४] कोश्याः[१५] समभवत् कौशिकी लोकविश्रुता ।
विश्वं सिसृक्षतो धातुर्देहादिव पुरा निशा ।।८।।
विम्बाधरा तीक्ष्णसुचारुदंष्ट्रा प्रसन्नताराधिपचारुवक्त्रा ।
सुजातनीलांचितदीर्घकेशी किञ्चित्समभ्युन्नतरोमराजी ।।९।।
सुसंस्थिताभ्यां चरणाम्बुजाभ्यां प्रदक्षिणावर्तनिमग्ननाभिः ।
विगूढजान्वस्थिशिरा सुगुल्फा विनाकृतेवाम्बुरुहेण[१६] लक्ष्मीः ।।१०।।
प्रसन्नरूपा प्रथमोद्गतस्तनी प्रफुल्लनीलाम्बुजचारुलोचना[१७] ।
सुसंस्कृतैर्वज्रमणिप्रवेकिभिर्विभूषिता चाभरणै[१८]स्सुमध्यमा ।।११।।
साङ्गदा बद्धकेयूरा[१९] कटकोद्भासितत्विषा[२०] ।
बिभर्त्ति सा भुजानष्टौ सायुधानपराजिता ।।१२।।
बद्धगोधाङ्गुलित्राणा कवचं बिभ्रती शुभम्[२१] ।
दुर्भेद्यं[२२] सहजं भास्वत् सेन्द्रैरपि सुरासुरैः ।।१३।।
निबद्धतूणीरयुगा[२३] प्रगृहीतशरासना ।
वसाना पद्मकिञ्जल्करुचिरे वाससी तदा ।।१४।।

---

७ किंचिदुद्दिश्य - घ. । ८ यथार्हं - घ. । ९...चिन्तकम् - घ. । १० पुत्रलाभकृतं-घ. । ११...चच जलं सद्यः- घ. । १२ च (?) । १३ शिष्यैर्बहुगुणैनैव - क. । १४ तस्यां - क. । १५ कोश्यां - क. । १६ ...वाम्बुरूहे व - क. । १७ प्रसन्ननीलाम्बुजचारुनेत्रा - घ. । १८ विभूषितेवाभरणैः - ख., विभूषितैर्वा - क, ...तैराभरणैः - घ. । १९ वज्रकेयूरा - घ. । २० करकोद्भासितत्विषा - क. ख. । २१ शुभा - घ. । २२ दुर्भेदं - घ. । २३ ... युग्मा - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जानुभ्यामवनिं गत्वा शिरस्याधाय चाञ्जलिम् ।
व्यज्ञापयत सा देवी ब्रूहि किङ्करवाणि ते ॥१५॥
मूर्ध्न्युपाघ्राय तां देवीं परिष्वज्य च पीडितम्[२४] ।
भवानी प्राह संहृष्टा[२५] मूर्त्तिस्थानं[२६] ममाव्यये ॥१६॥
जरामरणहीना त्वं शोकदुःखविवर्जिता ।
भविष्यसि महायोगा संयुगेष्वपराजिता ॥१७॥
कौशिकीति च नाम्ना त्वं लोके ख्यातिं[२७] गमिष्यसि ।
अन्यैश्चनामभिः श्लाघ्यैर्गुणकर्माभिसंश्रयैः ॥१८॥
तव भक्ताः[२८] स्मरिष्यन्ति येति[२९]दुर्गेषु संस्थिताः ।
दुर्गाणि ते तरिष्यन्ति त्वत्प्रसादाद्वरानने ॥१९॥
वरा वरेण्या वरदा दुर्गा[३०] सर्वार्थसाधनी ।
इत्थं त्वां नामभिर्दिव्यैः स्तोष्यन्ति मुनयः सदा ॥२०॥
जाप्यैः प्रणतिभि[३१]र्होमैरुपहारैः पृथग्विधैः ।
प्राणिनः पूजयिष्यन्ति भवतीं भुवि सर्वदा ॥२१॥
सिंहयुक्तं ततो[३२] देवी[३३] रथमादित्यवर्चसम् ।
ससर्ज सपताकं च किंकिणीजालमण्डितम् ।
विन्ध्यं गिरिवरं चास्या निवासाय समादिशत् ॥२२॥

सनत्कुमार उवाच

सैव[३४]मुक्ता तदा देवी प्रणम्य भुवनेश्वरीम् ।
आरुरोह रथं दिव्यं कार्तस्वरमयं शुभम् ॥२३॥
व्योमगेन रथेनाथ नानारत्नांशुमालिना ।
जगामाशु ततो विन्ध्यं नानाद्रुमलतान्वितम् ॥२४॥

---

२४ निपीडितम् - ख., निपीडितां - घ. । २५ संयुक्ता - क. ख. घ. । २६ मूर्त्तिस्थासि - घ. । २७ ख्यातिं-लोके - घ. । २८ भक्तया - क. । २९ येपि - ख. । ३० वरेण्या वरदा दुर्गा वरा - ख. । ३१ जप्यैः प्रणामैः - घ. । ३२ महद् - क, महा - घ. । ३३ दिव्यं - क. ख. घ. । ३४ एवमुक्ता - क. ख. घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विहङ्गविरुतै[३५] र्विन्ध्यः स्वागतेनेव[३६] कौशिकीम् ।
अपूजयदमेयां तां तत्र प्राप्तां तदानघाम्[३७] ॥२५॥
वारिभिर्विमलैः शीतैर्निर्झरोदरनिःसृतैः[३८] ।
स पुष्पनिकरैः पुण्यैरर्घश्चास्यै ददन्निव ॥२६॥
अथ मृगपतिनागं त्रस्तपर्यन्तनागं
चकितहरिणयूथक्षुण्णदर्भाङ्कुराग्रम् ।
वरमहिषविषाणच्छिन्नगुल्मावतानं
गिरिवरमति रम्यं कौशिकी साभ्यपश्यत् ॥२७॥
व्यरोचयत सा[३९] देवी वासाय शिखरं गिरेः[४०] ।
उत्फुल्ल[४१]पादपालीनविहङ्गगणनादितम्[४२] ॥२८॥
निर्झरोदकसंपर्कहरितोपलशाद्वलम् ।
नानाद्रुमलतापुष्पसुरभीकृतमारुतम् ॥२९॥
तुहिननिकरशीतैर्निर्झराम्बुप्रवाहै–
र्निचितपृथुनितम्बोत्तुङ्गपर्यन्तसानुम् ।
गिरिवरशिखरं तत्साध्युवासाथ देवी
कुसुमिततरुशाखाश्लिष्टमत्तद्विरेफम् ॥३०॥
य इदं[४३] पठते नित्यं शृणुयाद्वा समाहितः ।
कौशिक्याः संभवं सम्यक् स याति परमां गतिम् ॥३१॥

⊙ इति स्कन्दपुराणे कौशिकीसम्भवो नाम अष्टपञ्चाशत्तमोऽध्यायः ⊙

सनत्कुमार उवाच

ततस्तां कौशिकीं तत्र प्रस्थाप्य हिमवत्सुता ।
विरेमे तपसस्तीव्रात् सस्नौ च विधिवत्तदा ॥१॥

---

३५ बिकलै (विहङ्गमकलै?) - घ. । ३६ ...नेह - क. । ३७ उमाम् - घ. । ३८ निर्झरोदकनिःसृतैः - क. ख. ।
३९...त्तदा - घ. । ४० गिरौ - क. । ४१ तत् फुल्ल... - घ. । ४२ ...वादितम् - क. ख. । ४३ इमं - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वसाना वाससी शुक्ले[१] दिव्य[२]स्रगनुलेपना ।
पार्श्वस्थं पर्वतं वीक्ष्य[३] प्रोवाच वरदास्मि ते ।।२।।
एवमुक्तवतीं[४] देवीं[५] शिखरी[६] मूर्त्तिमान्[७] तदा ।
प्रणिपत्य वरं वव्रे मयि सान्निध्यमस्तु[८] ते ।।३।।
नाम चैव मम ख्यातिं तव नाम्रा[९]भिलक्षितम् ।
यातु लोकेषु सर्वेषु त्वत्प्रसादान्महेश्वरि ।।४।।
अग्निश्च वरदां वव्रे मागाः कोपं मयीश्वरि ।
सदा पुष्पफलत्वं च वृक्षास्तां तत्र वव्रिरे ।।५।।
सुप्रसन्ना भवास्माकं त्वयि भक्तिश्च नोस्त्विति ।
ततस्तां वव्रिरे देवीं सर्वाश्च परिचारिकाः[१०] ।।६।।
उपास्यमाना बह्वीभिर्देवताभिर्गिरीन्द्रजा ।
अभिभूयान्यतेजांसि भानवीव[११] बभौ[१२] प्रभा ।।७।।
हृदयेपि स्थिता पत्युः पत्यौ[१३] हृदयसंस्थिते ।
सा वै गिरीन्द्रतनया वियुक्ता[१४]स्मीत्यमन्यत ।।८।।
अथ सा तेजसां धाम[१५] पतिं सर्वजगत्पतिम् ।
वरदा वरदं द्रष्टुं गमनायोपचक्रमे ।।९।।
नमस्कृता तद्वनदेवताभिः[१६] प्रदक्षिणीकृत्य समिद्धमग्निम् ।
ऋषीँस्ततो वन्द्यतमाभिवन्द्य जनञ्च तेषां प्रतिपूज्य पूज्यम् ।।१०।।
उत्पपात ततो व्योम सा सार्द्धं सोमनन्दिना ।
सिंहेन च[१७] जगद्धात्री गणैः परिजनेन च ।।११।।

---

१ शुभ्रे - घ. । २ दिव्यगन्धानुलेपना - घ. । ३...स्थमचलं - घ.,...स्थमथ संवीक्ष्य - क. । ४...मुक्तवती - ख. घ. ।
५ देवी - क. ख. घ. । ६ शिखरो - घ., शिखरं - ख. । ७ मूर्तिमत् - क. ख. घ., ...माँस्तदा - घ. ।
८ सान्नैध्यमस्तु - क. । ९ नाम्ना - घ. । १० परिचारकाः - क. । ११ भवानी - क., भवानी च - घ. ।
१२ विबभौ - क., ददौ - घ. । १३ पतौ - क. । १४ विमुक्ता - क. । १५ धामं - क. ।
१६ सा वरदेवताभिः - घ. । १७ सिंहेनेव - क., ...नैव - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वियति जलदवृन्दान् विक्षिपन्ती स्वधाम्ना
हिमजलकणशीतैर्वीज्यमाना मरुद्भिः ।
गिरिवरतनया सा पत्युरेव स्मरन्ती
मदनदहनमूर्तेराशु पार्श्वं जगाम ॥१२॥

⊙ इति स्कन्दपुराणे ऊनषष्टितमोऽध्यायः ⊙

सूत[१] उवाच

अथासौ ब्रह्मणः पुत्रं व्यासः प्राह कृताञ्जलिः ।
किमर्थं कौशिकी विन्ध्यं देव्या संप्रेषिता तदा ॥१॥
एवमुक्तस्तदा धीमान् व्यासेन ब्रह्मणः सुतः ।
यथावृत्तं पुरा सर्वमाख्यातुमुपचक्रमे ॥२॥
आरिराधयिषुर्देवीं विन्ध्यस्तेपे पुरा तपः ।
ततस्तुष्टाब्रवीद्विन्ध्यं पार्वती वरदास्मि ते ॥३॥
मयि वासोस्तु ते नित्यमेवमादित्यरोधनः ।
वव्रे गिरीन्द्रतनयां प्राह सा च तथास्त्विति ॥४॥
स्वतनुं सा द्विधाभूता[२] अग्नेर्दीप्तां शिखामिव ।
दाहाय दानवेन्द्राणां प्राहिणोत् कौशिकीमतः[३] ॥५॥
अथ तं ब्रह्मणः सूनुमुवाच मुनिसत्तमः ।
गिरिर्विन्ध्यो महाप्रज्ञ[४] कथमादित्यरोधनः ॥६॥
सनत्कुमारः प्रोवाच पृष्टो व्यासेन धीमता ।
शृणु यस्मादभूद्विन्ध्यो गिरिरादित्यरोधनः ॥७॥
पुरा विन्ध्योऽब्रवीत् सूर्यं कस्मात्त्वं न करोषि माम्[५] ।
प्रदक्षिणं यथा मेरुं का तेवज्ञा मयि प्रभो[६] ॥८॥

१ व्यास उ. - क, सनत्कुमार उ. - घ. । २ द्विधीभूता - क. ख. । ३ कौशिकीं ततः - घ. ।
४ महाप्रज्ञः - क. । ५ किमवज्ञां करोषि मां - घ. । ६ प्रभो - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स उवाच तदा विन्ध्यं नैवं कर्तुं हि शक्यते ।
प्रत्याख्यातः स सूर्येण विन्ध्यो गिरिरवर्धत ।
रुद्धा तस्य स्थितो मार्गं[७] तस्मादादित्यरोधनः ॥९॥
नष्टालोके ततो लोके देवाः संविग्नचेतसः ।
अगस्त्यमुपसंगम्य वाक्यमूचुः समाहिताः ॥१०॥
सवितुर्मार्गमावृत्य गिरिर्विन्ध्यो व्यवस्थितः ।
तं वारय महाप्राज्ञ गतिर्नः सर्वदा भवान् ॥११॥
ततो[८]गस्त्यो गिरिं गत्वा प्रोवाचेत्थं महातपाः ।
यास्यामि दक्षिणामाशां पन्थानं देहि पर्वत ॥१२॥
यावत्प्रतिनिवर्त्तेयं[९] तावच्च[१०] स्थातुमर्हसि ।
ततः प्रभृति चैवेह नाभूदागमनं मुनेः ॥१३॥
अथ पप्रच्छ तं व्यासः पितामहसुतं प्रभुम्[११] ।
कौशिकी प्रहिता विन्ध्यं दानावानां विनाशने ॥१४॥
के ते[१२] कस्य किमर्थं वा कौशिक्या दानवा हताः ।
एतत् सर्वं समासेन मुने[१३] मे वक्तुमर्हसि ॥१५॥
पितामहसुतो धीमान् व्यासेनैवं[१४] प्रचोदितः ।
प्रश्नमेतं[१५] समासेन व्याख्यातुमुपचक्रमे ॥१६॥
देवासुरे पुरातीते संयुगे परमाद्भुते ।
सुन्दो निसुन्दश्च सुतौ निशुम्भस्य बभूवतुः ॥१७॥
हतान् निशम्य तौ बन्धून्सुरैः सर्वान्महाहवे ।
देवान्प्रति सुसंक्रुद्धौ गर्जन्तौ गोवृषाविव ॥१८॥
सिंहाविव महासत्वौ हृतदंष्ट्रानखायुधौ[१६] ।
श्वसन्तौ सविषावुग्रौ भग्नदंष्ट्राविवोरगौ ॥१९॥
अशक्तौ तौ सुरैर्योद्धुं हृतपक्षौ महासुरौ ।
सुपर्णाविव संक्रुद्धौ छिन्नपक्षौ महाबलौ ॥२०॥

---

७ मार्गे - घ. । ८ तस्या - क., अगस्त्यः सुमहातेजास्तत्र गत्वाब्रवीद्वचः - घ. । ९ यावच्च न निवर्तेयं (?) ।
१० त्वं - घ. । ११ प्रभुः - क. । १२ कृते - घ. । १३ मुने - घ., प्रश्नं - क. ख. । १४ व्यासेनैव - क. ।
१५ प्रश्नमेनं - घ. । १६ कृतदंष्ट्रानाखायुधौ - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

- - - णः[१७] सुतौ चैतौ[१८] गोकर्णं प्रति जग्मतुः ।
आरिराधयिषू देवं ब्रह्माणममितौजसौ ॥२१॥
अथोवाच ततो व्यासो गोकर्णं कथयस्व मे ।
कस्मिन्देशे किमर्थं वा केन वोत्पादितं[१९] पुरा ॥२२॥
प्रोवाच ब्राह्मणः सूनुर्व्यासेनैवं प्रचोदितः ।
श्रृणु वत्स समासेन पुण्यं गोकर्णसंभवम् ॥२३॥
हते त्रिशिरसि त्वष्टा पुत्रे ज्यायसि वज्रिणा ।
वृत्रं[२०] नाम ततः[२१] पुत्रमसृजत्तपसां निधिः[२२] ॥२४॥
प्रलम्बबाहुं वृत्तास्यं पीनविस्तीर्णवक्षसम् ।
सुश्लिष्टजानुं सहनुं जलदध्वाननिस्वनम् ॥२५॥
स्वक्षं सुपार्श्वं सुकटिं दीर्घरक्तान्तलोचनम् ।
समरे सर्वदेवानां जेतारमपराजितम् ॥२६॥
स निर्जित्यामरान् सर्वान् जग्रासेन्द्रं महाद्युतिः ।
ततो महर्षिभिः सृष्टा जृम्भिका तं समाविशत् ॥२७॥
तस्याथ जृम्भमाणस्य निर्जगाम शतक्रतुः ।
वदनादाशु[२३] संक्षिप्य स्वां तनुं योगमायया ॥२८॥
तस्य योगबलं दृष्ट्वा वीर्यं शौर्यं च संयुगे ।
ततो भीताः सुराः सर्वे ब्रह्माणं शरणं ययुः ॥२९॥
तान्दृष्ट्वा स तदा भीतानमरान् सुरविद्विषः ।
प्रोवाचाशु[२४] प्रजेशानः पद्मयोनिः पितामहः ॥३०॥
पराजितान् वो जानामि वृत्रेण रणमूर्धनि ।
उपायं तं न पश्यामि येनासौ जीयते युधि ॥३१॥
यास्याम[२५] सहिताः सर्वे देवं द्रष्टुमुमापतिम् ।
विश्वेश्वरं विधातारं वरदं भक्तवत्सलम् ॥३२॥

---

१७ न पश्यंतौ (तपस्यन्तौ?) - घ. । १८ चेतौ - क., चोभौ - घ. । १९ ...त्पादितः - क. । २० वृन्दं - क. । २१ पुनः - ख. । २२ निधिम् - क. ख. । २३ वरदानात्त् - घ. । २४ प्रोवाचासौ - घ. । २५ यास्यामः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स नः प्रणामैर्भक्त्या च स्तुत्या चाराधितः प्रभुः ।
महादेवो महायोगी[२६] शम्भुः शान्ति विधास्यति ॥३३॥
अथोत्तस्थुः सुराः सर्वे देवदेवं दिदृक्षवः ।
अपश्यन्तो विचेरुश्च महीं सोदधिपर्वताम् ॥३४॥
अथ विष्णुर्महायोगी देवीं हिमवतः सुताम् ।
अपश्यत् पांशुदिग्धाङ्गीमासीनां बालरूपिणीम् ॥३५॥
लेखामिव नवामिन्दोः प्रातः सूर्यप्रभामिव ।
हविषा हूयमानस्य तन्वीमग्नेः शिखामिव ॥३६॥
विज्ञाय स तदा योगान्महायोगां सुरेश्वरीम् ।
ईश्वरो जगतो विष्णु[२७]र्जिष्णुस्तुष्टाव पार्वतीम् ॥३७॥

विष्णुरुवाच

त्वं स्रष्ट्री[२८] सर्वभूतानां संहर्त्री त्वं सुरेश्वरि ।
त्वमस्य जगतो धात्री नित्या प्रकृतिरव्यया ॥३८॥
त्वं प्रभा शर्वरी ज्योत्स्ना कीर्तिस्तुष्टिरुमा धृतिः ।
बुद्धिर्मेधा स्मृतिः प्रज्ञा सन्ध्या कान्तिः स्तुतिर्मतिः ॥३९॥
त्वमीशा देवि देवानां गणमाता गणाम्बिका ।
भद्रकाली महागौरी कौशिकी विन्ध्यवासिनी ॥४०॥
दुर्गा ख्यातिर्महाविद्या गायत्री त्वं सरस्वती[२९] ।
स्वाहा स्वधा महामाया लक्ष्मीर्योगेश्वरेश्वरी ॥४१॥
उल्का सती गिरेः पुत्री मैनेयी ब्रह्मचारिणी ।
तापसी[३०] रेवती षष्ठी वरावरसहस्रदा[३१] ॥४२॥
कुन्दकार्मुकसारङ्गकोकिलाशोकपल्लवैः ।
तुल्यासि[३२] दन्तभ्रूनेत्रस्वरपाणिभिरीश्वरि[३३] ॥४३॥
प्रमत्तोत्फुल्लपूर्णन्तान् नागोत्पलनिशाकरान् ।
विशिनक्षि सदा देवि गतिलोचनकान्तिभिः ॥४४॥

---

२६ महायोगः - क. ख. । २७ धाता - घ. । २८ सृष्टिः - क. । २९ सुरेश्वरी - क. । ३० तामसी ? ।
३१ चराचरसहस्रदा - घ. । ३२ तुल्यास्य - क. । ३३... रीश्वरी - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शिरोभिर्महिषोद्भ्रान्तरक्तपर्यन्तलोचनैः ।
नृभिः क्षितितलन्यस्तकरजानुभिरिज्यसे[३४] ॥४५॥
मत्तान्यपुष्टाकलवल्गुभाषिता द्विरेफमालासितचारुमूर्धजा ।
प्रफुल्लपुष्पस्तवकोद्गतस्तनी विराजसे कल्पलतेव पुष्पिता ॥४६॥
देवि देवीभिरनिशं भक्त्याभिवन्द्यसे दिवि ।
इज्यसे[३५] मुनिभिः शश्वद् गिरिजे गिरिमूर्धसु ॥४७॥
अर्च्यसे द्विगन्धर्वैर्गन्धपुष्पोत्करैः सदा ।
सदागतिपथं प्राप्ता[३६] प्राप्त्या च स्तूयसेनघे ॥४८॥
भासि सिंहं समारूढा चलत्पिङ्गलकेसरम् ।
दीप्ता प्रभेव सावित्री मेरुमूर्धानमास्थिता ॥४९॥
जिघांसती रणे दैत्याञ्छरौघैर्भास्यजिह्मगैः ।
रवेर्मूर्तिस्तमांसीव विकिरन्ती गभस्तिभिः ॥५०॥
परशुं शितमुद्गृह्य देवदानवसंयुगे[३७] ।
भ्राजसे देवि संक्रुद्धा पाटयन्तीव[३८] रोदसी ॥५१॥
अथ सा शैशवं हित्वा तनुमन्यां समाददे[३९] ।
एकीकृतामिवाकाशे संहतिं सर्वतेजसाम् ॥५२॥
दीप्तामपि सुखालोकां शान्तामपि सविभ्रमाम्[४०] ।
बालामपि जगद्धात्रीं तन्वीमपि सुसंहताम्[४१] ॥५३॥
उवाचेदं च सा प्रीता[४२] वरदास्मि तव प्रभो ।
एवमुक्तस्तया[४३] सोथ प्रोवाचाम्भोदनिस्वनः[४४] ॥५४॥
शरण्ये देवि भक्तानां शरणागतवत्सले ।
भवानि भव मे नित्यं सुप्रसन्ना महेश्वरि ॥५५॥
कथयस्व च[४५] देवेशं शाश्वतं स्थाणुमव्ययम् ।
विश्वात्मानं महादेवं सर्वयोगेश्वरेश्वरम् ॥५६॥

३४...रीज्यसे - क. । ३५ ईज्यसे -घ. । ३६ सदागतिपथप्राप्ता - क. । ३७...संयुते- क. । ३८ पातयन्तीव - ख. । ३९ समादधे - घ. । ४० तपन्तीमप्यविभ्रमाम् - क. ख. । ४१ सुसंयतां - क. । ४२ सुप्रीता - क. ख. । ४३ ... स्तदा - घ. । ४४ निस्स्वनः - क. । ४५ त्वं च - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तथास्त्वित्ति प्रतिज्ञाय कथयामास शंकरम् ।
मृगयूथस्य मध्यस्थं क्रीडन्तं[४६] मृगरूपिणम् ॥५७॥
एकशृङ्गं महाग्रीवमेकाक्षममितौजसम् ।
एकपादं सुसंश्लिष्टमापाण्डुकपिलोदरम् ॥५८॥
अथ विष्णुर्द्रुतं गत्वा शृङ्गे जग्राह तं[४७] प्रभुम् ।
तस्मिन्नेव ततो ब्रह्मा जग्राहेन्द्रश्च वीर्यवान् ॥५९॥
त्रिधा तदभवच्छृङ्गं चलितं[४८] दीप्ततेजसम्[४९] ।
त्रयाणां सुरमुख्यानां पृथक् पाणिषु संस्थितम् ॥६०॥
अथादृश्यस्तदा शर्वस्तानुवाच सुरोत्तमान् ।
यदर्थमागता यूयं तद् ब्रूत सुरसत्तमाः ॥६१॥
अथोवाच तदा[५०] ब्रह्मा परमेशं वृषध्वजम् ।
राज्यं पुनरवाप्नोतु हत्वा वृत्रं[५१] पुरन्दरः ॥६२॥
ततस्तानमरान् तत्र वृषकेतुः समागतान् ।
स्वरेण वारिदध्वानगम्भीरेणाब्रवीत्ततः ॥६३॥
वैष्णवं परमं तेजः फेनमाचक्ष्यते सुराः[५२] ।
शिरश्छेत्स्यति वृत्रस्य तदादाय शतक्रतुः ॥६४॥
हृषीकेशोथ तत्खण्डमनयत् स्वं निकेतनम् ।
न्यवेशयत[५३] तत्रैव[५४] वारिजोदरसंभवः[५५] ॥६५॥
नीयमानं तृतीयं[५६] च खण्डमाखण्डलेन तु ।
रक्षसामधिपः श्रीमान् जग्राहाथ दशाननः ॥६६॥
चकार सन्ध्यामुदधौ दक्षिणे न्यस्य तत्तदा ।
न विचालयितुं शक्तः सन्ध्यामास्थाय रावणः[५७] ॥६७॥
तत्पुण्यं देवदेवस्य व्यास क्षेत्रं महाद्युते ।
गोकर्णमिति नामास्य चकार कमलासनः ॥६८॥

---

४६ क्रीडया - क. । ४७ स - ख. । ४८ चलिते - क. ख. । ४९ दीप्ततेजासां - क., दीप्ततेजसि - ख. । ५० ततो - ख. । ५१ वृत्रं हत्वा - घ. । ५२ केन वै निर्मितः पुरा - घ. । ५३ निवेशयत - घ. । ५४ .. त्वद्वारि - घ. । ५५ वारिध्रेरुदरे ततः - घ. । ५६ द्वितीयं - ख. । ५७ सत्वमन्विष्य वारुणः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तत्र गत्वा नरो भक्त्या प्रणिपत्य महेश्वरम् ।
अश्वमेधमवाप्नोति सर्वपापैः प्रमुच्यते ।।६९।।
गोकर्णमुत्तरं[५८] व्यास स्थापितं पद्मयोनिना[५९] ।
उदन्वतः स्थितं तीरे स्वयमेव तु दक्षिणे ।।७०।।
यः शृणोति नरो नित्यं पुण्यगोकर्णसंभवम् ।
सर्वपापविधूतात्मा स याति परमां गतिम्[६०] ।।७१।।
अथ तौ दानवौ व्यास गोकर्णमभिजग्मतुः ।
तत्र चेरतुरत्युग्रं तपोम्बुपवनाशनौ ।।७२।।
कस्यचित्त्वथ कालस्य विदित्वोग्रं तयोस्तपः ।
आजगाम तयोः पार्श्वं ब्रह्मा सुरनमस्कृतः ।।७३।।
अथ तौ विश्वधातारं चतुर्वक्त्रं पितामहम् ।
अपश्यतां महाबाहू ब्रह्माणं पुरतः स्थितम् ।।७४।।
शुक्लाम्बरधरं दीप्तं शुक्लस्रगनुलेपनम्[६१] ।
एकीकृतमसंप्रेक्ष्यं तेजो दिनकृतामिव[६२] ।।७५।।
प्रीतोस्मि युवयोः पुत्रावथोवाच पितामहः ।
अनेन तपसोग्रेण वरं ब्रूत[६३]मभीप्सितम् ।।७६।।
अमरत्वं तु वव्राते तौ प्रणम्य पितामहम् ।
ब्रह्माथाह[६४] विना देवानमृतत्वं न विद्यते ।।७७।।
अवश्यमेष्यो[६५] युवयोर्मृत्युरेकेन केनचित् ।
अथामरत्वं वव्राते परस्परवधं विना ।।७८।।
एवमस्त्विति ताभ्यां तं वरं दत्त्वा पितामहः ।
हंसयुक्तेन यानेन[६६] जगाम स्वं निकेतनम् ।।७९।।
असुरावपि तौ तस्मात्तपसोग्राद्विरेमतुः ।
आजग्मतुर्निकेतं स्वं वरं लब्ध्वा पितामहात् ।।८०।।

---

५८ ...मुत्तमं - ख. । ५९ ब्रह्मयोनिना - घ. । ६० "स याति परमं स्थानं यत्र गत्वा न शोचते" - घ. । ६१ शुक्रगन्धानुलेपनम् - घ. । ६२ रवि (रुचि) राकार... - ख. । ६३ ब्रूता - क. । ६४ ... हाथ - क. ख., ...व्याह - घ. । ६५ अवश्यमेव - घ. । ६६ हंसयुक्तविमानेन - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वरदानं[६७] ततो ज्ञात्वा दैत्याः पातालवासिनः ।
आजग्मुर्दानवाश्चैव तयोः पार्श्वं मुदान्विताः ॥८१॥
केशी मुरो[६८]मयः शम्भुः[६९] कार्तस्वरमहारवौ ।
इन्द्रशत्रुः कतिर्धुन्धुस्त्विल्वलो नमुचिर्द्रुमः ॥८२॥
वातापी दुन्दुभिर्मेघः प्रभुरन्ये च दानवाः ।
सर्वे कवचिनः शूरा गदापरिघपाणयः ॥८३॥
ऊचुश्च शोकमग्नानामस्माकं शत्रुतापनौ ।
युवां प्लवाविवायातौ शोकसागरतारणौ ॥८४॥
पुरेप्रतिभये रम्ये कान्तां नाम ततः सभाम् ।
आजग्मुस्तुष्टमनसो दानवेन्द्राः[७०] समागताः[७१] ॥८५॥
तस्यां प्रशस्ते[७२] विस्तीर्णे शातकौम्भे वरासने ।
आससाद महाबाहुः सुन्दो दानवसत्तमः ॥८६॥
निसुन्दोन्यत्ततो भेजे हेमरत्नमयं शुभम् ।
आससाद ततो धीमान् कार्तस्वरमयं[७३] मयः[७४] ॥८७॥
अन्ये च दानवा भेजुरासनानि तदा[७५] मुने ।
हेमरत्नविचित्राणि भास्वन्ति च महान्ति च ॥८८॥
विरेजे सा सभा तत्र दानवेन्द्रैः समागतैः ।
सबलाकैस्तडित्वद्भिः प्रलये द्यौरिवाम्बुदैः[७६] ॥८९॥
अथोन्नाम्य शिरो रत्नमरीचिपरिवेषवत् ।
सुन्दो वचनमाहेत्थमम्भोदध्वनिरस्वनः[७७] ॥९०॥
दानवेन्द्राः करिष्यामि सर्वेषामश्रुमार्जनम् ।
विजित्य दैवतैः सार्द्धमिन्द्रमाहवमूर्धनि ॥९१॥
प्रयाम[७८] दंशिताः सर्वे सज्जीभवत[७९] दानवाः ।
त्रैलोक्यविजयं कर्तुमुद्यतायुधपाणयः ॥९२॥

---

६७ वरलाभं (?) । ६८ केशिरुग्रो - घ. । ६९ शंखः - घ. । ७० दानवेन्द्र - घ. । ७१ समागतां - घ. ।
७२ त्रयस्ते - क. ख. । ७३ कार्तस्वरमये - क. । ७४ शुभम् - घ. । ७५ ततो - ख. ।
७६ द्यौरिवाम्बरे - ख. । ७७...निस्वनं पुनः - घ. । ७८ प्रयामो - घ. । ७९ सज्जा भवत - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तस्य तद्वचनं श्रुत्वा प्रभुः प्राहासुरेश्वरम्[८०] ।
यज्ञैर्व्रतैस्तपोभिश्च[८१] नियमैश्चासुरद्विषः[८२] ॥९३॥
आप्याययन्ति संरब्धाः शश्वद्वर्णाश्रमा भुवि ।
तानेव प्रथमं हत्वा ततो जेष्याम देवताः ॥९४॥
तस्य तद्वचनं श्रुत्वा प्राहुर्दानवसत्तमाः ।
आर्यातिं प्रथमं हत्वा विजेष्यामस्ततोमरान् ॥९५॥
अथोवाच तदा[८३] धुन्धुर्मेघदुन्दुभिनिस्वनः ।
राजानुगामी लोकोयमपापो बध्यते कथम् ॥९६॥
अस्मत्तो दैवतै राज्यं लोकं हत्वा पुरा हृतम् ।
विक्रमेणैव निर्जित्य दैत्यराज्यं सुरैर्हृतम् ॥९७॥
तथा[८४] तेभ्यो वयमपि प्रोत्थितध्वजसंकुले[८५] ।
आनेष्यामो रणे जित्वा श्रियमाविग्नलोचनाम् ॥९८॥
अपकारे सति समे स्वभावेन मनस्विनाम् ।
तेजो विजृम्भते दीप्तं शक्तिमत्स्वेव सर्वदा ॥९९॥
अथ धुन्धोर्वचः श्रुत्वा मुरो मुरजनिस्वनः ।
उच्चैरुत्क्षिप्य मूर्धानं प्रोवाच प्रहसन्निव ॥१००॥
पुराभवन्[८६] महात्मानो[८७] दानवेन्द्रा महाबलाः ।
हिरण्यकशिपुर्वृत्रः प्रह्लादो नमुचिर्बलिः ॥१०१॥
कोटिशो दानवाश्चान्ये महासत्वा महाबलाः ।
यैः कृता प्रसभं लक्ष्मीः स्ववक्षःस्थलवासिनी ॥१०२॥
अल्पावशेषैरधुना[८८] युष्माभिरसुरोत्तमाः ।
कथमानीयते राज्यं सुरान्निर्जित्य संयुगे ॥१०३॥
इष्टार्थसाधकेनाशु देशकालाविरोधिना ।
उपायेन परीप्सध्वं राज्यमन्येन केनचित् ॥१०४॥
एतच्छ्रुत्वा तदा वाक्यमंशुमाली[८९] महासुरः ।
प्रोवाच मधुरं श्लक्ष्णमर्थानुगमिदं वचः ॥१०५॥

---

८० प्राहासुरेश्वरः - घ. । ८१ यज्ञव्रततपोभिश्च - क. घ. । ८२ यमैश्चासुरविद्विषः - घ. । ८३ ततो - क. घ. । ८४ अथ - घ. । ८५ प्रोच्छ्रितध्वजसंकुले - घ. । ८६ ...भूवन् - क. ख. । ८७ महोत्साहो - घ. । ८८ स्वल्पावशेषैरधुना - घ. । ८९ ...मंशुमान्स - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सापराधा बलीयांसो बद्धवैराश्च दानवैः ।
जयिनः श्रीमदोन्मत्ताः साम देवेष्वनर्थकम् ॥१०६॥
सुरेषु मानसी सिद्धिर्विभुता भुवनत्रये ।
अणिमाद्यैर्गुणैर्योगस्तेषु दानमपार्थकम् ॥१०७॥
एकार्था नार्थिनः[९०] सर्वे संहताश्चासुरद्विषः ।
न ते भेदयितुं शक्या दानैस्ते दानवोत्तमाः[९१] ॥१०८॥
मन्त्रप्रभावशक्तिभ्या[९२]मुत्साहेन परेण च ।
संपन्नाः सर्वथा देवा न युद्धं तैः सहेष्यते ॥१०९॥
युक्तो दानवमुख्यानां हीन[९३]सन्धिः सुरैस्सह ।
स्थानवृद्धिं परीप्सूनां क्षीणानामधुना भृशम् ॥११०॥
अथाह तेजसा स्वेन तेजांसि सुरविद्विषाम् ।
अभिभूय सदस्युच्चैरंशुमानंशुमानिव ॥१११॥
प्रणामपूर्वः क्रियते हीनसन्धिः कुराजभिः ।
न चक्रुर्दानवाः पूर्वं कुर्वते न च सांप्रतम् ॥११२॥
शिरांसि दानवेन्द्राणां कथं यास्यन्ति नम्रताम् ।
सुमेरोरिव शृङ्गाणि भानुमन्त्युच्छ्रितानि च ॥११३॥
आदास्यामोथ वा राज्यं देवान्निर्जित्य संयुगे ।
प्राप्स्यामो वा[९४] गतिं पुण्यां निहताः समरेमरैः[९५] ॥११४॥
इत्थमंशुमतः श्रुत्वा वाक्यं वाक्यार्थकोविदः ।
गम्भीरमर्थवत् प्राह महिषो वदतां वरः ॥११५॥
विदितं वः समस्तानां[९६]पूर्वजा[९७] भवतां यथा ।
हता दानवशार्दूला विक्रमैकरसाः सुरैः ॥११६॥
तदलं दानवश्रेष्ठा वृत्त्या वोग्निपतङ्गयोः[९८] ।
सन्धाय दैवतैस्सार्धं वृत्तिं कुर्मः स्वकर्मभिः ॥११७॥

---

९० धन्विनः - घ. । ९१ दानवैर्दानिवोत्तमाः - घ. । ९२ शक्त्या च - घ. । ९३ हीनः - घ. ।
९४ ...द्य - घ. । ९५ शरैः - घ । ९६ सहस्थानां - घ. । ९७ पूर्वणां - घ. । ९८ ...वत् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ज्यायोभिर्दानवा देवै रन्ध्रव्यसनवर्जितैः[९९] ।
विग्रहेण कथं सिद्धिमिच्छथ त्रस्तशक्तयः ॥११८॥
गुणातिशययुक्तानां यानमभ्युच्चये सति ।
मन्त्रोत्साहप्रभावाणामवाप्तौ[१००] देशकालयोः ॥११९॥
अथ संभूय यानेन सन्यध्वे[१०१] सिद्धिमात्मनः ।
दंशिताःसमरे यत्ताः[१०२] समेता यक्षराक्षसैः ॥१२०॥
रक्षांसि हुतशेषाणि ज्वलने शक्तिसूनुना ।
श्रितानि दैवतान्येव भीतान्यबलवन्ति च ॥१२१॥
आयत्ताः सर्वदा यक्षाः कुबेरेसुरसत्तमाः ।
स चापि सुरमुख्यानां कुरुते कार्यमुद्यतः ॥१२२॥
अन्यत्र दैत्यशत्रुभ्यो भुवनेषु बलीयसः ।
अभावादसुरश्रेष्ठा द्वैधीभावो न विद्यते ॥१२३॥
महिषे सदसि स्वस्थमित्युक्तवति दानवे ।
विस्पष्टमर्थवद्वाक्यं द्रुमः प्राह महासुरः ॥१२४॥
समरे निर्जितैः[१०३] पूर्वमस्माभिरबलैस्सह ।
जयिनः शक्तिसंपन्नाः संधास्यन्ते कथं सुराः ॥१२५॥
संविधायाशु[१०४] दुर्गाणि पर्वतानुदकानि च[१०५] ।
विजये सततं युक्ता विगृह्यासनमास्महे ॥१२६॥
नाशयन्तः सदा यज्ञान् व्रतानि नियमाँस्तथा ।
वर्णाश्रमांश्च[१०६] लोकेस्मिन् जिघांसन्तः समन्ततः ॥१२७॥
ततो लोकविनाशेन विच्छिन्ने[१०७] सत्क्रियापथे ।
विदित्वापचितान् देवानभियास्याम दंशिताः ॥१२८॥
अथ ते तस्य वचनं सर्व एवानुमेनिरे ।
आसन्नमृत्यवोपथ्यमन्नं[१०८] प्राणभृतो[१०९] यथा ॥१२९॥
उत्तस्थुर्लोकनाशाय मतिं कृत्वामरद्विषः ।
उदन्वन्त इवोद्वेलाः प्रलये मारुताकुलाः ॥१३०॥

---

९९ ...रन्तर्व्यसमवर्जितैः - घ. । १०० ...मधाम्ना - ख. । १०१ मन्यध्वं - क. ख. । १०२ मत्ताः - घ. ।
१०३ निर्जिताः - क. । १०४ सन्निधायाशु - घ. । १०५ पार्वतान्युदकानि च - क., पार्वतान्यौदकानि च - घ. ।
१०६ वनाश्रमाश्च - घ. । १०७ विनष्टे - घ. । १०८ पथ्यमर्थं - घ. । १०९ प्राणहरं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जलद इव सुनीलः पीनवृत्तोन्नताङ्गो[११०]
हिमकरकरशुभ्रां हारयष्टिं दधानः ।
उदपतदथ सुन्दस्स्वासनात् स्वात्तदानीं
जलधिरिव विघूर्णन् फेनमाली युगान्ते ॥१३१॥
तदनु तदनुजोम्बुवाहनीलः परिघभुजः पृथुरक्तदीर्घनेत्रः ।
अजहदविमनाः स्वमासनान्तं प्रतिभयकृद् द्विषतां तदा निसुन्दः ॥१३२॥

⊙ इति स्कन्दपुराणे दैत्योद्योगो नाम षष्टितमोध्यायः ⊙

सनत्कुमार उवाच

अथ दानवमुख्यानां लोकनाशाय निर्ययौ ।
मत्तवारणसम्बाधं[१] रथाश्वबलितं बलम्[२] ॥१॥
तत्तदा[३] दानवानीकं विससार दिशो दिशः[४] ।
प्रलये मारुतोद्धूतमौदन्वतमिवोदकम् ॥२॥
निजघ्नुर्ब्राह्मणान् केचित् केचिन्निष्पिपिषुर्विशः[५] ।
तुस्तुभुः क्षत्रियानन्ये शूद्रानन्ये बभक्षिरे[६] ॥३॥
जग्लसु[७]र्लिलिहुर्न्नेदुर्बभञ्जुश्च समन्ततः ।
यज्ञेष्वन्नं हविर्नादान्[८] यूपाँश्चामरविद्विषः ॥४॥
स्वधीतवेदाध्ययनाभिनादितान् मुनिप्रवेकाचितगुल्मपादपान् ।
प्रभूतचीराजिनदर्भसंचयान् निकामपर्यन्तहिमाम्बुनिर्झरान् ॥५॥
उपान्तनीवारगवेधुकाचितान्[९] प्रसुप्तविश्वस्तमृगर्क्षवानरान् ।
हविर्भुजो[१०] धूमवितानसंकुलान् विसृत्य चान्ये प्रविजघ्नुराश्रमान्[११] ॥६॥
केचिन्मुनीनामसुरा जीर्णोरगसमत्विषः[१२] ।
जटाः संगृह्य लुलुचुः क्षालितास्तीर्थवारिणा ॥७॥

---

११० ...त्तमाङ्गो (?) ।

१ मत्तैरावणसम्वाधं - घ. । २ ...कलितं वलम् - घ. । ३ तत्तथा - घ. । ४ दश - घ. । ५ ...च्चिक्षिपुश्च दिशो दश - घ. । ६ वभञ्जिरे (?) । ७ जग्रसु - घ. । ८ वह्निर्दानान् - क. । ९ उपात्तनीवारगवेधुकाचितान् - ख । १० हविर्भुजां (?) । ११ परिजघ्नुराश्रमान - ख. । १२ ...मिव द्विप (ा): - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पातयित्वासुरा:[१३] केचिच्चरणै: पिपिषु: क्षितौ ।
ऋषीनात्मविनाशाय हुताशान् ज्वलितानिव[१४] ॥८॥
शिरांसि मुनिपत्नीनां करै: केचित् तलैस्तथा[१५] ।
पूतानि[१६] वारिभि: पुण्यै: पस्पृशुर्दानवाधमा: ॥९॥
अथ ते जगृहुर्यात्रां[१७] ज्ञात्वाभ्युदयमात्मन: ।
विक्षिप्तं[१८] लोकनाशाय बलमाहूय सर्वश: ॥१०॥
प्रशस्तेहनि नक्षत्रे मुहूर्ते च जयान्विते[१९] ।
सन्नाहभेरीराहत्य क्रियाश्चक्रुर्जयावहा: ॥११॥
सन्नाह्यान् बलिनो मत्तानानाय्य वरवारणान् ।
सम्यगभ्यर्च्य वर्माणि बबन्धुर्विधिनासुरा: ॥१२॥
यन्त्राणि धौतैर्नाराचै: पूर्णान्यासनपार्श्वयो: ।
बबन्धु: शक्तिपूर्णांश्च वेणून् तिर्यगवस्थितान् ॥१३॥
तोमरान् कणपान्[२०] शंकून् शूलचक्रपरश्वधान् ।
आबबन्धुर्नियुक्ताश्च मध्यमासनपार्श्वयो: ॥१४॥
सज्जानि परमास्त्राणि बालधींश्च सुसंस्कृतान् ।
संपूर्णान् गन्धवासोभिर्निशिताग्रै: शिलीमुखै: ॥१५॥
सन्नाह्यानंकुशाँल्लौहान् बालेन्दुसदृशद्युतीन् ।
ग्रैवेयेषु सिताँश्चक्रुर्मध्ये मस्तकपिण्डयो: ॥१६॥
क्षुरप्रमालां[२१] संयस्तां शातकुम्भमयीं शुभाम् ।
आबबन्धुश्च कुम्भेषु गजानां गजसादिन:[२२] ॥१७॥
वैजयन्तीपताकाश्च विचित्रा: स्वभिलक्षिता: ।
उच्छ्रयामासुरायत्ता दन्त्यनीकस्य दानवा: ॥१८॥
घण्टा वारणमुख्यानामाससञ्जु[२३]र्महास्वना: ।
चामराणि सुदीर्घाणि हंसांशुरुचिराणि[२४] च ॥१९॥

---

१३ पाटयित्यासुरा: - घ. । १४ हुनान'ञ्जिलतानिव - ख. । १५ चलैस्तथा - क. ख. । १६ युतानि - घ. । १७ ... गौत्रां - क., यैज्ञं - घ. । १८ विक्षिप्ता - ख. । १९ विजयान्विते - घ. । २० ...यान् - क. । २१ क्षुरप्रमाणा:-घ. । २२...,सादिभि:- घ. । २३ ...माससंजु-क., ...माससर्ज(र्जु)-घ. । २४ हंसांगरूचिराणि-घ.।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एकैकस्य चतस्रश्च करेण्वश्चारुदर्शनाः ।
स्थापिताः पुरतो दैत्यैःपरवारणवारणाः ॥२०॥
यूनो युवभिरारूढान् शिक्षितानस्त्रकोविदैः[२५] ।
चक्रुरग्रेसरानश्वान् वर्मिणो लोहजालिनः ॥२१॥
वर्मिणो बद्धकवचाञ्छितनिस्त्रिंशधारिणः ।
तेषां पुरस्सरान् पत्तीननुयातांश्च धन्विभिः ॥२२॥
दैत्ययोधास्ततश्चान्ये[२६] वर्मिणो लोहजालिनः ।
आरूढा बद्धनिस्त्रिंशाः स्नातपीतांस्तुरङ्गमान्[२७] ॥२३॥
केचिद्विनीतैर्युवभिः स्नपितैः[२८] कृतमङ्गलैः ।
रथान् संयोजयामासुरश्वैरग्रजवैस्तदा[२९] ॥२४॥
आयुधान् सपताकांश्च किंकिणीजालनादितान् ।
अधितस्थुस्तदा केचिद् रथान् हाटकसंस्कृतान् ॥२५॥
एवं तत् कल्पितं श्रुत्वा सैन्यं सैन्यनमस्कृतः ।
सुन्दो दानवशार्दूलो निर्ययौ कृतमङ्गलः ॥२६॥
स्वीषं सुकूबरं[३०] स्वक्षं शातकुम्भमयं वरम् ।
नानामणिमयैश्चित्रैर्भक्तिपुष्पसृगद्विजैः[३१] ॥२७॥
युक्तं परमसंहृष्टैर्मनोवेगैस्तुरङ्गमैः ।
आरुह्याथ रथं दिव्यं पताकाध्वजशोभितम् ॥२८॥
कवची बद्धनिस्त्रिंशो विधूतसितचामरः[३२] ।
अभितः स्तूयमानश्च सूतमागधवन्दिभिः ॥२९॥
निसुन्दोपि[३३] मदश्यामकपोलालीनषट्पदम्[३४] ।
आरुह्य निर्जगामाशु सांग्रामिकमनेकपम्[३५] ॥३०॥
अन्ये च दानवास्तत्र रथैरश्वैर्मतङ्गजैः ।
निर्ययुः परमप्रीता[३६] युद्धशौण्डाः सुदंशिताः ॥३१॥

---

२५ वासितामस्त्रकोविदैः - ख. । २६ ... स्तथा चान्ये - घ. । २७ स्नातपीतास्तुरङ्गमाः - क. ।
२८ स्नापितैः - क. ख. । २९ ... स्तथा - घ. । ३० सुकुरवं - क. । ३१ भक्तापुष्पसुगंधिजैः - घ. ।
३२ बद्धनिस्त्रिश उद्धूतशितचामरः - घ. । ३३ उपसुन्दो - ख. । ३४ नीरदश्यामकपालानीलषट्पदम् - घ. ।
३५ संग्रानिक्रमनीकपम् - क., महाद्विपं - ख. । ३६ परमप्रीत्या - क. घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

बलस्याग्रेसरं कृत्वा तारकाक्षं[३७] महासुरम् ।
सहितं बहुभिः शूरै रथनागाश्वपत्तिभिः ।।३२।।
पृष्ठतः संविधायाशु बलोन्मत्तं महासुरम् ।
बलेन चतुरङ्गेण[३८] महिषं पार्ष्णिरक्षिणम्[३९] ।।३३।।
पार्श्वयोरुभयोर्न्यस्य[४०] मेघस्वनमहास्वनौ ।
सैन्येन महता दृप्तौ[४१] दानवावरिसूदनौ ।।३४।।
मध्ये सुन्दो निसुन्दश्च मयः शम्भुः खरो मुरः ।
सन्नद्धा बलिनः शूरा परसैन्यविदारणाः[४२] ।।३५।।
प्रतस्थिरे सुसंयत्ता दिवं दानवसत्तमाः ।
प्रलये मारुतोद्धूता घनाः संवर्त्तका इव ।।३६।।
तेषामागमनं ज्ञात्वा सह स्वर्लोकवासिभिः ।
अपसृत्य जगामाशु जनस्थानं शतक्रतुः ।।३७।।
मेरो शिखरमारुह्य सर्वेथ सहितास्तदा ।
सेना निवेशयामासुर्नन्दने ते सुरद्विषः[४३] ।।३८।।
अथ सैन्यस्य दैत्येन्द्रा[४४] रक्षामाधाय सर्वशः[४५] ।
प्रविभक्तानसंबाधानावासान्[४६] जगृहुस्ततः ।।३९।।
दत्तानुज्ञास्ततः सर्वे दानवा दानवोत्तमैः ।
सन्नाह्यमपनिन्युस्ते सर्वोपकरणं तदा ।।४०।।
आरूढा गजकन्यासु[४७] वर्माणि मुमुचुः शनैः ।
आयुधान्यपनीयाशु[४८] सैनिका मत्तदन्तिनाम् ।।४१।।
सन्नाहानपनिन्युश्च[४९] मुमुचुः कवचानि च ।
तनुत्राणि च चित्राणि[५०] तदा दानवसैनिकाः ।।४२।।

---

३७ तारकाख्यं - घ. । ३८ बलेन च तुरङ्गेण - क. ख. । ३९ पारिरक्षिणम् - क., परिरक्षिणम् - ख. घ. ।
४० ...स्तस्य - ख. । ४१ गुप्तौ - क. घ. । ४२ ...निवारणाः - क. ख. । ४३ निर्जरद्विजः - (षः) - घ. ।
४४ दैत्यास्ते - घ. । ४५ सर्वतः - क. घ. । ४६ ...वासं - क. ख., वासास्ते - घ. । ४७ ...जगकन्यासु - क. ।
४८ ...न्युपनीतानि - ख. । ४९ परिनिन्युश्च - घ. । ५० विचित्राणि - ख. घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अपेत कक्षान्[५१] मातङ्गान्[५२] स्नातपीतान् गतक्लमान्[५३] ।
बबन्धुः कल्पवृक्षेषु[५४] केचिद्दानवसैनिकाः ॥४३॥
केचित् कल्पद्रुमान्नागा मदसंलीनषट्पदाः[५५] ।
बभंजुर्बलिनस्त्रस्तमत्तोद्भ्रान्तविहङ्गमान् ॥४४॥
चुक्रुशुर्बलिनः केचिन्मदश्यामान्[५६] मतङ्गजाः ।
कपोलान् कल्पवृक्षेषु पुष्पालीनालिपंक्तिषु ॥४५॥
नागा जगाहिरे केचिन्मत्ता मन्दाकिनीं नदीम् ।
हैमवारिजकिञ्जल्कपिञ्जरोपान्तरोधसम् ॥४६॥
विमुक्तसाङ्ग्रामिकवर्मजालान्[५७] प्रसन्नचित्तान् परिघृष्टकायान् ।
निपीततोयानपनीतखेदान् बबन्धुरश्वान्पृथगश्वबन्धाः ॥४७॥
अथ सूक्ष्माणि वासांसि चित्राश्च परमाःस्रजः[५८] ।
आनिन्युः कल्पवृक्षेभ्यः फलानि मधुराणि च[५९] ॥४८॥
हैमानि केचित् पद्मानि तद्रजोरुणमूर्त्तयः[६०] ।
बभञ्जुर्दानवा हृष्टा गता मन्दाकिनीं नदीम् ॥४९॥
आनिन्युः सैनिकाः केचिन्मन्दारकुसुमोत्करान् ।
फलान्याजह्रिरे केचित् स्वादूनि च बहूनि च ॥५०॥
तत्रोष्य रजनीमेकां भेरीराहत्य दानवाः ।
तेनैव विधिना यत्ताः प्रजग्मुरमरावतीम् ॥५१॥
ततस्तूर्यनिनादेन गजानां बृंहितेन च ।
सिंहनादैश्च दैत्यानां चचालेवामरावती ॥५२॥
अथ शून्यां समुद्वीक्ष्य पुरीं दानवसत्तमाः ।
इत्थमूचुः सुसंहृष्टा[६१] नदन्तो भैरवस्वनम्[६२] ॥५३॥

---

५१ अपेतभक्ष्यान् - क. । ५२ अपेतकक्षास्तान्नागान् - घ. । ५३ स्नपितान्विगतक्लमान् - घ. ।
५४ वृक्षकल्पेषु - क. । ५५ ...षट्पदान् - ख. । ५६ मदश्यानान् - (?) । ५७ ...सङ्ग्रामिकवर्मजालान् - क. ।
५८ विचिक्नुयिरय... - क. ख. । ५९ मुमुचासुरान् - क. ख. । ६० भद्राणि रणमूर्धनि - घ. ।
६१ संप्रहृष्टा - घ. । ६२ भैरवं रवं (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जयति विबुधशत्रुः सुन्ददैत्येन्द्रसिंहः
कठिनरुचिरबाहुः पीनविस्तीर्णवक्षाः ।
शतमखपुरजेता चारुपृथ्वायताक्षः
सजलघननिनादो मत्तनागेन्द्रगामी ॥५४॥
तदनु जयति चारुप्रान्तरक्तायताक्षो
मृगपतिगतिलीलः संयुगेष्वप्रधृष्यः ।
त्रिदशवरविजेता दानवेन्द्रो निसुन्दः
प्रहतमुरजनादः पीनदीर्घोरुबाहुः ॥५५॥

⊙ इति स्कन्दपुराणे अमरावतीप्रवेशो नाम एकषष्टितमोध्यायः ⊙

सनत्कुमार उवाच

अथ निर्जित्य दैत्येन्द्रौ दिवं[1] विक्रमशालिनौ ।
जग्मतुः सहितौ दैत्यैर्विन्ध्यं तुङ्गशिलोच्चयम् ॥१॥
संपूज्य विधिवद्दैत्यान् प्रस्थाप्य भ्रातरौ तदा ।
रेमाते विन्ध्यपादेषु फुल्लपादपसानुषु ॥२॥
दैत्याभ्यामथ विज्ञाय ब्रह्मा सुरपराभवम् ।
विचिन्त्यैकमनाः सम्यग् वधोपायं तयोस्तदा ॥३॥
तिलं तिलं समादाय रत्नेभ्यश्चारुदर्शनाम् ।
ससर्ज कमनीयाङ्गीमङ्गनां[2] वल्गुनिस्वनाम् ॥४॥
तिलोत्तमेति तस्याश्च नाम चक्रे पितामहः ।
दिव्यानामपि सा स्त्रीणामुपमेव[3] तदा बभौ ॥५॥
अतिसंपूर्णवक्त्रां[4] तामतींदीवरलोचनाम् ।
अतिहंसस्वनालापामतिमत्तेभगामिनीम् ॥६॥
लक्ष्मीर्निरीक्ष्य सव्रीडा पङ्कजेनावृणोन्मुखम् ।
वपुर्भिश्चैव[5] चार्वङ्ग्यास्त्रेपुरुद्यानदेवताः ॥७॥

---

१ देवान् - घ. । २ ...मनङ्गां - क. । ३ ...मतिरूपा - घ. । ४ सिन्दुरवक्त्रां - प्र. । ५ .. स्स्वैश्च - क ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तामुत्पाद्य ततो धाता[६] पाकशासनमब्रवीत् ।
शम्भुना मदनः पूर्वं निर्दग्धो लोचनाग्निना[७] ॥८॥
तस्य प्रोद्भूतये[८] याम सर्वे[९] पार्श्वं पिनाकिनः ।
तमाराध्य ततः[१०] कुर्म्मो यथा स्यान्मदनः पुनः ॥९॥
अथ ते ब्रह्मणा सार्धं तथा चासुरविद्विषः ।
जग्मुर्विन्ध्यगिरेः शृङ्गं यत्रास्ते भगवान् हरः ॥१०॥
तत्र शर्वमपश्यन्तो दध्युस्ते सुरसत्तमाः ।
गृणन्तः प्रणवं सर्वे शिवसन्न्यस्तचेतसः ॥११॥
अथ लिङ्गं समुत्तस्थौ तेषां मध्ये दिवौकसाम् ।
सुसंहतं[११] सुसंश्लिष्टं समूहस्तेजसामिव ॥१२॥
उच्चचार तदा तस्माद्दुच्चैर्वाग्[१२] विशदाक्षरा ।
निर्दग्धोयं मया पापस्तपस्विजनकण्टकः ॥१३॥
युष्मदर्थे विमोक्ष्यामि कार्यं वोयं[१३] करिष्यति ।
करोतु परितश्चेयं मां प्रदक्षिणमङ्गना ॥१४॥
एवमुक्ता महेशेन सा चकार प्रदक्षिणाम्[१४] ।
सन्निधायाञ्जलिं मूर्ध्नि रक्तेन्दीवरकोमलम्[१५] ॥१५॥
नेमे[१६] मूर्ति तदा पूर्वां निस्ससार ततो मुखम्[१७] ।
त्र्यक्षं प्रसन्नबिम्बोष्ठमसितद्युति कान्तिमत् ॥१६॥
अथ तेजो विनिःसृत्य[१८] वदनेन्दोः पिनाकिनः ।
तां विवेशाङ्गनामाशु[१९] शरद्भास्करभास्वरम् ॥१७॥
अथ सा दक्षिणां मूर्त्ति प्रणेमे चारुदर्शना ।
निर्जगाम तदा दीप्तं मुखं सुरगुरोस्ततः ॥१८॥
वारिभारालसाम्भोदरुचिमद्[२०] भीमनिस्वनम् ।
करालदशशनोद्भासि दीप्तरक्तान्तलोचनम् ॥१९॥

---

६ तां समुत्पाद्य धाता तु - घ. । ७ नेत्रवह्निना - घ. । ८ प्रोद्धृतये - घ. । ९ यामस्सर्वे - क. घ. ।
१० तथा - क. ख । ११ सुसंघातं - क. ख. । १२ दुर्बोध... - ख. । १३ यः - क. ख. ।
१४ प्रदक्षिणं - क. घ. । १५ ...लोचनं - घ. । १६ रेमे - घ. । १७ तदा - क. ख. । १८ ...भिनिःसृत्य - घ. ।
१९ आविवेशाङ्गनामाशु - घ. । २० ...धारालसाम्भोदरुचिरं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अत्यादित्यं ततस्तेजो मुखान्निःसृत्य दक्षिणात् ।
दृश्यमानं सुरैस्सर्वैर्विवेश प्रमदोत्तमाम् ॥२०॥
प्रणेमे सा ततस्तस्य पश्चिमां मूर्त्तिमञ्जसा ।
निश्चक्राम ततस्तस्या[२१] मुखं त्र्यक्षमनुत्तमम् ॥२१॥
ततस्तेजो विनिःसृत्य मुखेन्दोर्मदनद्विषः[२२] ।
दीप्यमानं विवेशाशु तामेव प्रमदोत्तमाम् ॥२२॥
उत्तरां मूर्तिमागत्य प्रणेमे सा कृताञ्जलिः ।
तस्या[२३] मुखं सुसंपूर्णं सुप्रसन्नं विनिर्ययौ ॥२३॥
तस्मात्तेजो विनिःसृत्य सूर्यदीप्तानलप्रभम्[२४] ।
विवेश प्रमदामाशु तामेव वरवर्णिनीम् ॥२४॥
मुखानि देवदेवस्य सुराणामर्थसिद्धये ।
चत्वारि निर्ययुर्दिक्षु न तस्या रूपविस्मयात् ॥२५॥
आत्मसंस्थं पुरा तेजो दग्ध्वा यन्मदनं कृतम् ।
अनुजग्राह देवेशस्तेन तां प्रमदोत्तमाम् ॥२६॥
अब्रवीच्च सुरान् सर्वांस्तत्रेदं वचनं शिवः ।
यस्मादियं मां युष्मांश्च मण्डलेन प्रदक्षिणम् ॥२७॥
चक्रे सर्वान् सुरश्रेष्ठाः स्थानं तस्मादिदं मम ।
भविष्यति गिरौ विन्ध्ये मण्डलेश्वरसंज्ञितम् ॥२८॥
मंडलेश्वरमेतच्च यः करोति प्रदक्षिणम् ।
प्रदक्षिणीकृता तेन सप्तद्वीपा मही भवेत्[२५] ।
सान्निध्यं सर्वदा ह्यस्मिन् करिष्यामि वरप्रदः[२६] ॥२९॥
मण्डलेश्वरमीशानं दृष्ट्वा तु प्रयतो नरः ।
अश्वमेधफलं प्राप्य मम लोकमवाप्स्यति ॥३०॥
नैकसिद्धसमाकीर्णं किन्नरोरगसेवितम् ।
युष्माभिः सर्वदा युक्तं भविष्यति मम प्रियम् ॥३१॥

---

२१ ततस्तस्मान्मुखं - घ. । २२ ...र्वदनत्विषः - क. । २३ तस्मान् - घ. । २४ सूर्यानलप्रभामिव - घ. ।
२५ इति पद्यं दृश्यते घ. पुस्तके, न तु "मण्लेश्वर मीशान मिति" । २६ वरप्रदम् - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एषा तिलोत्तमा चैव यदर्थं सुरसत्तमाः ।
सृष्टा युष्माभिरव्यग्रा तद्वः कार्यं करिष्यति ॥३२॥
एतामवेक्ष्य तौ दैत्यौ मोहितौ मदनार्दितौ ।
अन्योन्यं यास्यतो नाशमेषा चैव भविष्यति ॥३३॥
अजरा चामरा[२७] चैव सर्वाप्सरवरा शुभा ।
पूज्या चेह सदा स्थाने वन्द्या चैव भविष्यति ॥३४॥

सनत्कुमार उवाच

एवमुक्ते[२८] महेशेन सुराः सुप्रीतचेतसः ।
तां स्त्रियं प्रेषयामासु[२९]र्वधार्थं दैत्ययोस्तदा ॥३५॥
सहायान् प्रददौ चास्यै ब्रह्मा कमलवाहनः ।
क्रोधं दर्पमृतून्सर्वान्[३०] मात्सर्यं मदमेव च[३१] ॥३६॥
कालं मृत्युं च मोहञ्च विषादञ्चामितद्युतिः ।
अथ संप्रेषयित्वा तु देवतास्तां तिलोत्तमाम् ॥३७॥
आत्मानं पिण्डयामासुर्देवास्ते सर्व एव हि ।
कः कः कतम आयात इहाद्येति सुरर्षभाः ॥३८॥
ततो मध्ये स्थितं नत्वा भूयस्ते परमेश्वरम् ।
पिण्ड्यमानेषु देवेषु यस्मान्मध्ये समास्थितः ॥३९॥
पिण्डारेश्वर इत्येव तत्रासावभवत्ततः[३२] ।
पिण्डारेश्वरमीशानं दृष्ट्वा भक्त्या तु[३३] मानवः ॥४०॥
सर्वाशुभविनिर्मुक्तो[३४] देहभेदे गणो भवेत् ।
पृथिव्यां यानि लिङ्गानि[३५] चतुर्मुखायतनानि च[३६] ॥४१॥

---

२७ ह्यमरा - घ. । २८ एवमुक्ता - घ । २९ शंसयामासु - घ. । ३० क्रोधदर्पादिकान् सर्वान् - घ. ।
३१ रागं मदनमेव च - क. ख । ३२ तदा - घ. । ३३ च - घ. । ३४ शुभाशुभविनिर्मुक्तो - घ. ।
३५ सर्वाणि - क. ख. । ३६ चतुर्मुखानि मे सुराः - घ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तानि सर्वाणि दृश्यानि इदं दृष्ट्वा भवन्ति हि ।
ततस्ता देवताः सर्वाः कृत्वा कार्यमतन्द्रिताः ॥४२॥
प्रणम्य परमेशानं स्वानि सद्मानि भेजिरे ।
सापि चारुमुखापाङ्गी पीनोन्नतपयोधरा[३७] ॥४३॥
आक्षिपन्तीव[३८] चेतांसि सुराणां विभ्रमैस्तदा[३९] ।
प्रतस्थे दक्षिणामाशामासाते यत्र दानवौ ॥४४॥
विन्ध्यपादेषु रम्येषु विहगोद्गीतसानुषु ।
भ्रमन्तावथ दैत्येन्द्रौ स्थितां ददृशतुस्तु ताम्[४०] ॥४५॥
अशोकशाखामुत्फुल्लामालम्ब्योन्मत्तषट्पदाम् ।
वसानामंशुकं चित्रमाबद्ध[४१]मणिमेखलाम् ॥४६॥
गायन्तीं मधुरं रक्तं समं कलमनाकुलम्[४२] ।
तारमन्द्रातितारैश्च स्वरैः सम्यगलंकृतम् ॥४७॥
साक्षादिव तपःसिद्धिं श्रियं मूर्त्तिमतीमिव ।
प्राप्तामिव रतिं साक्षात् कान्तिं चान्द्रमसीमिव ॥४८॥
ममैवेयं[४३] ममैवेय[४४]मिति तौ दानवोत्तमौ[४५] ।
अभिसृत्य तु तौ[४६] देवीं पाण्योर्जगृहतुः समम्[४७] ॥४९॥
अथ दर्पमदक्रोधमात्सर्याविष्टचेतसौ ।
तौ चुक्रुधतुरत्यर्थमन्योन्यस्यासुरोत्तमौ ॥५०॥
तयोर्गदेन्तकः[४८] कालो मृत्युश्चाविविशुर्द्रुतम् ।
प्रगृह्याथ गदे क्रुद्धावन्योन्यमभिजघ्नतुः ॥५१॥
अथैकैकेन[४९] तौ तत्र प्रहारेणाभिताडितौ ।
विषण्णौ भिन्नसर्वाङ्गौ[५०] शिवशापविमोहितौ[५१] ॥५२॥

---

३७ पीनोत्थितपयोधरा - क. ख. । ३८ आपिक्षन्ती च - क. घ. । ३९ विद्रुमैस्तदा - घ. । ४० ...स्ततः - घ. । ४१ ...मालम्ब्य(म्व) - क., ... मानस्या - घ. । ४२ समदकगुण्या - घ. । ४३ ममैवैषा - घ. । ४४ ममैवेति - घ. । ४५ दानवौ रूपमोहितौ - ख., तौ तदा दानवोत्तमौ - घ. । ४६ च तां - घ., शुभां - क. । ४७ स्वयं - क. । ४८ तयोर्दं (र्दे)हेन्तकः - घ. । ४९ अथ त्वेकेन - ख. । ५० विषण्णास्थितसर्वाङ्गौ - क., विसंज्ञौ - घ. । ५१ शिरसा परिमोहितौ - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विसंज्ञौ पतितौ भूमौ छिन्नमूलाविव द्रुमौ ।
अथ निर्ययतुस्तत्र[५२] कामोपहतचेतसौ ।।५३।।
आत्मानौ सह शुक्रेण तयोर्दानवमुख्ययोः ।
तौ तदा[५३] निर्गतौ तत्र तयोर्जीवौ दुरात्मनोः ।।५४।।
बलिनौ चारुसर्वाङ्गौ बालावाशु बभूवतुः ।
एकस्तत्राब्रवीद्बालः शुंभोहं द्विषतामिति ।।५५।।
निशुंभोप्यहमन्यस्तु बालस्तत्रावदत्तदा ।
अथ विन्ध्यः[५४] समासाद्य बालौ तावमितद्युती ।।५६।।
आदिदेशात्मनः पत्नीं पाहि त्वं बालकाविति ।
ववृधातेथ तौ तत्र दानवेन्द्रसुतावुभौ ।।५७।।
कृष्णपक्षक्षये यद्वद् युगपच्छशिसागरौ[५५] ।
बुद्ध्वा तौ च तदा जन्म[५६] दानवाभ्यामरिन्दमौ ।।५८।।
तपश्चेरतुरत्युग्रं[५७] पर्णाम्बुपवनाशनौ ।
तपसाराधितस्ताभ्यां तत्रागत्याब्रवीत्प्रभुः ।।५९।।
तुष्टोस्मि युवयोः पुत्रौ वरं किं[५८] वा ददान्यहम्[५९] ।
वव्राते तौ वरं वीरावजय्या[६०]वध्यतां सदा ।।६०।।
प्रार्थनां तां तयोः श्रुत्वा प्रत्युवाच पितामहः ।
अवश्यं युवयोरेष्यं मरणं येनकेनचित् ।।६१।।
सुरेभ्योन्यत्र दैत्येन्द्रावमरत्वं न विद्यते ।
इत्युक्तवन्तं ब्रह्माणं वव्राते दानवौ वरम् ।।६२।।
उभावपि[६१] सुनिश्चित्य संप्रहृष्टतनूरुहौ ।
जगन्मातुश्च[६२] या कन्या विना तस्याः पितामह ।।६३।।
मा[६३] भूतामावयोर्देव सदा मृत्युपराजयौ ।
एवमस्त्विति तौ प्रोच्य दैत्येन्द्रतनयावुभौ ।।६४।।

---

५२ निर्ववतुस्तत्र - घ. । ५३ ततस्तौ - घ. । ५४ विन्ध्यं - ख. घ. । ५५ ...च्छशिभास्करौ - क. ख., ...रिसन्धुसागरौ - घ. । ५६ जग्मुर् - घ. । ५७ तपश्चरतुरत्युग्रं - घ. । ५८ कं (?) । ५९ददाम्यहं - क. ख. । ६० ...वजेया - ख. । ६१ हतावपि - घ. । ६२ जगन्मातेत्र - घ., ..,न्माते च - क., जगत्पते - ख. । ६३ न - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विश्वस्य जगतः स्रष्टा तत्रैवान्तरधीयत ।
अथ तौ तपसस्तीव्राद्विरम्य कृतमङ्गलौ ॥६५॥
मौलिनौ[६४] बद्धकवचौ[६५] हाराङ्गदविभूषितौ ।
हरिचन्दनदिग्धाङ्गौ पीतकौशेयवाससौ ॥६६॥
विन्ध्यप्रस्थेषु रम्येषु चेरतु[६६]र्दानवोत्तमौ ।
पितामहाद् वरप्राप्तिं श्रुत्वा शुंभनिशुंभयोः ॥६७॥
आजग्मुर्दानवा हृष्टाः पातालतलवासिनः ।
शंभुर्मयो घनः केशिर्नरको नमुचिर्द्रुमः ॥६८॥
अन्ये च कोटिशो दृप्ता हतशेषाः सुरद्विषः ।
विन्ध्यप्रस्थे निषेदुस्ते समेताः सर्वदानवाः ॥६९॥
नानाद्रुमलतागुल्मविकीर्णकुसुमोत्करे[६७] ।
धन्विनो बद्धनिर्स्त्रिशाश्चित्राभरणभूषिताः ॥७०॥
सेन्द्रचापास्तडित्वन्तो नभसीव बलाहकाः ।
अथोवाच मयस्तत्र दानवो दानवोत्तमौ ॥७१॥
पितृभ्यां युवयोर्भुक्तं त्रैलोक्यमखिलं पुरा ।
युवाभ्यामधुना दैत्यौ कस्मान्नादीयते पुनः ॥७२॥
समेतानमरान्[६८] सर्वान्निर्जित्य रणमूर्धनि ।
ये सहाया हि वां पित्रो[६९]र्बभूवुः सुरविद्विषः ॥७३॥
त एवामी बलोन्मत्ताः सहाया युवयोर्युधि ।
इत्युक्तवति दैत्येन्द्रे मये शुम्भो महासुरः ॥७४॥
निशुम्भस्य मुखं प्रेक्ष्य वाक्यमित्थं तदाब्रवीत् ।
भूर्लोकमखिलं दैत्या युष्माभिः सह सांप्रतम् ॥७५॥
संविभज्य सुरान्सर्वाञ्जेष्यामो रणमूर्धनि ।
जम्बूद्वीपं स्वयं सोथ जग्राहासुरसत्तमः ॥७६॥

---

६४ भौमिनौ - घ. । ६५ बद्धकेयूरौ - घ. । ६६ चरतु... - घ. । ६७ ...कीर्णे विस्तीर्णकुसुमोत्करे - ख. ।
६८ ...व्रमरान् - घ. । ६९ पुत्रौ - ख. घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शाकद्वीपं निशुम्भाय ददौ भ्रात्रे कनीयसे ।
शाल्मलिद्वीपगोमेदौ[७०]दानवेभ्यो ददौ प्रभुः ॥७७॥
क्रौञ्चद्वीपकुशद्वीपौ दैत्येभ्यः प्रददौ च सः ।
दैत्येन्द्रः पुष्करद्वीपं भार्गवाय न्यवेदयत् ॥७८॥
एवं प्रतिविभज्याशु[७१] भूर्लोकमखिलं तदा ।
इज्याञ्जलिनमस्कारान् यज्ञान् सर्वा[७२]श्च सत्क्रियाः[७३] ॥७९॥
आच्छिद्य दैवतेभ्यस्ते जगृहुर्दैत्यदानवाः ।
बभूवाथ ततो यज्ञः कश्यपस्य[७४] महात्मनः ॥८०॥
आगत्य तं[७५] तदा यज्ञं समूचुः[७६] सुरशत्रवः ।
आधिपत्यं हि नः कृत्स्ने[७७] भूर्लोके कश्यपाधुना ॥८१॥
सर्वावस्थासु यज्ञे[७८]स्मिन्नस्मान् त्वं यष्टुमर्हसि ।
एवमुक्तस्ततो दैत्यैर्मारीचः कश्यपस्तदा ॥८२॥
गम्भीरमर्थवद्वाक्यमुवाचेत्थं स्मयन्निव ।
त्रैलोक्यमात्मनः[७९] कृत्वा जित्वा सर्वामरान् रणे ॥८३॥
यज्ञभागाँस्ततो दैत्याः सर्वानादातुमर्हथ ।
एवमुक्तास्तदा तेन दैत्यदानवसत्तमाः ॥८४॥
बलं सर्वं समादाय[८०] कृत्वा साङ्ग्रामिकीः[८१] क्रियाः ।
प्रशस्तेषु कृताचारा मुहूर्त्त[८२]र्क्षदिनेषु ते ॥८५॥
रथैर्नागैस्तुरङ्गैश्च निर्ययुर्दैत्यदानवाः ।
पृष्ठतः पुरतः सम्यक् पार्श्वयोरुभयोरपि ॥८६॥
विधाय रक्षां संयत्ता ययुर्देवान् जिगीषवः ।
तेषामागमनं ज्ञात्वा द्विषतां पाकशासनः ॥८७॥
संहतानां[८३] सुसंयत्तो[८४] युद्ध्वा नाकं जिगीषताम्[८५] ।
विधिं विधाय स्वपुरे[८६] समस्तं दौर्गकर्मिकम् ॥८८॥

---

७० शाल्मलिप्लक्षद्वीपौ च (?), ... गोमेया (?) - ख. । ७१ प्रतिविभज्याथ - घ. । ७२ सर्वां - क. ।
७३ सत्क्रियां - क. । ७४ काश्यपस्य - क. । ७५ तु - घ. । ७६ संगृह्य - घ. । ७७ कृत्स्नं - ख. घ. ।
७८ तस्मात्त्वं दानवान् - घ. । ७९ मखिलं - घ. । ८० समानाय्य - घ. । ८१ संग्रामिकीः - क. ।
८२ मूहूर्ते - ख. । ८३ संघातानां - ख. । ८४ दानवानां - घ. । ८५ योधानां विजिगीषताम् - घ. ।
८६ समरे - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पुण्येषु[८७] तिथिनक्षत्र[८८]मुहूर्त[८९]करणेषु सः[९०] ।
मुनीन् विधिवदभ्यर्च्य नमस्कृत्वा पिनाकिने ॥८९॥
सार्धं सुरगणैः सर्वैर्निर्ययौ कृतमङ्गलः ।
हिमवच्छिखराकारं चतुर्दन्तमनेकपम् ॥९०॥
आरुह्यैरावतं शश्वन्मदतोयौघवर्षिणम् ।
महता हैमदण्डेन[९१] रत्नांशुपरिवेषिणा ॥९१॥
उच्छ्रितेनातपत्रेण ध्रियमाणेन भास्वता[९२] ।
वीज्यमानः शरच्चन्द्रकिरणोत्करनिर्मलैः ॥९२॥
चामरै रत्नदण्डांशुसमूहखचितोदरैः ।
आशीर्भिर्जयशब्दैश्च मुनिभिः परिवर्द्धितः ॥९३॥
अभितः स्तूयमानश्च सूतमागधवन्दिभिः ।
अथावकाशे विस्तीर्णे[९३] समे पादपवर्जिते ॥९४॥
रचयामास देवानां पद्मव्यूहं[९४] बृहस्पतिः ।
मरुद्भिः सहितं कृत्वा कर्णिकायां शतक्रतुम्[९५] ॥९५॥
पत्रेषु च वसून् रुद्रानादित्यांश्च न्यवेशयत् ।
केशरेषु यमं[९६] कालं कुबेरवरुणावपि ॥९६॥
अनन्तं सहितं नागैर्नालि[९७] गुरुरकल्पयत् ।
देवानन्यान् समेतांश्च रक्षोगन्धर्वसेनया ॥९७॥
पुनः सरः[९८] स पद्मस्य परितः[९९] पर्यकल्पयत् ।
अथ दानवतूर्याणां शब्दं श्रुत्वा दिवौकसः ॥९८॥
आजघ्नुर्मुदिता भेरीर्नेदुर्नादांश्च संघशः ।
विमिश्रान्[१००] तूर्यशब्देन श्रुत्वा नादान्[१०१] दिवौकसाम् ॥९९॥
संयत्ताः[१०२] सुतरां चक्रुः प्रयत्नं दानवेश्वराः ।
अथ ते दानवा दृष्ट्वा पद्मव्यूहं दिवौकसाम् ॥१००॥

---

८७ पुण्ये च - ख. । ८८ तिथिनक्षत्रे - ख. । ८९ मूहूर्ते - ख. । ९० च सः - (?) ।
९१ हेमदण्डेन - ख. घ. । ९२ मूर्धनि - घ. । ९३ अथाकाशे सुविस्तीर्णे - घ. । ९४ प्रतिव्यूह - घ. ।
९५ शतक्रतुः - क. घ. । ९६ मयं - क । ९७ नालि - क., नाले समुपकल्पयत् - घ. । ९८ पुरः सरान् - क. घ., पुरस्तात्स - ख. । ९९ सरितः - क. । १०० विमिश्र - घ. । २०१ नादं - घ. । १०२ संयतो - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पप्रच्छुर्भार्गवं तत्र तद्भेदममितौजसः ।
स पृष्टो दानवश्रेष्ठैर्व्यूहभेदमनाकुलः[१०३] ॥१०१॥
विचिन्त्य भार्गवो धीमानीत्थमाहासुराँस्तदा ।
विकीर्णाः[१०४] परितः[१०५] सर्वे तुषारनिकरा इव[१०६] ॥१०२॥
पद्मव्यूहं सुरेन्द्राणां हत[१०७] सम्यक् सुरद्विषः ।
एवमुक्तास्ततो[१०८] दैत्या भार्गवेण महात्मना ॥१०३॥
सिंहनादं[१०९] विनद्याशु परितस्तेभिसंपतन्[११०] ।
ततो युद्धं समभवद् देवदानवसैन्ययोः ॥१०४॥
आयुधैर्विविधैस्तीक्ष्णैः परस्परमभिघ्नतोः ।
सादिनः सादिभिः सार्धं नागा नागै रथा रथैः ॥१०५॥
पत्तयः पत्तिभिर्दृप्तैर्दृप्ता युयुधिरे[१११] युधि ।
केचिद्विभिन्ना नाराचैश्छिन्नाः केचित् परश्वधैः ॥१०६॥
निपेतुर्व्यसवो[११२] योधाः सेनयोरुभयोरपि ।
छिन्धि भिन्धि सहेदानीं तिष्ठ मूढ क्व गच्छसि ॥१०७॥
इति वाचः सुमुत्तस्थुर्युधि योधैरुदीरिताः[११३] ।
वसारुधिरसंसिक्तं[११४] तनुत्रावरणाचितम् ॥१०८॥
हतनागाश्वकललं[११५] तद्बभूव रणाजिरम् ।
अथ तैर्दानवैस्तत्र[११६] पीड्यमाना दिवौकसः ॥१०९॥
सव्रणा हतभूयिष्ठाः शक्रमेवाभिशिश्रियुः[११७] ।
अनन्तं नागमुख्याश्च कुबेरं यक्षराक्षसाः ॥११०॥
भिन्ने व्यूहेथ देवानां प्रहृष्टा दैत्यदानवाः ।
सिंहनादान् विनद्योच्चै[११८]स्तूर्याण्याहत्य भूयशः ॥१११॥
अभ्यद्रवन्तः संयत्ताः समरे पाकशासनम् ।
अथोत्थाप्य गजं शक्रो वज्रेण शतपर्वणा ॥११२॥

---

१०३ ...मनाकुलम् - ख. । १०४ वीस्तीर्णाः - ख. । १०५ पततः - क. । १०६ तुषारेण हिमागमे - ख. । १०७ हतं - घ., हता - ख., हताः - क. । १०८ ...स्तदा - ख. । १०९ सिंहनादान् - घ. । ११० ...भ्यपेत्य च - घ. । १११ संयुयुधु(जु) - क. ख. । ११२ ...र्बहवो - घ. । ११३ ...रुदाहृताः - घ. । ११४ संसक्तं - क., सछन्नं - घ । ११५ कलिलं - क. ख. । ११६ ते दानवैस्तत्र - क. ख. । ११७...संश्रयुः - क., संश्रिताः - ख. घ. । ११८ नदन्त्युच्चै - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

चूर्णयामास संक्रुद्धो दैत्यदानववाहिनीम् ।
ददाह दानवानीकं परितः[११९] पाकशासनः ।।११३।।
निदाघसमये दीप्तः शुष्ककक्षमिवानलः[१२०] ।
अथ शुम्भः समभेत्य समरे शक्रमब्रवीत् ।।११४।।
दृष्टोस्यद्य[१२१] मया शक्र न[१२२] जीवन् प्रतियास्यसि[१२३] ।
अथागत्य तदा ब्रह्मा प्राहेत्थं सुरसत्तमान् ।।११५।।
न योद्धव्यं सुरा दैत्यैरवध्या वः सुरद्विषः ।
न योद्धव्यं न योद्धव्यं सुरा दैत्यैर्महाबलैः ।।११६।।
पूर्वलब्धवरा ह्येते अबध्याश्च सुरद्विषः ।
अन्तर्दधुस्ततस्तस्य वाक्यं श्रुत्वा दिवौकसः ।
विहाय समरं सर्वे क्षिप्रं सबलवाहनाः ।।११७।।
अथ दैत्याः सुसंहृष्टास्तूर्याण्याहत्य भूयशः[१२४] ।
नेदुरुच्चैर्वचश्चेदमूचुः समरशालिनः[१२५] ।।११८।।
तुरगखुरपुटान्तक्षुण्णरेण्वन्धकारे[१२६]
द्विरदरथनिनादत्रस्तपादातवृन्दे[१२७] ।
विगतभयविषादः संयुगे शुंभसिंहो
जयति सुरविजेता वारिवाहोरुनादः ।।११९।।
तदनु जयति दीर्घपीनथुबाहुः पृथुरुचिरोन्नतसंहतोरुवक्षाः ।
मृगपतिगमनोम्बुवाहनादः समरवरे[१२८] विजयी निशुंभसिंहः[१२९] ।।१२०।।

⊙ इति स्कन्दपुराणे देवासुरसंग्रामे शुंभनिशुंभविजयो नाम[१३०] द्विषष्टितमोध्यायः ⊙

---

११९ पतितः - घ. । १२० शुष्ककाष्ठमिवानलः - घ. । १२१ तुष्टोस्म्यद्य - घ. । १२२ स - ख. ।
१२३ त्वं क्व यास्यसि - ख । १२४ सर्वशः - घ. । १२५ समरपालिनः - क. । १२६ क्षिप्तरेण्वन्धकारे - क.।
१२७ ...पादातिवृन्दे - क. । १२८ सुरसमरे (?) ।
१२९ तदनु जयति दीर्घः पीनबाहूरुपादः पृथुरुचिरसुवक्षाश्चोन्नतांसः सुनेत्रः ।
मृगपतिसमगामी तोयदध्वाननादी सुरसमरविजेता दैत्यनाथो निशुम्भः ।। इतिः ख. पुस्तकपाठः
दनकुलभयहंता दैत्यनाथोसुरेन्द्रस्तदनु जयति धीमान् पीत (न) बाहूरुवक्षाः ।
मृगपतिगतिलीलो दीर्घनेत्रो विशालः पृथुरुचिरललाटो दैत्यनाथो निशुंभः ।। इतिः घ. पुस्तकपाठः ।।
१३० असुरविजयो नाम - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ निर्जित्य समरे देवान् देवद्विषस्तदा[१] ।
आजग्मुः सहिता विन्ध्यं शिखरालीनतोयदम्[२] ॥१॥
प्रस्थाप्य विधिवत् सर्वान् तौ तदा[३] दैत्यदानवान् ।
रेमाते सहितौ विन्ध्ये किन्नरोद्गीतकन्दरे ॥२॥
आरक्षिकस्तयोस्तत्र मूको नाम महासुरः ।
अपश्यच्छिखरे देवीं[४] ज्वलन्तीमिव[५] तेजसा ॥३॥
पुण्यलक्षणसंपूर्णां पुण्याभरणभूषिताम्[६] ।
आगतां तत्र तां सिद्धिं पुण्यानां कर्मणामिव ॥४॥
अथ मूकस्तदा देवीं विस्मयोत्फुल्ललोचनः ।
दृष्ट्वा जगाम मनसा शुंभं दानवसत्तमम् ॥५॥
यथेयं चारुसर्वाङ्गी प्रधाना सर्वयोषिताम् ।
तथा पुंसां प्रधानोसौ[७] शुम्भो दैत्येन्द्रचन्द्रमाः ॥६॥
विस्तीर्णवक्षसस्तस्य[८] विशालजघनस्थला ।
अनुरूपा भवेत् पत्नी दीर्घाक्षस्यासितेक्षणा ॥७॥
इति संचिन्त्य मनसा तामुवाच[९] सुमध्यमाम् ।
का त्वं त्रस्त[१०]समुद्भ्रान्तमृगशाव[११]विलोचने[१२] ॥८॥
कः पिता तेनवद्याङ्गि का वा[१३] माता तवानघे ।
किमर्थं वा वसस्यत्र[१४] गिरौ दानवसेविते ॥९॥
एवमुक्ताथ मूकेन महायोगा सुरेश्वरी ।
विज्ञाय मनसा कालं प्राप्तं शुंभनिशुंभयोः ॥१०॥
स्मितपूर्वमिदं प्राह वाक्यं वाक्यविशारदा ।
मानुषीं मां विजानीहि गिरावस्मिन् कृतालयाम् ॥११॥
आत्रेयः स्वर्गतो विद्वान् पिता चक्रचरो[१५] मम ।
विहाय मां पुरो बालां माताप्यनुगता पतिम् ॥१२॥

१...स्सदा - घ. । २ शिशिरे नीनतोयदम् - ख., शिखरं नीनतोयदम् - घ. । ३ पुन.संस्थाप्य विधिवत् सर्वांस्ते- घ.। ४ रम्ये - क । ५ स्वेन - ख. घ. । ६ दिव्याभरणभूषिताम् - ख. । ७ प्रधानोयं - घ. । ८ वपुषस्तस्य - घ. । ९ तां वाचमिदमाह - घ. । १० त्वमत्र - घ. । ११ शावक - घ. । १२ लोचना - घ. १३ का च - घ., माता वा कस्तव - ख. । १४ किमर्थमागतास्यत्र - ख. । १५ चक्रधरो - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

आज्ञप्तास्मि तदा मात्रा प्रदायास्त्राणि दानव ।
वस विन्ध्ये गिरौ रम्ये योगं[१६] च कुरु सर्वदा ॥१३॥
साहं वचनमार्यायाः[१७] पालयन्ती नगोत्तमे ।
वसामि सिंहशार्दूल मातङ्गमृगसेविते ॥१४॥
इति देव्या वचः श्रुत्वा मूकः[१८] संहृष्टमानसः ।
जगाम दानवश्रेष्ठं शुम्भं द्रष्टुं कृतत्वरः ॥१५॥
अथ शुंभं समासाद्य हर्षेणोत्फुल्ललोचनः ।
आचचक्ष इवाकारैरपूर्वं रत्नदर्शनम् ॥१६॥
तं दृष्ट्वा विस्मयोत्फुल्लं रक्तायतविलोचनः[१९] ।
मूकमाह तदा शुंभः कस्मात्तुष्टोसि दानव ॥१७॥
एवमुक्तः स शुंभेन मूको वचनमब्रवीत् ।
अपूर्वमद्य दृष्टं मे स्त्रीरत्नं शिखरे गिरेः[२०] ॥१८॥
न तादृशी मनुष्येषु न देवेष्वपि[२१] सुन्दरी ।
न रक्षस्सु[२२] न यक्षेषु न गन्धर्वपुरेषु वा ॥१९॥
न नागेषु न सिद्धेषु न दैत्यपतिवेश्मसु ।
दृष्टपूर्वा मया राजन् यादृशी सा[२३] वरांगना ॥२०॥
का त्वं कस्य किमर्थं वा वससीह गिराविति[२४] ।
पृष्टाब्रवीन्मया वाक्यमात्रेयदुहिता ह्यहम् ॥२१॥
वसामि चात्र[२५] विन्ध्यस्य शिखरे मातुराज्ञया ।
इति भर्त्तुः समाख्याय विरराम स दानवः[२६] ॥२२॥
अथ शुंभस्य हृदये मूकस्य वचसा सह ।
कामोवकाशमकरोद्विनाशाय सुरद्विषाम् ॥२३॥
ततः प्रोवाच दैत्येन्द्रः कामाकुलितमानसः[२७] ।
गच्छ मूक मदर्थे तां[२८] प्रलोभय सुमध्यमाम् ॥२४॥

---

१६ योग्यं - घ., योज्यां - क, .. द्यां - ख. । १७ ...माद्यया: - घ. । १८ ऋत: (दूत:?) - ख. ।
१९ विस्मयोत्फुल्लरक्तान्तायतलोचनम् - घ । २० गिरौ - क. ख. । २१ देवेष्वस्ति - क. ।
२२ राक्षसेषु - घ. । २३ यादृशा तादृशा - क. ख. । २४ गिरावपि - क. ख. । २५ चित्रे - घ. ।
२६ विरेमे मूकदानव: - क. ख. घ. । २७ समाकुलितमानस: - घ. । २८ त्वं - ख., न - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एवमुक्तः स शुंभेन द्रुतमुत्थाय दानवः ।
प्रययौ यत्र सा देवी प्रागनेनाभिलक्षिता ।।२५।।
तं दृष्ट्वा दानवं देवी कृताञ्जलिमुपस्थितम् ।
किमर्थमागतोसीति मूकं पृष्टवती तदा ।।२६।।
एवं पृष्टोथ कौशिक्या प्राहेत्थं मूकदानवः ।
आर्ये दूतोस्मि शुम्भस्य त्वत्समीपमुपागतः ।।२७।।
अथ देवी स्मितं कृत्वा प्रसन्नमभिवीक्ष्य तम् ।
इत्थमाहागतं दूतं[२९] किं स आहा[३०]सुरेश्वरः ।।२८।।
इति पृष्टस्तदा देव्या प्राह मूकः कृताञ्जलिः ।
आर्ये दैत्येश्वरः शुंभः पत्नीत्वेन वृणोति ते ।।२९।।
तस्य दानवसिंहस्य जेतुःशक्रस्य संयुगे ।
भवाग्र्या सर्वपत्नीनां पत्नी मृगविलोचने ।।३०।।
एवमुक्ता तदा तेन विहस्याहामरेश्वरी[३१] ।
स्वबाहूनवलोक्येत्थं युद्धशुल्का[३२]मवेहि माम् ।।३१।।
मां विनिर्जित्य दैत्योसौ पत्नीं वै कर्तुमर्हति ।
मया वा निहतो[३३] यातु काकगोमायुभक्ष्यताम्[३४] ।।३२।।
एवमुक्तवतीं देवीमाह मूको हसन्निव ।
पत्या दानवदैत्यानां किं ते युद्धेन भामिनि ।।३३।।
क्रुद्धस्य यस्य[३५] समरे न शशाक निरीक्षितुम् ।
मुखमैरावतस्कन्धगतोपि बलवृत्रहा ।।३४।।
श्रुत्वा तद् वचनं तस्य प्राह देवी स्मयन्निव[३६] (?) ।
तृणानि मम दैत्येन्द्राः सर्वेपि रणमूर्धनि ।।३५।।
निवेदयस्व शुंभस्य गच्छ त्वं दानवाधम ।
दौत्येनासि यतः प्राप्तो मयातो[३७] न विहन्यसे ।।३६।।

---

२९ किम्मा... - ख. । ३० किमाहासौ - क., दानवोसौ - ख. । ३१ महेश्वरा - क., ...मरेश्वरा - ख. । ३२ स्त्रान् वाहूनरजोक्याहनर्देहि - क. । ३३ विनिहतो - ख. । ३४ भोज्यताम् - क. ख. । ३५ तस्य - क. ख. । ३६ स्मयादिव(?) । ३७ त्वं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ प्रणम्य तां मूको ययौ पार्श्वं सुरद्विषः ।
अनुज्ञातश्च तेनासावाख्यातुमुपचक्रमे ॥३७॥
सा मया प्रार्थिता कन्या त्वदर्थे[३८] दानवोत्तम ।
उवाच युद्धशुल्कास्मि जित्वा मां नेतुमर्हसि ॥३८॥
भूयश्चोक्तवती राजन् गर्वमालम्ब्य साङ्गना ।
तृणानि मम संग्रामे दैत्या इति सविस्मया ॥३९॥
तत्तदा वचनं तस्या मूकेनोक्तं निशाम्य सः ।
क्रोधाद्दर्पाच्च कामाच्च ममृषे नासुरोत्तमः[३९] ॥४०॥
अथोत्थाय सभां रम्यामगच्छद्दानवाधिपः ।
स्फाटिकस्तम्भनिर्व्यूहां[४०] विचित्रमणितोरणाम्[४१] ॥४१॥
तस्यां[४२] सिंहासने हैमे स्वास्तीर्णे महति स्थिरे ।
निषसाद महाबाहुः सुखायां[४३] वरुणो यथा ॥४२॥
अनु तस्य निशुंभोपि निषसाद वरासने ।
रत्नाङ्गदांशुनिवहच्छुरितोरःस्थलस्तदा ॥४३॥
तयोरनु महासत्वा विविशुर्दैत्यदानवाः ।
दरीं हिमवतो रम्यां वारिश्यामा[४४] इवाम्बुदाः ॥४४॥
अथ तेषूपविष्टेषु दैत्यदानवराजसु ।
प्रोवाच वचनं शुम्भो घनस्तनितनिस्वनः ॥४५॥
आरक्षिको गिरौ विन्ध्ये मदीयो मूकदानवः ।
विन्ध्यस्य शिखरे कन्यां दृष्टवान् चारुरूपिणीम् ॥४६॥
युद्धशुल्काहमित्याह[४५] मदर्थेनेन[४६] सार्थिता[४७] ।
तृणानि मम दैत्येन्द्रा भूयश्चोक्तवती किल ॥४७॥
जित्वा तां प्रसभं कन्यां समरे गर्वशालिनीम् ।
विचेष्टमाना[४८]मवशामद्यैवानेतुमुत्सहे ॥४८॥

---

३८ त्वदर्थं - ख. । ३९ क्रोधो दर्पश्च कामश्च समं सर्वे (र्वं) समुत्थितम् - ख. । ४० निर्व्यूहे - क., निर्यूहे ख. । ४१ ...मणितोरणे - क., ... णं - ख. । ४२ तस्मिन् - ख. । ४३ भूषितो - ख. । ४४ करिश्यामा - क., सविद्युतः - ख. । ४५ युद्धशौल्किकमित्याह - ख. । ४६ मदर्थेनेह - ख. । ४७ श्राविता - क., सा वृता - ख. । ४८ विवेष्टमाना - क., विवेष्टचमाना - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ तस्य वचः श्रुत्वा शंभुर्नाम महासुरः ।
प्रहस्योच्चैर्महाबाहुरिदमाहासुरेश्वरम् ।।४९।।
वामप्रकृतयः सर्वाः स्वभावेन वराङ्गनाः ।
परिसान्त्व्यासकृद् राजन्[४९] तां त्वमादातुमर्हसि ।।५०।।
श्रुत्वाथ वचनं शम्भोर्मयो दानवसत्तमः ।
प्रोवाचाभिनवोत्फुल्लनीलनीरजलोचनः ।।५१।।
आकारः कः पुनस्तस्याः का वा चेष्टासुराधिप[५०] ।
पार्श्वस्थानि च कान्यस्याः सदोपकरणानि वा ।।५२।।
इत्युक्तवति दैत्येन्द्रे मये मनोभवविक्रमे ।
अथ दैत्यपतिर्मूकं पार्श्वस्थं समचोदयत् ।।५३।।
यं प्रश्नं पृष्टवाँस्तत्र मयो मतिमतां वरः ।
मूकस्तु तं तदा सर्वमाख्यातुमुपचक्रमे ।।५४।।
सदा सुसंस्थिता त्र्यक्षा करालदशनानना ।
अष्टबाहुर्घनश्यामा सुनासा[५१] वल्गुनिस्वना[५२] ।।५५।।
सार्श्वस्थानि सदा तस्याः सर्वप्रहरणानि[५३] च ।
तनुत्राणि च मुख्यानि चित्राण्याभरणानि च ।।५६।।
अत्यादित्यं वपुस्तस्याः कान्तिश्चातिनिशाकरा[५४] ।
इत्याख्याय तदा मूको विरेमे दैत्यसंसदि ।।५७।।
अथ दीर्घं विनिःश्वस्य तदा मयमहासुरः ।
प्रोवाच सदसि[५५] स्वन्तं वचो वचनकोविदः ।।५८।।
नूनमुत्पादिता देवैः कृत्या युधि पराजितैः ।
विन्ध्यं महीध्रमायाता विनाशाय सुरद्विषाम् ।।५९।।
तदलं ते तया राजन् सन्ति कन्याः सुमध्यमाः ।
दीर्घाक्ष्यश्चारुसर्वाङ्ग्यो दैत्यदानववेश्मसु ।।६०।।

---

४९ गर्वं - क. । ५० वद मूक महामते - घ. । ५१ सुरसा - ख. । ५२ वल्गुभाषिणी - ख. ।
५३ सर्वप्रकरणानि - क., सदोपकरणानि - घ. । ५४ निशाकरं - क ख. । ५५ वचसि - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सम्यगाहृत्य ता राजन्ननुरूपाः कलस्वनाः ।
यथेष्टं क्रीड सततं प्रासादोदरसंस्थितः[५६] ॥६१॥
एवमुक्ते तदा वाक्ये मयेनासुरसंसदि ।
प्राह वाक्यं तदा शुम्भो विहस्येत्थं महासुरः ॥६२॥
यदि सा दैवतैः[५७] सृष्टा कृत्या[५८] दानवशासने ।
अहत्वा दानवानाशु तदा सा न विरंस्यते[५९] ॥६३॥
यावदेव न[६०] कृत्यास्मानभियुंक्ते कृतोद्यमा ।
तावदेव प्रसह्याशु तां वशे कर्तुमर्हथ ॥६४॥
ततोनुमेनिरे सर्वे दैत्यदानवसत्तमाः ।
वचनं दैत्यराजस्य कालेनाभिप्रचोदिताः ॥६५॥
अथ सदसि समस्तान् दैत्यसिंहाँस्तदानीं
त्रिदशपतिविजेता वाक्यमेतद् विहृत्य[६१] ।
उदपतदवलम्बिस्वच्छशुभ्रोरुहारो
नवजलभरनम्रः प्रावृषीवाम्बुवाहः[६२] ॥६६॥

⊙ इति स्कन्दपुराणे (महदर ?) संवादे त्रिषष्टितमोध्यायः ⊙

सनत्कुमार उवाच

आहत्य भेरीः सन्नह्य[१] दितिजा दानवाश्च ते ।
तदा सन्नाहयामासू[२] रथनागतुरङ्गमान् ॥१॥
गृहीततोयानानीथ ततो दैत्या मतङ्गजान्[३] ।
मदस्फातिकरान् दत्वा धूपाँश्च कवलानि च ॥२॥
तथा कक्षाश्च[४] सन्नाह्या ग्रैवेयाँश्च सुसंस्कृतान् ।
अंकुशान् सर्वलोहाँश्च हेमरत्नपरिष्कृतान् ॥३॥

५६...संस्थिताः - क.,...संस्थितं - क. । ५७ देवतैस्तदा - क. ख. । ५८ कन्या- क. । ५९ सापि विरंस्यति - ख. ।
६० ... न्न - क. । ६१ ...विजेतुर्वाक्यमेतद् विधृत्य - क. । ६२ उदपतनविलम्ब्य स्वच्छशुभ्रोरुहारन्नवजलधरनम्रा प्रावृषेवाम्बुवाहः - क., उदपतदथ शुंभः स्वच्छशुभ्रोरुहारो नवजलधरमत्तः - घ., प्रावृषीवाम्बुधारा - ख. ।
१ सन्नाह्याः - क. । २ सन्नाहमायासू - क. ख. । ३ दैत्येयान्मत्तदिग्गजां (न्) - क. । ४ कक्ष्याश्च - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

करेणुषु समारूढाः समन्ताद् गजसादिनः ।
आबबन्धुर्विचित्राणि वर्माणि विधिवत्तदा ॥४॥
तिर्यगूर्ध्वमुखान् सम्यग्[५] बबन्धुस्तोमरेषुधीन् ।
आयुधानि च सर्वाणि बबन्धुरुभयोरपि ॥५॥
पार्श्वयोरासनानां तु त्रयाणामपि भागशः ।
वैजयन्तीपताकाश्च समुच्छिश्रियिरे ततः ॥६॥
तुरङ्गान् स्नातपीतांश्च वर्मिणो बद्धबालधीन् ।
आरूढा[६] बद्धनिस्त्रिंशा[७] दानवा लोहजालिनः ॥७॥
आरूढा रथिनः केचिद् रथान् युक्ततुरङ्गमान् ।
सायुधान्सपताकांश्च प्रशस्तान् स्वक्षकूबरान् ॥८॥
अथ शुंभो निशुंभश्च भ्रातरौ दानवेश्वरौ[८] ।
आरुह्य बद्धकवचौ बलोन्मत्तौ महासुरौ ॥९॥
सांग्रामिकौ सुसंयत्तौ रथौ वलगत्तुरङ्गमौ[९] ।
सायुधौ सपताकौ च कार्त्तस्वरमयौ पृथक् ॥१०॥
निर्जग्मतुर्महोरस्कौ प्रयुक्तजयमङ्गलौ ।
मागधैर्वन्दिभिः सूतैः स्तूयमानौ पुरःसरैः ॥११॥
ततो यातुं समारब्धास्तूर्याण्याहत्य संघशः ।
यत्रास्ते कौशिकी देवी तं शैलमभितोसुराः ॥१२॥
अथ दानवसिंहानां ध्वजाः पेतुर्ययासताम् ।
अशिवञ्च शिवा नेदुर्दीप्तायां दिशि संस्थिताः ॥१३॥
पपात नभसो रेणुः कपोतोदरधूसरः ।
उपरिष्टाच्च सेनाया बभ्रमुर्गृध्रवायसाः ॥१४॥
प्रतीपञ्च ववौ तेषां रजोगर्भः समीरणः ।
ररास परुषं व्योम चचाल च वसुन्धरा ॥१५॥

---

५ मथो सम्यग् - ख. । ६ आरुढां (न्) - क. । ७ ... शा (न्) - क. । ८ देवकण्टकौ - क. । ९ वल्गुतुरङ्गमौ - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पराजयनिमित्तानि बुध्यमाना: सुरद्विषः ।
अभिजग्मुः कृतान्तेन कृष्यमाणा इवावशाः ॥१६॥
आदिदेशाथ दैत्येन्द्रो मूकमारक्षिकं तदा ।
गृहाण शुल्कमिति तां ब्रूहि गत्वा सुमध्यमाम् ॥१७॥
स गत्वा वचनात्तस्य प्रणम्योवाच कौशिकीम् ।
शुल्कं किल गृहाणार्ये दीयमानं सुरद्विषा ॥१८॥
एवमस्त्विति सा प्रोच्य तं विसृज्य च दानवम् ।
व्यवर्धत महायोगा योगमास्थाय कौशिकी ॥१९॥
अथ तस्याः समुत्पेदु[10]र्गात्रेभ्यः प्रमदोत्तमाः ।
बद्धगोधांगुलित्राणाः सायुधा भीमदर्शनाः ॥२०॥
वायसी वायसास्यानां स्त्रीणां कोटया[11] समावृता[12] ।
उपका[13]कोकिला[14]स्याभिस्तावतीभिर्महाबला ॥२१॥
प्रचण्डा सिंहवक्त्राभिर्देवीभिरभिसंवृता ।
उग्रा[15] व्याघ्रमुखाभिश्च परितः परिरक्षिता ॥२२॥
जया च गजवक्त्राभिर्जयन्ती[16] च महाबला ।
देवीभिः शिखिवक्त्राभिरमेया[17]भिर्वृतानघा ॥२३॥
जयमाना[18]श्ववक्त्राभिर्हंसास्याभिः प्रभावृता[19] ।
प्रभावती च चक्राह्ववदनाभिर्महाबला ॥२४॥
शिवा गोमायुवक्त्राभिरशिवा विद्विषां रणे ।
सरमा श्वमुखीभिश्च[20] वृता परमदुर्जया ॥२५॥
विजया श्येनवक्त्राभिः सर्वतः परिरक्षिता ।
कंकास्याभिर्वृता मृत्युर्हन्त्रीभिः समरे रिपून् ॥२६॥
नियतिर्मद्गुवक्त्राभि[21]र्दुर्जयाभिः परैर्युधि ।
अशनिः[22] कुक्कुटास्याभिर्बह्वीभिरभिनादिता[23] ॥२७॥

---

१० समुत्पेतु... - ख. । ११ कोटचः - ख. । १२ समाश्रिताः - ख. । १३ उलूका (?) । १४ कौशिका... - ख. ।
१५ उषा - क. । १६ ...मंहाबलः - ख. । १७ रामया - क. । १८ जयमाला - ख. । १९ ...स्समावृता - क. ।
२० सुमुखीमिश्र - ख. । २१ नियती मद्गुवक्त्राभि - क. । २२ शकुनिः - ख. । २३ ..रभिपालिता - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

रेवती वृषदंशा च पूतना कटपूतना ।
आलम्बा[२४] किन्नरी षष्ठी शकुनिर्मुखमण्डिका[२५] ॥२८॥
अलक्ष्मीरधृतिर्लक्ष्मीः पोतकी वानरी स्पृहा[२६] ।
एताश्चान्याश्च कौशिक्याः संबभूवुर्महाबलाः ॥२९॥
नानावेषधराभिश्च बह्वीभिः परितो वृता ।
बिभ्रतीभिर्विचित्राणि कवचान्यायुधानि च ॥३०॥
ससर्ज कौशिकी तूर्णं[२७] हैमान्सांग्रामिकान् रथान् ।
युक्तानश्वैर्मनोवेगैः सायुधानुच्छ्रितध्वजान् ॥३१॥
वाजिनःसोपकरणान् मदोन्मत्तान्[२८]मतङ्गजान् ।
आयुधानि तनुत्राणि तूर्याणि विविधानि च ॥३२॥
उवाच च महायोगा ता देवीः[२९] पुरतः स्थिताः[३०] ।
देव्यः शुंभो निशुंभश्च भ्रातरौ देवकण्टकौ ॥३३॥
नेतुं मां[३१] किल संग्रामे विजित्य रणमूर्धनि ।
आगतौ तौ बलोन्मत्तौ सहितौ दैत्यदानवैः[३२] ॥३४॥
तावहं[३३] विनिहंस्यामि शेषान् हत सुरद्विषः ।
अजराश्चामराश्चैव भविष्यथ महाबलाः ॥३५॥
इति ताभ्यो वरं दत्त्वा समादिश्य च तास्तदा[३४] ।
देवीर्देवी महाभागा युद्धाय कृतनिश्चया[३५] ॥३६॥
अथ सा स्वरथं महारथं[३६] मनसाचिन्तयदच्युता तदा ।
तमुपस्थितमाशु चिन्तितं प्रददौ यं गिरिराजनन्दना ॥३७॥
ज्वलदग्निसमानवर्चसं परितो रत्नमयूखमालिनम् ।
पुरतः समवेक्ष्य कौशिकी सुकृतं हेममयं नभश्चरम् ॥३८॥
विविधायुधवर्मसंयुतं प्रचलत्पिङ्गसटाकलापिभिः ।
समरे जयिभिर्द्विषद्बलं[३७] युक्तं केसरिभिर्महाबलैः ॥३९॥

२४ अलक्ष्मीः - ख. । २५ मुखमण्डिता - क. । २६ स्मृता - ख. । २७ सिंहं(शीघ्रं ?) - क. ।
२८ मन्नोन्मत्तान् - क. ख. । २९ देवी - क. ख. । ३० स्थिता - क. ख. । ३१ मे - क. ।
३२ शशिसूर्य (I) इवा वभौ - ख. । ३३ तानहं - क. । ३४ ततः पुनः - ख. । ३५ कृतनिश्चयाः - क. ।
३६ साश्वरथं महारथा - ख. । ३७ ...द्विषां बलं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नृत्यन्मयूरेण विकीर्णभासा समुच्छ्रितेनातितरां दृढेन ।
हैमेन रत्नद्युतिभास्वरेण ध्वजप्रवेकेण विराजमानम् ॥४०॥

जग्राह विजया छत्रं सिंही सूता तदाभवत् ।
जयन्ती च जया चास्या दधतुश्चामराण्यथ ॥४१॥

ततः सा बद्धकवचा विविधायुधधारिणी ।
आरुरोह रथं दिव्यं कृताशीर्जयमङ्गला[३८] ॥४२॥

संपूर्णचन्द्रद्युतिनाथ मूर्ध्नि समुच्छ्रितेनातपवारणेन ।
संवीज्यमाना च विचित्रदण्डैः सुचामरैरिन्दुमरीचिगौरैः ॥४३॥

ततस्तास्तूर्यमाहत्य नेदुर्नादान् पृथग्विधान् ।
देव्या देव्यः सुसंयुक्ता[३९] बभूवुश्च पुरस्सराः ॥४४॥

तेन नादेन दैत्यानां हृदयानि चकम्पिरे ।
विससर्ज शकृन्मूत्रं हस्त्यश्वञ्चासुरे बले ॥४५॥

चकम्प इव भूर्लोकश्चुक्षुभुः सागरा इव ।
विचेलुरिवशैलेन्द्राः पूरितं व[४०] नभस्तलम् ॥४६॥

तदा तद्देवतानीकं पताकाध्वजशोभितम् ।
विरेजे विनदत्तूर्यं सितनिस्त्रिंशसंकुलम्[४१] ॥४७॥

बलाकापंक्तिशबलं सेन्द्रचापं महास्वनम् ।
नभस्ये मासि सतडिद् वृन्दं जलमुचामिव ॥४८॥

ततो जगाम संयच्छद्[४२] दैत्येन्द्राभिमुखं तदा ।
जवेन देवतानीकं संक्षिप्येव दिशो दश[४३] ॥४९॥

अथ ददृशुरनीकमागतं सुररिपवो विविधोच्छ्रितध्वजम् ।
प्रतिभयजननं महास्वनं प्रलय इवाम्बुदवृन्दमुन्नतम् ॥५०॥

⊙ इति स्कन्दपुराणे शुम्भनिशुम्भयुद्धे सैन्यवर्णनं नाम चतुःषष्टितमोध्यायः ⊙

---

३८ कृतार्था जयमङ्गला - ख. । ३९ सुसंयत्ताः - ख. । ४० प्रस्फोटेत - ख., पूरितेनेव - क. ।
४१ शितनिस्त्रिंशसंकुलम् - ख. । ४२ संयत्तां - ख. । ४३ ददर्श ह - ख., दशो दिशः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

अथ ता देवताः क्रुद्धा दैत्यानग्रेसरांस्तदा ।
निजघ्नु[१]र्विविधैः शस्त्रैस्ते च ता विभिदु[२]र्युधि ॥१॥
दैत्या नानायुधोपेता देवीर्जघ्नु[३]स्तदा[४] रणे ।
अबला[५] बलिनो वीराः[६] समरेमरविद्विषः ॥२॥
तुरङ्गिणस्तुरङ्गस्थाः पदातींश्च[७] पदातयः ।
रथिनो रथसंस्थाश्च गजस्था[८] गजसादिनः[९] ॥३॥
रथा[१०] नागास्तुरङ्गाश्च[११] रथान्[१२]नागान् तुरङ्गमान् ।
पदातीः[१३] सादिनः शूराः सादिनीश्च[१४] पदातयः ॥४॥
देव्योपि युधि संक्रुद्धाः पत्तिसादिरथ[१५] द्विपान् ।
निर्जघ्नु[१६]र्दानवेन्द्राणां प्रासशक्ति परश्वधैः[१७] ॥५॥
पादैश्च पिपिषुः शूरान्निपात्य भुवि दानवान् ।
विभिदुर्मुष्टिभिः काश्चिच्छिरांसि सुरविद्विषाम् ॥६॥
विदार्योरःस्थलं काश्चित् समरे दर्पशालिनाम् ।
पपुश्च रुधिरं देव्यः प्राणैस्सह सुरद्विषाम् ॥७॥
छिन्नांश्च खण्डशः केचिद्[१८] हेतीनुत्थाय[१९] वेगिताः ।
निर्जघ्नु[२०]र्देवताः क्रुद्धा मुष्टिभिर्वज्रसंहतैः ॥८॥
केचिन्मदाम्बुनिष्यन्दश्यामगण्डस्थला गजाः ।
पिपिषुः परमक्रुद्धाः समरे देवतारथान्[२१] ॥९॥
कपोलभित्तिसंलीनमत्तषट्पदपंक्तयः ।
हतारोहा गजाः केचिन्निर्जघ्नुर्दैत्यदेवताः ॥१०॥
वर्मिणः केचिदुद्भ्रान्तशितनिर्स्त्रिंशपाणयः ।
चिच्छिदुर्देवतानीकं देवता दानवानपि ॥११॥

---

१ निर्जघ्नु - क. । २ ताम्बिभिदु... - क., मिमृदुः - ख. । ३ देवीं जघ्नु - क. । ४ भयाद् - ख. ।
५ जवना - घ. । ६ धीराः - क. । ७ पदातीश्च - ख. । ८ गजाश्च - ख. । ९ ...ङ्गजसादिनः - क. ।
१० रत्ना - क. । ११ तुरङ्गाश्च - क. । १२ रथी - क. ख. । १३ पादातीः - क. । १४ सादिनश्च - ख. ।
१५ रथान् द्विपान् - क. । १६ निजघ्नु - क. । १७ प्राशशक्तिपरश्वधैः - क. । १८ काश्चिद् - ख. ।
१९ नुच्छ्राय - ख. । २० निजघ्नु - ख. । २१ देवदानवान् - ख ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मत्ताः प्रतिच्छन्न[२२]मुखाँश्च[२३] केचिद् गन्धेन विज्ञाय गजान्[२४] गजेन्द्राः ।
घ्रात्वा तु गन्धं सहसाभिजघ्नुराधोरणैरप्यभिसंगृहीताः[२५] ॥१२॥
विस्फार्यमाणानि महाधनूंषि महाबलैर्दानवयोधमुख्यैः ।
तारं विरेसुः[२६] समराजिरेषु क्रौञ्चा इव व्योम्नि शरन्निशासु[२७] ॥१३॥
तूर्यस्वनैर्ज्यातलसन्निपातैर्नागाश्वनादै रथनेमिघोषैः ।
संपूर्णकुञ्जोदर[२८]कन्दरोसौ[२९] विन्ध्यश्चचालेव तदा समग्रः[३०] ॥१४॥
देव्यः समुत्सार्य रणे रिपूणामुच्चैर्विनेदुः प्रसभं बलानि ।
नेदुश्च नादान् परिहृष्टचित्ताः प्रोत्सार्य देवीर्युधि दैत्ययोधाः ॥१५॥
बलानि किञ्चित्क्षतजोक्षितानि प्रचक्रिरे तत्र गतागतानि ।
महावनानीव समीरणेन समीरितान्युद्गतपल्लवानि ॥१६॥
छिन्नानि वक्त्राणि पुरस्सराणां विचित्रहैमाभरणोज्ज्वलानि ।
देवीभिराजौ पतितानि रेजुर्निकृत्तनालानि यथाम्बुजानि ॥१७॥
प्रत्याहता विद्रुतभीतनागा सा देवताभिर्निहताश्वयोधा ।
दैत्येन्द्रसिंहैः प्रतिसन्निवृत्तैर्दोलायमानेव चमूर्बभूव ॥१८॥
हता निपेतुः समरे नदन्तो देवद्विषामञ्जनशैलकल्पाः ।
देवीभिराबद्धविचित्रघण्टा मर्मातिगैर्वाणवरैर्गजेन्द्राः ॥१९॥
बलानि तेषामभिसृत्य वेगादभ्याहतान्याश्वपसेरुराजौ ।
महोदधिं प्राप्य विवृद्धिकाले प्रत्याहतानीव सरिज्जलानि ॥२०॥
देव्यश्च दैत्याश्च महासमाजे विरेजिरेन्योन्यविसक्तवाणाः[३१] ।
संसक्तभासोपगमे घनानामभ्रे समूहा इव तारकाणाम् ॥२१॥
उद्घुष्य नामान्यथ[३२] दानवेन्द्रा निर्जग्मुराशु[३३] स्वबलाद्रथस्थाः ।
क्रुद्धाः सुयत्ता रथिनां वरिष्ठा विस्फार्य[३४] चित्राणि शरासनानि ॥२२॥
देव्योपि संयत्ततरा रथस्थाः क्रुद्धा जवेनाथ तदाभिसस्रुः ।
मेघस्वनं प्रत्युदियाय षष्ठी कार्तस्वरं मृत्युरुदीर्णकोपा[३५] ॥२३॥

---

२२ प्रतिच्छिन्न - ख. । २३ मुखाश्च - क. ख. । २४ गजं - क. । २५ ... रस्तुतिसंगृहीताः - ख. ।
२६ विनेदुः - ख. । २७ क्रौञ्चा इव व्योम शरन्निशान्ते - क., व्योमसरा (?), शरद्व्योमशरन्निशान्ते - ख. ।
२८ कुंभोदर - ख. । २९ कन्दरेषु - क. । ३० समग्रं - क. । ३१ विषक्तबाणः - क., विभक्तवाणाः - ख. ।
३२ ...माणान्यथ - क. । ३३ राजौ - ख. । ३४ विस्तार्य - ख. । ३५ ...वेगं - ख.,... वेगा (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

द्रुमेण लक्ष्मीरथ[३६] संयुगस्था[३७]मयेन कान्तिः सरमा मुरेण ।
घनेन चण्डा नियतिः खरेण प्रभावती धुन्धुमयात् सरोषा[३८] ॥२४॥
दैत्या युयुत्सोत्सुकमानसास्ते[३९] देवीः समायास्सभुजैस्सशस्त्रैः[४०] ।
अभ्याययुः शीघ्रममृष्यमाणाः ख्यातावलेपाः स्वरथैस्सुयत्ताः ॥२५॥
ज्योतिःप्रकाशान्तपनीयपुंखानाकर्णपूर्णायतचापमुक्तान् ।
संप्रेषयामासुरदीनसत्वा बाणप्रवेकान्युधि देवतानाम् ॥२६॥
देव्योथ तेषां निशितान्सुपुंखान्मर्मच्छिदो दूरगमान्सुपत्रान् ।
आगच्छतां दानवयूथपानां बाणाननन्तान्ससृजुस्तथैव ॥२७॥
ते बाणमुख्या विविधा विरेजुरन्योन्यमुक्ता व्यतिषज्यमानाः ।
ते पूर्णमास्यां विघने दिनान्ते भासः[४१] समूढा इव[४२] चान्द्रसौराः[४३] ॥२८॥
छिन्ना निपेतुर्युधि देवताभिर्भुजाः सशस्त्रा दितिजाधिपानाम् ।
निरस्तभोगा निबिडा बृहन्तो निगीर्णजिह्वा इव पन्नगेन्द्राः ॥२९॥
मेघस्वनस्याथ रणे तदानीं क्रुद्धा शरौघान्विससर्ज षष्ठी ।
आगच्छतस्तानभितः पृषत्कैश्चिच्छेद दैत्यः शतशोन्तरिक्षे ॥३०॥
बाणानथोद्वीक्ष्य तदा निकृत्तान् लघीयसोन्यान्विससर्ज तूर्णम् ।
दैत्योपि तानापततः पृषत्कान्व्रातैः शराणां बहुशश्चकर्त्त ॥३१॥
निकृत्त्य[४४] बाणान्दितिजः पुनस्तान्[४५] चिक्षेप षष्ठ्या दश रुक्मपुंखान्[४६] ।
तानाशु षष्ठी प्रतिवार्य दैत्यं विव्याध षष्ठ्या तपनीयपुंखैः ॥३२॥
स तैर्विभिन्नो रुधिराक्तमूर्तिः प्रविह्वलः[४७] किंचिदवाग् बभूव ।
अपाकरोत्तं समरात् स्वसूतो[४८] रथेन जाम्बूनदचित्रितेन ॥३३॥
कार्तस्वनः[४९] काञ्चनचित्रपुंखान्[५०]ससर्ज देव्याः[५१] समरे पृषत्कान् ।
चिच्छेद तान् मृत्युरुदारपुंखैरनागता[५२]नेव शराञ्छरौघैः ॥३४॥

---

३६ ...र्युधि - ख. । ३७ संयुजस्थे - ख. । ३८ ..मियाय रोषाद् - ख. । ३९ ययुः सोत्सुकमानसास्ते - क. ।
४० ...त्स भुजैः सहस्रैः - क. । ४१ भासां - क. । ४२ समूह्य - क. । ४३ चन्द्रसौराः - क. ख. ।
४४ विकृत्य - क. । ४५ पुरस्तात् - क. ख. । ४६ रूक्षपुंखान् - क. । ४७ सुविह्वलः - ख. ।
४८ स सूतो - ख. । ४९ कार्तस्वरः - ख. । ५० कार्मुकपञ्चबाणः - ख. । ५१ दैत्याः (त्यः) - ख. ।
५२ ...रनाशयं - ख., ...र्नभोगता (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

छित्त्वा शरांस्तस्य शरैर्विचित्रैर्विव्याध तं वक्षसि पञ्चषष्ठ्या[५३] ।
भिन्नः स तैराशु तथा विरेजे व्योम्न्यर्कपादैरिव[५४] वारिवाहः ।।३५।।
अश्वांश्च तस्याशु जघान मृत्युः पृथक् पृषत्कै[५५]स्तपनीयपुंखैः ।
आप्लुत्य दैत्योथ रथाद्धताश्वात्प्रगृह्य चर्मासिवरञ्च धौतम् ।।३६।।
क्रुद्धो नितान्तायतरक्तनेत्रो वेगेन देवीमभितः ससार ।
तच्चर्म तस्यापततः[५६] शरौघैश्चकर्त्त मृत्युः शतशश्शिताग्रैः ।।३७।।
स कृत्तचर्मावरणो[५७]सुरेन्द्रो निस्त्रिंशमुद्यस्य निशातधारम्[५८] ।
अभ्यद्रवन्मृत्युमभूत्तदानीं खे रोहिणीं मेघ इवाभिविद्युत् ।।३८।।
तमापतन्तं युधि कालकल्पं मृत्युः शरैरुग्रभुजङ्गकल्पैः[५९] ।
जघान मर्मस्वभिलक्षितेषु व्ययोजयच्चासुभिरेनमाशु ।।३९।।
लक्ष्मीर्द्रुमं बाणवरैरजय्या[६०] समाकिरद्वारणराजलीलम्[६१] ।
कर्णान्तमुक्तै[६२]र्निशितैरजिह्मै रणाजिरे चारुसुवर्णपुंखैः ।।४०।।
अजिह्मगास्ते विविधाः सुपत्रिता द्रुमस्य गात्रेषु निपेतुराहवे ।
स तैर्विचित्रैः शुशुभे विषक्तैर्महाद्रुमः पक्षिगणैरिवाश्रितैः ।।४१।।
लक्ष्मीं ततः किंपुरुषाधिपोसौ विव्याध बाणैर्दशभिः सुपुंखैः ।
वक्त्रे स पूर्णेन्दुसमानवक्त्रां बाह्वोः पृथक् चाष्टशतेन[६३] धीरः[६४] ।।४२।।
अचिन्तयन्तीषु[६५]वरान्वरास्या मुखेस्य तीक्ष्णान्निचखान बाणान् ।
अन्यानसंख्यांश्च[६६] पृथक् शरीरे सुपत्रितान् हाटकमृष्टपुंखान्[६७] ।।४३।।
लक्ष्म्यास्ततो दैत्यपतिः शितेन भल्लेन चिच्छेद रथे ध्वजाग्रम्[६८] ।
अश्वांश्च तस्याश्चतुरश्चतुर्भिः सूतं च विव्याध शरेण तूर्णम् ।।४४।।
नाराचमादाय ततोस्य लक्ष्मीर्जघान सूतं युधि देवशत्रोः ।
विव्याध वाहांश्च पृथक्पृषत्कैर्ध्वजञ्च चिच्छेद रथस्य[६९] तूर्णम् ।।४५।।

---

५३ ...शष्ठ्याः - ख. । ५४ यथार्कपदैर्दिवि (?) । ५५ पृथक्तै - क. ख. । ५६ तमन्तकस्यापततः - ख. ।
५७ सत्कृत्य - क., कृत्तचर्मावदनो - ख. । ५८ निशीतधारैः - क., निशीतधारां - ख. । ५९ ...तुल्यैः - क. ।
६० ...रजय्यं - ख. । ६१ वारणराजलीला - क. । ६२ ...कृष्टैः (?) । ६३ पृषत्काष्टशतेन - क. ।
६४ वीरः - ख. । ६५ अचिन्तमानेषु - क. । ६६ अनेकसंख्यांश्च - क. । ६७ ...पृष्टपुंखान् - ख. ।
६८ रथध्वजाग्रे - ख. । ६९ रथेतथाष्टौ - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यन्त्रा विना तस्य रथं तदानीं ते सायकैरप्रतिमैः प्रतप्ताः[७०] ।
संग्रामभूमेरपनिन्युरश्वाः[७१] प्राणानिव स्वान्[७२] परिरक्षमाणाः ॥४६॥
कान्तिर्मयं बाणशतैरवाकिरन्मयश्च कान्तिं निशितैः शरौघैः ।
नीहारपातैरिव सान्धकारं तदा[७३] तयोरन्तरमास तत्र ॥४७॥
आदानसन्धानविकर्षणेषु स्थानक्रमप्रग्रहतेजनेषु[७४] ।
शिक्षागुणैस्तावपरस्परेण विशेषयामासतुराजिमध्ये ॥४८॥
कान्तिर्मयास्तान्निचकर्त बाणान्मयश्च कान्त्या विशिखान्विसृष्टान् ।
छिद्रं समासेदतुरप्रधृष्यौ किञ्चिन्न तौ यत्र[७५] परस्परस्य ॥४९॥
अश्वेषु सूते सरथे[७६] ध्वजे च सर्वेषु गात्रावयवेषु चास्य[७७] ।
अजिह्मगान् हाटकमृष्टपुंखान्[७८]मयस्य कान्तिर्निचखान बाणान् ॥५०॥
मयश्च कान्तिं सरथां[७९] ससूतां[८०] सचारुचित्रध्वजवाजिमुख्याम् ।
संछादयामास शितैः पृषत्कैर्वनस्थलीं मेघ इवाम्बुवर्षैः ॥५१॥
क्रुद्धाथ कान्तिः समरे मयस्य नाराचमुख्येन सुपत्रितेन ।
सूतं जघानाशु रिपोस्तदानीमष्टाभिरष्टौ[८१] तुरगांश्च बाणैः ॥५२॥
हताश्वसूतो विरथो[८२] मयोथ निस्त्रिंशमादाय निशातधारम्[८३] ।
ज्ञात्वैव कान्त्याः समरे प्रभावं विहाय युद्धं वियदुत्पपात ॥५३॥
विव्याध तीक्ष्णैः सरमा रणाजिरे बाणैर्मुरं दानवदैत्ययूथपम् ।
दैत्योपि बाणैः सरमामजिह्मगैरभ्याहनद् गृध्रमयूरपत्रिभिः ॥५४॥
क्रुद्धाथ देवी निशितेन तस्य चिच्छेद भल्लेन धनुर्विचित्रम् ।
अन्यद्धनुः सोथ तदा[८४] गृहीत्वा विव्याध देव्याश्चतुरस्तुरङ्गान् ॥५५॥
ते विह्वलाः शोणितमुद्वमन्तो दैत्येन्द्रबाणाभिहतास्तुरङ्गाः ।
भूमौ निपेतुः समरे श्वसन्तः प्राणाञ्जहुश्चाशु समं समस्ताः ॥५६॥
क्रुद्धाथ देवी सरमासुरस्य निस्त्रिंशमुद्यम्य सुपीतधारम् ।
उत्पत्य खं तस्य तदा जघान यन्तारमश्वांश्च महाप्रमाणान् ॥५७॥

---

७० सुतप्ताः - ख । ७१ ...राशु - क. ख. । ७२ ...वाश्वाः - क. ख. । ७३ सान्धकारे - ख. । ७४ स्थानग्रहप्रग्रहतेजनेषु - ध. । ७५ तत्र - ख. । ७६ सूतेषु रथे... - ख. । ७७ ...वात्र - क. । ७८ पृष्टपुंखान् - ख. । ७९ सरथं - क. ख. । ८० ससूतं - क. ख. । ८१ रथं तथाष्टौ - घ. । ८२ हताश्वसूताद्विरथो - क., ससूतं सरथं - ख. । ८३ निपीतधारम् - क. । ८४ शीघ्रतरं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मुरोथ वेगेन तदान्तरिक्षमुत्पत्य कोपान्निहताश्वसूतः ।
विव्याध देवीं दशभिःसुतीक्ष्णैः[८५] शरैरुरस्युग्रभुजङ्गकल्पैः ॥५८॥
अचिन्तयित्वा सरमा शराँस्तान्[८६] धनुर्विचिच्छेद तदा मुरस्य ।
स कृत्तधन्वा वियतीन्द्रशत्रुरन्तर्दधे संयुगमाशु हित्वा ॥५९॥
विव्याध चण्डा घनमापतन्तं शरैः शिताग्रैर्युधि रुक्मपुंखैः ।
विद्धः स तैर्दैत्यपतिर्बभासे करैरिवेन्दोरसितः पयोदः ॥६०॥
अभ्यद्रवत्तानविचिन्त्य वाणाँश्चण्डां घनः सायकजालवर्षी ।
आगच्छतस्तस्य शरैस्सुपत्रैर्विव्याध चण्डा रथवाजिमुख्यान् ॥६१॥
चिच्छेद दैत्योपि समुच्छ्रिताग्रं ध्वजं तुरङ्गाँश्च जघान देव्याः ।
हित्वा रथौ ताववतीर्य भूमौ[८७] गृहीतचर्मासिवरौ प्रयत्तौ ॥६२॥
विचेरतुर्मण्डलमाजिमध्ये भूमिं तदाग्राङ्गुलिभिः स्पृशन्तौ ।
ताँस्ताँश्च मार्गान्[८८] लघुपादचारौ छिद्रं न चान्योन्यमवापतुस्तौ ॥६३॥
अभिप्लुतोच्चप्लुतसिंहपातान्[८९] निवृत्तकाक्रीडितकोर्ध्वबाहून् ।
खगापयाताभिहतापयातान्[९०] निषण्णकाविद्धशिरोभिघातान्[९१] ॥६४॥
उत्प्लुत्य वेगेन तदाथ तस्य शिरोधरामाशु चकर्त चण्डा ।
स कृत्तमूर्धा निपपात तस्यां संग्रामभूमावुरसाशु दैत्यः ॥६५॥
स शोणितादिग्धवपुस्तदानीं घनः परासुः पतितो धरण्याम्[९२] ।
रराज सन्ध्याच्छुरितोरुमूर्त्तिर्वियद्गतो नील इवाम्बुवाहः[९३] ॥६६॥
विव्याध तीक्ष्णैर्नियतिः सुपत्रैः खरं शरैर्वक्षसि हेमपुंखैः ।
आयोधने संमुखमापतन्तं भल्लेन चास्य ध्वजमुच्चकर्त[९४] ॥६७॥
विद्धः स तैरभ्यपतन्सरोषो देवीं जिघांसुः समरेरिहन्ता ।
गुर्वीं गदां चाशु तदा गृहीत्वा चिक्षेप देव्या रुधिराक्तमूर्त्तिः ॥६८॥
सा दानवाग्र्येण गदा[९५] प्रमुक्ता[९६] विचित्रहेमोज्ज्वलचारुघण्टा ।
संचूर्णयामास रथं नियत्याः[९७] सूतं ध्वजं चाशु[९८] समुच्छ्रिताग्रम् ॥६९॥

---

८५ शिताग्रैः - क. । ८६ सरोषा - ख. । ८७ भूमिं - क. ख. । ८८ मात्रां - क. । ८९... यातान् - क. ।
९० ...पथानामिहृतापयातान् - क. ९१ शताभिघातान् - ख. ९२ धरित्र्यां - ख. । ९३ नीच इवम्बुवाहः - क. ।
९४ ...माचकर्त - ख. । ९५ तदा - क. । ९६ प्रयुक्ता - ख. । ९७ नियन्त्री (म्) - क., नियन्ता - ख. ।
९८ चारु - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

उत्पत्य तूर्णं नियतिः स्ववाहात्[९९] क्रोधेन संरक्तविलोलनेत्रा ।
अभ्येत्य तं दानवयोधमुख्यं खड्गेन मध्येस्य शिरः पफाल ॥७०॥
स दानवो विस्फुटितोत्तमाङ्गः क्षितौ विरेजे स्रुतरक्तधारः ।
वज्रेण भिन्नः शिखराग्रदेशे गिरिर्यथा धातुरसप्रवाही ॥७१॥
प्रभावती धुन्धुमजिह्मयातैः शिलीमुखैरभ्यहनत्सुपत्रैः ।
उरस्युदारा[१००] दशभिः शिताग्रैर्घनाघनव्रातसमानवर्णैः[१०१] ॥७२॥
जघान सा षोडश देवतारेस्तुरङ्गमान् षोडशभिः पृषत्कैः ।
निहत्य चैकेन रथेस्य[१०२] सूतमेकेन चास्य ध्वजमुच्चकर्त ॥७३॥
धुन्धुर्गदां भारसहस्रगुर्वीं चिक्षेप[१०३] कार्तस्वरचारुघण्टाम् ।
तामापतन्तीं शतशश्चकर्त्त प्रभावती दैत्यपतिप्रमुक्ताम्[१०४] ॥७४॥
आदाय दैत्यः परिघं[१०५] महान्तमाप्लुत्य[१०६] वाहादभितः ससार ।
देवीमसा[१०७]वञ्जनशैलनीलो रणाजिरे काल इवात्तदण्डः ॥७५॥
अभ्यापतन्तं युधि दानवेन्द्रं देवी शरैरभ्यहनत् सुपत्रैः ।
देव्या[१०८] समस्तानविचिन्त्य बाणानभ्येत्य तामाहवमूर्ध्नि रोषात् ॥७६॥
उद्भ्राम्य वैवस्वतदण्डकल्पं लौहं प्रयस्तं[१०९] परिघोरुबाहुः ।
न्यपातयत्तं परिघं रथेस्या गिरेर्नितम्बे कुलिशं यथेन्द्रः ॥७७॥
अचूर्णयत्तं रथमाशु देव्याः साश्वं ससूतध्वजहेमचक्रम् ।
कालायसोसौ परिघोसुरास्तो वेगेन तत्रापससार देवी[११०] ॥७८॥
दृष्ट्वा स तां तत्र तदापयातां तमेव लौहं परिघं गृहीत्वा ।
अभ्यद्रवद् दानवयोधमुख्यो दिवीव चित्रामसितः[१११] पयोदः ॥७९॥
उत्पत्य सा दिव्यवरास्त्रमुक्तैः क्षुरप्रमुख्यैः परिघञ्चकर्त ।
उद्यम्य मुष्टिं निबिडं ततोस्या भूयोथ[११२] दैत्यो वियदुत्पपात ॥८०॥

---

९९ स्ववाहोः - क. । १०० उरःसुधारा - ख. । १०१ घनेन प्रातःसु समानवर्णैः - ख. । १०२ रथस्य - क, रथे स - ख. । १०३ चिच्छेद - ख. । १०४ प्रयुक्तां - ख. । १०५ दैत्यस्परिघं - क. । १०६ ...मासन्न् - क. । १०७ समा - क. ख. । १०८ देव्याः - क. । १०९ प्रयन्ता (त्तः?) - क. । ११० देवीं - क. । १११ ...वसितः - ख. । ११२ भुजेथ - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तं मर्मगैर्मर्मसु बाणमुख्यैः संताडयद्दानवमाशु देवी ।
भिन्नः स तैर्मर्मगमैः सुपुंखैरन्तर्दधे दानवयोधमुख्यः ॥८१॥

अथ समरमवास्य योधमुख्यै-
र्विहतपराक्रमपौरुषैरपेतैः[113] ।
सुरपतिरिपवो विनद्य नादान्
द्विरदवरानधितस्थुरात्तशस्त्राः ॥८२॥

⊙ इति स्कन्दपुराणे शुंभनिशुंभसंग्रामे देवीयुद्धं नाम पञ्चषष्टितमोऽध्यायः ⊙

सनत्कुमार उवाच

देव्योऽपि तेषां विदितप्रयत्ना गजोत्तमानारुरुहुः सयत्नाः[1] ।
शुचीन्मदाम्बुस्रवतः[2] सुदन्तान् प्रशस्तगात्राम्बरहस्तपक्षान्[3] (?) ॥१॥
सुपुष्करानुन्नतवृत्तकुम्भान्[4] सुबालधीनञ्चितचारुकर्णान् ।
सुदन्तवेष्टान् कलविङ्कनेत्रान्सुवक्षसः स्वासनपृष्ठवंशान् ॥२॥
साङ्ग्रामिकानग्रजवान्[5] वयःस्थान्सुशिक्षितानुन्नतपूर्वकायान् ।
आबद्धवर्मायुधचित्रघण्टान्[6] समुच्छ्रितोरुध्वजवैजयन्तीन् ॥३॥
तासां पताकाध्वजशोभितानि विचित्रनानायुधभूषणानि ।
मातङ्गवृन्दानि तदा बभूवुर्वने वनानीव समागतानि ॥४॥
दैत्यादि ते वारणमूर्ध्नि षण्णा[7] विस्फारयन्तो विबभुर्धनूंषि ।
सेन्द्रायुधाः साशनिशब्दगर्भाः शैलेषु मेघा इव सन्निलीनाः ॥५॥
सैन्यानि तान्याहनने गजानामाधोरणैराश्वभिचोदितानि ।
अन्योन्यमापेतुरभीरितानि[8] वातेन वृन्दानि यथा घनानाम्[9] ॥६॥
वेगेन नागानभिसृत्य नागा मदान्मदश्यामसुखान्विषाणैः ।
लोहाभिनद्धैर्विसकाण्डगौरैःशम्बूकदेशेष्वभिजघ्नुराजौ[10] ॥७॥

---

११३ ...रुपेतैः - क. ख. ।

१ समन्तात् - क., प्रमत्तान् - ख. । २ शुचिर्मदा वर्ष्मवतः - क., आविर्मदावद्धवतः - ख. । ३ प्रशस्तगात्राम्बरतः सुहस्तान् - ख. । ४ वृक्षकुम्भान् - क. । ५ ...नुग्रजवान् - क. । ६ चर्मायुधचित्रघण्टान् - क. । ७ घण्टा - ख. । ८ समीरितानि - क. ९ घनाघनानाम् - ख. । १० ...रभिजघ्नुराजौ - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रसार्य हस्तानभितश्च केचिद्दानानुगन्धं द्विरदाभिसेरुः ।
आधोरणैरङ्कुशपाशवाग्भि[११]रविध्यमानापि मदाभिदृप्ता:[१२] ॥८॥
छिन्नानि पेतुर्निशितैः क्षुरप्रैः समुच्छ्रितान्यातपवारणानि ।
चित्राः पताका विविधा ध्वजाश्च परस्परेणाहनने गजेभ्यः[१३] ॥१३॥
योधा निपेतुः परिनिष्टनन्तो विद्धाः शरैर्मर्मसु देवताभिः ।
सफेनमास्यै[१४] रुधिरं वमन्तो धनूंषि सज्जानि[१५] करैर्दधानाः ॥१०॥
नागा निपेतुः[१६] परितोभिपद्य[१७]मर्मातिगै[१८]र्बाणवरैर्विभिन्नाः ।
देवीभिराजौ दितिजाधिपानां वाताभिनुन्ना इव गण्डशैलाः ॥११॥
मातङ्गमुख्यान्पतितान् परासून्[१९] रणाजिरे नीलगिरीन्द्रकल्पान् ।
गन्धेन नागाः समदाः[२०] परीत्य विनम्य केचिद्[२१] वदनैर्विनेदुः[२२] ॥१२॥
छिन्नानि वक्त्राणि सकुण्डलानि भुजास्सशस्त्राश्च[२३] सुचन्दनाक्ताः ।
पेतुर्गजेभ्योसुरयूथपानां देवीभिराजौ निशितैः क्षुरप्रैः[२४] ॥१३॥
चुकूजुरुच्चैः परितो धनूंषि विनेदुराहत्य सुरारिमुख्याः ।
विपुस्फुरुर्ज्याः परिकृष्य मुक्ताः शराभिविद्धाश्च[२५] गजा निषेदुः ॥१४॥
नागैः पतद्भिर्विशिखाभिविद्धैः समुच्छ्रितोरुध्वजचारुपृष्ठैः ।
आस्तीर्यते भूरनिलप्रनुन्नैः सतालवृक्षैरिव शैलपादैः ॥१५॥
नागा गजानाहननेभिजघ्नु[२६]र्दैत्याश्च देवीर्दितिजाँश्च देव्यः ।
दैत्यान् गजेन्द्रा द्विरदाँश्च दैत्याः क्रुद्धाः[२७] सरोषानभिसृत्य तत्र ॥१६॥
शस्त्राभितप्तैः पतितैस्समन्तान्मातङ्गवृन्दैर्गिरिसानुकल्पैः ।
सञ्चारयोग्या न बभूव भूमिरायोघने दैवतदानवानाम् ॥१७॥
अभ्यर्दितानि स्वबलानि दृष्ट्वा देवीभिराजौ निहतद्विपानि ।
शुम्भो निशुम्भश्च समाजभूमिमाजग्मतुर्दैत्यपती रथस्थौ ॥१८॥
अग्रेसरैः पत्तितुरङ्गनागैर्व्रातैश्च देवद्विषतामुपेतौ ।
विस्फारयन्तौ धनुषी विचित्रे युद्धाय यत्तौ परिघोरुबाहू ॥१९॥

---

११ ...राविध्यमानापि - क,...रासि ... - ख. । १२ ...भिमदाविदृप्ताः - क. ख.,...पि मदावदृप्ताः - ख. ।
१३ गजाश्च - क. । १४ ...न्सै - क. । १५ सज्यानि - ख. । १६ निपेदुः - क. । १७ ...पद्या - क. ख. ।
१८ पद्यातिगै - क. । १९ गतासून् - क. । २० समदान् - क. । २१ किंचिद् - क. ख. ।
२२ ...द्विरेदुः - क. । २३ स - क. ख. । २४ निशितक्षुरप्रैः - क. । २५ शरातिविद्धाश्च - क. ।
२६ जग्मु - क. । २७ क्रुधा - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ज्ञात्वा तयोरागमनं तदानीं देवी चलत्पिङ्गलकेशराढ्यान् ।
सञ्चोदयामास रथस्य सिंहान् विस्फारयन्ती समरे धनूंषि ॥२०॥
ज्यानिं जवस्याथ तुरङ्गमाणां मदप्रमोषञ्च महाद्विपानाम् ।
चेतोविमोहं सुरविद्विषां च चापस्वनेनैव[२८] चकार देवी ॥२१॥
आजौ समास्थाय परं प्रयत्नं शराः सुराणां रिपुभिः समस्ताः ।
अप्राप्य देवीं पतिताः पृथिव्यां पराजयं प्राहुरिवासुराणाम्[२९] ॥२२॥
गभस्तिभिः स्थाबरजङ्गमानि व्याप्नोति यद्वत् सविता दिनेषु ।
तद्वच्छरौघैर्दितिजाधिपानां रणाजिरे व्याप बलानि देवी ॥२३॥
निपेतुराशु व्यसवस्तुरङ्गमा विचस्खलुर्मत्तगजाः क्षरन्मदाः ।
चकम्पिरे योधवराः सुरद्विषां समं[३०] समस्ताः समरे शराहताः ॥२४॥
अर्चिर्भिरिद्धैर्ज्वलितो यथानलः कक्षाणि शुष्काणि दहत्यवारितः ।
दीप्तैः शरोघैः[३१] समरेमरद्विषां सैन्यानि तद्वत् प्रददाह कौशिकी ॥२५॥
छायां[३२] यथा स्थावरजंगमानां मध्यन्दिनेल्पां[३३] कुरुते विवस्वान् ।
देवी तथा तां ध्वजिनीं रिपूणामल्पावशिष्टां समरे चकार ॥२६॥
आहूय देवीमथ दानवाधिपौ विस्फार्य चापे महती भिसेरतुः ।
तीक्ष्णैः सुपत्रैर्विशिखैश्च कौशिकीं संछादयामासतुराहवाजिरे ॥२७॥
चापेषु यत्तौ[३४] हरिषु ध्वजेषु महाभुजौ क्रोधपरीतचित्तौ ।
दैत्येश्वरौ संयति देवताया निचख्नतुर्वाणवरान्सुपत्रान् ॥२८॥
दैतेश्वरास्तानथ सायकौघानचिन्तयित्वा रिपुदर्पहन्त्री[३५] ।
विव्याध दैत्यौ[३६] युधि रुक्मपुखैः[३७]स्सुपर्वभिर्वाणवरैस्सुपत्रैः ॥२९॥
दैत्यावपीषूनविचिन्त्य[३८] शूरौ गदे प्रगृह्योज्ज्वलचारुघण्टे ।
उद्भ्राम्य[३९] यत्नातिशयेन देव्या रणाजिरे चिक्षिपतुर्बृहत्यौ ॥३०॥

---

२८ चापस्वनेनेव - क. । २९ वाहुरिवासुराणाम् - ख. । ३० समाः - ख. । ३१ शरैः सा - ख. ।
३२ छाया - क. ख. । ३३ मध्ये दिनेल्पां - ख. । ३४ यस्त्यान् - क., यन्त्रां - ख. । ३५ ...हर्त्री - क. ।
३६ बाणान् - ख. । ३७ रूक्षपुंखैः - क. । ३८ दैत्याबपीष्टन्न विचिन्त्य - घ., तौ न विचिन्त्य - ख. ।
३९ उद्गम्य - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ते व्योम्नि बाणैश्शतशो निकृत्य सुपर्वभिर्हाटकचारुपुंखैः ।
विच्छेद देवी कवचे विचित्रे तयोः क्षुरप्रैरपरैः शिताग्रैः ॥३१॥
जघान चाश्वानथ सारथी च[४०] ध्वजौ च चित्रौ रथयोश्चकर्त्त ।
चखान चान्यानपि सत्पृषत्कान् सुरद्विषो मर्मसु हेमपुंखान् ॥३२॥
शुंभो निशुंभश्च रथावपास्य[४१] दैत्येश्वरौ बाणवराभितप्तौ ।
आदाय निस्त्रिंशवरौ तदानीमुत्पेततुर्व्योम शितासिनीलम् ॥३३॥

अथ नभसि विमेघे धौतनिश्त्रिंशनीले
द्रुततरमभिसृत्य ग्रीवयोः संप्रगृह्य ।
दितितनयपती तौ[४२] निष्पिपेषाशु देवी
विगतभयविषादैः स्तूयमाना मुनीन्द्रैः ॥३४॥
असृगथ वदनाभ्यामुद्वमन्तौ सफेनं
सपदि विहतवीर्यौ[४३] पिष्टसर्वाङ्गसन्धी ।
असुभिरपगतैस्तौ रक्तपर्यन्तनेत्रौ[४४]
क्षितितलमभितस्तौ पेततुर्दैत्यसिंहौ ॥३५॥

⊙ इति स्कन्दपुराणे शुंभनिशुंभनिपातनं नाम षट्षष्टितमोऽध्यायः ⊙

सनत्कुमार उवाच

आजग्मुः कौशिकीं द्रष्टुमथ विन्ध्यं दिवौकसः ।
आदित्या वसवो रुद्रा मरुत्वान् मरुतोऽश्विनौ ॥१॥
धर्मा[१]ङ्गिरोशनो[२]दक्षवसिष्ठभृगुकश्यपाः[३] ।
पुलस्त्यपुलहागस्त्यसनकात्रिसनन्दनाः[४] ॥२॥
अप्सरोयक्षगन्र्वाः[५] सिद्धा नागा महोरगाः ।
उपवेदाश्च यज्ञाश्च वेदा[६] विद्या सरस्वती ॥३॥

---

४० रथसारथींश्च - क. । ४१ रथावपात्य - ख. । ४२ दितितनयपतिभ्यां - ख. । ४३ विहितवीर्यौ - क. । ४४ पर्यस्तनेत्रौ - क. ।

१ धर्मो - ख. । २ उशना - क. ख. । ३ ...काश्यपाः - क. । ४ .. स्सनन्दनाः - क. । ५ गन्धर्व... - क. । ६ देव (वेद?) - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

समुद्राः सरितः शैलास्तीर्थानि विविधानि च ।
मातरो लोकपालाश्च नक्षत्राणि ध्रुवो ग्रहाः ॥४॥
अथोचुर्देवता देवीं[७] द्युतिमत्यो महाद्युतिम् ।
प्रहृष्टा हृष्टमनसा[८]मासीनामसुरद्विषः[९] : ॥५॥
दानवेन्द्रौ महासत्वौ त्वया त्रैलोक्यकण्टकौ ।
निघ्नत्या देवि लोकानां दुःखशल्यमपाकृतम् ॥६॥
ऋषयः पावनं देवि हविर्जुह्वति साम्प्रतम् ।
छन्दांस्यधीयते चोच्चैराचरन्ति व्रतानि च ॥७॥
यज्ञोयमधुना विप्रैरिज्यते[१०] बहुदक्षिणः ।
उटजेषु च विश्वस्ता मुनयः शेरते सुखम् ॥८॥
आसते[११] निर्भया देवि[१२] सन्तः सन्मार्गमाश्रिताः ।
आविर्भूतः पुनर्लोके विच्छिन्नः सत्क्रियापथः[१३] ॥९॥
लोकपालाः शिरांस्युच्चैस्त्वत्प्रसादाच्च बिभ्रति ।
पृक्तः पुष्परजोभिश्च सुखो वाति समीरणः ॥१०॥
जलानि देवि सरितः स्वच्छानि शिशिराणि च ।
त्वत्प्रसादान्महायोगे[१४] वहन्ति विगतक्लमाः ॥११॥
इदानीञ्च पुनर्जाता गिरयो गिरिजात्मजे ।
विज्वराः शिशिरस्वादुनिर्झरोदकवाहिनः ॥१२॥
फणान्[१५] स्वस्तिकचक्राङ्कानुच्चैर्दधति भोगिनः ।
उदन्वन्तश्च[१६] विश्वासादिदानीं सुखमासते ॥१३॥
भ्रमन्त्यप्सरसो देवि त्वत्प्रसादाच्च सांप्रतम् ।
सच्चेतोविमले व्योम्नि[१७] विलासालसलोचनाः ॥१४॥
सिद्धाङ्गनाश्च सेवन्ते विश्वस्ता देवि सांप्रतम् ।
शिखरेषु महीध्राणामुत्फुल्लान् चन्दनद्रुमान् ॥१५॥

---

७ ...र्देवदेवेन्दु - ख. । ८ हृष्टमनस (?) । ९ ...मसुरद्विषाः - क., ... षं - ख. । १० रीज्यते - ख. । ११ आसाते - क. । १२ देवी - क. । १३ स क्रियापथः - ख. । १४ महासत्वा - ख. । १५ फणाः - क. ख. । १६ उदन्वतश्च - क. ख. । १७ विमलव्योम्नि - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्वभावान्मधुपानाच्च रक्तोत्पलविलोचना:[१८] ।
विचरन्त्यधुना यक्षा गन्धमादनसानुषु ।।१६।।
सुखं बिभर्त्ति वसुधामिदानीं विगतक्लमः[१९] ।
शेषः फणैः स्व[२०]रत्नांशुवितानपरिवेषिभिः ।।१७।।
माता त्वमसि लोकानां भीतानामभयप्रदा ।
वृणु[२१] देवि वरानिष्टानभिषिच्यस्व चाच्युते ।।१८।।
एवमुक्ता सुरैर्देवी प्राह किञ्चित् स्मयन्निव ।
इच्छामि पितरं द्रष्टुमसमग्रेन्दुमौलिनम्[२२] ।।१९।।
सुप्रसन्नं प्रसन्नाच्च जननीं शैलनन्दनाम् ।
पितृभ्यां चाप्यनुज्ञाता[२३]मभिषेक्ष्यथ मां ततः ।।२०।।
एवमुक्ताः सुरा दध्युरव्यग्रमनसस्तदा[२४] ।
सपत्नीकं महादेवममितद्युतिपौरुषम् ।।२१।।
अथ ते ददृशुर्देवा देवदेवमुमापतिम् ।
तेजसामिव सर्वेषां संघातं पुरतः स्थितम् ।।२२।।
जटानां प्रान्तबभ्रूणां शिरसा भारमुन्नतम् ।
बिभ्राणं[२५] ज्वलितं[२६] वह्निं दीप्तानामर्चिषामिव[२७] ।।२३।।
कर्पूरभङ्गगौरेण स्नातं पुण्येन भस्मना ।
प्रान्तहेमलताजालं रौप्यं गिरिमिवोच्छ्रितम्[२८] ।।२४।।
तेजसा स्वेन तेजांसि तिरयन्तं[२९] दिवौकसाम् ।
मध्यन्दिने प्रदीपानामर्चींषीव दिवाकरम्[३०] ।।२५।।
सुधाम्बुस्यन्दिनीं[३१] तन्वीमेकतः[३२] परिवेषिणीम्[३३] ।
दधानं[३४] मौलिना किञ्चित्कुटिलामैन्दवीं कलाम् ।।२६।।

---

१८ रक्तशैवललोचनाः - क., रक्तशैलविलोचनाः - ख. । १९ विगतक्लमैः - क. । २० स्वै - (?) ।
२१ शृणु - ख. । २२ ...महमघेन्दुमौलिनम् - घ. । २३ चाभ्यनुज्ञाता - (?) । २४ ...मनसा तदा - क. ख. ।
२५ विभ्रमाणं - ख. । २६ ज्वलितो - क. ख. । २७ वह्निर्दीप्तानामर्चिषामिव - क. ख. । २८ ...त्थितम् - ख. ।
२९ तिरस्कुर्वन् - क. ख. । ३० दिवाकरः - क. ख. । ३१ सुधाम्भः स्यन्दिनीं - ख., ... स्यन्दिनीं - क. ख. ।
३२ ...रेकतः - क., एकतः - ख. । ३३ परिवेषिणी - क. ख. । ३४ दधानां - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

त्रिजिह्वामुज्ज्वलां[३५] गुर्वीं धूसरां भस्मरेणुना ।
सैंहीं वसानमालम्बा[३६]मीषद्भुङ्गवतीं[३७]त्वचम् ।।२७।।
छुरितोपान्तकायेन[३८] फणरत्नमरीचिभिः[३९] ।
महता भोगपतिना वक्षःस्थलविसर्पिणा ।।२८।।
भवानीं[४०] चास्य पार्श्वस्थां दीप्यमानां स्वतेजसा ।
वसानामंशुकं रक्तं कल्पपादपसंभवम् ।।२९।।
मन्दारमालामुत्फुल्लां मत्तालिकुलसेविताम् ।
दधानामुत्तमाङ्गेन स्वरेणूत्करपिञ्जराम् ।।३०।।
स्वःशिल्पिघटितै[४१]श्चित्रै रत्नांशुपरिवेषिभिः[४२] ।
शातकुंभमयैः श्लाघ्यैर्भूषितां भूषणोत्तमैः ।।३१।।
बिभ्रतीं रुचिरां शुद्धां शरच्चन्द्राशुनिर्मलाम् ।
शिरोधरेणामहतीमेकावलिमनुत्तमाम् ।।३२।।
अथोत्थाय सुरास्सर्वे कौशिकी चानतानना ।
तयोश्चरणपद्मेषु निपेतुस्तुष्टमानसाः ।।३३।।
अथोद्वीक्ष्य महादेवः कौशिकीमिदमब्रवीत् ।
अजेया सर्वभूतानां महायोगा महाद्युतिः ।।३४।।
विचरिष्यसि लोकाँस्त्वं सर्वत्राप्रतिघातिनी ।
इमाश्च देवताः सर्वास्त्वत्प्रसादादनिन्दिते ।।३५।।
भक्त्या बल्युपहारैश्च पूजयिष्यन्ति[४३] मानवाः ।
वरदा चापि भक्तानां भविष्यसि सदानघे ।।३६।।
अभिषिच्यस्व च क्षिप्रं सुरैरसुरसूदनि ।
कृत्स्नं रक्ष च भूर्लोकं[४४] पूज्यमाना सदाव्यये ।।३७।।
शर्वाणी च परिष्वज्य मूर्ध्नि चाघ्राय कौशिकीम् ।
प्राह प्रीता महाभागा[४५] मत्प्रभावाद्[४६] भविष्यसि ।।३८।।

---

३५ विजिह्वनगरां - क., विजिह्वां तु - ख. । ३६ वसानमालम्बी - क. । ३७ रजोवती - ख. ।
३८ छुरितोपान्तकायेन - क. । ३९ नखरत्नमरीचिभिः - क. । ४० भवानीं - क. । ४१ सुशिल्पिघटितै - क, स्वशिल्पिघटितै - ख. । ४२ परिवेष्टितैः - क. । ४३ पूजन्ति त्वां तु - ख. । ४४ भूलोकं - ख. ।
४५ प्राप्वः पिता महाभार्या - ख. । ४६ मत्प्रसादाद् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अर्चयन्ति यथा मां च सुरा यक्षा महोरगाः ।
गन्धर्वा मुनयः सिद्धास्तथा त्वामप्यनिन्दिते ॥३९॥
अर्चयिष्यन्ति सर्वत्र भक्ताः स्तोस्यन्ति चाव्यये ।
एवं तस्यै वरं[४७] दत्त्वा गिरिजावृषभध्वजौ ॥४०॥
नमस्कृतौ[४८] तदा देवैरन्तर्दधतु[४९]रव्ययौ ।
अथेन्द्रो विश्वकर्माणमादिदेश तदा प्रभुः ॥४१॥
सुधर्मेव सभा दिव्या क्रियतामिह साम्प्रतम् ।
ऋतूँश्च सर्वांस्तत्रेत्थमादिदेश शतक्रतुः ॥४२॥
नानापुष्पोत्करैःक्षिप्रं भूमिः सम्यग् विभूष्यताम् ।
क्षुपगुल्मलतावृक्ष[५०]पुष्परेणुसुगन्धयः ॥४३॥
आक्षिपन्तो मनांस्यत्र सुखा वान्तु समीरणाः ।
सिञ्चन्तु वारिभिः पुण्यैर्विन्ध्यप्रस्थं पयोमुचः ॥४४॥
तारं नदन्तु शिखिनः प्रहृष्टाः सर्वतोदिशम्[५१] ।
नृत्यन्तु परितश्चित्रान्दर्शयन्तः[५२] पृथग्विधान् ॥४५॥
रसान्भावान्विलासाँश्च सर्वेप्यप्सरसां[५३] गणाः ।
प्रतिसार्या सुवीणाश्च गन्धर्वा मधुरस्वरम्[५४] ॥४६॥
लयतालसमं गेयं[५५] गायन्तु च समन्ततः[५६] ।
आहन्यन्तां समन्ताच्च देवदुन्दुभयो भृशम् ॥४७॥
पाणिभिः कठिनैस्तूर्णं[५७] चित्ररूपा महास्वनाः ।
मन्दानिलसमुद्‌धूता लीनालिकुलपंक्तयः ॥४८॥
पतन्त्वस्मिन्प्रदेशे च दिव्याः कुसुमवृष्टयः ।
उच्छ्रियन्तां समन्ताच्च[५८] पताकाश्चित्रमूर्तयः[५९] ॥४९॥

---

४७ वरान् (?) । ४८ नमस्कृत्वा - ख. । ४९ देवीरन्तर्धे च - ... ख. । ५० लतावृक्षाः - ख. । ५१ ..दिशः - ख. । ५२ दर्शयन्तः - क ख., दर्शयन्तु - क. । ५३ चाप्सरसां - क. ख. । ५४ ...स्वनाः - क, स्वराः - ख. । ५५ जयतालसमं - क., ऋष्यतालसमा - ख. । ५६ समं तत इति वा छेदः । ५७...स्तूर्यं - क. ख. । ५८ पताकाश्च - ख. । ५९ समन्ताच्चित्रमूर्तयः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ध्वजाश्च विविधाकारा हेमदण्डाः सुसंस्कृताः ।
अथाशु निर्ममे[६०] तत्र विश्वकर्मा महाद्युतिः[६१] ॥५०॥
नानारत्नोज्ज्वलस्तम्भां विचित्रमणिवेदिकाम्[६२] ।
वज्रस्फटिकनिर्यूहां जाम्बूनदमयीं शुभाम् ॥५१॥
इन्द्रनीलोरुसोपानां[६३] मुक्तादामावलम्बिनीम्[६४] ।
सध्वजां सपताकां च[६५] घण्टास्वन[६६]निनादिताम्[६७] ॥५२॥
तपोनियमयज्ञानां साक्षात् सिद्धिमिवोद्गताम्[६८] ।
भिन्नकालानि पुष्पाणि ददृशुर्देवतास्तदा ॥५३॥
समं सुपुण्यगन्धीनि[७६] विचित्राणि बहूनि च ।
पुष्पकिञ्जल्कगर्भाश्च सुखस्पर्शाः सुगन्धयः ॥५४॥
नादयन्तो मुहुर्घण्टा ववुस्तत्र समीरणाः ।
प्रजगुः[७०] सुरगन्धर्वा ननृतुश्चाप्सरोगणाः ॥५५॥
ऋषयस्तुष्टुवुर्गीर्भिः पुण्याभिः कौशिकीं तदा ।
सर्वरत्नौषधैर्गन्धैः पूर्णाः पुण्यैश्च[७१] वारिभिः ॥५६॥
आनीतास्तत्र कलशा हेमरत्नमयाः शुभाः ।
पद्मरागमयैः सिंहैश्चतुर्भिर्वज्रकेशरैः[७२] ॥५७॥
उच्छ्वसद्भिरिव श्रीमदुह्यमानं हिरण्मयम्[७३] ।
सर्वरत्नप्रभाजालखचितोपान्तमण्डलम् ॥५८॥
कल्पयामास देव्याश्च विश्वकर्मा वरासनम् ।
स्तुतिभिर्जयशब्दैश्च स्तूयमाना समन्ततः ॥५९॥
ऋषिभिर्देवताभिश्च देवदेवसुता ततः ।
तस्मिन् सिंहासने दिव्ये निषसादाथ कौशिकी ॥६०॥

---

६० निर्मिमे - क. ख. । ६१ महाद्युतिं - क. । ६२ विचित्रां मणिवेदिकाम् - ख. । ६३ ...पलासेकां - ख. ।
६४ मुक्तादामार्थलम्बिनीम् - क. । ६५ मपताकाश्च - क. ख. । ६६ स्वर - क. । ६७ विनादिताम् - ख. ।
६८ ...वागताम् - क., ...रिवोद्गतां - ख. । ६९ पुण्यगन्धानि - क. । ७० प्रगीताः - क. ख. ।
७१ पूर्णैश्च - क., पूर्णाश्च - ख । ७२ ...र्वजकेशरैः - ख. । ७३ ...हिरण्य - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कृतस्वस्त्ययना विप्रैः सुहुते[७४] जातवेदसि[७५] ।
वसाना वाससी शुक्ले कल्पद्रुमसमुद्भवे ॥६१॥
मुक्तादामावबद्धाङ्गी शुक्लस्रगनुलेपना ।
ततः सप्तर्षयो विष्णुर्धर्मो यज्ञः प्रजापतिः ॥६२॥
आदित्याः कश्यपो[७६] रुद्रा लोकपाला हुताशनाः ।
शैलेन्द्राः पृथिवी गङ्गा[७७] चन्द्रमा मरुतोश्विनौ ॥६३॥
समुद्रा वसवो लक्ष्मीः सन्ध्या कीर्तिः सरस्वती ।
नागेन्द्रा विहगेशाश्च विविधाश्च सरिद्वराः ॥६४॥
आदाय कलशान् सर्वानभ्यषिञ्चन्त[७८] कौशिकीम् ।
पूर्णेन्दुबिम्बप्रतिमं रत्नदण्डं महाद्युतिम् ॥६५॥
जग्राह विततं छत्रं स्वयमेव शतक्रतुः ।
चामरैर्हेमदण्डैश्च दीर्घैश्चन्द्रांशुनिर्मलैः ॥६६॥
बीजयामासु[७९]रायस्तैर्लोकपालास्तदाव्ययाम् ।
उवाच च ततः श्रीमान् कौशिकीं पाकशासनः ॥६७॥
पाहि कृत्स्नां भुवं देवि भगिनी त्वं ममाव्यये ।
भक्ताननुगृहाणेशे जहि चामरकण्टकान् ।
विचरस्व समस्तांश्च लोकान् सिद्धगणार्चिता ॥६८॥
इति वचनमथोक्त्वा कौशिकीं देवराज–
स्त्रिदशगणसमेतः शुभ्रलोलोरुहारः[८०] ।
उदपतदथ विन्ध्याद्विक्षिपन्व्योम्नि नीलान्
सलिलभरविनम्रानम्बुवाहान्समन्तात् ॥६९॥
य इमं शृणुयान्नित्यं पठेद्वा सत्समागमे[८१] ।
इह लोके सुखं प्राप्य स याति परमां गतिम् ॥७०॥

⊙ इति स्कन्दपुराणे कौशिक्यभिषेको नाम सप्तषष्टितमोध्यायः ⊙

---

७४ हुत्वा वै - ख. । ७५ जातवेदसं - ख. । ७६ आदित्यकाश्यपो - क. । ७७ रुद्रा - क. । ७८ सर्वेभ्यभ्यतिञ्चन्त (?) । ७९ बीज्यमाना... - क. । ८० शुभ्रलम्बोरुहारः - ख., वज्रहस्तोरुवाहः - ब. । ८१ मत्समागमे - ब. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public-Domain. Digitization by eGangotri

सनत्कुमार उवाच

अथ ता देवता देवी कौशिकी देहसंभवाः ।
न्यवेशयन्महाभागा देशेषु नगरेषु च ॥१॥
बहुपुत्रां प्रलम्बां च लङ्कायां सन्न्यवेशयत् ।
लम्बौष्ठीं[1] वृषदंशां च किन्नरीं चैव सिंहले ॥२॥
गोकर्णे रेवतीं देवीं पाण्ड्येषु मुखमण्डिकाम् ।
आभीरेष्वशिवां चैव शान्तिं च वरणातटे ॥३॥
वत्सगुल्मे प्रभां देवीं लक्ष्मीं कोलगिरावपि[2] ।
उपकां पारसीकेषु वायसीं यवनेषु च ॥४॥
प्रचण्डां च तुषारेषु[3] कोशलेषु च लम्बिकाम् ।
जयां च विजयां चैव स्वपुरे संन्यवेशयत् ॥५॥
प्रभावतीं कलिङ्गेषु जयन्तीं नागसाह्वये ।
काश्मीरेषु[4] च सा[5] षष्ठीं सरमां मलयेषु च ॥६॥
पूतनां च सुपीरेषु मृत्युं पृष्टपुरे[6] तथा[7] ।
कोटीवर्षे[8] बाहुमांसां[9] पौण्ड्रेषु कटपूतनाम् ॥७॥
अस्पृष्टां मध्यदेशे तु[10] किन्नरीं बर्बरेषु च ।
वाराणस्यां निरायास्यां[11] चित्रघण्टां च कौशिकीम्[12] ॥८॥
महाकालीं महाकाले वानरीं शबरेषु[13] च ।
शेषाश्च देवताः सर्वा ग्रामेषु नगरेषु च ॥९॥
कर्वटेषु महीध्रेषु कौशिकी संन्यवेशयत् ।
कस्यचित्त्वथ कालस्य स्वर्णाक्षे हि महातपाः[14] ॥१०॥
यत्र विष्णुर्वरं लेभे[15] देवमाराध्य शङ्करम् ।
चक्रं सुदर्शनं नाम द्विषतामन्तकोपमम् ॥११॥

---

१ लम्बोष्ठीं - ख. । २ कौञ्चगिरावपि - घ. । ३ खारेषु - क. । ४ कश्मीरेषु - क. । ५ स्थिता - ख. । ६ पिष्टपुरे - ख. । ७ तदा - क. । ८ ... से - क. । ९ बहुमांसां - क. ख. । १० शु (षु?) - ख. । ११ निरामासां - क. । १२ कौशिकीं (?) । १३ शबलेषु - ख. । १४ स्वर्णाकृति - ख., कृष्णाकृतिर्महातपाः - ग. । १५ वंरांल्लेभे - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ऋषिरास्ते महाभागः शरद्वान्नाम[१६] गौतमः ।
तस्य यज्ञं[१७] जगामाथ देवी तेन निमन्त्रिता ॥१२॥
तस्यास्तत्रागमं ज्ञात्वा सूनुः शुम्भस्य[१८] वीर्यवान् ।
आजगामाशु तं देशं महिषो नाम दानवः ॥१३॥
सुसंहतः पृथूरस्को महाग्रीवः सुबालधिः ।
वक्रशृङ्गः पृथुखुरो[१९] विशालोच्छ्रितमस्तकः ॥१४॥
बद्धवैराशयः क्रूरो[२०] महासत्वोतिदुर्जयः ।
वज्रनिष्पेषपरुषं नर्दमानो महास्वनः ॥१५॥
अञ्जनाद्रिसमप्रख्यो युयुत्सुर्बलदर्पितः ।
देव्याः पन्थानमावार्य[२१] दानवेन्द्रसुतः स्थितः ॥१६॥
विज्ञाय तस्यागमनं योगेशा[२२] विन्ध्यवासिनी ।
जगाम त्वरिता तत्र यत्रासौ दानवाधमः[२३] ॥१७॥
अथ दृष्ट्वा स तां देवीं क्रोधाद्रक्ततरेक्षणः ।
अभ्याजगाम वेगेन यत्नमास्थाय दानवः ॥१८॥
उद्वालधिस्तीक्ष्णविषाणकोटिः सुपीनवक्षाः कठिनोर्ध्वकर्णः ।
अभ्यापतद् गुग्गुलताम्रनेत्रो जवेन देवीमसिताद्रिकल्पः ॥१९॥
तं कौशिकी वीक्ष्य तदापतन्तं दैत्येन्द्रपुत्रं महिषं सरोषम् ।
चुक्रोध ताम्रायतचारुनेत्रा स्थिता धरण्यामसुरेन्द्रहन्त्री ॥ ॥२०॥
अभ्येत्य तां दानवराजसूनुर्बलेन मत्तः परमेण देवीम् ।
अभ्याहनद्वक्षसि लोलहारे शृंगेण शक्रायुधकर्कशेन ॥२१॥
विषह्य तं तस्य तदा प्रहारं जग्राह शृङ्गे महिषं करेण ।
उद्भ्राम्य चोच्चैः परितः सरोषा न्यपातयद् भूमितले श्वसन्तम् ॥२२॥
उद्गृह्य सा बालधिमिन्द्रशत्रोः कृत्वा च पादं शिरसि प्रसह्य[२४] ।
त्रिशूलमादाय बिभेद पृष्ठे व्ययोजयच्चासुभिराशु दैत्यम् ॥२३॥

---

१६ सरस्वान्नाम - घ. । १७ संज्ञां - क. । १८ जम्भस्येति पुराणान्तरसंमतः पाठः । १९ पृथुशिरो - ख । २० क्रुद्धो - क. । २१ ...मावृत्य - ख. । २२ योगेन - ख. । २३ दानवोधमः - ख. । २४ प्रगृह्य - ख., प्रसह्यं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कुलिशकठिनभृङ्गं नीलजीमूतकल्पं
महिषमथ निहत्य प्रौढदर्पन्तदानीम् ।
विविधकुसुमवृष्ट्या[२५] सर्वतः कीर्यमाणा
धरणिधरमगच्छत् कौशिकी सन्निवासम् ॥२४॥

⊙ इति स्कन्दपुराणे महिषासुरवधो नामाष्टषष्टितमोध्यायः ⊙

व्यास उवाच

भगवन् सर्वलोकज्ञ पितामहसमद्युते[१] ।
तपः कृत्वा तदा देवी पुष्कलं हिमवत्सुता ॥१॥
वरं[२] यथेप्सितं[३] लब्ध्वा ब्रह्मणो गौरवर्णताम् ।
किमन्यदकरोद्विप्र तपसोन्ते महामुने ॥२॥
सोमनन्दी च शार्दूलः किमवाप वरं[४] शुभम् ।
एतन्मे पृच्छतो ब्रूहि भक्ताय प्रणताय च[५] ॥३॥

सनत्कुमार उवाच

नमस्कृत्य[६] महादेवं परमं ब्रह्म शाश्वतम् ।
यं पठन्ति सदा सांख्याः[७] पुरुषं पंचविंशकम् ॥४॥
योगिनश्चैव षड्विंशं ब्रह्माद्याश्च दिवौकसः ।
प्रणम्य परया भक्त्या शिरसा तं त्रिलोचनम् ॥५॥
गौर्या समागमो व्यास शङ्करस्य यथाभवत् ।
तत् प्रवक्ष्यामि ते[८] सर्वं शृणु योगविदां वर ॥६॥
तस्मिन् हिमवतः शृङ्गे तपः कृत्वा सुदुष्करम् ।
गौराङ्गी सा तदा भूत्वा शुद्धहेमसमप्रभा ॥७॥
दर्शने शङ्करस्याथ शर्वाणी मतिमादधे ।
मन्दरं गिरिमागम्य सहिता सोमनन्दिना ॥८॥

---

२५ कुसुमवर्षैः (?) ।
१ महाद्युते - क. । २ वरान् - ख. । ३ यथेप्सितान् - ख. । ४ रमं - क., परं - (?) ।
५ प्रणताय प्रियाय च - ख. । ६ नमस्कृत्वा - क. ख. । ७ सांख्यं - ख. । ८ प्रवक्ष्याम्यहं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अपश्यद्भवने भर्तुर्द्वारमूले समास्थितम् ।
नन्दिनं गणपं देवी दीप्तपट्टिशधारिणम् ।।९।।
ततो नन्दीश्वरं दृष्ट्वा भक्तं प्रेम्णा गिरीन्द्रजा ।
एहि वत्स चिराद् दृष्टस्त्वमित्युक्तवती तदा ।।१०।।
नन्दी संप्रेक्ष्य तां चापि गौराङ्गीं हेमसप्रभाम् ।
हर्षेण महता युक्तः पादयोरपतद् भृशम् ।।११।।
प्रणम्य स तदा धीमानस्तुवत् पर्वतात्मजाम् ।
नमः सिद्ध्यै महादेव्यै रतये गतये[९] नमः ।।१२।।
त्वं क्रिया कारणं त्वं च प्रकृतिर्मुक्तिरेव च[१०] ।
कान्तिर्द्युतिस्तथा तुष्टिश्शान्तिः स्वस्त्ययनं[११] परम् ।।१३।।
दक्षिणा नियतिर्मृत्युःसन्ध्या विद्युदहः क्षपा ।
पृथिवी कौशिकी श्रीश्च शर्वाणी शर्वबल्लभा ।।१४।।
गणमाता दितिश्चैव पवित्रा विन्ध्यवासिनी ।
कृष्णा कात्यायनी गौरी भूतमाता तथेश्वरी ।।१५।।
भव देवि प्रसन्ना मे भक्तस्य प्रणतस्य च ।
अथ देवी तदा दृष्ट्वा नन्दिनं पादयोर्नतम् ।।१६।।
प्रोवाच वरदास्मीति स च वव्रे वरं शुभम् ।
प्रसन्नां[१२] नित्यमेव त्वामिच्छामि[१३] वरमुत्तमम् ।।१७।।
एवमस्त्विति सा प्रोच्य[१४] प्रविवेशायतेक्षणा ।
अग्रतोस्या ययौ नन्दी सोमनन्दी च पृष्ठतः ।।१८।।
चन्द्रलेखोभयोर्मध्ये[१५] ग्रहयोरिव सा बभौ ।
दूरादेव समालोक्य देवदेवो मुदान्वितः ।।१९।।
आजगाम महातेजाः संभ्रमोत्फुल्ललोचनः ।
पपात पादयोर्देवी देवदेवस्य धीमतः ।।२०।।

---

९ त(ग)तये रतये - ख. । १० ...र्युक्तिरेव च - ख. । ११ ...स्तुष्टचयनं - क. । १२ प्रसन्ना - क. ख. ।
१३ त्वमेतो (षो?) स्तु - ख. । १४ प्रोवाच - ख. । १५ चन्द्रलेखा तयोर्मध्ये - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ देवस्तदायातां देवीं गिरिवरात्मजाम् ।
समुवाच[१६] सुरश्रेष्ठः समालोक्य मुहुर्मुहुः ।।२१।।
दिष्टयासि[१७] प्रीतवदना[१८] दिष्टया च सफलं तपः[१९] ।
दिष्टया[२०] चेदं[२१] वरं वर्णं गौरं कनकसप्रभम् ।।२२।।
प्रियन्नः[२२] सर्वथा देवि परमं यत्त्वमागता ।
प्रतिज्ञां पूरयित्वेह शार्दूलोयं कुतश्च ते ।।२३।।
एवमुक्ता तदा देवी भर्त्रा प्रणयपेशलम् ।
कथयामास देवाय सर्वञ्चरितमात्मनः ।।२४।।

देव्युवाच

प्रागहं यत्त्वया देव कृष्णवर्णेति भाषिता ।
तदा मन्युपरीताङ्गी गौरवर्णसमीप्सया ।।२५।।
हिमवच्छिखरं गत्वा तपोहं महदास्थिता ।
चिन्तयन्ती सदैव त्वामेकपादेन संस्थिता ।।२६।।
यस्मिन्नेव दिने तत्र तपोहं समुपाश्रिता ।
तस्मिन्नेवैष शार्दूलः सोमनन्दी समागतः ।।२७।।
व्यतिष्ठत महादेव भक्त्या परमया युतः ।
दिव्यं वर्षसहस्रं तत्तपोयुक्ताहमास्थिता ।।२८।।
तावन्तं कालमेषोपि ममातिष्ठत् समीपतः ।
स्तब्धलाङ्गूलनेत्रास्यो निराहारो विलोकयन् ।।२९।।
आगतस्तपसश्चान्ते ब्रह्मा मम[२३] वरप्रदः ।
तमहं पूर्वमस्यार्थे वरं संप्रार्थयं[२४] विभो[२५] ।।३०।।
तेनायममरो देव जराशोकविवर्जितः ।
ममैवानुचरः पार्श्वे कृतो योगी च शङ्कर ।
वर्णं चेदमदान्मह्यं तवादेशात्[२६] पितामहः ।।३१।।

---

१६ तामुवाच - क. ख. । १७ दृष्ट्दा (ष्टा) सि - ख. । १८ प्रीतिवदना - क. । १९ फलसत्तमा (मुत्तमं?) - क. । २० दृष्टया - ख. । २१ देवं - ख. । २२ प्रसन्नः - ख. । २३ मह्यं - ख. । २४ वरमप्रार्थयं - क. ख. । २५ विभोः - क. ख. । २६ तवादेवा (तदा देव?) - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

देवदेव उवाच

परितुष्टोस्मि ते देवि वरं वृणु यथेप्सितम् ।
मृगेन्द्रोयं गणश्रेष्ठः[२७] सोमनन्दी महाबलः ॥३२॥
यादृशो मम नन्दीशस्तादृशस्ते[२८] भविष्यति ।
यद्गन्यद् ब्रूहि तत्सर्वं करिष्यामि तव प्रिये[२९] ॥३३॥

देव्युवाच

यस्मिन्देशे महादेव तपश्चरितमुत्तमम्[३०] ।
तं भूयोपि त्वया सार्द्धं द्रष्टुमिच्छामि शङ्कर ॥३४॥

सनत्कुमार उवाच

एवमुक्तस्स पार्वत्या प्रोवाच परमेश्वरः ।
रोचते चारुसर्वाङ्गि गन्तुं तत्र ममाव्ययें ॥३५॥
रम्यं तद्धिमवच्छृङ्गं तप्तं यत्र तपस्त्वया ।
नन्दिनं स तदाहूय गणपाँश्च सहस्रशः ॥३६॥
जगाम सहितो देव्या हिमवन्तं महागिरिम् ।
देवैर्विद्याधरैस्सिद्धै र्गन्धर्वैर्मुनिसत्तमैः ॥३७॥
वन्द्यमानोसकृद्देवः स्तूयमानश्च सर्वशः[३१] ।
नन्दिनः[३२] पृष्ठमारूढः[३३] प्रक्रीडितगणेश्वरः[३४] ॥३८॥
हिमवद्गिरिमागम्य तं प्रदेशमुपागमत् ।
स तं[३५] शिखरमासाद्य रम्य[३६]धातुविभूषितम् ॥३९॥
तुतोष परमप्रीतो रेमे च सगणेश्वरः ।
आगतं तमथो दृष्ट्वा मूर्तिमानचलस्तदा ।
उपतस्थे महादेवं प्रणिपत्य कृताञ्जलिः ॥४०॥
कृत्वा तदर्घकुण्डन्तु[३७] तस्मिञ्छिखरसत्तमे ।
वरदानेन शैलेन्द्रमन्वगृह्णात्[३८] पिनाकधृक् ॥४१॥

---

२७ गणाः श्रेष्ठाः - ख. । २८ च तादृशस्ते - ख. । २९ प्रियं (?) । ३० तपश्चरणमुन्नमम् - क । ३१ सर्वतः - क. । ३२ नादितं - क., नन्दिनं - ख. । ३३ वृषमारूढः - क. ख. । ३४ प्रक्रीडति गणेश्वरः - ख. । ३५ सितं - क. । ३६ रम्य - क. । ३७ वरदकुण्ठ(?)न्तु - ख. । ३८ ..मनुगृह्णात् - क., ...मनुगृह्य - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अमरो जरया त्यक्तः सर्वदुःखविवर्जितः ।
अभेद्यश्चैव वज्रेण मत्प्रसादाद् भविष्यसि ॥४२॥
पुण्यस्त्वमचलश्रेष्ठ भविता पापमोचनः ।
गौरीशिखर इत्येव लोके ख्यातिं गमिष्यसि ॥४३॥
दूरादेव नगश्रेष्ठ दृष्ट्वा त्वामुच्छ्रितं[३९] जनाः ।
सर्वपापैर्विमोक्ष्यन्ते[४०] यास्यन्ति च परां[४१] गतिम् ॥४४॥
त्रिरात्रमुषितो यस्त्वामभिरुह्य शुचिव्रतः ।
दृष्ट्वा गौरीमथाभ्यर्च्य ब्राह्मणं[४२] तर्पयिष्यति ॥४५॥
नारी वाथ नरो वापि लोकं गौर्याः स यास्यति ।
यश्चेह त्यक्ष्यते प्राणान्नियमेन समाहितः ॥४६॥
स गाणपत्यं संप्राप्य मया सार्धं चरिष्यति ।
गौर्याश्चात्रैव सान्निध्यं सर्वदा ते भविष्यति ॥४७॥

सनत्कुमार उवाच

इत्युक्त्वा तं[४३] नगश्रेष्ठं देवदेवस्त्रिलोचनः ।
पार्वत्या सहितस्तत्र परिचक्राम सर्वतः ॥४८॥
अथापश्यच्छिलां व्यास सौवर्णां मणिभूषिताम् ।
कथयामास तां देव्यै शिलां पश्येति स प्रभुः[४४] ॥४९॥
तमाह देवी देवेशमिह तप्तं मया तपः ।
प्रियमेवं[४५] मम स्थानं सोमनन्दिन एव च ॥५०॥
अथ तामनुजग्राह शिलां प्रीत्या भवस्तदा ।
शुचिरस्यां निराहारं त्रिरात्रं[४६] यः[४७] करिष्यति ॥५१॥
भवेत्तप्तं तपस्तेन लोकञ्च तव यास्यति ।
एकपादेन यो मर्त्यस्तिष्ठेदेकमहः शुचिः[४८] ॥५२॥
तपनाभिमुखो भूत्वा त्वद्भक्तस्त्वत्परायणः ।
सोपि यास्यति ते लोकं गणपश्च भविष्यति ॥५३॥

---

३९ तामुच्छ्रितं - क. ख. । ४० विमोक्ष्यन्ति - क. ख. । ४१ परमां - क. । ४२ ब्राह्मणं - क. । ४३ तमित्युक्त्वा - क. ख. । ४४ सत्प्रभः - क. । ४५ ...मेतन् - ख. । ४६ निराहारः - क. टि., निराहारत्रिरात्रं - ख. । ४७ यत् - क. । ४८ ...च्छचिः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्राणान् परित्यजेद्यश्च शिलायामिह दुस्त्यजान् ।
सोपि तप्ततपा भूत्वा ब्रह्मलोकं गमिष्यति ॥५४॥
इमश्च पर्वतोद्देशमास्पदं सोमनन्दिनः ।
योभिगच्छेदहोरात्रं[४९] सोपि नन्दिसमो भवेत् ॥५५॥
अथापृच्छत् पुनर्देवः पार्वतीं विचरन् प्रभुः ।
कथमेतानि कुण्डानि बभूवुरिह शैलजे ॥५६॥
एवं पृष्टा पुनर्देवी वाक्यमेतज्जगाद ह ।
यदाहमागता देव तपस्तप्तुमिह प्रभो[५०] ॥५७॥
स्तनयोः[५१]प्रस्रुते[५२] धारे महत्यौ मे तदासकृत् ।
एते[५३] ताभ्यां कृते कुण्डे सिततोये महाप्लवे[५४] ॥५८॥
तपस्तप्तुमलङ्कारानहं त्यक्तवती यदा ।
तदा तेभ्यः स्रुता देव जलधारापतद् द्रुतम् ॥५९॥
तया[५५] चेदमपां कुण्डं[५६] द्वितीयं मे कृतं शुभम् ।
ब्रह्मणश्च यदा लब्धं गौरवर्णत्वमुत्तमम्[५७] ॥६०॥
शरीरान्मे तदा देव कृष्णा[५८] कोशी[५९] विनिष्क्रमत्[६०] ।
तस्यां[६१] कोश्यां[६२] समुत्पन्नमेतत् कुण्डं तृतीयकम् ॥६१॥
अस्मिन् प्रदेशे देवेश त्वामभ्यर्च्य यथाविधि ।
हविर्भिर्मन्त्रयुक्ताभिरग्निकार्यं कृतं मया ॥६२॥
इमानि पादपस्थानि वल्कलानि सम्प्रासते ।
इदं कृष्णाजिनं शुभ्रं स्थापितं तत्[६३] पुरा मया ॥६३॥
अथ श्रुत्वा महादेवः पार्वत्या वचनं प्रभुः ।
प्रत्युवाच तदा देवीं प्रीत्या परमया युतः ॥६४॥
स्तनतोयेन यत्[६४] पूर्णे[६५] तव कुण्डे शशिप्रभे ।
स्तनकुण्डेति तेनैते[६६] यास्येते ख्यातिमुत्तमाम् ॥६५॥

---

४९ सोभिगच्छेदहोरात्रं - ख., योधितिष्टेदहोरात्रं(?) । ५० प्रभुः - क. । ५१ तयोस्तु - ख. । ५२ प्रस्नुते(?) । ५३ नमे (इमे?) - ख । ५४ महाह्लदे - ख. । ५५ तदा - क. । ५६ हीदं महत्कुण्डं । ५७ गौरवर्णमनुत्तमं (?) । ५८ कृष्ण - क. ख. । ५९ कौशी - क. । ६० व्यनीष्क्रमत् - क., निरक्रमत् ? । ६१ तस्या (?) । ६२ कोश्याः (?) । ६३ यत् (?) । ६४ ये - क. ख. । ६५ पूर्णं - क. । ६६ तेनैव - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

उपवासी नरो योत्र स्नात्वाभ्यर्च्य च देवताः ।
तर्पयित्वा पितॄन्सर्वान् ब्राह्मणान्भोजयिष्यति ।।६६।।
तद् भवेदक्षयं तस्य गणश्चैव भविष्यति ।
अलंकारात् स्रुता[६७] धारा येयं तव वरानने ।।६७।।
एषालंकारधारेति नाम्ना ख्यातिं गमिष्यति ।
अस्यां स्नात्वा नरो यस्तु पितॄन्संतर्पयिष्यति ।।६८।।
अक्षयं तद् भवेच्छ्राद्धमश्वमेधञ्च विन्दति ।
नीलतोयमिदं यत्तो महत् कुण्डं शुभोदकम् ।।६९।।
नीलकुण्डमिति ख्यातिमेतत् सर्वत्र यास्यति ।
योस्मिन्नियमवान् स्नात्वा तर्पयेत्पितृदेवताः ।।७०।।
तस्याक्षयं भवेत् सर्वं पापेभ्यस्स[६८] प्रमुच्यते ।
मृतश्च स नरो देवि यत्र तत्र यथा तथा ।।७१।।
कौशिक्या विन्ध्यवासिन्या महागणपतिर्भवेत् ।
अग्निकार्यमिह स्नात्वा यः कुर्याद् ब्राह्मणः शुचिः ।।७२।।
अग्निहोत्रं हुतं तेन भवेद् द्वादशवार्षिकम् ।
एवमुक्त्वा महादेवः प्रोत्थाय मुनिसत्तम ।।७३।।
गृहीत्वा पादपस्थानि वल्कलानि तदा प्रभुः ।
नदी भवेति संप्रोच्य चिक्षेप प्रहसन्निव ।।७४।।
तान्यभूवँस्तदा व्यास नदी स्वच्छजला शुभा[६९] ।
तटजैर्विविधैर्वृक्षैर्हंसचक्राह्वशोभिता[७०] ।।७५।।
तामुवाच सुरश्रेष्ठः पुण्यतोयां महानदीम्[७१] ।
चीरेभ्यो निस्सृता[७२] यस्मात् त्वमत्र सरितां वरा ।।७६।।
लोके पुण्यतमा तस्मान्निश्चीरेति भविष्यसि[७३] ।
त्वयि स्नात्वा नरः क्षिप्रं सर्वपापैर्विमुच्यते[७४] ।।७७।।

---

६७ अलंकारस्नुता - ख. । ६८ पापेभ्यश्च - क. ख. । ६९ नदीष्वनुजलाशया - ख. । ७० सेविता(?) ।
७१ सुपुण्यतोयवन्नदीं - ख. । ७२ चीरेभ्यः प्रसृता - क. ख. । ७३ भविष्यति - क. ख. । ७४ ...र्विमोक्ष्यते -क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पितॄन्सन्तर्पयेद्यस्तु श्राद्धं तस्याक्षयं भवेत् ।
कपिलाञ्चात्र यो दद्याद् ब्राह्मणाय समाहितः ॥७८॥
गोसहस्रफलं तस्य भविष्यति वरानने ।
अग्रमारुह्य यस्मात्त्वमत्र तप्तवती तपः ॥७९॥
अग्रारण्यमिति ख्यातिमेतद्यास्यति सर्वतः[७५] ।
महाफलं[७६] महापुण्यं[७७] सर्वसिद्धिप्रदं शुभम् ॥८०॥
पञ्चयोजनसंस्थानं[७८] गौरीशिखरमुत्तमम् ।
इहोपोष्य[७९] शुचिः स्नात्वा[८०] भक्त्या परमया युतः ॥८१॥
देहभेदं समासाद्य विमानस्थो विराजते ।
कृष्णाजिनं महापुण्यं सर्वपापहरं तव ॥८२॥
इदं द्रक्ष्यति यो विप्रः[८१] स्वर्गस्तस्य न दुर्लभः ।
यत्फलं नैमिशारण्ये पुष्करेषु च यत्फलम् ॥८३॥
तदेव लभते देवि दृष्ट्वा कृष्णाजिनं द्विजः ।
वत्स्यामि चैव सततं त्वया सार्धमिह प्रिये ॥८४॥
आवामिह स्थितौ देवि योर्चयिष्यति मानवः ।
आवयोर्गणपो भूत्वा जगत् सर्वं चरिष्यति[८२] ॥८५॥
एवं नगेन्द्रं स तदानुगृह्य मुनीन्द्र सार्धं गिरिराजपुत्र्या ।
देवैस्ससिद्धै रनुगम्यमानः शर्वः पुनर्मन्दरमाजगाम ॥८६॥

⊙ इति स्कन्दपुराणे देवीसमागमे कोशीशिलास्तनकुण्डाजिनगौरी[८३]शिखरवरप्रदानं[८४] नाम ऊनसप्तति[८५]तमोऽध्यायः ⊙

व्यास उवाच

स गत्वा मन्दरं भूयो गिरिपुत्र्या सह प्रभुः ।
यच्चकार महादेवस्तन्मे ब्रूहि महामुने ॥१॥

---

७५ सर्वशः - क. । ७६ महत्फलं - क. ख. । ७७ महत् पुण्यं - क. ख. । ७८संख्यातं - क. ख. ।७९ इहापोष्य - क., इहोपाप्य - ख. । ८० ...स्त्वान्तु - क । ८१ विप्र - ख. । ८२ स विचरिष्यति - क. । ८३ गौर्याः - ख. । ८४ समाप्तं- ख. । ८५ अष्टषष्टि - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

मन्दरं गिरिमागत्य[1] पार्वत्या सहितो हरः ।
रेमे हिरण्मये दिव्ये सर्वरत्नविभूषिते ॥२॥
चारुसोपानसंकीर्णे चित्रपट्टशिलातले ।
तस्मिन् पुरवरे श्रेष्ठे मनसा निर्मिते तदा ॥३॥
गणेश्वरैर्महायोगैर्नन्दीश्वरपुरोगमैः ।
सिद्धैर्मुनिवरैश्चैव सेव्यमानो जगत्पतिः ॥४॥
उवास सहितो देव्या वन्द्यमान[2]स्तथैव च ।
तस्यैवं दीव्यतो व्यास देवदेवस्य धीमतः ॥५॥
सहस्राक्षः शशाङ्कश्च वायुश्चैव तदा गताः ।
समागम्य[3] पुरद्वारं दृष्ट्वा ते नन्दिनं स्थितम् ॥६॥
ऊचुः प्राञ्जलयो भूत्वा शङ्करं सं[4] दिदृक्षवः[5] ।
यथा पश्याम देवेशं नन्दिन् तत्कर्तुमर्हसि ॥७॥
अथ नन्दी समागत्य[6] द्वारमूले समास्थितः ।
शम्भोर्निवेदयामास त्रीन्देवान् तु समागतान् ॥८॥
विशन्त्विति समाज्ञप्ते देवदेवेन नन्दिनि[7] ।
विविशुस्ते त्रयो देवाः शङ्करस्यान्तिकं तदा ॥९॥
प्रणम्य सहितास्तस्थुः पश्यन्तो वरदं विभुम्[8] ।
अथ तान्प्राह लोकेशः शिरोभिः प्रणतान् स्थितान् ॥१०॥
का वः[9] कर्तव्यता देवाः किमर्थं यूयमागताः ।
ब्रूत दास्यामि तत्सर्वं यद्यन्मृगयथामराः[10] ॥११॥
अथ देवः सहस्राक्षो वचः प्रोवाच शङ्करम् ।
हिरण्यकशिपुं हन्तुमसुरेन्द्रं महाबलम् ॥१२॥
यश्चकार वपुर्विष्णुर्नारसिंहं भयानकम् ।
तं हत्वापि स दैत्येन्द्रं विष्णुः परबलार्दनः ॥१३॥

---

१ ...मागम्य - ख. । २ न (न्द) मान - क. । ३ समागत्य - क. । ४ शङ्करस्य - क. ख. । ५ दिदृक्षवा(?)।
६ समागम्य - क. । ७ नन्दिनः - क. । ८ वदनं (विभो?) - ख. । ९ च - ख. । १० मृगयथामराः - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तद्रूपं नैव[११]सन्त्यज्य स्वं वेषमकरोद्[१२] विभो ।
तेन रूपेण देवेश क्रूरेणापि हितेप्सुना ॥१४॥
न वयं निर्वृता भूत्वा त्रासात्तिष्ठाम शंकर ।
स यथा सिंहरूपं तत्परित्यजति माधवः ॥१५॥
प्रसादं नस्तथा कर्तुमर्हसि त्वं सुरोत्तम ।
अथ प्रोवाच तं शक्रं देवदेवः पिनाकधृक् ॥१६॥
सिंहरूपं यथा शक्र विष्णुस्त्यक्ष्यति भीषणम् ।
करिष्यामि तथा शक्र व्येतु ते मानसो ज्वरः ॥१७॥
अथ वायुस्तदा[१३] देवं व्यज्ञापयत शंकरम् ।
अशरीरो यथा न स्यां तथा मे कर्तुमर्हसि ॥१८॥
श्रुत्वा पवनविज्ञप्तिं देवस्तस्मै त्रिलोचनः[१४] ।
शरीरं सुमहत् प्रादाद्येनासौ मूर्तिमानभूत् ॥१९॥
विज्ञापितं शशाङ्केन ततो व्यास महात्मना ।
दक्षेणाहं पुरा शप्तो यक्ष्मदेहो भविष्यसि ॥२०॥
स यथा यक्ष्महीनःस्यां प्रसादं मे तथा कुरु ।
विज्ञप्तिं[१५] शशिनः श्रुत्वा देवस्तस्मै वचः[१६] प्रभुः ॥२१॥
इदं[१७] प्राह महातेजाः शशिने प्रणताय तु ।
तपः कृत्वा प्रभासे त्वं यक्ष्महीनो भविष्यसि ॥२२॥
इति लब्ध्वा वरं सर्वे त्रयोपि सुरसत्तमाः ।
वायुसोमसहस्राक्षाः स्वानि वेश्मानि भेजिरे ॥२३॥

व्यास उवाच

भगवन्स कथं तेन नरसिंहेन सूदितः ।
हिरण्यकशिपुर्दैत्यः किंप्रभावश्च सोभवत् ।
किं वीर्यं[१८] किं तपश्चास्य शंसैतत् पृच्छतो मम ॥२४॥

---

११ तद्रूपमेतत् - ख. । १२ स्ववेषमकरोद् - ख., स्वं वेषं नाकरोद् (?) । १३ ..स्तथा - ख. । १४ श्रुत्वा विज्ञप्तिमेतस्य तस्मै देवस्त्रिलोचनः - ख. । १५ विज्ञप्तं - क. ख. । १६ वरं - क. ख. । १७ इमं - क. ख. । १८ किं वेयाः - क. ख., किं वीर्यः (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

दितिर्नामाभवत् पत्नी कस्यपस्य[१९] प्रजापतेः ।
दक्षस्य दुहिता व्यास[२०] सा जज्ञे तनयद्वयम् ॥२५॥
हिरण्यकशिपुं ज्येष्ठं हिरण्याक्षं कनीयसम् ।
अभिषिक्तः स दैत्यानां राजाभूद् ब्रह्मणा पुरा ॥२६॥
दानवानामथेन्द्रत्वे विप्रचित्तिर्महाबलः ।
सहस्राक्षश्च देवानामेतदिन्द्रत्रयं बभौ ॥२७॥
अथ तेषां तदा व्यास त्रैलोक्यं संप्रशासताम् ।
हिरण्यकशिपुर्दैत्यः शक्रराज्यजिहीर्षया ॥२८॥
त्रैलोक्यमात्मसात् कर्तुं मतिं तपसि सन्दधे ।
स गत्वा दक्षिणामाशां श्रीपर्वतसमास्थितः ॥२९॥
तपस्तीव्रं महत्तेपे दैत्यराजो महाबलः ।
स्वरक्तेन जुहावाग्नौ संमिश्राः समिधश्चरून्[२१] ॥३०॥
ऊर्ध्वबाहुर्निरालम्बो दिवा सूर्यार्पितेक्षणः ।
एकपादोनिमेषश्च सोतिष्ठत् कृतनिश्चयः ॥३१॥
द्वे सहस्रे तदाब्दानां दिव्यानां स्थितवान्बली ।
महता तपसा तस्य त्रैलोक्यं संप्रचुक्षुभे[२२] ॥३२॥
अथाभ्येत्य सुरश्रेष्ठो ब्रह्मा कमलवाहनः ।
इष्टं[२३] वृणु वरं राजन्निति प्रोवाच सादरम् ॥३३॥
तं दृष्ट्वा दैत्यराजस्तु ब्रह्माणं वरदं प्रभुम् ।
वरं प्रार्थितवान् व्यास शृणु यादृशमीप्सितम् ॥३४॥
भगवन्यदि तुष्टोसि वर एषोस्तु[२४] मे विभो ।
अमरः स्यामवध्यश्च जराहीनो महाबलः ॥३५॥
न शस्त्रेण[२५] नचास्त्रेण न रात्रौ न दिवा तथा[२६] ।
नैवार्द्रेण न शुष्केण न पुंसा[२७] न च योषिता[२८] ॥३६॥

१९ काश्यपस्य - क. । २० तात - घ. । २१ ..श्चरं - क,...श्चरं (श्चिर?) - ख. । २२ संप्रचक्षते - ख. ।
२३ इदं - कः । २४एषोस्तिं - ख. । २५ न मन्त्रेण - क. ख. । २६ ...थवा (?) । २७ पुंसां - क. ।
२८ योषितां - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अब्रवीत्[२९] सोन्तरं ब्रह्मा[३०] स चैनं समभाषत ।
अतश्च योन्यथा मृत्यु[३१]र्भविष्यति स मे प्रभो ॥३७॥
एवमस्त्विति तं प्रोच्य ब्रह्मा सुरवरोत्तमः ।
जगामात्मपुरं[३२] क्षिप्रं शान्तः प्रीतः पितामहः ॥३८॥
सोपि सर्वासुरश्रेष्ठो हिरण्यकशिपुस्तदा ।
जित्वा शक्रं स्वयं राज्यं चकार दितिनन्दनः ॥३९॥
त्रैलोक्यमात्मसात् कृत्वा जित्वा सर्वान्दिवौकसः ।
आत्मनैवाभवच्छक्रः स्वयं वायुः स्वयं यमः ।
धनेशो वरुणो वह्निस्सर्व एवाभवत् स्वयम् ॥४०॥
प्रणमध्वं यजध्वं मां ब्रह्माहं सपुरन्दरः ।
इति प्राह ऋषीन्सर्वान्सिद्धान्विप्रांश्च सोसुरः ॥४१॥

व्यास उवाच

श्रीपर्वत इति प्रोक्तो यस्त्वया[३३] मुनिसत्तम ।
कथं श्रीपर्वतोसौ वै[३४] किं पुण्यं तत्र किं फलम् ॥४२॥

सनत्कुमार उवाच

हन्त[३५] ते कथयिष्यामि यन्मां पृच्छसि सुव्रत ।
हिरण्यकशिपुर्दैत्यो यत्र तेपे महत्तपः ॥४३॥
गिरौ तस्मिन्महापुण्ये देवदेवो वृषध्वजः ।
उमया सहितो देव्या रेमे नित्यं महाद्युतिः ॥४४॥
तिष्ठतस्तत्र[३६] देवस्य देवी गिरिवरात्मजा ।
तपःसिद्धान् महायोगान्[३७] ज्वलनादित्यवर्च्चसः ॥४५॥
कृत्वा प्रदक्षिणां[३८] शम्भोस्सप्रणामं महामुने ।
गच्छतस्तान्मुहुर्दृष्ट्वा पप्रच्छ भुवनेश्वरम् ॥४६॥

---

२९ सोब्रवीत् - ख. । ३० ब्रह्मन् - ख. । ३१ अधश्चोर्ध्वं न मे मृत्यु - घ. । ३२ ...मात्मपरं (पदं)? - ख. ।
३३ यस्त्वया - क. ख. । ३४ सोवै (पर्वतोसौ वै?) - क. ख. । ३५ अहं - क. ख. । ३६ ...स्तस्य - क. ।
३७ महायोगी (गा?) - क. ख. । ३८ प्रदक्षिणं - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

क एते देव संसिद्धा योगीशास्त्वां प्रणेमिरे ।
ततो देवः प्रहस्यैनामुवाच परमेश्वरः ॥४७॥
योगसिद्धा महात्मानो योगे पाशुपते स्तिथाः ।
य इहाराध्य मां देवि जहुः प्राणान्नरोत्तमाः ॥४८॥
त एते सिद्धदेहार्थाः[३९] स्वच्छन्दगतिचारिणः ।
मोक्षसिद्धेः परां[४०] निष्ठां गन्तारः परमं पदम् ॥४९॥
अथ सञ्चिन्त्य सुचिरं विस्मयायतलोचना ।
देवं प्रोवाच शर्वाणी वचः परमपूजितम् ॥५०॥
यथाहमपि देवेश प्राप्नुयां सिद्धिमीदृशीम्[४१] ।
करिष्यामि तथा यत्नमेषा चास्मि गता विभो ॥५१॥
ततः कृत्वा श्रियो रूपं देवी परमशोभना[४२] ।
महत्तत्र तपस्तेपे सहस्रं परिवत्सरान् ॥५२॥
देवश्चास्या वरं प्रादात्तैः समानं[४३] महाद्युतिः ।
कृत्स्नस्याध्यात्मतन्त्रस्य[४४] मया प्रोक्तस्य भामिनि ॥५३॥
महायोगेश्वरी सिद्धा परार्थज्ञा भविष्यसि ।
अयञ्च पर्वतः श्रीमान्नाम्ना तव भविष्यति[४५] ॥५४॥
श्रीपर्वत इति ख्यातश्चित्ररूपविभूषितः[४६] ।
समन्ताद्योजनशतं महापुण्यो भविष्यति ॥५५॥
इहागम्य च यो देवि त्वां मां च गिरिनन्दने[४७] ।
शुचिः स्नात्वा[४८]र्चयेन्मर्त्यः स लोकं मम यास्यति[४९] ॥५६॥
यस्त्विह [५०]त्यक्ष्यते प्राणाञ्छ्रीगिरावचलोत्तमे ।
त्रिनेत्रः कामगो भूत्वा गाणपत्यमवाप्नुयात्[५१] ॥५७॥
इहागत्य च ये शैलं करिष्यन्ति प्रदक्षिणम् ।
शर्वायतनसंयुक्तं[५२] भविष्यन्ति च[५३] ते गणाः ॥५८॥

---

३९ एते सिद्धाश्च देहार्थाः - ख., ... र्वा (र्षा) - क. । ४० मोक्षसिद्धिपरां - क., सिद्धि - ख. । ४१ ...मीदृशं - क., ...मीश्वरीं - ख. । ४२ परमशोभनं - ख. । ४३ समं स - क. । ४४ मन्त्रस्य - क. । ४५ भविष्यसि - क. ख. । ४६ द्रुमविभूषितः - ख. । ४७ नन्दिर्दान (?) । ४८ स्नातो - ख. । ४९ मम लोकं च यास्यति - ख. । ५० यश्चेह - ख. । ५१ स गाणपत्यमाप्नुयात् - क. । ५२ सर्वायतन-संयुक्तं - ख. । ५३ हि - क ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अतिशयरमणीये सिद्धसंघैरुपेते
सुरभिकुसुमचित्रे श्रीगिरौ ये पुमांसः ।
व्यपगतमलदोषा मां प्रपश्यन्ति शुद्धा
वियति विहगयुक्तैस्ते विमानैः प्रयान्ति ॥५९॥

⊙ इति स्कन्दपुराणे श्रीगिरिवरप्रदानं[५४] नाम सप्ततितमो[५५]ध्यायः ⊙

सनत्कुमार उवाच

शासतस्तस्य दैत्यस्य हिरण्यकशिपोस्तदा ।
अगात्[१] कालो महान् व्यास त्रैलोक्यं सचराचरम् ॥१॥
दर्पेण महताविष्टः[२] श्रीमदोद्वृत्तचेतनः[३] ।
अवमेने सुरान्सर्वान् न च धर्ममवैक्षत[४] ॥२॥
स देवान् सहितान् सर्वाञ्छक्राद्यान् क्रोधमूर्च्छितः ।
चालितानपि[५] राज्ये स्वे कृच्छ्रमापादयद् भृशम् ॥३॥
सन्ताप्यमानास्ते[६] सर्वे ब्रह्माणं शरणं ययुः ।
भगवन् भूतभव्येश पितामह महाद्युते ॥४॥
हिरण्यकशिपुर्दैत्यस्त्वत्तो लब्धवरोनघ ।
त्रैलोक्यं कृत्स्नमाक्रम्य राज्यं नो हृतवान्दिवः[७] ॥५॥
अनिशं चावमानन्नः[८] प्रयुंक्ते वैरयातनम् ।
तेन विद्रावितास्सर्वे शरणं वयमागताः ॥६॥
प्रसादं कुरु देवेश स न स्यान्नो यथा रिपुः ।
त्यक्तधर्मा जगच्छत्रुर्हिरण्यकशिपुर्बली ॥७॥
एवं प्रोक्तस्तदा देवैर्देवः कमलवाहनः ।
प्रोवाचेदं महाप्रज्ञ देवानां प्रियकृद्वचः ॥८॥

---

५४ वरप्रदाने अध्याय: ६० (७०) - ख. । ५५ ऊनसप्ततितमो - क. ख. ।

१ आगात् - क. । २ ...ष्ट - क । ३ ...चेतसः - क. । ४ ...मवेक्षते - ख. । ५ चलितानपि - ख. ।
६ सन्त्रास्यमानास्ते - क. । ७ दिवि - क. ख. । ८ ...मवमानं नः - ख., चार्थमान - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

क्षीणं तद् दैत्यराजस्य तपस्तस्य दुरात्मनः ।
कृच्छ्रं गमितवान् यो वो राज्यञ्च हृतवान् रिपुः ॥९॥
तेनाहं प्रार्थितः पूर्वं सर्वावध्यत्वमुत्तमम् ।
अन्तरं भाषितश्चासौ मया संज्ञाविमोहितः ॥१०॥
यदैवान्तरमाहाथ[9] दैत्यराजो विचेतनः ।
तदैव[10] मनसा तोषमहमागां महाबलाः ॥११॥
ते यूयमद्य गच्छध्वं विष्णोर्भवनमुत्तमम् ।
तं ब्रूत सहितास्सर्वे तस्य नाशार्थमच्युतम्[11] ॥१२॥
नरसिंहवपुः[12] कृत्वा सकृदाहत्य हंस्यति ।
हिरण्यकशिपुं दैत्यं ततो निर्वृतिमेष्यथ ॥१३॥
एवमस्त्विति ते सर्वे प्रणिपत्य पितामहम् ।
आजग्मुः सहिता देवा विष्णोर्भवनमादृताः ॥१४॥
अथ दृष्ट्वा महातेजा विष्णुर्देवानुपस्थितान् ।
उवाच श्लक्ष्णया वाचा वचश्चोक्तिमनोहरम्[13] ॥१५॥
स्वागतं भवतामस्तु किमर्थं यूयमागताः ।
पूज्या भवन्तस्सर्वे मे सुहृदोतिगरीयसः ॥१६॥
यद्वो[14] मनोगतं किञ्चिन्मया कार्यं दिवौकसः ।
क्षिप्रं तद् ब्रूत संक्षिप्तं कर्ताहमविचारितम् ॥१७॥
विष्णुनैवं तदा प्रोक्ता देवाः शक्रपुरोगमाः ।
ऊचुः प्रहृष्टवदनाः संस्तुवन्तो जनार्दनम् ॥१८॥
हिरण्यकशिपोर्देव दैत्यराजो[15] महाबलात् ।
भयं नः सुमहज्जातं राज्यं चापहृतं दिवः[16] ॥१९॥
अवमानः प्रयुक्तश्च तेनास्मभ्यं सुरोत्तम ।
भुनक्ति स जगत् कृत्स्नं ब्रह्मद्विट् कश्यपात्मजः ॥२०॥

---

९ यदेवान्तरमाहाथ - ख. । १० तदेव - ख. । ११ ...मुच्यतां - क., ...मुचतं - ख. । १२ नारसिंहं वपुः (?) ।: १३ ...श्चेतोमनोहरम् - क., ...श्चोक्तौ मनोहरम् - ख. । १४ यद्वा - क. । १५ दैत्यराज्ञो - क. । १६ दिवि - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स यथा वध्यते दैत्यस्त्वया सर्वारिसूदन ।
तथा कुरु हृषीकेश वरोऽयं नः प्रदीयताम् ॥२१॥
ततो विष्णुश्चिरं ध्यात्वा वधोपायं प्रचिन्त्य च ।
प्राह देवान् सुरश्रेष्ठो वचसाप्याययन्निव ॥२२॥
एवमस्तु सुरश्रेष्ठाः सर्वं कर्तास्मि वो वचः
महाबलस्स दैत्येन्द्रो यतो युष्मान्वदाम्यहम् ॥२३॥
आविशन्तु[१७] भवन्तोपि शरीरं मम सुव्रताः ।
सर्वदेवमयो भूत्वा दृप्तं हंस्यामि वो रिपुम्[१८] ॥२४॥
ततो देवास्तदा सर्वे विविशुर्वैष्णवीं तनुम् ।
स चापि बलवान् भूत्वा रूपं कृत्वा भयानकम् ॥२५॥
नारसिंहं महातेजा नखदंष्ट्राविभूषणम्[१९] ।
जगाम विलसन् विष्णुर्हिरण्यकशिपोः पुरम् ॥२६॥
उद्यानं स बहिस्तस्य[२०] सर्वर्तुकुसुमैर्वृतम्[२१] ।
नृसिंहो दैत्यसिंहस्य दृष्ट्वा तस्थौ सुविस्मितः ॥२७॥
चम्पकाशोकजातीभिः कदम्बैर्बकुलैरपि[२२] ।
तथा सुरभिपुष्पैश्च समन्तादुपशोभितम् ॥२८॥
सरोभिः पद्मसंछन्नैर्हंसचक्राह्वशोभितैः[२३] ।
वृक्षैः कामफलैश्चैव वैभ्राजसदृशं वनम्[२४] ॥२९॥
तद्बभञ्ज नृसिंहस्तु खेलगामी मदोत्कटः ।
सरांसि क्षोभयामास करीव स मदोल्वणः[२५] ॥३०॥
स रेजे वनमध्यस्थः परिसर्पन्नितस्ततः ।
मेरोरचलराजस्य स्थितं शृङ्गमिवोच्छ्रितम्[२६] ॥३१॥
अथाभ्येत्य[२७] नृसिंहं तं वनपाला रुषान्विताः ।
बलिनो वारयामासुस्तांश्चैवाभ्यहनद्[२८] बली ॥३२॥

---

१७ आविशध्वं - क. । १८ रिपून् - क., ऋपून् - ख. । १९ विभीषणम् - क. । २० ... स्वत्र - ख. ।
२१ सर्वर्तुकुसुमायुतं - क. । २२ कदम्बबकुलैरपि - क. ख. । २३ सेवितैः (?) । २४ यत्नं - (?) ।
२५ समदो ललन् - ख. । २६ ...मिवोत्थितं - ख. । २७ अथागत्य - ख. । २८ चैव व्यहनद् - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

हतशेषास्ततस्तत्र[२९] प्रविलीनास्तु[३०] येसुरा:[३१] ।
ते गत्वा कथयामासुर्हिरण्यकशिपोस्तदा ॥३३॥
तेषां तद्वचनं श्रुत्वा दैत्यराजो महाबलः ।
पह्लादश्चानुह्लादश्च नमुचिं बाष्कलिं बलिम् ॥३४॥
विप्रचित्तिप्रधानाँश्च सर्वानाहूय दानवान् ।
प्रोवाच त्वरितं गत्वा बद्ध्वा सिंहं समान्तिकम् ॥३५॥
समानयत दैत्येन्द्रा न हन्तव्यः कथञ्चन ।
क्रीडनं[३२] सिंहपोतोसौ देव्या मम भविष्यति ॥३६॥
इति श्रुत्वासुरास्सर्वे विप्रचित्तिपुरोगमाः ।
उद्यानं सहिता गत्वा नृसिंहं ददृशुः स्थितम् ॥३७॥
दूरस्थाश्चिक्षिपुः पाशाँस्तान्स[३३] चिच्छेद माधवः ।
अथ विद्रावयामास दानवान् केशरी भृशम् ॥३८॥
ततो हतसहायास्ते दैत्या विमनसो ययुः ।
पार्श्वं दानवराजस्य सर्वञ्चाकथयँस्तदा ॥३९ ।
अथ क्रुद्धः स्वयं राजा हिरण्यकशिपुर्बली ।
रथमास्थाय सन्नद्धा नृसिंहं प्राद्रवद्रुषा ॥४०॥
स रथः सिंहराजेन सायुधः पर्वतोपमः ।
संभ्राम्य पातितस्तूर्णं चूर्णमागान्महीतले ॥४१॥
ततो भग्नरथो दैत्यः क्रोधात्संरक्तलोचनः ।
वृक्षमुत्पाटच वेगेन नृसिंहाय व्यसर्जयत् ॥४२॥
अथासौ पतितो गात्रे सिंहराजस्य पादपः ।
मृत्खण्ड[३४] इव पाषाणे क्षिप्तश्चूर्णं[३५] जगाम ह ॥४३॥
गृहीत्वा स तदा सिंहो हिरण्यशिपुं सकृत् ।
तलेनाहत्य[३६] तं प्राणैर्व्ययोजयत सत्वरम् ॥४४॥
सिंहनादं महत् कृत्वा नखैर्वज्रमयैर्विभुः ।
उरो बिभेद दैत्यस्य महाशैलोपमं हरिः ॥४५॥

---

२९ ...स्तु ये तत्र - क. । ३० प्रवलीनास्तु - क., प्रप... - ख. । ३१ ...स्तु तेसुराः - क., भये - ख. ।
३२ क्रीडनः - ख. । ३३ ...स्ताँश्च - क. ख. । ३४ मृद्गण्ड - क., मृद्भाण्ड - ख. । ३५ ...ञ्चूर्णं - ख. ।
३६ बलेनाहृत्य - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

हते तस्मिन्महादैत्ये विष्णुना शक्तिनन्दन ।
दानवा न हता[३७] ये तु विविशुस्ते रसातलम् ॥४६॥
दिवो राज्यं[३८] पुनः शक्रो लेभे निष्कण्टकं महत् ।
दिवौकसश्च सर्वे ते स्वानि राज्यानि भेजिरे ॥४७॥
अथागत्य ततो देवः शूलपाणिर्वृषध्वजः ।
सुरैर्विज्ञापितो व्यास यत्ते कथितवानहम् ॥४८॥
विष्णोस्त्याजयितुं रूपं सैहंमद्भुतकर्मणः ।
शरभस्स तदा भूत्वा हिमवच्छिखरोपमः ॥४९॥
चतुर्भिः पृष्ठजैः पादैस्तीक्ष्णदंष्ट्रो[३९] महाबलः ।
नरसिंहसमीपं तु गत्वागर्जत् समाहितः ॥५०॥
अथ सिंहस्तदा दृष्ट्वा शरभं समुपस्थितम् ।
क्रोधेन महताविष्टस्तलेनैनमताडयत्[४०] ॥५१॥
स हतस्तेन सिंहेन शरभो नैव चुक्षुभे ।
ततः शरभमाहत्य वज्रदेहं महाबलम्[४१] ॥५२॥
आत्मनैवागमत् कृच्छ्रं स्पर्शात्तस्य महात्मनः ।
ततो विष्णुश्चिरं ध्यात्वा ज्ञात्वा शङ्करमागतम् ॥५३॥
प्रणम्य शिरसा तं वै[४२] स्तोतुमेवं[४३] प्रचक्रमे ।
नमः शर्वाय रुद्राय सेनान्ये शर्मदाय[४४] च ॥५४॥
नमः परमदेवाय ब्रह्मणे परमाय च ।
कालाय यमरूपाय कालदण्डाय वै नमः ॥५५॥
नमःकालान्तकर्त्रे च कालेकालहराय च[४५] ।
नमः पिनाकहस्ताय रौद्रबाणधराय च ॥५६॥
चण्डाय वामदेवाय सर्वयोगेश्वराय च ।
नमो विद्याधिपतये ब्रह्मणः पतये नमः ॥५७॥

---

३७ निहता - ख. । ३८ देवराज्यं - क. ख. । ३९... रष्ट्रदंष्ट्रो - क. । ४० ...वमताडयत् - क. ख. ।
४१ महावलः - ख. । ४२ तस्मै - क. ख. । ४३... मेनं - क. ख. । ४४ सर्वदाय - ख. ।
४५ कालाकालहराय च - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नमोऽसुरवरघ्नाय कालचक्राय ते[४६] नमः ।
संवर्त्तकाग्निचक्राय[४७] प्रलयान्तकराय च ॥५८॥
नरनारायणेशाय नरनारायणात्मने ।
ममैव वरदात्रे च सर्वकामप्रदाय च ॥५९॥
शरभाय सुरूपाय व्याघ्रचर्मसुवाससे ।
नन्दीश्वरगणेशाय गणानां पतये नमः ॥६०॥
इन्द्रियाणामथेशाय मनसस्पतये नमः[४८] ।
नमः प्रधानपतये सुराणां पतये नमः ॥६१॥
नमोस्तु भावपतये तत्त्वानां पतये नमः ।
चराचराणां[४९] पतये भूतानां पतये नमः ॥६२॥
त्रैलोक्यपतये चैव लोकानां पतये नमः ।
योगदाय नमो मह्यं तथैवैश्वर्यदाय च ॥६३॥
अवध्यत्वप्रदात्रे च तथैवाजय्यदाय[५०] च ।
भगवंस्त्वत्प्रतिष्ठोऽस्मि त्वन्निष्ठस्त्वत्परायणः ।
शरणं त्वां प्रपन्नोहं प्रसीद मम सर्वदा ॥६४॥
य इमं शृणुयान्नित्यं शुचिः प्रयतमानसः ।
स रुद्रलोकमासाद्य देवस्य गणपो भवेत् ॥६५॥
धन्यं यशस्यमायुष्यं स्वर्ग्यं पापप्रणाशनम् ।
श्रावणं श्रवणं चास्य तथानुस्मरणं सदा ॥६६॥

सनत्कुमार उवाच

स एवं स्तूयमानस्तु विष्णुना भुवनेश्वरः ।
हृषीकेशमुवाचेदं वचः परमपूजितम् ॥६७॥
तुभ्यं विष्णो मया दत्तः पुण्यो ह्येष वरः शुभः ।
अयोनौ सज्जमानस्य स्वयोनौ प्रतिपादनम् ॥६८॥

---

४६ वै - क. ख. । ४७ संवर्त्तकाग्निवक्त्राय - घ. । ४८ मनसां पतये नमः - क. ख. । ४९ चराचरस्य - ख. । .....
५० ...याव्ययाय च - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स त्वं विष्णुर्महातेजा मत्तो लब्धवरस्सदा ।
वेलायां त्वां[५१] समुद्रस्तु तिर्यग्योनिमसूत यः (?) ॥६९॥
कृतं कार्यं त्वया सर्वं हिरण्यकशिपुर्हतः ।
एहि गच्छ शुभां योनिमात्मनः परमाद्भुताम् ॥७०॥
ततस्तमाक्रमत् पादैः सिंहं शरभसत्तमः ।
अयोजयच्च देहेन पुनर्दिव्येन केशवम् ॥७१॥
विष्णवेथ वरं दत्त्वा दैत्यघ्नं स वृषध्वजः ।
प्रकृतिस्थो भवेत्युक्त्वा तत्रैवान्तरधीयत ॥७२॥
दत्वा तस्मै वरमनुपमं विष्णवे लोकधाता
दैत्यघ्नत्वं सुरपुरवधूलोचनैः पीयमानः ।
नीलाम्भोदद्युतिनिभमुरः[५२] प्रोद्वहच्छूलपाणि-
र्धाम स्वीयं[५३] परममुनिभिर्वन्द्यमानो जगाम ॥७३॥

⊙ इति स्कन्दपुराणे हिरण्यकशिपूपाख्याने शरभकृतनरसिंहोद्धाराख्यानं नाम एकसप्ततितमो[५४]ध्यायः ⊙

व्यास उवाच

भगवन् सर्वयोगज्ञ श्रुतमाख्यानमुत्तमम् ।
परतः श्रोतुमिच्छामि यद् वृत्तं मुनिसत्तम ॥१॥
अपनीय तदा विष्णोः सिंहरूपं वृषध्वजः ।
किमन्यदकरोद्धीमानेतदिच्छामि वेदितुम् ॥२॥

सनत्कुमार उवाच

स्वयोनिं विष्णुमानीय देवदेवो भवस्तदा ।
मन्दरे सहितो देव्या विचचार महाद्युतिः ॥३॥
रम्यान् स काननोद्देशान् गिरेः प्रस्रवणानि च ।
अलञ्चकार देवेशः परिसर्पन् समन्ततः ॥४॥

---

५१ त्वं - क. । ५२ वपुः - घ. । ५३ स्वाक्यं - क., स्वाद्यं - घ. । ५४ सप्ततितमो - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वनप्रेक्षारतं[1] देवं ज्ञात्वा शङ्करमव्ययम् ।
शरत्तत्र वसन्तश्च द्वावृतू समुपस्थितौ ॥५॥
ततो महीरुहाः सर्वे सरांसि च समन्ततः ।
नानाविधानि पुष्पाणि मुमुचुस्सहसा समम् ॥६॥
कमलोत्पलसंछन्नाः षट्पदव्रातसेविताः ।
हंससारससंवासा[2] वाप्यस्तत्र मनोहराः ॥७॥
गन्धाढ्या जातयः क्षिप्रं बभूवुः सह चम्पकैः ।
अशोका[3] गन्धपुष्पाश्च[4] तथा चैवातिमुक्तकाः[5] ॥८॥
उपतस्थुः समं देवं सर्वगन्धसुखानिलाः ।
सर्वर्तुकुसुमाकीर्णं दृष्ट्वा तद्वनमुत्तमम् ॥९॥
पुष्पाण्यादाय देवेशः स्वयमेव जगत्पतिः ।
अलञ्चकार हृष्टात्मा देवीं हिमगिरेः सुताम् ॥१०॥
नन्दीश्वरञ्च पार्श्वस्थमात्मानञ्च सुरेश्वरः ।
ततः प्रणम्य देवेशं पार्वती प्रणयादिदम् ॥११॥
वचः प्रोवाच जननी कृत्स्नस्य जगतोव्यया ।
यथा मे देहजः पुत्रो भविता गोवृषध्वज ॥१२॥
त्वद्वीर्यस्त्वत्प्रभावश्च सर्वदेवनमस्कृतः ।
तथा कुरु महादेव यदि ते प्रियता मयि ॥१३॥
एवमुक्तस्तदा देव्या देवदेवस्त्रिलोचनः ।
प्रोवाचेदं महातेजा देव्याः प्रियचिकीर्षया ॥१४॥
एवं भवतु देवेशे विज्ञप्तिं सफलामिमाम् ।
करिष्यामि तवेशानि पुत्रस्ते स भवेद्यथा ॥१५॥
श्रेष्ठः सर्वसुरेशानां महायोगबलान्वितः ।
कृत्स्नं जगदिदं यस्य वशे स्थास्यति भामिनि ॥१६॥

---

१ वनं प्रेक्ष्य रतिं - क., नवप्रेक्षारतिं - ख. । २ हंससारससंवाहा (धा?) - ख. । ३ अशोको - क. ख. । ४ गन्धपुष्पश्च - क. ख. । ५ ...मुक्तकः - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गच्छन्त्वया तत् तपः कर्त्तुं वरः पूर्वमपि त्वया ।
प्रार्थितो ह्येष पुत्रार्थं तेनावश्यं ददामि[६] ते ॥१७॥
एवमुक्त्वा तु तौ देवौ गिरिजाभुवनेश्वरौ ।
नन्दीशेन तदा सार्धं विचरन्तौ जगद्गुरू ॥१८॥
सर्वोद्यानानि पश्यन्तौ विन्ध्यमाजग्मतुर्गिरिम् ।
अथागम्य तु विन्ध्यस्य सौवर्णं शिखरोत्तमम् ॥१९॥
दरीकन्दरसंकीर्णं नानानिर्झरसंयुतम् ।
सतडिन्मेघसंघात[७]घनीकृतशिलोच्चयम् ॥२०॥
नानावृक्षशिलोपेतं नानाकुसुमसंयुतम् ।
नानाखगरवामोदं हेमरत्नोज्ज्वलं शुभम् ॥२१॥
मानसं तस्य मध्ये तु पुरं सृष्ट्वा[८] महर्द्धिमत् ।
मणिहेममयं दिव्यं देवासुरविमोहनम् ॥२२॥
परमैश्वर्यसंयुक्तौ युतौ विविशतुः पुरम् ।
नन्दिनञ्च ततो देवी समाज्ञापयदव्यया ॥२३॥
वत्स नन्दिन् तथा द्वारे तिष्ठेस्त्वं गणपेश्वर ।
विशेन्नेह यथा कश्चित् सूक्ष्मो वायुरपि स्थितः ॥२४॥
कृत्वा शिरसि तामाज्ञां नन्दीशो गणपाधिपः ।
अभवद्[९] द्वारमूलस्थः[१०] कृत्वा तेजोतिदुस्सहम् ॥२५॥
योगयुक्तौ तदा देवौ परां मूर्त्ति समास्थितौ ।
कृत्स्नस्य जगतो योनी पार्वतीभुवनेश्वरौ ॥२६॥
तस्थतुः सुचिरं कालं तनयार्थं महाद्युती ।
स न शक्यो मया वक्तुं ब्रह्मणा वा महामुने ॥२७॥
सुयोगो योभवद्[११]देव्या देवदेवस्य शूलिनः ।
ब्रह्मणो मद्विधानाञ्च श्रेष्ठोसौ परमेश्वरः ॥२८॥
अवश्यं त्वागमे वाच्यं यथावृत्तं यथाश्रुतम् ।
अतो वक्ष्यामि ते व्यास प्रियः शिष्यश्च मे भवान् ॥२९॥

६ ददानि - क. । ७ संघातं - क. । ८ दृष्ट्वा - क. । ९ भगवद् - क. । १० स्थं - क. ।
११ भवे - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

योगसन्धानमास्थाय तयोरेवं महामुने ।
अतीतं स्थितयोर्दिव्यं सहस्रं शरदामभूत् ॥३०॥
ततोऽभवन्निमित्तानि घोराणि त्रासनानि च ।
चचाल पृथिवी कृत्स्ना सशैलवनकानना ॥३१॥
नद्यः शोषं तदा जग्मुश्चुक्षुभे सरितां पतिः ।
तपनो निष्प्रभश्चासीद् ववावुष्णः[१२] समीरणः ॥३२॥
पेतुरुल्का महाघोरा दिशश्चासन्सुदारुणाः[१३] ।
एवमुत्पातवित्रस्ता शुभहेतोर्वसुन्धरा ॥३३॥
जगाम शरणं विष्णुं गत्वा चार्त्ति न्यवेदयत्[१४] ।
उत्पाता दारुणा देव बभूवुर्बहवो भृशम् ॥३४॥
तेनातीव समुद्विग्ना त्वामद्य शरणं गता ।
अथ विष्णुः सुरान्सर्वानिदमश्रावयत् प्रभुः ॥३५॥
ततो दिवौकसः सर्वे बृहस्पतिपुरोगमाः ।
एकत्र संगता भूत्वा चक्रुर्बहुविधाः कथाः ॥३६॥
महाबुद्धिरथाहेदं वाक्यमङ्गिरसः सुतः ।
श्रीकण्ठो भगवानेष देवदेवस्त्रिलोचनः ॥३७॥
युक्तोऽभूद्धिमवत्पुत्र्या तनयार्थं महाद्युतिः ।
दिव्यं वर्षसहस्रन्तु योगेन परमेष्ठिनः ॥३८॥
अगाद्युक्तस्य[१५] पार्वत्या बभूवुर्दारुणास्ततः ।
उत्पाता जगतस्त्रासाश्चिन्त्यते किमिहापरम् ॥३९॥
गच्छाम सहिताः सर्वे स्तोतुं भक्त्या वृषध्वजम् ।
यथा च देहजः पुत्रो भवेद्[१६] देव्याः सुरेश्वराः ॥४०॥
विज्ञापयाम देवेशं तथा शीघ्रमिहामराः ।
ततो वैवस्वतः प्राह वचः क्रोधाभिनिःसृतम्[१७] ॥४१॥

---

१२ ववावुष्णं - क. । १३ दिशश्चासंस्तदा (?) । १४ निवेदयत् - क. । १५ आगाद्युक्तस्य - क. ।
१६ पुत्रोभवद् - क. । १७ क्रोध - क., क्रोधविमिश्रितं (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

किमर्थं भृशमुद्विग्ना भवन्तस्सर्व एव हि ।
यद्यसौ देवदेवस्य तनयोस्मासु भक्तिमान् ॥४२॥
उत्पत्स्यति न च द्रोग्धा ततः क्षंस्याम तं सुराः ।
अथ चेत्कर्कशोस्मासु द्रोग्धा वा स[१८] भविष्यति ॥४३॥
तत एनमहं बद्ध्वा कालपाशेन बालकम् ।
आनेष्ये[१९] स्ववशं[२०] क्रूरं मृत्युना सहितोमराः ॥४४॥
न चेत्पुरन्दरो वज्रं तस्य क्षेप्स्यति मूर्धनि ।
द्विधा येन कृतो मूढः प्राणाँस्त्यक्ष्यति दुस्त्यजान् ॥४५॥
ब्रुवतस्तस्य बह्वेवं क्रोधसंरक्तलोचनः ।
विष्णुः प्रोवाच धर्मात्मा वचांसि परमार्थवित् ॥४६॥
अहो त्वया सुविश्रब्धं प्रोच्यते भास्करात्मज ।
परमार्थमविज्ञाय क्रोधस्य वशवर्तिना ॥४७॥
तनयः किल यः शम्भोर्गिरिजायां भविष्यति ।
स मूढ इव यः कश्चिद् भविता वशगस्तव ॥४८॥
किमसौ मानवोन्यो वा जन्म[२१]मृत्युसमन्वितः ।
उत्पत्स्यति रवेः पुत्र येन[२२] स्याद्वशगस्तव ॥४९॥
कालेनापरिपूर्णेन मानवस्यापि भानुज ।
न त्वं नाशयिता[२३] नाम किमु पुत्रस्य शूलिनः ॥५०॥
तेजो भगवतः शम्भोर्यद् भविष्यत्यनुत्तमम् ।
स कथं वध्यतां यायात्[२४] तव शक्रस्य वा विभो[२५] ॥५१॥
ब्रवीमि वो हितं देवाः क्रियते यदि मद्वचः ।
प्रयाम सहितास्सर्वे तं प्रसादयितुं हरम् ॥५२॥
यो नः स्वयंवरे दत्तो वरस्तिष्ठति शङ्करे ।
तमेव वरयिष्यामो[२६] वरमग्र्यं पिनाकिनम्[२७] ॥५३॥

---

१८ शंभविष्यति (?) । १९ नयिष्ये - क. । २० स्गं वशं - क. ख. । २१ जनो - ख. । २२ तेन - क. ख । २३ वाशयिता - क., वशयिता (?) । २४ यातु (याता?) - क. टि. । २५ विभोः - ख. । २६ मृगशि ... (?) - क. । २७ पिनाकिनः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यथा न[२८] देहजो देव्यास्तनयः संभविष्यति ।
नास्माकमहितं शम्भुः पुत्रमुत्पादयिष्यति ।।५४।।
वयमेव सुतास्सर्वे शङ्करस्याग्रजा[२९] विभोः ।
न शक्यस्तपसा द्रष्टुं न ज्ञानेन[३०] सुरेश्वराः[३१] ।।५५।।
भक्त्या परमया द्रष्टुं शक्यः स्यात्स वृषध्वजः ।
आगच्छध्वं गमिष्यामो यत्र तिष्ठति शङ्करः ।।५६।।
परां भक्तिं समास्थाय यथा पश्येम शङ्करम् ।
हुतभुक् चैव नो देवस्तत्सकाशं[३२] प्रवेक्ष्यति ।।५७।।
सर्वेषामेव विज्ञप्त्या[३३] सुराणां सुरसत्तमाः[३४] ।
इति श्रुत्वा वचस्तस्य विष्णोरमिततेजसः ।।५८।।
बृहस्पतिपुरोगास्ते हृष्टात्मानो दिवौकसः ।
साधुसाध्विति सन्तुष्टा वचांस्यूचुः सुरोत्तमाः ।।५९।।
ततो विष्णुसहायास्ते गत्वा तच्छृंगमुत्तमम्[३५] ।
ऊचुर्हुताशनं देवं वचः स्तुतिपुरस्सरम् ।।६०।।
त्वमग्ने सर्वदेवानां हितकृत्सर्वतोव्ययः ।
प्रविश्य त्राहि नः सर्वाञ्छङ्कराय निवेदय ।।६१।।
तथा कुर्यास्सुरश्रेष्ठ[३६] येन निर्गम्य शङ्करः ।
अस्मान्निरीक्षते देवः प्रह्वान् भक्तिमतः स्थितान् ।।६२।।
इत्युक्तस्स सुरैस्सर्वैः प्रत्युवाच हुताशनः ।
अकर्तव्यं हि मे देवा न युष्मान्प्रति विद्यते ।।६३।।
पार्वत्या सह संयुक्तं देवदेवेश्वरं[३७] परम् ।
न मे शक्तिर्हरं द्रष्टुं भवन्तश्चाकुला भृशम् ।।६४।।
युष्मद्वाक्यमलङ्घ्यञ्च कृच्छ्रमेतदतीव मे ।
प्रवेक्ष्ये दूतवद्देवाः[३८] करिष्ये साहसं महत् ।
इत्युक्त्वा स जगामशु भवनं[३९] तत्कपर्दिनः ।।६५।।

---

२८ ते - क. । २९ शंकरस्यात्मजा - क. । ३० ज्ञायेत - ख. । ३१ सुरेश्वरः - ख. । ३२ स्तम्भ .. क. ।
३३ विज्ञाप्य: - ख. । ३४ सुरसत्तमः - ख. । ३५... मुच्छ्रितं - क. । ३६ कुर्यात्सुरश्रेष्ठ - क. ख. ।
३७ देवं देवेश्वरं - क. । ३८ सुतवद् देवाः - क. । ३९ ...भंवनं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तत्रापश्यत् स्थितं द्वारे नन्दिनं परमौजसम् ।
द्वारमाक्रम्य तिष्ठन्तं दीप्तपट्टिशधारिणम् ॥६६॥
तं दृष्ट्वा स तदा वह्निः समालोक्य समन्ततः ।
नास्ति कश्चिदिहोपायः सूक्ष्मजन्तोरपि स्थिते ॥६७॥
प्रवेष्टुमिति सञ्चिन्त्य तमेव शरणं ययौ ।
नन्दिनं हुतभुग् देवस्तुष्टाव च कृताञ्जलिः ॥६८॥
नमो गणाधिपतये नमश्चण्डाय शूलिने ।
नमस्सेनाधिपतये नमः शर्वात्मने[४०] सदा ॥६९॥
हालाहलाय रुद्राय नीलरुद्राय वै नमः ।
नमो ि ि तिरुद्राय तथैवार्द्रपटाय च ॥७०॥
नमस्ते स्वप्नरुद्राय भस्मरुद्राय ते नमः ।
नमः श्मशानरुद्राय कोटीरुद्राय ते नमः ॥७१॥
नमः पिङ्गलरुद्राय रुद्राधिपतये नमः ।
नमः प्रमथरुद्राय[४१] भूतरुद्राय ते नमः ॥७२॥
विरूपाक्षाय रुद्राय श्वेतरुद्राय ते नमः ।
नमस्ते सततं देव नमस्ते सततं शिव ॥७३॥
नमस्ते सततं सौम्य नमस्ते भक्तवत्सल[४२] ।
मम भक्तस्य देव त्वं देवानां हितमिच्छतः ॥७४॥
वरदो भव नन्दीश मा नः क्रोधं कृथाः प्रभो ।
ततो नन्दीश्वरः प्राह स्तुवन्तमनलं स्थितम् ॥७५॥
प्रीतस्तवानया वह्ने भक्त्याहं सुरसत्तम ।
ब्रूहि किन्ते प्रियेन्देव करवाणि[४३] हुताशन ॥७६॥
अथ प्रोवाच वह्निस्तं वरदं नन्दिनं स्थितम् ।
यदि तुष्टोसि मे देव देयो यदि वरश्च मे ॥७७॥

---

४० सर्वात्मने - क. । ४१ प्रथमरुद्राय - क. । ४२ भक्तिवत्सल - क. । ४३ करोम्यद्य - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

देवकार्येण देवेश प्रवेष्टुं[४४] दीयतां मम ।
भवनं देवदेवस्य वर एषोस्तु मे विभो । ७८॥
तं नन्दी प्रत्युवाचेदं कृच्छ्रं देयो वरो ह्ययम् ।
न तं शक्ष्यसि[४५] देवेशं द्रष्टुं त्वं योगमास्थितम् ॥७९॥
सह देव्या महेशानं स्रष्टारं जगतोव्ययम् ।
तथाप्येष[४६] मया तुभ्यं देय एव वरोनल ॥८०॥
गच्छ सूक्ष्मतरो भूत्वा दुरालक्ष्यो हुताशन ।
प्रविश्य निष्क्रम क्षिप्रमविज्ञातागमक्रियः ॥८१॥
स नन्दिनाभ्यनुज्ञातो जातवेदा[४७] मुदा युतः ।
ज्योतिः सूक्ष्मतरो भूत्वा भास्करस्यांशुना सह ॥८२॥
प्रविश्य भवनं शम्भोर्भणिस्तम्भमथाविशत् ।
वाह्नेय[४८]मणिमध्यस्थं स्तम्भं तं भासयन्[४९] मुहुः ॥८३॥
सोपश्यत्तत्र देवेशं देवीञ्च भुवनेश्वरीम् ।
तुष्टाव मनसा[५०] देवौ ततोसौ हव्यवाहनः ॥८४॥
तथा संस्तूयमानश्च प्रीतिं देव्याश्च दर्शयन् ।
वीक्ष्य स्तम्भं हरो देवीं वाक्यमेतदभाषत ॥८५॥
एष स्तम्भमणिर्देवि भ्राजमान इव प्रिये ।
संस्तौति मां त्वया सार्धं ददान्यस्मै वरं शुभम् ॥८६॥

देव्युवाच

एवं कुरु महादेव भक्तस्यास्य सुरेश्वर ।
स्तुवतस्त्वा मया सार्धं प्रयच्छ वरमुत्तमम् ॥८७॥

देवदेव उवाच

प्रीतोहं मणिमध्यस्थ भक्त्या ते विनयेन च ।
ब्रूहि कार्यं यथेष्टं त्वं तत्सर्वं ते भविष्यति[५१] ॥८८॥

---

४४ प्रवेशो (?) । ४५ शक्तोसि - ख. । ४६ यथाप्येष - क. । ४७ जातवेदो - क. । ४८ वह्नेय् - ख. ।
४९ भावयन् - क. । ५० वचसा - ख. । ५१ वर एप भविष्यति - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अग्निरुवाच

देवास्त्वां द्रष्टुमिच्छन्ति बहि:स्था भुवनेश्वर ।
भगवँस्ते यथा सर्वे पश्येयुस्त्वां तथा कुरु ॥८९॥

देवदेव उवाच

एवमस्तु सुरश्रेष्ठ निर्गत्य त्रिदिवौकसाम् ।
ददामि[५२] दर्शनं वह्ने भवतः प्रियकाम्यया ॥९०॥
तथेति समनुज्ञातो वह्निस्तस्माद्[५३] विनिर्गतः ।
देवेभ्यः कार्यमावेद्य तस्थौ योगं समास्थितः ॥९१॥
अथ निष्क्रम्य भगवान् देवदेवः पिनाकधृक् ।
जगाम त्वरितं तत्र यत्र देवाः समासते ॥९२॥
अथ दृष्ट्वा महादेवं देवास्सर्वे वृषध्वजम् ।
प्रणेमुर्मूर्धभिर्हृष्टास्तुष्टुवुश्च मुदा युताः ॥९३॥
नमस्सहस्रनेत्राय सहस्रचरणाय च ।
महतां पतये नित्यं देवानां पतये नमः ॥९४॥
नमः श्मशानरतये व्याघ्रचर्मसुवाससे ।
ब्रह्मणश्च शिरोहर्त्रे[५४] विष्णोर्वै[५५] वरदाय च ॥९५॥
नमो दक्षमखघ्नाय नमस्ते त्र्यम्बकाय च ।
नमो भूताधिपतये प्रधानमथनाय च ॥९६॥
पिनाकपाणये नित्यं सर्वयोगात्मयोगिने ।
नमो नीलशिखण्डाय सपत्नीकाय वै नमः ॥९७॥
नमः कामेष्वसक्ताय कामसक्ताय वै नमः ।
नमस्सर्वाय[५६] शर्वाय[५७] दण्डिने[५८] जटिने नमः ।
नमः सर्वात्मभूताय दिश नो यन्मनोगतम् ॥९८॥
एवं संस्तूयमानोथ सर्वैरेव सुरोत्तमैः ।
प्रत्युवाच महादेवस्तान्सुरान्प्रणतान् स्थितान् ॥९९॥

---

५२ ददानि - ख. । ५३ स्तम्भाद् - ख. । ५४ नमो ब्रह्मशिरोहर्त्रे - (?) । ५५ विष्णवे - क, ख. ।
५६ नमश्शर्वाय - ख. । ५७ सर्वाय - ख. । ५८ मुण्डिने - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

परितुष्टोस्मि भो[५९] देवा ब्रूत किं[६०] प्रददानि वः[६१] ।
पुनः प्रणम्य ते देवाः प्राहुर्वचनमुत्तमम् ॥१००॥
यो नस्स्वयंवरे देव वरो दत्तस्त्वया विभो ।
तं प्रार्थयाम सहितास्तन्नो दातुं त्वमर्हसि ॥१०१॥
देव्या य एष पुत्रार्थं योगस्ते भुवनेश्वर ।
कृतोब्दानि बहूनि स्म तं[६२] संहर नमस्तव ॥१०२॥
अशुभानि निमित्तानि दृश्यन्ते सुमहाद्युते ।
पृथिवी दुःस्थिता देव वयञ्च भृशमाकुलाः ॥१०३॥
तेनैष न यथा देव्या देहे सञ्जायते सुतः ।
जायेत च यथा देव तथा नः कर्तुमर्हसि ॥१०४॥
तेषां तद्वचनं श्रुत्वा देवदेवोब्रवीद्वचः ।
महानेष वरः सर्वैः प्रार्थितः सुरपुङ्गवैः[६३] ॥१०५॥
तथापि च प्रयच्छामि युष्मत्प्रियचिकीर्षया ।
महान्तं किन्त्विदं कालं तेजस्सन्धारितं[६४] मया ॥१०६॥
अस्य[६५] प्रपश्यत[६६] स्थानममोघं ह्येतदुत्तमम् ।
अथैवमुक्ता देवेन ते देवा मुनिसत्तम ॥१०७॥
बभूवुस्सहितास्तूष्णीं सुरा ब्रह्मपुरोगमाः ।
तेषां मध्ये तदा वह्निः[६७] प्रोवाच भुवनेश्वरम् ॥१०८॥
जुहुध्येतत्परन्तेजो मयि देव त्रिलोकप ।
जुहावाग्नौ ततस्तेजस्तदा स्वीयं[६८] परं भवः ॥१०९॥
हुत्वा तस्मिन्ततः कृत्स्नं[६९] तुष्टोभूत्परमेश्वरः ।
वरं वृणु हुताश त्वमिति प्रोवाच शङ्करः ॥११०॥
ततो वह्निः प्रणम्येशं वरानभ्यर्थयद्[७०] विभुम्[७१] ।
इच्छेयमेतं[७२] पुत्रन्ते मम नाम्ना प्रकीर्तितम् ॥१११॥

---

५९ वो - क ख. । ६० तां ब्रूत - ख. । ६१ च - क । ६२ तत् - क. ख. । ६३ सुपङ्गवाः - ख. ।
६४ ...स्स्वन्धारितां (?) । ६५ अथ - क । ६६ प्रयच्छत - ख. । ६७ तेषामग्निस्तदा मध्ये - क. ।
६८ ...स्तदात्मीयं - क. । ६९ कृत्स्नं ततस्तस्मिन् - ख. । ७० प्रार्थयद् - क. ख. । ७१ विभुः - क. ।
७२ ...मेतं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शापस्याहमगम्यः स्यां पश्येयं त्वाञ्च नित्यशः ।
धारयेयं सुखेनैतदुत्सृजेयञ्च शङ्कर ॥११२॥
सर्वभक्षोप्यलेपः[७३] स्यां पापन्न च[७४] भवेन्मम ।
मयि देवाश्च यज्ञाश्च प्रतिष्ठां यान्तु शूलधृक् ॥११३॥
अहं भूतेश्वरश्च स्यामहं पशुपतिश्च ह ।
अहं तव तनुः स्याञ्च त्वन्मूर्त्तिस्त्वदुपाश्रयः[७५] ॥११४॥
वरमिच्छामि देवेश दीयमानमिमं[७६] त्वया ।
एवमस्त्विति तत्सर्वं वह्नये प्रददौ विभुः ॥११५॥
विसृज्य च ततो देवान् देवदेवो वृषध्वजः ।
पुनर्विवेश भवनं देवी चैन[७७]मभाषत ॥११६॥
क्व गत्वा त्वमिहायातः क्षिप्रं त्रिभुवनेश्वर ।
किन्तद् गुरुतरं कार्यं येन निर्गतवानसि ॥११७॥
ततः प्रोवाच देवेशः पार्वतीं रुषिताननाम् ।
गतोस्मि त्वरितो देवि देवैर्विज्ञापितः प्रिये ॥११८॥
बहिःस्थैः पद्मपत्राक्षि भक्तिमद्भिस्सुदुःखितैः ।
अथोवाच ततो देवी देवं सर्वजगत्पतिम् ॥११९॥
कथं त्वमागतान्देव बहिःस्थान् त्रिदिवौकसः ।
ज्ञातवानसि सन्त्रस्तान् केनाख्यातञ्च ते विभो ॥१२०॥

देवदेव उवाच

प्रविश्य हुतभुग् देवि मणिस्तम्भं समास्थितः ।
न्ययेदयत् स्तुवन्मह्यं सर्वान्देवान्[७८] बहिःस्थितान् ॥१२१॥
तवैवानुज्ञया[७९] देवि तस्मै[८०] दत्तो वरो मया ।
ततो भगवती क्रुद्धा[८१] नन्दिनं प्राह[८२] पार्वती ॥१२२॥

---

७३ सर्वंमक्षोपलेप्यः - क. । ७४ स्यामापन्न च - ख. । ७५ ...स्त्वदपाश्रयः - क. ख. ।
७६ दीयमानमीदं - ख. । ७७ ञ्चैव - क. ख. । ७८ सर्वदेवान् - ख. । ७९ तवैषाज्ञा मया - ख. ।
८० यस्मै - क, यस्ते - ख. । ८१ ...भवत्सुसंक्रुद्धा - क. । ८२ प्रति - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कथं प्रविष्ट[८३]स्ते वह्निर्द्वारस्थस्येह दुर्मते[८४] ।
ततस्सास्य भृशं क्रुद्धा श्रवण[८५]न्यस्तमुत्पलम् ॥१२३॥
गृहीत्वा वज्रसंकाशं नन्दीशाय व्यसर्जयत् ।
द्वादशादित्यसंकाशं प्रज्वलत्तत्तदोत्पलम्[८६] ॥१२४॥
वधार्थं नन्दिनो[८७] घोरं प्रससार स्फुटन्निव ।
हतो नन्दीश्वर इति प्रोच्योत्थाय च शङ्करः[८८] ॥१२५॥
भद्रं भवोत्पलक्षिप्रमित्युक्त्वागृह्णदुत्पलम् ।
अथोमापि ततो देवी प्रत्यापत्तिञ्जगाम ह ॥१२६॥
अहो वत महत्कष्टं कृतं क्रोधवशान्मया ।
कथञ्चिन्न हतो[८९] नन्दी महागणपनायकः ॥१२७॥
तद् गृहीत्वा ततो हस्ताद् देवस्य श्रवणोत्पलम् ।
चिक्षेप त्वरितं देवी भद्रं भवतु ते सरः ॥१२८॥
एवमुक्त्वा ततः क्षिप्तं[९०] देव्या तच्छ्रवणोत्पलम् ।
विन्ध्यपृष्ठे सरस्तत्र बहुपद्मोत्पलं बभौ ॥१२९॥
हंससारससंकीर्णं चक्रवाकोपशोभितम् ।
नाम्ना भद्रोत्पलमिति हेमश्रृङ्गसमीपतः[९१] ॥१३०॥
तत्र स्नात्वा नरः[९२] क्षिप्रं सर्वपापैः प्रमुच्यते ।
तत्राक्षयं सदा दानं पितृतर्पणमेव च ॥१३१॥
मृतश्चात्र नरो याति नन्दीश्वरसलोकताम् ।
ततो देवं[९३] पुनर्देवी वाक्यमाह गिरेः सुता ॥१३२॥
किमूचुस्त्वां सुरा देव कीदृशं चार्थयन् वरम् ।
कथयामास देवेशस्ततो देव्यै वृषध्वजः ॥१३३॥
देवैर्विज्ञापितो देवि निर्गतोहं वरानने ।
देव्या य एष पुत्रार्थं योगस्ते भुवनेश्वर ॥१३४॥

---

८३ प्रतिष्टवान् - क. । ८४ स्य सुदुर्मतेः - ख । ८५ श्रवणे - ख. । ८६ ज्वलन्तन्तन्तदोत्पलम् - क. ख. । ८७ नन्दिने - क. । ८८ प्रोवाच्योत्थाय शङ्करः - क., प्रोत्थाय च स शङ्करः - ख. । ८९ कथाञ्चिन्निहतो - ख. । ९० क्षिप्रं - क. । ९१ हैमश्रृङ्गसमीपतः - ख । ९२ स्नातो - ख. । ९३ देव - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अशुभान्यत्र दृश्यन्ते दारुणानि सहस्रशः ।
सन्त्रस्ता पृथिवी कृत्स्ना वयञ्च भृशमाकुलाः ।।१३५।।
तेनैष न यथा देव्या गर्भे सञ्जायते सुतः ।
भवेच्च तनयः श्लाध्यो वर एष प्रदीयताम् ।।१३६।।
ततोग्नौ तद्धुतं तेजो मया पुत्रार्थमीश्वरि ।
सुतस्ते भविता श्रीमान् षट्शिरा द्वादशेक्षणः ।।१३७।।
तस्य तद्वचनं श्रुत्वा शशाप गिरिजामरान् ।
यस्मान्मम सुतो देहे नेप्सितं तैर्दुरात्मभिः ।
स्वासु पत्नीषु तस्मात्ते न प्राप्स्यन्ति सुराः सुतम् ।।१३८।।
पृथिवी चापि संमूढा मच्छापोपहतेन्द्रिया ।
बहून्पतीन्समासाद्य न पुत्रं प्राप्स्यते क्वचित् ।।१३९।।

सनत्कुमार उवाच[९४]

विरराम ततो देवी शप्त्वा देवान्सवासवान् ।
कैटभा नाम नाम्ना च पुण्या नैकवरप्रदा ।।१४०।।
विन्ध्यस्य शिखरे हैमे तत्राभूद् गरिजा शुभा ।
पुण्यमायतनं तद्धि शिलाञ्च रमणाह्वयाम् ।।१४१।।
योभिगच्छेन्नरो व्यास मृतस्स गणपो भवेत् ।
अथाजग्मुः सुरास्सर्वे सार्धं तत्र हविर्भुजा ।।१४२।।
विवर्णाः कश्मलोपेताः सगर्भा लज्जयान्विताः ।
तान्द्वाःस्थानागतान्नन्दी शङ्कराय न्यवेदयत् ।।१४३।।
प्रविश्य समनुज्ञाता देवमूचुर्दिवौकसः ।
तेजो न शक्नुमः सोढुमिदं त्रिभुवनेश्वर ।।१४४।।
त्राहि नः सुरलोकेश यथा स्याम गतज्वराः ।
अन्धकश्चासुरोत्यर्थं तप्यते दुश्चरं तपः ।
भयञ्च नस्ततो देव दृश्यते सुमहद्विभो ।।१४५।।

---

९४ वाक्यमेतद् 'विरराम' त्यादिपरवर्तिपद्यार्धानन्तरं पठितं क. पुस्तके ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

देवदेव उवाच

मा भीर्भवतु वो देवा हनिष्याम्यहमन्धकम्[९५] ।
युष्मदर्थे पराक्रान्तं हिरण्याक्षसुतं वरम् ॥१४६॥
यूयञ्च मेरुमध्यस्थं वनं यात सुविस्तृतम् ।
नाम्ना शरवणं[९६] नाम पुण्यं द्वादशयोजनम् ॥१४७॥
युष्माकं तत्र संभिद्य[९७] कुक्षीन्दैवतपुङ्गवाः ।
मदीयं तत्परं तेजो निर्गमिष्यति दीप्तिमत् ॥१४८॥
सुवर्णत्वं[९८] च यास्यन्ति कुक्षयो वः सुरोत्तमाः ।
ततस्ते तद्वचः श्रुत्वा प्रणम्य शिरसा भवम् ॥१४९॥
श्रीमन्तं मेरुमाजग्मुः शरधानं च तच्छुभम् ।
यत्र तेषां तदा भित्वा कुक्षीन्तेजो निरक्रमीत्[९९] ॥१५०॥
युगान्तानलसंकाशं दुर्निरीक्ष्यं सुरासुरैः[१००] ।
मेरुश्चैवाभवत् क्षिप्रं श्रीमानति मनोहरः ॥१५१॥
सर्वं हिरण्मयं चक्रे तेजो माहेश्वरं परम् ।
वाति गन्धवहो[१०१] दिव्यस्सर्वर्तुकुसुमावहः ॥१५२॥
तेषाञ्च कुक्षिभेदास्ते सुवर्णत्वं परं ययुः ।
स्वर्गे दुन्दुभयो दिव्या नेदुः स्वयमनाहताः ॥१५३॥
पुष्पाणां वृष्टयः पेतुस्सुगन्धीनामनेकशः[१०२] ।
नमस्कारैश्च भूतानामदृश्यानामभूत्स्वनः ॥१५४॥
एवमादीनि पश्यन्तः शृण्वन्तश्च सुरोत्तमाः ।
गत्वा पिनाकिने हृष्टास्सर्वमावेद्य सुव्रत[१०३] ।
प्रेषिताः स्थाणुना जग्मुः स्वाँल्लोकान् हृषितानना: ॥१५५॥

---

९५ हंस्ये तमहमन्धकम् - क. । ९६ शरवन - क. । ९७ संमित्त्वा - क. । ९८ सपर्णत्वं - क. । ९९ तेजोभिश्च व्यतिक्रमं (न्) - क. । १०० सुरैरपि - क. ख. । १०१ गन्धर्वरो - क. । १०२ सुगन्धानामनेकशः - क. । १०३ सुव्रताः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

श्रुत्वा देवैरभिहितमिदं प्रीतियुक्तैर्वचोग्र्यं
प्रीता देवी हृदयमहिता पुत्रजन्मप्रवृत्तिम् ।
ज्ञात्वा तस्थौ विबुधवरदा योगमाता विधात्री
तुष्टिञ्चागाद्धृदि सुरशिरःस्पृष्टपादारविन्दा ॥१५६॥

⊙ इति स्कन्दपुराणे स्कन्दजन्मप्रवृत्तिर्नाम द्विसप्ततितमो[१०४]ध्यायः ⊙

व्यास उवाच

अन्धकः कस्य पुत्रोसौ किंवीर्यः किंपराक्रमः ।
कथञ्च निहतः संख्ये सर्वमेतद्वदस्व मे ॥१॥

सनत्कुमार उवाच

शृणु व्यास महाबुद्धे सर्वमेतद्यथाभवत् ।
अन्धकस्य पुरावृत्तं सर्वं वक्ष्यामि ते द्विज ॥२॥
कस्यपस्य सुतौ दित्यां दैत्यौ तौ संबभूवतुः ।
हिरण्यकशिपुर्ज्येष्ठो हिरण्याक्षस्ततोनुजः ॥३॥
ज्येष्ठस्तत्राभवद्राजा हिरण्यकशिपुस्तदा ।
तस्मिन्विनिहते वीरे नरसिंहेन धीमता ॥४॥
हिरण्याक्षोभवद्राजा सर्वदैत्यनमस्कृतः ।
अपुत्रः स तपस्तेपे पुत्रहेतोरिति श्रुतिः ॥५॥
स शंकुकर्णं संप्राप्य सिन्धुसागरसङ्गमे ।
तपस्तेपे दितेः पुत्रो देवं द्रष्टुं पिनाकिनम् ॥६॥

व्यास उवाच

कथं तदभवद्दिव्यं पवित्रं लोकविश्रुतम् ।
शंकुकर्णं महेशस्य क्षेत्रं सर्वार्थसाधकम् ।
यत्फलं पुण्यसंपच्च तन्मे व्याख्यातुमर्हसि ॥७॥

---

१०४ एकसप्ततितमो - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

पुरा हि भगवान्देवः कपर्दी नीललोहितः[१] ।
सिन्धुसागरमागम्य लोकानुग्रहहेतवे ॥८॥
तपःकर्तुं समारेभे यदचिन्त्यं सुरासुरैः[२] ।
दशस्वपि ततो दिक्षु रक्षणार्थं जगत्पतिः ॥९॥
स्थापयामास गणपान् निकुम्भादीन्सहस्रशः ।
शंकुकर्णं महादंष्ट्रं स्थूलाक्षं स्थूलनासिकम् ॥१०॥
ह्रस्वपादकरं चैव दारितास्यं विभीषणम् ।
शार्दूलचर्मसंछन्नं द्वीपिचर्मोत्तरच्छदम् ॥११॥
शंकुकर्णमिति ख्यातं गणेशं सुमहाबलम् ।
समाहूय समीपन्तु भगवानिदमब्रवीत् ॥१२॥
स्वैस्त्वं गणेश्वरैस्सार्धं न विशेयुर्यथा सुराः।
तथा पाहि वनं वत्स यावदेतद् व्रतं मम ॥१३॥
एवं स कृत्वा[३] रक्षां तु महादेवो वृषध्वजः ।
तपस्तेपे महत्तत्र घोरं परमदुश्चरम् ॥१४॥
अथाजग्मुस्सुरास्तत्र सर्वे शक्रपुरोगमाः ।
निरुद्धाः शंकुकर्णेन न चेलुः पदमग्रतः ॥१५॥

देवा ऊचुः

भो गणेशा वयं देवं शर्वमुग्रं कपर्दिनम् ।
द्रष्टुं कार्येण संप्राप्तास्तन्नो दर्शयतानघाः[४] ।
आकुलास्तमपश्यन्तो नश्याम[५] प्रमथेश्वराः[६] ॥१६॥

शंकुकर्ण उवाच

न युष्माभिः सुराः शक्यो[७] देवो द्रष्टुं कथञ्चन ।
तपः कुरुत भद्रं वस्ततो द्रक्ष्यथ शङ्करम् ॥१७॥

---

१ नीललोचनः - ख. । २ सुरैरपि - क. । ३ कृत्वा स - ख. । ४ दर्शय (दंशय?) मानघाः - क. । ५ न स्याम (?), पश्याम - ख. । ६ प्रमथेश्वरं - क. । ७ शक्यं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

देवा ऊचुः

मा लोकानां विनाशः स्याद् गणेश्वर महाद्युते ।
इति प्रयच्छ नो द्वारं प्रसादं कुरु नः प्रभो[८] ॥१८॥

शंकुकर्ण उवाच

लोका नश्यन्तु यूयं वा न प्रवेशः प्रदीयते ।
विनष्टान्[९] पुनरेवेशः स्रक्ष्यते भुवनेश्वरः ॥१९॥
स्रष्टा स एव भूतानां स विनाशयिता तथा ।
तं विना कः सुराः शक्तो लोकान्नाशयितुं विभुम् ॥२०॥
यच्छाम न वयं द्वारमाज्ञा नः पारमेश्वरी ।
त एवमुक्ताः[१०] संचिन्त्य जग्मुर्ब्रह्मसदः सुराः ॥२१॥
ततो निवेदयामासुर्ब्रह्मणस्ते सुरोत्तमाः ।
अथ ब्रह्मा सुरानाह मया सह पुनः सुराः ॥२२॥
गच्छध्वं गणपान् यावत् प्रत्यापत्तिं नयामि वः[११] ।
ततस्ते ब्रह्मणा सार्धं विष्णुना च दिवौकसः ॥२३॥
तमेव पुनराजग्मुस्तिष्ठते यत्र शङ्करः ।
अथ तान्पुनरेवासौ[१२] रुरोध गणपेश्वरः ॥२४॥
शंकुकर्णो गणाध्यक्षस्तेजसा प्रज्वलन्निव ।
अथ ब्रह्मा तमाहेदं सान्त्वमर्थयुतं वचः ॥२५॥
गणेश्वर न देवानां दौष्ट्यं किञ्चिद्धि विद्यते ।
तव प्रसादात्पश्यन्तु देवा देवं[१३] वृषध्वजम् ॥२६॥
शिरसा प्रणतास्तुभ्यं देवाश्चेन्द्रपुरोगमाः[१४] ।
अहं च विष्णुना सार्धं प्रयाचेम गणेश्वर[१५] ॥२७॥
तस्य तद्वचनं श्रुत्वा ब्रह्मणः स गणेश्वरः ।
क्रुद्धः पट्टिशमुद्यम्य वचः प्रोवाच निष्ठुरम् ॥२८॥

---

८ तत्प्रसादं कुरु प्रभो - ख. । ९ विनष्टे - क. । १० एवमुक्तास्तु - क । ११ च - क. ।
१२ पुनरेवाशु - क. ख. । १३ देवदेवं - क. ख. । १४ ...स्सेन्द्रपुरोगमाः - क. ख. । १५ गणपेश्वरः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

न मे गुरुतरो देवाः प्रणामो भवतां त्वयम् ।
आज्ञा गरीयसी शम्भोर्न प्रवेशोऽस्ति कश्चन ॥२९॥
प्रतिषिद्धान्[१६] कथं ब्रह्मन्नियुक्ता रक्षणाय च ।
ईशाज्ञां समतिक्रम्य प्रयच्छाम प्रवेशनम् ॥३०॥
तस्य तद्वचनं श्रुत्वा गणेशस्य महात्मनः ।
एकान्तं प्रययौ ब्रह्मा लज्जया परयान्वितः ॥३१॥
देवाः सर्वे ततो[१७] दृष्ट्वा व्रीडायुक्तं पितामहम् ।
क्रुद्धा मन्युपरीताङ्गा वाक्यमूचुर्गणेश्वरम् ॥३२॥
गणाधिप न ते लज्जा गुरुमाक्रोशसे कथम् ।
नैवं[१८] त्वां विब्रुवन्तं हि क्षंस्यते वृषभध्वजः ॥३३॥
अवमानं पुनर्मैवं[१९] त्वमस्माकं कृथा गण ।
माद्य ते वयमुद्युक्ता नाशयिष्याम जीवितम् ॥३४॥
तेषां तद्वचनं श्रुत्वा शंकुकर्णो रुषान्वितः ।
वचः[२०] प्रोवाच संक्रुद्धस्तिर्यग् वीक्ष्य दिवौकसः ॥३५॥
गुरवः किं भवन्तो मे[२१] येन शङ्कमराधिपाः ।
प्रसाद्य शङ्करं यूयं गता देवत्वमुत्तमम् ॥३६॥
गणभूताः सुरेशस्य यूयमप्यमरोत्तमाः ।
वयमप्यतियोगीशा गणपास्तस्य शूलिनः ॥३७॥
समाना यूयमस्माकं हीना वा त्रिदिवौकसः ।
यस्माद्वयं सुरेशानं पश्यामोनुचराम च ॥३८॥
सर्वैरेव सुरैस्तस्माद्वयं पूज्याः सदाधिकाः ।
पश्यामो निर्भया यूयं प्रवेशं कुरुतामराः ॥३९॥
यावदद्य गणेशानां बलं द्रक्ष्यथ दारुणम् ।
यद्वो बलं च योगश्च[२२] यत्तपो यश्च वः श्रमः ॥४०॥

---

१६ प्रतिषिद्धं(?), ...द्धाः - क । १७ ततो देवास्तथा - ख. । १८ नैव - क. । १९ अपमानं पुनश्चैव - ख. ।
२० तदा - ख; । २१ भवन्त्येते - ख. । २२ योगश्च - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तत्सर्वं दर्शयध्वं वै ततो द्रक्ष्यथ[२३] मे बलम् ।
तस्य तद्वचनं श्रुत्वा सर्वे देवाः सुगर्विताः ॥४१॥
प्रगृहीतायुधाः क्षिप्रं शंकुकर्णं विदुद्रुवुः ।
तेषामापततां व्यास सुराणां शूरमानिनाम् ॥४२॥
बलं जग्राह योगेन शंकुकर्णो महाबलः ।
निगृहीतबलास्ते तु सर्व एव सुरोत्तमाः ॥४३॥
नाशक्नुवन् पदं दातुं तस्थुः स्तम्भा इवाचलाः ।
निगृहीतेषु देवेषु विष्णुः प्रहरतां वरः ॥४४॥
अभिदुद्राव वेगेन शंकुकर्णं गणेश्वरम् ।
स योगेन तदा विष्णोर्देहमस्तम्भयद्बली ॥४५॥
स योगं पुनरास्थाय विष्णुरैश्वर्यसंयुतः ।
युयुधे शंकुकर्णेन स चैनं प्रत्ययुध्यत ॥४६॥
तयोस्तु योगेश्वरयो[२४]र्युक्तयोर्मुनिसत्तम ।
बभूव सुमहद् युद्धं[२५] योगेनैव परस्परम् ॥४७॥
विनिगृह्य स तं विष्णुं गणेशः शर्वबल्लभः ।
पितरं मम योगेन युयोध परमाद्भुतः[२६] ॥४८॥
स[२७] सूक्ष्मं योगमास्थाय ब्रह्मा[२८] भूतान्यथाविशत् ।
यद्यद्विशत्यसौ भूतं ब्रह्मा लोकपितामहः ॥४९॥
तत्र तत्र स्थितं[२९] ह्यग्रे शंकुकर्णमवैक्षत ।
स भूतानि समुत्सृज्य तन्मात्राण्याविशत् प्रभुः ॥५०॥
इन्द्रियाण्यथ तत्त्वानि भावाँश्चैव पितामहः ।
तत्र तत्र स योगात्मा योगं परममास्थितम् ॥५१॥
अपश्यत् स्थूलशिरसं शंकुकर्णं महाबलम् ।
अथास्मिन्नन्तरे व्यास देवदेवस्य शूलिनः ॥५२॥

---

२३ ज्ञास्यथ - ख. । २४ योगीश्वरयो - क. ख. । २५ दुद्रुवुश्च मुहुस्तत्त्वं - ख. । २६ परमाद्भुतं - ख ।
२७ सु - क. ख. । २८ महा - ख. । २९ तत्रास्थितं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दिव्यं वर्षसहस्रं तु प्रययौ द्वादशात्मकम् ।
समाप्तं चाभवद् व्यास व्रतं तस्य महात्मनः ॥५३॥
स समाप्ते[३०] व्रते तस्मिन् युगान्ताग्निसमद्युतिः[३१] ।
अवैक्षत दिशः सर्वा जीवयन्निव[३२] शङ्करः ॥५४॥
सोपश्यन्निगृहीतांँस्तान्[३३] सर्वानेव दिवौकसः ।
साम्नैव स तदा देवः शंकुकर्णं न्यवारयत्[३४] ॥५५॥
सम्यगाज्ञा कृता वत्स त्वया मे गणपेश्वर ।
मुञ्च देवानिमान्सर्वान् मावमंस्था गणेश्वर ॥५६॥
एवं देवेन संप्रोक्तः[३५] शंकुकर्णो गणाधिपः ।
विमुच्य देवताः सर्वास्तस्थौ[३६] देवसमीपतः ॥५७॥
सुरा अपि तदा सर्वे व्रीडया परया युताः[३७] ।
प्रणेमुर्देवदेवेशं भक्त्या परमया विभुम्[३८] ॥५८॥
ताँस्तदा[३९] व्रीडितान्देवः प्रहस्य विदितात्मवान् ।
उवाच ब्रह्मणा सार्धं विष्णुमाभाष्य सुस्वरम्[४०] ॥५९॥
गणेश्वरोयं देवेशा मच्छासनपरस्सदा ।
यदनेन कृतं किञ्चिद् व्येतु तद्वः सुरोत्तमाः ।
कर्तव्यं यच्च तद् ब्रूत यदर्थं यूयमागताः ॥६०॥

ब्रह्मोवाच

शंकुकर्णो ह्ययं श्रीमान् गणेशो येन नो बलम् ।
हतं योगेन देवेश वरोस्मै संप्रदीयताम् ।
अस्मभ्यं परतो दद्यास्सदा[४१] दर्शनमात्मनः ॥६१॥

देवदेव उवाच

अस्यैवेदं भवेन्नाम्ना पवित्रं लोकविश्रुतम् ।
शंकुकर्णमिति ख्यातं तथा स्थूलेश्वरं[४२] शुभम् ॥६२॥

---

३० समाप्ते च - ख. । ३१ समप्रभः - ख. । ३२ क्षीवयन्निव - ख. । ३३ ...तास्त्रान् - ख. । ३४ निवारयत् - क. । ३५ स प्रोक्तः - क. । ३६ देवतान् सर्वान्तिस्थौ - क ख. । ३७ परयान्विताः - ख. । ३८ परमयान्विताः - ख. । ३९ ताँस्तथा - (?) । ४० सर्वशः - ख. । ४१ ...त्सदा - क., शर्वः - ख. । ४२ शूलेश्वरम् - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

समन्ताद्योजनमितं[४३] सर्वतीर्थसमन्वितम् ।
सर्वयज्ञफलैर्जुष्टं सर्वदानफलैर्युतम् ॥६३॥
योत्रागत्य[४४] चरुं कृत्वा मां यत्नेनार्चयिष्यति ।
अहोरात्रोपवासेन मम लोकं स[४५] यास्यति ॥६४॥
यत्किञ्चिन्नियमं कृत्वा योत्र संवत्सरं वसेत् ।
स योगं परमं प्राप्य शंकुकर्णसमो भवेत् ॥६५॥
यश्च प्राणानिह क्षेत्रे त्यजेन्नियममास्थितः ।
स देहभेदमासाद्य महागणपतिर्भवेत् ॥६६॥
पितॄणामक्षयं श्राद्धमिह दत्तं भविष्यति ।
यूयं चैश्वर्यसंपन्नास्तपोयोगबलान्विताः ॥६७॥
नित्यं द्रक्ष्यथ मां देवाः प्रयात विगतज्वराः ।
ततो देवो वरं दत्त्वा देवेभ्यः प्रभुरीश्वरः ॥६८॥
प्रकामं दर्शनं नित्यं तत्रैवान्तरधीयत ।
गते तस्मिन्महादेवे ब्रह्मा सुरवरैर्वृतः ॥६९॥
तत्र लिङ्गं प्रतिष्ठाप्य चक्रे तीर्थान्यनेकशः ।
दशाश्वमेधिकं तीर्थं[४६] पुण्यं[४७] पञ्चाश्वमेधिकम् ॥७०॥
सुराणां चैव तीर्थानि कृत्वा स्वभवनं ययौ ।
एतत्ते कथितं व्यास सिन्धुसागरसङ्गमे ॥७१॥
परं भगवतः स्थानं पवित्रं लोकविश्रुतम् ।
सिद्धचारणसंकीर्णमप्सरोगणसेवितम् ॥७२॥
बहुपुष्पफलोपेतं सदा विहगनादितम् ।
तस्मिन् गत्वा वने व्यास हिरण्याक्षः प्रतापवान् ॥७३॥
पुत्रहेतोस्तपस्तेपे ध्यायमानस्त्रिलोचनम् ।
अथ देवस्तदा गत्वा सगणो वृषभध्वजः[४८] ॥७४॥

---

४३ योजनमिदं - क. ख. । ४४ योभ्यागत्य - क., योभ्यासया - ख. । ४५ च - ख. । ४६ पुण्यं - क. । ४७ तीर्थं - क. ख. । ४८ सगणेशो वृषध्वजः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

रम्यं हिमगिरेः शृंगं मैनाकमिति[४९] विश्रुतम् ।
तस्थौ परमयोगीशः परं ब्रह्म सनातनम् ॥७५॥
तस्यागत्य तदा देवी संस्थिता पृष्ठतः शनैः ।
कराभ्यां पद्मतुल्याभ्यां नेत्रे शम्भोर्न्यमीलयत् ॥७६॥
जानीते नेति संचिन्त्य क्रीडार्थं हिमवत्सुता ।
अथ तस्मिन् क्षणे व्यास जगदन्धमजायत ॥७७॥
अप्रदृश्यं हि तमसा तथाभूतं पुरा यथा ।
अथ देवस्तदा बुद्ध्वा तृतीयं नेत्रमव्ययम् ॥७८॥
ललाटेसृजदूर्ध्वस्थं युगान्ताग्निसमप्रभम् ।
तेजसा तस्य नेत्रस्य स गिरिर्भस्मसादभूत्[५०] ॥७९॥
पार्वती पितरं दृष्ट्वा तथा दग्धं पिनाकिना ।
अपनीय करौ तस्थौ[५१] विषण्णा पतिपार्श्वतः ॥८०॥
अथ देवस्तदा दृष्ट्वा विषण्णवदनामुमाम् ।
सौम्येन चक्षुषापश्यच्छैलं तं[५२] पुनरेव तु ॥८१॥
स तथा[५३] दृष्टमात्रस्तु पुनः पौराणिकोभवत् ।
प्रकृतिस्थं पुनर्दृष्ट्वा देवी पितरमव्ययम् ।
प्रणम्योवाच भर्तारं हृषितास्या[५४] गिरीन्द्रजा ॥८२॥
शैल एष त्वया देव किमर्थं भस्मसात् कृतः ।
किमर्थं प्रकृतिस्थश्च पुनरेव कृतः प्रभो ॥८३॥
तस्यास्तद्वचनं श्रुत्वा प्रोवाच परमेश्वरः ।
लोचने मे त्वया देवि यस्मिन्काले निमीलिते ॥८४॥
अन्धास्समभवँल्लोकास्तदा सर्वे तमोवृताः ।
प्रकाशार्थं ततो देवि नेत्रमेतन्मया कृतम्[५५] ॥८५॥
ललाटे सुमहद्येन दग्धोयमचलोत्तमः ।
त्वाञ्च दीनां पितृवधादुपलक्ष्य ततः शुभे ॥८६॥

---

४९. इति (?) । ५० भस्मसाद्भवत् - क. ख. । ५१ तस्मिन् - ख. । ५२ शैलमपश्यत् - ख. ।
५३ अथवा (अयासौ?) - ख. । ५४ सा - ख । ५५ नेत्रमुन्मीलयावृतं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रियार्थं तव सुश्रोणि प्रकृतिस्थः पुनः कृतः ।
अस्मिंश्च तमसा ग्रस्ते लोके तीव्रेण सर्वतः ।।८७।।
उत्पन्नोन्धः प्रभावेण मम देवि तथैव च ।
तप्यमानाय दास्यामि हिरण्याक्षाय तं सुतम् ।।८८।।
एवमुक्त्वा स भगवान् प्रगृह्यान्धं गणैर्वृतः ।
सिन्धुसागरमागम्य हिरण्याक्षमुवाच ह ।।८९।।
पश्य मां त्वं दितेः पुत्र चक्षुर्दिव्यं ददामि[५६] ते ।
शर्वोहमागतो दैत्य वरं ब्रूहि यथेप्सितम् ।।९०।।
स प्रोत्थाय[५७] हिरण्याक्षः प्रणम्य शिरसा भवम् ।
वरं संप्रार्थयद्[५८] देवं पुत्रं दत्स्वेति सत्वरम् ।।९१।।
तमुवाच सुरश्रेष्ठः शिरसा[५९] पादयोर्नतम् ।
अयन्तेसुरशार्दूल पुत्रः[६०] पुत्रशताग्रजः[६१] ।।९२।।
मावज्ञामन्ध[६२] इत्यस्य कुर्यास्त्वमसुराधिप ।
भविता ते महानेष तपोवीर्यबलान्वितः ।।९३।।
न कस्यचित्वयं[६३] वध्यो मत्तोन्यस्य भविष्यति ।
ततः स भगवान्देवस्तस्मै दत्त्वा सुतं शुभम् ।।९४।।
जगाम शिखरं रम्यं मैनाकं पुनरेव तु[६४] ।
आदायान्धं सुतं सोपि हिरण्याक्षो महासुरः ।।९५।।
स्वमश्मकपुरं[६५] यात्वा भार्यामाह मनस्विनीम्[६६] ।
अयं तुभ्यं सुतो देवि दत्तो भगवता स्वयम् ।।९६।।
संवर्द्धयैनं योगेन मा प्रमादं कृथाः क्वचित् ।
तस्याः स्नेहेन तं दृष्ट्वा स्तनाभ्यां प्रस्नुतं[६७] पयः ।।९७।।
संवर्ध्यमानः[६८] कालेन सोन्धकः समवर्द्धत ।
यदा[६९] तु यौवनं प्राप्तस्तदैवं[७०] समचिन्तयत् ।।९८।।

---

५६ ददानि - क. ख । ५७ चोत्थाय - ख. । ५८ वरमप्रार्थयद् - क. ख. । ५९ चिरया(मा?) - ख. ।
६० पुत्रं - क. ख. । ६१ पुत्रशताग्रजं - क., ...जः - ख. । ६२ अन्ध - क. । ६३ ...दयं - ख. ।
६४ च - ख. । ६५ स्वकीयं पुन (र) - ख., स्वयमन्तःपुरं - (?) । ६६ यशस्विनीम् - क. ।
६७ प्रस्नुतां - क. ख. । ६८ संवर्द्धमानः - ख. । ६९ यथा - ख. । ७० ...स्वदैव - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

धिग् जीवितं ममान्धस्य मृत्युरेव वरो मम ।
योहमन्धो न पश्यामि गृह[७१]संबन्धिबान्धवान् ॥९९॥
धन्यास्ते पुरुषा लोके ये स्वयं यान्त्यविक्लवाः ।
दृष्ट्वा दृष्ट्वा मुखं बन्धूनाभाष्य हि[७२] यथासुखम् ॥१००॥
कार्यं भवेच्च लोष्टेन तृणेनाथ शवेन[७३] वा ।
न मयानुगृहीतेन धिङ्मामशुभकारिणम् ॥१०१॥
सुतस्नेहादयं दैत्यः सदा मां रक्षते पिता ।
हन्तव्यं न विहन्त्येष कोषक्षयकरं हि माम् ॥१०२॥
नायं स्नेहेन संमूढो जानातीमां मम व्यथाम् ।
अहमेव करिष्यामि यत्कार्यं बुद्धिमत्तमैः[७४] ॥१०३॥
तपो महत्समास्थाय चक्षुष्मान् भविता ह्यहम् ।
स एवं परिनिश्चिन्त्य[७५] बहुधान्धः सुबुद्धिमान् ॥१०४॥
आमन्त्र्य सहितं[७६] मात्रा पितरं तं प्रणम्य च ।
जगाम तपसे[७७] धीमान् संकल्प्य कृतनिश्चयः ॥१०५॥
पित्रा शोकपरिप्लुतेक्षणमुखेनायासखिन्नात्मना
मात्रा चासकृदश्रुपातमुखया संवीक्ष्यमाणश्चिरम् ।
तत्तीव्राधृतिखेददृष्टिविरह[७८]प्रक्ष्वेडितोन्धः श्वसन्[७९]
ध्यायन्देवमुमापतिं स[८०] तपसे यातो गृहादन्धकः ॥१०६॥

⊙ इति स्कन्दपुराणे अन्धकोपाख्याने तपःप्रयाणं[८१] नाम त्रिसप्ततितमो[८२]ध्यायः ⊙

सनत्कुमार उवाच

अथ गत्वा स विप्रेन्द्र हिरण्याक्षसुतस्तदा ।
गङ्गाद्वारं शुभद्वारं तपोवनमनुत्तमम् ॥१॥

---

७१ गृहे - क. । ७२ मुखां हि बन्धूनां भाषन्ते - ख, मुखांस्वबन्धूनामाभाषन्ते (?), सुखां हि बन्धूनां - क. । ७३ शरेण (?) । ७४ ...सत्तमैः - क. ख. । ७५ परिनिश्चित्य - (?) । ७६ सहितो - ख. । ७७ तपसो - क. ख. । ७८ दृष्टिखेदविरहं - क. । ७९ प्रक्षोधितोन्त्रः श्वसन् - ख., प्रख्यापितान्तः स्मयन् - घ. । ८० ध्यायन्पादमुमापतेः - क. टि., ...मुमापतेस्स - क. । ८१ अन्धकतपः प्रयाणे - ख. । ८२ द्विसप्ततितमो - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दिव्यं कनखलं नाम यत्र हैरण्वती नदी ।
वृक्षाः कनखला यत्र सर्व एव हि काञ्चनाः ॥२॥
यत्र दक्षः पुरा यज्ञमयजद् दैवतैस्सह[1] ।
महादेवेन यत्रास्य यज्ञो विनिहतःपुरा ॥३॥
तत्रासौ देवमभ्यर्च्य स्नातः प्रयतमानसः ।
नमस्कृत्वा दैवतेभ्य इदं वचनमब्रवीत् ॥४॥

अन्धक उवाच

येस्मिन् तपोवने देवा भूतानि विविधानि च ।
सर्वांस्ताञ्छरणं यामि तपःसिद्धिं दिशन्तु मे[2] ॥५॥
अद्यप्रभृति कर्त्तास्मि तप[3] उग्रं सुदुश्चरम् ।
वरान् येनाप्नुयामिष्टान्मृत्युं वा प्राणनाशनम् ॥६॥

सनत्कुमार उवाच

स एवमुक्त्वा तु ततः पाराशर्य महाबलः ।
संवत्सरं वायुभक्षो बभूव क्लमवर्जितः ॥७॥
तथा त्रिषवण[4] स्नायी जुह्वानोग्नीं स्तथैव च[5] ।
देवार्चनरतश्चैव जपहोमपरस्तथा[6] ॥८॥
वर्षे वर्षे तु[7] संपूर्णे स्वाङ्गादुत्कृत्य कार्षिकम्[8] ।
पिशितस्य तदा भागं जुहावाग्नौ महासुरः[9] ॥९॥
एवं तस्यागमद्दिव्यं सहस्रं मुनिसत्तम ।
जुह्वतः स्वानि मांसानि वर्षाणां प्रत्यहं तदा ॥१०॥
सोसुरः शंखहाराम्बुसुधाकुन्देन्दुपाण्डरः ।
बभूवास्थिसिराशेषः केवलं[10] तपसि स्थितः ॥११॥
स तेन तपसा युक्तो भास्करं निष्प्रभं तदा[11] ।
सोमं च ग्रहताराभिस्सह चक्रे मितात्मवान् ॥१२॥

---

१ देवतैस्सह - क. ख. । २ मास् - ख. । ३ ...स्मिन्तप - क. । ४ त्रिषवणं - क. । ५ जुह्वानोग्नि तथैव च - क. ख. । ६ जप्यहोमपरस्तथा - क. ख. । ७ वर्षेथ - ख. । ८ कायिकम् - क. । ९ महासुतः - ख. । १० केवले - ख. । ११ तथा - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स एव भास्करो यद्वत् प्रकाशयति तेजसा ।
अशोषयत् पल्वलानि नदीकूपसरांसि च ।।१३।।
पवनं स्तम्भयामास सोन्धकस्तपसा तदा[१२] ।
व्योम्नि सिद्धा न गच्छन्ति विमानानि च पेतिरे[१३] ।।१४।।
तस्य तत्तपसो रूपं दृष्ट्वा विघ्नशतान्युत ।
अकरोत् सहसा शक्रो विक्रियां न च सोन्वगात् ।।१५।।
ततो ब्रह्मा तमभ्येत्य[१४] प्रोवाचान्धकदानवम् ।
महासुर तपो घोरं त्वया तप्तं महाबल ।
तुष्टोस्मि ते[१५] महाबाहो चक्षुष्मान्भव सुव्रत ।।१६।।
शरीरं प्रकृतिं यातु यथापूर्वञ्च तेसुर ।
ब्रूहि चान्यं वरं भूयो यस्ते मनसि संस्थितः ।।१७।।

सनत्कुमार उवाच

स चक्षुष्मांँस्तदा[१६] भूत्वा शरीरेणाक्षतेन च ।
उवाच प्रणतः साक्षाद्[१७] ब्रह्माणं लोकभावनम् ।।१८।।

अन्धक उवाच

भगवन् यदि तुष्टोसि यदि मे चरितं तपः ।
अप्रतिद्वन्द्वतां[१८] संख्ये दैवतेभ्यः पितामह ।।१९।।
महाबलत्वं मायाश्च[१९] तथा चामरतामपि ।
एतदिच्छामि देवेश यदि त्वं वरदो मम ।।२०।।

सनत्कुमार उवाच

तस्य तद् वचनं श्रुत्वा प्रहस्य भगवान् विभुः ।
हिरण्याक्षसुतं प्राह पुनरेव वचः शुभम् ।।२१।।
अमरत्वं न दैत्यस्य ददामि[२०] दितिनन्दन ।
सान्तरं तु भवेत्तत्तो स्वयमेवोत्तरं वद ।।२२।।

---

१२ . स्तपसस्तथा - ख. । १३ पेदिरे - ख. । १४ ब्रह्माणमभ्येत्य - ख. । १५ तुष्टोस्मिन्ते - क. ।
१६ चक्षुष्मांस्तु तदा - ख. । १७ सार्धं (सोन्धः?) - ख. । १८ अप्रतिद्वन्द्वता - ख. । १९ च - ख. ।
२० ददानि - क., ददाति - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अन्धक उवाच

या स्त्री स्याल्लोकमाता वै प्रणमेयं न तां यदि ।
तदा स्यान्मम मृत्युस्तु मृत्युहीनोन्यथा[२१] ह्यहम् ॥२३॥

ब्रह्मोवाच

एवमेतद् भवतु ते त्वया प्रोक्तं यदद्य वै[२२] ।
अन्धको भव नाम्ना त्वं लोके ख्यातिं च यास्यसि ॥२४॥

सनत्कुमार उवाच

एवमुक्त्वा स भगवानन्धकं देवकण्टकम्[२३] ।
जगाम स्वं तदावासं विररामान्धकश्च सः ॥२५॥
स गङ्गाम्भोभिराप्लुत्य देवमिष्ट्वा यथाविधि ।
अग्निं हुत्वा ततो धीमाननुमान्य तपोवनम् ।
सहायैस्सह दैत्येन्द्रो जगाम[२४] पितुरन्तिकम् ॥२६॥
स हृष्टचेतास्तपसा[२५] महाबलो विवृद्धकामः सुरशत्रुतोषणः ।
पितुस्सकाशं पुनरेव दीप्तिमानगच्छदुद्धूतबलाहकोपमः ॥२७॥

⊙ इति स्कन्दपुराणे अन्धकवरलाभो नाम[२६] चतुःसप्ततितमो[२७]ध्यायः ⊙

सनत्कुमार उवाच

सोष्टाभिर्दानवैस्सार्धं गत्वा तत्पुरमन्तिके ।
निवेदयामास पितुः कृतार्थोन्धक आगतः ॥१॥
प्रियाख्यातुस्ततो[१] व्यास हिरण्याक्षोसुरेश्वरः[२] ।
ददौ रत्नान्यनेकानि तथा कामानभीप्सितान् ॥२॥
स्वयं राजा तदा[३] सर्वैः सुहृद्भिः सहवाहनैः ।
सह स्त्रीभिर्ययौ तूर्णं सोमस्तारागणैरिव ॥३॥

---

२१ यथा - क. । २२ यदन्धक - ख. । २३ लोककण्टकम् - ख. । २४ दैत्येन्द्रैर्जगाम - ख. ।
२५ प्रहृष्टचेतास्तपसा - ख., ...सां - ख. । २६ प्रदानो नाम - ख., प्रदान नाम - घ. । २७ त्रिसप्ततितमो - क. ।

१ प्रियाख्यातुं ततो - ख । २ महासुरः - ख. । ३ ततः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स गत्वा नातिदूरेथ वने साशोकचम्पके ।
आससाद सुतं श्रीमान्[४] सोमो बुधमिवापरम् ॥४॥
कृतार्थं स सुतं[५] दृष्ट्वा तुष्टोभूद्दानवेश्वरः ।
स्नेहात्स तं[६] परिष्वज्य मूर्ध्न्युपाघ्राय चासकृत् ॥५॥
कथं केन च कालेन के च लब्धा वरास्त्वया[७] ।
पृष्टः स कथयामास यथावृत्तमशेषतः ॥६॥
तस्य तद्वरदानञ्च तथा माहात्म्यमेव च ।
श्रुत्वा तेसुरशार्दूलाः[८] प्रणेदुः सागरा इव ॥७॥

सनत्कुमार उवाच

ततस्तं रथमारोप्य[९] हिरण्याक्षोन्धकं सुतम् ।
सुहृद्भिस्तैः सहैवाशु प्रविवेश स्वकं पुरम् ॥८॥
स पुत्रसहितो भाति दैत्यः संपूर्णमानसः ।
चरन् राशिमिवादित्यो यथा सहशनैश्चरः ॥९॥

सनत्कुमार उवाच

ततः प्रविश्य दैत्येन्द्रः सुहृद्वर्गमुवाच सः[१०] ।
अध्वर्युरिव[११] सान्नाय्ये[१२] यथान्यानृत्विजः स्थितान्[१३] ॥१०॥

हिरण्याक्ष उवाच

शृणुध्वं यदिदानीं मे कृत्यं हृदि चिरस्थितम् ।
कर्तव्यं सह सर्वैस्तु युष्माभिर्भीमविक्रमैः ॥११॥
मया मनीषितं पूर्वं कृतकृत्य इहागते ।
अन्धके नगरेस्मिन्वै कर्ताहं कौमुदीमिति ॥१२॥
मखघ्नस्य च देवस्य देवरात्रि महाप्रभाम्[१४] ।
करिष्यामीति तत्सर्वं क्रियतामविशंकया ॥१३॥

---

४ धीमान् - ख. । ५ तु तं - क. ख. । ६ ...त्सुतं (?) । ७ इति (?) । ८... सुरशार्दूलाः - ख. ।
९ रथमारोह्य - ख. । १० ह - क. । ११ अध्वर्युःसह - ख. । १२ सायाह्ने - क., सामाह्ने - ख. ।
१३ शुभान् - क. ख. । १४ प्रभोः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

घुष्यतां नगरे ह्यस्मिँश्चत्वरेषु सभासु च ।
कौमुदीदिवसानष्टौ[१५] सप्त चैव ममाज्ञया ॥१४॥
तावदेव च देवस्य सन्तु मे देवरात्रयः ।
सुहृदो ये च दैत्येन्द्रा दानवाश्च महाबलाः ॥१५॥
सर्वासु दिक्षु तेपीह समायान्तु रमन्तु च ।
अस्मत्पक्षे च ये विप्राः शुक्रप्रभृतयः शुभाः ॥१६॥
नागा रक्षांसि यक्षाश्च गन्धर्वा मनुजास्तथा ।
तेपि सर्वे समायान्तु रमन्तु च मया[१६] सह ॥१७॥

सनत्कुमार उवाच

त एवमुक्ता दैत्येन्द्रा हिरण्याक्षेण धीमता ।
तथा चक्रुस्तदा सर्वं[१७] यथोक्तममरद्विषा ॥१८॥
दूतान् संप्रैषयन्[१८] क्षिप्रं दैत्यानां दानवैस्सह ।
तथान्येषां च पक्षाणामात्मनः शक्तिनन्दन ॥१९॥
निमन्त्रयति वो राजा हिरण्याक्षो महाबलः ।
सुहृद्वर्गैस्तु[१९] सहिता गच्छध्वं तं दिदृक्षवः ॥२०॥
घण्टिक[२०]श्चाहतैर्वस्त्रैर्वेष्टितः सुविभूषितः ।
आरूढः पाण्डरं मत्तं गजं समवघोषयत् ॥२१॥
राजा जयति दैत्येन्द्रो हिरण्याक्षः प्रतापवान् ।
हता दैत्यद्विषः सर्वे दानवाञ्च शत्रवः ॥२२॥
जयाय दितिपुत्राणामादित्यानां भयाय[२१] च ।
प्रातःप्रभृति राजा व आज्ञापयति कौमुदीम् ॥२३॥
देव[२२]रात्रिं च[२३] देवस्य रुद्रस्य सुरनाशनीम्[२४] ।
सुसंमृष्टोपलिप्ताभी रथ्याभिः क्रियतां पुरम्[२५] ॥२४॥

---

१५ दिवसे चाष्टौ - ख. । १६ हा - क । १७ सर्वे - ख. । १८ दूतानप्रेषयन् - क. ख. । १९ ...श्च - ख ।
२० घण्टिक - ख. । २१ जयाय - क. । २२ दीप (?) । २२ ... रात्रीश्च - ख. । २४ सुरनाशनी: - ख ।
२५ परां - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वासोभिरहतैः सर्वे भवन्तु[२६] पुरवासिनः ।
स्रग्विणः सशिरःस्नाता दत्तभुक्ता[२७] यथाक्रमम् ॥२५॥
गायन्तु गायनाश्चैव नृत्यन्तु नटनर्तकाः ।
उच्छ्रियन्तां पताकाश्च गृहवीथ्यापणेषु च ॥२६॥
गृहाणि चोपलिप्तानि नित्यमेव भवन्तु च[२८] ।
पुष्पप्रकरजुष्टानि[२९] धूपैर्नानाविधैरपि ॥२७॥
स्रग्दामवन्ति सर्वाणि वनमालाकुलानि च ।
ब्राह्मणाश्चैव[३०] भोज्यन्तां क्रियन्तां वाचानि[३१] च ॥२८॥
ब्रह्मघोषाश्च सर्वत्र पुण्याहोदीरणानि च ।
दीपरात्रौ च सर्वत्र राजमार्गे गृहेषु च[३२] ॥२९॥
अनन्तराः[३३] क्रियन्तां वै प्रचुरस्नेहवर्त्तयः ।
तरुणाः सह योषिद्भिस्समन्तात्पर्यटन्तु[३४] च ॥३०॥
रममाणा हसन्तश्च गायन्तो नृत्तसेविनः ।
भाण्डवाद्यानि वाद्यन्तां नृत्यन्तां दैत्ययोषितः ॥३१॥
महादेवस्य पूजां च[३५] गन्धपुष्पादीकीं शुभाम् ।
उपहारांश्च विविधान् स्नपनानि[३६] महान्ति च ॥३२॥
वलयः पुष्कला[३७]श्चैव भक्ष्यभोज्यैरलंकृताः ।
दीपांश्च विविधाकारान् पानानि च रसांस्तथा[३८] ॥३३॥
फलानि च विचित्राणि मांसपक्वमनूपकम् ।
सुवर्णमणिचित्राणि ईश्वराय प्रयच्छत ॥३४॥
वद्ध्यन्तां पशवश्चात्र भोज्यन्तां द्विजसत्तमाः ।
यो न कुर्यादिदं सर्वं पुरवासी जनः[३९] क्वचित् ।
पातयेत्तस्य शारीरं राजा दण्डं[४०] महायशाः[४१] ॥३५॥

---

२६ सर्वैर्भवन्तु - क. । २७ दत्तपक्ता - क., दन्तपंक्त्या - ख, दत्तपक्षा (भक्षा?) - घ. । २८ वः - क. । २९ पुष्पप्रकारैर्जुष्टानि - ख. । ३० ...श्चापि - ख. । ३१ वाचकानि - ख. । ३२ गृहेगृहे - ख. । ३३ अनुत्तराः - क. । ३४ रमत्ताः पर्यटन्तु - ख. । ३५ पूजाश्च - क. ख. । ३६ स्नापनानि - ख. । ३७ पुष्कुलाः - ख. । ३८ सरसानि च - ख. । ३९ नरः - क. ख. । ४० राजदण्डं - ख. । ४१ महायसः - ख.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

एवं स[४२] घोषयित्वा तु घाण्टिको हस्तिपृष्ठतः[४३] ।
जगाम स्वगृहं भूयः कौमुदी चाभ्यवर्तत[४४] ॥३६॥
यथोक्तं तत्तदा सर्वमकुर्वत पुरे जनाः ।
राजापि संयतः स्नातः शुचिः प्रयतमानसः ॥३७॥
दिवसे दिवसे व्यास स्नपयामास[४५] यत्नवान् ।
पञ्चगव्येन शुद्धेन तैलेन च सुगन्धिना ॥३८॥
क्षीरेण सर्पिषा दध्ना रसैश्च बहुभिः शुभैः ।
पुष्पैः फलैश्च बीजैश्च रत्नैश्चाद्भिः समन्वितैः[४६] ॥३९॥
भस्मना गन्धयुक्तेन उदकेन सुगन्धिना ।
एकैकस्य स्वयं राजा घटानां[४७] दशभिः शतैः ॥४०॥
दिवसे दिवसे व्यास त्र्यम्बकं सोऽभ्यसेचयत् ।
गन्धैः पुष्पैश्च धूपैश्च जप्यैर्बलिभिरेव च ॥४१॥
पूजयित्वा ततो राजा विप्रानन्यानभोजयत्[४८] ।
स कृत्वा पशुभिर्मेध्यै रत्नैर्मणिभिरेव च ॥४२॥
बलिशय्यासनाद्यैश्च स्तूयमानो गृहान्ययौ ।
तथैवान्येपि दैत्येद्राः सोन्धकश्च महाबलः ॥४३॥
चक्रुः सर्वे मुनिश्रेष्ठ यथा राजा तथैव ते[४९] ।
अन्धकं[५०] स गृहीत्वा तु[५१] हिरण्याक्षः प्रतापवान् ॥४४॥
पद्भ्यामपातयद् व्यास रुद्रस्येदमुदाहरन् ।
एष देवः[५२] सदा पुत्र तवास्तु सुमुखः प्रभुः ॥४५॥
अस्मिन् भक्तिस्त्वया कार्या भाविता परमेश्वरे ।
एष वन्द्यश्च पूज्यश्च अतो नास्ति परो गुरुः ।
पूजयेथाः सदैवैनं भक्तितः परमेश्वरम् ॥४६॥

---

४२ सं - ख. । ४३ हस्तिपृष्ठगः - ख. घ । ४४ चास्य - क., चाप्यवर्तत - घ. । ४५ स्नापयामास - क. ।
४६ रत्नैश्चापि समन्ततः - ख. । ४७ घंटानां - क. । ४८ ... नन्यांश्च भोजयत् - क. । ४९ च - ख. ।
५० अन्वं ...- क. । ५१ सुगृहीतं तु - ख. । ५२ देव - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

स एवमुक्त्वा प्रणिपत्य शंकरं महासुरः सोसुरदानवेश्वरः ।
जगाम धीमान् पुनरेव निर्वृतो[५३] निवेशनं देवपतिर्यथा स्वकम् ।।४७।।

⊙ इति स्कन्दपुराणे कौमुदीमहोत्सवो नाम[५४] पंचसप्ततितमो[५५]ध्यायः ⊙

सनत्कुमार उवाच

अथ तस्यां सह स्त्रीभिः कौमुद्यां दैत्यदानवाः ।
रेमिरे रक्तमनसो देवाः स्वर्गगता इव ।।१।।
तत्र काचिच्छुभापाङ्गी पद्मं दिव्यं मुखोपरि ।
मुखारविन्दत्राणार्थं ददौ सोमभयादिव ।।२।।
अपरा चरणेनैत्य[१] प्रियं मत्ताभ्यताडयत् ।
शीतांशुरिव पादेन विकचं शरदम्बुजम्[२] ।।३।।
अपरा राजमार्गाणामनभिज्ञाः कुलस्त्रियः ।
स्फाटिकोपचितां भूमिं दृष्ट्वा मुञ्चन्ति पादुकाम् ।।४।।
उत्कृष्य वसनं चान्या[३] विप्रेन्द्र जलशङ्कया ।
राजमार्गेषु गच्छन्ति दृष्ट्वा मणिचितां भुवम् ।५।।
काचित् प्रियेण सन्त्यक्ता रक्तेनान्येन निर्गता ।
गृहाच्चन्द्रांशुभिः स्पृष्टा पपात मदनालसा ।।६।।
पतितैव[४] च सा सोममुवाचेदं कुलाङ्गना ।
भूयो मां त्वं करैस्तीक्ष्णैर्दहसे नलिनीमिव ।।७।।
सूर्येण किल दग्धानि जीवयस्यौषधानि ह ।
मदनेन कथं दग्धां न जीवयसि मां दृढम् ।।८।।

---

५३ निर्वृंति - ख. । ५४ पुरप्रवेशो नाम - घ. । ५५ चतुःसप्ततितमो - क. ।
१ नेत्य - क. ख. । २ शरदविकचाम्बुजं - ख. ३ मान्या - क. । ४ पतिता - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

काश्चिद्[५] रमण्यो दोलासु दोलयन्त्यो परस्त्रियः ।
जलचन्द्र इवाभान्ति वीचिचञ्चलमूर्त्तयः ॥९॥
केचिद् गायन्ति सहिताःस्त्रीभिर्दैत्या महाबलाः ।
गन्धर्वा नन्दनवने अप्सरोभिर्यथा सह ॥१०॥
राजमार्गः क्वचिद् भाति स्त्रीभिर्बह्वीभिरावृतः ।
यथा नभसि चित्रोऽसौ दिव्यो देवपथः शुभः ॥११॥
क्वचिन्नूपुरकाञ्चीनां कोकिलानाञ्च[६] निस्वनः ।
बभौ श्रोत्रसुखः श्रोतुः[७] कलामदनदीपनः ॥१२॥
क्वचिद्रमणरक्तानां स्त्रीणां व्यास प्रियैः सह ।
हृदयव्याकुलकरः श्रूयते मधुरः स्वरः[८] ॥१३॥
एवं समभवद् व्यास बहुचित्रः स उत्सवः[९] ।
दानवानां तदा प्रीतिसौख्यविश्रम्भवर्द्धनः ॥१४॥
तस्मिन्नुपरये भूयः पूर्ववत्संप्रतिष्ठिते ।
प्रकृतिस्ते जने व्यास दानवास्ते समागताः ॥१५॥
विविशुर्भीमसंह्लादाः सभां दिव्यां मनोरमाम् ।
जाम्बूनदमयस्तम्भां वज्रवैदूर्यवेदिकाम् ॥१६॥
मुक्तादामावलम्बाढ्यां[१०] स्रग्दामोत्तमभूषिताम् ।
वज्रवैदूर्यनीलेन्द्रमहानीलाग्रपल्लवैः ॥१७॥
लोहितैः स्फाटिकैश्चैव तथा मरकतैरपि ।
दिव्यजालोपसन्नद्धां[११] किङ्किणीचित्रशोभिताम्[१२] ॥१८॥
बहुपुष्पफलैश्चैव सर्वकामप्रदैर्द्रुमैः ।
उपेतां दीर्घिकाभिश्च बहुशय्यासनां शुभाम् ॥१९॥
अक्लमां बहुनिष्यन्दां[१३] सर्वदुःखविवर्जिताम् ।
सर्वकामसमृद्धां च बहुस्त्रीपुरुषाकुलाम् ॥२०॥

---

५ काचिद् - क. । ६ नूपुराणां च - ख. । ७ श्रोतुं - क. ख. । ८ स्वनः - ख. । ९ .. स्तदोत्सवः - क. ।
१० विलम्बान्तां - ख. । ११ दीव्यज्जालोपसन्नद्धां (?), दिव्यलाजो ... - ख., दिव्यचित्रो ... (?) ।
१२ ...जालशोभिताम् - (?) । १३ निस्पन्नां - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विविशुस्तां सभां दिव्यां दैत्या दर्पसंमावृताः ।
प्रह्लादश्चानुह्लादश्च सिनिर्वाष्कल एव[14] च ॥२१॥
विरोचनो बलिश्चैव बलिपुत्राश्च विश्रुताः ।
सहस्राणि दश द्वे च येषां श्रेष्ठो महाबलः ॥२२॥
बाणो नाम महामायो राजा बाहुसहस्रधृक् ।
बाणस्य पुत्रा ये चान्ये सहस्राणि दशैव ते ॥२३॥
मुरो धमुषुमण्डश्च (?) विप्रचित्तिश्च दानवः ।
कालो हयशिराश्चैव सम्बरः कालसम्बरः ॥२४॥
विश्रुतश्चेन्द्रदमनः कालनेमी च दानवः ।
तथा सुन्दनिसुन्दौ च विपाकः पाक एव च ॥२५॥
राहुश्च शतकेतुश्च ध्वजस्तारः सतारकः ।
महिषो दुन्दुभिश्चैव कालकश्च महाबलः ॥२६॥
अन्धकश्च तथाटिश्च बकः शरभ एव च ।
स्वर्भानुर्वृषपर्वा च मधुः कैटभ एव च ॥२७॥
महाकायः शतानन्दः शतदुन्दुभिरेव च।
कार्त्तस्वनश्च हस्ती च बलो नरक एव च ॥२८॥
ध्वाङक्षो मूकेल्वलौ चापि वातापी सासृपुञ्जिकः ? ।
कण्डलश्चैव मीढश्च दुर्लोमा चैव विश्रुतः ॥२९॥
धुन्धुश्च शतमायश्च शतावर्तोथ दुस्सहः ।
चन्द्रसूर्यौ नरश्चैव देवान्तकनरान्तकौ ॥३०॥
ब्रह्महा यज्ञहा चैव इल्वलः (?) पिल्वकस्तथा ।
मयश्च दानवश्रेष्ठो मयपुत्राश्च विश्रुताः ॥३१॥
तेषामष्टौ सहस्राणि सर्वे च कृतनिश्चयाः ।
वृत्रश्च दानवश्रेष्टो नमुचिर्भजहस्तथा ॥३२॥
शतोदरश्च व्यंसश्च ताथायश्च (?) ह्रदोदरः ।
केशी तथा प्रलम्बश्च कबन्धो धेनुकश्च ह ॥३३॥

---

१४ वाष्कलिरेव - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

हालो गार्ग्यशिराश्चैव कुशः शम्भुस्तथैव च ।
तथा गगनमूर्धा च सालुकः शाल्व एव च ॥३४॥
मेघनादश्च विख्यातो महानादस्तथैव च
खरोथ खररोमा च सूचीलोमा च दानवः ॥३५॥
परिघोपरिघश्चैव दण्डः काश्यप एव च ।
दुन्दुभिश्च महाकायः सैंहिकेयश्च यो गणः ॥३६॥
तथा हालाहलश्चैव अन्धकारक एव च ।
पौलोमाः षष्टिसाहस्राः कालकेयाश्च[१५] विश्रुताः ।
कालकञ्जाः सहस्राणि अष्टौ ते देवकण्टकाः ॥३७॥
निवातकवचानाञ्च तिस्रः कोटचो महाबलाः ।
ता एता गणिताः सर्वाः कोटचः षष्टिः सुरद्विषाम् ॥३८॥
तत्पक्षान् वर्जयित्वा तु मनुष्यान्पन्नगानपि ।
राक्षसाँश्च[१६] पिशाचाँश्च[१७] यक्षान्[१८] पक्षिण एव च ।
तेषामपि तदा व्यास कोटचो विंशतिसंमिताः[१९] ॥३९॥
ते तां सभां समाविश्य सर्वे दर्पात् सुरद्विषः ।
सविद्युदुल्का भान्ति स्म प्रावृड्जलधरा इव ॥४०॥
ते स्वनन्त[२०] इवाम्भोदाः सधूमा इव पर्वताः ।
महिषा इव नर्दन्तः केतवोनागता इव ॥४१॥
उत्पाता इव निर्मुक्ताः सविषा इव पन्नगाः ।
गजा इव च संमत्ताःपवना इव वेगिताः ॥४२॥
सुराणां विप्रकारार्थं तस्थुरापूर्य तां सभाम् ।
अथ गत्वा सभापालो राजानमिदमब्रवीत् ॥४३॥
सुखासीनं तदा व्यास सिंहासनगतं युवा ।
प्रणम्य शिरसा पूर्वं जानुभ्यामवनिं गतः ॥४४॥

---

१५ कालकेशाश्च - क । १६ राक्षसाश्च - क. । १७ पिशाचाश्च - क. । १८ यक्षाः - क. । १९ संगताः - क. ।
२० स्वनन्त - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

बद्धाञ्जलिपुटः सम्यग् वाचा श्लक्ष्णपदाक्षरम् ।
स्वामी[२१] जयतु सर्वेषामसुराणां जयावहः ॥४५॥
प्रह्लादाद्याः[२२] सभां सर्वे विप्रचित्तिपुरोगमाः ।
प्राप्ता विदितमस्त्वेव यदन्यत् कर्तुमर्हसि[२३] ॥४६॥

सनत्कुमार उवाच

ततः सुरद्विषः श्रुत्वा सर्वान्प्राप्तान् सभां तदा ।
उत्तस्थौ सहसा राजा शक्रकेतुरिवोत्सवे ॥४७॥
स किरीटी महादंष्ट्रो मुंजकेशो महाहनुः ।
आकर्णाद्दारितास्यश्च महाच्छत्रशिरास्तथा ॥४८॥
आजानुबाहुर्वृत्ताक्षः पिङ्गाक्षश्चोर्ध्वरोमवान् ।
वज्रसंहननश्चैव महायोगी महाबल ॥४९॥
किरीटेनाति संभाति सवित्रेवोदयस्तथा ।
हारवर्याङ्कितोरस्कः सबलाक इवाम्बुदः ।
सपुत्रः प्रययौ व्यास हिमवानिव मूर्त्तिमान् ॥५०॥
स तां तदा दानवराजसत्तमो विचित्ररत्नांशुपरीतकुण्डलः ।
सभां विवेशासुरदैत्यपुंगवैः समावृतां द्यामुदितैर्ग्रहैरिव ॥५१॥

⊙ इति स्कन्दपुराणे हिरण्याक्षस्य सभाप्रवेशो नाम षट्सप्ततितमो[२४]ऽध्यायः ⊙

सनत्कुमार उवाच

स गत्वा तां सभां व्यास अपश्यद् दैत्यदानवान्[१] ।
प्रावृट्कालेम्बुदान्मत्तान् यथेन्द्रः समुपस्थितान् ॥१॥
तस्य प्रविष्टस्य[२] तदा सर्व एव सुरद्विषः ।
जयेति चक्रुरुत्थाय वेदा इव पितामहम् ॥२॥

---

२१ स्वामिन् - क. टि. २२ प्रह्लादाभ्यां - क. । २३ ...मर्हति (?) ।.२४ पंचसप्ततितमो - क. ।
१ इतः परं हिरण्याक्षकर्तृकवराहदर्शनावधिकः त्रयस्त्रिंशदध्यायात्मको ग्रन्थो नष्टः क.पुस्तके इति ।
२ तस्योपविष्टस्य - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मोत्तिष्ठतेति[३] तान्सर्वानवोचदसुराधिपः ।
मायापंचकमासाद्य[४] भोगी वायुधरानिव[५] ।।३।।
स तेषामग्रगो[६] भाति हिरण्याक्षो महासुरः ।
मध्ये कलभवृन्दानां यथा मत्तो महागजः ।।४।।
ततो जाम्बूनदे दिव्ये उपविष्टो वरासने ।
- - - - - - - - - - - - - - - - - ।।५।।
भाति सिंहासनासीनः स राजा सुरविद्विषाम् ।
मेरुशृंगमिवासाद्य[७] सबलाको महाम्बुदः ।।६।।
बभूवुरुपविष्टाश्च तूष्णीमेवासुरास्तदा ।
सिसृक्षवो जलं काले नीलाम्भोदा इवोन्नताः ।।७।।

सनत्कुमार उवाच

स तेषांमिङ्गितं ज्ञात्वा कालं च सुरतापनः ।
हिरण्याक्षः स्वयं राजा तानुवाच सुरद्विषः ।।८।।
यूयं सर्वे महामायाः शृणुध्वं संयताः समम् ।
कालप्राप्तञ्च पथ्यञ्च शिष्या इव गुरोर्वचः ।।९।।
मम भ्राता प्रियो ह्यासीज्ज्येष्ठः पूज्यो यथा पिता ।
हिरण्यकशिपू राजा महात्मा सत्यसंगरः ।।१०।।
धार्मिकश्च वदान्यश्च यज्वा दाता तपोन्वितः ।
आहिताग्निश्चतुर्वेदः सर्वभूतसुखावहः ।।११।।
राज्यार्थे स हतो देवैर्विकृत्या[८] मूढमानसैः ।
तस्य दुःखेन तप्यामि शुष्यामि च महासुराः ।।१२।।
सलिलादुद्धृतं ग्रीष्मे पद्मं कुसुमितं यथा ।
तेषां कर्तुमहं दण्डं शक्तोस्म्यसुरविद्विषाम् ।।१३।।

---

३ मोतिष्ठ (स्र) पि - ख. । ४ समासाद्य (?) । ५ णिव - घ. । ६ ...मग्यूशो - ख, मध्यगो - घ. ।
७ ...स्भाय (?) । ८ ...निकृत्या (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

भवतां[९] तत्र बालानां रक्षार्थं नोद्यतो ह्यहम्[१०] ।
सोहं दण्डं स्वयं कर्तुमेकाक्यसुरविद्विषाम् ।
गमिष्यामि न सन्देहो मा भीर्भवतु वोसुराः ॥१४॥

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा दानवास्ते मुदान्विताः[११] ।
परस्परमुदैक्षन्त व्रीडया परयान्विताः ॥१५॥
विप्रचित्तिस्तदनुजो भ्रातरं तं महाबलः ।
उवाच प्रणतः सम्यगर्थवन्मधुरं वचः ॥१६॥
न सन्देहो महासत्व त्वयैकेनासुरद्विषः ।
- -- - - - - - -- - - - - - - - - - ॥१७॥
यदि युद्धे न तिष्ठन्ति मायां काञ्चिद्विनाश्रिताः ।
अबलास्ते न सन्देहो निकृत्या बलिनस्तु ते ॥१८॥
प्रसादयित्वा शिरसा यद् ब्रवीमि निबोध तत् ।
बालैरपि[१२] हिरण्याक्ष सूपपत्त्या प्रसाधितम्[१३] ॥१९॥
तद् ग्राह्यमिति - - -[१४] शास्त्रविद्भिः समीरितम् ।
हिरण्यकशिपू राजा भ्राता नो ज्येष्ठ उत्तमः ॥२०॥
सोपि शक्तोहमित्येव एकाकी दैवतैर्हतः ।
महाबलोपि च हरिरशक्तैर्हन्यते बलात् ॥२१॥
आक्रन्दन्तं विना राजन्नतो विज्ञापयामि ते ।
भवतस्तु वयं बाला न तेषामसुरेश्वर ॥२२॥
शक्ता वयं सुयुद्धेन तान्हन्तुं कुलपांसनान् ।
तपोयोगबलोपेता मायाभिश्च समन्विताः ॥२३॥
अनुस्मरन्तो वैरञ्च वयं हंस्याम दैवतान् ।
यथा तव न निद्रास्ति हिरण्यकशिपोर्वधात् ॥२४॥

---

९ भवता - ख. । १० नोद्यताम्यहं - ख. । ११ ...तिमुदान्विताः - ख. । १२ बलेरवि - ख. । १३ ...मुपपत्त्या प्रसादितम् - ख. । १४ वेदोति (विद्वद्भिः?) - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तथास्माकं महाराज मा नो बालान्यथा चर ।
यत्र नो योक्ष्यसे राजन् समे वा विषमेपि वा ॥२५॥
तरिष्यामो वयं तद् वै बालमत्स्या इवार्णवम् ।
प्रह्लादोयं सहभ्राता ससुतः ससुहृज्जनः ॥२६॥
एक एवाह्वयेत्सर्वान्यथा सिंहो महाद्विपान् ।
बलिरेष च दैत्येन्द्र एक एव सवासवान्[१५] ॥२७॥
सुरान् सयम[१६] वित्तोशाञ्छक्तः सर्वान्प्रबाधितुम् ।
अयं बाणश्च[१७] तत्पुत्रो राजा बाहुसहस्रधृक् ॥२८॥
एक एव सुरान्सर्वान् विनाशयितुमुद्यतः ।
इमौ सुन्दनिसुन्दौ च भ्रातरौ बाहुशालिनौ[१८] ॥२९॥
उभावेकाकिनौ युद्धे देवान् हन्तुं समुद्यतौ ।
अयं मयश्च विक्रान्तः सारकस्तार एव च[१९] ॥३०॥
अन्ये च दानवाः शूराः शक्ता देवान् प्रबाधितुम् ।
एतेप्यतिबलाः सर्वे बलवन्तो वयं सदा ॥३१॥
बधिष्यामः सुरान् सर्वान् व्याधा इव मृगान् वने ।
शूरोयमन्धकः श्रीमान् ब्रह्मदत्तवरस्तदा[२०] ॥३२॥
प्रसह्य सर्वांस्तान् युद्धे नेष्यते वै यमालयम् ।
एवमेनं समाश्रित्य पालितानेन चैव हि ॥३३॥
करिष्यामो महद्युद्धं देवतानां भयंकरम् ।
पूर्वं देवा वयं सर्वे पश्चात्ते देवताभवन् ॥३४॥
कथं बिभीम तेषां वै सिंहानां शरभा इव ।
तस्य तद्वचनं श्रुत्वा अन्धकस्सोसुरेश्वरः ॥३५॥
उवाच वचनं तत्र हर्षयन् दानवेश्वरान् ।
महाबला वयं राजन् बलहीनाः सुरास्तु ते ॥३६॥

---

१५ शरीरवान् - क. ख. । १६ समय - ख. । १७ मानश्च - ख. । १८ बाहसादिनौ - ख. । १९...स्तारक (?), प्रभुस्तारक एव च - घ. । २० ... स्तथा (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पश्य त्वं दैवतान्सर्वान् हतान् यमपुरोगमान् ।
अद्य तं राजहन्तारं दुरात्मानं कुलाधमम् ॥३७॥
अद्य माता दितिस्तेषां दुःख ि- - - - - - ।
- - - - - - - - - - - - - - - - - - ।
मयैकेन हतं पश्य आदित्यानां कनीयसम् ॥३८॥
तिष्ठध्वं दानवाः सर्वे पर्याप्तोहं दुरात्मनाम् ।
अस्माकं राजहन्तृणां मृत्युरस्मि समागतः ॥३९॥

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा हिरण्याक्षः प्रतापवान् ।
उवाच दानवान् व्यास जयेप्सुः सुरविद्विषाम् ॥४०॥
अद्य पुष्यं च नक्षत्रमस्माकं बलकारणम् ।
अद्यैव दंशिताः सर्वे द्रुतं निर्यात दानवाः ॥४१॥
अथ ते दानवाः शीघ्रं वाहनानि मुदा युताः ।
प्रावारयन्त[२१] संग्रामे योग्यानि रिपुबाधने ॥४२॥
शीघ्रं कुरुध्वं सज्जानि गच्छामो दैवतान्प्रति ।
तेषां सुतुमुलः[२२] शब्दो बाहनानां[२३] बभूव ह ॥४३॥
मन्दवातप्रेरितस्य क्षीरोदस्य स्वनो यथा[२४] ।
ममाश्वस्तव सिंहोयं ममायं गजयूथपः ॥४४॥
रथोयं कस्य संपन्नो युद्धोपकरणैर्भृशम् ।
एहि निर्याहि वेगेन मुहूर्तं प्रतिपालय ॥४५॥
निर्यान्तु सर्वे दैत्येन्द्रा यास्यामः पृष्ठतो वयम् ।
आरोह स्वं रथं वीर किं रथेन ममाद्य वै ।
पदातिरेव संग्रामे हंस्याम्यद्य सुरद्विषः ॥४६॥
एवं तेषाममूच्छब्दः सुमनोज्ञः सुरद्विषाम् ।
बंशवीणास्वनोन्मिश्रः[२५] प्रलाप इव योषिताम् ॥४७॥

---

२१ प्रोक्षावयन्तु (?) - घ. । २२ सतुमुलः - ख. । २३ साहनानां - ख. । २४ महान् - घ. । २५ ..खगोन्मिश्रः (स्वरो?) - ख., ...रवोन्मिश्रः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ शुक्रस्तदाभेत्य भृगोः पुत्रो महातपाः ।
हिरण्याक्षमुवाचेदं हर्षयन्दानवेश्वरम् ।।४८।।
मया शान्तिः[२६] कृता तेद्य रक्षा च[२७] सह दानवैः।
जहि सर्वान्सुरान् युद्धे न तवास्ति पराजयः ।।४९।।
अहं त्वा स्वेन तपसा सहभृत्यं[२८] सबान्धवम् ।
धारयिष्यामि युध्यन्तं लोकान्यज्ञ इवापरः ।।५०।।

सनत्कुमार उवाच

ततः प्रदक्षिणं कृत्वा शुक्रं मूर्ध्ना प्रणम्य च ।
भार्गवं[२९] पुरतः कृत्वा निर्जगाम स मन्दिरात् ।।५१।।
ततो भेर्यश्च शंखाश्च पणवानकगोमुखाः ।
साडस्तमा(?)दिण्डिमाश्च भाण्डाश्च पटहैः सह ।।५२।।
कर्झर्यो दर्दुराश्चैव सुनवा[३०] मर्दलास्तथा ।
कटंकटाः पेपुकाश्च तथा चैवैकपुष्कलाः ।।५३।।
पञ्चाक्षाः सरिधीकाश्च मुकुन्दा[३१] मुरजास्तथा ।
लभका जलमत्ताश्च अवाद्यन्त सहस्रशः ।।५४।।
गायनै[३२]श्चैव गायद्भिः स्तुवद्भिः सूतमागधैः ।
दिव्याभिः कुलवृद्धाभिः स्त्रीभिश्च कृतमङ्गलाः ।।५५।।
द्वार्ये[३३]पश्यन् रथं क्लृप्तं यथा देवमयं हरः ।
शतनल्वप्रमाणाङ्कं[३४] दिव्यं जाम्बूनदं दृढम् ।।५६।।
असंगतुरगैः श्वेतै[३५]स्त्रिसाहस्रैर्मनोजवैः ।
अमरैः कामगैर्दिव्यैः श्रमदुःखविवर्जितैः ।।५७।।
यन्ता रथस्य तस्यासीन्मकरो नाम विश्रुतः ।
पुत्रो गरुत्मतो व्यास खगः कामगमःशुभः ।।५८।।

---

२६ महाशान्तिः - घ. । २७ मे दानार्दिष्टजागत्य दृशा - ख. । २८ सह भृत्यैः - ख. । २९ तमेव - (?) । ३० सुधोषा - घ. । ३१ मुक्यन्दा - ख. । ३२ गायना - ख. । ३३ धार्यं (?, - ख. । ३४ शतकल्पप्रमाणाङ्कं - ख. । ३५ संयुक्तां तुरगैर्दिव्यै (?) - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तमसौ राजशब्देन[३६] आशीर्भिश्चाभिपूजितः ।
आरुरोह रथं राजा एकचक्रं यथा रविः ।।५९।।
कवची बद्धतूणीरः शरी खड्गी शरासनी ।
बद्धगोधांगुलित्रश्च कण्ठत्राणकृतस्तथा ।।६०।।
ध्वजेन महता चैव छत्रेण च विभूषितः ।
बह्वीभिर्वैजयन्तीभिः सबलाक इवाम्बुदः ।।६१।।
तस्य छत्रं तदा भाति किरीटोपरि संस्थितम् ।
आविष्कृतपयोदाभः पौर्णमास्यां यथा शशी ।।६२।।
खट्वाङ्गस्तस्य चाभाति ध्वजो दिवमिवाक्रमन् ।
त्रैलोक्यस्योपघातार्थं[३७] केतुर्दीप्त इवोदितः ।।६३।।
तादृगेव रथो ह्यासीत् सुतस्य सुमहात्मनः ।
अन्धकस्य तदा व्यास महाजलदनिस्वनः ।।६४।।
अथ याहीति तेनोक्तौ[३८] रथयन्ता सुरद्विषः ।
त्रिसाहस्रान्[३९] हयाग्र्याँस्तु यान् रथे[४०] प्रत्यचूचुदत् ।।६५।।
प्रचोदितास्तमूढुस्ते[४१] जवना वातरंहसः ।
हयाः कामगमाः सप्त रवेरिव महारथम् ।।६६।।
तस्याग्रतस्तदा शुक्रो रथेनाम्बुदनादिना ।
उद्गच्छत इव व्योम्नि तस्यैवाभूद् यथा बुधः ।।६७।।
दक्षिणे तस्य पार्श्वे च अभूदन्धकदानवः ।
दक्षिणायनमासाद्य यथा लोकस्य भास्करः ।।६८।।
द्वितीयं पार्श्वमाश्रित्य विप्रचित्तिरभूत् स्थितः ।
भारतस्येव वर्षस्य हिमवान् पर्वतोत्तमः ।।६९।।
पृष्ठतश्चाग्रतश्चैव यथाप्रीति ययुस्तदा ।
अपरे दानवाः शूराः शशाङ्कस्य यथा ग्रहाः ।।७०।।

---

३६ जयशब्देन - घ. । ३७ त्रैलोक्यस्योपघाताय - घ. । ३८ ...नोक्तो (?) । ३९ द्विसाहस्रान् - ख. ।
४० सारथिः - घ. । ४१ .. स्तमूचुस्ते - ख ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तत्सैन्यं प्रचलद् भाति व्रजतां मुनिसत्तम ।
सविद्युत्स्तनयित्नूनामम्भोदानामिवात्यये ॥७१॥
हयह्लेषितशब्दश्च मत्तद्विरदबृंहितम् ।
वल्गितास्फोटितोत्क्रुष्टं सिंहनादोद्धतं ययौ ॥७२॥
तद्धि तूर्यरवसिंहनादितैरश्वहेषितगजोग्रबृंहितैः ।
बाहुशब्दकुचितावनादितैर्याति दानवबलं भयावहम् ॥७३॥

⊙ इति स्कन्दपुराणे हिरण्याक्षनिर्याणं नाम सप्तसप्ततितमो[४२]ध्यायः ⊙

कृष्णद्वैपायन उवाच

भगवन् दितिपुत्रेषु प्रयातेष्वमरावतीम् ।
अमराः किमकुर्वन् त एतदिच्छामि वेदितुम् ॥१॥
कथमन्तर्हितं[१] तेषां को मन्त्रश्चेष्टितं च किम् ।
उत्तरं किञ्च देवास्ते प्रत्यपद्यन्त यत्नतः ॥२॥
धार्मिकाश्च वदान्याश्च विद्वांसश्छिन्नसंशयाः ।
इष्टाः सर्वस्य लोकस्य किमकुर्वत देवताः ॥३॥

सनत्कुमार उवाच

शृणु व्यास यथा देवा उत्तरं प्रतिपेदिरे ।
असुराणाञ्च यद्युक्तं प्रत्यकुर्वत[२] दंशिताः ॥४॥
उद्युक्तेष्वेव दैत्येषु देवानां भयसूचकाः ।
संजज्ञिरेमरावत्या[३]मुत्पाता दारुणा भृशम् ॥५॥
पिशिताशाः खगास्तत्र भ्रमन्त्युपरि सर्वतः ।
मम्लुर्माल्यानि देवानां गन्धश्चैवाशुभं ववौ[४] ॥६॥

४२अध्यायः १३३ - ख., क.पुस्तकानुसारं ७६ तमेन भाव्यम् ।
१ कथमन्तर्हितं - ख. । २ प्रत्यकुर्वन्त - ख. । ३ संजज्ञुरमरावत्या - ख. । ४ बभौ - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

हयादयो न हेषन्ते विमनाश्च गजोभवत् ।
अनभ्रे[५] भयदं सर्वमपतद्रुधिरं बहु ॥७॥
आयुधानि च दीप्यन्ते सधूमं शक्तिनन्दन ।
कबन्धाश्च तथादित्ये[६] युद्धं चात्र प्रदृश्यते ॥८॥
द्वयोः पुरुषयोर्व्यास हाहाकारश्च सर्वशः ।
देवानामरतिञ्चैव[७] चित्तं चापि समश्नुते[८] ॥९॥
स्फुरन्ति वामनेत्राणि जृम्भिका चोपजायते ।
वयांसि च विकूजन्ति[९] भयदान्यपरे यथा ।
अग्निश्च दीप्यते तत्र सशब्दो रूक्ष एव च ॥१०॥
एतांश्चान्यांश्च विविधानुत्पातान्भयसूचकान् ।
दृष्ट्वा प्राह गुरुं शक्रो बृहस्पतिमिदं वचः ॥११॥
भगवन् किमिदं घोरं भयं नः समुपस्थितम् ।
यदिमे सूचयन्त्युग्रा उत्पाता नः सुदारुणाः ॥१२॥
नेमे निष्कारणं मन्ये नचाप्यल्पं हि तद्धि नः ।
यदिमे सूचयन्त्युग्राः कल्पान्त इव दारुणाः ॥१३॥
तस्य तद्वचनं श्रुत्वा देवाचार्यो बृहस्पतिः ।
निरीक्ष्य बुद्ध्या संचिन्त्य प्रोवाचेदं ततो वचः ॥१४॥
यद् भवानाह तत्तथ्यं नेमे निष्कारणं तथा ।
निमित्तमत्र सुमहद् भविष्यति न संशयः ॥१५॥
निमित्तमादिदैत्येन्द्रो हिरण्यकशिपुः पुरा ।
स हतो नरसिंहेन प्राप्तं राज्यं च नः पुनः ॥१६॥
अद्य वर्षसहस्राणि द्वादशैव सुनिर्वृतैः[१०] ।
युष्माभिरखिला लोका भुज्यन्ते सुमहात्मभिः ॥१७॥
दैत्याधिपा निरुत्साहा दानवैः सह शेरते ।
पाताले दनुपुत्राश्च दुःखशोकसमाहताः ॥१८॥

---

५ अनभ्रे - ख, अदभ्र (?) । ६ यथादित्यो - ख । ७ मरतिश्चैव - घ. । ८ समुत्सुकं - घ. । ९ भूयो गायन्ति - ख., खगादयो विकूजन्ति - घ. । १० सुनिर्वृताः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

हिरण्याक्षस्तु दैत्येन्द्रो हिरण्यकशिपोर्वरः[११] ।
स नूनं भ्रातुरन्विच्छन् हतस्य प्रतिकारिताम् ॥१९॥
सर्वैरभ्येति दैत्येन्द्रै र्दानवैश्च समावृतः ।
सपुत्रपौत्रो दैत्येन्द्रो महाबलपराक्रमः ॥२०॥
अन्धकश्चास्य पुत्रोपि ब्रह्मणा ह्यमरः कृतः ।
न स शक्यो युवा हन्तुं[१२] ततो वो भयमुत्थितम् ॥२१॥
तद्भवन्तः[१३] सुसन्नद्धाः सर्वे युद्धाय दंशिताः ।
प्रतीक्षध्वं महासत्वा यावदौत्पातिकं स्थितम् ॥२२॥
तस्य तद्वचनं श्रुत्वा शक्रः सर्वान् तदा सुरान् ।
उवाच सज्जोभवत युद्धाय कृतनिश्चयाः ॥२३॥
भयं महदिदं प्राप्तं मा तिष्ठत निरुद्यमाः ।
मा नः संप्राप्य दैत्येद्रा हन्युर्मत्तानिवामराः ॥२४॥
अथ वायुस्तदाभ्येत्य शक्रं सर्वासुरान्तकम् ।
उवाच प्राञ्जलिर्भूत्वा देवानामेव संसदि ॥२५॥
एष दैत्यो हिरण्याक्षः सर्वासुरसमावृतः ।
आयाति देवता हन्तुं भ्रातुर्वधमनुस्मरन् ॥२६॥
तद्भवान् दंशितः सम्यक् सहास्माभिर्महाबलः ।
जयायोत्तिष्ठ[१४] देवेन्द्र विनाशाय सुरद्विषाम्[१५] ॥२७॥

सनत्कुमार उवाच

ततः स भगवान् व्यास महात्मा देवराट् स्वयम् ।
अभेद्यं कवचं दिव्यं जाम्बूनदविभूषितम् ॥२८॥
दत्तं मन्त्रेण विधिवत् पुत्रेणाङ्गिरसः स्वयम् ।
आबबद्धात्मना[१६] शक्रो मेघदुन्दुभिनिस्वनः ॥२९॥
स तेन कवचेन स्म भाति शक्रः प्रतापवान् ।
सविद्युदुल्कैरम्भोदैर्बद्धो मेरुरिवाचलः ॥३०॥

---

११ हिरण्यकशिपोर्वचः - ख., परः(?) १२ युद्धच हन्तुं - घ. । १३ समुद्भवन्तः - ख. । १४ जयाय तिष्ठ - ख. । १५ सुरद्विषाः (षः) - ख. । १६ आबबद्धात्मने - ख., आबवन्धात्मना - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ततो गोधांगुलित्राणि[१७] तलत्रं चैव भासुरम् ।
आबबद्ध स्वयं मन्त्रैस्तस्य देवो बृहस्पतिः ।।३१।।
इषुधीनक्षयाँश्चैव खड्गं चैवामृतोद्भवम् ।
आबबद्धास्य मन्त्रेण यदजर्यं शरादिभिः ।।३२।।
ततोस्मै सशरं चापं पञ्चवज्त्रं सुदारुणम्[१८] ।
मन्त्राभिमन्त्रितं सम्यक् प्रददौ जयवर्द्धनम् ।।३३।।
मंगलानि ततस्तस्य दर्शयामास वीर्यवान् ।
घटञ्च पूर्णमस्त्रञ्च[१९] ऐरावतमथापि च ।।३४।।
कल्पितं बहुभिर्दिव्यै[२०]राचार्यैः कल्पवासिभिः ।
अर्चितं धूपितं चैव धूपितं क्रोधदर्पणैः ।।३५।।
ततस्तं स तदा देव आरुरोह मतङ्गजम् ।
भद्रलक्षणसंपन्नं चतुर्दन्तं क्षरन्मदम् ।।३६।।
आरूढः स तदा भाति ऐरावतगजं विभुः ।
उदयाचलमौलिस्थ उद्यन्निव दिवाकरः ।।३७।।
पाण्डरेणातपत्रेण सुरराट् संबभौ तदा ।
श्वेतपर्वतराजोसौ शशिनेव महामुने ।।३८।।
चामराबीजितं भाति तस्य वक्त्रमतिप्रभम् ।
हंससंबीजितं फुल्लं[२१] शरदीव महोत्पलम् ।।३९।।
तस्य पार्श्वे जयन्तश्च पुत्रः शक्रस्य धार्मिकः ।
कार्तिकेय इवाभाति रुद्रस्य दयितः सुतः ।।४०।।
ततो यमश्च पुण्ड्रेण[२२] महिषेण महाबलः ।
कालदण्डं पुरस्कृत्य कोटीभिर्दशभिर्वृतः ।।४१।।
निर्जगाम कुबेरश्च राक्षसैर्बहुभिर्वृतः ।
यक्षैः पुण्यजनैश्चापि तथान्यैर्देवतैरपि ।।४२।।

---

१७ गोधाङ्गुलित्राणं - घ. । १८ वज्रं चासुरदारणं - घ । १९ पूर्णमश्वञ्च (?) । २० ...र्द्दव्यै (वैः?) - ख., मन्त्रैः - घ. । २१ हंसाबीजितमुत्कुल्लं - घ., हगा सा - ख. । २२ पुण्डौ - ख., पुत्रेण - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तेषां द्वादश कोटयस्ताः सहस्राणि च विंशतिः ।
शतानि च तथाशीतिस्तथैवाष्टाधिका पुनः ॥४३॥
वरुणो निर्ययौ देवः पुत्राणां दशभिः शतैः ।
यादोभिस्ते वृताः सर्वे कोटयस्ताश्चैकविंशतिः[२३] ॥४४॥
अनलश्च ततो देवः कोटीभिर्दशभिर्वृतः ।
निर्ययौ सह पुत्रेण ससुहृद्वर्गबान्धवः ॥४५॥
ततो वायुर्महातेजाः सर्वव्यापी महाजबः[२४] ।
अक्षौहिणीभि र्दशभिर्निर्जगाम महाबलः ॥४६॥
आदित्या निर्ययुः सर्वे द्वादशाक्षौहिणीवृताः[२५] ।
एकैकशश्च ते[२६] व्यास सर्वे दिव्यास्त्रयोधिनः ॥४७॥
तथा रुद्राश्च निर्जग्मुर्महामायामहाबलाः ।
एकैकशस्तदा सर्वे षोडशाक्षौहिणीवृताः ॥४८॥
वसवो दशभिश्चैव अष्टाभिश्चाश्विनावुभौ ।
तथैवांगिरसो देवाः सर्वे तेक्षौहिणीवृताः ॥४९॥
यामा दामाश्च साध्याश्च लेखा ये च महाबलाः ।
तेपि कोटीशतैः सर्वे दशभिः सह संगताः ॥५०॥
अभूबन् विंशतिः[२७] कोटचो गन्धर्वाणां[२८] महात्मनाम् ।
पन्नगानां चतुःषष्टिः खगानां चैव विंशतिः ॥५१॥
पिशाचानां च कोटयस्ताः पंचाशत्तत्र संगताः ।
राज्ञां स - - - - - - - - नां महात्मनाम् ॥५२॥
एतद्देवबलं[२९] सर्वमभूत्तत्राभिसंगतम् ।
दृष्ट्वा तद् बह्वपर्यन्तं देवानां बलमुत्तमम् ॥५३॥
उवाच जीवंजीवानां राजा परमधर्मवित् ।
भगवन् क्रियतां व्यूहो यस्मात्तोषां दुरात्मनाम् ॥५४॥

---

२३ एकविंशतिः - घ., इतः परं "ततो देवबलं पश्यन् सन्नद्धान् युद्धकांक्षिणः । कोटिभिर्दशभिश्चैव रथनागहयैर्वृतः" इति पद्यमुपलभ्यते घ.पुस्तके । २४ महाबलः - ख. । २५ युताक्षौहिणिकर्षिणः - ख. । २६ एकैकश्च शते - ख. । २७ गन्धर्वाणामभूत् - ख. । २८ विंशत्येव - ख. । २९ एते देवबलं... - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अधृष्यश्चाप्रमेयश्च यन्न[३०] वेत्ति च भार्गवः ।
तस्य तद्वचनं श्रुत्वा बृहद्बुद्धिर्बृहस्पतिः ॥५५॥
उवाच देवताध्यक्षं शक्रं दैवतसन्निधौ ।
न तदस्ति महेष्वास मयि यद् भार्गवो महान् ॥५६॥
न वेत्ति यस्य वा[३१] भेदं न कुर्यात् पाकशासन ।
उशनाः स तु यद्वेत्ति महायोगी महायशाः ॥५७॥
न चैव तदहं वेद्मि मत्तो वरतरो हि सः ।
स तु तीक्ष्णतया चैव मानाच्चैव शचीपते ॥५८॥
प्रमादं कुरुते तेषु न च सर्वत्र लभ्यते ।
अहं च विज्ञभावेन मार्दवेन परेण च ॥५९॥
अप्रमत्तश्च सर्वत्र तव सैन्यैश्च रक्षितः ।
बुद्ध्या तमतिरिच्यामि विबुधेश्वर नित्यशः ॥६०॥
तस्मात्तोहं करिष्यामि व्यूहं श्येनमतिप्रभम् ।
येन तान्दानवान् संख्ये कच्चित् कालं विजेष्यथ ॥६१॥
ततः स भगवान् जीवश्चक्रे व्यूहमतिप्रभम् ।
श्येनं नाम महायोगी देवानां हितमादधत् ॥६२॥
ग्रीवायां तस्य संचक्रे वित्तेशं वरुणं तथा ।
अनलं चैव वायुश्च जयन्तं चैव शक्रजम् ॥६३॥
शिरश्चूडां[३२] यमं तस्य[३३] मृत्युं कालं च तावुभौ ।
वक्त्रं तस्याकरोज्जीव[३४]श्चन्द्रसूर्यौ च चक्षुषी ॥६४॥
एकं पक्षं चकारास्य रुद्रान्सर्वान्स वै द्विजः ।
द्वितीयं पक्षमादित्यान्मध्यं तस्य पुरन्दरम् ॥६५॥
पादौ च वसवस्तस्य अश्विनौ च महातलौ ।
धन्धर्वाः पन्नगाश्चैव नखान् तस्य समाश्रिताः ॥६६॥

---

३० यथा - घ. । ३१ वो - ख. । ३२ शिरश्चूडा - ख. । ३३ यमस्तस्य - ख. । ३४ वक्त्रमस्याकरोज्जीव - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पक्षिणश्च महासत्वा: पिशाचाश्च महाबला: ।
पुच्छं[३५] तस्याकरोत् सर्पान्[३६] देवानन्याँस्तदोदरम्[३७] ॥६७॥
राजानस्तस्य पादस्थास्तले[३८] भूतान् न्यवेशयत् ।
महाबलान्महोत्साहान्सर्वान् देवान् सभासद: ॥६८॥

सनत्कुमार उवाच

स कृत्वा तं खगव्यूहं मन्त्रेणैवाभिमन्त्य च ।
उवाच देवराजं तं बृहस्पतिरिदं वच: ॥६९॥
कल्पितोयं मयाव्यूह: कृत्वा राक्षसपार्थिवम् (?) ।
अत: परं विधानस्य कर्म नास्मासु विद्यते ॥७०॥
जय शत्रून् रणे शक्र देवतैरभिरक्षित: ।
मया चार्थवणैर्मन्त्रैस्तपसा च बलेन च ॥७१॥
कुरु कर्म यथाशक्ति ह्यमरो ह्यसि पार्थिव[३९] ।
देवाश्चाप्यसरा: सर्वे युध्यन्तु सुरपार्थिव ॥७२॥
भाग्यान्नो जय लाभाय नान्यत्र सुरपुंगव[४०] ।
जहि शत्रून् महाबाहो माभीर्भवतु ते रणे ॥७३॥
तत: शंखाश्च भेर्यश्च पटहा डिण्डिमास्तथा ।
आडम्बराश्च नम्भा(?)श्च कृकवा गोविषाणका: ॥७४॥
मर्दला: पेपुकाश्चित्रा नेदु[४१]स्तूर्याणि सर्वश: ।
तेन शब्देन योधानां युद्धहर्षो महानभूत् ।
सिंहनादा[४२]नकुर्वन् ते[४३] वादितास्फोटितानि च ॥७५॥
देवास्तत:[४४]शंखमृदङ्गवाद्यैरमोघसर्वायुधदीप्तहस्ता: ।
निर्जग्मु[४५]रिन्द्रादिसुरप्रधाना जयैषिण: शत्रुवधेप्सवश्च ॥७६॥

⊙ इति स्कन्दपुराणे व्यूहरचनो नामष्टसप्ततितमो[४६]ध्याय: ⊙

---

३५ पृष्ठं - घ. । ३६ सर्वान् - ख. । ३७ ...म्नदोदरान् - ख. । ३८ ...न्तले - ख. । ३९ पार्थिव: - ख । ४० ...पुंगवे - घ., ...संगवे (?) । ४१ मेघ - ख. । ४२ सिंहनादा - ख । ४३ नकुर्वन्त - ख. घ. । ४४ ...दैवता: - ख. । ४५ निर्जघु (म्नु?) - ख. । ४६ सप्तषष्टितमोऽध्याय: - घ., १३४ इति ख. पुस्तके ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

व्यूढे सुराणां सैन्येथ स्थिते युद्धाय दंशिते ।
दानवानां बलं घोरं समदृश्यत भीषणम् ॥१॥
तद्[1] दानवबलं दृष्ट्वा देवाः सर्वे सवासवाः ।
सिंहनादानकुर्वँस्ते[2] वादित्ररवमिश्रितान् ॥२॥
स नादः सुमहान् व्यास सागरस्येव मथ्यतः ।
आपूरयज्जगत्[3] सर्वं युगान्ताम्बुदनिस्वनः ॥३॥
ततो दानवशार्दूलाः सर्वे दृष्ट्वा सुरोत्तमान् ।
व्यूह्य सैन्यं स्थितान्[4] सम्यग् वीक्षाञ्चक्रुः[5] परस्परम् ॥४॥
तान् वीक्षमाणान्[6] सन्दृश्य स्थितो दानवयूथपान् ।
उवाच भार्गवं व्यास हिरण्यनयनः स्वयम् ॥५॥
एते व्यूहमिमं कृत्वा देवास्तिष्ठन्त्यभीतवत् ।
मन्यन्ते[7] दानवान् युद्धे वयं जेष्याम सर्वशः ॥६॥
स भवान्युक्तमस्यैव[8] देवव्यूहस्य भेदकम् ।
कुरु मायाप्रतिव्यूहमस्माकमपि मा चिरम् ॥७॥

सनत्कुमार उवाच

एवमस्त्विति संप्रोच्य[9] ह्यर्धचन्द्रञ्चकार सः[10] ।
खगस्य तस्य यच्छेत्तुं शिरः कायादियेष च[11] ॥८॥
चकार तस्य शृंगे तु प्रह्लादान्धकदानवौ ।
धारान्[12] निवातकवचान्पौलोमान्कालकासुतान् ॥९॥
विरोचनं बलिं चैव विप्रचित्तिं सहानुजैः ।
प्रह्लादभ्रातरं चैव ससुहृद्वर्गबान्धवान्[13] ॥१०॥
पृष्ठं चक्रे महायोगी मध्यं राजानमेव[14] च ।
उवाच चैनं[15] विश्रब्धो भार्गवः शत्रुतापनः ॥११॥

---

१ ते - ख. । २ ...नकुर्वन्त - ख. घ. । ३ अपूरयञ्जगत् - घ. । ४ व्यूहस्कन्धस्थितान् । ५ चक्रे - ख. ।
६ वीक्षमाणो (णः?) - ख. । ७ मन्यन्तो (?) । ८ श्येन (?) । ९ स प्रोच्य - ख. । १० ...मकुर्वत - ख.।
११ कायादिवेषवः - ख. । १२ धारो - ख. । १३ बान्धवं (?) । १४ तथैव - ख. । १५ चेदं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

हिरण्याक्षमिदं युक्तं काले पथ्यञ्च सर्वशः[१६] ।
दैवतव्यूहभेत्तायं महान्व्यूहो हि वः कृतः ॥१२॥
युक्तं कुरुत भद्रं वो मया नु[१७] परिपालिताः ।
परस्परं च रक्षन्तः सर्वे चित्रास्त्रयोधिनः ।
महामायाः सुराः सर्वे यथा नैवाभिमन्यत[१८] ॥१३॥

सनत्कुमार उवाच

ततः शंखाश्च भेर्यश्च पणवानकगोमुखाः ।
आडम्बरा डिण्डिमाश्च पटहाश्च महास्वनाः ॥१४॥
नानाविधानि चान्यानि[१९] प्रावाद्यन्त सहस्रशः ।
देवानां दानवानाञ्च मदसत्वप्रदानि वै ॥१५॥
ततः प्रमथ्नते[२०]त्युक्ता[२१] दानवा दानवेश्वरैः ।
ममर्दुर्देवतानीकं प्रहताः सर्वशस्तथा ॥१६॥
देवास्तेपि च संयत्तास्तपोयोगबलान्विताः ।
दानवान् विविधैः शस्त्रैरभिजघ्नुः कृतागसः ॥१७॥
असीनां पात्यमानानां शिरसां हस्तिनामपि ।
आसीच्छब्दो महाघोरो वंशानामिव पाट्यताम् ॥१८॥
विकृष्यतां च धनुषां बाणानां च विमुच्यताम् ।
आसीत्तत्र महाञ्छब्दो गिरीणामिव भिद्यताम् ॥१९॥
गच्छद्भिर्भिन्दिपालैश्च शक्तिभिस्तोमरैस्तथा ।
आकाशमभवत् सर्वं खद्योतैरिव संवृतम् ॥२०॥
शिरोभिश्चरणैश्चैव बाहुभिश्च निपातितैः ।
क्षणेन युद्धभूमिः सा विषमा समपद्यत ॥२१॥
दन्तिभिः पर्वताकारै[२२] र्हयवर्यैरथोत्तमैः[२३] ।
कबन्धैश्चाभिनृत्यद्भिर्दुर्निरीक्ष्यमभूद्रणे[२४] ॥२२॥

---

१६ मद्यशः - ख. । १७ (वः) पद्यं तु (पर्यन्त?) - ख. । १८ नैवातिमन्यत - ख. । १९ म... - ख. ।
२० प्रमर्दंते (?) । २१ ...त्युक्त्वा - ख. । २२...गिरिसंकाशैः (?) । २३ हयैर्युद्धै रिवोत्तमैः - घ. ।
२४... रन्तरीक्षमभूत्क्षणात् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

आतपत्रैश्च हारैश्च कवचैस्तलचै (?) रपि ।
निष्कसूत्रैः सुमुकुटैः केयूरैः कुण्डलैरपि[२५] ॥२३॥
कण्ठत्राणैर्विचित्रैश्च[२६] दुकूलैर्मणिभिश्च ह ।
कुथाभिश्च विचित्राभिर्भुजैः साभरणैरपि ॥२४॥
मुशलैः शूलदण्डैश्च घण्टाभिश्चांकुशैरपि ।
विभाति भूतलं तत्र ज्योतिर्भिद्यौ रिवावृतम् ॥२५॥
क्रुद्धः केशेषु संगृह्य विरथोपि महारथः ।
रथिनं रथमाप्लुत्य निजघान बलाद्बली ॥२६॥
तत्र चान्यो गजे[२७] चाशुरभिहत्य महाभुजः ।
रथं चिक्षेप च वृतैः (?) कुशमुष्टिमिवाध्वरे[२८] ॥२७॥
क्षिप्तो गजात् समुत्पत्य - नसं - - - य - ।
शरैराशीविषाकारैरनयद्यमसादनम् ॥२८॥
हतमप्येष तुरगः सादिनं पतितं क्षितौ ।
उपास्ते पादतः सुप्तं गुरुं शिष्यो यथात्मवान् ॥२९॥
ससूते निहते योधे रथमेते हयोत्तमाः ।
वहन्ति पुरुषाः क्षीवा ज्ञानवन्त इवागमान् ॥३०॥
अयमन्यः सुबद्धोपि दैत्येन सुरपुंगवः ।
बाहुभ्यां वेष्टयित्वा तं प्रययौ देवतान्तिकम्[२९] (?) ॥३१॥
अयमाधावतः पश्य गजस्य भुजमाच्छिनत् ।
स तेनैव गजेनोर्व्यां पपात[३०] विनिषूदितः ॥३२॥
अयमन्येन संयुक्त अन्येनागत्य घातितः ।
स चाप्यन्येन देवेन सोप्यन्येन पुनर्हतः ॥३३॥
एते पदातयश्चान्ये[३१] बहवः संहता भृशम् ।
रथिनं मोहयित्वा तु जघ्नुरेनमभीतवत् ॥३४॥

---

२५ कुड्मलैरपि - ख. । २६ कण्ठत्राणविचित्रैश्च - ख. । २७ तत्रान्ये च गजे - ख. । २८ कुशमुष्टिं यथाध्वरे - ख. । २९ चैव चान्तिकम् - ख. । ३० निपात्य (?) । ३१ पादत्रये चान्ये - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एवमाकाशगाः सिद्धा ऋषयश्चारणास्तथा ।
शाधयन्ति[३२] रमन्ते च स्मयन्ति[३३] च जपन्ति[३४] च ।।३५।।
हरन्त्यप्सरसश्चैव योधाँस्तत्र रणे हतान् ।
पिशाचाश्चापि मोदन्ते[३५] नृत्यन्ति च निकुम्भिला: ।।३६।।
तत् प्रवादितगान्धर्वं छिन्नभिन्नविदारितम् ।
युद्धगान्धर्वमभवद् भीरूणां भयवर्द्धनम् ।।३७।।
अन्योन्यघातक्षतसर्वदेहा: सुरासुरा वैरमनुस्मरन्त: ।
जघ्नुस्तदा राक्षसतुल्यरूपा: स्वाराज्यहेतो[३६]र्जयमीप्समाना:[३७] ।।३८।।

⊙ इति स्कन्दपुराणे देवासुरसंग्राम[३८]नामैकोनाशीतितमोऽध्याय: ⊙

सनत्कुमार उवाच

तस्मिन् महति युद्धे[१] तु वर्तमाने महाभये ।
दानवान् वै तदा[२] देवा[३] समन्तात् पर्यवारयन् ।।१।।
मृत्यु: कालो यमश्चैव कृतान्त: कलहस्तथा ।
निकृतिर्व्याधयश्चैव वैरं क्रोधश्च वीर्यवान् ।।२।।
नरकाश्चैव ते सर्वे यमदूताश्च सर्वश: ।
प्रेताश्च पितरश्चैव चत्वारो ये[४] गणास्त्विति[५] ।।३।।
वामनश्चैव यो देवा: किंकराश्च महाबला: ।
एते सर्वे तदाविश्य संजघ्नुर्दानवं बलम् ।।४।।
यमदूतैर्विभिन्नांगा भग्नवक्षत्रिकोरस: ।
निष्टनन्ति क्षितौ दैत्या निरयेष्विव पापिन: ।।५।।
असिचर्मविनिष्पिष्टा मृत्युपाशोवपाशिता: ।
कृतान्तवशगास्सर्वे संभजयन्ति दिते: सुता: ।।६।।

---

३२ योधयन्ति - घ. । ३३ गायन्ति - घ. । ३४ जयन्ति - घ. । ३५ मोदन्ति - ख. । ३६ स्वराज्यहेतो - ख. ।
३७ ...नैति - ख. । ३८ ...मो - ख. ।
१ हतनियुद्धे - ख. । २ दानवाँस्ताँस्तदा - घ., देवा वै - ख. । ३ देवान् - ख. । ४ स्वत्वा ये च । घ. ।
५ गणेष्विति - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ते हन्यमाना दैत्येन्द्रा मृत्युना च यमेन च ।
त्रातारमलभन्तो वै तत्र तत्रैव बभ्रमुः ॥७॥
तथा तांस्तत्र तत्रैव भ्रमन्तो जघ्नुरार्दिताः ।
ततो हाहाकृतः शब्दो[६] दानवानां बलेभवत् ॥८॥
साधुसाध्विति देवानां यमं पूजयतामभूत् ।
अथ प्रह्लादतनयो विरोचन इति श्रुतः ॥९॥
स गजेन ततोभ्येत्य देवानां बलमार्दयत्[७] ।
सह तेन महामायो गजेन समधावत ॥१०॥
यमं प्रदक्षिणं कृत्वा द्रोणमेघ इवापरः ।
स शरैर्बहुभिस्तीक्ष्णैरकुण्ठाग्रै रयोमयैः[८] ॥११॥
वरुणञ्च धनेशञ्च वायुञ्चैवाभ्यवर्षत ।
स संछाद्य तदा भासं भास्करस्य शितैः शरैः ।
अवाकिरत्तदा देवान् संवर्त्तक इवाम्बुदः ॥१२॥
ते शरार्चितसर्वाङ्गा बध्यमानाः पुनः पुनः ।
क्षणेन समपद्यन्त देवाः सर्वे विचेतसः ॥१३॥
यान्तमायान्तमप्राप्तं प्राप्तं दूरस्थमेव च ।
यं यतो वीक्षते दैत्यस्तं ततोभिजघान सः ॥१४॥
नित्यायतधनुर्दैत्यः परिवेषीव[९] भास्करः ।
दुर्निरीक्ष्यः[१०] समभवद् युगान्ताग्निरिवोत्थितः ॥१५॥
अथैवमस्यतो व्यास वरुणः कार्मुकं तदा ।
चिच्छेद सुमहद्भीमांस्तर्जयन्दानवेश्वरम् ॥१६॥
वायुस्तीक्ष्णशरैस्तस्य कवचं सर्वतोहरत् ।
धनेशोशनिघातेन गजमस्य न्यसूदयत् ॥१७॥
तं तथा निकृतं दृष्ट्वा बलिर्बाणश्च तावुभौ ।
प्रह्लादो भ्रातृभिः सार्धं लोकपालानुपाद्रवन् ॥१८॥

---

६ ...कृतं सर्वे - ख. । ७ बलंमदर्शयत् - ख. । ८ ...यन्मयैः - ख. । ९ पारिवेषीव - ख. ।
१० दुर्निरीक्षः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तेषामापततामेव लोकपाला महाबलाः ।
शरैराशीविषाकारैश्चक्रुरक्षानपोथयन्[११] ॥१९॥
वायुर्बाणस्य विशिखैः कार्मुकाणि विकर्षतः ।
चिच्छेद युगपद् व्यास तदद्भुतमिवाभवत् ॥२०॥
विच्छिन्नधन्वा स[१२] क्रुद्धस्तोमराणि तदासृजत् ।
चिक्षेप तानि वेगेन वायुरन्यां दिशं पुनः ॥२१॥
हयाँश्च पुनरेवास्य शरैः सन्नतपर्वभिः ।
ससूतान् परमायस्तो[१३] ह्यनयद्यमसादनम् ॥२२॥
स रथाद्बलिजः क्रोधादवप्लुत्य महाबलः ।
गदां गृहीत्वा वेगेन श्वसनं समुपाद्रवत् ॥२३॥
तस्यापतत एवाशु सगदस्यानिलस्तथा[१४] ।
शरैराशीविषाकारैर्गदां तां समकृन्तत ॥२४॥
स निकृत्तगदश्चापि बाणः प्रहरतां वरः ।
प्रगृह्य तु गदामन्यां चिक्षेप च जहास च ॥२५॥
तामापतन्तीं वेगेन गदां बाणस्य[१५] खेचरीम् ।
आक्षिप्य वायुर्व्यधमदन्यां दिशमदीनवत् ॥२६॥
विरथं तमथालक्ष्य[१६] वायुना च भृशार्दितम्[१७] ।
पुत्रं बलिर्द्रुतं व्यास स्वरथे[१८] समपादयत् ॥२७॥
तावेकरथसंयत्तौ[१९] बभतु[२०]र्दानवेश्वरौ ।
सूर्याचन्द्रमसौ यद्वत् पूर्णमास्यां[२१] समागतौ ॥२८॥
अथ तेषाञ्च तेषाञ्च तद्युद्धमभवत्तदा[२२] ।
- - - - - - - - - - - - - - - - - -।
तान्निरुद्धानथाज्ञाय लोकपालैर्महाबलैः ॥२९॥

---

११ (?) न्यपोथयन् - ख. । १२ सं - ख. । १३ परयापस्तो - ख. । १४ भगवाननिलस्तथा - ख. । १५ मानस्य - घ. । १६ विमुखं तमनालक्ष्य - ख. । १७ शरार्दितम् - ख. । १८ सरथे - घ., स्वरथे- (?), रथेन - ख. । १९ अथैकरथसंपन्नौ - घ. । २० बभूवु - ख., बिभिदु - घ. । २१ पौर्णमास्यां - घ. । २२ तद्युद्धमभवद् घोरवत्तदा - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

निवातकवचाः सर्वे कालकेयाश्च दंशिताः ।
पौलोमाः सैंहिकेयाश्च शम्बरः कालशम्बरः ॥३०॥
अन्धकश्च महादैत्यो हिरण्याक्षश्च विश्रुतः ।
सर्वे व्यूहममुञ्चन्तो दानवा युद्धलालसाः ॥३१॥
चक्रुर्वेगं[२३] महावेगाः समेघा इव सानवः ।
तानापतत एवाथ यमो दण्डेन वीर्यवान् ॥३२॥
अवारयत[२४] ते तस्थुश्चित्रपट्ट[२५] इवार्पिताः ।
तान् यमस्य भयाद् दैत्यान्[२६] दृष्ट्वा सर्वानवस्थितान् ॥३३॥
अन्धको यममभ्येत्य तिष्ठतिष्ठेति चाब्रवीत् ।
महता स रथेनैत्य[२७] धनुर्विस्फाल्य[२८] चासकृत् ॥३४॥
यमं ललाटे दशभिर्बाणैर्विव्याध वीर्यवान् ।
पञ्चभिर्महिषं चास्य षड्भिः कालं तथाग्रतः ॥३५॥
मृत्युञ्च दशभिश्चैव कृतान्तं चैव सप्तभिः ।
भ्रामयन् स पुनश्चापमिन्द्रायुधसमप्रभम् ॥३६॥
ननादाम्बुदवच्चैव पुनर्विव्याध दैवतम् ।
हिरण्याक्षसुतो ज्येष्ठो ह्यन्धकोहं महाबलः ॥३७॥
ब्रह्मणा च वरो दत्तो मह्यमित्यवघोषयन् ।
तस्यैवं वदतस्तूर्णं सूर्यपुत्रः प्रतापवान् ॥३८॥
रथं चिच्छेद[२९] संक्रुद्धो दण्डेन विनिपातयन्[३०] ।
सकार्मुके रथे तत्र मथिते ह्यन्धकस्तदा[३१] ॥३९॥
गदामुद्यम्य वेगेन प्रेताधिपमथाद्रवत् ।
तस्य तां दण्डघातेन गदां सोप्यवचूर्णयत् ॥४०॥
शिरस्येनं पुनः क्रुद्धो दण्डेन समताडयत् ।
- - - - - - - - - - - - - - - - - - ॥४१॥

---

२३ ... र्वेगान् - ख. । २४ अवारयन्त - ख. । २५ ...पट्टा - ख. । २६ दैत्या - ख. । २७ रथेनैत्य - ख. । २८ विस्फार्य (?) । २९ धनुश्चिच्छेद (?) । ३० रथे दण्डं न्यपातयत् (?), रथं दण्डेन पातयत् (?) । ३१ ...स्तथा - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जितेन्द्रियो मुनिर्यद्वत् स्पृष्टो विषयगोचरैः (?) ।
अथाप्रतिहतं दण्डमन्धकेन पराहतम् ॥४२॥
पुरः[३२] प्रतिहतं दृष्ट्वा जहृषुर्दानवेश्वराः ।
सिंहनादान् सवादित्रान् बाहुशब्दांश्च सुस्वरान् ॥४३॥
चक्रुः साध्वन्धकेत्येवं चुक्रुशुश्च मुहुर्मुहुः ।
अन्धकोपि तदाभ्येत्य नर्दमानो यथार्णवः ॥४४॥
तलेनाहत्य[३३] महिषाद्यमं भूमौ न्यपातयत् ।
ततो हाहाकृतं देवैर्गृह्णगृह्णेति दानवैः ॥४५॥
व्यूहभंगश्च देवानामभवच्छक्तिनन्दन ।
अथ मृत्युश्च कालश्च कृतान्तश्चेति ते त्रयः ॥४६॥
अन्धकं बहुभिः[३४] पाशैर्बबन्धुः क्रोधमूर्च्छिताः ।
पाशाँश्चैव स दैत्येन्द्रो विच्छिद्य सुमहाबलः ।
बाहुपाशेन बलवान्कृतान्तमवबध्नत ॥४७॥
स बद्धो बाहुपाशेन कृतान्तः क्रोधमूर्छितः ।
उत्क्षिप्यान्धकमुद्धूतो निनाय बलवान् बलात् ॥४८॥
तं नीयमानं संप्रेक्ष्य हिरण्याक्षः सुतं स्वकम् ।
जघान सायकैस्तीक्ष्णैः कृतान्तं सुभृशं दृढम् ॥४९॥
तस्य गात्राणि सर्वाणि सन्धीँश्चैव महाबलः ।
विव्याध निशितैर्बाणैः स विष्टब्धो व्यतिष्ठत ॥५०॥
तं बाणैर्विवृतं[३५] दृष्ट्वा देवाः सर्वे सवासवाः ।
रक्षन्तः समपद्यन्त भीमोद्यतकरायुधाः ॥५१॥
अथ किखर[३६] मृदंगवेणुवीणापणवसुघोषकडिण्डिमानकानाम् ।
असुरसुरबले महान् तदानीं समभवदुग्रतरः[३७] स तूर्यनादः[३८] ॥५२॥

⊙ इति स्कन्दपुराणे युद्धे अशीतितमोध्यायः ⊙

३२ पुनः - ख. । ३३ तालानाहत्य - ख. । ३४ बाहुभिः (?) । ३५ बाणविवृतं - ख., बाणैर्विधृतं (?) । ३६ मुरज - घ. । ३७ ...दग्रवरः - ख. । ३८ सतूर्यनादमिति - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

हिरण्याक्षस्तदायान्तं दृष्ट्वा देवेन्द्रमग्रतः[1] ।
उवाच रथयन्तारमिन्द्रं प्रति नयस्व माम् ॥१॥
स तेन चोदितस्तस्य चोदयानस्तदा हयान् ।
अनयत्तां सुरेन्द्राय हुतं भागं यथानलः ॥२॥
स गजस्कन्धगं देवं सहस्राक्षं सुरेश्वरम् ।
शरपाते तदा स्थित्वा प्रोवाचासुरपुंगवः ॥३॥
शक्र यत्तो बलं किञ्चित् तद्विदर्शय मा चिरम् ।
पूर्वदेवा वयं चैव त्रैलोक्यं चाखिलं हि नः ॥४॥
ज्येष्ठक्रमागतं कृत्वा न्यायेन च सुरोत्तम ।
ते यूयं न्यायमुत्सृज्य हत्वा मे भ्रातरं पुनः ॥५॥
विश्रम्भेण शठा भूत्वा पश्चाद् देवत्वमागताः ।
इमे वयं पूर्वदेवा नवा यूयञ्च देवताः ॥६॥
युध्यतां वोद्य सर्वेषां जीवितानि हराम्यहम् ।
सहानुगैस्त्वामिहाद्य हत्वा कृत्वा बलिं तथा ॥७॥
भविष्याम्यनृणो भ्रातुर्यस्त्वया मायया हतः ।
स एवमुक्त्वा बलवद्धनुराकृष्य वीर्यवान् ।
ललाटे पञ्चभिर्व्यास विव्याध निशितैः शरैः ॥८॥
स विद्धस्तेन देवानां ललाटे पञ्चभिः शरैः ।
राजा बभौ यथा मेरुः सूर्यपादैःसमावृतः ॥९॥
अथ तस्य तदा शक्रः पुनश्चङक्रमतो[2] धनुः ।
चिच्छेद वज्रमादाय पुनश्चैनमताडयत् ॥१०॥
स तेन सुप्रहारेण दिशो दीप्ता ह्यपश्यतः ।
अन्यच्च धनुरादाय पुनरेव व्यकर्षत ॥११॥

---

१ ...मभ्यगात् - ख. ।   २ ,..श्चक्रमतो - ख.।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तदप्यस्याच्छिनद्राजा[३] तथान्यद् भूय एव च ।
अथ शक्तिं समादाय चिक्षेप रुषितस्तदा ॥१२॥
तामापतन्तीं दीप्तास्यामुग्रां मृत्योरिव स्वसाम्[४] ।
वज्रेण राजा[५] चिच्छेद तदद्भुतमिवाभवत् ॥१३॥
गदामन्यां समुद्यम्य हिरण्याक्षस्तदा शुभाम् ।
अभिदुद्राव वेगेन क्रुद्धः सिंह इव द्विपम् ॥१४॥
तस्यापतत एवाशु गदां हेमपरिष्कृताम् ।
चिच्छेद बहुधा राजा धर्मार्थाविव[६] नास्तिकः ॥१५॥
अथैनं विप्रचित्तिश्च शिनिर्वाष्कलिरेव च ।
मयश्च सम्बरश्चैव असिलोमा च दानवः ॥१६॥
तारश्च कारकश्चैव तथेन्द्रदमनः स च ।
कालनेमिश्च[७] षण्डश्च विपाकः पाक एव च ॥१७॥
इल्वलो नमुचिश्चैव वातापी कालमुंजिकः[८] ।
एते सर्वे महामाया देवेन्द्रमभिदुद्रुवुः[९] ॥१८॥
तानापतत एवाथ रुद्रादित्याःप्रमन्यवः ।
रुरुधुर्विजने[१०] यद्वद् गजान् सिंहाः समूर्जिताः ॥१९॥
तेषां तेषां च संग्रामः सुघोरः समपद्यत ।
अरण्येन्योन्यसंपातान्मत्तानां दन्तिनामिव ॥२०॥
तत्रांशो[११] नाम आदित्यो रथेनाम्बुदनादिना ।
आयम्य कार्मुकं व्यास दानवान् समुपाद्रवत् ॥२१॥
स विप्रचित्तिं दशभिः शिनिं पञ्चभिरेव च ।
त्रिभिश्च वाष्कलिं संख्ये मयं[१२] पञ्चभिरेव च ॥२२॥
संवरं चैव विंशत्या असिलोमानमेव च ।
तारं च तारकं चैव इल्वलं नमुचिं तथा ॥२३॥

---

३ तमप्यस्याच्छिनद्राजा - ख. । ४ स्नुषां - ख. । ५ मृजु - ख. । ६ धर्माथानिव - ख. । ७ कालनेमी च - ख. । ८ कालमुंजितः - ख. । ९... दुद्रुवे - ख. । १० ...र्विजये - ख. । ११ तत्रांसो - ख. । १२ यमं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वातापिं[१३] चेन्द्रदमनं विपाकं पाकमेव च ।
कालनेमिं च षण्डं च तथा चामीसृमुञ्जिकम्[१४] ॥२४॥
एतान्सर्वान् स विव्याध दशभिर्दशभिः शरैः ।
विकर्षतां च संग्रामे आदित्यो लघुहस्तवान् ।
धनूंषि युगपद्देवश्चिच्छेद च ननाद च ॥२५॥
तत एषां पुनर्वाहान् सूतान् दिव्यान् जयध्वजान् ।
प्रहसन्निव विप्रेन्द्र सायकैर्बहुधाकरोत् ॥२६॥
ते हताश्वा महेष्वासा हतसूताश्च सर्वशः ।
वेगेन खड्गिनः सर्वे अंशमेवाभिदुद्रुवुः[१५] ॥२७॥
तान्मूर्त्तीनिव शैलेन्द्रान् गर्जतो जलदानिव ।
असंभ्रान्तस्तदादित्यो जानुष्वेवावपूरयत् ॥२८॥
शरपूरितगुल्फास्ते जानुष्वेव च दानवाः ।
अंशमुत्सृज्य[१६] वेगेन जग्मुरन्यां दिशं तदा ॥२९॥
ततो देवास्तदा चक्रुर्महान्तं तूर्यनिस्वनम् ।
सिंहनादाँश्च विपुलान् बाहुशब्दाँश्च पुष्कलान् ॥३०॥
अंशोप्यायम्य भगवान् धनुरिन्द्रायुधोपमम् ।
दानवानां सदैत्यानामकरोत् कदनं महत् ॥३१॥
शिरांसि दानवेन्द्राणामंशः प्रहरतां वरः ।
अपातयत्[१७] फलानीव पक्वानि श्वसनो यथा[१८] ॥३२॥
धावन्ति केचिदंशेन[१९] अशिरस्काः शरैः कृताः ।
गत्वा वेगेन संग्रामात् पतन्त्यूर्व्यां गतासवः ॥३३॥
अपरे बाहुभिश्छिन्नैरूरुभिश्च महाबलाः ।
पतिता निष्टनन्त्युग्रं[२०] निरयस्था यथा नराः ॥३४॥
शरपूरितसर्वाङ्गाः शरसंबद्धबन्धनाः ।
भ्रमन्ति तत्र तत्रैव संसार इव देहिनः[२१] ॥३५॥

---

१३ वातापीं - ख. । १४ मुण्डिकं - ख. । १५ अंशुमेवाभिदुद्रुवुः - ख. । १६ अंशुमुत्सृज्य - ख. ।
१७ अपालयत् - ख., अफालयत् (?) । १८ पक्वानीव घनावली - घ., श्वसतो म्यषा - ख. ।
१९ दन्तेन - ख. । २० ...न्त्युग्रा - ख. । २१ रागिणः (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

न स तत्रास्ति दैत्यो वा दानवो वा महाबलः ।
यं[२२] शरा न विशन्त्युग्रा अंशस्य[२३] सुमहात्मनः ।।३६।।
बन्धुजीववनं यद्वद् वनमाभाति[२४]पुष्पितम् ।
अशोककिंशुकानां वा तथा दैत्यबलं बभौ ।।३७।।
अयमंशोयमंशोति नेत्ययं चायमित्युत ।
सर्वमंशमयं दैत्या ह्यपश्यन्त भयार्दिताः ।।३८।।
सोपि नित्यायतधनुः परिवेषीव भास्करः ।
यं यतः पश्यते दैत्यं तं तं विव्याध पत्रिभिः ।।३९।।
नाददानस्तदा ह्यंशः सन्दधानस्तथापि वा ।
न विकर्षन्धनुश्चैव लक्ष्यते दैत्यदानवैः ।।४०।।
मण्डलीकृतमेवास्य दृश्यन्ते कार्मुकं महत् ।
आदित्य इव मध्याह्ने दृश्यते स तदा युधि ।।४१।।
स दिव्यचापो[२५] लघुहस्तवान् बली सदा महामण्डलभूतकार्मुकः ।
ददाह शत्रून् पवनेरितो रणे विभावसुः शुष्कमिवेन्धनं महद्[२६] ।।४२।।

⊙ इति स्कन्दपुराणे युद्धे एकाशीतितमोध्यायः[२७] ⊙

सनत्कुमार उवाच

तांस्तथांशेन दैत्येन्द्रान् काल्यमानानितस्ततः ।
दृष्ट्वा बलो महामायो यन्तारमिदमब्रवीत् ।।१।।
नयस्व मां यतोंशोयं दुरात्मा दहते बलम् ।
यावदेनं शितैर्बाणैर्नयामि यमसादनम् ।।२।।
तस्यापतत एवांशस्तदा प्रहरतां वरः ।
ध्वजं चिच्छेद[१] बाणेन हयांश्चैकैकशस्तदा ।।३।।

---

२२ यः - क. । २३ ... नंशस्य - ख. । २४ घनमाभाति - ख. । २५ दीप्तहस्तो - घ. ।
२६ महानिति - ख. । २७ अध्यायः १३९ - ख. ।
१ ध्वजाश्चिच्छेद - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

भल्लेन च शिरः कायाद्यन्तुराशु न्यपातयत् ।
तञ्चैव पञ्चभिर्बाणैर्ललाटे समविध्यत ॥४॥
तस्य दैत्यस्य ते भान्ति ललाटे पञ्च सायकाः ।
घनोदरविनिष्क्रान्ता भास्करस्येव रश्मयः ॥५॥
दैत्योपि हि तदा धन्वी[2] वियदुत्पत्य रोषितः ।
सायकैर्बहुभिर्व्यास सोंशं समकिरद्बली ॥६॥
सुवृष्टिमिव[3] जीमूतः - - - - इवाशनिम् ।
करान् दिवाकरो[4] यद्वत् तुषारं चन्द्रमा यथा[5] ॥७॥
तथा स दानवो दर्पाद्बलः प्रहरतां वरः ।
अंशमेवाकिरत्तीक्ष्णैः सायकैर्मर्मभेदिभिः ॥८॥
ध्वजं चैवास्य चिच्छेद बहुधा दानवेश्वरः ।
हयान् वेगहतान् कृत्वा सारथिं चाप्यसारथिम् ॥९॥
कार्मुकं बहुभिर्बाणैर्व्यधम [- - - - - ।
यथांशं स चकारोग्रस्थान्यानपि दैवतान्[6] ॥१०॥
निरुद्यमान् महामायश्चकार विररास च ।
क्वचिद् गीष्पतिसंकाशः[7] क्वचिद् भास्करसंनिभः ॥११॥
क्वचित्सोमाग्निकल्पश्च क्वचित्ताराग्रहैस्समः[8] ।
क्वचित्पर्वतसंकाशः क्वचिद् गृध्रवपुर्धरः ॥१२॥
क्वचिच्चाकाशमाविश्य अदृश्यः सोसृजच्छरान् ।
शरोपचितगात्रं तच्छिन्नं भिन्नं विदारितम् ॥१३॥
विष्टब्धं मूकवत्सर्वं देवानां बलमाबभौ ।
नष्टवादित्रनिनदं हयहेषितवर्जितम्[9] ॥१४॥
गजबृंहितविभ्रष्टं श्रान्त[10]योधोग्रनादितम् ।
निष्पन्दं तद्बलं भाति चित्रप्रत्यर्पितं यथा ॥१५॥

---

२ म(स्र) ग्वी - ख. । ३ सवृष्टिरिव - ख. । ४ दित्यकरो - ख. । ५ इव - ख. । ६ देवतान् · ख ।
७ ...च्छ्रीपतिसंकाशः (?) । ८ ..ग्रहैस्सह - ख. । ९ ...गर्जितम् - ख. । १० शान्त - (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ऊर्ध्वं निरीक्षते तत्र यः कश्चिद्विबुधो बले ।
बलस्तस्य शरैर्वस्त्रमकरोद्वि - वद्बली ।।१६।।
- ।
चेष्टाविराहिता[११]श्चासन् यथा मोक्षपथि[१२] स्थिताः ।।१७।।
ताँस्तथा सीदतः सर्वान् दृष्ट्वा बलमहार्णवे ।
वायुर्जयन्तः पूषा च भगश्च सुमहाबलाः ।।१८।।
नदन्तस्ताञ्छराँस्तस्य बलस्य समवारयन् ।
वायुस्तस्य महाभाग शरान्मेघादिवोदितान्[१३] ।।१९।।
मुञ्चतो[१४] मुच्यमानाँश्च मुक्ताँश्चैवाहरद्बली ।
भगोस्य कार्मुकं दिव्यमच्छिनत्प्रहसन्निव ।।२०।।
देहत्राणं तथा पूषा जयन्तश्चेषुधी तथा ।
- - - - - - - - - - - - - - - - - - ।।२१।।
समार्दयन् शरैस्तीक्ष्णैर्देवा रविसमप्रभाः ।
सोर्द्यमानस्तदा देवैर्बली दनावपुंगवः ।।२२।।
वृक्षैः काननजैर्व्यास युयुधे भीमविक्रमः ।
तान्द्रुमाँस्ते तदाक्षिप्तान् बलेन बहुधा शुभान् ।।२३।।
चक्रुः शरैर्देवतेन्द्रास्ततः स गिरिमाव्रजत् ।
गृहीत्वा स महच्छृङ्गं समृगव्यालकिन्नरम् ।।२४।।
चिक्षेप सुमहानादं[१५] प्रकुर्वाणोतिदारुणम् ।
तथा पतन् स[१६] वेगेन पवनो बलवान् बलात् ।।२५।।
जहार शृङ्गं तच्चापि पपातासुरमूर्धनि ।
दानवानां तदा कोटिमेकां वीर्यवतां युधि ।।२६।।
जघान बलमुक्तं तद् गिरिश्रृङ्गं महास्वनम् ।
तान् हतान् दानवास्तेन श्रृंगेण दितिनन्दनान् ।।२७।।

---

११ चेष्टाविरहितं - घ. । १२ मोक्षपथे (?) । १३ ...निवोदितान् - ख. । १४ मुच्यतो - ख. । १५ सुमहत् नादं - ख. । १६ पतन्तं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दृष्ट्वा देवांश्च तानुग्रानभज्यन्त[१७] सहस्रशः[१८] ।
रथैरश्वैर्गजैश्चैव तथा चैव पदातयः ॥२८॥
उत्सृज्य वाहनान्यन्ये[१९] जीविताभ्यर्थिनस्तदा[२०] ।
प्रमुञ्चन्तो महानादान् पलायन्त[२१] सहस्रशः ॥२९॥
द्रवतस्तान् तदाभ्येत्य हिरण्याक्षः स दानवः (?) ।
विप्रचित्तिश्च दनुजः प्रह्लादश्च महाबलः ॥३०॥
मय - -[२२] न्धको दैत्यस्तारकः शक्रतापनः ।
ऊचिरे दानवान् सर्वान् दैत्याँश्च भयविह्वलान् ॥३१॥
भो भो दानवशार्दूला दैत्याश्च सुरशत्रवः ।
किं पलायथ[२३] तिष्ठध्वं मा भयं वोस्तु दानवाः ॥३२॥
क्व गता दानवा यूयं सुखं लप्स्यथ वा न वा ।
एते बलमजानन्तो[२४] देवाः पूर्वं महाबलाः ॥३३॥
न प्रमर्दन्ति पाताले स्थितान्नाप्यसुरोत्तमाः[२५] ।
निःशेषान् प्रमथिष्यन्ति पातालेपि कुलाधमाः ॥३४॥
मा यात विनिवर्तध्वं रिरक्षिषत[२६] सर्वशः ।
सुयुद्धेनात्मनो दैत्या मा भयं वोत्र जीविते ॥३५॥
क्व गतं दनुजत्वं वः क्व गता दैत्यता च वः[२७] ।
क्व च वैरं सुरैः सार्धं क्व राज्यहरणं गतम् ॥३६॥॥
यद् धैर्यं[२८] यश्च वो दर्पः कुलं जन्म[२९] च यद्धि वः[३०] ।
यच्च वो[३१] गर्जितं पूर्वं तस्य कालोयमागतः ॥३७॥
तदा ब्रुवत यद्[३२] दैत्या न बाला[३३] वयमित्युत ।
वयमेकैकशो योग्या देवानां नाशनेपि[३४] च ॥३८॥
तस्य कालोयमद्येह प्राप्तः किं विपलायथ[३५] ।
तत् सर्वं गर्जितं वोद्य जानाम्यहमतः परम् ॥३९॥

---

१७ दृष्ट्वान्ये दानवाः सर्वे व्यभजन्त (?) । १८ सुरशत्रवः - घ. । १९ वाहनानन्ये - ख. । २० जीवितेनार्थिनस्तदा - ख. । २१ प्रविलीनास्तदा दैत्या दानवाश्च - घ. । २२ यममुक्तो - ख. । २३ पलायत - ख. । २४ एतैर्बलमजानन्तो - ख. । २५ स्थित्वा नाप्यसुरोत्तमाः - ख. । २६ ररक्षारुत - ख. । २७ गतो दैत्यश्च वः - ख. । २८ यद्वैरं - ख. । २९ कुलजन्म - ख. । ३० महर्द्धिमत् - घ. । ३१ ते - ख. । ३२ यत्तब्रुवते तदा - ख., यत्तुब्रूत तदा - घ. । ३३ बलिनो - घ. । ३४ नाशनेति - ख. । ३५ ...षिश्वि पलायत - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शरदम्बुदवद् दैत्या व्यर्थं मा यात भीरिह[३६]
निवर्तध्वमधर्मज्ञा युध्यध्वं कृतनिश्चयाः ॥४०॥
वीक्षध्वं मे सपुत्रस्य महत् कर्म कुलाधमाः ।
कश्यपस्य सुतः श्रीमान् हिरण्याक्षोस्मि दानवाः ॥४१॥
अन्धकश्च सुतोयं मे ब्रह्मदत्तवरः शुभः ।
हिरण्यकशिपोर्वीर्यं यदभूदसुरोत्तमाः ॥४२॥
द्विगुणं तन्ममाप्यस्ति वीक्षध्वं तदशंकिताः ।
अद्य चैतान् मया सर्वान् हतान् पश्यत दानवाः ॥४३॥
संग्रामे यदि तिष्ठन्ति सर्वे देवा समाग्रतः ।
अद्य त्रैलोक्यमव्यग्रं हतेष्वसुरशत्रुषु ॥४४॥
विज्वरा भोक्ष्यथ[३७] सुखं मयेन्द्रेणासुरोत्तमाः ।
मा वोस्तु भयमद्येह यथा तिष्ठन्ति साधवः[३८] ।
सपुत्रं मां युधि यथा वीक्षमाणास्तु तिष्ठत ॥४५॥

सनत्कुमार उवाच

त एवमुक्ता विप्रेन्द्र गजास्तोत्रार्दिता इव ।
विनिवृत्ताः पुनः सर्वे लज्जयातिसमावृताः[३९] ॥४६॥
ते छत्रसंछादितवक्त्रपद्मा लज्जासमाविष्टविरागवक्त्राः[४०] ।
न तस्य राज्ञो मुखतोवतस्थुस्तिमेरिवार्त्ताः सलिलेल्पमीनाः ॥४७॥

⊙ इति स्कन्दपुराणे युद्धे असुराक्रोशनो नाम द्व्यशीतितमोध्यायः ⊙

सनत्कुमार उवाच

अथ ते दानवा व्यास निवृत्ता रणमूर्धनि ।
दुष्करं तं तदा चक्रुर्वेगं नद्य इवार्णवे ॥१॥

---

३६ भीविहः - ख., भीतवत् - घ. । ३७ भोज्य... - ख. । ३८ सापवः - ख. । ३९ स(श)यावृताः (?) ।
४० विचारवक्त्राः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रह्लादश्चानुह्लादश्च शिनि[1] र्बाष्कल एव[2] च ।
विरोचनो बलिर्बाणो बलोन्यो देवकण्टकः[3] ॥२॥
विप्रचित्तिश्च षण्डश्च ह्लदश्च स शतोदरः ।
यमोसुरश्च व्यंसश्च शतावर्त्तो हुतोदरः ॥३॥
केशी च नमुचिश्चैव तथेन्द्रदमनोसुरः ।
मयो मुर[4]स्तारकाक्षो विद्युन्माली प्रभाकरः ॥४॥
तारश्च तारकश्चैव बकश्चाटिश्च विश्रुतः ।
मूकश्चैव कुभश्चैव कार्तस्वनमहारवौ ॥५॥
वातापी चेल्वलश्चैव तथैवेल्वकबल्वलौ ।
केतुश्च शतकेतुश्च राहुः स्वर्भानुरेव च ॥६॥
शम्बरो नमुचिश्चैव कालशम्बर एव च ।
दुन्दुभिर्महिषश्चैव शतदुन्दुभिरेव च ॥७॥
कालनेमी विपाकश्च पाको दुर्योधनस्तथा ।
हस्ती सुन्दनिसुन्दौ च शरभः काल एव च ॥८॥
वृषपर्वा[5] शताक्रन्दः[6] शतावर्त्तोथ धेनुकः ।
प्रलम्बश्च वकश्चैव[7] गजो हालाहलस्तथा ॥९॥
सैंहिकेयाश्च विख्याताः पौलोमाः कालकासुताः ।
निवातकवचाश्चैव बालेयाश्च तथा गणाः ॥१०॥
बाणस्य च सुताः सर्वे कालखंजाश्च विश्रुताः ।
वृत्रो वृत्तश्च सगणस्तथान्ये सुमहाबलाः ॥११॥
तस्य सैन्यस्य विप्रेन्द्र नर्दतः संबभौ तदा ।
वेगः स सिन्धुराजस्य वेलां प्रति यथा महान् ॥१२॥
वादित्ररवसंमिश्रैः सिंहनादैः सुपुष्कलैः ।
रथनेमिहयानां च गजानां बृंहितैः सह ॥१३॥
स शब्दस्तुमुलो व्यास त्रैलोक्यमवपूरयत् ।
देवाह्यपि[8] सुसंयत्ताः सर्वोद्योगेन संस्थिताः ॥१४॥

---

१ निशि - ख, शिवि - घ. । २ ...र्बाष्कलिरेव - घ. । ३ वातोथ कंपनः - घ. । ४ ...सुर - ख. ।
५ विशपर्वा - ख. । ६ शतानन्दः - ख. । ७ ध्वकश्चैव - ख. । ८ देवापि हि - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रत्यगृह्णन्त तान्[९] दैत्यान् क्रोधताम्रायतेक्षणाः[१०] ।
- - - - - - - - - - - - - - - - - - - ॥१५॥
असिभिः पात्यमानैश्च शतघ्नीभिश्च सर्वतः ।
उल्काभिरिव तद् व्योम चिचित्रमभवत्तदा ॥१६॥
शरासिभिन्नकृत्तानि[११] पतन्त्युर्व्यां शिरांसि हि[१२] ।
तालेभ्य[१३] इव पक्वानि फलानि मुनिसत्तम ॥१७॥
मुकुटैर्हारकेयूरैः श्रोणीसूत्रैश्च सप्रभैः ।
निष्कैर्दुकूलैः कटकैरंगुलीयैः सकुण्डलैः ॥१८॥
उरच्छदैः कङ्कतीभिः[१४] करपालैश्च दन्तिनाम् ।
व्यजनैर्बालवृन्तैश्च[१५] छत्रैर्मणिभिरेव च ॥१९॥
पट्टैश्च काञ्चनैर्दिव्यैः कवचैश्च महाप्रभैः ।
शिरोभिश्चरणैश्चैव करै[१६]र्वक्त्रैर्महाप्रभैः ॥२०॥
प्रतोदैश्च कुथाभिश्च योक्त्रैश्च कनकोज्ज्वलैः ।
तत्र युद्धनिशा भाति[१७] ताराभिर्द्यौ रिवापरा ॥२१॥
तिष्ठ तिष्ठ क्व मे यासि नास्ति मोक्षस्तवाद्य वै ।
स्थितोहं प्रहरस्वेति न मे भीस्तिष्ठ मेग्रतः ॥२२॥
किं गर्जसि वृथा व्योम्नि शरदीव बलाहकाः ।
कर्मणा दर्शय क्षिप्रं गर्जितं तेद्य निष्फलम् ॥२३॥
नैवं प्रह्रियते मूढ मा[१८] वीक्षस्व दृढो भव ।
तिष्ठ तिष्ठ क्व गन्तासि मम हत्वा प्रियं सुतम् ॥२४॥
स्थितोस्म्येष नयिष्यामि[१९] त्वामद्य यमसादनम्[२०] ।
अद्य ते - रतां सर्वां देवाधम सुदुस्सहाम् ॥२५॥
नाशयिष्यन्ति मद्बाणास्तिष्ठ तिष्ठ ममाग्रतः ।
दानवाधम देवोस्मि नास्मि[२१] भीतोहमाहवे[२२] ॥२६॥

९ प्रगृह्णंस्तांश्च - ख. । १० क्रोधताम्रायतेक्षणा(न्?: ?) - ख. । ११ ...भिर्निकृत्तानि (?) । १२ तु - ख. । १३ तलेभ्य - ख. । १४ कङ्कटीभिः - ख. । १५ ...स्तालवृन्तैश्च - (?) । १६ कलौ - ख । १७ युद्धदिशा - ख., युद्धावनिर्भाति - ख. । १८ मो - ख. । १९ करिष्यामि - ख. । २० त्वामप्यद्य - ख., यमातिथिम् (?) । २१ नास्ति - ख. । २२ भीतवमाहवे - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एवं वदन्तो युयुधुर्यथा मत्ता महागजाः ।
परस्परवधासक्ता योधास्तत्र सहस्रशः ॥२७॥
अन्योन्यमेवमाभाष्य प्रैषयन्यमसादनम् ।
सिद्धाश्च चारणाश्चैव व्योम्नि सर्वे व्यवस्थिताः ॥२८॥
साधयन्ति[२३] रमन्ते च नदन्ति[२४] च यथाम्बुदाः ।
ममायं दानवः[२५] संख्ये हतो भर्ता विनिर्मितः ॥२९॥
अयं देवस्तव पतिर्मा पारक्ये मनः कृथाः ।
किमेवं लोभयुक्तासि श्रेष्ठं श्रेष्ठं परीक्षसे ॥३०॥
स्वयंग्राहो न चेहास्ति[२६] लेख्यं वाचय मा त्वर[२७] ।
असन्तुष्टं मनः किन्ते[२८] संतुष्टा भव सुन्दरि ॥३१॥
भागोयं ते सुरैर्दत्तस्तं गृहीत्वा व्रजालयम्[२९] ।
एवमप्सरसश्चात्र वदन्ति च हसन्ति च ॥३२॥
समरे[३०] निहते[३१] योधे[३२] कुर्वन्ति कलहं तथा ।
मेखलावलयोन्मिश्रं तासां तत् कलभाषितम् ॥३३॥
श्रुत्वा श्रुत्वा च ते योधा युयुधुर्भयवर्जिताः ।
बल्गितास्फोटितै[३३]श्चैव दिशः सर्वा व्यनादयन् ॥३४॥
तत् प्रवादितगजोपबृंहितवल्गिताकुपितसिंहनादितम् ।
देवदानवभयप्रवर्त्तनं[३४] जीवितान्तकरमाबभौ[३५] रणम् ॥३५॥

⊙ इति स्कन्दपुराणे युद्धे त्र्यशीतितमो[३६]ऽध्यायः ⊙

सनत्कुमार उवाच

स युद्धयज्ञस्तत्राग्र्यो[१] राज्यार्थमभवत्तदा ।
तत्र यज्वा[२] स्वयं देवः[३] सहस्राक्षः प्रतापवान् ॥१॥

---

२३ सीधयन्ती - ख. । २४ नदन्तो (न्ते) - ख. । २५ दानवाः - ख. । २६ नदीहास्ति - ख. ।
२७ मा त्वरी - ख. । २८ कस्ते - ख. । २९ प्रजान्नये - ख. । ३० अपरे (?) । ३१ निहतं - ख. ।
३२ योधं - ख. । ३३ स्फोटिता - ख. । ३४ प्रवर्द्धनं (?) । ३५ जीवितान्तकरणं बभौ - ख. । ३६ - १३९ - ख. ।

१ स्तत्रोग्रो (?) । २ यष्टा - घ. । ३ देवं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सह देवैः सुराध्यक्षः कुशास्तस्य शरा मताः ।
आयुधानि विचित्राणि स्रुवा[४] यैर्हूयते हविः ॥२॥
हविः प्राणाः समाख्याता[५] अग्निर्मृत्युर्महाप्रभा[६] ।
मन्त्राश्चास्त्राणि दिव्यानि पुरोडाशाः शिरांस्यपि ॥३॥
सोमस्तत्र जयोभून्नु[७] रुद्राश्चाध्वर्यवोभवन्[८] ।
आदित्या बह्वृचश्चासन् होत्रं च[९] वसुभिः कृतम् ॥४॥
ब्रह्मा समभवच्चात्र स्वयं देवो बृहस्पतिः ।
शामित्रं चाश्विनौ तौ तु यज्ञ एवं व्यवर्त्तत[१०] ॥५॥
पशुस्तत्राभवद्दैत्यो हिरण्याक्षः सहानुगः[११] ।
एवं बभौ तदा यज्ञो दैत्यानां शिशिराधिपः (?) ॥६॥
हिरण्याक्षोभवद्यज्वा दैत्यदानवनायकः ।
विप्रचित्तिरभूद् होता प्रस्थातारश्च[१२] दानवाः ॥७॥
उद्गाता चैव प्रह्लादः शुक्रो ब्रह्मा च सुव्रतः ।
पशुरिन्द्रः सहस्राक्ष एवं सोयजदव्ययः ॥८॥
तस्मिँस्तदा महायज्ञे वर्तमाने महाभये ।
इन्द्रः समासदद्दैत्यं हिरण्याक्षं महाबलम् ॥९॥
वायुरभ्याययौ तूर्णं विप्रचित्तिं महाबलः ।
सक्तोभूत् संवरेणांशो बलेन[१३] भग एव च ॥१०॥
विरोचनेन पूषा च मित्रो बलिमथासजत् ।
बाणेन वरुणः सार्धमन्धकेन यमस्सह ॥११॥
जयन्तेनेल्वलः सार्धं मयेन[१५] सह चन्द्रमाः ।
अहिर्बुध्न्येन राहुश्च कापाली शतकेतुना ॥१२॥
अजैकपात् कालनेमिं ज्वरः कार्तस्वनेन च ।
प्रह्लादेनार्यमा सार्धमनुह्लादेन वै धरः ॥१३॥

---

४ स्रुवो - ख. । ५ ...श्चान्धक (आख्याता?) - घ. । ६ प्रभुः - घ.. ...प्रभः (?) । ७ जयोभूच्च - घ. । ८-धर्यणाभवन् - घ. । ९ ... त्रोत्रं - ख., उद्गात्रा - घ. । १० न्यवर्तत - ख., प्रवर्तत - घ.। ११ सहानुगैः - घ. । १२ प्रस्तोतारश्च (?) । १३ संवरेणाशुर्बलेन - ख. । १४ ...मथासृजत् - ख., मयुध्यत - घ. । १५ यमेन - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ध्रुवो ह्लदेन[१६] संसक्तो ह्यन्ये चान्यैर्महाबलाः ।
हिरण्याक्षस्तदेन्द्रस्य[१७] दृढमायम्य कार्मुकम् ॥१४॥
विव्याध गजमेकेन कुम्भदेशे महाबलः ।
देवेन्द्रं पञ्चभिर्बाणैर्जत्रुदेशे समाहनत्[१८] ।
षड्भिर्ललाटे विव्याध गजं भूयश्च सप्तभिः ॥१५॥
स गजस्तैःशरैर्भिन्नः क्षरन् रुधिरमाबभौ ।
गैरिकाम्बुपरिस्रावी श्वेतः पर्वतराडिव ॥१६॥
तस्य क्रुद्धस्तदा शक्रो वज्रेण शतपर्वणा ।
प्रहारमददद् व्यास गण्डदेशे ननाद च ॥१७॥
स वज्रघातं दैत्येन्द्रः पुष्पघातमिवोर्जितम् ।
अचिन्तयानः सगजं शक्रमेवार्दयद्बली ॥१८॥
गजोपि तेन निर्भिन्नः क्षरद्रुधिर आबभौ[१९] ।
हविषेवानलः क्रोधात् प्रजज्वाल जगर्ज च ॥१९॥
स वेगं महदास्थाय अंकुशेन च चोदितः ।
हिरण्याक्षरथं तूर्णं जग्राह रथकूबरे ॥२०॥
गृहीत्वा स तमुत्क्षिप्य[२०] चिक्षेप गजसत्तमः ।
मेरुशृंगमिवोत्क्षिप्य समेघं श्वेतकुण्डली ॥२१॥
गत्वा मुहूर्त्तं वेगेन पतन् रथवरो[२१]बभौ[२२] ।
स्वर्भानुना हतः पूर्वं सरथो भास्करो यथा ॥२२॥
तत्र सम्यक् स्थितं भूमौ हिरण्याक्षरथं पुनः ।
आजगाम गजस्तूर्णं[२३] जिघृक्षुर्मुनिसत्तम ॥२३॥
प्रसारितकरो दन्ती स्तब्धदृक्कर्णबालधिः ।
अभ्यधावत वेगेन गरुत्मानिव पन्नगम् ॥२४॥
तमापतन्तं वेगेन समीक्ष्यासुरसत्तमः ।
बभार[२४] स तदा व्योम्नि गरुत्मानिव पन्नगम् ॥२५॥

---

१६ ह्लादेन (?) । १७... स्तथेन्द्रस्य - ख., स्सुरेन्द्रस्य - घ । १८ समाहतः - ख. ।१९... माबभौ - ख. ।
२० न (त) दोत्क्षिप्या - ख. । २१ ..द्रथवरो - ख । २२ मतौ - ख. । २३ रथं तूर्णं - ख ।
२४ दगार (?) - ख., वघार - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तं तु मण्डलमावृत्तं गजोप्यनु तथैव हि ।
स्तब्धदृक्कर्णलांगूलः प्रसारितकरोभ्रमत् ।।२६।।
हाहाकृतमभूत् सर्वं साधुसाध्विति चोभयोः ।
बलयोर्देवदैत्यानां मूकवच्चाभवत्पुनः ।।२७।।
साधु दैत्येति चान्येषां हिरण्याक्षेति चैव हि[२५] ।
स गजस्कन्धगो भाति भ्रमन् सुरगणेश्वरः ।।२८।।
सपक्ष इव[२६] शैलेन्द्रे महिषोग्रं समास्थितः[२७] ।
हिरण्याक्षश्च दैत्येन्द्रो भ्रमित्वा त्रिर्महासुरः ।।२९।।
गजं द्रुतमिवोत्सार्य रथे तस्थौ महाबलः ।
युध्यमानस्तु दैत्येन्द्रो दृढमायस्य कार्मुकम् ।।३०।।
देवराजं शरैस्तीक्ष्णैः समन्तात् पर्यवारयत् ।
स तैः शरैस्तदा व्यास मर्मसंधिषु ताडितः ।।३१।।
वज्रेण शतधा तस्य कवचं प्रव्यशातयत् ।
हयानां चैव योक्त्राणि सर्वाण्येव त्वकृन्तत ।।३२।।
रश्मीँश्च सूतहस्तस्थान् प्रतोदं चैव काञ्चनम् ।
चिच्छेद वहुधा शक्रः प्रहसन्निव वीर्यवान् ।।३३।।
छिन्नयोक्त्रास्ततोस्याश्वाः स्वछन्दाः संप्रतस्थिरे[२८] ।
हिरण्याक्षोप्यवप्लुत्य गदया समताडयत्[२९] ।।३४।।
गजं सुरपतिं चैव खड्गेन स महासुरः ।
स गजस्तेन घातेन त्यक्त्वा तं रथसत्तमम् ।।३५।।
शकृन्मूत्रं सृजन् व्यास प्राद्रवद् बलवाँस्तदा ।
मर्दयानो नदँश्चैव भ्रामयन् सुरसत्तमम्[३०] ।।३६।।
असिनाभ्याहतश्चापि देवराजो महाबलः ।
नार्त्तिमानभवत् संख्ये न - - - - - - - -[३१] ।।३७।।

---

२५ हृ - ख. । २६ सपक्षमिव - ख. । २७ महिषोग्निसमास्थितः - ख. । २८ समतस्थिरे - ख. ।
२९ मास ... - ख. । ३० बभ्रामाशु रसैंस्तदा (?) । ३१ न चाप्य...क्षमाबभौ - ख., च क्षतमना - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स दानवेन्द्रप्रहतेन दन्तिना महाबलः प्रस्रुतदानगन्धिना ।
अमृष्यमाणः प्रययौ प्रमाथिना हिरण्यनेत्रेण युधि प्रमाथितः ॥३८॥

⊙ इति स्कन्दपुराणे युद्धे चतुरशीतितमोध्यायः । ⊙

सनत्कुमार उवाच

विप्रचित्तिर्महामायो वायुं बहुभिराशुगैः ।
अवाकिरद्दनुसुतो वृष्टच्येव हि जलप्रदः ॥१॥
संछादयन् तदा व्यास मण्डलीकृतकार्मुकः ।
इषूँश्चिक्षेप तीक्ष्णाग्राञ्छलभान् सागरो यथा ॥२॥
धारा बलाहकाद्यद्व[१] ज्ज्योत्स्नाश्चन्द्रमसो यथा ।
रश्मयो भास्कराद्यद्वद्[२] हिमं हिमगिरेरिव ॥३॥
तथा[३] ते शरसंघाता[४] धनुषो मण्डलीकृतात् ।
विप्रचित्तेर्विनिष्पेतु --------[५] ॥४॥
भास्करं छादयानाँस्ताञ्छरानापततो बली[६] ।
भगवाननिलो वेगादसुरेषु न्यपातयत् ॥५॥
तैः शरैस्तस्य दैत्यस्य दानवा बहवो[७] हताः ।
छिन्नाश्च निष्टनन्त्युर्व्यां निरयस्था यथा नराः ॥६॥
ताँस्तथा निहतान्[८] दृष्ट्वा विप्रचित्तिर्महासुरः ।
अवप्लुत्य रथाद् वायोर्बाहुयुद्धमयुध्यत[९] ॥७॥
तस्य युद्धप्रसक्तस्य वायोर्बलमवर्धत ।
अमन्यन्त सुराश्चैव निगृहीतं दनोः सुतम् ॥८॥
अथोत्पत्य तदा वेगाद् गदया पवनं दृढम् ।
अताडयत् हिरण्याक्षो गण्डदेशे महाबलः ॥९॥

---

१ बलाहकानां च - घ. । २... श्चै (च्चै?) व - ख. । ३ कुथा - ख. । ४ शरणंयात्रा - ख. ।
५ ...र्वीक्षामृन्मथभेद तः (?) - ख. । ६ बला(त्) - ख. । ७. बहुशो - ख. । ८ विहतान् - ख. ।
९ वायुं बाहुयुद्धेन योधयत् (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स तेन सुप्रहारेण हिरण्याक्षस्य - - - ।
- - -न्यश्च[१०] किञ्चिच्च तत[११] एव स दानवम्[१२] ।।१०।।
परित्यज्य ययौ तूर्णमन्यदेशं[१३] महाबलः ।
अंशसंवरयोश्चापि सुमहन्मुनिसत्तम ।।११।।
युद्धं समभवद् घोरं द्रष्टॄणां[१४] तुष्टिवर्धनम् ।
अंशोस्यापततस्तूर्णं संवरस्य महाबलः ।।१२।।
दर्शयँल्लाघवं सम्यग् ध्वजं चिच्छेद कांचनम् ।
धनुश्च पंचधा कृत्वा हयान्निन्ये यमक्षयम् ।।१३।।
ततोस्य सारथेः कायाच्छिरो भूमावपातयत् ।
भूय एनं चतुःषष्टया सायकानामविध्यत ।।१४।।
स मायां तामसीं घोरां समाविश्याशु दानवः ।
उपलैश्चापि वज्रैश्च गदाभिः परिघैरपि ।।१५।।
कंकटैः करवालैश्च भिन्दिपालैरयोघनैः ।
जघान सरथं देवमंशं[१५] व्यास रणाजिरे ।।१६।।
स संदृश्य[१६] समन्ताच्च पात्यमानं[१७] महाभयम् ।
अंशो मूढो रणं त्यक्त्वा प्रययावन्यतो भयात् ।।१७।।
भगो बलं[१८] समासाद्य रथेनाम्बुदनादिना ।
तिष्ठतिष्ठेति तं दैत्यमुक्त्वा विव्याध पत्रिणा ।।१८।।
स सायकं समादाय बलोसुरमहारथः ।
भगं[१९] हस्ततले तूर्णं निर्बिभेद ररास च ।।१९।।
तत एनं समासाद्य मायया प्रहसन्निव ।
आहत्योरसि पादेन स्वरथं पुनराव्रजत् ।।२०।।
तस्य तल्लाघवं शौर्यममूढत्वं सवीर्यताम्[२०] ।
दृष्ट्वा देवासुराः सर्वे साधुसाध्वित्यपूजयन् ।।२१।।

---

१० . त्यन्त - ख. । ११ तप - ख. । १२ दानवः - ख. । १३ मध्यदेशं - ख. । १४ दंष्ट्रिनं (ा) - ख. ।
१५ ...माशु - ख. । १६ समदृश्यन् - ख. । १७ पातयान् - ख. । १८ वलिं - ख. । १९ भगो - ख. ।
२० च वीर्यवान् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

भगोपि लज्जयाविष्टः पदा तेनाहतस्तदा ।
मुशलेन हयाँस्तस्य रथञ्चैव ससारथिम् ।।२२।।
नामशेषाँस्तदा कृत्वा विननाद यथाम्बुदः ।
स्यन्दनं तु बलस्त्यक्त्वा चूर्णितं सहयं तदा ।।२३।।
भगस्य कार्मुकं दिव्यं भूमिस्थश्चाच्छिनद्[२१] बली ।
तत एनं पृषत्केन ललाटे समताडयत् ।।२४।।
हस्तयोश्च पुनर्व्यास शरैर्विव्याध सप्तभिः ।
गृह्णतः कार्मुकं चास्य पृष्ठद्देशे[२२] बलोच्छिनत्[२३] ।।२५।।
पुनश्चान्यत् पुनश्चान्यत् स जग्राह ततो भगः[२४] ।
मुशलं कालमूलं तत् सर्वघात्यनलप्रभम् ।।२६।।
हतोसीति तमुक्त्वैव चिक्षेप बलनाशनम् ।
तमापतन्तं मुशलं बलो दानवपुंगवः ।।२७।।
शरैर्विष्टम्भयामास नन्दी मृत्युं यथात्मनः ।
अथ[२५] प्रतिहतं मत्वा मुशलं सोसुरः पुनः ।।२८।।
धनुष्कोटचा भगं मूर्ध्नि बलवान् समताडयत् ।
रथश्च सह सूतेन गृहीत्वा कूबरे पुनः ।।२९।।
चिक्षेप दक्षिणस्यां स[२६] वायुर्गिरिमिवार्णवे ।
पूषा विरोचनं देवः शरैर्बहुभिराशुगैः ।।३०।।
विव्याध समरे क्रुद्धः स च तं प्रत्यविध्यत ।
सप्तभिर्निशितैर्बाणै(?)रिषुभिर्मर्मभेदिभिः ।।३१।।
क्रुद्धः पूषा तथाकृष्य बलवान् कार्मुकं महत् ।
- - - - - - - - - - - - - - - - - - ।।३२।।
जीवितान्तकरं घोरं युगान्तादित्यवर्चसम् ।
मुमोच रिपुमुद्दिश्य हतस्त्वमिति चोचिवान् ।।३३।।

---

२१ श्चिच्छिदु(दे) - ख. । २२ पुच्छिद्देशे - ख. । २३ बलाच्छिनत् - ख. । २४ धनुर्भगः - ख. ।
२५ अथा - ख. । २६ दक्षिणामाशां - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तमापतन्तं बहुधा नदन्तं[२७] दिशश्च सर्वा अवभासयन्तम् ।
उल्काः स्फुलिंगाश्च समुद्गिरन्तं ययौ रिपून् वेगवदुत्पतन्तम् (?) ।।३४।।
स चाप्यवप्लुत्य महासुरेन्द्रो दृष्ट्वा तमादित्यसमानभासम् ।
मत्वाविषह्यं स्वरथं विहाय वियत् समाविश्य ततोवतस्थे ।।३५।।
तत्तस्य सूतञ्च[२८] हयोपपन्नं महारथं सर्वगमस्त्रवर्यम् ।
कृत्वाशु भस्मेव यथा हुताशो[२९] जगाम खं दिव्यमदृश्यरूपम्[३०] ।।३६।।

⊙ इति स्कन्दपुराणे युद्धे पञ्चाशीतितमोध्यायः ⊙

सनत्कुमार उवाच

ततो दग्धरथः खस्थो दानवः स विरोचनः ।
वेगेनासिं विनिष्कृष्य स पूष्णो निशिताञ्छरान् ।।१।।
चिच्छेदापततः सर्वान् कार्मुकं चैव वीर्यवान् ।
तथा चैनं पुनर्मूर्ध्नि खड्गेन समताडयत् ।।२।।
स तेन सुप्रहारेण क्षरद्रुधिरमस्तकः ।
रथोपस्थे पपाताशु वृत्तोत्सव इव ध्वजः ।।३।।
पतितं तं[१] स दैत्येन्द्रः प्रगृह्याशु महाबलः ।
चिक्षेप देवराजानं नर्दमानः पयोदवत् ।।४।।
बलिं विव्याध मित्रश्च[२] जत्रुदेशे शरैस्त्रिभिः ।
बलिरेकेन[३] भल्लेन[४] तस्य चिच्छेद कार्मुकम् ।।५।।
अथैनं पुनरन्येन हृदये समताडयत् ।
स मूढो मृतकल्पश्च रथोपस्थे ससाद ह ।।६।।
तं[५] सारथिर्मृत्युभयाद्[६] विषण्णं समुपस्थितम् ।
अपोवाह तदा व्यास ततो दैत्या विचुक्रुशुः ।।७।।

---

२७ नुदन्तं - ख. । २८ सूताश्च - ख. । २९ हुताशनो - ख. । ३० विग्रहः - ख. ।
१ पतितस्यं - ख. । २ शक्रश्च - ख. । ३ बलिने(नै) केन - ख. । ४ बाणेन (?) । ५ तत् - ख. ।
६ सारथिं मृत्युभयाद् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

बाणं विव्याध वरुणः पृषत्कानां[७] शतेन ह ।
स कार्मुकशतानि स्म पञ्च बाणः प्रतापवान् ॥८॥
आकृष्य युगपत् क्रुद्धः शरांश्चिक्षेप तावतः ।
तानापतत एवाथ वरुणो लघुहस्तवान् ॥९॥
एकैकं पञ्चधा कृत्वा बाणं विव्याध पञ्चभिः ।
ततोस्य कार्मुकान् सर्वान् वरुणः प्रहसन् बली ॥१०॥
चिच्छेद सायकै[८]स्तीक्ष्णैस्तदद्भुतमिवाभवत्[९] ।
अथ छिन्नधनुर्दैत्यस्तस्य चिक्षेप वै गदाम् ॥११॥
छिन्नां दृष्ट्वा च तां भूयो गदाः पञ्चासृजद्[१०] बली ।
स एकस्यां तदा सक्त[११]स्ता गदा[१२] नाभ्यवैक्षत[१३] ॥१२॥
अविक्षता[१४]श्च ताः सर्वाः पेतुस्तस्य ततोपरि ।
काचिन्मुकुटमामर्द्य निपपात[१५] महीतले ॥१३॥
काचिच्च कार्मुकं घोरं हस्तदेशान्[१६]न्यपातयत्[१७] ।
काचिद् ध्वजं[१८] दृढं दिव्यं चिक्षेप धरणीतले ॥१४॥
काचिद्रथं तदाहत्य पांसुग्रासं चकार[१९] ह ।
उरस्यूरूदरे कट्या[२०]मपरा[२१]स्तस्य[२२] ता गदाः ॥१५॥
पतंत्यः[२३] सुमहाघोरा आर्तिं चक्रु[२४]र्महाभयाः ।
एवं स तेन विरथः[२५] कृतः कृच्छ्रेण धीमता ॥१६॥
वरुणस्तं समुत्सृज्य जगामान्यद्रणाजिरम् ।
यमोन्धकं समासाद्य तिष्ठतिष्ठेति चोदितः ॥१७॥
अथ[२६] तस्य ततो दण्डं रथं प्रति समुत्सृजत्[२७] ।
स रथं तस्य संचूर्णं कृत्वा शतसहस्रशः ॥१८॥

---

७ क्षुद्रकानां - ख. । ८ विचच्छेदैकैकशो (?) । ९... मिवोद्गतम् ? । १० पञ्चाशतं (?) पञ्चशतं (?) सृजत् (?) । ११ शक्ता - घ. । १२ स्वां सदा - ख. । १३ नकुलीक्षते - ख., न समीक्षते (न)समैक्षत (?)। १४अवे(क्षिता?)- ख. । १५ काश्चि(काश्चि?)न्मुकुटमारुह्य निपद्यति(तन्ति?)- ख. । १६ विनिक्षिप्य(?) - ख. । १७ न्यपातयन्(?) – ख. । १८ भंक्त्वा ? । १९ ...ग्रासांश्चकार - ख. । २० उदरोरसि कट्यां च - घ. । २१ समरे - ख. । २२ तस्य - ख. । २३ पतत्यः - घ. । २४ चक्रे - ख. । २५ विधृते - ख. । २६ अन्ध - ख. । २७ स यत्सृजत् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यमहस्तं पुनर्गत्वा तथैव समतिष्ठत ।
अन्धकोपि रथं त्यक्त्वा गदापाणिर्महाबलः ।।१९।।
यमं समभिदुद्राव क्रोधाद्वह्निमिवोत्सृजन्[२८] ।
स तस्य धावतो वेगात् पितृराजो यमः स्वयम् ।।२०।।
दण्डेनैव गदामुग्रां भस्मसायुज्यमानयत् ।
स प्रहस्य तदा चैनमुवाच प्रसभं यमः ।।२१।।
भवतो धाम यदभूत्तते विनिहतं मया ।
सांप्रतं त्वामपि पुनर्नेष्याम्यद्य[२९] स्वमालयम् ।।२२।।
अहं हि सर्वलोकस्य मरणे हेतुरीश्वरः ।
मया वैरं समासाद्य क्वान्ते[३०] जीवं विमोक्ष्यसे[३१] ।
अद्य त्वा निहनिष्यामि सुदृढं क्रियतां जगत् (?) ।।२३।।
अथवाद्य गतो[३२] वन्धं[३३] पूर्वं चान्धक मत्पुरम् ।
अग्रे द्रष्टासि तत्रैव सर्वानेतान् सुरद्विषः ।।२४।।

सनत्कुमार उवाच

अथैवंवादिनं युद्धे ह्यभीतोन्धकदानवः ।
उवाच तं यमं क्रुद्धं क्रोधाद् दीप्तानलेक्षणः ।।२५।।
हिरण्याक्षसुतो दृप्त अन्धकोस्मि सुरान्तकः ।
महायोगबलोपेतो नास्मि प्राकृतदानवः ।।२६।।
अंगाद्येन[३४] समुत्कृत्य भागान् मांसस्य कार्षिकान् ।
संवत्सरशतान्यष्टौ पञ्च चैव हुतोनलः ।।२७।।
तुष्टो ब्रह्मा ददौ यस्य सदैवामरतां शुभाम् ।
सोहं नाम्ना महासत्वो मृत्यूत्सेधो[३५] न संशयः ।।२८।।
न त्वं मम कुतो मृत्युः सिंहस्येव वने शशः ।
अहं तु भविता मृत्युस्तव नास्त्यत्र संशयः ।।२९।।

---

२८ वह्निमिवोत्सृजत् (?) । २९ ...न्नयिष्याम्यद्य - ख. । ३० क्रान्ते - ख. । ३१ विमोक्षसे - ख. ।
३२ गते - ख. । ३३ बन्धं (?) । ३४ अंगान्येव - घ. । ३५ मृत्युत्सव - ख., मृत्युस्तव (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अद्य त्वाहं दुरात्मानं[३६] सर्वलोकभयंकरम् ।
हत्वा श्रेयो विधास्यामि[३७] त्रैलोक्यस्येति मे मतिः ॥३०॥
देवानाञ्च भवान्नित्यं हन्तव्यो विप्रिये स्थितः ।
तेषामपि प्रियो ह्यद्य भविष्यति हते त्वयि ॥३१॥
न त्वयासादितं पूर्वं हरता जीवितानि हि ।
किञ्चिद् भूतं महद्भूतं तेन त्वं निर्भयः सदा ॥३२॥
देवास्तव भयाद् भीता अशक्तास्त्वद्वधे ततः ।
अमृतादीनि लिप्सन्ति पूजयन्ति सदा च ते ॥३३॥
अद्य त्वयि हते क्रूरे निर्द्वन्द्वास्तेपि सामरात् ।
अमृते न तथा[३८] प्रीतिं करिष्यन्ति न संशयः ॥३४॥
अद्य गर्वञ्च दर्पञ्च योगमाहात्म्यमेव च ।
प्राणैः सहैव देहान्ते नाशयिष्यामि सर्वशः ॥३५॥

सनत्कुमार उवाच

स एवमसुरेन्द्रेण तर्जितो भास्करात्मजः ।
दण्डेनासुरशार्दूलमुत्तमांगेभ्यताडयत्[३९] ॥३६॥
कालश्च तं करेणैव[४०] हृदये समताडयत् ।
मृत्युश्चाशनिना क्षिप्रं शिरस्येवाभ्यताडयत् ॥३७॥
कण्ठे च नियतिस्तस्य पाशं चिक्षेप दारुणम् ।
कृतान्तः परिघेनैव गण्डदेशे समाहनत् ॥३८॥
स तैरमोघैर्यामैश्च प्रहतोन्धकदानवः ।
पुष्पवृष्टया यथा कश्चिन्नार्तिमानभवत्तथा[४१] ॥३९॥
न पाशास्तस्य लीयन्ते दण्डो वा परिघोपि वा ।
अन्यानि चास्य तीव्राणि न दुःखाय भवन्त्युत ॥४०॥
ततस्सर्वैस्तदोत्क्रुष्टं दानवैः सर्वतोदिशम् ।
अवाद्यन्त च तूर्याणि मुमुदे चान्धको भृशम् ॥४१॥

---

३६ सुरात्मानं - ख. । ३७ ...भिधास्यामि - ख । ३८ यथा - ख । ३९ ह्यसातयत् - ख. ।
४० किंकरेणैव - ख. । ४१ वदा - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स तेषां तुष्टिशब्देन मदवीर्यसमीरितः ।
विनद्याम्बुदवद् व्यास यममेवाभिदुद्रुवे ॥४२॥
स गत्वा तस्य वेगेन हन्यमानोपि किंकरैः ।
आजघान महावेगो मुष्टिनोरसि तं यमम् ॥४३॥
पुनश्च[४२] महिषं तस्य[४३] शिरस्यभिहनत्पदा ।
तावुभौ विह्वलौ तत्र भ्रमित्वा किञ्चिदन्तरम् ॥४४॥
हित्वान्धकं ततस्तूर्णं[४४] ययतुर्मुनिसत्तम ।
जयन्तश्चेल्वलं प्राप्य विव्याध दशभिः शरैः ॥४५॥
तस्येल्वलश्चकर्त्ताशु ध्वजं रत्नविभूषितम् ।
हयानां चैव योक्त्राणि प्रतोदं चैव काञ्चनम् ॥४६॥
विना योक्त्रैर्हयास्तस्य रथं त्यक्त्वा समुद्धताः ।
लाना[४५] विजग्मुर्हेषन्तो जयन्तो विरथोभवत् ॥४७॥
स रथं संपरित्यज्य भूस्थः शक्रात्मजः प्रभुः ।
इल्वलस्य हयान्सूतं ध्वजञ्चैव न्यपातयत्[४६] ॥४८॥
अथोभौ[४७]विरथौ भूत्वा ह्यन्योन्यविजयैषिणौ[४८] ।
अविध्येतां तदा यस्य[४९] कार्मुके सायकैः शितैः ॥४९॥
परस्परविनिर्मुक्तानुभौ[५०]संवार्य सायकान् ।
अस्त्रैरस्त्राणि संवार्य नेदतुः सागराविव ॥५०॥
अथ शक्रसुतः श्रीमाँल्लब्ध्वा तस्य तदान्तरम् ।
धनुश्चिच्छेद भल्लेन ननाद च पुनः पुनः ॥५१॥
स विकृत्तधनुर्दैत्यः थङ्गं दीप्तानलप्रभम् ।
भ्रामयित्वा विचिक्षेप तमप्यस्याच्छिनत्तदा[५१] ॥५२॥
गृहीत्वान्यस्य पतितां गदां हेमविभूषिताम् ।
भ्रामयित्वा तु चिक्षेप सापदुद्राव वेगवत् ॥५३॥

---

४२ पुण्ड्रश्च ख. । ४३ महिषस्तस्य - ख । ४४ भित्वान्धकस्ततस्तूर्णं - ख. । ४५ नाना - ख. ।
४६ व्यपातयत् - ख. । ४७ अथ तौ - ख. । ४८ विजिगीषिणौ (?) । ४९ पश्य - ख. । ५० ...वुभौ - ख. ।
५१ ततस्तस्याच्छिनत्तदा - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स यावत्तां गदां घोरां शरैः सन्नतपर्वभिः ।
विचिच्छेद दितेः पुत्रस्तावदस्याच्छिनद्धनुः ।।५४।।
अथ यावत्स निस्त्रिंशं जग्राहादितिनन्दनः ।
तावदेनं पदा दैत्यो वामेनोरस्यताडयत् ।।५५।।
तमेव तस्य[५२] जग्राह पादं स[५३] च महाबलः ।
जयन्तो भ्रामयच्चैनं नर्दमानो यथाम्बुदः ।।५६।।
ततो हाहाकृतमभूदसुराणां बले महत् ।
यात त्रायत दैत्येन्द्रमिल्वलं[५४] शीघ्रमित्युत ।।५७।।
देवानां सिंहनादाश्च शंखशब्दाश्च पुष्कलाः ।
तूर्याणि चाप्यवाद्यन्त साधुसाध्विति चाभवत् ।।५८।।
जयन्तोपि यथा चक्रं विधाता बलवाँस्तदा ।
भ्रामयामास दैत्येन्द्रं युगान्ताम्बुदवन्नदन् ।।५९।।
अथ स्वयं हिरण्याक्षः सोन्धको बलिरेव च ।
बाणोथ विप्रचित्तिश्च शंबरोथ विरोचनः ।।६०।।
कालकेयाश्च ते दैत्याः पौलोमाः सिंहिकासुताः ।
निवातकवचाश्चैनं समन्तात् पर्यवारयन् ।।६१।।
स तैः शरैर्गदाभिश्च परिघैर्दीघवेधनैः[५५] ।
अन्यै[५६]श्च बहुभिश्चित्रैरायुधैः[५७] प्रहतो भृशम् ।।६२।।
स हन्यमानस्तं देवो जयन्तः शक्रनन्दनः ।
हिरण्याक्षपथे[५८] क्षिप्त्वा प्राद्रवद् येन देवताः[५९] ।।६३।।

⊙ इति स्कन्दपुराणे युद्धे षडशीतितमोध्यायः ⊙

---

५२ तमेवाभ्येत्य - घ. । ५३ तु (?) स - ख. । ५४ ... मन्धकं - ख. । ५५ ... भेदनैः - घ. ।
५६ अस्त्रैश्च - ख. । ५७ ...राहत - ख.,...राहव (?) । ५८ पदे(?), ...क्षोपरि - घ. । ५९ देवता यतः (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

मयश्चन्द्रमसं देवमार्दयत्[1] क्रोधमूर्छितः ।
शरैराशीविषाकारैर्नर्दमानो यथाम्बुदः[2] ॥१॥
तस्यास्यतस्ततो बाणान्[3] चन्द्रमाः प्रहसन्निव ।
एकैकं सप्तधा कृत्वा मयं विव्याध पञ्चभिः ॥२॥
तत एनं पृषत्केन ललाटे समविध्यत ।
जहास च पुनर्देवस्तस्य लज्जां समादधत् ॥३॥
स तस्य हसतः शीघ्रं ललाटे कंकपत्रिणा ।
विव्याध भृशमायस्तो यथा विध्नो यतन्नतम्[4] ॥४॥
ततोस्य देव उद्दिश्य[5] ध्वजं चिच्छेद नादयन्[6] ।
चक्ररक्षाँश्च[7] निस्त्रिंशै[8]रनयद् यमसादनम् ॥५॥
तस्य तच्चापलं वीक्ष्य[9] मयो दानवसत्तमः ।
मायां दिव्यां[10] समास्थाय राहुः समभवत्तदा ॥६॥
स राहुभूतो दैत्येन्द्रो देवेशं[11] शशलक्षणम् ।
अभ्यद्रवद् यथा राहू रथेनाम्बुदनादिना ॥७॥
स तां मायां तदा ज्ञात्वा देवो ह्यमृतसंभवः[12] ।
अपर्ववद्[13] वियत्स्थं वै[14] तं शरैस्त्रिभिरार्दयत्[15] ॥८॥
सोपि दैत्यो महामायस्ताञ्छरान्माययैव तु ।
वारयन्नभिदुद्राव[16] शीतरश्मिं महासुरः ॥९॥
ततोस्य स्यन्दनं दिव्यं नागयन्तृ[17] महाप्रभम् ।
गृहीत्वा कूबरे दैत्यश्चिक्षेप च ररास च ॥१०॥
अहिर्बुध्नः समासाद्य राहुश्चन्द्रमसो ग्रहम् ।
विशिखैः पंचभिर्विद्धा ध्वजमस्य न्यपातयत् ॥११॥

---

१ मर्दयत् - ख. । २ नर्दमान इवाम्बाम्बुदः - ख । ३ ब णैः -ख. । ४ यथा व्रतम् - ख. । ५ ...मुद्दिश्यय - ख. ।
६ दानवः - घ । ७ पादरक्षाँश्च - घ. । ८ निशितै - घ. । ९ अग्ररक्षान्पुनश्चिन्त्यान् - घ. ।
१० मायाविद्यां - ख. । ११ देवेश - ख., तां देवं - घ. । १२ कृत्वा व्यतिष्ठदसुरेश्वरः - घ. ।
१३ अपूर्ववद् - ख., अपूरयद् - घ. । १४ द्वितीयस्थं - ख. । १५ स्तिमिरापहं - घ., राशयत् - ख. ।
१६ वारयानोभिदुद्राव- ख. । १७ नागयच्च - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तस्योत्पत्य रथाद्राहुर्गदया भीमरूपया ।
धनुर्ध्वजं हयाँश्चैव समचूर्णयदव्ययः ॥१२॥
अशनिं शतघंटां स दीप्तां मृत्योरिव स्नुषाम्
जग्राह भृशमायस्तः[१८] पाशं मृत्योरिवान्तकः[१९] ॥१३॥
भ्रामयित्वा स तामुग्रां यमदण्डनिभां बलात् ।
चिक्षेप राहुमुद्दिश्य विद्युतं मेघराडिव ॥१४॥
सा ज्वलन्ती महोल्केव मेघाशनिरिवोज्ज्वला ।
पपात राहोः शिरसि यथा वज्रं शिलोच्चये ॥१५॥
अथ तेन प्रहारेण नार्त्तिमानभवत् स वै ।
स प्रहस्य भृशं राहुर्वेगं चक्रे महाबलः ॥१६॥
अहिर्बुध्नं प्रति क्रुद्धो नागानामिव पक्षिराट् ।
आपतन्तं स वीक्ष्यैव भगवान्देवसत्तमः ॥१७॥
जगाम तस्य पन्थानं मुक्त्वान्येन यथोरगः ।
शतकेतुश्च तं वीरो रथेनाम्बुदनादिना ॥१८॥
अभ्यद्रवद्रणे क्रुद्धस्तिष्ठतिष्ठेति चाब्रवीत् ।
आधावतोस्य कापाली हृदयं कंकपत्रिभिः ॥१९॥
बिभेद कुलिशः क्षिप्तो गिरिश्रृंगमिवोच्छ्रितम् ।
स भिन्नहृदयस्तेन रुद्रेण ग्रहसत्तमः ॥२०॥
पपात स्वरथे मूढः शक्रध्वज इवोच्छ्रितः ।
ततो हाहाकृतं दैत्यैर्गृह्णगृह्णेति चाप्युत ॥२१॥
साधु साध्विति देवाश्च विनेदुर्जलदा इव ।
अथान्धको हिरण्याक्षो विप्रचित्तिर्विरोचनः ॥२२॥
शम्बरश्चेल्वलश्चैव बाणो बलिरथापि च ।
कालकेयास्सपौलोमा निवातकवचाश्च ये ॥२३॥

---

१८ भृशमायस्थः - ख. । १९ मृत्युरिवान्तकः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अन्ये च बहवो दैत्यास्तं[२०] रुद्रं पर्यवारयन् ।
ते शरैश्च गदाभिश्च मुशलैः प्राशतोमरैः[२१] ॥२४॥
न्यवारयन्त तं देवं तर्जयन्तः[२२] पुनः पुनः ।
स हन्यमानस्तैर्देवो बहुभिर्मुनिसत्तम ।
अपासर्तत वेगेन समीपात् सुरविद्विषाम् ॥२५॥
अजैकपात् कालनेमिं गदिनं गदयासहम्[२३] ।
समाह्वयत दैत्येन्द्रं[२४] मधुं विष्णुरिवोर्जितम् ॥२६॥
तौ सुयुद्धौ[२५] गदाहस्तौ[२६] मंडलानि महाबलौ ।
अन्योन्यविजये सक्तौ ग्रहाविव विचेरतुः ॥२७॥
कालनेमिस्तु संक्रुद्धो गदां हेमपरिष्कृताम् ।
शतघंटाट्टहासां च मृत्योर्जिह्वामिवाद्भुताम्[२७] ॥२८॥
भ्रामयित्वासकृद् दैत्यो नर्दमानो यथा वृषः ।
मुमोच रुद्रमुद्दिश्य स्कन्दः शक्तिमिवाचले ॥२९॥
शक्रमुक्तामिवायान्तीमशानिं[२८] पर्वतोपरि ।
विद्युतं वा महाशक्तां (?) स रुद्रो भीमविक्रमः ॥३०॥
वञ्चयामास वेगेन श्वेतो मृत्युमिवागताम् ।
तिष्ठंतिष्ठेति चाप्युक्त्वा रुद्रः प्रहरतां वरः ॥३१॥
भ्रामयित्वा गदां घोरां दैत्यस्योपर्यपातयत् ।
स तया गदया दैत्यो दीप्तया भीमरूपया ॥३२॥
हतो मूर्ध्नि दिशः सर्वा हारिद्राः समपश्यत ।
अथ दैत्यस्तदा सम्यग् भ्रामयन् स[२९] गदां पुनः ॥३३॥
मण्डलानि विचित्राणि दर्शयित्वा महाबलः ।
अजैकपादं गदया स्कन्धदेशे व्यताडयत् ॥३४॥
स चाप्यवहतस्तेन यथा वज्रेण भूधरः ।
विवेश भूमिं[३०] दुःखार्त्तास्तदद्भुतमिवाभवत् ॥३५॥

---

२० रुद्रास्तं - ख. । २१ गाशतोमरैः - ख., प्राम ...(?) । २२ तर्जयन्तां - घ. । २३ गदयासहां - ख., महान् - घ. । २४ दैत्येन्द्रो - ख. । २५ तौच क्रुद्धौ - ख. । २६ शस्ता... - ख. । ...२७ मिवोद्गताम् - घ. । २८ शक्रमुक्तमिवायान्तमशनिं - ख. । २९ भ्रामयानो - ख. । ३० भूमी (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

उत्थाय च स वेगेन रुद्रः क्रुद्धो महाबलः ।
अवसव्यं चरन् दैत्यसव्यतो मण्डलेचरः ॥३६॥
भ्रामयित्वा गदां भूयो दैत्यस्योपर्यपातयत् ।
स दैत्यस्तेन घातेन भ्रमित्वा त्रिर्महाबलः[३१] ॥३७॥
संस्तभ्य गदया भूयो रुद्रं कुक्षावताडयत्[३२] ।
स तया गदया नुन्नो यथा वाय्वीरितो नगः ॥३८॥
पपात भूमौ वेगेन शतश्रृंगो[३३] यथा पुरा ।
पतितं तु ततो[३४]भ्येत्य पदे जग्राह[३५] सुव्रतम्[३६] ॥३९॥
भ्रामयित्वा च चिक्षेप स चामृत्युरवस्थितः (?)
कार्तस्वनं ज्वरश्चोग्रो रुद्रः प्रहरतां वरः ॥४०॥
जघान निशितैर्भल्लैर्दशभिः स्तनयोः समम्[३७] ।
कार्तस्वनश्च[३८] बाणेन कार्मुकं तस्य दीप्तिमत् ।
चिच्छेद बहुधा चैनं पुनर्विव्याध पत्रिभिः[३९] ॥४१॥
- - - - - रुद्रोपि दण्डं सर्वार्थसाधकम् ।
भ्रामयित्वाशु[४०] चिक्षेप कार्तस्वनरथं प्रति ॥४२॥
तं युगान्तानलप्रख्यं शतसूर्यानलप्रभम् ।
जघान[४१] शरजालेन मेघो वृष्ट्या यथाचलम् ॥४३॥
हन्यमानश्च तैर्दण्डो हविषेद्ध इवानलः ।
भूयस्तरं प्रजज्वाल वेगवच्चाप्यधावत ॥४४॥
तमप्रतिहतं दण्डं ज्ञात्वा कार्तस्वनस्स तु[४२] ।
रथमुत्सृज्य वेगेन आकाशस्थोभवद्बली ॥४५॥
दण्डश्च रथमभ्येत्य सहयं सह यन्तृणा ।
सध्वजं सपताकञ्च भस्म कृत्वा ययौ पुनः ॥४६॥

---

३१ भ्रामयित्वा महाबलः - घ. । ३२ अजैकपादं गदया स्कन्धदेशे व्यताडयत् - घ. । ३३ शतश्रृंगं - घ. ।
३४ च तदा - घ. । ३५ पादैर्जग्राह - घ, पादौ (?) । ३६ सोव्रजत् - ख. । ३७ दशभिश्च स्तनान्तरे - घ. ।
३८ कार्तस्वनस्य - ख. । ३९ स त्रिभिः - ख. । ४० भ्रामयित्वास्य - ख. । ४१ जग्राह (स) - ख. ।
४२ कार्तस्वरस्य तु - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यावद् दण्डो न पतति[४३] रथेनैति[४४] च तं प्रति ।
तावत् कार्त्तस्वनो रुद्रं शरैरभ्यद्रवद्[४५] बली ।।४७।।
छित्त्वा ध्वजं धनुश्चास्य तथा योक्त्राणि वाजिनाम् ।
विरथं तं ज्वरं[४६] कृत्वा[४७] असिना मूर्ध्न्यताडयत्[४८] ।।४८।।
असिघातपरीतात्मा स रुद्रः शत्रुसंसदम् ।
त्यक्त्वान्यतो ययौ तूर्णं पदातिर्मुनिसत्तम ।।४९।।
सोसिघातविपरीतचेतनो रक्तचन्दनविलेपनप्रभः[४९] ।
तं विहाय रिपुमग्र्यविक्रमं[५०] दुद्रुवे सुरबलं यतस्ततः ।।५०।।

⊙ इति स्कन्दपुराणे युद्धे सप्ताशीतितमोध्यायः ⊙

सनत्कुमार उवाच

अर्यमा बहुभिर्बाणैः प्रह्लादं दैत्यपुंगवम् ।
आजघान रथं घोरं ध्वजञ्चास्य व्यशातयत् ।।१।।
प्रह्लादोप्यर्यमन्तं[१] वै रथं त्यक्त्वैव वीर्यवान् ।
प्रदुद्राव यथा राहुः समये तिमिरापहम् ।।२।।
आधावन्तं च वेगेन विहस्तं रिपुमर्यमा ।
जघान[२] बहुभिर्वाणैर्वृष्टया मेघो यथाचलम् ।।३।।
शरानगणयन्नेव हिरण्यकशिपोः सुतः ।
क्रोधान्मानाच्च दर्पाच्च वेगेन समधावत ।।४।।
गृहीत्वा कूबरे तस्य रथं हेमपरिष्कृतम् ।
चिक्षेप सह सूतेन ततो हर्षान्ननाद च ।।५।।
अनुह्लादो धरं प्राप्य तेन विद्धः स्तनान्तरे ।
असिं निष्कृष्य वेगेन धरस्य रथमासदत् ।।६।।
ध्वजं तस्य हयाँश्चैव सारथिं धनुरेव च ।
छित्त्वा स्कन्धे धरं चैव पुनः स्वरथमभ्यगात्[३] ।।७।।

४३ निपतति - ख. । ४४ नेति - ख. । ४५ शनैरभ्यद्रवद् - ख. । ४६ तदा (?) । ४७ दृष्ट्वा - घ. ।
४८ मूर्ध्नि ताडयत् - ख. । ४९ प्रभुः - ख. । ५० रिपुमुग्रविक्रमं - घ. ।
१ ...र्य्यमाणं - घ. । २ ववर्ष - घ. । ३ स रथमन्वयात् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कर्मणा तेन दैत्यस्य धरोभूद् भृशमर्दितः[४] ।
एवमन्यैश्च दैत्येन्द्रैरन्ये देवा महाबलाः ॥८॥
निर्जितास्तर्जिताश्चैव युद्धाय च पुनः स्थिताः ।
ततः संकुलमेवाभूद्देवानां दानवैस्सह ॥९॥
परस्परजिगीषूणां[५] युद्धं भीरुभयावहम् ।
ततो भेर्यश्च शंखाश्च पटहासेक्चपुष्कलाः ॥१०॥
र्झर्झर्यः पेपुकाश्चैव डिण्डिमा गोविषाणकाः ।
अवाद्यन्त बले[६] व्यास उभयेषां सहस्रशः ॥११॥
ततोसृगोघप्रवहा[७] पताकध्वजपादपा ।
गजाश्वग्राहबहुला रथप्रवरकच्छपा ॥१२॥
केशशैवालबहुला धनुर्ज्याकृततन्तुका ।
निष्टनच्छस्त्रमण्डूका[८] दुकूलच्छत्रफेनिला[९] ॥१३॥
उष्णीषवरहंसा[१०] च करपादशिरोपला[११] ।
हारकेयूरसिकता मुकुटोत्फुल्लपंकजा ॥१४॥
मेदोसृक्कफपंका[१२] च प्राणजीवितनाशनी ।
प्रावर्तत नदी[१३] घोरा हस्त्यश्वरथवाहिनी ॥१५॥
तस्यां स्नायन्ति रक्षांसि पिबन्ति[१४] च रमन्ति च ।
नृत्यन्ति[१५] चापि विविधा भीरूणां भयदास्तथा[१६] ॥१६॥
गृध्रा गोमायवश्चैव श्वानो मार्जारवायसाः[१७] ।
चक्षूंषि करपादान्त्रं भक्षयन्तोभिरेमिरे ॥१७॥
ममायं हस्तिनः पादो ममायं मेदपट्टकः[१८] ।
ममायं च करः शुक्रो बाहुश्च[१९] रुधिरस्यदः ॥१८॥
ममायं तव नायं च गृह्ण पश्येति चैव हि ।
कलहं चक्रिरे तत्र क्रूराः पिशितभोजनाः ॥१९॥

---

४ ध्रुवो भयसमीरितः - घ., भग्नसमीरितः - घ. । ५ जिघांसूनां (?) । ६ रणे -घ. । ७... प्रभवा - ख. । ८ निष्टन्नोग्रास्त्रमण्डूका - ख. । ९ .. फेनिता - ख. । १०... कलहंसा - घ. । ११ . शिरोरुहा - ख. । १२ ...मनुष्यपंका - ख. । १३ महा - ख. । १४ पिशाचा (?) । १५ नृत्यन्ते - ख. । १६ . स्तदा - घ. । १७ र्झर्झरवायसाः - ख. । १८ ममायमेव इत्युत - ख. । १९ ह्रदश्च - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

त्यक्त्वान्ये च हताँस्तत्र स्वदेहान् सुमहारथाः ।
विमानैः स्त्रीजनाकीर्णैः प्रययुर्ब्रह्मणः सदः[२०] ॥२०॥
अपरे पापकर्माणो हन्यमाना रुषान्धितैः ।
पतन्ति नरके घोरे क्रन्दमाना मुहुर्मुहुः ॥२१॥
केचिदार्त्तस्वरं कृत्वा - - - - - षार्दिताः[२१] ।
म्रियन्ते पुरुषा युद्धे शतशोथ सहस्रशः ॥२२॥
दशन्तश्च तृणान्यन्ये भ्रातः पुत्रेति चापरे ।
क्रन्दमाना जना[२२] भीताः प्राणान् कृच्छ्रेण तत्यजुः ॥२३॥
संदष्टौष्ठपुटाः केचिद् देवासुरमहारथाः ।
शरसन्नतमर्माणः पतन्त्युर्व्यां द्रुमा इव ॥२४॥
अशिवानि शिवा नेदुरट्टहासाँश्च राक्षसाः ।
आर्त्तनादाँश्च पुरुषास्तथैव गजवाजिनः ॥२५॥
सिंहनादाश्च शूराणां बाहुशब्दाश्च पुष्कलाः ।
धनुषां कृष्यमाणानां शब्दा वाद्यरवास्तथा[२३] ॥२६॥
अथेन्द्रश्च धनेशश्च यमः कालश्च वीर्यवान् ।
वरुणो मरुतश्चैव विश्वेदेवाश्च सर्वशः ॥२७॥
मित्रश्चैव जयन्तश्च भगःपूषार्यमा तथा ।
कापाली चापि यो रुद्रो वसवश्च महाबलाः ॥२८॥
नासत्यश्चैव दस्रश्च पृश्नयश्च सुरोत्तमाः ।
एते चान्ये च देवानां प्रवरा बाहुशालिनः ॥२९॥
दानवानां बले वेगं बलवन्तो[२४]भिचक्रिरे ।
सागरा इव गर्जन्तो युगान्ते अनला इव ॥३०॥
प्रभञ्जना इवाकाले महान्त इव चाचलाः ।
वृषभा इव नर्दन्तो बृंहन्त इव कुञ्जराः ॥३१॥

---

२० पदम् - घ. । २१ जातमानस्य ऊर्जिताः - घ. । २२ नरा - ख. । २३ स्तदा .. - ख. । २४ व्रेगान, वेगवन्तो - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ग्रसन्तश्च यथा ग्राहाश्छिन्दन्तो मकरा इव ।
वर्षमाणा इव घनाः सिंहा इव च नर्दिनः[२५] ।
दानवानां बलं सर्वे वेगेनैवाभ्यवारयन् ॥३२॥
तद्देववेगप्रहताभिवेगं[२६] बलं सयत्नं[२७] दनुदानवानाम् ।
भवत्यनाधारमतिप्रसक्तं[२८] तृणं यथा वह्निमुखावसक्तम् ॥३३॥

⊙ इति स्कन्दपुराणे युद्धेऽष्टाशीतितमोऽध्यायः ⊙

सनत्कुमार उवाच

तेषां तद्वेगनुन्नानां[१] भग्नानां क्लिश्यतां पुनः[२] ।
त्राणार्थमतिदीप्ताक्षो[३] हिरण्याक्षोऽग्रहीत्पदम्[४] ॥१॥
अन्धकश्च महामायो भ्रातरश्चास्य[५] तत्समाः ।
शतं रथसहस्राणां सर्वेषामपलायिनाम् ॥२॥
प्रह्लादश्च सहभ्राता हिरण्यकशिपोः सुतः ।
विप्रचित्तिः सहभ्राता सैंहिकेयैश्च तैस्सह ॥३॥
गृह्ण गृह्णेति नर्दन्तो देवान् प्रत्युद्ययुस्तदा ।
तेषां तेषां च संग्रामः सुघोरः समपद्यत ॥४॥
ग्राहाणामिव[६] काण्डे[७] च गजानामिव वा वने[८] ।
इन्द्रस्त्वष्टा च पूषा च हिरण्याक्षमवारयन् ॥५॥
संगत्य सायकैस्तीक्ष्णैः सर्वमर्मस्वताडयन् ।
तेषां धनूंषि चित्राणि अस्यतां तु दिवौकसाम् ॥६॥
मायाबलेन दैत्येन्द्रो व्यष्टम्भयत दीप्तिमान् ।
तानि विष्टम्भितानि स्म तदा दैत्येन मायया ॥७॥
नानमन्ति यथा पूर्वं ततस्ते ह्याकुलाभवन् ।
सोपि दैत्यो महामायो नदित्वा मेघनिस्वनम् ॥८॥

---

२५ च नादिनः - ख. । २६ ...तिवेगं (?) । २७ सयत्ता - ख. । २८ ...त्यनाचारमतिसंसक्त - घ. ।
१ तद्वशगानां तु - घ. । २ प्रभग्नाननुशिष्यतां - ख. । ३ ...मिह संप्राप्तो - घ. । ४ ...भ्ययात्सुतम् - घ. ।
५ ...श्चैव (?) । ६ ग्रहाणामिव - ख. । ७ काले (?) । ८ चांजने (चाजने?) - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

बबन्ध तेषां गात्राणि समन्तादस्त्रमायया ।
तान् बद्धाँश्च समीक्ष्यैवमकर्मण्यान्महाबलान्[९] ॥९॥
यन्तारो वाहनैः क्षिप्रं जह्लु[१०]स्तस्माद्रणाजिरात् ।
अथ कालो यमश्चैव धनेशो मित्र एव च ॥१०॥
वरुणो वसवः[११] सर्वे अश्विनौ च महाबलौ ।
प्रगृहीतायुधाः क्रुद्धा[१२]स्तिष्ठतिष्ठेतिवादिनः ॥११॥
अभ्यद्रवन्त वेगेन हिरण्याक्षं महासुरम्[१३] ।
तेषामापततां संख्ये स दैत्यः क्रोधमूर्छितः ॥१२॥
सर्वेषां सायकैस्तीक्ष्णैर्बिभेद कवचान् युधि ।
ते भिन्नकवचाः सर्वे क्रोधात् प्रज्वलिताननाः ॥१३॥
ससर्जु[१४]रस्त्रमुख्यानि तदाप्रतिहतान्युत[१५] ।
यमो दण्डं ससर्जास्य तथा कालश्च[१६] - - -[१७] ॥१४॥
धनेशश्चाशनिं घोरं वरुणः पाशमेव च ।
भगश्च मुशलं घोरमन्ये चान्याँस्तथामराः[१८] ॥१५॥
तान् स दैत्यो हसन्नेव सायकैर्मर्मभेदिभिः ।
व्यष्टम्भयददीनात्मा[१९] शक्रहस्तं यथा भवः ॥१६॥
साधुवादाँस्ततो हृष्टा दानवानां महारथाः ।
समं चक्रुश्च संपूज्य हिरण्याक्षं महासुरम्[२०] ॥१७॥
अपरे[२१] नैतदाश्चर्यं दितिपुत्रस्य संयुगे ।
कश्यपेन[२२] प्रसूतस्य राज्ञोस्माकं च स्वामिनः (?) ॥१८॥
अपरे सिंहनादाँश्च बाहुशब्दाँश्च पुष्कलान् ।
चक्रुर्हृष्टाश्च वाद्यानि तथा सर्वाण्यवादयन् ॥१९॥
एवं हि[२३] संप्रहृष्टानां दानवानां महाहवे ।
पाराशर्य गिरो बह्व्यः श्रूयन्ते स्तुति - - - ॥२०॥

---

९ महाबलाः - ख । १० ...ह्ल - ख, जह्रु (?) । ११ वासवः - ख. । १२ सर्वे - घ. । १३ महाबलं - घ । १४ ससर्ज - ख., समृजु - घ. । १५ युधाः - घ. । १६ ...स्य - ख. । १७ कालस्य चितवस्तया - घ. । १८ शरान् - ख. । १९ ..दमेयात्मा - घ. । २० हिरण्याक्षाय सर्वतः - घ । २१ स परे - ख. । २२ काश्यपेन - ख. । २३ ते - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तेषां प्रहर्षं ज्ञात्वेत्थं देवभंगं च तं तदा ।
सर्वप्राणिचरो वायुरसुरानभिदुद्रुवे ॥२१॥
सहस्रनल्वमात्रेण स रथेन प्रभंजनः ।
समन्ताद् ध्वजयुक्तेन पताकाशतमालिना[२४] ॥२२॥
जवेन यन्तृणां[२५] यत्नान्निगृहीतेन शब्दवान् ।
प्रपूरयन् दिशः सर्वाः सहसा प्रत्यदृश्यत ॥२३॥
स पञ्चभिः शरैस्तीक्ष्णैर्दैत्यराजमथाव्यथः[२६] ।
आहत्य योजने तस्माद्देशात् क्षिप्रमवासृजत् ॥२४॥
अन्धकश्च ततः षष्ट्या विप्रचित्तिश्च सप्तभिः[२७] ।
मयं पञ्चाशता विद्ध्वा सप्तभिः सप्तभिः पुनः ॥२५॥
दैत्यांश्च दानवांश्चैव सर्वान् विव्याध तत्क्षणात् ।
पुनः पुलोमपुत्रांश्च निवातकवचानपि ॥२६॥
ते तेन बहुभिर्विद्धाः शरैरसुरपुंगवाः ।
दिक्षु सर्वासु विक्षिप्ता योजनान्तरिताः स्थिताः ॥२७॥
यान्यांश्च ते विमुञ्चन्ति गदामुशलपट्टिशान् ।
तान्सर्वान् भगवान् वायुर्दानवोपर्यपातयत् ॥२८॥
ते हता हन्यमानाश्च स्वमुक्तै[२८]रायुधैर्भृशम् ।
आर्त्तनादान् प्रकुर्वाणाः प्राद्रवन्त दिशो दिशः[२९] ॥२९॥
सोपि वायुर्महावेगो बभंज रथसत्तमान् ।
पांशुवर्षेण च पुनश्चक्षूंष्येषामपूरयत् ॥३०॥
ततस्ते[३०] भयसन्त्रस्ता नोत्ससर्जुस्तदा शरान् ।
शस्त्राणि च तथान्यानि पुंजशश्चावतस्थिरे ॥३१॥
तस्य तत्कर्म संवीक्ष्य हिरण्याक्षः प्रतापवान् ।
उवाच दानवान् सर्वान् गर्हयन्[३१] दितिनन्दनः ॥३२॥
धिग्वो दैत्या बलं सर्वं[३२] धिग्दर्पा धिक्पराक्रमाः ।
विसृज्य रणमव्यग्रा[३३] यात स्त्रीकर्म सेवत[३४] ॥३३॥

---

२४ पताकशतमालिना - ख. । २५ यन्त्रिणा - ख. । २६ ... राजमथाव्ययम् - घ., ...राजानमव्ययः - ख. ।
२७ सप्ततिः - ख. । २८ सुमुखै - घ. । २९ दश (?) । ३० तथास्य - ख. । ३१ हर्षयत् - घ. ।
३२ सर्वे - ख. । ३३ बलमव्यग्रा - घ. । ३४ सेवितः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ये यूयं रणमध्यस्था जीविते सति बालिशाः ।
एकेन वायुना भग्ना धिग्वस्तन्मन्त्रितं[३५] पुरा ।।३४।।
अथवा यन्मया प्रोक्तं यूयं बाला रति[३६]क्लमाः[३७] ।
तत्तथा नास्ति सन्देहो बालैरिव हि वः कृतम्[३८] ।।३५।।
तिष्ठध्वं बालवत् सर्वे रक्षन्तो जीवितं स्वकम् ।
अहमेको विजेष्यामि वायुमेनं प्रपश्यत ।।३६।।
ततः स पर्वतो भूत्वा दितिपुत्रः प्रतापवान् ।
समन्ताद् वायुवेगं तं[३९] समवारयदव्ययः[४०] ।।३७।।
- - - ि त्वानिलं ज्ञात्वा पर्वतेन निवारितम् ।
अन्धको बाहुपाशेन अवप्लुत्याबबन्ध तम्[४१] ।।३८।।
स[४२] बद्धो बाहुपाशेन तदा वायुः[४३] प्रतापवान् ।
संप्रगृह्यान्धकं शीघ्रमुत्पपात विहायसा ।।३९।।
तस्योत्पतितमात्रस्य प्रगृह्यान्धकदानवम् ।
राहुर्गदां महारौद्रां क्षिप्रं मूर्ध्नि न्यपातयत्[४४] ।
अभ्येत्य पादयोश्चैव विप्रचित्तिर्महाबलः ।।४०।।
जग्राह सुमहाग्राहो मत्स्यानिव[४५] महार्णवे ।
स तेन सुप्रहारेण विह्वलः प्राणिगोचरः ।।४१।।
स्कन्धे केशाभिसंयुक्तो भ्रामितो विप्रचित्तिना ।
स भ्राम्यमाणो विबभौ स्रस्तहारस्रगम्बरः ।।४२।।
अलातमिव सन्दीप्तं निशायां मुनिसत्तम ।
भ्राम्यमाणं समालक्ष्य पुनर्देवाः सवासवाः ।।४३।।
वेगश्चक्रुर्महावेगा गृह्णगृह्णेति वादिनः ।
विप्रचित्तिस्तु तान् दैत्यः संरब्धानुद्यतायुधान् ।।४४।।
आलक्ष्य सुबहून् संख्ये गर्जमानः[४६] पयोदवत् ।
अभीक्ष्णं भीमसंह्लादं वायुं दानवयूथपः ।।४५।।

३५ धिगस्तु मन्त्रितं - घ. । ३६ इति - घ. । ३७ क्रमाः - ख., क्रमात् - घ. । ३८ बहिःकृतम् - घ, वर्तितं ? । ३९ वेगेन - ख. । ४० ...दव्यथः (?) । ४१ ... तः - ख. । ४२ सां - ख. । ४३ जातदाय (?) - ख. । ४४ मूर्ध्न्यवपातयत - घ. । ४५ मत्स्यानिव - ख. । ४६ गर्जमानाः (न्) - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

चिक्षेप शक्रमुद्दिश्य गिरौ वज्रं यथैव सः ।
स चापि तेन विक्षिप्तो लब्धसंज्ञो महाबलः ॥४६॥
विधाय वेगं देवेन्द्रमुपतस्थे कृताञ्जलिः ।
ततो वायुश्च देवाश्च सर्व एव सहानुगाः[४७] ॥४७॥
अभ्यद्रवन्त दैत्येन्द्रान् प्रगृहीतवरायुधाः ।
तेषां तेषाञ्च संग्रामः सुघोरः समपद्यत ॥४८॥
सिंहानामिव दृप्तानां[४८] विजने[४९]शरभैः सह ।
तत्र केचिद्विनिहताः सुप्रहारेण मूर्च्छिताः ॥४९॥
साधुसाध्विति भाषन्तः प्राणानूर्ध्वं वितत्यजुः[५०] ।
अपरे दनुदैत्येन्द्रा मुदा युक्ता[५१] महाबलाः ॥५०॥
परेणाभ्याहतं शूरं समरक्षन्[५२] सुपुत्रवत्[५३] ।
केचिद्धत्वापि सुबहून् देवदानवसत्तमाः ॥५१॥
अविक्षताः शितैः शस्त्रैरात्मानं गर्हयन्त्युत ।
अशस्त्रं केचिदभ्येत्य देवदैत्या महाबलाः ॥५२॥
धर्मयुद्धमभीप्सन्तस्त्यक्त्वा शस्त्राण्ययोधयन् ।
बहवस्तत्र दैत्येन्द्रा युयुधुर्भीमविक्रमाः ॥५३॥
देवाश्च[५४] नाहता ये वै नाभिघ्नन्ति कदाचन ।
पदातयस्तत्र सर्वे योधयन्ति पदातिभिः[५५] ॥५४॥
सादिनः सादिभिः सार्धं रथिनो रथिभिः सह ।
गजिनो गजिभिश्चैव तथा युद्धमवर्तत ॥५५॥
एवं तेषां हि संग्रामो देवानां दानवैस्सह ।
आवर्तत शतान्यष्टौ वर्षाणि सुमहाभयः[५६] ॥५६॥
अथ दैत्यो महामायो गजेनाम्बुदवर्च्चसा ।
तोमरं सुमहद् बिभ्रद्युगान्तानलवर्च्चसम् ॥५७॥
कोकिलाञ्जनमेघाभो विद्रुतो यो विरोचनः ।
सोऽभ्यद्रवत्तदा देवानातिसव्यानिवोत्थितान् (?) ॥५८॥

---

४७ वा - ख. । ४८ तृप्तानां - घ. । ४९ विजये - घ. । ५० प्राणान्मूर्धनि तत्यजुः (?) । ५१ यदा मुक्ता - ख., मदयुक्ता - घ. । ५२ संरक्षन्त - ख । ५३ स्वपुत्रवत् - घ. । ५४ देवांश्च ? । ५५ पदातिनः - घ. । ५६ तु महाभयः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स गजेन प्रभिन्नेन मुखाडम्बरघोषिणा ।
अभिदुद्राव देवेन्द्रं तिष्ठतिष्ठेति चाब्रवीत् ॥५९॥
तस्यापतत एवाथ भगवान् पाकशासनः ।
जत्रुदेशे शरं घोरं निचखान ररास च ॥६०॥
अनुभूय प्रहारं तं स दैत्यो भीमविक्रमः ।
तस्यास्य तोमरेणाथ बिभेद करमुन्नतम्[५७] ॥६१॥
अथास्य तोमरोद्भिन्नाद्धस्ताद्धेमविभूषितम्[५८] ।
पपात तद्धनुर्दिव्यं महाशनिसमप्रभम्[५९] ॥६२॥
ततोस्य भूयो दैत्येन्द्रो व्याकुलस्य तदा गजम् ।
तोमरेण बिभेदाशु कुम्भदेशे महाबलः ॥६३॥
स भिन्नस्तेन दैत्येन वने मत्त इव द्विपः ।
अनंकुशः शनैर्घृ - स्वं बलं ह्यनिवारितः (?) ॥६४॥
- - - - - - - - - - - - - - - - - - ।
ते तथा वध्यमानास्तु आदित्या दैत्यदानवैः ।
भयार्दिता दिशः सर्वाः[६०] पलायन्ते स्म[६१] सर्वशः ॥६५॥
ततः शंखाश्च भेर्यश्च वाद्यानि विविधान्यपि ।
- - - - - - - - - - - - - - - - - - ।
सिंहनादाँश्च संचक्रु[६२]र्दैत्यदानवसंमताः (?) ॥६६॥
तच्छिन्नभिन्नप्रविदारितान्तरं[६३] गजेन दैत्यैश्च पुनर्विलोडितम्[६४] ।
बलं महद्दैवतपालितं बभौ यथार्णवो मन्दरसन्थविक्षतः ॥६७॥

⊙ इति स्कन्दपुराणे युद्धे एकोननवतितमोध्यायः ⊙

५७ ...मुद्धतं - ख, ...मुद्धृतं - घ, मुद्यतं (?) । ५८ विभूषितात् - (?) । ५९ यथाशनिसमुल्वणं - घ. ।
६० सर्वे - ख. । ६१ विपलायन्ति - ख. । ६२ संक्रुद्धै - ख. । ६३ प्रविदारणातुरं - ख. ।
६४ पुनर्विलोलितं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

तद्देवसैन्यं संदृश्य दैत्यदानवयूथपैः[१] ।
वध्यमानं भृशं व्यास व्याघ्रैरिव मृगान् वने ॥१॥
तिमिरारिर्महातेजाः सोमःप्रहरतां वरः ।
तिग्मवर्ष्मा[२] सुशीतार्चिचः स्वयं पवनसारथिः ॥२॥
तौ बद्धकवचौ सम्यक् शरासनधरावुभौ ।
बद्धगोधांगुलित्रौ च तथा बद्धेषुधी च तौ ॥३॥
सखड्गौ च सघण्टौ च[३] सपताकौ गजाविव ।
उभौ वीरौ महावीर्यौ योद्धुं दैत्यान् व्यवस्थितौ ॥४॥
सोमस्तु दशभिस्तीक्ष्णैः सायकैर्मर्मभेदिभिः ।
विव्याध हृदये दैत्यं हिरण्याक्षं महासुरम् ॥५॥
स भिन्नहृदयो दैत्यः सोमेन दृढमुद्धतः ।
मोहं समाविशद् व्यास क्रौञ्चः शक्त्येव पर्वतः ॥६॥
तं तथाभिसमीक्ष्यैव रथं यन्ता[४] सहासुरम्[५] ।
अपोवाह महासाथं धनेशं निवयो यथा ॥७॥
ततो हाहाकृतं दैत्यैर्दैवतैः साधुसाध्विति ।
गृह्णगृह्णेति दैत्यैश्च मा गृह्णेति च दैवतैः ॥८॥
ततो भेर्यश्च शंखाश्च पणवा गोविषाणकाः ।
अवाद्यन्त सुराणां वै हर्षरागप्रवर्तनाः[६] ॥९॥
अथान्धकश्च[७] तारश्च तारको नमुचिस्तथा ।
विप्रचित्तिः शंबरश्च महामायश्च दानवः ॥१०॥
धुन्धुः कार्तस्वनश्चैव राहुश्चैव महाबलः ।
शतकेतुः शतावर्तः पुलोमा विल्वलस्तथा ॥११॥
वातापी कालनेमिश्च शतावर्तः[८] (?) शतोदरः ।
महापार्श्वोदरश्चैव[९] मुसुण्डः[१०] सुण्ढ[११] एव च ॥१२॥

---

१ ...यूथपाः - ख. । २ शितवर्म्मा - घ, तिग्मवर्मा (घर्मा?) - ख. । ३ सुसन्नद्धौ - घ. । ४ रथयन्ता - ख ।
५ महासुरम् - (?) । ६... प्रवर्धनाः - (?) । ७ तथान्धकश्च - ख, तदा (?) । ८ शरभश्च (?) ।
९ ह्रदश्चैव - घ । १० मुहूर्त्तो - घ. । ११ मुण्ड - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दुर्लोमा वक्रबन्धश्च विरोमा[१२] रोध[१३] एव च ।
मारीचश्च सुबाहुश्च श्वेतकुण्डलिरेव[१४] च ॥१३॥
वृषपर्वातिकायश्च शरभः सिंह एव च ।
नरान्तको देवहनस्तथा यज्ञहनश्च यः ॥१४॥
दैत्यौ सुन्दनिसुन्दौ च शक्रतापन एव च ।
प्रह्लादश्चानुह्लादश्च शिनिर्बाष्कल एव च ॥१५॥
विरोचनो बलिर्बाणो वाताश्वश्च महाबलः[१५] ।
मयोथ तारकाक्षश्च विद्युन्माली प्रभाकरः ॥१६॥
दुन्दुभि[१६]र्महिषश्चैव अरिष्टो रिष्ट एव च ।
केशी च धेनुकश्चैव अजको व्यंस एव च ॥१७॥
तथा गगनमूर्धा च असिलोमा च दानवः ।
सूचीलोमा तुहुण्डश्च हुण्डश्च परतापनः ॥१८॥
हस्ती दुर्योधनश्चैव विपाकः पाक एव च ।
बलो मुरोथ नरको सूकेन्द्रदमनावपि[१७] ॥१९॥
अश्वग्रीवः सम्बरश्च तथान्यः[१८] कालसंवरः ।
शाल्वः[१९] शतभुजश्चैव द्रुमो व्याघ्रश्च दानवः ॥२०॥
मधुश्च कैटभश्चैव महासंगर[२०] एव च ।
छायाग्रहश्च[२१] विख्यातः[२२] सैंहिकेयाश्च विश्रुताः ॥२१॥
हालाहलाश्च ते सर्वे बलिपुत्राश्च विश्रुताः ।
तथा मयसुताः सर्वे निवातकवचाश्च ये ॥२२॥
पौलोमाः कालकेयाश्च विप्रचित्तिसुताश्च ये ।
एते चान्ये च बहुशो[२३] दैत्यदानवसंमताः ॥२३॥
सर्वे चन्द्रमसं देवं प्रति वेगं प्रचक्रिरे ।
महिषा इव - - - हस्तिनः शरभं यथा ॥२४॥

---

१२ विरामो - ख., विराधो - घ. । १३ राध - घ. । १४ श्वेतकुण्डल एव - घ. । १५ सु महाबलः - ख. ।
१६ धुन्दुभि - ख. । १७ नरकावपि - घ. । १८ तता (था) यः - ख. । १९ शालः?, अन्धः - घ. ।
२० महामगर - ख., महाकवच - घ. । २१ मायाग्रहश्च - घ. । २२ विख्याताः - ख. । २३ बहवो - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विघ्ना यतप्रतं यद्वत् कामा मोक्षाश्रितं यथा ।
इन्द्रियार्था यथा योगमनर्था दुःखितं यथा[२४] ।।२५।।
नागा इव गरुत्मन्तं भ्रमरा इव पादपम् ।
तथा ते दानवाः सर्वे प्रगृहीतवरायुधाः ।।२६।।
दुद्रुवुः शिशिरं देवं महाजलदनिस्वनाः ।
तेषामापततां व्यास तिमिरारिर्हंसन्निव ।।२७।।
उद्यतान्यायुधानि स्म शरैश्चिच्छेद सर्वशः ।
ततः[२५] स तान् पुनर्देवः सर्वानेव रुषान्वितः ।।२८।।
हृदयेषु शरैस्तीक्ष्णैर्बिभेद च ररास च ।
तुषारेण च शीतेन ताराधिपतिरव्ययः ।।२९।।
आजघानासुरान् सर्वान् क्रोधसंरक्तलोचनः ।
ते शरैश्च विनिर्भिन्नाः शीतेन च भृशार्दिताः ।।३०।।
स्थितास्तत्रैव दैत्येन्द्राश्चित्रपट्टार्पिता इव ।
चन्द्रोपि देवः समरे मण्डलीकृतकार्मुकः ।।३१।।
बिभेद सर्वान् दैत्येन्द्रान् नर्दमानः पयोदवत् ।
यः कश्चिद्दानवो वापि दैत्यो वा मुनिसत्तम ।।३२।।
सर्व एव शरान् तस्य दधिरे शशिनस्तदा[२६] ।
यात्किञ्चिच्चालयत्यङ्गं तत्र दैत्यः कदाचन ।।३३।।
तत्तत् तीक्ष्णैः शरैर्देवो बिभेद च ररास च ।
ब्रुवतो दैत्ययोधस्य यत्र क्वचन संयुगे ।।३४।।
निचखान शरानष्टौ मुखे तस्यापि चन्द्रमाः ।
निष्पन्दास्ते स्थिताः सर्वे मूकवच्चासुरोत्तमाः ।
शरनिर्भिन्नसर्वाङ्गाश्चित्रपट्टार्पिता इव ।।३५।।
यथा स भगवान् देवश्चद्रन्मा दानवार्दनः ।
तथैव भगवान् वह्निरार्दयद् दानवान् युधि ।।३६।।

---

२४ इव दुःखितां - ख. । २५एनं (नान्) - ख., एतान् शनैर् - घ. । २६ ..स्तथा - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तद्रथाश्वगजयोधसंकुलं प्रक्षरद्रुधिरबिन्दुविह्वलम् ।
सीदते गजकुलोपमं बलं पंकलग्नमिव सर्वमुल्वणम् ॥३७॥

⊙ इति स्कन्दपुराणे युद्धे नवतितमोऽध्यायः ⊙

सनत्कुमार उवाच

तस्मिन्बले तथा[१] तेन सोमेनाप्रतिमौजसा ।
हन्यमाने महामायः समाश्वस्य तदासुरः ॥१॥
हिरण्याक्षो दितेः पुत्र इदमाह रुषान्वितः ।
गरुत्मतः सुतं वीरं रथयन्तारमाहवे[२] ॥२॥
खगेश्वर न ते लज्जा भवतीह रणार्णवे ।
यन्मां[४] रथेन संग्रामात्[५] त्वं हरस्यन्यतोऽद्य[६] वै ॥३॥
किं वक्ष्यन्त्यसुराः सर्वे दैत्याश्चैव महाबलाः ।
राजास्माकं जितः संख्ये शत्रुभिः शत्रुतापनः ॥४॥
जीवितैषी परित्यज्य बालानस्मान् दुरात्मवान्[७] ।
रणादपगतः[८] क्वापि धिङ् मामशुभकारिणम् ॥५॥
कश्यपस्य सुतो भूत्वा भ्राता दैत्यस्य संमतः[९] ।
हिरण्यकशिपोर्दैत्यो[१०] महायोगबलान्वितः[११] ॥६॥
अग्रतः[१२] सर्वदैत्यानां दानवानां तथैव च ।
राजा स्वामी च शूरश्च[१३] निर्जितः शत्रुभिः कथम् ॥७॥
अथवा देवपक्षस्य त्वं पुत्रो वै गरुत्मतः ।
तमेव पक्षं भजसे न मां त्वं परिरक्षसे ॥८॥
नाहं तव न शक्तोऽद्य शिरः कायात् सकुण्डलम् ।
खड्गेनानेन तीक्ष्णेन छेत्तुं खगकुलाधम ॥९॥

---

१ तदा - घ । २ ...मब्रवीत् - ख. । ३ रणान्तरे - घ. । ४ त्वं या (मां?) - ख. । ५ संग्रामे - ख. ।
६ वहस्यन्यतोऽद्य - घ. । ७ दुरातमनाम् - ख., दुरातमनः (?)। ८ .. दुपगतः - ख, ...दद्य - घ. । ९ ...सत्तम - घ. ।
१० हिरण्यकशिपुर्दैत्यो - ख. । ११ महामायो बलान्वितः - ख. । १२ अग्रणी (?)। १३ वृद्धश्च - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मित्रं त्वं मम मन्दस्य पुरा बालसखेति च[१४] ।
अतः कृत्वाभिरक्षामि[१५] गच्छ मुक्तोसि दोषवान् ॥१०॥
तस्य तद्वचनं श्रुत्वा रथयन्ता खगेश्वरः ।
उवाच श्लक्ष्णया वाचा हिरण्याक्षं महासुरम् ॥११॥
मा क्रुधो दानवश्रेष्ठ[१६] नास्मि दैत्य तवाहितः ।
तदोपवाहितः[१७] क्षिप्रं रणाद् रक्षार्थमेव हि ॥१२॥
सूताः शास्त्रविदश्चैव ब्रुवते दानवेश्वर ।
दम्पती रथियन्तारौ परस्परमनुव्रतौ ॥१३॥
रथिना शस्त्रघातेभ्यो रक्ष्यो यन्ता यथा प्रिया ।
तेन चैव रथो रक्ष्यो यथा भर्त्ता जयावहः ॥१४॥
स भवान् रिपुणा भिन्नो ह्यवबद्धश्च संयुगे ।
अशक्तः स्यादितीत्येवं मया क्षिप्रमपोहितः[१८] ॥१५॥
आश्वस्य बलमाधाय[१९] पुनर्युद्धेन दंशितः ।
रिपूञ्जेष्यसि संग्रामे तवेवं त्वमपवाहितः[२०] ॥१६॥
ये हि कालेपयान्ति स्म काले चायान्ति दंशिताः ।
तेषान्नासुलभो[२१] दैत्य जयो युद्धे महात्मनाम् ॥१७॥
न चाहमहितः सत्यं हितकृत् तव नित्यदा ।
मा शङ्कां कुरु दैत्येन्द्र शपे सत्येन सर्वतः ॥१८॥
न चाप्यविदितं तेद्य[२२] कृतो यत् शपथः[२३] पुरा ।
तथैवामृतपश्चाहं न मृत्युर्मम विद्यते[२४] ॥१९॥
अहं गरुत्मतः पुत्रो देवान् हित्वासुरान् श्रितः ।
तवैव दैत्य स्नेहेन मा शङ्कां त्वं कृथा मयि ॥२०॥
एतद्बलं चन्द्रमसा वह्निना चोपपीडितम्[२५] ।
त्राहि क्षिप्रं महाबाहो[२६] न शोकं कर्तुमर्हसि ॥२१॥

---

१४ बालः सखेति च - घ. । १५ कृताभिरक्षस्त्वं (?)। १६ नात्र लज्जा दानवेश - घ. । १७ ततोपवाहितः - ख.। १८ क्षिप्र प्रवाहितः - ख. । १९ ... मादाय - ख. । २० ...त्येवं - ख., त्वमेवमपवाहितः (?) । २१ तेषान्न सुलभो - ख. । २२ न चैव त (त्व) द्धीतो वाक्यै - ख. । २३ मे कृतं शपथं - घ., कृतोहमप (म)रः - ख.। २४ यतोहममृतं प्राप्य (श्च) चामरत्वमवाप्तवान् - घ. । २५ चोपपीडिताः - ख. । २६ महामोहो - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मायामथ समास्थाय धनुषा वा बलेन वा ।
जहि शत्रून्महाराज[२७] मा[२८] रुषन्तु दितेः सुताः ॥२२॥

सनत्कुमार उवाच

ततः स तं[२९] परिष्वज्य पक्षिराजं महासुरः ।
अभिदुद्राव वेगेन रथेनाम्बुदनादिना ॥२३॥
तस्यापतत एवाथ सवह्निश्चन्द्रमास्तथा ।
शरैराशीविषाकारैर्ध्वजं चिच्छिदतुर्युधि ॥२४॥
ततो ललाटे विद्ध्वैनं तौ देवौ शशिपावकौ ।
युगान्ताम्बुदवद् व्यास नादमुच्चैः प्रचक्रतुः ॥२५॥
तयोस्तल्लाघवं दृष्ट्वा हिरण्याक्षः प्रतापवान् ।
आग्नेयेनास्त्रमुख्येन शिशिरं[३०] तद् व्यशातयत् ॥२६॥
तुषारवर्षणं दग्ध्वा ततोसौ मायया पुनः ।
संमोहयित्वा वेगेन राहुर्भूत्वाभिदुद्रुवे[३१] ॥२७॥
स राहुणा तदा तेन ग्रस्यमानः खगेश्वरः ।
रणं त्यक्त्वान्यतो यातस्ततो दैत्यो ननाद ह ॥२८॥
दानवा ह्यपि ते[३२] सर्वे नष्टे तस्मिन् हिमाशये ।
समाश्वस्य पुनश्चक्रुर्युद्धं सुरगणैः सह ।
तेम्बुदाशनिसन्नादाः समुद्रसमनादिताः ॥२९॥
दैत्यदानवमहारथाः प्रवरसादिन आश्वसन्तः ।
-- तनेव युद्धकांक्षिणो दंष्ट्रिण इव महागजा वनसमाश्रिताः ॥३०॥

⊙ इति स्कन्दपुराणे युद्धे एकनवतितमोध्यायः ⊙

२७ शत्रुम्महाराज - ख. । २८ तु - ख. । २९ सन्तं - ख. । ३० तिमिरं - ख. । ३१ विदुद्रुवे - ख. ।
३२ पिहिते - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

नक्षत्राधिपतिं दृष्ट्वा भगवान् हव्यवाहनः ।
विद्रुतं दानवभयात् पदातिर्योद्धुमुद्यतः[१] ॥१॥
स शरैर्दानवरथं ससूतं सहवाजिनम्[२] ।
सध्वजं सपताकञ्च भस्मसायुज्यमानयत्[३] ॥२॥
ततोऽस्य कार्मुकं दिव्यं शरेणानतपर्वणा ।
विज्यं चकार संक्रुद्धस्तिष्ठतिष्ठेति चाब्रवीत् ॥३॥
अथान्धकश्च राहुश्च प्रह्लादो मय एव च ।
अन्ये च दानवश्रेष्ठाः कृशानुं पर्यवारयन् ॥४॥
सोवप्लुत्य तदा तेषां धनूंषि च च रथाँस्तथा ।
ध्वजानि च विचित्राणि ददाह च ररास च ॥५॥
कवचानि विचित्राणि शिरांसि च वसूत्तमः ।
ददाह विकृताकारो नादयन् सर्वतोदिशः ॥६॥
हाहेति नदतां तत्र भगवान् हव्यवाहनः ।
जिह्वा दहन्[४] बभौ व्यास गुहायां दीपवत् स्थितः ॥७॥
केषाञ्चित् प्रदहत् तानि दानवानां मुखानि सः ।
पङ्कजानीव[५] फुल्लानि तिमिरारिर्महाप्रभः ॥८॥
केषाञ्चित्तु गजेन्द्राणां करान् काञ्चनभूषितान् ।
ददाह भगवान् वह्निर्दावाग्निर्भुजगानिव ॥९॥
शरान् शराशनाञ्चैव तथा खड्गपरिच्छदान्[६] ।
ददाह भगवान् वह्निर्हस्त्यश्वमपि सर्वशः ॥१०॥
ते हन्यमाना दैत्येन्द्रा विशस्त्रा दुःखिता भृशम् ।
भ्रमन्ति वितनुत्राश्च तत्र तत्रैव ---[७] ॥११॥
तेषां वह्निप्रदीप्तानां दह्यतां सुरविद्विषाम् ।
हिरण्याक्षः स्वयं राजा पर्जन्यः समपद्यत ॥१२॥

---

१ ...यंमथागतः (यो द्धुमागतः?) - ख., समधावत - घ. । २ ...सहवाजिनः - ख. । ३ पादयत् - ख. ।
४ दन्तं – ख. । ५ .. निव - ख. । ६ ध्वजपरिच्छदान् (?) । ७ सर्वकृत् ? - ख., सर्पवत् (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स मेघभूतो दैत्येन्द्रस्तमग्निं वृष्टिभिस्तदा ।
प्रशामयत[८] वेगेन संवर्त्तक इवाम्बुदः ॥१३॥
तं प्रशान्तं तदालक्ष्य विधुरं हव्यवाहनम् ।
विप्रचित्तिः शरैस्तीक्ष्णैर्ललाटे समवाकिरत् ॥१४॥
ततोस्य नदतो भूयो मयो दानवसत्तमः ।
मुखे शरान् महाघोरान्निचखान महासुरः ॥१५॥
तस्य तेन तदा व्यास मुखे भिन्नस्य दारुणः ।
उत्तस्थौ वायुवद् धूमः शरीरादञ्जनोपमः ॥१६॥
तेन धूमेन[९] खञ्चैव दिवं भूश्चैव सर्वशः ।
पूरिता महता[१०] व्यास न प्राज्ञायत[११] किंचन ॥१७॥
तेन शब्देन संज्ञाभिर्नामविश्रावणैरपि ।
करस्पर्शैस्तदा[१२]न्योन्यमनयद्यमसादनम् ॥१८॥
न देवो ज्ञायते तत्र न दैत्यो दानवोपि वा ।
अजानन्तस्ततस्तत्र संस्थामेतां[१३] प्रचक्रिरे ॥१९॥
आर्टिं दैत्याः प्रकुर्वन्त वक इत्येव देवताः ।
बकं वदन्ति ये तत्र दैत्यास्तान् व्यहनँस्तदा ॥२०॥
आर्टिं ब्रुवाणञ्च सुरा इत्येवं तद् व्यवर्तत[१४] ।
एवंभूतमभूद्युद्धं[१५] वर्षाणां तु[१६] सहस्रकम्[१७] ।
महद्भयं वै[१८] दैत्यानामन्धकारे सुरैस्सह ॥२१॥
तदन्धकारे सुमहाभयंकरं तदाभवद्युद्धमतीव दारुणम् ।
जगद्विनाशाय जगद्धितैषिणां सुरासुराणां रुधिरौघनिस्रवम्[१९] ॥२२॥

⊙ इति स्कन्दपुराणे युद्धे द्विनवतितमोध्यायः ⊙

---

८ प्रशमेयत – ख., प्राशामयत् (?) । ९ धूपेन - ख । १० महतो - ख. । ११ प्रज्ञायत - ख. ।
१२ ...स्तथा (?) । १३ संज्ञामेतां (?), संग्रामं तं - घ. । १४ ...ध्यवर्तत (?) । १५ एतद्भूतमयुध्यन्तु - ख ।
१६ वै - ख. । १७ महद्भय - ख. घ., तदभूत्संज्ञया युद्धं मूर्खाणां वै महद् भयम् - घ. । १८ सहस्रमेकं - ख. ।
१९ विस्रुतं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

अथासौ तेन कालेन केतुरग्नेः[१] समुत्थितः ।
वायुनाभिहतश्चैव अगच्छद् विलयं भृशम् ॥१॥
ततः समभवद् व्योम विमलं सर्वमेव हि[२] ।
अपश्यन्त सुरास्सर्वे दैत्याश्चैव परस्परम् ॥२॥
ततः शंखाश्च भेर्यश्च पटहाडम्बरास्तथा ।
सुघोषका डिण्डिमाश्च भग्ना भेर्यश्च सर्वशः ॥३॥
बलद्वयेप्यवाद्यन्त शतशोथ सहस्रशः ।
अथ शक्रश्च देवेन्द्रो[३] यमो वैश्रवणस्तथा ॥४॥
पूषा भगश्च द्वावेतौ अर्यमा मित्र एव च ।
जयन्तो मरुतश्चैव रुद्रादित्याश्च सर्वशः ॥५॥
वेगेन सुमहावेगा मम्रृदुर्दानवं बलम् ।
तत्र चामीकराभासं प्रगृह्य बलवद्धनुः ॥६॥
यमो दण्डेन दैत्येन्द्राननयद्यमसादनम् ।
स पञ्चभिः शरैर्विद्ध्वा हिरण्याक्षं महाबलम् ॥७॥
अश्वाँश्चैकैकशः सर्वान् जहास च ननाद च ।
तस्य सर्वे तदायस्ता दैत्यदानवसत्तमाः ॥८॥
शरानाशीविषाकारान् व्यसृजन्[४] विकृताशनान् ।
तान् स चिच्छेद समरे त्रिधैकैकं लघुक्रियः ॥९॥
पुनश्च विशिखै[५]र्घोरैरर्दयत् प्रहसन्निव ।
ततोन्धकस्य यन्तारं रथञ्च सहवाजिभिः ॥१०॥
किंकरेण[६] महावीर्यो यमो निन्ये स्वकं पुरम्[७] ।
ततोन्धको गदापाणिर्युगान्ताम्बुदवन्नदन् ॥११॥
अभ्यधावद्यमं तूर्णं तिष्ठतिष्ठेति चाब्रवीत् ।
तस्य वज्रेण देवेन्द्रो गदां हेमपरिष्कृताम् ॥१२॥

---

१ ...रुग्रैः (रुग्रः?) - घ. । २ ह - ख. । ३ दैत्येन्द्रो - ख. । ४ व्यसृञ्जन् - ख. । ५ निशितै - ख. ।
६ किंकारेण (?) - ख. । ७ पुनः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

बिभेद शतधा[८] व्यास सापतद् भुव्यवस्थिता ।
तं विशस्त्रं विकवचं कृत्वा ते देवसत्तमाः ॥१३॥
युगपच्छस्त्रवर्षेण ताडयामासुराहवे ।
यमो दण्डेन तं मूर्ध्नि शक्रो वज्रेण चाहनत् ॥१४॥
वित्तदोशनिना चैव पाशेन वरुणस्तथा ।
अन्ये चान्यैस्तथा देवा ह्यमोघैरायुधोत्तमैः ॥१५॥
अभ्यधावन्नसंरब्धा हतस्त्वमिति वादिनः ।
न चैव तस्य दैत्यस्य दुःखं तत्राभवत्तदा ॥१६॥
सोपि दैत्यस्ततोत्पत्य[९] पुण्डस्यास्थाय[१०] पृष्ठतः ।
यमं मुष्टिप्रहारेण पुण्डाद् भूमावपातयत् ॥१७॥
तथेन्द्रस्य गजं भूयो पुच्छे संगृह्य वेगवान् ।
भ्रामयित्वाक्षिपद् दूरे नष्टस्त्वमिति चाब्रवीत् ॥१८॥
ततो धनेशस्य पुनः शिबिकां कामगामिनीम् ।
आक्षिप्य[११] बहुधा दैत्यो व्यधमत् क्रोधमूर्छितः ॥१९॥
ततो गजैर्गजान् निघ्नत्[१२] पदातीँश्च पदातिभिः ।
रथं रथेन च रणे हयाँश्च हयसादिभिः ॥२०॥
पुनर्गजे[१३] महेन्द्रस्य हन्यमानोपि[१४] संयुगे ।
समुत्प्लुत्य[१५] तदा शक्रं गजस्कन्धान्न्यपातयत् ॥२१॥
तस्य तत् कर्म संवीक्ष्य दानवेन्द्रस्य संयुगे ।
सर्वे देवा दिशः सर्वाः प्रनष्टा जीवितार्थिनः ॥२२॥
पूर्वेण भगवानिन्द्रः सहादित्यः[१६] सलोकपः ।
दक्षिणेन तथा रुद्रा वसवश्चाश्विनावपि ॥२३॥
प्रतीचीं यक्षरक्षांसि पिशाचाः पन्नगैः सह ।
उत्तरेण तथान्ये च प्रपद्यन्त[१७] यथा मृगाः ॥२४॥

---

८ स तथा - ख. । ९ स ..तदोत्पत्य - घ. । १० पुण्डमास्थाय - घ. । ११ आदाय - घ. । १२ निघ्नन् - ख. ।
१३ पुनर्गजं - ख. । १४ हन्यमानश्च - घ. । १५ अत्रप्लुत्य - ख. । १६ सहादित्यैः - ख. । १७ पलायन्त (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तेषु भग्नेषु दैत्येन्द्राःपृष्ठतो विकृतायुधाः ।
अभ्यधावन्त गर्जन्तो भयं तेषां व्यदर्शयन् ॥२५॥
ततो मुहूर्त्तं ते गत्वा हिरण्याक्षेण वारिताः ।
निवृत्ताः समतिष्ठन्त सर्वेमर्षवशं[१८] गताः ॥२६॥
अथोवाच ततः क्रुद्धान् हिरण्याक्षो हसन्निव ।
दैत्यदानवनाथाँस्तानिदं वचनकोविदः ॥२७॥
किमेभिरबलैरद्य[१९] युष्माकं दैत्यदानवाः ।
अवबद्धैश्च रुद्धैश्च मृतसंज्ञै[२०]र्दुरात्मभिः ॥२८॥
हतास्ते नात्र सन्देहो येषां राज्यमिदं धृतम्[२१] ।
नैषां जीवितमद्यास्ति मा त्वरध्वं सुबालिशाः ॥२९॥
अबलानपि संरब्धान्निराशान् जीवितैषिणः ।
अवद्ध्येति बलाच्चैव दुर्जयाश्च न संशयः (?) ॥३०॥
सङ्गमोक्षन्निदानीश्च ल - - - - - सव (?) ।
- - - - - - - - इत्युवाच सदोशनाः (?) ॥३१॥
यदेतद्राज्यमित्याहुः प्राणा ह्येते महात्मनाम् ।
स तेषां हरति प्राणान् यस्तेषां राज्यमाहरेत् ॥३२॥
तेषामद्य ह - - - - - - -तसमैः सुरैः ।
आपूरयाम[२२] स्थानानि देवानां दानवेश्वराः ॥३३॥

सनत्कुमार उवाच

ततस्ते सहिरण्याक्षाः प्राविशन्नमरावतीम् ।
रत्नानि जगृहुर्व्यास विजयं चावघोषयन् ॥३४॥
आरक्षमामनुस्तत्र चक्षु[२३]राप्तैश्च तेसुराः ।
आश्वासयन्त पौरांश्च तथा प्रकृतयश्च ह ॥३५॥
- - मिति तथार्घेण तथैवोपायनैर्वरैः ।
आशीर्भिश्चासुरश्रेष्ठं हिरण्याक्षं प्रणेमिरे ॥३६॥

---

१८ मन्युवशं - ख. । १९ ...रत्र - ख. । २० भृतसंज्ञै - ख. । २१ हृतम् (?) । २२ मा - ख. ।
२३ चक्ष्यु (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तान् समाश्वास्य[२४] दैत्येन्द्रो ह्यध्यस्य च वरासनम् ।
कार्याणि कृत्वा सर्वेषामगच्छद् वरुणालयम् ।।३७।।
ते सिंहनादैर्विविधैश्च वाद्यैः प्रवल्गनास्फोटितकूजितैश्च ।
महासुरा[२५]दानवराजसिंहं जग्मुस्समन्तात् परिवार्य सर्वे ।।३८।।

⊙ इति स्कन्दपुराणे वरुणालयगमने त्रिणवतितमोध्यायः ⊙

सनत्कुमार उवाच

तमापतन्तं वेगेन गरुत्मन्तमिवाहवे ।
दृष्ट्वा वरुणपुत्रास्ते पित्रा सह विदुद्रुवुः ।।१।।
दैत्याश्चापि हि ते सर्वे प्राप्य तद्वरुणालयम् ।
व्यूढस्कन्धा व्यतिष्ठन्त व्यसृजँस्तत्पुरं प्रति ।।२।।
दूतं वातापिनं चैव राज्ञा प्रेषितमूर्जितम् ।
स गत्वा तां पुरीं रम्यां प्रविश्य च महासुरः ।।३।।
पौरैः सुपूजितो व्यास प्राहेदं तान् सुगर्वितः ।
राजा सर्वस्य लोकस्य दैत्यदानवनन्दनः ।।४।।
कश्यपस्य सुतः श्रीमान् हिरण्याक्षः प्रतापवान् ।
जित्वा सर्वान् सुरान् संख्ये आज्ञापयति वस्सदा ।।५।।
यूयं शृणुत सर्वे मे आज्ञां कुरुत चैव[१] हि ।
आनयध्वं च रत्नानि परित्यजत देवताः ।।६।।
देवपक्षोत्र यः कश्चित् पुरे प्रतिवसत्युत[२] ।
अभयं तस्य[३] यच्छामि यातु देवानभीतवत्[४] ।।७।।
नारदाद्याश्च ऋषयस्तं समासाद्य दैत्यकम्[५] ।
ऊचुस्तमसुरं व्यास सान्त्वयुक्तमिदं तदा ।।८।।

---

२४ समाश्वस्य - ख. । २५ महासुरै - ख. ।

१ कुरु तथैव - ख. । २ प्रतिवसन्त्युत - ख. । ३ अयन्तस्य प्रयच्छामि - ख. । ४ ... न्नभीतवत् - ख., इतः परं पत्रमेकं खण्डितं खपुस्तके । ५ इतः पूर्वं खपुस्तके इव घ.पुस्तकेपि कियानंशः खण्डितः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

राजा भोजो विराट् सम्राट् भूपतिः क्षत्रियो नृपः ।
य एभिः स्तूयते शब्दैः कस्तन्नार्च्चयते[६] बुधः[७] ।।९।।
स त्वं राजा च भोजश्च विराट् सम्राट् तथैव च ।
भूपतिः क्षत्रियश्चैव नृपः सर्वसहस्तथा ।।१०।।
निर्जिताः सुमहावीर्यास्त्वया देवाः सवासवाः ।
कस्त्वया सदृशो लोके ब्राह्मैकं[८] रुद्रमीश्वरम् ।।११।।
त्वं पाता सर्वलोकानां हर्त्ता स्रष्टा तथैव च ।
कस्तवाज्ञां महाराज प्रतिहन्याद् दुरात्मवान् ।।१२।।
वयं[९] च सर्वे दैत्येन्द्र वरमिच्छाम[१०] दानव ।
वरदस्त्वं हि भूतानामस्माकं वरदो भव ।।१३।।

सनत्कुमार उवाच

तेषां तद्वचनं श्रुत्वा वरदोस्मीति सोब्रवीत् ।
ऊचुस्ते दैत्यराजानं तदा वचनकोविदाः ।।१४।।

ऋषय ऊचुः

यदेतदुक्तं भवता नरकव्याधिमृत्युषु ।
न तथा तद् भवेद् दैत्य एष नो दीयतां वरः ।।१५।।

दैत्य उवाच

मम प्रतिज्ञा विप्रेन्द्राः पूर्वमेव तपोधनाः ।
लोकानां सुखमेधेयं राजा लोकस्य यद्यहम् ।।१६।।
न तथा तत् करिष्यामि यद्यहं मुनिसत्तमाः[११] ।
मिथ्याप्रतिज्ञः स्यां चाहमसत्यश्च दुरात्मवान् ।।१७।।
तस्मादन्यद्[१२] भवन्तो मां वरं याचन्तु[१३] सुप्रियम् ।
कर्तास्मि तां तथा सर्वं याचेहं[१४] शिरसा हि वः ।।१८।।

---

६ ...श्रयते - घ. । ७ बुधैः - घ. । ८ त्यक्त्वैकं (?) । ९ यमं - घ. । १० वरमिच्छामि - ब. ।
११ ऋषिसत्तमाः - घ. । १२ ...दन्यं - (?) । १३ याचत - घ. । १४ ...चैयं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा ऋषयः सर्व एव ते ।
हिरण्याक्षमिदं व्यास पुनरेवाब्रुवन्[१५] विभुम् ॥१९॥

ऋषय ऊचुः

लोकधर्मप्रवृत्त्यर्थं ब्रह्मणा दैत्यपुंगव ।
कृतमेतत् पुरा सर्वं धर्मश्चापि प्रवर्तितः ॥२०॥
समीक्ष्य चैतल्लोकस्य धर्मश्चापि[१६] प्रवर्तितः ।
नाभूतस्तद् भवेद् दैत्य इति नो वरदो भव ॥२१॥
प्रतिज्ञा प्रभवेत् सा यल्लोकानां[१७] दुःखवर्जनम् ।
तच्च तस्मान्न नश्येत ब्रह्मणः[१८] कृतिरव्यया ॥२२॥
यावत्त्वं दैत्य लोकस्य राजा ह्यसि[१९] प्रभुश्च ह ।
एवं त्वयानृणत्वं[२०] च ब्रह्मणो[२१] ह्य कृतं[२२] भवेत् ॥२३॥
तेषां स वचनं श्रुत्वा ऋषीन् निश्चित्य दैत्यराट् ।
ये[२३] द्रोहाःशक्रपक्षाश्च ममाज्ञाभङ्गकारिणः । २४॥
तेषामेव भवेन्मृत्युर्नरकेषु च यातनाः ।
एतदाह तदा राजा ते चाप्यूचुर्नराधिपम् ॥२५॥
एवमस्त्विति तां[२४]श्चोक्त्वा यातनामोक्षमादिशत् ।
स मुक्त्वा नारकान्[२५] सर्वान् ददौ स्थानस्य रक्षणम् ॥२६॥
पितृराजानमनघ विप्रचित्तिं महाबलम् ।
ततोवघुष्य स जयं पूजयित्वा तु तान्द्विजान् ।
जगाम धनदावासं हिरण्याक्षो महाबलः ॥२७॥
ते तां धनेशस्य पुरीं महाबला विनादयंतोंन्धकपालितास्तदा ।
हिरण्यनेत्रं परिवार्य[२६] दानवास्तदाभिजग्मुर्जलदा इवाचलम् ॥२८॥

⊙ इति स्कन्दपुराणे हिरण्याक्षदिग्विजये यमलोकाभिगमनो नाम चतुर्णवतितमोध्यायः ⊙

---

१५ ...ब्रवीद् - घ. । १६ धर्मस्यापि - घ । १७ ह्ययं लोकानां - घ. । १८ तस्यैतद् ब्रह्मणः - घ. । १९ ह्यासीत् - घ. । २० स वामृणत्वं - घ । २१ ब्रह्मणा - घ. । २२ कृति - घ. । २३ यो - घ. । २४ त्वां - घ. । २५ बरदान् - घ. । २६ प्रविदार्य - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

तथा[१] लङ्कां[२] समासाद्य धनेशस्य पुरीं शुभाम् ।
अदूरे तस्थुरुद्धूताः सन्नद्धकवचायुधाः ॥१॥
अवस्थितांस्तथा दृष्ट्वा दानवान्[३] बलदर्पितान् ।
लङ्कानिवासिनः[४] सर्वे निधिपालास्तथैव च ॥२॥
निधयः शंखपद्माद्या ऋषयश्च तपोधनाः ।
अर्घं रत्नानि[५] चादाय दानवाय न्यवेदयन्[६] ॥३॥
ऊचुश्च तव दैत्येन्द्र वयं वश्या न संशयः ।
किङ्कराश्च प्रशाध्यस्मान् यथावद्दानवेश्वर[७] ॥४॥

हिरण्याक्ष उवाच

मा भीर्भवतु वो यक्षा मम यूयं न संशयः ।
अयं राजा हि वः श्रेष्ठो हिरण्यकशिपोः सुतः ॥५॥
प्रह्लादो देवसंघनां सर्वेषां विप्रबाधनः ।
ततस्तं तत्र संस्थाप्य धनेशं दैत्यपुङ्गवम् ॥६॥
अन्येषां देवसंघानां स्थानान्यापूरयत्पुनः ।
संस्थाप्य सर्वस्थानेषु स्थानिनो दानवेश्वरान् ॥७॥
अन्धकन्त्वमरावत्या[८]मिन्द्रत्वेनाभ्यषेचयत् ।
भूर्लोकञ्चाखिलं दैत्यः स्वयमेवान्वशासत[९] ॥८॥
भूयश्च धनुरादाय सशरं सूर्यसन्निभः[१०] ।
दैत्येन्द्रो मेदिनीं प्राह ममात्मानं विदर्शय[११] ॥९॥
सा भीता तस्य दैत्यस्य वेपमाना कृताञ्जलिः[१२] ।
जयेत्युक्त्वाग्रतस्तस्थौ विष्णोर्लक्ष्मीरिवापरा ॥१०॥
तां मृगीमिव शार्दूलो भुजङ्गीमिव पक्षिराट् ।
शार्दूलीं सिंह इव च सिंहीं शरभराडिव ॥११॥

---

१ ततो (?) । २ लंकां - घ. । ३ धनदो - ख । ४ अलकावासिनः - घ. । ५ अर्घरत्नानि - ख. ।
६ निवेदयन् - ख. । ७ देवो धनेश्वरः - घ., नरेश्वरः - ख । ८ ...स्त्वमरावत्यां - ख. । ९... न्वशासते - ख. ।
१० सूर्यसन्निभं - ख. । ११ मम त्वं वै निदर्शय - घ., विदेशत - ख. । १२ कृताञ्जली - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

हंसीं काक इव क्षुद्रो मयूरीं मद्गुराडिव[१३] ।
तथा तां स दितेः पुत्रो जग्राह रुषिताननः ।
उवाच चैव[१४] संरब्धस्तां देवीं भयविह्वलाम् ॥१२॥
तवाहं वसुधे भर्त्ता ब्रह्मणा प्रकृतः शुभे ।
मान्यं[१५] पतिं त्वमिच्छेथा रक्षिष्येहं ततो हि ते ॥१३॥

सनत्कुमार उवाच

ततो रसातलं[१६] गत्वा स्वपुरस्य समीपतः ।
बबद्ध नागपाशैस्तां दुष्टामिव यथाङ्गनाम् ॥१४॥
ततोचलेन दैत्येन्द्रः शंखेन सुमहाबलः ।
आर्त्तां रुरोध[१७] दुष्टश्च[१८] कन्दरामिव वीर्यवान्[१९] ॥१५॥
ततोस्या रक्षणे नित्यमुद्युक्तान् रक्षिणो दधौ[२०] ।
किङ्करान्नाम दैत्येन्द्रान् सहस्राणि चतुर्दश ॥१६॥
स तथा तद्विधायैव दैत्येन्द्रस्तुष्टिमान् बभौ ।
कृषीबल इव क्षेत्रं सुनिष्पन्नं समीक्ष्य च ॥१७॥
कृतकृत्योहमित्येव बुद्धिं चक्रे स पार्थिवः ।
संयुज्य स्वसुतं ज्येष्ठं दारैः साधुरिवात्मवान् ॥१८॥
अन्तरं न च तस्यान्यः[२१] कश्चित्प्राप्नोति सुव्रत[२२] ।
स्वसहायस्य[२३] विप्रस्य यथा दम्भेन वर्ततः ॥१९॥
यजध्वं[२४] दानवास्सर्वे विप्रान्पूजयतेति च ।
देवञ्च शूलिनं सर्वे नमस्यत[२५] पुनः पुनः ॥२०॥
धर्ममेव निषेवध्वमिति सोज्ञापयत्तदा ।
न तस्या[२६] धार्मिकः कश्चिद् दैत्यो वा दानवोपि वा ॥२१॥

---

१३ डङ्गुराड्वि - ख. । १४ दैवे - ख. । १५ नान्यं - घ. । १६ अथ पृथ्वीं ततो - घ. ।
१७ ददज - ख. । १८ दुष्टश्च - ख. । १९ राज्ञाक्रम्य विनष्टां तां भर्ता स्वामीव योषिताम् - घ ।
२० ददौ - ख. घ. । २१ तस्यान्यत् - ख. । २२ सुव्रतः - ख. घ. । २३ असहायस्य - घ. ।
२४ वयध्वं - ख. । २५ नमस्य च - ख. । २६ तस्य - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

राज्येऽभवद् दुराचार[२७]स्तस्मिन्[२८] राज्यं प्रशासति ।
स्वयमेव स वायुश्च चन्द्रमाः सूर्य एव च[२९] ॥२२॥
अभवद् व्यास लोकेषु तपोबलसमन्वितः ।
ओषध्यः स्वयमुद्भूतास्तस्मिन् राजनि शासति[३०] ॥२३॥
विना कृष्टिं[३१] संभवन्ति सर्वलोकस्य साधिकाः[३२] ।
स एव तास्समादाय[३३] क्षरं[३४] नयति दैत्यराट् ॥२४॥
स एवामर्दयच्चापि निनाय च पुनर्गृहान् ।
स एव दण्डिकोऽभूच्च दण्डश्चैव[३५] स एव हि ॥२५॥
स एव योगात्[३६] सर्वत्र चौराद्[३७] रक्षति नित्यदा ।
न तस्य व्याधितः कश्चिन्म्रियते वापि कश्चन ॥२६॥
परदारप्रसक्तो वा पिशुनो वापि कर्हिचित् ।
हिंसका न च तस्यासन्न चाप्यधार्मिकाः क्वचित् ॥२७॥
पल्वलानि तडागानि सरित्प्रस्रवणानि च ।
विना वृष्ट्या[३८] भवन्त्येते सर्वत्रैव च सुस्थितम् ॥२८॥
न सन्ति तस्य रक्षांसि न पिशाचाश्च हिंस्रिणः ।
ईतयश्च न सन्त्यस्य न द्वन्द्वानि च कानिचित् ॥२९॥
न जुह्वते तदा वह्निं विप्रास्तस्मिँस्तु राजनि ।
नाधीयते यजन्ते वा एकवर्णमभूत्तदा ॥३०॥
भृगवो येऽभवन् विप्रा दानवानां सुदावहाः ।
अधीयते[३९] यजन्ते च एवं ते व्यास सर्वशः ॥३१॥
हृष्टपुष्टमभूत्[४०] सर्वं[४१] व्याधिदुःखविवर्जितम्[४२] ।
वर्णाश्रम[४३]परित्यक्तं सर्वलोकसमं[४४] जगत् ॥३२॥

---

२७ दुरावार - ख. । २८ इति - ख । २९ हि - ख. । ३० राज्यं प्रशासति (?) । ३१ वृष्टि - ख., कृष्टं - घ । ३२ वै कृषिः - घ, साधिका - ख. । ३३ ताम्समादाय - घ., समास्थाय (धाय) (?) । ३४ स्वयं - घ. । ३५ दण्डाच्चैव - ख. । ३६ योगान् - ख. । ३७ चौरान् - ख. । ३८ वृष्टि - घ. । ३९ अध्याय (?) - ख. । ४० पुष्टधर्स्तश्च ते - ख. । ४१ सर्वे - ख. । ४२ ...विवर्जिताः - ख. । ४३ कर्म्माश्रम (धर्मा...) - ख, वर्णाश्रय - घ । ४४ कर्मणोपस (श) मं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तन्नृत्यगीतोत्सवनित्ययुक्तं सुखप्रसुप्तं रतिकार्ययुक्तम् ।
जगद् बभौ राजनि दैत्यदेवे[४५] हिरण्यनेत्रे दितिनन्दनेति[४६] ।।३३।।

⊙ इति स्कन्दपुराणे हिरण्याक्षराज्यवर्णनो नाम पञ्चनवतितमोध्यायः ⊙

व्यास उवाच

तथा राजनि दैत्येन्द्रे त्रैलोक्याधिपतौ शुभे ।
धरण्याञ्चैव बद्धायां सुखितासु प्रजासु च ।।१।।
स्थानेभ्यश्च्याविता देवा ह्यप्रतिष्ठा महाबलाः ।
किमकुर्वत[१] दुःखार्त्ता एतन्मे[२] शंस सर्वशः ।।२।।

सनत्कुमार उवाच

शृणुष्व धर्म (?) देवानामवस्था या बभूव ह ।
यदकुर्वत[३] दुःखार्त्तास्तत्र सर्वे यथाक्रमम् ।।३।।
हव्यवाहोग्निरभवद्देवानां भागवर्द्धनः ।
तं निरस्य तदा दैत्यो वह्निमन्यं चकार ह ।।४।।
तस्मिन्कर्मणि विप्रेन्द्र मन्त्रास्तदनुगाभवन् ।
दैत्यदानवभागानां वक्तारः शुभसाधकाः ।।५।।
ततो यज्ञः स्वयं दैत्यानुपतस्थे महात्मनः ।
यज्ञे गते च दैत्येन्द्रान्देवाः सर्वे मृता इव ।।६।।
अभवन्नष्टसंज्ञाश्च मन्दवीर्यपराक्रमाः ।
निःश्रीकाश्च निरुद्योगा निराक्रन्दा समुत्सुकाः ।।७।।
मन्त्रदग्धा यथा सर्पा वज्रपिष्टा यथाचलाः[४] ।
गरुत्मताभिसन्दष्टाः पन्नगा इव निर्विषाः ।।८।।

---

४५ दैत्यनायके - घ. । ४६ दानवेन्द्रः - घ. ।
१ किमकुर्वन्त - ख. । २ एतन्नः - ख. । ३ यदकुर्वन्त - ख. । ४ इवाचलाः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विहीनाङ्घ्रि[५]र्यथा वृक्षा बान्धवैर्वापि योषितः ।
तथा ते दैवता[६] व्यास हृतराज्या हृतश्रियः ॥९॥
चिन्तयन्ति हृदा चैव शुष्यन्ति[७] विलपन्ति च ।
अथ देवः स्वयम्भूस्तान् ज्ञात्वा देवाँस्तथाविधान् ॥१०॥
विमानेनार्कवर्णेन प्रोवाचेदं पितामहः ।
भो देवा नष्टसंज्ञा स्थ किमर्थं दुःखिता भृशम् ।
तपोयोगबलं वोद्य ददामि सुरपुङ्गवाः ॥११॥
यूयं लोकस्य कर्तारो हर्तारश्चैव सर्वशः ।
न युक्तं भवतामेतत् क्लीबवत् स्थातुमद्य वै ॥१२॥
स्वीयं योगं मदीयञ्च[८] त्यक्त्वा दुःखं महाबलाः ।
प्रतिपद्यत मा शोके स्वयं देवाः प्रवर्तत ॥१३॥
न तमो भास्कराद्युक्तं न सोमादुष्णता यथा ।
नाग्नेर्यथा तुषारश्च[९] नामृतं भुजगादपि ॥१४॥
नासाधोः साधुभावश्च न कुलीनादशोभनम् ।
नाधर्मो[१०] नियमेभ्यश्च न वेदेभ्यश्च दुर्मतिः ॥१५॥
तथा न युक्तं युष्माकमिदं देवा[११] महात्मनाम् ।
आपत्सु न[१२] विषीदन्ति ये केचित्तेजसा[१३] स्थिताः ॥१६॥
ते[१४] यूयमापदं प्राप्य न शोकं कर्तुमर्हथ ।
मा भवन्तोवसीदन्तु राज्यं भूयो भविष्यति ॥१७॥
महायोगबलोपेतो हिरण्याक्षोद्य देवताः ।
अशक्यो हन्तुमल्पेन तेजसा दितिनन्दनः ॥१८॥
प्रतीक्षन्तु[१५] भवन्तोस्य तपसः क्षयमव्ययाः ।
क्षीणे तपसि दैत्येन्द्रं युद्धे[१६] विष्णुर्वधिष्यति[१७] ॥१९॥

---

५ विशाखाभि - घ. । ६ देवता - ख । ७ मुह्यन्ति - घ. । ८ स्वयं - घ., ...स्तथा यो धर्म - ख. ।
९ नाग्ने स्तुषारश्च यथा - ख. । १० नाधर्मा - ख. । ११... मिमं देवा - ख., देवानां च - घ. । १२ च - ख. ।
१३ ...तेजसि - घ. । १४ ये - ख. । १५ प्रतीक्षन्तां (?) । १६ युधि - घ. । १७ ...हंनिष्यति - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

त एवं ब्रह्मणा प्रोक्ता लब्धयोगा:[१८] सुरेश्वरा: ।
प्रणम्य सर्वभूतानां स्रष्टारमिदमब्रुवन्[१९] ॥२०॥
हृतानि नो महायोगस्थानानि दितिनन्दनै: ।
क्व तिष्ठाम वयं ब्रूहि दिश न: स्थानमव्ययम् ॥२१॥

ब्रह्मोवाच

हृतानि सर्वस्थानानि युष्माकं विदितञ्च[२०] मे ।
शृणुध्वं यत्र वस्तव्यं[२१] युष्माभिर्योगमायया ॥२२॥
यूयं सर्वे शरीरेषु[२२] योगाद् विशत[२३] सत्तमा: ।
प्रजानां सर्वतो देवास्ततो वृत्तिमवाप्स्यथ ॥२३॥
तेषा[२४]मशितपीतैश्च संस्कारैश्च पृथग्विधै: ।
पृथिवी नागवद्धापि[२५] युष्मानाप्याययिष्यति ॥२४॥

सनत्कुमार उवाच

त एवमुक्ता[२६] देवेन देवा: सर्वे[२७] सवासवा: ।
तथा चक्रुर्यथोवाच ब्रह्मा लोकपितामह: ॥२५॥
तेवर्तयन्त सततं तत्रस्था: सुरसत्तमा: ।
चतुर्युगमुपासन्तो[२८] लोकधातुर्मते स्थिता: ॥२६॥
अथ योगाद् हिरण्याक्ष: प्रजासु समवास्थितान्[२९] ।
सुरानपश्यद्योगात्मा चुक्रोध[३०] च स[३१] तान्प्रति ॥२७॥
यस्मिन्यस्मिन्नपश्यच्च सुरं स समवस्थितम्[३२] ।
अवधीत्तं तमभ्येत्य तदा दानवसत्तम: ॥२८॥

---

१८ प्रोक्तं - ख, लब्ध्वा योगं (?) । १९ मन्नवीत् - ख । २० विदितस्य - ख. । २१ वक्तव्यं - ख ।
२२ सर्वशरीरे - ख., मे - घ. । २३ नमत - ख. । २४ तासा (?) । २५ चावकल्पैश्च - घ. ।
२६ तदेवमुक्त्वा - ख. । २७ सर्वे देवा: - ख. । २८ ...मुपासन्त - ख. । २९ समुपस्थितान् - घ. ।
३० चुकोप - ख. । ३१ स च - ख. । ३२ समममवस्थितम् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अहं प्रजाः सदोद्युक्तो रक्षामि सततं भयात् ।
ममैव ता दुराचारा विद्विषो वर्धयन्त्युत ॥२९॥
कृतघ्नाः स्वामिघातिन्यो दुष्पूरा दुष्टचेतसः[३३] ।
मम शत्रूनिमा दुष्टा[३४]नन्नपानादिभिस्सदा ॥३०॥
आप्याययन्ति दुर्वृत्ता दण्डार्हा मे ततस्तु ताः[३५] ।
- - - - - - - - - - - - - - - - - - - ।
यत्र तत्र गताःसर्वाः[३६]प्रजाः सर्वत्र सोवधीत् ॥३१॥
पल्वलानि तडागानि नदीः प्रस्रवणानि च ।
सर्वाण्येव तदा योगादशोषयत[३७] दानवः ॥३२॥
ओषध्योकृष्टपच्याश्च या ह्यासँस्तस्य सुव्रत ।
व्यनाशयत् स ताश्चापि वृक्षवल्लीरपोथयत्[३८] ॥३३॥
तन्नष्टवृक्षक्षुपवल्लिपल्लवं तृणौषधीप्रस्रवणोदकाशयम्[३९] ।
सरि[४०]त्तडागावटशुष्कपल्वलं जगद् बभौ कच्छपपृष्ठसन्निभम् ॥३४॥
प्रणष्टवर्णाश्रमधर्मसंयमं विनष्टघोषव्रजपक्षिमानुषम्[४१] ।
द्विपाश्वपत्त्यादिगणैर्विनादितं[४२]युगान्तकालाग्निमुदग्रवज्जगत्[४३] ॥३५॥

⊙ इति स्कन्दपुराणे ब्रह्मणो वाक्यं नाम षण्णवतितमोध्यायः ⊙

सनत्कुमार उवाच

तथाभूतं जगद् दृष्ट्वा देवास्ते दुःखपीडिताः ।
वैराजं लोकमासाद्य भूयोपश्यन् पितामहम् ॥१॥
ते[१] सर्वे समुपागम्य प्रणम्य च पुनः पुनः ।
ऊचुस्ते[२] कर्म दैत्यस्य सर्वमेव[३] सुदुःखिताः ॥२॥

---

३३ दुष्टचेतसा - ख. । ३४.. न्दृष्ट्वा - ख. । ३५ ततस्ततः - ख, ततस्त्विति (?) । ३६ सर्वे - ख. ।
३७ योगादपोथयत - घ. । ३८... रशोषयत् - ख । ३९ ... पल्लवं तथौषधीप्रस्रवणोदकाशयम् - ख. ।
४० शुष्यत् - (?) । ४१ धर्मशंयमम् - घ. । ४२...श्व ह्य क्षादिगणैर्विनादितं(?) - ख. । ४३ मिसुर... - ख. ।

१ तं (?) । २ ...स्तत् - (?) । ३ सर्वं एव - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

निवेद्य च पुनर्देवमूचुस्ते लोककारणम् ।
भगवन् हृतराज्याश्च दुर्बलाश्च तथा विभो ।।३।।
असमर्था वयं तस्य स्थातुं दैत्यस्य संयुगे[४] ।
न च स्थानं[५] प्रपश्यामो[६] यत्र तिष्ठाम विज्वराः ।।४।।

सनत्कुमार उवाच

तेषां तद्वचनं श्रुत्वा भीतानां त्रिदिवौकसाम् ।
उवाच भगवान् ब्रह्मा सर्वानेव दिवौकसः ।।५।।
न भेतव्यं सुरास्तस्य योगिनः सुमहात्मनः ।
समाप्तं तपसः सर्वं फलं दैत्यस्य तस्य तत् ।।६।।
कालस्तस्याभिसंप्राप्तो जीवितान्तकरः सुराः ।
तस्मात् सर्वे मया सार्धं यात विष्णुं प्रयाचत ।।७।।
भवन्तो निर्बला ह्यद्य[७] अशक्तास्तस्य बाधने ।
विष्णुः शक्तः स तं दैत्यं जीविताच्च्यावयिष्यति ।।८।।
पूर्वं हि जाते तस्मिँस्तु वागुवाचाशरीरिणी ।
नायं वध्यो मनुष्यस्य न देवस्य कथञ्चन ।।९।।
नापि तिर्यक्षु जातस्य[८] न भूमौ न च तेजसि ।
नाकाशे नापि लोकेषु महात्मायं भविष्यति ।।१०।।
स एष देवा दैत्येशो महात्मा धार्मिकस्तदा[९] ।
अवध्यः सर्वभूतानां[१०] वध्यो दुःखाद् भविष्यति ।।११।।
वाराहं रूपमास्थाय न दैवं नापि मानुषम्[११] ।
न च तिर्यक्षु तज्जातं नरवाराहमस्ति वै ।।१२।।
पाताले च प्रविश्यैव नासौ[१२] भूर्नापि खं हि तत् ।
न तेजो नापि लोकोऽसौ सर्वतो मुक्तमेव[१३] तत् ।।१३।।

---

४ संयुगे स्थातुमग्रतः - घ. । ५ संस्थानं - ख. । ६ प्रपश्याद्य - ख. । ७ सर्वे - घ. । ८ न पितृयक्षराजस्य - घ. ।
९ .. स्तथा (?) । १० अपत्यमिव भूतानां - ख. । ११ न देवत्वं न मानुषम् - ख., न तु मानुषम् - घ. ।
१२ नादो (?) । १३ युक्तमेव - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

ततस्ते हृषिताः सर्वे प्रणम्य च पितामहम् ।
ऊचुर्गच्छाम देवेश कालोतिक्रमते हि नः[१४] ॥१४॥
ततस्ते सर्व एवैत्य श्वेतं पर्वतसत्तमम्[१५] ।
विष्णुं सहिष्णुं जिष्णुञ्च दानवायुतमर्दनम् ॥१५॥
अस्तुवन् वाग्भिरिष्टाभिः प्रणम्य बहुमानतः ।
नमः सर्वरिपुघ्नाय दानवान्तकराय च ॥१६॥
नमोजिताय देवाय वैकुण्ठाय महात्मने ।
नमो निर्धूतरजसे नमः सत्याय चैव हि[१६] ॥१७॥
नमः साध्याय देवाय नमो धाम्ने सुवेधसे[१७] ।
नमो यमाय देवाय जयाय च नमो नमः ॥१८॥
नमश्चादितिपुत्राय नरनारायणाय च ।
नमस्सुमतये चैव नमश्चैवास्तु विष्णवे ॥१९॥
नमो वामनरूपाय कृष्णद्वैपायनाय च ।
नमो रामाय रामाय दत्तात्रेयाय वै नमः ॥२०॥
नमस्ते नरसिंहाय[१८] धात्रे चैव[१९] नमो नमः ।
नमः साध्याय वेदाय चक्रिणे वै नमो नमः ॥२१॥
नमः शकुनिहन्त्रे[२०] च नमो दामोदराय च ।
सलिले तप्यमानाय नागशय्याप्रियाय च ॥२२॥
नमः कपिलरूपाय महते पुरुषाय च ।
नमो जीमूतरूपाय महादेवप्रियाय च ॥२३॥
नमो रुद्रार्धरूपाय[२१] तथोमारूपिणे नमः[२२] ।
चक्रमुद्गरहस्ताय महेश्वरगणाय च ॥२४॥

---

१४ कालोतिक्रामते - ख, ...तिक्रमतीह नः - घ. । १५ श्वेतपर्वतसत्तमम् - ख. । १६ ह - ख. ।
१७ च वेधसे - घ, सुमेधसे (?) । १८ नारसिंहाय - घ. । १९ ऋतवे च - घ. । २० शत्रुनिहन्त्रे - घ. ।
२१ रतार्धरूपाय - घ. । २२ तथा दामोदराय च - घ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शिपिविष्टाय च सदा नमः श्रीवत्सधारिणे ।
धुन्धुमाराय शूराय मधुकैटभघातिने ।।२५।।
चतुर्भुजाय कृष्णाय रत्नकौस्तुभधारिणे ।
त्रिविक्रमवियत्स्थाय पीतवासःसुवाससे ।।२६।।
नमः पुरुषघाताय गदाखड्गोग्रधारिणे ।
योगिने यजमानाय भृगुपत्नीप्रमाथिने ।।२७।।
वृषरूपाय सततमादित्यानां वराय च ।
चेकितानाय दान्ताय शौरिणे वृष्णिबन्धवे[२३] ।।२८।।
मुराश्वग्रीवनाशाय[२४] तथैवासुरसूदिने ।
नमस्ते शार्ङ्गधनुषे सौभशाल्वविघातिने ।।२९।।
नमस्ते पद्मनाभाय ब्रह्मदेहप्रवेशिने[२५] ।
नमो जयाय शर्वाय रुद्रदत्तवराय च ।।३०।।
नमः सर्वेश्वरायैव नष्टधर्मप्रवर्तिने ।
पुरुषाय वरेण्याय नमस्ते शतबाहवे ।।३१।।
तव प्रसादात् कृच्छ्रं वै[२६] तरामः पुरुषोत्तम ।
हृतराज्या वयं सर्वे न त्वं वेत्सि महाभुज ।
हिरण्याक्षेण वैकुण्ठ तं नाशय महाभुज ।।३२।।

सनत्कुमार उवाच

य इदं वैष्णवं स्तोत्रं भक्त्या परमया युतः ।
कीर्तयेत्सततं मर्त्यः सर्वपापैः प्रमुच्यते ।।३३।।
मृतश्च सर्वलोकेषु वर्षकोटिचतुर्दश ।
पूजितः सर्वदेवैश्च मोदते नात्र संशयः ।।३४।।
कीर्तयत्येव य इमं प्राणिभ्यो विप्रमुच्यते ।
स मृत्युलोकमप्राप्य चरते दुःखवर्जितः ।।३५।।

---

२३ गोवृष्णिबान्धवे - घ. । २४ पुराश्वग्रीवनाशाय - ख. । २५ ...थ देशिने - ख., इतः परं पत्रमेकं ? खण्डितम् खपुस्तके । २६ व - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

- ।
उवाच सुरशार्दूलानिदं संपूजयन्सदा ।।३६।।
इतः स दैत्यो दुर्बुद्धिर्देवान् द्वेष्टि सहायवान् ।
क्रियतां मर्त्यरूपं मे वाराहं मां विधार्यताम् ।।३७।।
महात्मा स च दैत्येन्द्रो बलवान् धार्मिकश्च ह ।
न च शक्यो मयैकेन हन्तुं सत्यं ब्रवीमि वः[२७] ।।३८।।
सर्वदेवमयं रूपं वाराहं[२८] नन्दिवर्धनम् ।
तत्समास्थाय हन्तास्मि दैत्येन्द्रं तं महाबलम् ।।३९।।
तेन रूपेण सर्वेषामस्माकं देवसत्तमाः ।
ब्रह्मा ब्रह्मत्वमापन्नः प्रस्थाता यम इत्यपि ।।४०।।
उद्गाता तत्र वरुणो हिरण्याक्षस्ततः पशुः ।
शमिताहं सुरश्रेष्ठा यशस्तस्य महाबलः ।।४१।।
अद्य पश्यन्तु भूतानि मम तस्यैव चोभयोः ।
- ।।४२।।
अरण्ये वासिताहेतोर्मत्तयोर्गजयोरिव ।
तस्य तद्वचनं श्रुत्वा गर्जितं च महात्मनः ।।४३।।
हर्षोत्फुल्लेक्षणाः सर्वे निरीक्षन्तः परस्परम् ।
मेनिरे हत इत्येव दैत्येन्द्रं सुमहाबलम् ।।४४।।
तेषां तदुत्फुल्लकुशेशयप्रभं वक्रेक्षणं[२९] चारुतरावभासकम् ।
हतः स दैत्यो नरसिंहरूपिणा यथा पुरा तस्य गुरुर्महाबलः ।।४५।।

⊙ इति स्कन्दपुराणे हिरण्याक्षवधोपायो नाम सप्तनवतितमोध्यायः ⊙

---

२७ ते - ख. । २८ वराहं - घ. । २९ चक्रेक्षण - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

अथ ते सुरशार्दूलास्तस्य रूपं प्रचक्रिरे ।
- - - - - - - - - - - - - - - - - - - ।
सप्तलोकमयं तस्य शरीरं चक्रुरीश्वराः ॥१॥
अस्थीनि पर्वताः सर्वे नद्यो[1] नाड्यश्च तस्य तु ।
रुधिरं चाब्धयः[2] सप्त कफपित्तानिला गुणाः[3] ॥२॥
पुरीषं चाप्योषधयो धर्मो रेतः[4] कृतोस्य तु ।
मूत्रं तस्याभवन्मेघा वायवः सप्त कोष्ठगाः ॥३॥
शिरस्तस्याभवन् साध्या रुद्रो मूर्धानमास्थितः(?) ।
ललाटे तस्य धर्मोभूत् नासिका वायुरात्मवान् ॥४॥
सूर्याचन्द्रमसौ नेत्रे श्रोत्रे तस्य दिशोभवन् ।
भ्रुवोस्तस्याभवन् प्राणा अहोरात्रं च पक्ष्मणी[5] ॥५॥
आस्यं तस्याग्निरभवत्[6] वडवा मुखसंस्थिता ।
ओष्ठेभूदन्तरिक्षं च दन्ताश्च भुजगाभवन् ॥६॥
चत्वार्यस्त्राणि दंष्ट्राश्च कृतानि सुमहान्ति वै ।
अस्त्रं पाशुपतं पूर्वं द्वितीयं चक्रमेव च ॥७॥
ब्रह्मदण्डं[7] तृतीयश्च चतुर्थं ब्रह्मणः शिरः ।
ग्रीवा तस्याभवत्सोमो रुद्रः स्कन्धे च संस्थितः ॥८॥
गण्डे चापि तथादित्या हस्तौ[8] रुद्रैश्च निर्मितौ ।
अंगुल्यस्तस्य कीर्तिश्च लक्ष्मीः सिद्धिस्तथैव च ॥९॥
- - - - प्रवृत्तिश्च[9] नखाश्चास्त्राणि सर्वशः ।
यमदण्डः कालदण्डो मृत्युदण्डस्तथैव च ॥१०॥
रुद्रदण्डश्च चत्वारो बाहुपादाः[10] कृताः प्रभोः[11] ।
साध्या देवा उरस्तस्य हृदयं सोम इत्यपि ॥११॥

---

१ वशा - घ. । २ चान्तराः - घ. । ३ गुणं - घ. । ४ चेतः - घ. । ५ पक्षिणी - घ. । ६ तदग्निरभवत् - घ. । ७ ब्रह्मदत्तं - घ. । ८ हनू (?) । ९ प्रवृत्तिश्च निवृत्तिश्च (?) । १० वाहृपादाः - घ. । ११ प्रभुः - ख, ...वतु - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

उदरं तस्य भूतानि महान्ति ऋषिसत्तम[१२] ।
नाभिस्तस्याभवन्माता अदितिर्ब्रह्मसत्तम ।।१२।।
शिश्नं प्रजापतिस्तस्य मित्रोपानेऽभवत् स्थितः ।
वसवस्तस्य पार्श्वेषु तथा धर्मश्च पृष्ठतः ।।१३।।
मृत्युः कालो यमश्चैव हस्तपादतलाश्रिताः[१३] ।
अश्विनौ तस्य लाङ्गूलं पितरः सन्धिषु स्थिताः ।।१४।।
नियतिः कालपाशश्च[१४] कृतान्तकलहावपि ।
व्याधयश्चापि ये केचिद् दृष्टिं तस्य समाश्रिताः ।।१५।।
यक्षाश्च राक्षसाश्चैव गन्धर्वाः पन्नगैः सह[१५] ।
सर्वे त्वचं समाश्रित्य संहताः[१६] समवस्थिताः ।।१६।।
तथा सर्वाणि छन्दांसि वेदा इष्टय एव च ।
रोमकूपेषु सर्वाणि तानि तस्थुः पृथक् पृथक् ।।१७।।
दानानि नियमाश्चैव यमाः सर्वाश्च मातरः ।
स्थानाभिमानिनो देवाः पशवः पक्षिणश्च ह ।।१८।।
सर्वे रोमाणि तस्यासन् वराहस्य महात्मनः ।
अङ्गुल्यस्तस्य पादाभ्यां विश्वेदेवाभवँस्तथा[१७] ।।१९।।
भृगवोऽङ्गिरसश्चैव देवास्तस्याभवंस्तदा ।
रोमान्तरेषु ऋषयः सर्वेष्वङ्गेषु संस्थिताः ।।२०।।
एवं समभवद् व्यास वराहो नन्दिवर्धनः ।
स भाति तेन रूपेण द्यां भुवञ्चापि संस्पृशन् ।।२१।।
पुरा स्वयंभूर्भगवानुद्धरिष्यन् महीमिमाम् ।
स रेजे तेन रूपेण दीप्तिमान् मधुसूदनः ।।२२।।
निशायां संप्रदीप्तो हि हिमवानिव पर्वतः ।
ततस्तमृषयस्सर्वे तपसा महता तदा ।।२३।।

---

१२ ऋषिसत्तमाः - घ., ऋषिसत्तमः - ख. । १३ गन्धर्वाः पन्नगैः सह - घ. । १४ कालसङ्घश्च - ख. ।
१५ यमाः सर्वाश्च मातरः - ख. । १६ तत्र सर्वे ...त्वांगुराः - घ. । १७ ...स्तदा - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्वेन स्वेनाभिसंप्राप्य तेजस्तस्याभ्यदीपयन् ।
स विष्णुस्तेजसा तेषामृषीणां परमौजसाम् ॥२४॥
संप्रजज्वाल कालान्ते युगान्ताग्निरिवापरः ।
नादं कृत्वा च सुमहच्चालयानो महीतलम्[१८] ॥२५॥
उवाच तान् ऋषीन्सर्वान् हन्मि दैत्यं सुरद्विषम् ।
हत्वा तं दैत्यराजं वै सिंहं शरभराडिव ॥२६॥
मोचयिष्ये महीं विग्नां[१९] प्रविश्याद्य रसातलम् ।
स्वस्थाने स्थापयित्वा च दत्वा राज्यं दिवौकसाम् ।
जपध्वं विजयायाद्य शिवाय च तपोधनाः ॥२७॥

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा ब्रह्मा लोकपितामहः ।
उवाच बलमाधत्स्व दैत्योसौ सुमहाबलः ॥२८॥
आस्थाय यत्नं सुमहदप्रमत्तः सुरेश्वर ।
जहि तं दैत्यराजं वै कृच्छ्रमेतन्मतं मम ॥२९॥
न तस्य सदृशो दैत्यो हिरण्यकशिपुः पुरा[२०] ।
महाबलोयं दैत्येन्द्रस्तपोयोगसमन्वितः ॥३०॥
ततो देवस्तदा व्यास भगवान् गोवृषध्वजः ।
सुरैः सब्रह्मकैस्तत्र ऋषिभिश्च तपोधनैः ॥३१॥
उक्तः प्रणम्य देवेशो विष्णुमाप्यायय प्रभो ।
तेजसा स्वेन सर्वेश यथा हन्यात् सुरद्विषम् ॥३२॥

[२१]भगवानुवाच

तस्मिन् काले सुरेशानाः[२२] सर्वे[२३] तेजोमयं[२४] हरिम् ।
प्रवेक्ष्यन्ति[२५] ततो दैत्यं क्षिप्रमेव निहंस्यति ॥३३॥

---

१८ महीमिमां - ख. । १९ विप्रां - ख. । २० सुराः - ख. । २१ श्री - घ. । २२ सुरेशाना - ख. ।
२३ सर्व - ख, सर्वं - घ । २४ महद् - घ. । २५ प्रवेक्ष्यति - ख ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

ततो ब्रह्मा स्वयं तस्य रक्षां चक्रे महात्मनः ।
यथावत्तां निबोधाद्य वदतो मे शुचिव्रत ।।३४।।

ब्रह्मोवाच

रक्षन्तु त्वां विधाता च धाता च ऋषिसत्तम[२६] ।
रुद्रः स्रष्टा च सर्वेषां कर्माणि तव युध्यतः ।।३५।।
कपाली तालकेतुश्च गन्धाधिपतिरेव च ।
रसस्याधिपतिश्चैव सूक्ष्मरूपश्च रक्षतु ।।३६।।
स्पर्शवेत्ता च यः सूक्ष्मो नादवाँश्च[२७] महामनाः ।
इन्द्रियाधिपतिश्चैव नीललोहित एव च ।।३७।।
रक्षतु त्वां महायोगी बीजाधिपतिरेव च ।
बीजाधिष्ठानमालश्च चेतनापतिरेव च ।।३८।।
प्रवृत्तेश्च निवृत्तेश्च कालवेत्ता च यः प्रभुः ।
धर्माधर्मगतिश्चैव कर्तॄणां फलदः प्रभुः ।।३९।।
गुणानां वृत्तिदो यश्च अनपेक्षश्च कर्मसु ।
नियमस्य च यः कर्ता कर्मवेत्ता च कर्मणाम्[२८] ।।४०।।
विना च करणैर्यश्च[२९] करणार्थं प्रवर्तते ।
सर्वज्ञः सर्वगो यश्च[३०] अधिष्ठाता च यः स्वयम् ।।४१।।
येन नाधिष्ठितं किञ्चित् कथञ्चिन्नापि[३१] विद्यते ।
सर्वतः पाणिपादान्तः सर्वतोक्षिशिरोमुखः ।
सर्वतः श्रुतिमाँश्चैव सर्वतोगतिरव्ययः ।।४२।।
ऐश्वर्यमक्षयं यस्य[३२] सहस्राकृतयस्तथा[३३] ।
यः स्रष्टा सर्वभूतानां तत्वानाञ्च महायशाः ।।४३।।
संसारस्यास्य यः कर्ता[३४] तथैव च[३५] निवर्तकः ।
यं सांख्या नाभिजानन्ति योगिनो विदितागमाः ।।४४।।

---

२६ ऋर्षिभिस्ततः - घ., ऋर्षिभिः स्तुतः - ख. । २७ देवतांश्च - ख. । २८ यः प्रभुः - घ. ।
२९ यस्य - ख. । ३० सर्वगोपश्च - ख. । ३१ कथञ्चिदपि - ख. । ३२ तस्य - ख. ।
३३ स ... कृतस्तथा - ख. । ३४ संसारस्यापकर्ता स - घ. । ३५ तथा चैव - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तुष्टयो ज्ञातयो नित्यं मायया मोहयन् प्रजाः ।
ओतप्रोतानि चैतस्मिन्[३६] तत्त्वानि सुमहात्मनि[३७] ॥४५॥
पुरुषादीनि सर्वाणि यो व्याप्तश्च न केनचित् ।
यमज्ञात्वा नमोक्षोस्ति येन बद्धमिदं जगत् ॥४६॥
येनाहं सर्वलोकानां कृतः पूर्वं प्रजापतिः ।
त्वं यज्ञश्चैव विष्णुश्च येन सृष्टाः[३८] पुरातन ॥४७॥
स ते बलञ्च सुमहदूर्ज्जं तेजश्च यच्छतु ।
अकामलब्धां सर्वत्र स्मृतिं चास्त्रे महामनाः ॥४८॥
रक्षां च सर्वगो देवो युध्यतस्ते प्रयच्छतु ।
कृतरक्षो मया सम्यग्गच्छ दैत्यं विनाशय ॥४९॥

सनत्कुमार उवाच

ततस्तं स्तुतिभिर्विप्रास्तस्य रोमान्तरस्थिताः ।
अस्तुवन् वाग्भिरिष्टाभिर्देवाश्च बहुमानतः ॥५०॥
सर्वाणि च जयेत्यूचुर्भूतानि विविधानि च ।
अनाहतास्ततो व्योम्नि देवदुन्दुभयः शुभाः ॥५१॥
विनेदुस्तत्र दिव्याश्च वराहो यत्र सोभवत् ।
सुरभीणाञ्च पुष्पाणां वराहोपरि सर्वतः ।
वृष्टयः पेतुरत्यर्थं देवानां हर्षवर्धनाः ॥५२॥
ततः सिद्धिरिति प्रोच्य[३९] कृत्वा रुद्राय वै नमः ।
जपञ्जयावहं रुद्रं स ययौ[४०] वरुणालयम् ॥५३॥
स सेव्यमानो मुनिभिस्तपोधनैस्तथा शकुन्तैर्बहुभिर्जयावहैः ।
मृगैश्च दिव्यैर्बहुभिः प्रदक्षिणैर्जयाय देवः प्रययौ महार्णवम् ॥५४॥

⊙ इति स्कन्दपुराणे वराहस्य वरुणालयगमनं नामाष्टनवतितमोध्यायः ⊙

---

३६ ये तस्मिन् - ख. । ३७ सुमहात्मना - ख. । ३८ सृष्टौ (?) । ३९ प्रोक्त्वा - ख. । ४० प्रययौ - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

स संप्रयातो धर्मात्मा नर्दमानो यथा घनः ।
सर्वलोकमयो देवो वराहो नन्दिवर्धनः ॥१॥
अपश्यत् सागरञ्चैव संप्राप्यातिबलस्तदा ।
नर्दमानं यथा मेघं लीयमानं मृगेन्द्रवत् ॥२॥
नर्तकीमिव नृत्यन्तं बल्गन्तं चैव योधवत् ।
मण्डलैर्बहुभिश्चित्रैश्चरन्तं वसुधां तथा ॥३॥
नियुद्धकुशलं यद्वद् गदायुद्धविशारदम् ।
तदा तद्बहुधा चित्रमपश्यन्नन्दिवर्धनः ॥४॥
स तमर्घेण देवेशं सर्वलोकमयं विभुम् ।
पूजयामास देवाँश्च ऋषयो ये च संगताः ॥५॥
स जयाय प्रगृह्यैन[1]मनुमान्य महोदधिम् ।
निवर्त्य सर्वभूतानि[2] प्रविवेश महार्णवम् ॥६॥
विगाहमानः सक्रीडमर्णवं विबभौ विभुः ।
सरः सुमहदासाद्य यथा मत्तो महागजः ॥७॥
संप्रविश्य सुदूरञ्च सोदृश्यः समपद्यत ।
भूमिलेखावृतः[3] सूर्यो यथा संपूर्णमण्डलः ॥८॥
ततोन्तर्जलमाविश्य क्षोभयाणो महार्णवम् ।
जलचन्द्रकवद् व्यास अदृश्यत स लोकपैः ॥९॥
तिमिन्तिमिङ्गिलञ्चैव तिमिङ्गलगिलानपि ।
तथैव[4] तद्गिलानन्यान् गर्दभान् हस्तिनो ह्यपि ॥१०॥
मकराँश्चैव शंखाँश्च तथैवाश्वमुखानपि ।
तथा वै पक्षिसंकाशान् मानुषानपि चापरान् ॥११॥
रथचक्रप्रकाराँश्च सिंहव्याघ्रमुखानपि ।
शरभर्क्षविडालास्यान् मत्स्यान्बहुविधाँस्तथा ॥१२॥

---

१ प्रगृह्णे ... - ख. । २ निर्वृत्त्यै सर्बभूतानां - घ. । ३ धूमिलेखावृतः - घ. । ४ तथा वै - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

भ्रामयन्सुमहातेजा जगाम सुमहाबलः ।
कुतूहलात्तमाविश्य[५] केचिदाघ्राय चैव हि ॥१३॥
दशन्ति मत्स्या दीप्तास्याः शतशोथ सहस्रशः ।
स प्रदक्षिणमावृत्य दिव्यं हयशिरः शुभम् ॥१४॥
क्षणान्मैनाकमध्येन गत्वा भोगवतीमपि ।
वरुणस्य पुरीं गत्वा पयोनाथस्य धीमतः ॥१५॥
पर्जन्यं दिग्गजं प्राप्य कृत्वा चापि प्रदक्षिणम् ।
सुरभीपुरमासाद्य गा दृष्ट्वा[६] चैव सुप्रभाः[७] ॥१६॥
याः क्षरन्ति सदा व्यास सुधाममृतमेव च ।
क्षीरोदं तत्सरो दिव्यं फेनपा यत्र ते द्विजाः ॥१७॥
तस्मिन् सरसि तत् पीत्वा यशोमृतसमप्रभम् ।
पूजितः फेनपैः सम्यक् तां रात्रिं तत्र सोवसत् ॥१८॥
उषित्वा तत्र सोगच्छत् कङ्कस्य पुरमव्ययम् ।
वासुकेश्च पुरं प्राप्य तक्षकस्य च धीमतः ॥१९॥
तत्र[८] शेषस्य देवेशो विन्दतामरतामिति[९] ।
रम्यां मनोज्ञां दिव्याञ्च स्वर्गादपि च तां वराम् ॥२०॥
श्रुत्वानन्तश्च तं राजा[१०] अर्घेण समपूजयत्[११] ।
प्रणम्य बहुमानाच्च उपामन्त्रयदव्ययः ॥२१॥
तं पूजयानं मधुहा प्रीत्या परमया युतः ।
उवाच लोककार्यस्य न विघ्नं कर्तुमर्हसि ॥२२॥
महत्कार्यमिदं देव कर्तव्यं त्रिदिवौकसाम् ।
भूयो वयं त्वया सार्धं करिष्याम यदीच्छसि ।
मा च कालोयमुद्युक्तो दैत्यस्य न भवेदिति ॥२३॥

---

५ कुतूहलात्समाविश्य - ख. । ६ गांदृष्ट्वा - ख. । ७ सुप्रभां - ख. । ८ ततः - घ. । ९ विदिता - ख., विदतां रमनीमिति - घ. । १० ज्ञात्वा - घ. । ११ च स पूजयत् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

ततो विसृज्य तं नागं रसातलमुपागमत् ।
तत्र सागरपो[१५] दैत्यः सुप्रभोन्तर्जलेचरः ॥२४॥
अपश्यत्तं तदायान्तं हिरण्याक्षपुरं प्रति ।
गात्रेषु देवान्सूक्ष्मांश्च वराहस्यान्ववैक्षत ॥२५॥
तस्मिन्तच्चास्य रूपेण भयान्नैनमुपागमत् ।
तेजसा चापि विष्टब्धो दुरात्मा तस्य सोसुरः ॥२६॥
आवेदयिष्यन्तस्मै हि हिरण्याक्षाय सत्वरम्[१६] ।
चक्रे वेगं प्रतिपुरं वराहस्य तदाग्रतः ॥२७॥
स यातुकामो[१७] दितिजाधिराजं वराहरूपं तमनन्तमन्तकम् ।
जगाम[१८] दैत्याय स जीवितान्तं यथानिलः प्रच्युतदानमाल्यवान् ॥२८॥

⊙ इति स्कन्दपुराणे वराहस्य सागरप्रवेशो[१९] नामैकोनशततमोध्यायः ⊙

सनत्कुमार उवाच

तस्मिन्भये समापन्ने विनाशभयसूचकाः ।
हिरण्याक्षपुरे घोरा उत्पाता ह्यभवन् तदा ॥१॥
अट्टालका विशीर्यन्ते देवताश्चाहसन्निव ।
शिवा नदन्ति दैत्यानां गृहेषु च सभासु च ॥२॥
अकस्माच्चाभवत्तत्र पौराणां भैरवो रवः ।
पादपाश्च विना वातं पतन्त्युन्मूलिता भुवि ।
भास्करश्च[१] कबन्धाभो[२] युद्धञ्चाप्यत्र दृश्यते ॥३॥

सनत्कुमार उवाच

एतान्यन्यानि च तदा निमित्तानि महान्ति च ।
संलक्ष्य राजा दैत्यानामसुरानिदमब्रवीत् ॥४॥

---

१५ सागरको - ख. । १६ सो त्वरन् - ख. । १७ हन्तुकामो - घ. । १८ जगाद (?) ।
१९ वराहगमनाध्यायः - घ. ।
१ भास्कराश्च - ख. । २ कबन्धान्धो - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

निमित्तान्यभि[३] लक्ष्यन्ते महान्त्यसुरपुङ्गवाः ।
नैव[४] तान्यनिमित्तानि दृश्यते च भयं महत् ॥५॥
हृतराज्याश्च देवेशा न ते स्थास्यन्ति निष्क्रियाः ।
नूनन्ते किञ्चिदाश्रित्य कुर्वन्ति समरं प्रति ॥६॥

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा प्रह्लादोसुरसत्तमः ।
प्रणम्य पितरं सम्यगिदं वचनमब्रवीत् ॥७॥

प्रह्लाद उवाच

सुतोहं तव दैत्येन्द्र पिता त्वं मम धर्मतः ।
न तवास्मद्विधैर्बुद्धिराधेया दैत्यसत्तम ॥८॥
तथापि तु वयं प्रीत्या इच्छन्तो राज्यमक्षयम् ।
वक्ष्यामो बालभावेन तन्न[५] संस्मर्त्तुमर्हसि ॥९॥
अद्य रात्रौ मया स्वप्ने दृष्टोसौ नररूपवान् ।
वराहरूपं संगत्य भवन्तं निगृहीतवान् ।
न तथा तद्यथा स्याद्धि तथा त्वं सम्यगाचर ॥१०॥

हिरण्याक्ष उवाच

एवमेतन्न सन्देहो भवान्यद्धर्मतस्तदा[६] ।
दृष्टवाँस्तद्यथातत्त्वमेवमेतन्न संशयः ॥११॥
अहमद्य गतः[७] स्वप्ने त्र्यम्बकस्य निवेशने ।
ततः स[८] मामिदं प्राह भगवान् गोवृषध्वजः ॥१२॥
एतावद् भवतो दैत्य राज्यमिन्द्रत्वमेव च ।
यच्छेमां[९] त्वं प्रियां[१०] पुत्र सहयक्षाय सुप्रभाम् ॥१३॥
क्षिप्रमेतां प्रयच्छाद्य मुकुटं हारमेव च ।
केयूराङ्गदकं चैव खड्गं रुचकमेव च ॥१४॥

---

३ निमित्तान्यपि - ख. । ४ तानि - ख । ५ तन्नः - ख. । ६ भगवान्धर्मतस्सदा - ख. । ७ ततः - ख. ।
८ नतम्म (म्स?) - ख. । ९ यच्छैनां - ख । १० प्रियं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कटके शासनञ्चैव दुकूलञ्च तथोतरीम् ।
अनिच्छतो मे[११] संगृह्य शक्रस्य प्रददौ तदा ॥१५॥
ततो मां भगवानाह मत्समीपे त्वया सदा ।
कल्यं[१२] प्रभृति वस्तव्यं किन्ते[१३] राज्येन दैत्यप ॥१६॥
यदेतद्धि मया दृष्टं न तन्मिथ्या[१४] भविष्यति ।
सर्वथा नास्ति[१५] दैत्यानां सयैकेन भवं त्विह[१६] ॥१७॥

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा दैत्याः सर्वे तदाब्रुवन् ।
मिथ्यैतत् स्वप्नगतयो मिथ्या राजन् प्रकीर्तितताः ॥१८॥
अन्धकः सहितोस्माभिर्योत्स्यते दैवतैः[१७] सह ।
योवध्यः सर्वभूतानां बलवानजितश्च ह ॥१९॥
तमाश्रित्य वयं सर्वे योत्स्यामो विज्वराः सुखम् ।
मा युध्यतु भवान्सार्धं सुरैः[१८] सुरबलार्दन ॥२०॥
त्वयि प्राणाः स्थितास्सर्वे दैत्यानां दानवैस्सह ।
त्वयि जीवति जीवामस्त्वञ्चेन्नासि[१९] कुतो[२०] वयम्[१२] ।
त्यक्त्वा वाद्य पुरं[२२] सर्वे प्रविशाम महोदधिम् ॥२१॥

सनत्कुमार उवाच

तेषां तद्वचनं श्रुत्वा हिरण्याक्षो महासुरः ।
प्रहस्य तानिदं[२३] सम्यगुवाच वदतां वरः ॥२२॥
स्रष्टा यः सर्वभूतानां दाता हर्त्ता तथैव च ।
विहितं तेन यत् पूर्वं तत्कुर्यात् कोन्यथा पुनः ॥२३॥
यदि मृत्युरवश्यं मे विहितस्तेन दानवाः ।
अयुध्यमानमासीनमेत्यासौ मा वधिष्यति ॥२४॥

---

११ ते - ख. । १२ काल्यं - ख. । १३ दिव्ये - ख. । १४ नैतन्मिथ्या - ख. । १५ स्वस्ति - घ. । १६ भवत्विह - घ., भवन्तिह - ख. । १७ देवतैः - ख. । १८ शरैः - ख. । १९ त्वन्नास्ति - ख., त्वन्नासीद् - घ. । २० गता - घ. । २१ भयं - ख । २२ वान्यपुरं - ख. (?) । २३ तामिदं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वीक्षध्वं तन्मम स्थानं सर्व एवासुरोत्तमाः ।
यत्र तिष्ठन्तमभ्येत्य न मा मृत्युर्नयिष्यति[२४] ॥२५॥
अथवा नैव मृत्युर्मे विहितस्तेन दानवाः ।
युध्यमानं यथा पूर्वं नैव मां स नयिष्यति[२५] ॥२६॥
मादृशः कथमेवैतत् कुर्यात् सद्भिर्विगर्हितम् ।
बाले मृत्युं समावेश्य[२६] ततश्चात्मान्तरेक्षणम् ॥२७॥
रणे रिपूणां कदनं कृत्वैकश्चाप्यनेकशः ।
पृष्ठं दद्यात् पुनस्तेषां मादृशो दानवेश्वराः ॥२८॥

विप्रचित्तिरुवाच

देवा ह्यनेकशः सर्वे जिता नष्टाश्च सर्वशः ।
पुनश्चायान्ति न यथा[२७] तथा सर्वे यतामहे ॥२९॥

हिरण्याक्ष उवाच

अमरं देवता ज्ञात्वा स्वमात्मानं सुदुर्लभम्[२८] ।
जीवन्तः सुचिरेणापि भूयो लप्स्यामहे वयम् ॥३०॥
राज्यमेवं विजानन्तो विपलायन्ति[२९] नित्यशः ।
अस्माकममरत्वन्तु नैवास्त्यसुरसत्तमाः ॥३१॥
नष्टानामप्यतोस्माकं जीविताशा न विद्यते ।
तस्यामसत्यां पश्याम यत् प्राप्तं तद्धि नो वरम् ॥३२॥
मा कृथा नाशने बुद्धिं युद्धे बुद्धिः स्थिता मम ।
सुयुद्धेन[३०] रणे प्राणा यान्तु मा क्लीबवद्धि नः ॥३३॥

सनत्कुमार उवाच

तेषामेवन्तु वदतां सभायां सुरविद्विषाम् ।
वेगश्वासा[३१]भिसंरब्धो दानवः प्रत्यदृश्यत ॥३४॥

---

२४ मृत्युर्मां नहि नेष्यति (?) । २५ स हि नेष्यति (?) । २६ समाविश्य - ख. । २७ तथा - ख. । २८ सुदुर्लभाम् - ख. । २९ पलायन्ते च (?) । ३० तु - ख. । ३१ श्वासवेगा (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सम्यक् सन्त्रासित इव मृगराजेन निर्जने ।
करीव सिंहपादेन गरुडेनेव पन्नगः ॥३५॥
तदा स बद्धमुष्टिश्च दिशः सर्वा विलोकयन् ।
वेगेन निःश्वसन् गत्वा द्वारि द्वाःस्थमभाषत ॥३६॥

दानव उवाच

आवेदय सभापाल राज्ञे प्राप्तोनलः स्वयम् ।
सागरारक्षिकः क्षिप्रमकालं शीघ्रमुच्यते ॥३७॥
ततः प्रहस्य तं द्वाःस्थः सभापालोभिभाष्य तम्[३२] ।
उवाच मा भीर्भवतु कुतो भीस्ते[३३] महासुर ॥३८॥
नेह सिंहोस्ति चोरो वा नान्यः श्वापद इत्यपि ।
न गावः पशवोन्ये वा भयं त्यज समाश्वस ॥३९॥
स तथा तेन संप्रोक्तो[३४] शान्तश्चासुरसत्तमः[३५] ।
क्रुद्धः शब्दं तदा चक्रे महान्तं नादयन् दिशः ॥४०॥
- - - - - - - - - - - - - - - - - - ।
तेभिगम्य तदा व्यास राजानं दानवेश्वरम् ।
ऊचुरेष किमप्यद्य दृष्टं कथयतेसुरः ॥४१॥
स राजन्[३६] सम्यगाश्वास्य[३७] दैत्यमेनं महायशः[३८] ।
दानवानां हितार्थाय पृच्छस्व दितिनन्दन ॥४२॥
तेषां स राजा विप्रेन्द्र दानवानां महाबलः ।
श्रुत्वा तं दानवं व्यास इदं वचनमब्रवीत् ॥४३॥
भयं न शक्नुते दैत्य मत्समीपेभिवर्तितुम्[३९] ।
ब्रूहि सर्वं यथादृष्टं समाश्वस्य तथातथम् ॥४४॥

सनत्कुमार उवाच

ततस्स दानवो व्यास राजानं विगतज्वरः ।
प्रणम्य प्राञ्चलिर्वाक्यमिदं सम्यगुवाच ह ॥४५॥

---

३२ द्वा.स्थं सभापालेति भाषितम् - ख. । ३३ भयं - ख. । ३४ संप्रोक्तः - ख. । ३५... पुंगवः - घ. ।
३६ राजा - ख., तां राजा - घ. । ३७ सम्यगाश्वस्य - ख., सम्यगाहूय - घ. । ३८ महायशाः - ख. ।
३९ ..तिवर्तीने - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नित्यं जयतु नो राजा दानवानां सुखावहः ।
नश्यन्तु[४०] विद्विषः सर्वे येस्माकमहितावहाः ॥४६॥
अहं तवाज्ञया सर्वं विचरामि दिने दिने ।
सागरान्तं महाराज पुरुषैस्सह संगतः[४१] ॥४७॥
सोद्य पश्याम्यहं तत्र वराहं[४२] दैत्यपुङ्गव ।
मेरुशृङ्गप्रतीकाशं ज्वलन्तमिव पावकम् ॥४८॥
तस्य गात्रेषु दृश्यन्ते[४३] सूक्ष्मरूपधराः स्थिताः ।
सर्वे सुरा महाराज ऋषयश्च तपोधनाः ॥४९॥
महाबलस्त्वं राजेन्द्र देवानां भयदः सदा ।
त्वत्तोपि सुमहान् भीमस्तादृङ नैवेह विद्यते ॥५०॥
न दृष्टो न श्रुतो वापि वपुषा[४४] दैत्यपुङ्गव ।
अहं तेनाहतो दृष्ट्या न्यपतं भूतले भृशम् ॥५१॥
त्रस्तहाराम्बरो भीतः कुलिशेनेव[४५] ताडितः ।
ये ममानुचराश्चासन् दानवा भीमविक्रमाः ॥५२॥
ते सर्वे तस्य वेगेन पतिता गतजीविताः ।
स एषोभ्येति राजेन्द्र तवैव नगरं प्रति ॥५३॥
चालयन् वसुधां सर्वां क्षोभयन् सागराँस्तथा ।
जलेचराँश्च दैत्येन्द्र जीवितैर्विप्रयोजयन्[४६] ॥५४॥

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा प्रह्लादोसुरसत्तमः ।
उवाच दैत्यराजानमिदं वचनमर्थवत्[४७] ॥५५॥

प्रह्लाद उवाच

यादृशं तद्वराहस्य तस्य रूपं मया श्रुतम् ।
सर्वदेवमयं राजन् वराहोप्राकृतो मतः ॥५६॥

---

४० नाशन्तु - ख. । ४१ मिहसंगतः - ख. । ४२ वाराहं - ख. । ४३ दृश्यन्ति - ख. । ४४ मधुषा - ख., मयासौ (?) । ४५ कुलिशेनैव - ख. । ४६ ...विप्रयोजयत् - ख. । ४७ कोविदः (?), चोदितः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तस्मात्त्वया विधातव्यं यथा नो न स मोहयेत् ।
विनिश्चित्य च दैत्येन्द्र मा चिरं तद्विधीयताम् ।।५७।।
सुव्यक्तं ब्रह्मणा तस्य चक्रलाङ्गलधारिणः ।
सर्वदेवमयं रूपं वाराहमिदमीहितम् ।।५८।।
भवानवध्यस्सर्वेषां देवानां दानवेश्वर[४८] ।
अशक्तैस्तैरियं माया सृष्टा वै न तदन्यथा ।।५९।।

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा हिरण्याक्षः प्रतापवान् ।
उवाच दैत्यान्दनुजानिदं वचनमर्थवत्[४९] ।।६०।।

हिरण्याक्ष उवाच

यद्येष[५०] भ्रातृहन्ता मे इहायाति दुरात्मवान् ।
पूर्णः स्यादद्य सुचिराद्यो मे हृदि मनोरथः ।।६१।।
अद्याहं तं दुरात्मानं भ्रातृहन्तारमाहवे ।
छित्त्वा छित्त्वा करिष्यामि बलिं पशुपतेः शुभम्[५१] ।।६२।।
अद्य तस्य विचित्राक्षं शिरः कायात् सकुण्डलम् ।
उत्कृत्य दैत्या दास्यामि रुद्राय परमात्मने ।।६३।।
मया नासादितः पूर्वं तस्मिन्युद्धे स केशवः ।
अद्याहं तं समासाद्य नेष्यामि यमसादनम् ।।६४।।
अथ तस्मिन् हते सर्वे निराशा भयविह्वलाः ।
ममैवा[५२]कार्यतां गत्वा देवा यास्यन्ति दासताम् ।।६५।।

सनत्कुमार उवाच

ततः स दानवाञ्छूरान् दैत्यांश्च सुमहाबलान् ।
उवाच नाम्ना विख्यातान् किङ्करान्नाम दानवान् ।।६६।।

---

४८ दानवेश्वराः - ख. । ४९ 'प्रह्लादाद्यांस्तथा सर्वानिदं वचनमब्रवीत्' इति तु घ.पु.पाठः ।
५० यद्यस्य - ख., यद्यसौ - घ. । ५१ शुभां - ख. । ५२ ममैव - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दश तानि सहस्राणि गच्छध्वं तं महाबलाः ।
जानीत कोयमित्येवं ततो यास्याम्यहं स्वयम् ।।६७।।
ते तथोक्ता महामाया हृष्टाः सर्वे विनिर्गताः[५३] ।
बद्धगोधांगुलित्राणाः सन्नद्धास्तु पदातयः ।।६८।।
ते हेमचित्राम्बरहारसूत्रा[५४] महाबला दानवदैत्यपुत्राः ।
विनादयन्तो बहुधातिकोपिता यथैव नागाः सविषा विनिर्ययुः ।।६९।।

⊙ इति स्कन्दपुराणे किङ्करादेशनं[५५] नाम शततमोध्यायः ⊙

सनत्कुमार उवाच

तेभिनिर्गत्य वेगेन दंशिता दैत्यदानवाः ।
वराहं प्रति संजग्मुर्मृगाः सिंहमिवातुराः[१] ।।१।।
ते वराहदृशा तेन नीयमानासुरेश्वराः ।
आभान्ति व्यास सन्नद्धाः[२] प्रोक्षिताः पशवो यथा ।।२।।
तान्निहत्य कृतान्तेन मृत्युना चावपाशितान् ।
निनाय स तदा दैत्यान् पशूनिव यथा नरः ।।३।।
गत्वा ते योजनान्यष्टौ उत्तीर्णं सागराम्भसः ।
वराहं ददृशुः सर्वे सिंहं क्षुद्रमृगा इव ।।४।।
ते मुहूर्तं निरीक्ष्यैव परिबभ्रुस्समन्ततः[३] ।
विस्फारयन्तश्चापानि संक्रुद्धा दैत्यदानवाः ।।५।।
तानापतत[४] एवाथ निरीक्ष्य स समन्ततः ।
वराहेन्द्रस्तदा दैत्यान् प्राहेदं सुमहाबलः ।।६।।

---

५३ ...भिनिर्गताः - ख. । ५४ हेमचित्रा - ख. । ५५ असुरागमो - घ. ।
१ सिंहामिवातुराः - ख. । २ ...भ्याससंबद्धाः - ख. । ३ वभ्रमुश्च समन्ततः (?) । ४ तानापतन्त - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वराह उवाच

किं मा यूयं दितेः पुत्रा अभिद्रवथ[५] सर्वशः ।
दूषयामि न वः किञ्चिदसुहृन्न च वो ह्यहम् ।।७।।
अथैवंवादिनं दैत्या वराहं[६] तं सुविस्मिताः ।
पप्रच्छुः परिवार्यैव सर्वे दितिसुतास्तदा ।।८।
कस्त्वं वराहरूपीह तीर्त्वा सागरमूर्जिम् ।
इहागतः किमर्थं वा क्व वा गन्तव्यमित्युत ।।९।।
तेषान्तद्वचनं[७] श्रुत्वा वराहोसौ महामनाः ।
उवाच दानवान्सर्वान् तदा जलदनिस्वनः ।।१०।।
वराहोहं यथा दैत्यास्तादृग्रूपं च पश्यत[८] ।
प्रचारार्थमिमं[९] देशमागतो स्मि[१०] न संशयः ।।११।।
हृतभार्योहमन्येन विमना दैत्यपुङ्गवाः ।
पर्यटँस्तस्य दुष्टस्य चिन्तयामि परिग्रहम् ।।१२।।

दानवा ऊचुः

नायं प्रचारो युष्माकं दैत्यानामयमालयः ।
अनादृत्य कथं दैत्यानिमं देशमुपागतः ।।१३।।
वयं त्वाद्य वधिष्यामः सर्वे मृगकुलाधम ।
हत्वा च त्वां हि नेष्यामः[११] सर्वे दैत्येश्वरं प्रति ।।१४।।
ततस्ते दानवास्सर्वे तमायुधवरैर्भृशम् ।
निजघ्नुः पर्वतं यद्वत् मेघा वृष्टचा समुद्धताः[१२] ।।१५।।
वलवान्सोपि देवात्मा[१३] वराहः सुमहाबलः ।
वध्यमानोपि तान्दैत्यानिदं वचनमब्रवीत् ।।१६।।
नह्यत्र भवतां किञ्चिदल्पमप्यसुरोत्तमाः ।
अपराधं चकाराहं न करिष्ये करोमि वा ।।१७।।

---

५ अभिद्रवत - ख. । ६ वाराहं - ख. । ७ तस्य तद्वचनं - घ. । ८ पश्यथ (?) । ९ ... मिदं - ख. । १० ...म (ा) यातोस्मि - घ. । ११ ते नयिष्यामः - ख. । १२ समुन्नताः - ख. । १३ अनाह (दृ?) त्य बलं सोपि - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

किमर्थं मा शितैः शस्त्रैर्घ्नत (?) सर्वे यथा परम् ।
न हि वो[14] वैरमस्तीह न च कार्यं मया हि वः ॥१८॥
अथ मांसेन कृत्यं वस्ततो मां[15] घ्नत दानवाः ।
यथा प्राणं शितैः शस्त्रैर्युष्मत्तो न च मे भयम् ॥१९॥
एतौ करौ प्रसार्याहं संस्थितो दितिनन्दनाः ।
यदा भवन्तः स्थास्यन्ति तदा हन्तास्मि वस्सकृत् ॥२०॥
अद्य वेत्स्यथ[16] दैतेया मृगाणामिह[17] यद्बलम् ।
मत्ता यूयं सुरान् जित्वा तं मदं नाशयामि वः ॥२१॥

सनत्कुमार उवाच

ततः स भगवान् व्यास शक्रध्वजनिभौ करौ[18] ।
प्रसार्य तस्थावुद्यंचौ[19] भगवानिव शंकरः[20] ॥२२॥
तेपि तद्वचनं श्रुत्वा दानवाः क्रोधमूर्छिताः ।
निजघ्नुर्भृशमायस्ता नानाशस्त्रास्त्रपाणयः ॥२३॥
मेघैरिव महावायुर्गरुत्मान् भुजगैरिव ।
मृगैरिव यथा व्याघ्रः शशैरिव यथा हरिः ॥२४॥
हविषेवानलो दीप्तो गजो गोमायुभिर्यथा ।
तथा स भगवान् व्यास वराहो नन्दिवर्द्धनः ॥२५॥
तैरर्द्यमानोगणयन्[21] तस्थावचलसन्निभः ।
स यदा तैः शरैश्चैव गदामुशलपट्टिशैः[22] ॥२६॥
भिन्दिपालैर्भुशुण्डीभिः करवालैरयोमुखैः ।
एतैश्चान्यैश्च बहुभिर्वध्यमानो मृगेश्वरः ।
अदृश्यो विबभौ सर्वे तदा ते हर्षिता भृशम् ॥२७॥

सनत्कुमार उवाच

तेषां निनदतां व्यास वराहो नन्दिवर्धनः ।
शस्त्रकूटाद् विनिष्क्रम्य शिरांसि समपोथयत् ॥२८॥

---

१४ हितो - ख. । १५ मा - ख. । १६ वेत्स्यत - ख. । १७ मृगाणामिव - ख. । १८ शुभौ - ख., च तौ - घ. । १९ ...वुद्यन्वै - घ, वूर्ध्वं वै (?) । २०... भास्करः - घ. । २१ अर्द्यमानो न गणयन् - घ. । २२ पट्टिशैः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कराभ्यां चरणाभ्याञ्च दंष्ट्राभिश्च व्यदारयत्[२३] ।
तन्मुक्तैरायुधैश्चैव चिच्छेदान्यान् ररास च[२४] ॥२९॥
ते सर्वे करचर्णैविमुक्तशस्त्रैर्दंष्ट्राभिर्मखमुखदारितास्तथैव[२५] ।
संक्षीणा बहुभिरिवोपभुज्यमाना द्रव्याणामिव[२६] निचयाः सदा महान्तः ॥३०॥

⊙ इति स्कन्दपुराणे किङ्करयुद्धे एकोत्तरशततमोध्यायः ⊙

सनत्कुमार उवाच

अथ तान्निहतान् सर्वान् वराहेणाभिवीक्ष्य तु ।
एकः कृच्छ्राद्विनिर्मुक्तो ह्यश्मकं[१] पुरमाविशत् ॥१॥
स गत्वा तत्सभाद्वारमिदं[२] वचनमब्रवीत् ।
मुक्तकेशो रजोध्वस्तो रुधिरेणाभि[३]संप्लुतः ॥२॥
निवेदयत भो दैत्या[४] दानवेन्द्राय धीमते ।
द्वाःस्थो न्यवेदयद्राज्ञे प्रेरितः सोद्यतायुधः[५] ॥३॥
ये ते गता मृगेन्द्रं तं द्रष्टुं ह्यसुरसत्तमाः ।
ते हतास्तेन विक्रम्य सर्व एव दितेः सुताः ॥४॥
मा गाः प्रमादं[६] दैत्येन्द्र मावमँस्था मृगेश्वरम् ।
मा च कालं प्रतीक्षध्वं[७] मृगं तं मा विजानत[८] ।
महानसौ न सन्देहो जेतुं शक्यो न दानवैः ॥५॥

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा हिरण्याक्षो महासुरः ।
स्वयमेवाभिसंक्रुद्ध उत्पपात तदासनात्[९] ॥६॥
सेन्द्रकेतुरिवोत्तस्थौ पयोद इव चोन्नदन् ।
भ्रूकुटीदूषितमुखः सधूमोग्निरिव ज्वलन्[१०] ॥७॥

---

२३ विदारयत् - ख., विदारयन् (?) । २४ महासुरान् - घ. । २५ ...मुखरादिभिस्तथैव - ख. ।
२६ ...मति - ख. ।
१ विनिर्मुक्तः कथंचित् - घ. । २ तत्सभाद्वारि इदं - ख. । ३ रुधिरेणापि - ख. । ४ निवेदयति तान्दैत्यो - ख. ।
५ पंचार्धमिदं प्रक्षिप्तमिव घ.पुस्तके पठितम् । ६ मा प्रमादमगा - ख. । ७ प्रतीक्षध्व (?) ।
८ मा विजानीहि तं मृगं (?), मा विजानत...- ख. । ९ सदासनात् - ख. । १० ... माग्निरिवोज्वलन् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथोत्थितं[११] ततो[१२] दैत्या[१३] विप्रचित्तिश्च दानवः ।
प्रणम्योचुस्तदा दैत्यमिदं[१४] श्लक्ष्णपदाक्षरम् ।।८।।
त्वं राजा सर्वदैत्यानां भूतानां च जयावहः ।
तिष्ठतस्त्वस्मासु नोद्यन्तुं[१५] स्वयमेव त्वमर्हसि ।।९।।
वयं तं सह देवैश्च ये च तस्याभिरक्षिणः ।
हत्वा मांसं महाराज छित्त्वा तस्यानयामहे ।।१०।।
आदित्यानां सरुद्राणां वसूनामश्विनोरपि[१६] ।
भृगूणां पितृभिः सार्धं तथैवाङ्गिरसामपि ।।११।।
विश्वेदेवाश्च ये केचित्साध्या देवास्तथैव च ।
यक्षाणां राक्षसानाञ्च पिशाचानां सहोरगैः[१७] ।।१२।।
गन्धर्वपक्षिणाञ्चैव मनुष्याणाञ्च दानव ।
उद्युक्तानां समृत्यूनां लोकपालैस्सहैव च ।।१३।।
शक्ता निवारणे दैत्या वधे चैव दुरात्मनाम् ।
निग्रहे च यथाकालं स्वयं मा त्वमितो गमः[१८] ।।१४।।
हतमस्माभिरुद्युक्तैः पश्याद्य दितिनन्दन ।
आज्ञापयति नो यत्र राजा स्वामी प्रजेश्वरः ।।१५।।
तद्वयं शिरसा सर्वे करिष्याम न संशयः ।
यदशक्ता वयं कार्यं सर्वेऽप्यसुरपुंगव ।
कर्तुं तस्य भवान् कर्ता मा नः पश्य परानिव ।।१६।।
मृगार्थे दनुदैत्यानां स्वयं राजा महाबलः ।
निर्गतो नास्ति दैत्यानां वक्ष्यन्ति[१९] बलमित्युत ।।१७।।

सनत्कुमार उवाच

ततः स राजा दैत्यानां सर्वानिव समादिशत् ।
काले जलधरानिन्द्रो यथा भिन्नाञ्जनत्विषः ।।१८।।

---

११ तथोत्थितं (?) । १२ तदा - ख. । १३ दैत्यो - ख. । १४ दैत्या इदं - ख. । १५ नोद्योक्तुं (?)।
१६ ...मश्विनावपि - ख । १७ पिशाचाः समहोरगैः - ख , महो... (?) । १८ गतः - ख । १९ वक्ष्यन्ते - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

आज्ञां तस्य गृहीत्वैव तेपि दैत्या मुदान्विताः ।
सन्नह्यन्त महाकाया वाहनानि च भेजिरे ॥१९॥
प्रह्लादश्चानुह्लादश्च शिनिर्बाष्कल एव च[२०] ।
जम्भः कुजम्भो वातापी इल्वलोथ विरोचनः ॥२०॥
बलिर्बाणश्च वातश्च शंभुः कश्यप एव च ।
शम्बरश्च महाकायः कालशम्बर एव च ॥२१॥
प्रदीप्तश्चासिलोमा च शिलिताश्चैव दानवाः ।
शरभः शलभश्चैव धुन्धुर्मूकश्च दानवः ॥२२॥
शतोदरश्च विख्यातस्तथैवान्यो ह्लदोदरः ।
तारश्च तारकश्चैव मयो कालश्च विश्रुतः ॥२३॥
अजको नमुचिश्चैव व्यंसः कार्तस्वनः शुभः[२१] ।
इल्वको[२२] विल्वकश्चैव[२३] विपाकः पाक एव च ॥२४॥
हस्ती दुर्योधनश्चैव विप्रचित्तिश्च दानवः ।
हयग्रीवो मुरश्चैव नरकः कुण्ड एव च ॥२५॥
शकुनिर्वृषपर्वा च शतकेतुर्महारवः ।
मरकश्चैव राहुश्च स्वर्भानुः काल एव च ॥२६॥
विराधश्च कबन्धश्च दुन्दुभिः शतदुन्दुभिः ।
शाल्वो द्रुमश्च द्वावेतौ मयूरग्रीव एव च ॥२७॥
कालनेमी मेघनादो महावीर्यस्स चान्धकः[२४] ।
महिषानन्दशमकावाटिश्च बक एव च ॥२८॥
ततो दानवशार्दूला महामाया महाबलाः ।
सर्वे सर्वास्त्रविदुषो[२५] लब्धलक्षाश्च संयुगे ॥२९॥
रथैर्हयैर्गजैश्चैव तथैवान्ये पदातयः ।
जग्मुर्वराहं तं व्यास हन्तुं देवा इवासुरम् ॥३०॥
स चापि हि महातेजा वराहो नन्दिवर्धनः ।
स्तूयमानस्तथात्मस्थैर्मुनिभिर्भगवान् बली ॥३१॥

२० ...र्बाष्कलिरेव च - घ. । २१ सुभः (?) । २२ इल्वलो - ख. । २३ विल्वलश्चैव - ख. ।
२४ वान्धकः - ख. । २५ समास्त्रविदुषो - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

हत्वा तान् किङ्करान्सर्वानश्मकं[२६] पुरमागमत् ।
गर्जमानो यथा मेघो युगान्ते[२७] वृष्टिसर्जनः ॥३२॥
स गत्वा तत्तदा व्यास पुरं लोकमयः प्रभुः ।
अपसव्यं परावृत्य दक्षिणं द्वारमागमत् ॥३३॥
दक्षिणद्वारिभिस्तत्र दानवैर्बहुभिर्भृशम्[२८] ।
कृतो हलाहलाशब्दो नगरं येन कोपितम् ॥३४॥
यो हि भित्वा शतघ्नीश्च कवाटं कूटमुद्गरान् ।
कालचक्राणि यन्त्राणि सोवाचूर्णयदव्ययः[२९] ॥३५॥
अथाजग्मुर्भृशाविष्टास्ते दानवमहारथाः ।
शस्त्रवर्षेण चोग्रेण छादयन्तो मृगेश्वरम् ॥३६॥
अथ तैस्तोमरैश्चक्रै[३०]र्भिन्दीपापालैश्च ताडितः ।
द्वारं त्यक्त्वा विनिर्गम्य[३१] समां भूमिमुपाश्रितः[३२] ॥३७॥
तेपि तं भग्नमित्येव[३३] विजानन्तोसुरास्तदा ।
पृष्ठतोनुययुर्व्यास तक्षयन्तो वरायुधैः ॥३८॥
स तक्ष्यमाणः शरवृष्टितोमरैर्महागदाभिर्मुशलैरयोमुखैः ।
तदाभिनिःसृत्य दितेः सुतानसावयोधयद्देवगणैरधिष्ठितः ॥३९॥

⊙इति स्कन्दपुराणे असुरसन्देशनं नाम द्व्युत्तरशततमोध्यायः ⊙

सनत्कुमार उवाच

अथ व्यास समां भूमिं संप्राप्तान्दानवर्षभान् ।
उवाच सर्वान्[१] गम्भीरं[२] मृगान्सिंह इवाजने[३] ॥१॥
भवन्तो दानवाः सर्वे दैत्याश्च सुमहाबलाः ।
मया मृगेण समरे युध्यतां तु पुनर्भृशम् ॥२॥

---

२६ ...नस्माकं - ख. । २७ युगान्तो - ख. । २८ ...र्भृतम् - ख. । २९ सोवचूर्णयदव्यथः - । ३० अशाक्ति (क्तै)स्तोमरशतै - ख., सशक्तिनोमरैश्चक्रै - घ. । ३१ ... भिनिर्गम्य - ख. । ३२ समां भूमिं निर्गत्य समुपस्थितः - घ. । ३३ भग्न इत्येव (?) ।

१ सर्वानुवाच - घ. । २ गम्भीरां (न्) - ख । ३ इवाजिरे - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

न लज्जा समरेभ्येत्य[४] युष्माकं दानवेश्वराः ।
अथवा न बलं वोस्ति मिथ्या देवा हि वो जिताः[५] ॥३॥
बहवो बलवन्तश्च मृगश्चाहं वनेचरः[६] ।
न मन्ये धर्मयुद्धे वो मतिर्दानवसत्तमाः ॥४॥
न ममास्ति धनुः किञ्चिन्न शस्त्रं च तथाविधम् ।
सशस्त्रैर्बहुभिर्येन युद्धे यमसुरेश्वराः[७] ॥५॥
ते यूयं यदि मन्यध्वं शस्त्राणि त्यजताधुना ।
मया चैकैकशः सर्वे युध्यध्वं न्यायमास्थिताः ॥६॥

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा सोन्धको दानवेश्वरः[८] ।
उवाच सर्वान्दैत्येन्द्रान् युगान्ताम्बुदवन्नदन् ॥७॥
एवमेतद्यथाहायं मृगोसुरमहारथाः ।
सन्त्यजामाद्य[९] शस्त्राणि योधामैकैकशस्तथा ॥८॥

प्रह्लाद उवाच

अबुद्धिरेषा दैत्येन्द्रा यथाहायं मृगाधमः ।
समानानां समैस्सार्धमेतद्युद्धं प्रशस्यते ॥९॥
न मृगाणाञ्च शस्त्राणि न बाहुबलमित्युत ।
वध्यन्ते च सदा शस्त्रैरेष धर्मः सतां मतः ॥१०॥
ते वयं कथमुत्सृज्य स्वधर्मं दानवेश्वराः ।
मृगधर्मं समास्थाय युध्येम पशवो यथा ॥११॥
मृगाधमोयं दुर्वृत्त[१०] अवध्यो नास्मदादिभिः ।
- - - मा[११] विचारो वो मृगे भवतु सर्वशः ॥१२॥
मायामास्थाय दुष्टात्मा कोप्ययं सुरपांसनः ।
अस्मान् वञ्चयितुं दैत्याः कांक्षते सुदुरात्मवान् ॥१३॥

---

४ त्यज्य - ख. । ५ जिता इति - घ । ६ वनेश्वराः - ख. । ७ तमसुरेश्वराः - ख. । ८ दानवेश्वराः - ख. ।
९ सन्त्यजामोद्य - ख. । १० युद्धवृत्तिः - ख. । ११ ... तातेनम्मा (?) - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

क्व च श्रुतं वा दृष्टं वा मृगाणामसुरेश्वराः ।
मनुष्यवद्बाहुयुद्धं पुरुषैस्सह संयुगे ॥१४॥
एष विष्णुर्दुराचारो दुरात्मा दैत्यकण्टकः ।
अशक्तः स्वेन वीर्येण मायामास्थाय संस्थितः ॥१५॥

सनत्कुमार उवाच

ततस्तं बलवान् क्रुद्धो धनुषा सोसुरेश्वरः ।
शरैरवाकिरद् व्यास बहुभिर्विररास च ॥१६॥
अन्धको विप्रचित्तिश्च सर्वे ते दैत्यदानवाः ।
अवाकिरन् शरैस्तीक्ष्णैः शतशोथ सहस्रशः ॥१७॥
अथ देवः सुसंरब्धै[१२]विद्धस्तै[१३]र्दानवैर्भृशम् ।
शुशुभे भास्करकरैः संविद्धो हिमवानिव ॥१८॥
स वेगं बलवत् कृत्वा विधुन्वानः शरान् शितान्[१४] ।
सलीलं प्रययौ देवः प्रह्लादं प्रति दानवम्[१५] ॥१९॥
स गत्वा तस्य सहसा सारथिं रथमेव च ।
दंष्ट्राभिश्च कराभ्याञ्च नामशेषं चकार ह ॥२०॥
ततो रथादवप्लुत्य हन्यमानोपि दानवैः ।
रथध्वजेन[१६] तं दैत्यं मूर्ध्नि देवोभिजघ्निवान् ॥२१॥
प्रह्लादोपि ततोत्पत्य[१७] गदया भीमरूपया ।
आजघानोरसि क्रुद्धं विघ्नो धर्मे यथा स्थितम् ॥२२॥
स तेनाभिहतो देवो मुक्त्वा तस्य रथं तदा ।
तमेव देशमायातः पूर्वं यत्राभवत् स्थितः ॥२३॥
ततोन्धको विप्रचित्तिः शम्बरः कालशम्बरः ।
शरैराशीविषाकारैर्बिभिदुर्नन्दिवर्धनम् ॥२४॥

---

१२ वराहो ह्यतिसंरब्धै - घ. । १३ सुसंरब्धे विद्धस्तै - ख. । १४ स्थितान् (?) । १५ दानवं प्रति (?) । १६ ध्वजदण्डेन (?), रथदण्डेन (?) । १७ ततो दैत्य (?) - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स विद्धस्तैस्तदा व्यास शरैः सन्नतपर्वभिः ।
भिद्यमानश्च बहुधा मण्डलानि चचार ह ॥२५॥
कदाचित् सिंहवच्चापि प्लवते नर्दतेपि च ।
शार्दूलवत् कदाचिच्च भूमावात्मानमाहवे ॥२६॥
वितत्य स महावीर्यस्तिष्ठते सायकान्[१८] सहन् ।
पादेन तत उत्थाय अवकीर्य वृषो यथा ॥२७॥
पक्षिवत्स तदाकाशे मण्डलानि मृगेश्वरः ।
भ्रमित्वा निश्चलस्तस्थौ वराहः पर्वतो यथा ॥२८॥
एवं बहुविधान् मार्गान् विचरित्वा महाबलः ।
वेगेनैव कराभ्यां स रथौ जग्राह नादयन् ॥२९॥
विप्रचित्तोश्च बलवानन्धकस्य च सुप्रभः[१९] ।
भ्रामयित्वा मुहूर्त्तं तौ सहाश्वैः[२०] सहसारथी[२१] ॥३०॥
भूमावुत्क्षिप्य[२२] चिक्षेप बभञ्ज च पुनः पदा ।
रथास्थितौ[२३] च तौ दैत्यौ पुनर्मूर्धन्यताडयत्[२४] ॥३१॥
तौ हतावतिसंक्रुद्धौ गदे चोद्यम्य वेगितौ ।
वराहं मूर्ध्नि युगपत्समाहत्य विनेदतुः ॥३२॥
ताभ्यां स बलवान् क्रुद्धो हस्ताभ्यां रक्तलोचनः ।
गदे जग्राह यत्ताभ्यां बलादेव मृगेश्वरः ॥३३॥
ततोचरन्मण्डलानि विविधानि जनार्दनः ।
गदाविशारदः सम्यग् विचित्राणि बहून्यपि ॥३४॥
आक्षिप्तमथ विक्षिप्तमवाक्षिप्तञ्च मण्डलम् ।
उत्क्षिप्तमथ विक्षिप्तं विसृष्टं धावितं तथा ॥३५॥
परावृत्तं निवृत्तं च अर्धचन्द्रमथापि च ।
विष्टब्धं चोद्यतञ्चैव हंसोद्भ्रमितमेव[२५] च ॥३६॥

---

१८ निस्सायकान् - ख. । १९ सुप्रभौ - घ. । २० सहाश्वौ (?) । २१ सहसा(ना)यकौ - ख. । २२ उत्क्षिप्य भूमौ (?) । २३ रथे स्थितौ - घ. । २४ पुनर्मूर्ध्नोरताडयत् (?) । २५ हंसोद्भ्रमण ए (मे?)व - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गदाविशारदः सम्यग् भ्रमित्वा मण्डलानि सः ।
गदामुपरि चिक्षेप सोन्धकस्य[२६] विनादयन् ॥३७॥
अपरां विप्रचित्तोऽपि बलवान्नन्दिवर्धनः ।
ते गदे तौ महावेगे[२७] दानवौ सुदुरासदौ ॥३८॥
वञ्चयित्वा रणे भूयो वराहं प्रति दानवौ ।
आधावितौ यथा देशमुत्पातौ वेगिताविव ॥३९॥
तयोरापततोरेव वराहोसौ महाबलः ।
मुष्टिनान्धकमाहत्य विप्रचित्तिं पदावधीत् ॥४०॥
अन्धकस्तस्य मुष्टिं तं विप्रचित्तिः पदञ्च ह ।
क्रुद्धौ जगृहतुर्दैत्यौ हतस्त्वमिति वादिनौ ॥४१॥
नादयानौ यथा काले कृष्णाविव बलाहकौ ।
स गृहीतस्तदा ताभ्यां महात्मा सुरसत्तमः ॥४२॥
उत्पपात वियद् वेगात् पक्षिराडिव काश्यपः ।
वियत्स्थो[२८] विबभौ दैत्यावुद्वहन् स मृगेश्वरः ॥४३॥
गरुत्मानिव पक्षीशो भक्षार्थं गजकच्छपौ ।
विनद्य स तदाकाशे विधूय च करौ बली ॥४४॥
पादञ्चैवाभिचिक्षेप तौ दैत्यौ भुजगाविव ।
तौ क्षिप्तौ प्रेक्ष्य[२९] तु व्यास दानवौ युद्धदुर्मदौ ॥४५॥
अभियातौ महीं घोरावशनी खाच्च्युताविव ।
असावपि च देवेशो वराहो नन्दिवर्धनः ।
रथान्वै सर्वदैत्यानां चूर्णयामास वीर्यवान् ॥४६॥
गृहीत्वा कूबरे कञ्चित् सोऽचिक्षेप महार्णवे[३०] ।
कञ्चित्पदा समाहत्य पांसुसायुज्यमानयत् ॥४७॥
कञ्चिद्रथं रथेनैव पदातिञ्च पदातिना ।
गजं गजेन चाहत्य स निन्ये यमसादनम् ॥४८॥

---

२६ सोन्धकाय - ख. । २७ महावेगौ (?) । २८ वियत्स्थौ - ख. । २९ प्रेक्ष - ख. । ३० महार्णवं - ख., महारथ (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

तेपि[३१] विद्राविताः सर्वे लज्जां परमिकां गताः ।
दैत्यदानवशार्दूला विनिवृत्ता यथाबलाः ॥४९॥
एकेन[३२] सर्वे विजितासुरेन्द्राः परस्परं वीक्ष्य मुखानि शूराः ।
व्रीडान्वितास्ते पुनरेव देवं वराह - - - - - - - ति ॥५०॥

⊙ इति स्कन्दपुराणे वराहयुद्धे त्युत्तरशततमोध्यायः ⊙

सनत्कुमार उवाच

अथ ते तं मृगं व्यास दानवा भीमगर्जनाः ।
आयुधैः समभिक्रुद्धाः संततक्षुस्तदा[१] भृशम् ॥१॥
ते मृगा इव शार्दूलं सिंहपोतं गजा इव ।
आजघ्नुर्दानवाः क्रुद्धा वराहं शस्त्रवृष्टिभिः ॥२॥
स चापि मृगशार्दूल उपविश्य महोदधिम् ।
अपोपिबत् समाविश्य वह्निवद्वडवामुखम् ॥३॥
तथेरितानि तैर्दैत्यैरायुधानि सहस्रशः ।
व्यादाय सुमहद्वक्त्रं जग्रास च ररास च ॥४॥
ग्रसित्वा तानि सर्वाणि शस्त्राणि स[२] महाबलः ।
दानवान्प्रति संचक्रे वेगं सिन्धुरिवापरः ॥५॥
गजान्प्रति यथा सिंहः सिंहान् शरभराडिव ।
गरुत्मान् भुजगान् यद्वच्छार्दूलश्च मृगानिव ॥६॥
मेघवृन्दं यथा वायुः कपोतानिव पक्षिराट् ।
तथा स भगवान् व्यास दानवान्प्रति लोकपः ॥७॥
वेगं चक्रे यथा क्षिप्रमिन्द्रियं प्रति वै मनः ।
आसाद्य च स तान्दैत्यान् महाजलदनिःस्वनः ॥८॥

---

३१ वै - (?) । ३२ मृगेण (?) ।
१ ततक्षुस्तां तदा - ख. । २ सु - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सर्वान् विद्रावयामास रुद्रः पशुगणानिव ।
काँश्चित् पद्भ्यां सुसंक्रुद्धो हस्ताभ्यामपरानिति ॥९॥
दंष्ट्राभिश्चापरांस्तत्र[3] स प्रैषीद्[4]यमसादनम् ।
तुण्डेन[5] शम्बरं भूमौ कालशम्बरमेव च ॥१०॥
नरकं पादघातेन हयग्रीवं च मुष्टिना ।
उरसा नमुचिं चापि महामायं च सत्वरः[6] ॥११॥
आहत्याहत्य संक्रुद्धः पातयामास देवपः ।
ताँस्तथा द्रावयानश्च गर्जमानश्च सिंहवत् ॥१२॥
विप्रचित्तिर्वराहं तं मुष्टिनोरस्यताडयत् ।
विप्रचित्तिं जघानोग्रं पार्श्वदेशे स मुष्टिना ॥१३॥
स आहतो वराहेण वराहं क्रोधमूर्छितः ।
पुनर्जघान खड्गेन वक्षस्येनं विनादयन् ॥१४॥
अमृष्यमाणस्तं घातं वराहः सुमहाबलः ।
मुष्टिना मूर्ध्नि तं दैत्यं वज्राभेन व्यताडयत् ॥१५॥
स दैत्यस्तेन घातेन भ्रमित्वा चक्रवत्तदा ।
पपात भूमौ वेगेन वाताहत इव द्रुमः ॥१६॥
पतितं तं तदाभ्येत्य[7] विप्रचित्तिं प्रजेश्वरः[8] ।
जग्राह पद्भ्यां[9] देवेशो द्रावमाणं दितेः सुतम् ॥१७॥
भ्रामयित्वा ततश्चैनं[10] नर्दित्वा[11] चासकृद्बली ।
पुरं प्रति विचिक्षेप महात्मा नन्दिवर्धनः ॥१८॥
स क्षिप्तस्तेन[12] विबभौ दानवाधिपतिर्बली ।
सबलाकतडिज्ज्वालपरिच्छिन्न इवाम्बुदः ॥१९॥
त्रस्तहाराम्बरधर[13]श्च्युतमाल्यविभूषणः ।
पपातोपरि वेगेन हिरण्याक्षस्य वेश्मनि ॥२०॥

---

३ अरान् दंष्ट्रया तत्र - ख. । ४ ह्यग्रैषीद् - ख. । ५ तर्घेन (?) - ख । ६ शम्बरः - ख. । ७ लक्ष्य - घ. । ८ मृगेश्वरः - घ. । ९ पदे जग्राह - घ. । १० ततश्चैव - ख. । ११ .. थ मर्दित्वा गर्भित्वा - घ. । १२ स तेन क्षिप्तो - ख. घ. । १३ ग्रस्तहराम्बरधर - घ., त्रस्तहेमाम्बरधर - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सौधमट्टालकं[१४] तस्य विमानमिव संस्थितम् ।
चूर्णयानोपतद् व्यास पर्वतेन्द्रमिवाशनिः ॥२१॥
महता तस्य शब्देन हिरण्याक्षः स्वयं तदा[१५] ।
वेगेनागत्य ददृशे दानवेन्द्रं दितेः सुतः[१६] ॥२२॥
सोपि दानवशार्दूलो वराहेणावपीडितः[१७] ।
तेन चैव विघातेन[१८] मुहूर्त्तमभवज्जडः ॥२३॥
तं समाश्वासयद्राजा तदा शीतेन वारिणा ।
तालवृन्तैश्च बहुभिर्मणिभिश्च दितेः सुतः ॥२४॥
समाश्वस्योत्थितञ्चैव[१९] उपविष्टं वरासने ।
राजा पप्रच्छ तं दैत्यं परं विस्मयमागतः ॥२५॥

हिरण्याक्ष उवाच

केनाद्य हिमवान् दैत्य पृथिवी वा ससागरा ।
महाबलेन सहसा[२०] तुलिता विश्वकर्मणा ॥२६॥
केनाद्य मन्दरः ग्रस्तो[२१] मृत्युः केन पराजितः ।
केन त्वं दानवेशान क्षिप्तः को बलवान्भुवि ॥२७॥
पृथिव्यास्तुलनं यादृग् मन्दरस्य च चालनम् ।
मृत्योश्च मरणं[२२] तादृक् तवेदं क्षेपणं[२३] महत्[२४] ॥२८॥
रुद्रेन्द्रमृत्युप्रतिमो लोकपालभयङ्करः ।
केन त्वं तुलितः संख्ये बलवानबलो[२५] यथा ॥२९॥
कस्येदं बलमक्षय्यं केन बाह्वोर्बलं महत् ।
ख्यापितं त्रिषु लोकेषु दानवेश्वर कथ्यताम् ॥३०॥

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा दानवः स महाबलः ।
तमाह दीर्घं निःश्वस्य निरीक्ष्य च पुनः पुनः ॥३१॥

---

१४ मोचवमट्टालक - घ. । १५ तथा - ख. । १६ सुत - घ. । १७ ... ताडितः - ख. । १८ विपातेन - ख. ।
१९ समाश्वासोत्थितश्चैव - ख. । २० महाबलैर्महादैत्य - ख. । २१ ग्रस्तो - घ. । २२ बन्धनं - घ. ।
२३ क्षिपणं - ख. । २४ मतम् - घ. । २५ ... नचलो - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विप्रचित्तिरुवाच

अमानुषमिदं राजन्नतिदेवं तथापि च ।
अतिदैत्यश्च दैत्येन्द्र न दृष्टं न श्रुतं[26] क्वचित् ।।३२।।
वराहस्य बलं यादृग् न च तादृक् क्वचित् क्वचित् ।
न हि तुल्यं प्रपश्यामि तस्य राजन्महात्मनः ।।३३।।
अस्त्रैः शस्त्रैश्च बहुभिस्तक्ष्यमाणस्य[27] संयुगे ।
नार्त्तिर्न दुःखं दैत्येन्द्र न च संज्ञा प्रहीयते ।।३४।।
भवेत्तस्याभि[28]दष्टस्य मशकेनाप्यनिर्वृतिः ।
न दैत्यदानवै राजन् निघ्नस्य[29] भयमित्युत ।।३५।।
यथा क्षुद्रमृगान् सिंहो मण्डूकानिव वोरगः[30] ।
तथा स कलयामास[31] सर्वान् दैत्येन्द्रदानवान् ।।३६।।
न तं मृगमहं मन्ये न देवं नापि चासुरम् ।
कोप्यसौ दितिपुत्राणामनयः[32] समुपस्थितः ।।३७।।
तेनास्मि मुष्टिना मूर्ध्नि ताडितो भूतलं गतः ।
गृहीत्वा सहसोत्क्षिप्तः[33] पतितस्त्वद्गृहोपरि ।।३८।।
दानवानां सदैत्यानामितरेषाञ्च दानव[34] ।
न जाने समवस्थानं मन्ये ते सर्वशो हताः ।।३९।।
अवध्यस्स महातेजा बलवान् दुर्बला वयम् ।
श्रुत्वैतद् दितिपुत्राणां हितं यत्तत्समाचर ।।४०।।
तस्याङ्गे मुनयः सर्वे दृश्यन्ते सह दैवतैः[35] ।
कृत्या सेति मतं मेद्य तव हेतोर्विनिर्मिता[36] ।।४१।।
मनश्च तव दैत्येन्द्र युद्धाय कृतनिश्चयम् ।
विनिवर्तय तच्चैव दैत्यानां हितमाचर ।।४२।।
बलवान् सोबला दैत्या वयं मर्त्याः स चामरः ।
अजय्योसौ जिता दैत्या मा नो युद्धे न योजय ।।४३।।

---

२६ श्रुतं न - ख. । २७ ...श्र - ख । २८ ...त्तस्यापि - ख । २९ राजन्हतस्य - (?) ।
३० चोरगः - घ. । ३१ कालयामास (?) । ३२...पुत्राणां प्रलयः (?) । ३३ सहमाक्षिप्तः - ख. । ३४ हतशेषाश्च
दानवाः - घ. । ३५ देवतैः - ख. ।३६ ...पनिर्मिता - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

हित्वाश्मकं[३७] पुरं सर्वे समुद्रस्तम्भमाश्रिताः ।
तिष्ठाम राजन् मा युद्धं तेन साकं पुनः कृथाः[३८] ॥४४॥
मावमंस्था मृगं दैत्य मृगोसाविति सर्वशः ।
नरसिंहोप्यभूत्पूर्वं मृगस्तद्विनिबृंहितः ॥४५॥
- - - - - - - - - - - - - - - - - - ।
यावत्त्वं ध्रियसे दैत्य दानवानां सुखावहः ।
तावत्सर्वेसुरा जीवा भविष्यन्ति न संशयः ॥४६॥
मा रुशन्तु[३९] दितेः पुत्रा दनोश्चैव सुबालिशाः ।
अपयाम पुरादस्मादसुरेश्वर सर्वशः ॥४७॥

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा हिरण्याक्षः प्रतापवान् ।
उवाच दानवेशानं भीतं[४०] तस्मान्[४१]महात्मनः ॥४८॥
असंशयं महात्मासौ मृगो दानवसत्तम ।
येन मन्दरकल्पस्त्वं तुलितः सुमहाबलः ॥४९॥
अद्य वर्षसहस्राणि दिव्यान्यसुरपुंगव ।
चत्वारि भुञ्जतो राज्यं गतानि सुमहान्ति मे ॥५०॥
पञ्चपञ्चा (?) तु संप्राप्तन्तावद्देवाश्च नाशिताः (?) ।
सबला[४२] बहुभिर्घोरैः संग्रामैरबला इव ॥५१॥
सोहं तथा बलोपेतो भुक्त्वा राज्य[४३]मकण्टकम् ।
भीतः प्रविश्य सलिलं कथं स्थास्ये भुजङ्गवत् ॥५२॥
मृगरूपी स विष्णुश्च वाराहं[४४] रूपमास्थितः ।
यदि स्यात्तच्च कृत्यं मे दानवेश्वर मा भयम्(?) ॥५३॥
ममापि बलमक्षय्यं तस्माच्च बलवानहम् ।
यो मे भयात् परित्यज्य स्वं रूपं मृगतां गतः ॥५४॥

---

३७ हित्वास्माकं - ख. । ३८ कृशाः - ख. । ३९ नुशन्तु (नश्यन्तु?) - ख. । ४० भीमं - ख. ।
४१ ...स्तस्म - ख. । ४२ सबाला - ख. । ४३ सर्वं - ख. । ४४ वराहं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यो हन्याद्धस्तिनं संख्ये सिंहं शरभमेव च ।
तस्य कास्था भवेद्दैत्य मृगे ह्यस्मिन्महाबल ।।५५।।
मद्भयात् स वराहश्च सर्वदेवैरधिष्ठितः ।
मामाह्वयति[४५] दैत्येन्द्र जय एव ततो हि मे ।।५६।।
भवानेव हि मे दैत्य तेन दूतः - - - -[४६] ।
त्वरता मृत्युलोकन्तु गत्वा दानवपुंगव ।।५७।।
यदहं भ्रातृहन्तारं दानवानां भयङ्करम् ।
अहत्वा न निर्वर्तिष्ये शपे सत्येन दानव ।।५८।।

सनत्कुमार उवाच

सूतं ततः समादिश्य रथं सज्जमचीकरत् ।
समाश्वासयितुं पत्नीः[४७] स विवेश[४८] पुनर्गृहान् ।।५९।।
स तत्र ताभिः कृतमङ्गलस्तदा दितेः सुताँस्ताँश्च[४९] निरीक्ष्य सर्वशः ।
गृहाण[५०] सर्वं रणयोग्यमुज्ज्वलं महाबलः[५१] शत्रुनिवारणक्षमम् ।।६०।।

⊙ इति स्कन्दपुराणे विप्रचित्तिपातने चतुरुत्तरशततमोध्यायः ⊙

सनत्कुमार उवाच

स धन्वी कवची भूत्वा बद्धगोधांगुलित्रवान् ।
बद्धपृष्ठेषुधी[१] चैव शरी खड्गी महाबलः ।।१।।
हरिश्मश्रुश्चतुर्दंष्ट्रः शंकुकर्णो महाहनुः ।
आजानुबाहुर्दीर्घाक्षो न्यग्रोधपरिमण्डलः ।।२।।
हस्तयोः पद्मशंखौ च चक्रमत्स्यौ च पादयोः ।
दधानो जालहस्तश्च जालपादोल्पमेहनः ।।३।।
बालादित्यनिभाक्षश्च अञ्जनाचलसन्निभः ।
स निर्ययौ तदा व्यास भ्रूकुटीभूषिताननः ।।४।।

---

४५ ममाह्वयति - ख., समा... (?)। ४६ प्रेरितः - ख. । ४७ पत्यः (पत्न्यः) - ख. । ४८ प्रविवेश - ख. ।
४९ सुतास्ताश्च - घ. । ५० जग्राह - घ. । ५१ महाबलं - ख. ।
१ पृष्ठबद्धे षुधी (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

द्वार्यपश्यच्च सूतेन रथं समुपकल्पितम् ।
सहस्रनल्वमात्रञ्च[२] हयैर्दिव्यैस्समन्वितम् ॥५॥
सहस्रैर्दशभिर्व्यास सर्वोपकरणान्वितम् ।
खट्वाङ्गेन च संयुक्तं ध्वजेनादित्यवर्चसा ॥६॥
आरुरोह जयेत्युक्तो[३] दानवैर्बहुभिस्तदा ।
दिवाकरो रथं यद्वद् भगवान् तेजसां पतिः ॥७॥
विबभौ स तदारूढो रथं तं दितिनन्दनः[४] ।
सौवर्णे भाजने यद्वदिन्द्रनीलं समर्पितम् ॥८॥
किरीटस्त्वाबभौ[५] तस्य शिरस्थः[६] सुमहाद्युतिः[७] ।
यथाञ्जनगिरेः शृङ्गे दावाग्निः समवस्थितः[८] ॥९॥
सञ्चोदयच्च यन्तारं स दैत्यो गमनं प्रति ।
तस्य पार्श्वेभवद् व्यास विप्रचित्तिरवस्थितः ॥१०॥
केतोरिव यथा व्योम्नि प्रतिकेतुरवस्थितः[९] ।
शंखभेरीमृदङ्गैश्च मुरजैर्वेणुभिस्तथा ॥११॥
वाद्यमानैर्ययौ राजा हिरण्याक्षोश्मकात्पुरात् ।
अग्रतः पृष्ठतश्चैव पार्श्वयोरुभयोरपि ॥१२॥
जग्मुः सर्वेसुरा व्यास भास्करस्य यथा ग्रहाः ।
निर्गच्छमानश्च पुरात् शकुन्तान् भयशंसिनः ॥१३॥
अपश्यद् व्यास दैत्येन्द्रो न च तानकरोद्धृदि[१०] ।
आच्छिनत् तस्य पन्थानं भुजङ्गः कृष्णदेहवान् ॥१४॥
गृध्रश्च रक्तवक्त्रोस्य निलिल्ये ध्वजमूर्धनि ।
गृध्रश्चक्रायते चास्य रथस्योपरि[११] गच्छतः ॥१५॥
ध्वजश्चाभज्यत महान् रथस्य सुमहाप्रभः ।
वामं चाङ्गं स्फुरत्यस्य[१२] शरीरस्य मुहुर्मुहुः ॥१६॥

२...याच्छन्नं - ख. । ३ जयेत्युक्ता ख.,जयेत्युक्त्वा - घ. । ४ इतः परं "तस्यपार्श्वेभवद्...यथा ग्रहाः" इत्यादि घ. पु । ५ न्त्वाबभौ - घ. । ६ शिरःस्थः - घ । ७ सुमहाद्युति - घ. । ८ समुपस्थितः - घ. । ९ पद्यार्धमेतत् "जग्मुः सर्वे" इत्यतः परं दत्तां ख.पुस्तके । १० हृति - ख. । ११ यथोपरि च - ख । १२ वामाङ्गं चास्फुरत्तस्य (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

हेषन्ते न हया दीना हस्तिनो विमदाभवन् ।
एतान्यन्यानि च बहूनि[१३] दैत्यो मुनिसत्तम ॥१७॥
सोवैक्षत[१४] निमित्तानि भयदान्यात्मनोसकृत्[१५] ।
नातिदूरे स निर्गत्य[१६] नगरस्य[१७] मृगेश्वरम्[१८] ॥१८॥
अपश्यद् दानवः[१९] संख्ये युध्यमानमभीतवत् ।
सोपि दैत्यवरः श्रीमान् क्रोधसंरक्तलोचनः[२०] ॥१९॥
विस्फारयन्महाचापं रथेनाभ्यपतद्बली[२१] ।
वराहोपि महाबाहुर्विद्राव्य दितिनन्दनान् ।
सुवर्णाक्षं प्रति रुषा वेगेनैवाभ्यधावत ॥२०॥
तस्यापतत एवाशु दानवः सुमहाबलः[२२] ।
सर्वसन्धिषु तीक्ष्णाग्रान्निचखान[२३] बहून्छरान्[२४] ॥२१॥
सायकैस्तैर्विनिर्भिन्नः सर्वसन्धिषु सुव्रत[२५] ।
न चचाल मृगेन्द्रोसौ विष्टब्धः समतिष्ठत[२६] ॥२२॥
तं स्तम्भितं तदा व्यास दृष्ट्वा देवा[२७] महाबलम् ।
विशल्यकरणैर्मन्त्रैर्विशल्यमभिचक्रिरे ॥२३॥
स विशल्यस्तदा देवैः कृतो मृगपतिर्महान् ।
पुनर्वेगं महत् कृत्वा जगाम दितिजं प्रति ॥२४॥
स वध्यमानो बहुभिश्शरैर्मृगपतिर्महान् ।
दैत्येन्द्ररथमासाद्य इयेष रथमव्ययः[२८] ॥२५॥
ग्रहीतुं नादयन् व्यास बहुधा विश्वरूपधृक् ।
यन्ता च मण्डलं कृत्वा भ्रामयामास तं रथम् ॥२६॥
प्रसारितकरं दैत्यो मृगं तं सुमहाबलम् ।
बबन्धास्त्रेण नागानां स बद्धो न्यपतद् भुवि ॥२७॥

---

१३ एताँश्चान्याँश्च सुबहून् स - ख. । १४ अवैक्षत - ख. । १५ नात्मनोसकृत् - ख. । १६ स्यन्दने-
. नाभिनिर्गत्य - घ. । १७ नगरात् स - घ. । १८ महेश्वरं - क. । १९ दानवो - क. ख. ।
२० क्रोधात् संरक्तलोचनः - क. । २१ ..भ्यद्रवब्दली - ख.घ., एतावतिको ग्रन्थः क.पुस्तके नष्टः, ख.पुस्तकादुद्धृतोत्र ।
२२ क्रोधमूर्च्छितः - घ. । २३ चखान - क. । २४ सुवहून् शरान् - क. ख. । २५ सुव्रतः - क. ।
२६ समपद्यत - घ. । २७ देवं - घ. । २८ ...मव्ययं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पतितं तञ्च दैत्येन्द्रा विविधायुधपाणयः ।
विजघ्नुर्भृ शमायस्ता बहुधा क्रोधमूर्छिताः ॥२८॥
तं बद्धं वध्यमानञ्च पतितं नन्दिवर्धनम् ।
गरुत्मान् भुजगेन्द्रेभ्यः क्षिप्रमेव व्यमोचयत् ॥२९॥
मुक्तश्च स तदोत्पत्य[२९] द्रावयाणो दितेः सुतान् ।
हिरण्याक्षरथं तूर्णमभ्यधावन्महायशाः ॥३०॥
तं धावन्तं पुनर्दैत्यःशरेणानतपर्वणा ।
विव्याध हृदये व्यास नर्दमानो[३०] यथाम्बुदः ॥३१॥
मृगेश्वरश्च भिन्नोसौ[३१] हृदये मोहमास्थितः ।
पपात भूमौ निर्वृत्तो शक्रध्वज इवोत्सवे ॥३२॥
ततो हाहा कृतं[३२] सर्वैः समेतैर्देवपुंगवैः[३३] ।
ऋषयस्तुष्टुवुश्चैनं भास्करश्चाप्रभोभवत् ॥३३॥
अथ सोप्यायितस्तत्र ऋषिभिर्ब्रह्मवित्तमैः ।
प्रतिलभ्य[३४] तदा संज्ञामिदं वचनमब्रवीत् ॥३४॥
आप्यायय‌ध्वं मां क्षिप्रं मूढोहं सर्वशः सुराः ।
नाल्पवीर्येण शक्योयं दैत्यो योधयितुं रणे ॥३५॥
ततस्ते दैवता[३५]स्सर्वे ऋषयश्च तपोधनाः ।
तपसा[३६]स्वेन तं देवं सर्व एवाभ्यपूरयन्[३७] ॥३६॥
तस्य त्वाप्यायमानस्य[३८] ऋषिभिर्दैवतैश्च[३९] ह ।
बभौ रूपं युगान्ताग्निकालमृत्युसमप्रभम् ॥३७॥
स दीप्यमानो विबभौ महात्मा[४०] देवैश्च सर्वैर्ऋषिभिः स्तुतश्च ।
दीप्तस्तदा[४१] भास्करसप्तकल्पो[४२] लोकान्दहिष्यन्निव देवदेवः ॥३८॥

⊙ इति स्कन्दपुराणे वराहाप्यायने पञ्चोत्तरशतो[४३]ध्यायः ⊙

---

२९ ततोत्पत्य - ख. । ३० नदमानो - ख. । ३१ मृगेश्वरगतिर्योसौ - ख. । ३२ हाहा कृतः - क. । ३३ समूहै - क., मम दैत्येय(न्द्र) पुंगवैः - ख. । ३४ प्रतिपद्य - घ. । ३५ देवता . - क, ख. । ३६ सोंशेन - क. । ३७ ..भ्यपूजयन् - क. । ३८ त्वाप्याय्यमानस्य - क. । ३९...र्दैवतैश्च - क । ४० वराहो - घ । ४१ दीप्तो यथा - घ । ४२ भास्करसप्तिकल्पो (?) - घ. । ४३ चतुरुत्तर० - घ., अध्यायः १६० - ख.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

स तथाप्यायितो व्यास[1] बलवान्भास्करद्युतिः ।
चित्रं बहु च शीघ्रं च मण्डलानि परिभ्रमत्[2] ॥१॥
प्लुतानि[3] सिंहवत् कृत्वा अवलोकयते[4] सकृत् ।
पृष्ठतश्चाग्रतश्चापि[5] पुनर्गजवदाचरत्[6] ॥२॥
पुनर्व्यात्ताननो भूत्वा शस्त्राणि ग्रसते रिपोः ।
पुनर्वृक्षैः शिलाभिश्च[7] दानवान् स न्यसूदयत् ॥३॥
पुनराकाशगो भूत्वा पक्षिराडिव सोभ्रमत् ।
पुनर्जहास संक्रुद्धो ह्यशनीपातसन्निभम् ॥४॥
पुनश्च सूक्ष्ममात्मानं कृत्वा तस्थावथाग्रतः ।
एवन्तं[8] वल्गमानञ्च नर्दमानञ्च दानवः ॥५॥
उवाच भृकुटीवक्त्रो हिरण्याक्षोभिनादयन्[9]
भो क्षुद्रमृग दुर्बुद्धे न त्वं मोक्षमवाप्स्यसि ॥६॥
हत्वा त्वाहं[10] प्रदास्यामि रुद्राय बलिमोजसा ।
त्वया हतश्छद्मना मे भ्राता ज्येष्ठो दुरात्मना ।
तस्याद्य कर्मणः प्राप्तं फलं दुष्टात्मनस्तव ॥७॥

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा हिरण्याक्षस्य संयुगे ।
उवाच भगवान्विष्णुः क्रोधयानो दितेः सुतम्[11] ॥८॥
हतोसौ नरसिंहेन मया दैत्यः प्रतापवान् ।
विक्रम्य संयुगे तद्वद्[12] भवतोपि वधो ध्रुवः[13] ॥९॥
यदि त्वं गच्छसे खं वा पातालं वाप्यतः[14] परम् ।
पर्वतं वोदधिं वापि न तथापि विमोक्ष्यसे ॥१०॥

---

१ दैत्रो - ख घ. । २ परिभ्रमन् - क. । ३ प्लुतादि - क. । ४ अवनोकयतो - क. ख., अवलोकयता - घ. । ५...श्चैव - ख. । ६...चरन् - क. । ७ पुनर्वृक्षाशनाभिश्च - ख. । ८ एवन्तं - क. । ९ निनादयन् - ख. । १० च हं - क. । ११ सुतान् - क. । १२ यद्वत् - ख. । १३ ध्रुवं वधः - ख. । १४ वाप्यतो - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यत्तो बलं तपो यच्च या च[१५] माया तवासुर ।
तत्सर्वं निर्धमाम्यद्य तव देहात् सजीवितम् ।।११।।

हिरण्याक्ष उवाच

त्वं मया शरविद्धब्धो देवैर्मन्त्रैर्विमोक्षितः ।
बद्धं चास्त्रेण भूयस्त्वां पक्षिराजो व्यमोचयत्[१६] ।।१२।।
भूयो मृतस्त्वं[१७] दुर्बुद्धे देवैरुज्जीवितो[१८]भवः[१९] ।
भूयस्त्वाहं[२०] वधिष्यामि सिंहो मृगमिवाजने ।।१३।।
तव का शक्तिरद्येह महेश्वरमृते[२१] वरम् ।
मां स्प्रष्टुमपि हस्तेन नरस्येव हुताशनम् ।।१४।।
त्वं लोकमयमास्थाय शरीरं तैरधिष्ठितम् ।
सर्वैराप्यायितश्चैव संयुगे मामुपागतः ।।१५।।
अहन्तु स्वेन तपसा बलेन च समन्वितः ।
न च मां त्वं तथाप्यद्य शक्तः सिंहं यथा मृगः ।।१६।।
योद्धुं वाप्यभिसर्तुं[२२] वा सह देवैर्दुरात्मवान् ।
न त्वावयोरेतदेव ह्यन्तरं सुमहत्तरम् ।।१७।।
यः स्यात्[२३] कुलीनो विद्वान्वा सतां मार्गे च संस्थितः ।
सोनेनैव जितं मत्वा आत्मानं संयुगं त्यजेत् ।।१८।।
निर्घृणस्त्यक्तलज्जश्च छिद्रघाती दुरात्मवान् ।
त्वदन्यः को भवेत्तिर्यङ[२४] नैतद्दैत्यस्य[२५] विद्यते ।।१९।।
न त्वं मम कृतो मृत्युरहन्तु तव संयुगे ।
एते सिद्धाः प्रपश्यन्तु चारणाश्च सहस्रशः ।
आवयोरन्तरं संख्ये बहुधा युध्यमानयोः ।।२०।।

---

१५ यच्च - क. यश्च - ख. । १६ ह्यमोचयत् - क. ख. । १७ मृतश्च - ख. । १८ हि (ह्युज्जीवितो) - क. ।
१९ भरान् - क. ख. । २० श्चाहं - क. । २१ सहस्व न मृतो - ख. । २२ ...हन्तुं - ख. । २३ यस्मात् - ख. ।
२४ तिर्यो - क., निन्द्यो (?) । २५ दैत्येषु - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

एवमुक्त्वा हिरण्याक्षः शरैराशीविषोपमैः ।
जघ्ने वराहं संक्रुद्धो वज्राशनिसमत्विषम्[२६] ॥२१॥
सोथ तेनार्द्यमानोपि वराहः सुमहाबलः ।
गत्वा वेगेन संक्रुद्धो रथं जग्राह नादयन् ॥२२॥
गृहीत्वा कूबरे चापि आक्षिप्योत्क्षिप्य[२७] वेगवत् ।
साश्वं ससारथिं[२८] देवश्चिक्षेप च ररास च ॥२३॥
तस्य त्वाक्षेपविक्षेपैश्छिन्नयोक्त्राश्च ते हयाः[२९] ।
उद्भ्रान्ता रथमुख्यश्च विसन्धिः समपद्यत ॥२४॥
हिरण्याक्षो रथं त्यक्त्वा पदातिर्धनुषा तदा ।
मृगेन्द्रं मोहनास्त्रेण बलवानभ्यताडयत् ॥२५॥
मोहः समाविशच्चैव तं देवं नन्दिवर्धनम् ।
देवैर्मन्त्रप्रभावेण नष्टमोहः कृतः पुनः[३०] ॥२६॥
एष शस्त्रै[३१]र्बहुविधैर्दैत्येन्द्रो[३२] हि रुषान्वितः ।
आजघान न चाप्येनं रुजा स समयोजयत् ॥२७॥
अथैनं स[३३] महातेजा वराहः प्रहसन्निव ।
वृक्षमुत्पाट्य वेगेन दैत्यं मूर्ध्नि[३४] व्यताडयत्[३५] ॥२८॥
तस्य तेन प्रहारेण दैत्यस्याभिहतस्य ह ।
धनुः पपात वेगेन हस्तावापश्च[३६] पञ्चकः[३७] ॥२९॥
ततो हाहा कृतं दैत्यैर्दानवैश्च सुदुःखितैः ।
शस्त्रैश्च बहुभिः क्रुद्धा वराहं समताडयन् ॥३०॥
स हन्यमानस्तैर्दैत्यैर्व्यदाय सुमहाबलः ।
मुखं[३८] सर्वाणि शस्त्राणि जग्रास[३९] च ररास च ॥३१॥
तत्तथा[४०] विकृतं दृष्ट्वा हिरण्याक्षः प्रतापवान् ।
शूलं जग्राह संक्रुद्धः कृत्वा रुद्राय वै नमः ॥३२॥

२६...सनिसमत्विषम् - क. । २७ आक्षिप्तोत्क्षिप्त - ख. । २८ ससादिनं - घ. । २९...श्वर्तुहयाः - ख. ।
३० पुन.कृतः - क. ख. । ३१ मन्त्रै - क. ख. । ३२ ...दैंत्येन्द्रं - क. ख. । ३३ सु (?) । ३४ दैत्यमूर्ध्नि - ख. ।
३५ न्यपातयत् - ख. । ३६...श्च - ख. । ३७ ह - ख. । ३८ मुखे - क. । ३९ जग्राह - क. ।
४० तन्तथा - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तद्युगान्तानलप्रख्यं महाशूलमतिप्रभम् ।
चिक्षेप दैत्यः संक्रुद्धो वराहाय महास्वनम् ॥३३॥
तमापतन्तं बहुधा नदन्तं ज्वालाः स्फुलिङ्गाश्च समुद्गिरन्तम् ।
दृष्ट्वा सुराः सिद्धगणाश्च सर्वे हाहेति चक्रुर्भयमूढचित्ताः ॥३४॥

⊙ इति स्कन्दपुराणे त्रिशूलाक्षेपणे षडुत्तरशततमोध्यायः ⊙

सनत्कुमार उवाच

तमापतन्तं[१] वेगेन[२] न शूलं[३] दृष्टवान्मृगः ।
दैत्यसन्धे[४] समासक्तः सर्वप्राणिभयङ्करम्[५] ॥१॥
अलक्षितेन तेनासौ शूलेनादितिनन्दनः ।
विभिन्नो[६] हृदये व्यास मृतकल्पः पपात ह[७] ॥२॥
ततो हाहा कृतं भूतैरदृश्यैर्मुनिसत्तम ।
उद्वेलाः सागराश्चासन् भास्करश्चाप्रभोभवत् ॥३॥
उल्काः पेतुश्च सर्वत्र म्लानमाल्याः सुराभवन् ।
ग्रहाणामभवद्युद्धं विमानानि च पेतिरे ॥४॥
जजपुर्मुनयः[८] सर्वे वराहे पतिते तदा ।
महादेवं नमस्कृत्य ब्रह्मा संस्मार तं[९] तदा ॥५॥
ततो वितिमिरं सर्वमभवत् पूर्ववच्छुभम् ।
महादेवं नमस्कृत्य[१०] वराहश्चोदतिष्ठत ॥६॥
तेजो माहेश्वरं दिव्यं विवेश मधुसूदनम् ।
सोप्यायिततनुस्तेन शूलं निष्कृष्य माधवः ॥७॥
सहसानलसंकाशो[११] बभूव स महाबलः ।
ततस्तेनैव शूलेन तं दैत्यं देवनन्दनः[१२] ॥८॥

---

१ तदापतन्तं - घ. । २ तं स्वेन - क. । ३ तं शूलं - क., त्रिशूलं - ख. । ४ दैत्यः - क., दैत्यैः सर्वैः - घ. दैत्यसंघैः(? ,। ५...भयङ्करः - क. । ६ विच्छिन्नो - ख. । ७ च - क. । ८ जजल्पुर्मुनयः - घ. । ९ ब्रह्माणंस्मरणं - ख., संस्कारयत् - घ. । १० प्रकृतिस्थं जगच्चाभूद् - ख. । ११ सहस्रानलसंकाशो- क. । १२दितिनन्दनम् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जघान हृदये क्रुद्धः क्रौञ्चं शक्त्या यथा गुहः ।
स भिन्नहृदयस्तेन वराहेण महासुरः ॥९॥
नार्त्तमानभवद् व्यास कृच्छ्रे विद्वानिव स्थितः ।
मध्ये भिन्नं स तच्छूलं निष्कृष्य च विसृज्य च ॥१०॥
खड्गं निष्कृष्य वेगेन वराहं मूर्ध्न्यताडयत् ।
स तेन सुप्रहारेण[१३] वराहो नन्दिवर्धनः ॥११॥
नार्तिमानभवद् व्यास बभूव रुधिराप्लुतः ।
नानाधातुविचित्रोसौ हिमवानव पर्वतः ॥१२॥
बभौ वराहो देवात्मा सर्वासुरविमर्दनः ।
पुनराहन्तुकामस्य तस्य दैत्यस्य सुव्रत ॥१३॥
अपहस्तप्रहारेण खड्गं हस्तादपातयत् ।
अकुर्वातां ततो युद्धं नियुद्धकुशलावुभौ ॥१४॥
तौ गजाविव संक्रुद्धौ महिषाविव दर्पितौ ।
सिंहाविव च नर्दन्तौ संक्रुद्धौ वृषभाविव ॥१५॥
शरभाविव चायस्तौ[१४] शार्दूलाविव निर्घृणौ ।
परस्परमयुध्येतां परस्परजयैषिणौ ॥१६॥
अंकुशैर्हस्तयोक्त्रैश्च क्षेपणैरपसर्पणैः ।
मण्लैश्च पुनश्चित्रैः कर्षणैरपकर्षणैः ॥१७॥
तलैश्च मुष्टिभिश्चैव भुजैस्स[१५] चरणैरपि ।
नखैश्च दशनैश्चैव तथान्यैश्च महाबलौ ॥१८॥
तयोरेवमभूद्युद्धमुभयोर्देवदैत्ययोः ।
अहानि दश चाष्टौ च तथान्यानि चतुर्दश ॥१९॥
अन्यत्सहस्रमेवासीद्वर्षाणां तच्च मानुषम् ।
एष कालोभवत्तत्र ततो दैत्योबलोभवत् ॥२०॥
तं हीयमानमालक्ष्य दैत्याधिपतिमूर्जितम्[१६] ।
आकाशे वागुवाचेदमशरीराति सुस्वना ॥२१॥

---

१३ तेनासिप्रहारेण (?)। १४ चायत्तौ - क.। १५ भुजैश्च (?)। १६...मूर्जितः - क., ता (?)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

श्रृणु देव वराहेदं श्रुत्वा चैव समाचर ।
अशक्योयं त्वया ह्येवं हन्तुं दैत्यो महाबलः ।।२२।।
अबलोयं कृतः क्रूरो ध्रुवं माहेश्वरेण हि ।
तेजसा पश्य चैवैनमेष कालोस्य वर्तते ।।२३।।
मुक्त्वैनं दैत्यराजानं चक्रेण विनिसूदय ।
माहेश्वरेण वैकुण्ठ ततो मृत्युमवाप्स्यति ।।२४।।

सनत्कुमार उवाच

ततस्तमभिसंश्रुत्य भगवान्नन्दिवर्धनः ।
मुमोच दैत्यराजानं पादेनाहत्य वक्षसि ।।२५।।
स मुक्तस्तेन देवेन विबभौ दैत्यपुंगवः ।
भुक्तमुक्तो यथा सूर्यः सैंहिकेयेन राहुणा ।।२६।।
भगवानपि दीप्यन्तं श्रिया दैत्यं समीक्ष्य तम् ।
सस्मार तत्तदा[१७] चक्रं नमस्कृत्य[१८] पिनाकिनम्[१९] ।।२७।।
ततः सर्वा दिशो व्यास वह्निकुण्डानिभा बभुः ।
शब्दश्च सुमहानासीद्युगान्ताम्बुदसन्निभः[२०] ।।२८।।
सिद्धाः पेतुश्च मेदिन्यां देवाँश्च भयमाविशत् ।
स्वस्त्यस्तु सर्वभूतानामित्यूचुर्मुनयस्तदा[२१] ।।२९।।
सागराश्च व्यशुष्यन्त[२२] विनेशु[२३]र्नागपक्षिणः ।
दैत्याश्च दानवाश्चैव सर्वे ते विविशुर्विलम्[२४] ।।३०।।
भयत्रस्तानि भूतानि उल्काः पेतुर्नभस्तलात् ।
आगच्छति युगान्ताग्निकल्पे चक्रे[२५] सुभास्वरे ।।३१।।
क्षुरान्तं तन्महाचक्रं मज्जज्जलचरान्तकम्[२६] ।
दुर्निरीक्ष्यं सर्वघाति अभेद्यं प्रतिघाति[२७] च ।।३२।।

---

१७ तन्तदा - क. ख. । १८ नमस्कृत्वा - ख. । १९ पिनाकिने - ख. । २० ...वन्नदन् - ख. ।
२१ ...स्सदा - ख. । २२ सागरश्चोपशुष्यन्ति - क. । २३ विवे(वि?) शु - ख. । २४ विविशु. परम् - ख. ।
२५ कालचक्रे - क. । २६ गर्जज्जलधरोपम (?) । २७ अभेद्यमविघात - ख ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तथाप्रतिहतं दिव्यं मोहनं सर्वदेहिनाम् ।
करमागाद्धराहस्य शताशनिसमस्वनम् ॥३३॥
तदापतन्तं[२८] संवीक्ष्य सर्वभूतानि सर्वतः ।
पेतुर्भूमौ महाघोरमपश्यन्न च किञ्चन ॥३४॥
सोपि देवस्तदा कृत्वा रूपं सुमहदव्ययम् ।
त्रैलोक्यव्यापि चिक्षेप दानवं प्रति नादयन् ॥३५॥
तद्युगान्तानलप्रख्यं क्षुरान्तं[२९] स्फोटयन्नभः ।
जगाम दानवं क्षिप्रं दिशः सर्वा दहन्निव ॥३६॥
तत् स दानवशार्दूल[३०] उपयान्तं महारवम् ।
जघानास्त्रैर्बहुविधैरव्यथः[३१] शक्तिनन्दन ॥३७॥
तच्च तानि महाचक्रमस्त्राण्यनलसन्निभम् ।
चकार भस्मसाद् व्यास जगाम च विनादयन् ॥३८॥
अथ मायां समसृजत्[३२] तैजसीं पार्थिवीमपि[३३] ।
वायवीं[३४] वारुणीञ्चैव तामसीमिन्द्रियात्मिकाम्[३५] ॥३९॥
तथैवोत्पातकीं मायां मोहनीं स्तम्भनीमपि[३६] ।
निवर्तनीं जम्भनीं च चकारान्याश्च संयुगे ॥४०॥
ताः सर्वास्त[३७]त्तदा चक्रं नाशयद्[३८] भीमनादवत् ।
गत्वा[३९] तस्य शिरः कायादुन्ममाथ यथाचलम् ॥४१॥

तत्तेन कृत्तं सुमहच्छिरोग्र्यं[४०] व्यात्ताननाग्निप्रतिमोग्रनेत्रम्[४१] ।
दंष्ट्रालमत्यद्भुतभीमनादं[४२] पपात मेरोरिव शृङ्गमुच्चम्[४३] ॥४२॥
रथाङ्गनिष्पीतवपुर्विरागं न भाति तद्वक्त्रमतीव दीनम् ।
निशाप्रहाणे[४४] विनिवृत्तरश्मि बिम्बं[४५] यथा चन्द्रमसो विशोभम् ॥४३॥

---

२८ तदापतन्तं - क ख. । २९ क्षुरन्तं - क. । ३० तं स तं नवशार्दूल - क. । ३१ ...रव्यथैः - ख. ।
३२ समावर्जत् - क., ...मसार्ज्यन्त - ख. । ३३ पार्थिवानपि - क. ख. । ३४ वायव्यां - ख. क. ।
३५ ...यात्मकां - ख. । ३६ स्तम्भिनीमपि - ख. । ३७ तां सर्वां तां - क. ख. । ३८ सुमहद् - क. ख., ताः सर्वाणि गृहीत्वा तु - घ । ३९ भित्त्वा - घ. । ४० ...च्छिरोग्रं - ख. । ४१ व्यात्तानमग्निप्रतिमोग्रनेत्रम् - क. ।
४२ दंष्ट्राकरालाद्भुतभीमनादं - घ. । ४३ शृङ्गमुच्छ्रम् - ख. । ४४ ...प्रहाणो - क., प्रहाणौ - ख. ।
४५ ...विम्व - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तद्दन्तपंक्तिच्छदमादशानं मुहुश्च दन्तानपि[४६] संदशानम् ।
पपात दैत्यस्य शिरो निकृत्तं यथा गिरेः श्रृङ्गमतिप्रवृद्धम् ॥४४॥

⊙ इति स्कन्दपुराणे हिरण्याक्षवधे सप्तोत्तरशतोध्यायः ।

सनत्कुमार उवाच

तस्मिन्विनिहते दैत्ये सुराः सर्वेभितुष्टुवुः ।
ऋषयश्च तपोयुक्ताः पुष्पवृष्टचश्च पेतिरे[१] ॥१॥
देवदुन्दुभयो नेदुरदृश्याः सुमहास्वनाः ।
भूतानां चाभवच्छर्म प्रकृतिस्थं जगद्बभौ ॥२॥
जगामादृश्यतां चक्रं ततः[२] स्वस्थाभवन् सुराः ।
ऋषयश्चैव लोकाश्च दैत्यं तं[३] ददृशुर्हतम् ॥३॥
असुरा अपि ते सर्वे[४] पुरद्वाराणि सर्वशः ।
पिधाय यत्नात्[५] सन्नद्धाः प्राकरेष्ववतस्थिरे ॥४॥
ते भीता मुक्तकेशाश्च रजोध्वस्ता भयार्दिताः ।
जीवितं सं[६]परीप्सन्तः स्थिताः प्राकारगा[७]स्तदा ॥५॥
भगवानपि दीप्तार्चिर्हविषेद्ध[८] इवानलः ।
भीषयानोसुरान्सर्वान् पृथिवीमन्वचिन्वत ॥६॥
स बहिः सर्वतोन्विष्य[९] उत्पाटच्य च महीरुहान् ।
प्रणष्टामिव गां गोपः समन्तादन्वचिन्वत ॥७॥
पर्वतान्स तदोत्पाटच[१०] दैत्योद्यानान्यचूर्णयत्[११] ।
आरामान् स तडागानि बभञ्ज च ररास च ॥८॥
ततो दक्षिणतो गत्वा मुहूर्त्तं देवसत्तमः ।
शंखं पर्वतमासाद्य ननर्द जलदो यथा ॥९॥

---

४६ दन्तान्यपि - क. ख. ।
१ पेदिरे - ख. । २ बभुः - क । ३ दैत्यश्च - क. ख. । ४ ...पि हितैस्सर्वे - क., अपि - घ. । ५ यत्ताः - घ. ।
६ स्वं - घ. । ७ प्रकारान्तरगा - घ. । ८ हविषाक्त - ख. । ९ सर्वतोत्क्षिप्य वेगेन - घ. ।
१० ततोत्पाटच - ख. । ११ देवोद्यानान्यचूर्णयत् - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अपुरा ह्यपि ते[१२] भीताः प्राकारान्तरसंस्थिताः ।
अवैक्षन्त मृगेन्द्रं तं धावन्तं सर्वतोदिशः ॥१०॥
सोपि देवस्तदा शंखमुत्पाट्य नगमुत्तमम् ।
अपश्यत् पृथिवीं बद्धां रक्ष्यमाणां च दानवैः ॥११॥
सागराम्भसि विक्षिप्य शंखं तं पर्वतोत्तमम् ।
अवधीद्दानवान् सर्वान् मेदिन्या येभिरक्षिणः ॥१२॥
ततो विद्राव्य नागेन्द्रान् प्रगृह्य पृथिवीं बलात् ।
जगाम दैत्यान् सन्धृष्य[१३] रत्नान्यदाय सर्वशः ॥१३॥
स तां दंष्ट्रांकुरे[१४] लग्नां वहन् भाति मृगेश्वरः ।
विषाणलग्नां लम्बन्तीं मृणालीं गजराडिव ॥१४॥
स तां सागरमध्येन वहन्भाति मृगेश्वरः ।
वराहरूपी कालान्ते ब्रह्मेव वसुधां पुरा[१५] ॥१५॥
स सागरन्तमुत्तीर्य[१६] भगवान्नन्दिवर्धनः ।
स्वस्थाने स्थापयामास महीं तां पुनरेव हि ॥१६॥
ततःशक्राय लोकाँस्त्रीनदात् स मधुसूदनः ।
उवाच राजा त्वन्नोद्य मित्रश्चाहं[१७] तवानघ ॥१७॥
येन्येपि तेरयः केचिद्धुविष्यन्त्यसुरेश्वराः ।
तेषामपि वधं घोरं करिष्यामि न संशयः ॥१८॥
ततस्तमृषयः सर्वे देवताश्च सवासवाः ।
ऊचुःस्त्वां मूर्त्तिमास्थाय यथा पूर्वं तथा भव ॥१९॥

वराह उवाच

इयं मूर्त्तिर्मया देवाः प्राप्ता परमवर्च्चसा[१८] ।
न चानया रतिः काचित् प्राप्ता मे सदृशी[१९] भुवि ॥२०॥

---

१२ ...पि हि ते - क. ख. । १३ सन्दृश्य - क. । १४ दंष्ट्रान्तरे - ख. । १५ परा - ख. । १६ सागरान्त-मुनीर्य (?) । १७ ..श्चाहं - क । १८ परमवर्च्चसः - ख । १९ सदृसा - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सोहं कञ्चिद्[२०] विहृत्येह कालं मूर्त्यानया सुखम् ।
भविष्यामि पुनर्देवः[२१] सत्यमेतद् ब्रवीमि वः ॥२१॥

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा सर्वे देवाः सवासवाः ।
प्रदक्षिणमुपावृत्य जग्मुः स्थानानि सर्वशः ।२२॥
गतेषु देवसंघेषु भगवान्नन्दिवर्धनः ।
विजहार सुखं तत्र हत्वा दानवपुंगवम् ॥२३॥
तस्य तत्रोपतिष्ठन्त[२२] मृग्यो भूत्वा सहस्रशः ।
वैदिक्योऽप्सरसः शुभ्रास्ताभिस्सह रराम सः[२३] ॥२४॥
स ताभिर्विचरन्देवो महात्मा नन्दिवर्धनः ।
रेमे मत्तो महानागो यथारण्ये करेणुभिः ॥२५॥
स सिंह इव सिंहीभिः शार्दूल इव चोन्नदनन् ।
रराम सागरानूपे[२४] ऐरावत इवापरः ॥२६॥
रममाणस्य सिद्धाश्च ऋषयश्च तपोधनाः ।
पुष्पाणां रुचिरा वृष्टीः पातयन्ति वियत्स्थिताः ॥२७॥
तष्टुवुश्चापरे नित्यं चक्रुश्चैनं प्रदक्षिणम् ।
देवदुन्दुभयो नित्यं सर्व[२५] एवान्ववादयन् ॥२८॥
नृत्यन्त्यप्सरसश्चास्य[२६] वराहस्याग्रतस्तदा ।
वादयन्ति च गन्धर्वा गायन्ति च महात्मनः ॥२९॥
रमयन्तो[२७] वराहन्तं देवाश्चेन्द्रपुरोगमाः ।
यक्षाः पुण्यजनना ये च तथा देवजनाश्च ये ॥३०॥
यातुधानाश्च ये केचिद् ब्रह्मधानाश्च सर्वशः ।
मनुष्याः पशवश्चैव ऋषयश्चैव सर्वशः ॥३१॥
राजन्याः क्षत्रियाः सर्वे निकायाश्चैव सर्वशः ।
तत्राजग्मुर्निरीक्षन्तो वराहस्योत्सवं[२८] शुभम् ॥३२॥

२० कश्चिद् - ख. । २१ पुनर्देवाः - क. । २२...पविष्टन्तं - ख. । २३ च - ख. । २४ सागराम्भस्सु - ख ।
२५ गन्ध - क. । २६ ...श्चापि - ख. । २७ रामयन्तो - ख. । २८ वंराहस्योत्तम - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

बह्वाश्चर्यसमाकीर्णं बह्वालक्ष्यं सदैव च ।
एवं तस्याभवद् व्यास वराहस्य महात्मनः ।
उत्सवः सुमहान् दिव्यः प्रत्यहं नन्दिवर्धनः ॥३३॥
तस्योत्सोवोसौ ऋषिसंघजुष्टः सदा सुरैः सिद्धजनैश्च जुष्टः ।
गन्धर्वयक्षोरगराक्षसैश्च विद्याधरैश्चैव सहाप्सरोभिः ॥३४॥

⊙ इति स्कन्दपुराणे वराहोत्सवे[२९] अष्टोत्तरशतोध्यायः[३०] ⊙

सनत्कुमार उवाच

तस्य कालेन महता रमतः शक्तिनन्दन ।
भार्यायां चित्रलेखायां वृकोनाम्ना[१] भवत्सुतः ॥१॥
स वृको बलवान्नित्यं विचरन् पृथिवीमिमाम् ।
नर्दमानोवधील्लोके भूतानि शतशो महान् ॥२॥
अथाससाद शैलेन्द्रं हिमवन्तं महागिरिम् ।
गौरीकूटसमीपे च कार्तिकेयालयं शुभम् ॥३॥
तमजानँस्तदाभ्येत्य बलेनाविनयेन[२] च ।
नादयानो[३] द्रुमाञ्छुभ्रान् रत्नहेमविभूषितान् ॥४॥
सर्वर्तुपुष्पफलदान्[४] सर्वकामप्रदानपि ।
शिलामणिमयाः शुभ्राः शातकुम्भमयास्तथा[५] ॥५॥
हरितालमयाश्चान्यास्तथा मानःशिलोपालान्[६] ।
उत्पाट्योत्पाट्य वेगेन बभञ्ज रुषितो यथा ॥६॥
स गर्जमानः सततं गजो मत्त[७] इवापरः ।
बभञ्ज तद्वनं शुभ्रं कार्तिकेस्य धीमतः ॥७॥
तस्य गर्जितशब्देन वनभङ्गस्वनेन च ।
स्कन्दस्य गणपः शूरो निर्जगाम स मन्दिरात्[८] ॥८॥

---

२९ नन्दिवराहवर्णनो नाम - क. । ३० तमोध्यायः अध्यायः १६२ (१७२?) - ख., १८७ घ. ।
१ नाम - क । २ विजनेन - ख. । ३ नोदयानो - ख. । ४ सर्वर्तुकफलान्पुष्पान् - ख. ५ ...श्शुभाः - क. ।
६ . मानःशिलोचलाः - क. । ७ गजोन्मत्त - क. । ८ निशामयन् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कोकवक्त्र इति ख्यतो दृढं स्कन्दस्य वल्लभः ।
महात्मा बलसंपन्नो गत्वा वृकमवैक्षत ॥९॥
स तं दृष्ट्वा महाकायं तरुणं प्रियदर्शनम् ।
जीमूतमिव नर्दन्तं किञ्चित्प्रकुपिताननम् ॥१०॥
उवाच वचनं हृष्टः[९] कोकवक्त्रो हसन्निव ।
कस्य त्वमिह संप्राप्तो बालो देवगृहं शुभम् ॥११॥
न जानीषे किमेतत्त्वं[१०] स्कन्दस्य सुमहात्मनः ।
वेश्म देवैस्सगन्धर्वैःसयक्षोरगकिन्नरैः[११] ॥१२॥
कृतं दयितमत्यर्थं गणैश्चापि सुपूजितम्[१२] ।
कुमारो मन्दरं यातः सर्वैस्सह गणेश्वरैः ॥१३॥
रक्षार्थं मामिह स्थाप्य[१३] वारयामि[१४] ततो[१५] हि ते ।
तुष्टोस्मि तव रूपेण बलेन वपुषा[१६] तथा ॥१४॥
उपारमस्व तेन[१७] त्वां ब्रवीमि सुमहाबल ।
अहं करिष्ये यद् भग्नं तथैव पुनरेव हि ॥१५॥
वक्ष्ये देवं च तं सम्यक् त्वदर्थं[१८] शूकरेश्वर ।
यथा न कुप्यते तुभ्यं प्रसादं ते[१९] करोति च ॥१६॥

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा वृकः संरक्तलोचनः ।
उवाच कोकवदनमिदं मृगपतिस्तदा[२०] ॥१७॥
न बिभेमि कुमारस्य तव वा पापचेतसः ।
बले मम कुमारोसौ न तुल्यः सगणेश्वरः ॥१८॥
यद्वो बलञ्च दर्पश्च[२१] तत् कुरुध्वमशंकिताः ।
नामावशेषमेतद्वः कर्ताहं वनमन्ततः ॥१९॥

---

९ दृष्टः - क. । १० किमेतच्च – क. ख. । ११ ...पन्नगैः - क. ख. । १२ गणेशैश्चापि पूजितम् - ख. । १३ प्राप्तो - ख. । १४ वरयामि - क. । १५ तते - क. । १६ पुरुपा (त्) - क. ख. । १७ उमावमसुतेन - घ. । १८ तवार्थं - ख. । १९ प्रवरं त्वां - क ख. । २० ...स्तथा - ख. । २१ दर्पंश्च - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

ततः स वृक्षमुत्पाट्य हैमं वैदूर्यपल्लवम् ।
कोकवक्त्राय चिक्षेप ननाद च यथा वृषः ।।२०।।
ततः प्रहस्य कोकास्यस्तमेवोद्गृह्य पादपम् ।
वृकं तं तेन संक्रुद्धः शिरस्यभिजघान ह ।।२१।।
स तेन सुप्रहारेण भ्रमित्वा मण्डलं मृगः[२२] ।
पपात भूमौ निःसंज्ञो यथा शक्रध्वजो महान् ।।२२।।
ततस्तं पतितं दृष्ट्वा कोकास्यः प्रहसँस्तदा ।
बबन्ध पाशैर्बहुभिर्वेश्म चैव प्रवेशयत् ।।२३।।
तं वद्धं पतितं दृष्ट्वा सहायास्तस्य ते मृगाः ।
प्रद्रुता सहसा सर्वे भयार्ता जीवितैषिणः ।।२४।।
अथागात्तेन कालेन गणपैर्बहुभिर्वृतः ।
कार्तिकेयो मयूरेण कूजमानेन सानुगः ।।२५।।
तस्य तत् कथयामास कोकवक्त्रो गणेश्वरः ।
वृकं च दर्शयामास पाशैर्बद्धं महाबलम् ।।२६।।

कोकवक्त्र उवाच

भगवन् वराहरूपस्य सुतः श्रीमान् वृकः किल ।
हिरण्याक्षो हतो येन दानवो देवकण्टकः ।।२७।।
बभञ्जायं सुदुष्टात्मा[२३] सहितोन्यैर्वनं तव ।
ततः पाशैर्मया बद्धः क्रियतामस्य यत् परम् ।।२८।।

स्कन्द उवाच

नायं शक्यो मयाद्येह मोक्तुं मृगकुलाधमः ।
मुक्ते वक्तव्यता लोके भविष्यति न संशय ।।२९।।
देवो मां वक्ष्यते[२४] व्यक्तं स्कन्दो भीतो न संशयः ।
यो मुमोच सुतं तस्य वराहस्य कृतागसम् ।।३०।।

२२ वृकः - ख. । २३ सुदुष्टात्मा - ख. । २४ लक्ष्यते - ख ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

उक्तो गतश्चाहमद्य स्थाणुना परमात्मना ।
मा क्षमेथा वराहस्य तनुं त्वा[२५] सौ[२६] ह्वयेद्यदि[२७] ॥३१॥
इयञ्च मम तेनाद्य शक्तिर्दत्तातिभास्वरा ।
संवर्त्तिकेति[२८] विख्याता सर्वास्त्रबलनाशनी ॥३२॥
सोयं[२९] दुरात्मा दुर्वृत्तः सर्वलोकप्रबाधकः ।
गृह्यतां वध्यतां चैव क्षिप्रमाविष्कृतं बलात् (?) ॥३३॥

सनत्कुमार उवाच

तत एनं बहिस्सर्वे स्कन्दस्य गणनायकाः ।
बद्ध्वा बहुविधैः पाशैर्यातयन्त सहस्रशः[३०] ॥३४॥
स यात्यमानो दुःखार्त्तो विललाप यथा नरः ।
निरयस्थो दुराचारः कर्मभिः स्वैः सुपाशितः[३१] ॥३५॥
तं यात्यमानं सन्दृश्य नारदः सुमहातपाः ।
गत्वा न्यवेदयत्तस्य[३२] वराहस्यामितात्मनः ॥३६॥
एष पुत्रो वृकस्तुभ्यं बद्धः पाशैरनेकशः ।
यात्यते कार्तिकेयस्य किङ्करैर्दुष्कृती यथा ॥३७॥
न नाम तव देवस्य लोकार्थायोद्यतस्य चा[३३] ।
करोति सन्नतिं स्कन्दो बालभावाच्च रोषतः[३४] ॥३८॥
अथवा स्वमलं[३५] स्कन्दो मन्यते बलवत्तरम् ।
त्वत्तोत्मनस्ततः पुत्रं तव पाशैर्बबन्ध ह ॥३९॥
तद्यावदेव तं नासौ प्रमापयति देवप ।
तावदेव भवान् गत्वा विमोचयतु मा चिरम् ॥४०॥

सनत्कुमार उवाच

नारदस्य वचः श्रुत्वा वराहो नन्दिवर्धनः ।
जीमूत इव कालान्ते ननाद रूषिताननः ॥४१॥

---

२५ तनुक्त्वा? - ख. । २६ सो - क. ख. । २७ ...द्युधि - क. ख., ...द्यदि (?) । २८ संवर्त्तकेति - ख. ।
२९ योयं - ख. । ३० ...न्तस्सहस्रशः - ख. । ३१ सुपातितः - ख । ३२ निवेदयामास - ख. ।
३३ ह - ख. । ३४ ...न्मिरामतः - ख. । ३५ स्वबलं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तस्य क्रोधात्तदा वह्निर्नेत्राभ्यामति दीप्तिमान् ।
निश्चक्राम जगत् सर्वं संहरन्निव तेजसा ॥४२॥
उत्थाय चासनाद्देवः सहसैवोग्निरीक्षणः[३६] ।
प्रतस्थे शिखरं दिव्यं गौर्या मृगपतिः स्वयम् ॥४३॥
स कम्पयन्महीं सर्वां स्तूयमानो महात्मभिः ।
उत्पातानुत्थितान्[३७] पश्यन् जगामा[३८]विनिवारितः ॥४४॥
गच्छतस्तस्य देवस्य पन्थानं भुजगोच्छिनत् ।
दंष्ट्रा च वृक्षमापत्य[३९] पपात धरणीतले ॥४५॥
रुधिरं चास्त्रवद्वक्त्राद्धृदयञ्च प्रवेपत ।
भयञ्चास्याभवत्तत्र वेगो येनाभिहन्यते[४०] ॥४६॥
वायवः प्रतिलोमाश्च उरसा चापतद् भुवि ।
स्नेह[४१]श्चास्य प्रियां स्मृत्वा तदात्यर्थमजायत ॥४७॥
एताँश्चान्यान् सुबहुश[४२] उत्पातान् भयसूचकान् ।
अनादृत्य मृगेन्द्रोसौ जगामैव महाबलः ॥४८॥
तं प्रस्थितमभिप्रेक्ष्य निमित्तानि च सुव्रत ।
पूजां सज्जामकुर्वन्ते[४३] देलवोके दिवौकसः ॥४९॥
स सिद्धसंघैरनुगम्यमानो यक्षैश्च गन्धर्वमहोरगैश्च ।
रक्षोगणैश्चारणकिन्नरैश्च जगाम गौरीशिखरं महात्मा ॥५०॥

⊙ इति स्कन्दपुराणे वृकबन्धो नाम नवोत्तरशतोध्यायः ⊙

सनत्कुमार उवाच

विनिर्गम्य कुमारोपि रम्यात् स्वभवनात्तदा ।
रराम गणपैः[१] सार्धं क्रीडनैर्बहुभिः शुभैः ॥१॥
आनयामास तञ्चापि वराहस्य सुतं प्रभुः ।
वृकं विमुच्य पाशेभ्य[२] उत्ससर्ज हसन् विभुः[३] ॥२॥

---

३६ ...वोग्निरीक्षणः - ख., वाग्निरीक्षणः - क । ३७ ...न्भयदान् - ख. । ३८ जगाम - क. ।
३९ ...मापात्य - क. । ४० भिमन्यते - क. ख. । ४१ .. स्वेह (स्वेद?) - ख. । ४२...श्चान्यांश्च बहुशः - ख. ।
४३ ...मकुर्वन्त - क. ख. ।

१ रेमे गणेश्वरैः (?) । २ पाशैश्च - क. ख. । ३ प्रभुः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

उत्सृष्टं धावमानञ्च पुनर्जग्राह वेगितम् ।
पुनरेवोत्सृजच्चैनं[४] जग्राह च पुनः पुनः ।
एवं रराम[५] तेनासौ वराहोभ्यागमच्च[६] तम् ।।३।।
शिलां गृहीत्वा महतीं संक्रुद्धोन्तकसन्निभः ।
चिक्षेप कार्त्तिकेयाय[७] नादयन् जलदो यथा ।।४।।
तामापतन्तीं बहुधा नदन्तीं विहायसा मृत्युसमानरूपाम् ।
जग्राह वेगेन महातिवेगां[८] कोकामुखः प्रज्वलितामिवोल्काम् ।।५।।
ततश्चक्रं सहस्रारं युगान्ताग्निसमप्रभम् ।
विनायकस्याव्यग्राय गणाय व्यसृजत् प्रभुः ।।६।।
तदन्तकप्रतीकाशं[९] चक्रं सर्वसुरारिहम्[१०] ।
विवेश (?) सगणस्तूर्णं[११] ततस्तद् विन्यवर्तत ।।७।।
तन्निवृत्तं पुनश्चक्रमकृत्वा कार्यमुज्ज्वलम् ।
न जग्राह तदा विष्णुरवमेने च तत्तदा ।।८।।
तत्तदानर्चितं तेन चक्रं दानवघातिना ।
विष्णुना प्रययौ क्षिप्रं स्वमेव भवनं प्रति ।।९।।
तस्मिश्चक्रे तदा याते भगवान्नन्दिवर्धनः ।
वृक्षमुत्पाट्य वेगेन कुमारमभिजघ्निवान् ।।१०।।
अगण्य तं प्रहारन्तु भगवाननलात्मजः ।
शक्तिं संवर्त्तिकां[१२] क्रोधाच्चिक्षेप च ननाद च ।।११।।
सा दहन्तीव[१३] तेजांसि नदन्ती बहुधा तदा ।
हन्तुं वराहं प्रययौ शक्तिर्दिव्य इवाशुगः ।।१२।।
तामापमन्तीं वेगेन भगवान्नन्दिवर्धनः ।
जघानास्त्रैर्बहुविधैर्नादयन् सिंहराडिव ।।१३।।
तानि सा भस्मसात् कृत्वा शक्तिः संवर्त्तिका शुभा ।
विवेश हृदयं तस्य कामिनीव दृढं प्रिया[१४] ।।१४।।

---

४ पुनरेवोत्सृजच्चैव - ख. । ५ रेमे स (?) । ६ ...भ्यासयच्च - क, ...भ्यागतश्च - ख. । ७ कार्तिकेयश्च- ख. ।
८ सहातिवेगां - क. । ९ तमन्तकप्रतीकाशं - क. । १० सर्वसुरारिघम् - क. । ११ ...न्तूर्णं - ख. ।
१२ संवर्त्तकां - क., संवर्षिकां - ख. । १३ दहन्निह - ख. । १४ दृढप्रिया - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स तया भिन्नहृदयो योगेन परमेण ह ।
योगीव देहं तं त्यक्त्वा[१५] देहेनान्येन तस्थिवान् ॥१५॥
सोन्यद्देहं[१६] समास्थाय पौराणं सुरसत्तमः ।
देवैः सर्वैः परिवृतो जगाम भवमन्दिरम् ॥१६॥
तत्रापश्यन्महादेवं जटामुकुटधारिणम् ।
चन्द्रलेखांशुजालौघनिरस्ततिमिरोत्करम् ॥१७॥
भद्रपीठे[१७] समासीनं काञ्चने मणिभूषणे[१८] ।
भ्राजमानं श्रियात्यर्थं पार्वत्या पार्श्वसंस्थया ॥१८॥
गणैश्च विविधाकारैर्बहुभिःकामरूपिभिः ।
नृत्तगीतप्रियैर्नित्यं समन्तात् परिवारितम् ॥१९॥
तं दृष्ट्वा शंकरं विष्णुः प्रसन्नेनान्तरात्मना ।
तुष्टाव विविधैः स्तोत्रैरिदञ्चोवाच सुस्वरम् ॥२०॥
वाराहं[१९] रूपमास्थाय त्वत्तोजोबृंहितेन मे ।
रणे विक्रम्य भगवन् हिरण्याक्षो निषूदितः ॥२१॥
त्वं देव कारणं नित्यं संभूतेः प्रलयस्य च ।
त्वया सर्वमिदं व्याप्तं जगदव्यक्तमूर्त्तिना ॥२२॥
त्वत्प्रसादेन देवेश ब्रह्माहं शक्र एव च ।
पूज्याः स्म लोके सततं तथैवान्ये दिवौकसः ॥२३॥
त्वयि प्रीते महादेव सर्वे प्रीता वयं प्रभो ।
त्वयि क्रुद्धे विनाशो[२०] नो भविता नात्र संशयः ॥२४॥
स्तुवन्तमेवं भगवान् विष्णुं चन्द्रार्धशेखरः ।
सहस्रसूर्यतेजस्कः प्रीतः प्रोवाच शंकरः ॥२५॥
भक्त्या तुष्टोस्मि[२१] ते विष्णो देवकार्योद्यमेन च ।
वरं वरय भद्रन्ते यस्ते मनसि वर्तते ॥२६॥

---

१५ संत्यज्य - क., संत्यक्त्वा - ख. । १६ सोन्यदेहं - ख. । १७ चन्द्रपीठे - क. । १८ काञ्चनैर्मणिभूषणैः - ख., । १९ वराह - ख. । २० च नाशो - ख. । २१ क्रुतोस्मि - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विष्णुरुवाच

यदि तुष्टोसि नो देव यदि देयो वरश्च नः ।
यत्तत् पापहरं[२२] दिव्यं व्रतमादेष्टुमर्हसि ।।२७।।
यदाश्रित्य वयं सर्वे सशक्रास्सार्वकामिकम्[२३] ।
युद्धे जेष्याम दैतेयान् दुःखशोकविवर्जिताः ।।२८।।

देवदेव उवाच

हन्त वः कथयिष्यामि गुह्यमेतत् सनातनम् ।
व्रतं पाशुपतं दिव्यं येन कामानवाप्स्यथ ।।२९।।
इत्युक्त्वा देवदेवेशो देवानां हितकाम्यया ।
ययौ दिवमथामन्त्र्य देवीं गिरिवरात्मजाम् ।।३।।
अथ हिमगिरितुल्यचारुमूर्त्ति वृषभवरं[२४] भगवाँस्तदाधिरूढः[२५] ।
सुरगणसहितः प्रभुस्सुमेरुं व्रतमुपदेष्टुमना जगाम शर्वः ।।३१।।

⊙ इति स्कन्दपुराणे हिरण्याक्षवधे वराहरूपसंहारे देवदेवस्य देवलोकगमनं नाम दशोत्तरशतोध्यायः[२६] ⊙

व्यास उवाच[१]

गते दिवं महादेवे व्रतमादेष्टुमुत्तमम् ।
एकाकिनी महादेवी किञ्चक्रे तदनन्तरम् ।।१।।

सनत्कुमार उवाच

गते दिवं[२] महादेवे देवीं गिरिवरात्मजाम् ।
उपतस्थुर्महाभागा देव्यो लोकस्य मातरः ।।२।।
भरतस्य सुताग्नेस्तु मालिनीत्यभिविश्रुता ।
शुचावती च देवस्य पर्जन्यस्य सुताव्यया ।।३।।

---

२२ ततः पाशुपतं - ख । २३ ...स्सर्वकामिकम् - क. । २४ चारुमूर्तिर्वृषभवरं - ख. । २५ ...भिरूढः - क. ।
२६ १६४ - ख. ।
१ सन उ - क. । २ तस्मिन् - क ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सावित्री वेदमाता[३] च गायत्री दुर्गया सह ।
श्रीः कीर्तिश्चैव लक्ष्मीश्च धृतिः प्रज्ञा तथैव च ॥४॥
ख्यातिर्दितिर्दनुश्चैव अदितिः सिंहिका खशा[४] ।
राका कुहूःसिनीवाली तथैवानुमतिः[५] शुभा ॥५॥
गङ्गा सरस्वती चैव तथान्याः सरितः शुभाः ।
ऋषीणां चैव याः पत्न्यो[६] देवानां यक्षरक्षसाम् ।
उरगाणां खगानाञ्च गन्धर्वाणां तथैव च ॥६॥
एतास्सर्वास्तथागम्य नमस्कृत्य[७] च पार्वतीम् ।
पप्रच्छुः सर्वधर्मज्ञा धर्मं धर्मार्थसंश्रिताः ॥७॥
केन धर्मेण देवेशे तपसा वा शुभानने ।
सुमहत् प्राप्यते पुण्यं किञ्चाक्षय्यं प्रकीर्तितम् ॥८॥

देव्युवाच

युस्माकन्तु हितार्थाय लोकानाञ्चैव सुव्रताः ।
कथयिष्याम्यहं धर्मं यथावदनुपूर्वशः ॥९॥
अन्नदानात् परं दानं नैव किञ्चिद्धि[८] विद्यते ।
अन्नाद् भवन्ति भूतानि[९] तस्मात्तदधिकं स्मृतम् ॥१०॥
अन्नं यस्तु सुसंस्कृत्य प्रयच्छेत द्विजातये ।
स सर्वकामानाप्नोति[१०] पूज्यते च त्रिविष्टपे ॥११॥
मयूरहंसयुक्तेन[११] सर्वकामसमृद्धिना[१२] ।
विमानेनार्कभासेन[१३] अन्नदो याति वै दिवम्[१४] ॥१२॥
यदि मानुष्यमायाति[१५] कदाचित् स नरोत्तमः ।
धनधान्यसमाकीर्णः कुलीनः स्याच्च[१६] रूपवान् ॥१३॥
यथाशक्ति तु यो दद्याद् दिवसे दिवसे नरः ।
स तेन कर्मणाप्नोति प्रजापतिसलोकताम् ॥१४॥

---

३ देवमाता - क । ४ स्वपा - ख. । ५ ...नुमती - क. ख. । ६ ऋषीणां पत्नयो याश्च - क. ख. ।
७ नमस्कृत्वा - क. ख. । ८ ...श्च (...च्च) - क. । ९ सत्वानि - ख. । १० सर्वकामानवाप्नोति - क. ।
११ मयूरहंसयुक्तं च - क. । १२... समृद्धिमत् - क. । १३ विमानं सूर्यसंकाशं - क. । १४ लभते
शुभम् - क. १५ मानुष्यांतां याति - ख. । १६ ...समाकीर्णे कुले जायति - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कदाचिदपि यो दद्यादन्नं विप्राय संस्कृतम् ।
तस्यापि तच्छतगुणं सहस्रगुणमेव च ॥१५॥
उपतिष्ठति लोकेषु इहापि च सुखी भवेत् ।
अवधूतमवज्ञातमसत्कृतमथापि[१७]च ॥१६॥
अन्नं प्रदद्याद्यो देव्यो[१८] यादृशं तादृशं शुभा:[१९] ।
तस्यापि नरके घोरे यात्यमानस्य राक्षसैः ॥१७॥
उपतिष्ठेत बहुधा तृप्तिर्येनास्य जायते[२०] ।
यदि मानुष्यमायाति कदाचित् स नरः पुनः ॥१८॥
म्लेच्छेषु भोगी भवति रमते च यथासरः ।
अन्नेमेवं विशिष्टं हि तस्मान्न परमं[२१] भुवि ॥१९॥
अन्नं प्रजापतिः प्रोक्तं स च संवत्सरो मतः ।
संवत्सरश्च यज्ञोसौ यज्ञे सर्वं प्रतिष्ठितम् ॥२०॥
तस्माद् भवन्ति भूतानि स्थावराणि चराणि च ।
तस्मादन्नं विशिष्ठन्तु सर्वेभ्य इति वै श्रुतिः ॥२१॥
अन्नदानात्परं दानं नैव किञ्चिद्धि विद्यते ।
अन्नाद् भवन्ति भूतानि तस्मात्तद्ध[२२] प्रशस्यते ॥२२॥
सुगन्धाः शीतलाश्चापो रसैर्दिव्यैः समन्विताः ।
यः प्रयच्छति विप्रेभ्यस्तस्य दानफलं शृणु ॥२३॥
विमानं सूर्यसंकाशमप्सरोगणनादितम् ।
सोधिरूह्य दिवं याति वरुणस्य सलोकताम् ॥२४॥
तत्रासावयुतान्यष्टावुषित्वा देववत् सुखी ।
कुले महत्यसंकीर्णो[२३] जायते धनधान्यवान् ॥२५॥
आपान्तु पूर्णं योभाण्डं ब्राह्मणाय प्रयच्छति ।
रसास्तस्योपतिष्ठन्ति पूज्यते च दिवं गतः ॥२६॥

---

१७ मसंस्कृतमथापि - ख. । १८ देवि - क. ख. । १९ शुभे - क. ख. । २० लभते पुण्यमव्ययं - ख. ।
२१ न तस्मात् परमं - ख. । २२ ...च्चैतत् - घ. । २३ ... संकीर्णे - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

भाजनानि च यो दद्यात् सुपूर्णानि शुभानना:[२४] ।
भाजनं स्यात् स भोगानां तारयेच्च[२५] पितॄन् भयात् ॥२७॥
तडागं यस्तु कुर्वीत अपां देव्य:[२६] समृद्धिमत् ।
अप:[२७] पिबन्ति वै यत्र सर्वे जन्तव एव च ॥२८॥
तारयित्वा च स पितॄँस्तथैव च पितामहान् ।
प्रपितामहाँश्च लोकेषु कर्मिकेषु[२८] विहङ्गमः ॥२९॥
चरते देववद्देव्यो वर्षायुतशतानि षट् ।
पुनश्च मानुषे लोके सर्वरोगविवर्जितः ॥३०॥
भोगी भवति भोगानां राजमात्रश्च जायते ।
दाता यज्वा च बलवान् सुप्रभः प्रियदर्शनः ॥३१॥
अवटं यो नरः कुर्यादपां पूर्णं शुचिस्मिता:[२९] ।
दद्याच्च ब्राह्मणेभ्यस्तं भोजयित्वा यथार्थवत् ॥३२॥
अष्टाभिश्च विचित्राभि:[३०] पताकाभिरलंकृतम् ।
ध्वजेन वैजयन्त्या च पुष्पैश्च समलंकृतम् ॥३३॥
स तारयित्वा तु पितॄन् विमानेन नरोत्तमः ।
यात्यप्सरोपगीतेन[३१] वरुणस्य सलोकताम् ॥३४॥
हिरण्यं हेम भूमिं वा तिलान् रत्नानि वापि यः ।
प्रदद्यात् सर्वभूतेभ्यस्तस्य पुण्यफलं शृणु ॥३५॥
स विमानेन महता सर्वलोकसमन्वितः ।
इन्द्रस्य लोकं[३२] संप्राप्य मोदते विबुधो यथा ॥३६॥
ततश्च्युतश्च धर्मात्मा सर्वकामसमृद्धिमान् ।
कुले महति लोकेसौ[३३] जायते सुभगश्च ह ॥३७॥
यस्तु वृक्षं प्रकुरुते छायापुष्पफलोपगम् ।
पथि देव्यो[३४] नरः सोम्ये[३५] स तारयति वै पितॄन् ॥३८॥

---

२४ शुभानने - क. ख. । ...२५ स्तारणाच्च - क. । २६ देवि - क. ख. । २७ गाव: - क. । २८ कामकेषु - क. । २९ समश्नुते - क, ...स्मिते - ख । ३०... रविचित्राभि: - क. । ३१ यात्यप्सरसगीतेन - ख. । ३२ इन्द्रलोकं स - ख. । ३३ लोकेशो - ख. । ३४ देवि - क. ख. । ३५ सोम्या: ? ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तथैव दत्त्वा विप्रेभ्यो निष्क्रीय च पुनर्नरः[३५] ।
स यत् फलमवाप्नोति तच्छृणुध्वं[३६] महाप्रभाः[३७] ।।३९।।
यावद् बृक्षस्य पुष्पाणि उपयुञ्जन्ति[३८] देहिनः ।
फलानि चैव भक्ष्यन्ते जन्तुभिः फलितस्य तु ।।४०।।
तावद्वर्षसहस्राणि तारयित्वा पितॄनपि ।
सोमलोकं समासाद्य सोमृतं[३९] फलमाप्नुयात् ।।४१।।
फलानि यः प्रयच्छेत ब्राह्मणेभ्यस्समाहितः
फलानां स तु भागी स्याद्बहूनां सुभगश्च ह ।।४२।।
काष्ठानि यः प्रयच्छेत हेमन्ते नरसत्तमः ।
ब्राह्मणेभ्यस्तदा देव्यः[४०] सोग्निलोकं समश्नुते ।।४३।।
भाजनं यः प्रयच्छेत हैमं रत्नविभूषितम् ।
सोप्सरःशतसंकीर्णे विमाने दिवि मोदते ।।४४।।
राजतं यः प्रयच्छेत विप्रेभ्यो भाजनं शुभाः[४१] ।
स गान्धर्वपदं प्राप्य उर्वश्या सह मोदते ।।४५।।
ताम्रं यो भाजनं दद्याद् ब्राह्मणेभ्यो विशेषतः ।
स भवेद् यक्षराजस्य यक्षो बलसमन्वितः ।।४६।।
गृहं यस्तु प्रयच्छेत सर्वकामसमृद्धिमत् ।
स लोकं ब्रह्मणः प्राप्य सर्वकामैर्निषेव्यते ।।४७।।
सर्वकोटीः[४२] स तत्रोष्य चतस्रस्तेन कर्मणा ।
गृहमेधी यदा दाता भोगवाँश्चैव जायते ।।४८।।
ओषधीर्यः प्रयच्छेत धान्यानि विविधानि च ।
स सर्वकामसंमृष्टं[४३] सोमलोकं समश्नुते ।।४९।।
तत्र वर्षसहस्राणि सप्त स्थित्वा पुनर्नरः ।
इह सर्व धनोपेतो[४४] भोगावानभिजायते ।।५०।।

---

३५ पुनः पुनः - ख. । ३६ तच्छृणुध्व - क. ख. । ३७ महाप्रभे - क. ख. । ३८ उपयुञ्यन्ति - क. ।
३९ सोमृतः - क. ख.। ४० देधि - क. ख । ४१ शुभे - क. ख. । ४२ वर्षकोटचः - क. ख. ।
४३ संमृद्धं - क., संपूर्णं - ख. । ४४ सर्वनरोपेतो - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यस्तु क्षेत्रं प्रयच्छेत निष्पन्नं फलवत्पुनः ।
स तु क्षेत्रपतिर्भूत्वा[४५] प्राजापत्यं समश्नुते ॥५१॥
यस्तु भूमिं प्रयच्छेत ब्रह्मणाय महात्मने ।
स सर्वलोकेषु[४६] सुखी विमानेन सुवर्चसा ॥५२॥
बहून्यब्दसहस्राणि चरते कामरूपावान् ।
यद्धि मानुष्यमायाति स नरः कालपर्ययात् ॥५३॥
तत्र कामदुहा[४७] तस्य मही भवति सर्वशः ।
यस्तु वस्त्रं प्रयच्छेत ब्राह्मणाय महायशाः ॥५४॥
स लोकं प्राप्य वैराजं वर्षकोटिं सुखं वसेत् ।
आसनं यः प्रयच्छेत संवीतं[४८] ब्राह्मणाय वै ॥५५॥
स राज्यस्थानमाप्नोति स्वर्गं चाप्नोति विज्वरः ।
यस्तु शय्यां प्रयच्छेत स्वास्तीर्णां[४९] नरसत्तमः ॥५६॥
स तु भार्याःप्रिया देव्यो बह्वीर्भक्ताः समश्नुते ।
यस्तु कन्यां प्रयच्छेत ब्राह्मणाय स्वलंकृताम् ॥५७॥
स गत्वा पितृलोकं वै वर्षायुतशतं वसेत् ।
इह चापि पुनर्जातः सर्वकामसमन्वितः ॥५८॥
भर्याः प्राप्नोति भक्ताश्च प्रजावाँश्चोपजायते ।
अश्वं यस्तु प्रयच्छेत हेमचित्रं सुलक्षणम्[५०] ॥५९॥
स तेन कर्मणा देव्यो[५१] गान्धर्वं लोकमश्नुते ।
रथमश्वं गजं दासीं कन्यां गृहमथापि च ॥६०॥
भूमिञ्च यः प्रयच्छेत स राजा भुवि जायते ।
- - - - - - - - - - - - - - - - - - ॥६१॥
विधिना मन्त्रयुक्तेन[५२] तस्य धर्मफलं महत्[५३] ।
सर्वकामदुघा[५४] सास्य धेनुर्भूत्वोपतिष्ठति[५५] ॥६२॥

---

४५ क्षेत्रोनुमां - क., क्षेत्रं पुमां भूत्वा - ख. । ४६ लर्वलोके स च - क. । ४७ कामवहा - क., कामदुघा (?) । ४८ सवीता - क. । ४९ स्वास्तीर्णं - क. । ५० सलक्षणम् - क. । ५१ देवि - क. ख. । ५२ यत्र युक्तेन - क. । ५३ शृणु - क. । ५४ सर्वकामदुहा - क. ख. । ५५ धेनुभूत्बावतिष्ठति - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जलधेनुं च यो दद्यात् तस्य दानफलं महत् ।
प्रापां शुभां[५६] तडागं[५७] वा कूपं वापि सुपुष्कलम् ॥६३॥
कृत्वा कुम्भान् सुसंपूर्णान् गन्धमाल्यैरलंकृतान् ।
पुष्पैश्च विविधाकारैरभ्यर्च्य द्विजसत्तमान् ॥६४॥
भक्ष्यभोज्यैः सुप्तृप्ताँस्तान्[५८] तिलपात्राणि दापयेत् ।
दक्षिणां पुष्कलां दाद्यत् तेभ्यस्तां[५९] स्पर्शयेत्ततः ॥६५॥
आपःशिवाश्च सौम्याश्च तर्पयन्तु पितॄन्मम ।
कामगाः कामदातारो भवन्तु पितरः सदा[६०] ॥६६॥
एवं दत्त्वा तु तां धेनुं पुनः क्रीत्वा[६१] च वै तदा ।
वाहयेत्तत्[६२] प्रपां देव्यो[६३] ब्रह्मलोकसमर्पणीम् ॥६७॥
तिलपात्राणि दत्त्वा[६४] च तथा वस्त्रयुगं नवम् ।
सुवर्णस्य च सान्निध्यं[६५] फलानि विविधानि च ॥६८॥
ततो दद्याच्छुचिः स्नातो ब्राह्मणेभ्यो यथाविधि ।
- - - - - - - - - - - - - - - - - - ॥६९॥
घृतं गावः प्रसूयन्ते घृतं भूम्यां प्रतिष्ठितम् ।
घृतमग्निश्च देवाश्च घृतं मे संप्रदीयताम् ॥७०॥
एवं विधानतो दत्त्वा ब्रह्मलोकमवाप्नुयात् ।
यो नरो गां प्रयच्छेत सवत्सां कांस्यदोहनीम्[६६] ॥७१॥
हेमश्रृङ्गीं रूप्यखुरां[६७] दुकूलक्षौमवासिताम् ॥
शय्यास्तरणसंपन्नां बहुपुष्पफलैर्युताम् ॥७२॥
ब्राह्मणाँस्तर्पयित्वा तु गन्धमाल्यैरलंकृताम् ।
दानकाले ततस्तस्याः सुरा गात्राणि[६८] संश्रिताः ॥७३॥
ब्रह्मा तस्याःस्थितो मूर्ध्नि शक्रोपानं[६९] समाश्रितः ।
चन्द्रादित्यौ च नेत्रस्थौ घ्राणे[७०] वायुः प्रतिष्ठितः[७१] ॥७४॥

---

५६ सभां - क. । ५७ तडागान् - क ख. । ५८ सुतृप्तानां - क. ख. । ५९ तेभ्धस्ताः - क. ।
६० भवत्विति च पैदयत् - ख. । ६१ कृत्वा - क. । ६२ वहायेति - क. । ६३ देवि - क. ख. ।
६४ यो दद्यात् - क. । ६५ सान्नैध्यं - ख. । ६६ कांसदोहनीम् - क., कामदोहनीम् - ख., ..ःदोहिनीम् - क. ।
६७ रूक्मखुरां - क. । ६८ शास्त्राणि - क. । ६९ शक्रः पादं - घ. । ७० प्राणे - घ. ।
७१ प्रभञ्जनः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मुखं तस्याःश्रितो वह्निर्जिह्वां सोमः स्वयं प्रभुः ।
कर्णयोस्तु दिशः सर्वाः शिरा[७२] रुद्राः समाश्रिताः ।।७५।।
पादयोर्लोकपालाश्च[७३] सर्वेस्थीनि च पर्वताः ।
समुद्रास्सप्त जठरे ग्रीवायां तपनाः श्रिताः ।।७६।।
सास्नां गङ्गा सरिच्छ्रेष्ठा पार्श्वयोर्वसवः[७४] शुभाः ।
प्रजापतिरुपस्थश्च मूत्रं[७५] तीर्थानि सर्वशः ।।७७।।
पुरीषं श्रीरभूत्तस्या नागाश्चास्त्राणि सर्वशः ।
साध्या विश्वेथ लोकाश्च पुच्छमाश्रित्य संस्थिताः ।।७८।।
मन्त्रा यज्ञाश्च दानानि यमाश्च[७६] ऋषिभिस्सह[७७] ।
नक्षत्राणि ग्रहाश्चैव तारारूपाणि यानि च ।।७९।।
गायत्री चैव त्रिष्टुप् च जगती पंक्तिरेव च ।
अनुष्टुबृग्यजुश्चैव[७८] सामान्याथर्वणं[७९] तथा ।।८०।।
लोकस्य मातरश्चैव मेघा वर्षमथापि[८०] च ।
धर्मो नारायणश्चैव भूतानि सरितस्तथा ।।८१।।
रोमकूपानि संश्रित्य तस्या देवा व्यवस्थिताः ।
यक्षाश्च राक्षसाश्चैव पिशाचाः पक्षिभिः सह ।।८२।।
यज्ञाश्च दक्षिणाश्चैव तथा चाप्सरसः शुभाः ।
गन्धर्वाश्च महात्मानो ये चान्येप्येवमादयः ।।८३
तस्या विषाणयोर्व्यास सर्व एव समाश्रिताः ।
फलानि यज्ञदानानां गतयश्च[८१] पृथग्विधाः ।।८४।।
वत्सं समाश्रिताः सर्वे सर्वं[८२] देवमयं शुभम् ।
देवैरध्यासितां तां तु सर्वलोकनमस्कृताम्[८३] ।।८५।।

---

७२ शिरो - क. । ७३ स्राा क, लोकाालाः स्युः - घ । ७४ पार्श्वे तु वसवः - क । ७५ मूर्त्तं - क. ।
७६ नियमा - घ., यमानि - क । ७७ नियमैःसह (?) । ७८ .. प्च यजुश्चैव - क. । ७९ सामगाथिवर्णं - घ. ।
८० ऋनुवर्षमथापि - घ. । ८१ ऋ (क्र) तवश्च - घ । ८२ सर्वे - क., सर्वदेवमयं (?) ।
८३ सर्वैर्हस्तद्वयेन तु - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विप्रेभ्यो[८४] मन्त्रवद्धस्ते प्रदद्यात् सुसमाहितः ।
कुशान्[८५] सुवर्णं बीजानि[८६] तिलान् सिद्धार्थकाँस्तथा[८७] ॥८६॥
प्रदद्याद् गां ततोद्भिस्तु[८८] मन्त्रेणानेन सुव्रत[८९] ।
सर्वदेवमयीं दोग्ध्रीं सर्वलोकमयीं तथा ॥८७॥
सर्वलोकनिमित्ताय सर्वलोकहिताय च[९०] ।
प्रयच्छामि महासत्वामक्षयाय शुभामिति ॥८८॥
एवं स दत्त्वा तां गां तु यत्र यत्र प्रजायते ।
तत्र तत्र गता सा तं[९१] जन्तुं तारयते भयात्[९२] ॥८९॥
सर्व[९३]कामदुहा[९४] चैव सर्वलोकप्रदा तथा ।
सर्वज्ञानप्रदा चैव सर्वयज्ञफला तथा ॥९०॥
सर्वांल्लोकान् तया[९५] गत्वा रमते च यथामरः ।
इह जातश्च तामेव कामगां संप्रपद्यते ॥९१॥
स तया[९६] मानुषो जातो गोसहस्री महाबलः ।
रूपवान् धनवांश्चैव बहुपुत्रश्च जायते ॥९२॥
प्रसूयमानां यो गां तु दद्यादुभयतोमुखीम् ।
यथोक्तेन विधानेन स जातिस्मरतां लभेत् ॥९३॥
यस्तु गां संप्रयच्छेत ब्राह्मणेभ्यो यथातथम् ।
तमप्यसौ भयार्थेभ्यस्त्रायते नरकादपि ॥९४॥
कृष्णाजिनं च यो[९७] दद्याद् व्रतिने ब्रह्मचारिणे ।
पृथिवीफलमाप्नोति योगश्चास्य प्रवर्तते ॥९५॥
योगिभ्यो ब्रह्मचारिभ्यो ब्राह्मणेभ्यो यतात्मवान् ।
यः प्रयच्छेदावसथं सोऽश्वमेधफलं लभेत् ॥९६॥
आप्तोर्यामं पौण्डरीकं गोसहस्रञ्च विन्दति ।
स्मृतिञ्च परमां लब्ध्वा योगमाप्नोति सुव्रताः ॥९७॥

---

८४ विप्राय (?) । ८५ दशां - घ । ८६ सुवर्णबीजानि - क. । ८७ सिद्धान्तकाँस्तथा - घ. । ८८ गास्ततोद्भिस्तु - क. । ८९ सुव्रताः (?) । ९० सर्वदेवनमस्कृतां - क ख. । ९१ सान्ते - ख., शान्तं - क. । ९२ ...क्षगात् - क. । ९३ तया - क. । ९४ कामदुघा - घ । ९५ तथा - घ. । ९६ तदा - घ. । ९७ ततो - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कमण्डलुं तु यो दद्याद् ब्राह्मणाय नरोत्तमः ।
स तेन कर्मणा देव्यो धर्मनित्यत्वमाप्नुते[९८] ॥९८॥
व्याधितं यस्तु विप्रर्षे[९९] दीनं मूढसचेतसम् ।
उद्धरेत यथाशक्त्या स मुच्येद् ब्रह्महत्यया ॥९९॥
यः सुवर्णं प्रयच्छेत दरिद्राय द्विजातये ।
दशानामश्वमेधानां फलं प्राप्नोति देवताः ॥१००॥
यश्चैवेमानि सर्वाणि दानान्युक्तानि कृत्स्नशः ।
ददाति युगपद्देव्यः स पृथ्व्यामेकराड् भवेत्[१००] ॥१०१॥
इदं यः शृणुयान्नित्यं दद्याच्चैव स्वशक्तितः ।
पठेत च महाभागाः सोपि गच्छेत् त्रिविष्टपम् ॥१०२॥

⊙ इति स्कन्दपुराणे एकादशोत्तरशतोध्यायः[१०१] ⊙

देव्युवाच[१]

देव्याः शृणुत भूयोपि यथा दानं विना शुभाः ।
अयमेवोपवासेन यथा धर्मोभिलभ्यते[२] ॥१॥
एकभक्तेन यो देव्यो मासं मार्गशिरं क्षपेत् ।
स तेन कर्मणा देव्यो गोमान् भवति नित्यशः ॥२॥
पौषमासेन[३] पुत्रांश्च बहूनाप्नोति धार्मिकान् ।
माघमासे च कुर्वाणो भूयः प्राप्नोति वै प्रियाः[४] ॥३॥
एकभक्तन्तु कुर्वाणः फाल्गुने मासि नित्यशः ।
स्त्रीषु सौभाग्यमाप्नोति स्त्रियश्च परमप्रियाः ॥४॥
यः क्षपेदेकभक्तेन चैत्रमासं नरोत्तमः ।
धनधान्यसमृद्धे स[५] कुले जायेत रूपावान् ॥५॥

---

९८ धर्मन्नित्यत्वमाप्नुते - ९९ विप्रर्पि (र्पि) - क । १०० पृथिव्यां सैकराड्... - क ख., मुच्यते भयात् - घ. ।
१०१ दानध्यायः ११० - घ. ।

१ सनत्कु - क, पार्वत्युवाच (?) । २ धर्मोपि लभ्यते - क. । ३ पौष्यमासेन - क. । ४ प्रिया (न्) - क. ।
५ ...समृद्धेषु - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वैशाखं यः क्षपेन्मासमेकभक्तेन मानवः ।
याति स श्रेष्ठतां लोके पूजितो धनवानपि ॥६॥
ज्येष्ठमूलं तु यो मासमेकभक्तं समाचरेत् ।
भ्रातृणां भवति ज्येष्ठो भोगं प्राप्नोति पुष्कलम् ॥७॥
आषाढं चापि[६] यो मासमेकभक्तं समाचरेत्[७] ।
स राज्ञो मान्यतां प्राप्य कामानाप्नोति पुष्कलान् ॥८॥
श्रावणे चापि यो मासे तथा चैवाचरेन्नरः ।
सेनापत्यं स संप्राप्य बलवानभिजायते ॥९॥
यस्तु भाद्रपदं मासमेकभक्तं समाचरेत् ।
स तेन कर्मणा देव्यो धनवानभिजायते ॥१०॥
योपि चाश्वयुजं मासमेकभक्तेन तिष्ठति ।
वाणिज्यं फलते तस्य कृषिः पशुगणास्तथा ॥११॥
कार्तिकं त्वपि यो मासमेकभक्तेन तिष्ठति ।
सोश्वमेधफलं प्राप्य वह्निलोके महीयते ॥१२॥
यः क्षपेदेकभक्तेन यावज्जीवं नरोत्तमः ।
विमानेनार्कवर्णेन शक्रलोकं स गच्छति[८] ॥१३॥
संवत्सरं तु यः पूर्णमेकभक्तेन तिष्ठति ।
स पार्थिवसमो भूत्वा महीं पाति महेन्द्रवत् ॥१४॥
अहोरात्रं तूपवासं कुर्यादेकं नरोत्तमः ।
दशानां स सुवर्णानां फलं प्राप्नोति शोभितम् ॥१५॥
मासे मासे त्वहोरत्रं यः करोति नरोत्तमः ।
स तेन कर्मणा शुद्धो विद्वान् भवति धार्मिकः ॥१६॥
चतुर्दशीमष्टमीं च पक्षयोरुभयोरपि[९] ।
अहोरात्रं क्षपेद्यस्तु सम्वत्सरमशेषतः ॥१७॥
स तेन कर्मणा युक्तः सर्वपापविवर्जितः ।
न याति नरकं देव्यो यमञ्च न स पश्यति ॥१८॥

---

६ चैव - ख. । ७ ...मेकभक्तेन वै क्षपेत् - ख. । ८ स गच्छेच्छक्रलोकताम् - क. । ९ उभयोः पक्षयोरपि - क.।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मासे मासे च यः कुर्यात् त्रिरात्रक्षपणं बुधः ।
कौबेरं लोकमासाद्य स विन्देत् परमं सुखम् ॥१९॥
चतुर्थेहनि यो भुंक्ते प्रयतात्मा शुचिर्नरः ।
गान्धर्वं स पदं प्राप्य मोदते शक्रवद्दिवि ॥२०॥
पञ्चमेहनि यो भुंक्ते प्रतिमासमतन्द्रितः ।
वायुलोकं[१०] समासाद्य स्वर्गलोकं स गच्छति ॥२१॥
यो भुंक्ते दिवसे षष्ठे नित्यं नियममास्थितः ।
वारुणं लोकमासाद्य सोपि विन्देत् महत्पदम् ॥२२॥
सप्तमेहनि यो भुंक्ते जितद्वन्द्वो दृढव्रतः ।
आदित्यलोकमासाद्य सोपि विन्देत् महत्पदम् ॥२३॥
अष्टमे चैव[११] यो भुंक्ते दिवसे मानवः शुचिः ।
वैष्णवं लोकमासाद्य स भवेत् परमद्युतिः ॥२४॥
नवमेहनि यो भुंक्ते नरो नियममास्थितः ।
स वसूनां प्रियो भूत्वा चरते वसुभिः सह ॥२५॥
दशमेहनि भुक्त्वा तु दशाहस्य फलं लभेत् ।
अश्विभ्यां च समो भूत्वा सूर्यवज्ज्वलते सदा ॥२६॥
मानुष्यञ्च पुनः प्राप्य दशभार्या लभेत सः ।
सुवर्णमक्षयं चैव न चाकाले[१२] म्रियेत सः ॥२७॥
एकादशे तु यो भुंक्ते दिवसे मानवः शुचिः ।
एकदश्याः फलं प्राप्य स रुद्रगणतां लभेत् ॥२८॥
स्थित्वा तत्र शतान्यष्टावतिसौख्यसमन्वितः[१३] ।
ब्राह्मणत्वमनुप्राप्य यज्वा स इह जायते ॥२९॥
द्वादशे दिवसे यस्तु[१४] देव्यो भुंक्ते सदा नरः ।
द्वादशाहं स संप्राप्य[१५] शक्रलोकमवाप्नुयात् ॥३०॥

---

१० वायुलोके - क. । ११ अष्टमेहनि - क. । १२ ...काङ्क्षं - क. । १३ .. वन्ति(न्ते) सौख्यसमन्वितः - ख. ।
१४ चैव दिवसे - ख. । १५ समासाद्य - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तत्रोष्य स सुखं भूय इह जातो नरोत्तमः ।
राजा वा राजमात्रो वा धन्वा[16] वा सुमहान् भवेत्[17] ॥३१॥
त्रयोदशे तु यो नित्यमश्नाति दिवसे नरः ।
वसेत्[18] स भार्गवस्थानं प्राप्य दिव्यसुखान्वितः ॥३२॥
अथ चेन्मानुषो भूयस्स नरो जायते शुभाः[19] ।
धनधान्यसमाकीर्णे जायते सत्कुले[20] शुभः ॥३३॥
चतुर्दश तु यो नित्यं दिवसानि क्षपेन्नरः ।
तौषितं लोकमासाद्य भवेद् गणपतिर्वरः ॥३४॥
अर्धमासं क्षपेद्यस्तु नित्यमेव ह्यतन्द्रितः ।
देवराजेन तुल्योसौ भूत्वा स्वर्गेवतिष्ठति ॥३५॥
इह राजा महान्भूमौ भूय एवाभिजायते ।
यस्तु मासं क्षपेद्धीरो जितक्रोधो जितेन्द्रियः ॥३६॥
विमानेन स दिव्येन अप्सरोभिस्समावृतः ।
पूज्यमानो यथा देवः स्तूयमानश्च सर्वशः ॥३७॥
ज्वलन्नादित्यसंकाशो[21] नित्यं सुखमुपाश्नुते[22] ।
सर्वलोकेषु वसते बह्वन्यब्दायुतानि[23] तु ॥३८॥
ततो ब्रह्मसदं प्राप्य ब्रह्मणा स सुपूजितः[24] ।
ब्रह्मलोके निवसते यथा ब्रह्मा नरोत्तमः ॥३९॥
अथ चेत्पुनरायाति ब्राह्मणो भवतीश्वरः ।
योगश्च तत्र लभते योगैश्वर्यं[25] समश्नुते[26] ॥४०॥
योगीशस्स ततो भूत्वा शम्भोर्गणपतिर्भवेत् ।
सर्वेषां चोपवासानां विधिं परमपुण्यदम् ॥४१॥
देव्यः शृणुध्वं मत्तोन्यं यथावदनुपूर्वशः ।
स्नातः शुचिरथाचान्तो हुताग्निः सुसमाहितः[27] ॥४२॥

---

१६ धनी - (?) । १७ स महान् भवेत् - ख । १८ विशेत् - क । १९ शुभः - ख । २० स कुले - क. ।
२१ ज्वलन्नादित्यसंकाशो - क. । २२ सुखं नित्यं समश्नुते - ख. । २३ बहूनब्दायुतान् - क. ख ।
२४ सुपूज्यते - क. । २५ य(ये)नैश्वर्यं - क. । २६ समन्वितः - ख. । २७ सुगमीहितः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दीक्षयित्वा तथा[28]त्मानमुपवासं चरेद् बुधः ।
स्नायात्[29]त्रिषवणं चैव जुहुयादग्निमेव च ॥४३॥
वाग्यतोक्रोधनो दान्तो धार्मिकः सत्यवाग् घृणी ।
जपन्सदैव गायत्रीं पवित्राणि च नित्यशः ॥४४॥
रुद्रानथ गणान् वापि रात्रौ च स्थण्डिलेशयः ।
कुशानास्तीर्य विधिवत् स्त्रीशूद्रैः परिवर्जितः ॥४५॥
ससश्नीयात्[30] ततो देव्यो वीतशोको[31] विमत्सरः ।
यावन्त्यहानि तिष्ठेत तावद्विप्रांस्तु भोजयेत् ॥४६॥
ततः पूर्णे तु काले वै ब्राह्मणानां शतं वरम् ।
सहस्रमथवा शक्त्या पूजयित्वा तु सर्वशः ॥४७॥
हविष्यं भोजनं दत्त्वा गाश्च[32] वासांसि च क्रमात् ।
सुवर्णं तिलपात्रं च एकैकस्य प्रदापयेत् ।
ततस्तत्फलमाप्नोति यदन्यैर्दुर्लभं व्रतैः ॥४८॥
वृषभं यस्तु नीलाङ्गमुत्सृजेत नरोत्तमः ।
अन्यं वापि महाभागाः[33] स पितॄँस्तारयेन्नरः ॥४९॥
यावन्ति तस्य रोमाणि वृषभस्य महात्मनः ।
तावन्त्येव सहस्राणि वर्षाणां दिवि मोदते ॥५०॥
तिलपात्राणि यो दद्याद्विप्रेभ्यः शुद्धमानसः ।
अमावास्यां समासाद्य कृष्णानां (?) सुसमाहितः ॥५१॥
स पितॄँस्तर्पयित्वा तु अक्षयं नरपुंगवः ।
पितृलोकं समाप्नोति चिरञ्च सुखमश्नुते ॥५२॥
उपवासविधिस्त्वेष कथितो मे शुभाननाः[34] ।
चान्द्रायणविधिं भूयः शृणुध्वं सुसमाहिताः ॥५३॥
यस्तु चान्द्रायणं कुर्याद्यथोक्तं सुसमाहितः ।
स सोमलोकमासाद्य सोमेन समतां व्रजेत् ॥५४॥

---

२८ ततो - क. ख. । २९ स्नायेत् - क., स्नातः - ख. । ३० सपत्नी... - ख. । ३१ विशोको प्रो ...- ख. ।
३२ गावो - क. । ३३ महाभागान् - क., महाभाग - ख. । ३४ सुशोभनाः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्राजापत्यं तु[३५] यः कुर्यादेकशो बहुशोपि वा ।
प्रजापतिसमो भूत्वा तस्य लोके महीयते ॥५५॥
यस्तु सान्तपनं कृच्छ्रं करोति नरसत्तमः ।
आत्मानमुद्धरेत् कृच्छ्रात् सोग्निलोकं च गच्छति[३६] ॥५६॥
महासान्तपनं यश्च करोति सुमहात्मनाः ।
सर्वज्ञतामवाप्नोति, ब्रह्मलोकं च विन्दति ॥५७॥
तुलापुरुषकं यश्च कुरुते द्विजसत्तमः ।
स मुक्तस्सर्वपापैस्तु गच्छेत[३७] दिवमूर्जितः[३८] ॥५८॥
अतिकृच्छ्रेण तु नरः शर्वस्य[३९] भवनं व्रजेत् ।
कृच्छ्रातिकृच्छ्रेण तथा गाणपत्यमवाप्नुयात् ॥५९॥
यस्तु सर्वाणि कृच्छ्राणि कुरुते नरसत्तमः[४०] ।
स यं प्रार्थयते कामं तमेव समुपाश्नुते ॥६०॥
यस्य कस्यचिदेतेषां[४१] कर्ता स्यात्[४२] सुसमाहितः ।
स तेन शुद्धो[४३] भवति देवत्वञ्चापि विन्दति ॥६१॥
पयोभक्षस्तु यो नित्यं नरः संवत्सरं वसेत् ।
यावकं चोपयुञ्जानो गोमूत्रेणाभिसंस्कृतम् ॥६२॥
पिण्याकफल(?)भक्षो[४४] वा अक्षारलवणोपि वा ।
सोश्वमेधफलं प्राप्य ब्रह्मलोकं समश्नुते ॥६३॥
सर्वपापविनिर्मुक्तो विमुक्तस्सर्वबन्धनैः ।
विमानेनार्कवर्णेन ब्रह्मवच्चरते च सः[४५] ॥६४॥
यस्त्वेतान्येव[४६] सर्वाणि व्यस्तानि नरसत्तमः ।
यावदुच्छ्वासमाशेते महात्मा नष्टकिल्विषः ॥६५॥
स लोकान्वा महासत्वो यथेष्टान् मोक्षमेव वा ।
ऐश्वर्यं वा महत् प्राप्य दीप्यमानोवतिष्ठते[४७] ॥६६॥

---

३५ च - ख. । ३६ समश्नुते - ख. । - ख. । ३७ गच्छते - ख. । ३८ दिवि पूजितः - क., दिविमूर्जितः - ख. । ३९ सर्वस्य - क. । ४० स नरोत्तमः - क. । ४१ ...देतेव - क., ...देवेह - ख. । ४२ कृच्छ्रस्य - क. ख. । ४३ सिद्धो - क. । ४४ भक्तो - ख. । ४५ ...व स. (श): - क. । ४६ यश्चैतान्येव - क । ४७ दीव्यमानोवतिष्ठते - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एतान्येव च सर्वाणि दानानि च तपांसि च ।
विना मन्त्रेण सततं शूद्राणामपि सर्वशः ॥६७॥

विधीयते न सन्देहो एवमाह प्रजापतिः ।
अमन्त्रास्ते स्मृताः सर्वे शूद्रा विगतकल्मषाः ॥६८॥

स्त्रीणां तु दैवतं[४८] भर्त्ता न ततोन्यद्विधीयते ।
स गतिः परमं धाम स धर्मः परमः स्मृतः ॥६९॥

तेन या त्वभ्यनुज्ञाता इमं[४९] धर्मं समाचरेत् ।
सा फलं तस्य धर्मस्य प्राप्नोति सुसमाहिता ॥७०॥

या तु तेनाननुज्ञाता धर्मं किञ्चित् समाचरेत्[५०] ।
न तत्फलं सा लभते लभते च सती फलम्[५१] ।७१॥

या तु भर्त्राभ्यनुज्ञाता[५२] कृत्वा धर्मं सुपुष्कलम् ।
दद्यात्तु पत्युर्या[५३] नारी तस्यानन्तं भवेत्[५४] फलम् ॥७२॥

यच्च प्रार्थयते किञ्चिदिह लोके परत्र वा ।
तत्सर्वं प्राप्नुते[५५] देव्यः सुभगा चापि जायते[५६] ॥७३॥

वश्यश्चास्या भवेद् भर्त्ता प्रिया तस्य च सा तदा ।
पुत्रप्रजा च भति न च दुःखं समश्नुते ॥७४॥

एष धर्मो मयाख्यातो युष्माकं लोकमातरः ।
अतो भूयश्च किं त्वन्यच्छ्रोतुमिच्छथ शोभनाः ॥७५॥

अयं हि धर्मः सुमहानतिप्रभः सुदुस्करश्चाप्यकृतात्मभिर्वराः ।
न चैनमन्यस्य[५७] शठस्य कस्यचिदधर्मिणो वा कथयीत धर्मवित्[५८] ॥७६॥

सनत्कुमार उवाच

ततस्ताः सहिताः सर्वा देव्यो लोकस्य मातरः ।
पूजयित्वा महादेवीमूचुः संहृष्टचेतसः॥७७॥

---

४८ देवता - क । ४९ इदं - क ख । ५० कुर्याच्छुचिस्मिते - ख., कश्चित् समगचरेत् (?) । ५१ चामतीनफलं - क । ५२ ह्यनुज्ञाता - क. । ५३ पतये (पत्ये या ?) - क. ख. । ५४ तस्यानन्त्यं हि तत् - क । ५५ प्राप्यते - क. । ५६ चाभिजायते - ख । ५७ न चैवमन्यस्य - घ. । ५८ इतः परम् इति श्रीस्कन्दपुराणे उमासावित्रीसंवादे एकादशोत्तरशततमोध्यायः, इत्यनन्तर स्त्री धर्मविपयक शतरूप ब्रह्मसंवादरूपः सावित्रिकर्तृकोपदेशात्मकः प्रायः पंचचत्वारिंशच्छ्लोकात्मको ग्रन्थोधिक उपलभ्यते घ. पुस्तके, स च प्रक्षिप्त इत्यस्माभिरत्रोपेक्षित इति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अहो धर्मस्त्वयाख्यातः सर्वामरनमस्कृते ।
यस्य संसेवनात् क्षिप्रं प्राप्यते सुमहत् फलम् ॥७८॥
इतो वीक्षामहे देवि गिरेरस्य वनं शुभम् ।
पुष्पजातिसमाकीर्णं बहुपक्षिगणावृतम् ॥७९॥
तत उत्थाय सा देवी सहिता देवमातृभिः ।
मन्दरस्य गिरेर्दिव्यं द्रष्टुं तद्वनमुत्तमम् ॥८०॥
विचचार महायोगा चक्षुर्दत्वा सुखापहम्[५९] ।
मानशिशलानि शृङ्गाणि सौवर्णानि च वीक्षती ॥८१॥
रम्याणि सिततोयानि गिरेः प्रस्रवणानि च ।
सरांस्युत्पलपूर्णानि वापीश्च सुमनोहराः ।
तुतोष गिरिजा दृष्ट्वा पार्श्वसंस्थं च नन्दिनम् ॥८२॥
तदा[६०] शुभावती नाम मेरुकन्या सुमध्यमा ।
उवाच हिमवत्पुत्रीं दर्शयंती शुभं वनम् ॥८३॥
इदं पर्वतकन्ये त्वं पश्य केलिकलाशुभम् ।
वनं सर्वर्तुसंपन्नं यथाधित्वं सुभाषितम् (?) ॥८४॥
अयं प्रसूते सुमहान् सपर्वस्थास्य शोभने (?) ।
विदुषामथ कृच्छ्रेषु यथायुक्तं सुभाषितम् (?) ॥८५॥
तथा स्वर्णोपलो भाति गिरेः शिखर उत्तमः ।
यथा लक्षणवद्विद्वान् प्रगीय इव सामगः ॥८६॥
अयं च मणिमान्नित्यं शैलाग्रः[६१] प्रतिभास्वरः ।
भाति उद्यन्निवादित्य उभयस्तो महायुगे (?) ॥८७॥
अयं वैदूर्यशिखर इन्द्रनीलतलोपलः ।
भाति शर्वाणि[६२] विभ्राणः[६३] स्थलेश्वरहरोपरि (?) ॥८८॥
अयं मत्तो गजो मत्तः करेणुभिरिवावृतः ।
कृत्वाभ्यंजनयः सुभ्रु पल्लवैः शिरसा नतः ॥८९॥

---

५९ .. देहसुखावहम् - क. । ६० ततः - घ. । ६१ शिलेग्र - घ. । ६२ सर्वाणि - घ. । ६३ शुभ्राणि - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अहो सुरूपं[६४] पश्येमं वनराजियुतं[६५] शुभे ।
यौवराज्येभिषिक्तं वै जयंतमिव चामरैः ॥९०॥
पादपं चैव[६६] शर्वाणि पश्यैनं करपल्लवैः ।
मातुः समीपे नृत्यन्तं पुत्रं प्रियमिवौरसम् ॥९१॥
मन्ये प्रियावासमिमं देवताया वनस्य ह ।
अतीव दृश्यते शोभा नेदृशीं दृष्टवत्यहम् ॥९२॥

सनत्कुमार उवाच

तस्यास्तद्वचनं श्रुत्वा शुभावत्या गिरेः सुता ।
निरैक्षिष्ट[६७] तरुं बालं[६८] हिमवत्तनयाव्यया ॥९३॥
तथा सा[६९] देवदेवी तं[७०] विचरन्ती महागिरौ[७१] ।
अपश्यद्बालसूर्याभं बालाशोकं सुपुष्पितम् ॥९४॥
आताम्रपल्लवशतैः कृत्वाञ्जलिमवस्थितम्[७२] ।
तं दृष्ट्वा गिरिजा देवी परां प्रीतिमगान्मुने ॥९५॥
मनसाचिन्तयच्चैव पुत्रोयं पादपो मम ।
एष मे तनयः श्लाघ्यो भविता नन्दिवर्धनः ॥९६॥
भगवत्यागते ह्येनमनुज्ञाता स्वयंभुवा ।
ग्रहीष्यामि प्रियं पुत्रं बालाशोकस्य पादपम्[७३] ॥९७॥
मम चायमपुत्राया[७४] भविता पादपोत्तमः ।
पुत्रः पुत्रवतां[७५] श्रेष्ठाः पुत्रशोकविनाशनः ॥९८॥

सनत्कुमार उवाच

सैवं विनिश्चित्य तदा पादपं प्रति शोभना ।
अन्यं देशं पक्रिम्य उमा तत्राभ्यपश्यत ॥९९॥
अथास्मिन्नन्तरेभूबन्नुत्पातास्तत्र भीषणाः[७६] ।
वायुवेगो महानासीद् गिरिवृक्षनिपातनः ॥१००॥

---

६४ अहोस्य रूपं - घ. । ६५ वनराज्ययुतं (?) । ६६ पादपैरेव - घ. । ६७ निरीक्ष्य ... - घ. । ६८ तं तरुं सम्यग् - घ. । ६९ ततस्सा - क. । ७० तु - क. । ७१ महागिरिं - क. । ७२ कृताञ्जलिमवस्थितम् (?) । ७३ बालाशोकं सुपादपम् - क. । ७४ ममैवायमपुत्राया - घ. । ७५ पुत्रवती - घ. । ७६ तत्र उत्पातोतीव भीषणः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शिखरं पर्वतेन्द्रस्य अपतद्[७७] व्यसनं विना ।
पादपाश्च विना वातमुन्मूलाः संबभूविरे ।।१०१।।
उल्काः पतन्ति चाकाशाद्वाति[७८] वायुरशोभनः ।
अक्षि सव्यं स्फुरच्चापि देव्यास्तत् कालिनन्दन ।।१०२।।
तान् वीक्ष्य[७९] विस्मिता देवी शैलादिमिदमब्रवीत् ।
सखीश्च[८०] सर्वकालेया इदं वचनकोविदाः ।।१०३।।

देव्युवाच

प्रमत्तो भाति शैलोयं[८१] वृक्षैस्तैः सर्वतो युतः ।
भयं महदिदं मन्ये नैतदाकस्मिकं स्मृतम् ।।१०४।।
न चानिमित्तमुत्पाता[८२] भवन्त्येते दुरासदाः ।
तथा कुरु यथा मे[८३] नो भयं यच्छन्त्यशोभनाः ।।१०५।।
ततो नन्दी प्रणाम्याह देवदेवीं कृताञ्जलिः ।
कुतो भयं भवानि त्वां या त्वं माता दिवौकसाम् ।।१०६।।

सनत्कुमार उवाच

तस्यैवं वदतो व्यास देवीं विश्वस्य मातरम् ।
अन्धकोपि तदा दैत्यः[८४] पातालान्मन्दरं ययौ ।।१०७।।
प्रह्लादप्रमुखैर्दैत्यैर्दानवैश्च सहस्रशः ।
वृतः श्रीमान् महादैत्यः शक्रो देवगणैरिव ।।१०८।।
स दैत्यानां मतेनैव वरिष्ठानां महासुरः ।
आगतो मन्दरं द्रष्टुं यथेन्द्रो नन्दनं वनम् ।।१०९।।
प्रह्लादश्चानुह्लादश्च शिनिर्बाष्कलिरेव च ।
हुण्डस्तुहुण्डो[८५] वातापी बलिर्बाणो विरोचनः ।।११०।।
इल्वलो नमुचिर्व्यंसो विप्रचित्तिर्महासुरः।
सुन्दो निसुन्दो नरको धेनुकोरिष्ट एव च ।।१११।।

---

७७ अपश्यद् - घ. । ७८ ...द्ववौ - घ. । ७९ दृष्ट्वा - घ. । ८० सख्यश्च - घ. । ८१ शैलश्च - घ. । ८२ नह्यनिमित्तमुत्पाता - घ. । ८३ यथेमे (?) । ८४ तथा - घ., नाम दैत्येन्द्रः - घ. । ८५ कुंडो भुकुंडो - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मुरः[८६] कार्त्तस्वनश्चैव हस्ती दुर्योधनो मयः ।
तारकस्तारकाक्षश्च विद्युन्माली प्रभाकरः ॥११२॥
हालाहलश्च कुम्भश्च संवरः कालसंवरः ।
धुन्धुस्तथेन्द्रदमनो हयग्रीवः शतोदरः ॥११३॥
मेघनादः सिंहनादो दुन्दुभिः शतदुन्दुभिः ।
कालनेमिर्बको दंडो विपाकः पाक एव च ॥११४॥
वृषपर्वा शतावर्तः पुलोमा शरभस्तथा ।
बलो गगनमूर्धा च सूचीरोमा महायशाः ॥११५॥
असिलोमा प्रलम्बश्च शंभुर्देवान्तकस्तथा ।
महिषो भीमसेनश्च वायुर्वादित्र[८७] एव च ॥
अन्धकानुचराप्येते[८८] मंदरं समुपागताः ॥११६॥
ते शस्त्रवंतो जितदेवसंघा महानुभावा धर्मपथच्युताश्च ।
सर्वे च शूरा ह्यनिर्वातनश्च सहान्धका मन्दरगा बभूवुः ॥११७॥

सनत्कुमार उवाच

तद् गजानामिव कुलं मतानां कालिनन्दन ।
वर्षतामिव मेघानां सविषाणां सरीसृपाम् ॥११८॥
दर्पितानां वराहाणां महाकुलमिवोल्वणम् ।
मन्दरे दानवकुलं तथा तत् प्रचचार ह ॥११९॥
सोन्धको विचरँस्तत्र[८९] सखीभिः सहितां तदा[९०] ।
अपश्यद् देवदेवी[९१] तु वृकः सिंहवधूमिव[९२] ॥१२०॥

---

८६ सुरः - घ. । ८७ वायुरादित्य (?) । ८८ व्यास - घ. । ८९ सोन्धकः सुमहावीर्यः - क. । ९० सहपार्वतीम् – घ. । ९१ दानवः क्रूरः – घ. । ९२ श्वपाको ब्राह्मणीमिव – घ.,

इतःपरंः–

स पश्यन्नेव कालेय हिरण्याक्षसुतस्तदा ।
स्वपिसंत (अनिमेष) इवायोगाददृश्यत दुरात्मवान् ॥१॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दृष्ट्वा भगवतीं देवीं स दैत्यो मूढचेतनः[६३] ।
प्रणामं नाकरोद् व्यास अन्ववैक्षत[६४] केवलम् ।।१२१।।
तं दृष्ट्वानिमिषं दैत्यं पश्यन्तमचलात्मजाम् ।
प्रह्लादस्तु महाबुद्धिरिदमाह वचोर्थवत्[६५] ।।१२२।।

नियत्याथ कृतान्तेन मृत्युना मदनेन च ।
कोपेनाथ दुरात्मासौ काले प्राप्ते सुरेतरः ।।२।।
अध्यासितस्तदा तैस्तु सर्वलोकवशंकरैः ।
लोकधात्रीं प्रति सोय(?)मिदं वचनमब्रवीत् ।।३।।

अन्धक उवाच

केयं सुमध्यमा ह्यत्र रूपेणाप्रतिमा शुभा ।
नेदृशी दृष्टपूर्वा मे कदाचिदपि दानवाः ।।४।।
दिवि वा भुवि वागत्य पश्यतैनां सुमध्यमाम् ।
यदि नाम इयं भार्या कस्येयं पतिरीश्वरः ।।५।।
को वाहं किं च जीवामि सत्यमेतद्वचो मम ।
यस्येयं युवती भार्या चारुचित्रायतेक्षणा ।।६।।
स्वर्गवासेन किं तस्य सुभगस्य महात्मनः ।
मिथ्याराज्यमिदं गुह्यं यस्येयं मे न कामिनी ।।७।।
बहूनि च सहस्राणि मम संति शुभानि च ।
तानि सर्वाणि दासीत्वे अस्यास्तुल्यानि दानवाः ।।८।।

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा हिरण्यकशिपोः सुतः ।
उवाचान्धकमाश्लिष्य बहुचित्रं च कालिज ।।९।।

इति वाधिको घ.पुस्तके ।

९३ मूढचेतसः - ख. । ९४ अन्ववेक्षत - क. ख. । ९५ इत उत्तरं 'प्रह्लाद उवाच' इति घ.पुं.पाठः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

इयं लोकस्य जननी[९६] हिमवत्तनयाव्यया[९७] ।
उमेति जगति ख्यता[९८] तपोयोगबलान्विता ॥१२३॥
यस्य[९९] पुत्रोभवद् ब्रह्मा प्रजापत्यं च यो ददौ[१००] ।
वरेण यश्च पुत्रस्य पुत्रतां ब्रह्मणो गतः ॥१२४॥
अस्माकं देवतानाञ्च यो ददाति वराञ्छुभान्[१०१] ।
आरध्यः सर्वलोकानां देवानां च महायशाः ॥१२५॥
यः स्थितः सर्वमाविश्य भूतग्राममशेषतः ।
यस्यात्मना सर्वमिदं धार्यते[१०२] जगदव्ययम् ॥१२६॥
यः स्वेच्छया सर्वमिदं[१०३] निमेषार्धेन संक्षिपेत् ।
पत्नीयं तस्य देवस्य परमेशस्य धीमतः ।
शक्ता हीयं जगत्सर्वं क्षणेन दितिजाधिप ॥१२७॥
दग्धुं वाप्यथवा हर्तुं[१०४] क्षेप्तुं नरक एव वा[१०५] ।
कथमस्याः प्रणामं त्वं नाकरोर्दैत्य मोहितः ॥१२८॥

सनत्कुमार उवाच

अथैवं ब्रुवतस्तस्य धर्मयुक्तं सुरद्विषः ।
देवीभिः सहिता देवी क्षणोनान्तर्हिता मुने ॥१२९॥
- - - - - - - - - - - - - - - - - - - ।
अदृश्याः समपद्यन्त ताः स्त्रियो लोकमातरः ॥१३०॥
अथ ते तासु नष्टासु मन्दरस्य शुभं वनम् ।
पादचारेण संप्राप्ता बहुदृश्यसमावृतम् ॥१३१॥
बलाभिः कलनीषंडैः सातिमुक्तप्रियंगुभिः ।
चंपकैर्बकुलैर्लोध्रै रशोकैर्नागसाह्वयैः ॥१३२॥
पुन्नागैस्तिलकैश्चैव देवदारुवनैरपि ।
सरलैर्नारिकेलैश्च पद्मषंडैश्च शोभितम् ॥१३३॥

---

९६ जगतो जननी ह्येपा - क. । ९७ .. दुहिताव्यया - क. ख. । ९८ लोकविख्याता - घ. ।
९९ यस्याः - क. ख. । १०० सर्वलोकपितामहः - क. ख. । १०१ यो वरांस्तोषितो ददौ - घ., शुभाः - क. ।
१०२ धारितं - ख. । १०३ इच्छया सर्वमाविश्य - घ. । १०४ हन्तुं - क. । १०५ च - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गह्वरैश्च नितम्बैश्च गुहाभिर्निर्झरैरपि ।
न तस्माद्रमणीयं हि पृथिव्यां विद्यते क्वचित् ।।१३४।।
अथ ते दैत्यपास्सर्वे व्यचरन्त[१०६] महागिरौ ।
बहुनिर्झरसंकीर्णे ननापादपसंकुले ।।१३५।।
तत्र ते विचरन्तस्तु एकस्मिन्निर्झरे स्थितान् ।
सिद्धानपश्यन् सप्तर्षीन् योगयुक्तान्[१०७] महामुनीन् ।।१३६।।
उपविष्टान् शिलापट्टे मिथः कथयतः कथाः[१०८] ।
धर्मयुक्ताश्च चित्रार्था मार्मिकाः[१०९] सुसुखावहाः ।।१३७।।
तान्दृष्ट्वा सोन्धकोपृच्छत् प्रह्लादमसुरोत्तमम्[११०] ।
क इमे ऋषयो ह्यत्र[१११] किमर्थञ्चेह संगताः ।।१३८।।
तमुवाच[११२] तदा धीमानसुरो[११३] देवकण्टकम्[११४] ।
हिरण्यकशिपोः पुत्रो बुद्ध्वा मध्यं समास्थितः ।।१३९।।

प्रह्लाद उवाच

एतेन्धक[११५] महात्मान ऋषय[११६]स्सप्त संगताः ।
भृगुरत्रिर्मरीचिश्च विश्वामित्रोङ्गिरास्तथा ।।१४०।।
भरद्वाजो वसिष्ठश्च योगसिद्धास्तपोधनाः[११७] ।
इहागता महात्मानस्तपसा दग्धकिल्विषाः ।।१४१।।
नैषान्निष्कारणं[११८] मन्ये मन्दरागमनं प्रभो ।
इतो[११९] वयमिहैकान्ते स्थित्वा सर्वेसुरेश्वराः[१२०] ।
जानीम किमिमे कार्यमिह कुर्वन्ति साधकाः ।।१४२।।
एते वै निभृता भूतास्तूष्णीं[१२१]कृत्वा यथाबलाः ।
मतं गृह्णीम सर्वेषां तूष्णीं तिष्ठत दैत्यपाः ।।१४३।।

---

१०६ विचरन्तो - क. ख. । १०७ अपश्यन्सप्तर्षिसिद्धान् - क. ख., सप्तर्षीन् तपसा शुद्धान् अपश्यन्त - घ ।
१०८ ...कथंयस्ते महामुनीन् - घ. । १०९ कथाश्चित्रा धार्मिकाः -घ. । ११० ते सुरास्तत्र अपृच्छन्त परस्परम्-घ. ।
१११ यत्र - क., व्यास - घ. । ११२ तानुवाच - घ. । ११३... नसुरान् - घ. । ११४ देवकण्टकान् - घ. ।
११५ चात्र - घ. । ११६ मुनय - घ. । ११७ सप्तैते ऋषयः शुभाः - घ. । ११८ नैषांनिरीक्षणम् - घ. ।
११९ ततो - घ. । १२० ...स्थिताः सर्वसुरेश्वराः - घ । १२१ भूत्वा तूष्णी (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

ततस्ते समयं कृत्वा स्थिता असुरपुंगवाः[१२२] ।
योस्माकं तु वदेत् किञ्चिद् वध्यो नः स भवेदिति ॥१४४॥
तत्र तेषु[१२३]स्थितेष्वेवमसुरेषु दुरात्मसु ।
ऋषयस्ते तपोयुक्ता वाक्यान्यूचुः[१२४] परस्परम् ॥१४५॥
न शुद्धोयं गिरेर्देशोद्य[१२५]गच्छामोन्यतो[१२६] द्विजाः ।
इहागमो हि दैत्यानां दृश्यते सुदुरात्मनाम् ॥१४६॥
भवान्यपि गतान्यत्र असुराणां भयार्दिता ।
असुरास्ते दुरात्मानो येषामेष क्षयो ध्रुवः ॥१४७॥
गतास्ते निधनं सर्वे धर्मं ये नाशयन्नुत[१२७] ।
राज्यार्थं यदि तैः क्रूरैर्न धर्मो[१२८] नाशितो भवेत् ॥१४८॥
नैवं ते निधनं सर्वे प्राप्ताः स्युरमरद्विषः[१२९] ।
स्वराज्यपरिसंतुष्टा[१३०] भवेयुर्यदि संस्थिताः ।
तेपि सर्वेषु लोकेषु बभुः पूज्याः सुरा इव ॥१४९॥

सनत्कुमार उवाच

अंगिरास्तानुवाचेदं न तेषां कामिनं त्विह ।
राज्यहेतोः प्रवृत्तानामधर्मः ससुपस्थितः ॥१५०॥
उपार्जयति राज्यं वै धर्म एव हि कामिनः[१३१] ।
सोधर्मं नैव कुर्वीत स्थैर्यं राज्यं न[१३२] किंचन ॥१५१॥

अत्रिरुवाच

अधर्मे राज्यमिच्छन्ति जयन्ति युधि सर्वदा ।
-नो[१३३] प्रियाश्चैव लोकस्य भवन्ति हितजीविनः ॥१५२॥

---

१२२ प्रणम्यासुरपुंगवाः - घ । १·३ ततस्तेपु - क ख. । १२४ वाक्यमूचुः - ख, इदमूचुः - घ. । १२५ अयं देशोह्यशुद्धोद्य - घ. । १२६ गच्छामोत्र वै - क. ख., गच्छामो वयमन्यतः - घ. । १२७ नाशयन्त्युत - क, .. न्तु ते - ख. । १२८ ...रधर्मो - क. । १२९ ...रसुरद्विषः - ख. । १३० स्वराज्यापरिसन्तुष्टा - क । १३१ कामिकः - घ. । १३२ च - घ. । १३३ न (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

धार्मिकास्त्वचिरेणैव हत्वा शत्रूनविक्लवाः ।
राज्येषु संप्रतिष्ठन्ते तस्माद्धर्मं समाश्रयेत् ॥१५३॥
ये तु राज्यं बलेनैव धर्मं त्यक्त्वाशुभेरताः[१३४] ।
इच्छन्तोपि[१३५] न तद्राज्यं प्राप्नुवन्ति कदाचन ॥१५४॥
अथ यत् प्राप्यते राज्यं तैस्तु क्रूरेण कर्मणा ।
न चिरं तद् भवेत्तोषां विद्विष्टाश्च भवन्त्युत ॥१५६॥

भृगुरुवाच

धर्म एष पुरा प्राप्तो[१३६] ह्यसुराणां भयावहः[१३७] ।
ब्रह्मणा सृष्टिकामेन न च ते वर्तयन्त्युत ॥१५७॥
स्वभावेन च ते सर्वे दारुणा वै निसर्गतः ।
दारुणाभिगमाच्चैव[१३८] तत्कर्म समुपाश्रिताः ॥१५८॥

सनत्कुमार उवाच

असुरान्प्रति तेषां तु एवं[१३९] कथयतां तदा ।
आगाद्[१४०]धाता विधाता च कृतान्त श्चेति ते त्रयः[१४१] ॥१५९॥
ताँस्ते संपूज्य[१४२] विधिवत् परस्परमनुव्रताः[१४३] ।
उपविष्टाः शिलास्वेव मनुयोपि च ते त्रयः ॥१६०॥
उपविष्टाँश्चर्षयस्ताननमञ्च बहुमानतः ।
ऊचुः क्वेदं[१४४] भवन्तोद्य प्रस्थिता लोकधारिणः[१४५] ॥१६१॥

धातोवाच[१४६]

ब्रह्मलोकाद्ध्युपावृत्य[१४७] वयमद्य गता[१४८] द्विजाः ।
ब्रह्मणा स्म समाज्ञप्ताः कश्यपस्य[१४९] ततोन्तिकम् ॥१६२॥

---

१३४ शुभेतराः ?। १३५ इच्छन्ति ते(?)। १३६प्रोक्तो(?)।१३७ जयावहः (दयावह)(?)। १३८.. मश्चै (श्चै?) व - घ। १३९ सर्वेषामेवं - क. ख । १४० आगुर् (?) । १३ .. श्च महाबलः -[क. ख.। १४२ संगृह्य - घ । १४३ ...मतिप्रभाः - घ. । १४४ कस्माद् - घ. । १४५ लोकचिन्तकाः - घ. । १४६ धातो (धातारो?) ऊचुः - क । १४७ ... दुपावृत्त - ख., ...दावृत्य - घ, ...दुपावृत्ता - घ. । १४८ वयमभ्यागता - घ. । १४९ काश्यपस्य - क. !

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

भूयोपि मुनयः प्रोचुः किमुक्तः कश्यपो द्विजः ।
अथा[१५०]ब्रवीन्मुनीन्[१५१] धाता कश्यपं तु यदुक्तवान्[१५२] ।।२६३।।
यत्त्वया ज्ञापितो ब्रह्मन् ब्रह्मा लोकपितामहः ।
असुरा अपि मे पुत्रा देवाश्चापि प्रियाः प्रभो ।।१६४।।
तेषां नैव यथान्योन्यं वैरं स्याल्लोकभावन ।
तथा कुर्वमरश्रेष्ठ[१५३] भवेयं निर्वृतस्ततः ।।१६५।।
तत्राहं[१५४] ब्रह्मणाज्ञप्तो ब्रवीमि त्वां महामुने ।
देवासुरं यथावृत्त[१५५]मन्योन्यं सख्यमेव च ।।१६६।।
अमृतोत्पादनं चैव राज्यं संस्थाञ्च[१५६] कृत्स्नशः ।
त्वयोक्तं[१५७] भगवान्[१५८] सर्वं भविष्यमृषिसत्तम ।।१३७।।
कथयामास लोकेशो[१५९] देवासुरविचेष्टितम् ।
निवेद्य तस्य तत्सर्वं ब्रह्मणा प्रेषिता वयम् ।
इहागता भगवतीं द्रष्टुं हिमगिरेः सुताम् ।।१६८।।

सनत्कुमार उवाच

तानेवं वादिनो[१६०] भूय ऋषयस्ते तपोधनाः ।
पप्रच्छुर्नियतात्मानः सर्व एव तदा मुने ।१६९।।
देवासुराणां यद् वृत्तं भविष्यं कथितं शुभाः[१६१] ।
तद्वयं[१६२] श्रोतुमिच्छामो यदि वोनुग्रहे मतिः ।।१७०।।
किञ्च विज्ञापिता देवी युष्माभिः सुरसत्तमाः ।
कथयध्वं च तत्सर्वं यद्यनुग्राह्यता हि नः ।।१७१।।
तेषां तद्वचनं श्रुत्वा त्रयस्ते देवसत्तमाः ।
त्वमाचक्ष्व कृतान्तेति वाक्यमूचुर्महाबलाः ।।१७२।।

---

५० ततो - घ. । १५१ मुनिं - क. । १५२ तं प्रजापतिम् - क ख. । १५३ कुरु नरश्रेष्ठ - क. ख.,
रु गुरु श्रेष्ठ - घ. । १५४ पुत्राहं - घ. । १५५ देवासुराणां यद् वृत्त - घ । १५६ राज्यसंथाञ्च - ख. ।
५७ तस्यैवं - क. ख. । १५८ पृच्छतः - क. ख. । १५९ भूतार्थं - क. ख. । १६० तमेदं (वादिनं ?) - घ. ।
६१ सुराः - घ, सुताः ?) । १६२ यद्वयं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ततः स तेषां बहुचित्रकारणं[१६३] यथा भविष्यं कथयाञ्चकार ।
सुरासुराणां जगतश्च कारणं पुरा विधात्रा विहितं यथार्थवद् ।।१७३।।

⊙ इति स्कन्दपुराणे मन्दरारोहणो नाम द्वादशोत्तरशततमोध्यायः ⊙

व्यास उवाच

यत्तेषां कथितं तेन कृतान्तेन महात्मना ।
ऋषीणां मन्दरे पूर्वं तत्सर्वं कथयस्व मे ।।१।।

सनत्कुमार उवाच

भविष्यत्यसुराणां तु हिरण्यकशिपोः सुतः ।
इन्द्रो महाबलो विद्वान् प्रह्लादोसुरपुङ्गवः ।।२।।
सोमृतं सह देवैस्तु कृत्वा सुरगणाधिपः ।
जित्वा युद्धेमृतं देवान्नीतवान्दैत्यपुङ्गवः ।
विष्णुना निर्जितो युद्धे पुत्रं राज्येभिषेक्ष्यति ।।३।।

व्यास उवाच

कथं तदमृतं देवैरसुरैश्च महाबलैः ।
मथितं ब्रह्मणः पुत्र एतदिच्छामि वेदितुम् ।।४।।

सनत्कुमार उवाच

ब्रह्मणाभ्येत्य शक्रत्वे प्रह्लादोसुरपुङ्गवः ।
अभिषिक्तस्तदा व्यास असुरान् प्रजुगोपह ।।५।।
अथ देवैस्तदा[१] संख्यमसुराणां बभूव ह ।
अमन्त्रयन्त देवाश्च[२] भगवन्तं पितामहम् ।।६।।

देवा ऊचुः

भगवन्नसुरैर्देवा हन्यन्ते युधि मर्त्यवत् ।
न म्रियन्ते यथा देवा[३]स्तथाज्ञापय सुव्रत ।।७।।

---

१६३ बहुचित्तहारणं - क. ।
१ मां - क. । २ .. स्ते - ख., ३ नामराःस्युर्यथा दैत्या - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स एवमुक्तस्तानाह ब्रह्मा देवान्सवासवान् ।
क्षीरोदादमृतं शीघ्रमुत्पादयत गच्छत ।।८।।
मन्वन्तरेषु सर्वेषु[४] ये ये देवा भवन्ति ते[५] ।
क्षीरोदादमृतं सर्व[६] जनयन्त्य[७] सुरैस्सह ।।९।।
तदश्नन्ति च देवेशास्तेन तृप्तिश्च जयते ।
उत्तिष्ठन्ति मृताश्चैव पीत्वा च न म्रियन्ति[८] ते ।।१०।।

देवा ऊचुः

कथं तदमृतं देवा भुवि मन्वन्तरेश्वराः ।
उत्पादयन्ति तत्सर्वमुपायं कथयस्व नः ।।११।।

ब्रह्मोवाच

वारुण्यां सोमपुर्यां तु क्षीरोदं तत्सरः शुभम् ।
समुद्रा यत्र ते सप्त सदा सन्निहिताः शुभाः ।।१२।।
इरा[९] माला सिनीवाली कुहू राका इरावती ।
सावित्री चैव गायत्री सुरभी कद्रुरेव च ।।१३।।
अदितिश्च दितिश्चैव देविका विश्वसंभवा ।
गावः सर्वसहा[१०] यत्र सर्वकामदुघाः[११] शुभाः ।।१४।।
क्षरन्ति वत्सलाः क्षीरं षड्रसं ह्यमृतोपमम् ।
ऋषयः फेनपा यत्र तपोदमशमात्मकाः[१२] ।।१५।।
ओषध्यस्तत्र याः काश्चिल्लोकेऽस्मिन्देवसत्तमाः ।
ग्राम्यारण्याश्च[१३] दिव्याश्च मानुषाश्च सहस्रशः ।।१६।।
वृक्षान्वल्लीर्वीरुधश्च गुल्मानन्याँश्च तादृशान्[१४] ।
प्रक्षिप्य भेषजञ्चैव[१५] सोमं राजानमेव च ।।१७।।

---

४ पूर्वेषु - घ. । ५ वै - क., च - ख. । ६ सर्वं - क. । ७ जनयन्ति - क. । ८ मृयन्ति - क. ख. ।
९ इरू - ख. । १० सर्वा ... - ख. । ११ कामद्रुहाः - क. ख. । १२ ...समात्मकाः - क. ।
१३...रण्याथ - क. । १४ वीरुधाः - क. । १५ भिषजश्चैव - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

श्रियं लक्ष्मीं तथा ख्यातिं[१६] यशस्तुष्टिं तथैव च ।
कीर्त्ति श्रद्धां[१७] धारणां च[१८] ऊहापोहे तथैव च ॥१८॥
बलं धर्ममथोर्ज्जश्च[१९] तृप्तिं देवीं सरस्वतीम् ।
तीर्थानि चैव सर्वाणि दानानि विविधानि च ॥१९॥
वृषं रथं ध्वजं[२०] चैव गजमश्वं[२१] तथैव च ।
अष्टौ च मंगलान्यत्र तथा छन्दांसि चाक्षिपन्[२२] ॥२०।
वेदान् विद्याश्च[२३] याः काश्चिद्याश्चैता लोकमातरः ।
मन्त्रान्यज्ञान् सुवर्णं च[२४] मन्त्रोपकरणानि च ॥२१॥
यत्किञ्चिच्छोभनं चैव तृप्तिमद्रसवच्च[२५] ह ।
प्रक्षिप्य तत्र तत्सर्वं ततो मन्थानमावहन्[२६] ॥२२॥
मन्दरं पर्वतश्रेष्ठमकूपारञ्च कच्छपम् ।
तस्य पृष्ठे च मन्थानं मन्दरं पर्वतेश्वरम्[२७] ॥२३॥
कृत्वा विष्णुगृहीतं ते[२८] वासुकिं प्रग्रहं तथा ।
यतो मुखं ततो दैत्या यतः पुच्छं ततः सुराः ॥२४॥
कर्षन्तस्तं तु मन्थानं मथनन्ति बहुलास्समाः[२९] ।
ततो वर्षसहस्रेण तस्मादुत्थास्यते हयः ॥२५॥
गावश्चैव सहाभागा गजो मत्ताश्च वै शुभः ।
वृषभो भीमनादश्च कन्याः कीचकवेणवः ॥२६॥
अष्टमङ्गलकञ्चैव भिषग् धन्वन्तरिस्तथा ।
श्रीर्लक्ष्मीरेवमाद्याश्च वारुणी च मदोत्कटा ॥२७॥
ओषध्यश्च तथा दिव्या ग्राम्यारण्याः समानुषाः ।
वृक्षादयश्च ते सर्वे ततः सोमश्च पार्थिवः ॥२८॥
अमृतं तत् समाहृत्य विषं तच्च दुरासदम् ।
यज्ञादींश्चैव तत्[३०] सर्वान् यत्किञ्चित्तत्र संभृतम्[३१] ॥२९॥

---

१६ क्षान्ति - क. । १७ तेजो (?) । १८ धृतिं चैव - ख. । १९ ...र्ज्जश्च - ख., .. जश्च (श्च?) - क. ।
२० वृषध्वजरथं - घ । २१ जंगमश्च - ख. । २२ चासृजन् - क. ख. । २३ देवविद्याश्च - घ. ।
२४ सुवर्णाश्च - क. । २५ दीप्तिमद्रसवच्च - ख. । २६ मन्दरमावहन् - क. । २७ पर्वतं मन्दरेश्वरम् - क. ।
२८ तं - क. । २९ ममन्थुरतुलं समाः - घ. । ३० तान् - ख. । ३१ संस्थितं - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एवं मन्वन्तरेष्वत्र देवैः सासुरमानुषैः ।
मथ्यते त्वमृतं देवास्तच्च संजायते तथा ॥३०॥
तस्माद्यूयमितो गत्वा दानवैस्सह देवताः ।
मन्थध्वममृतं[३२] क्षिप्रं ततः प्राप्स्यथ[३३] तद्धितम् । ॥३१॥

सनत्कुमार उवाच

त एवमुक्ता देवेशा ब्रह्मणा लोककर्तृणा ।
इमं लोकमुपावृत्य[३४] तथाकुर्वन्त[३५] सर्वशः ॥३२॥
तस्मिँस्तु मथ्यमाने वै विषमग्रे समुत्थितम् ।
देवासुरत्रासकरं तत्पपौ[३६] शङ्करस्तदा ॥३३॥
ततस्तस्मात् पुनरपि ह्युदतिष्ठन्[३७] पयोनिधेः ।
रत्नानि बहुचित्राणि तान्यगृह्णन्त[३८] देवताः ॥३४॥
असुरा जगृहुर्नैनान्यशपँ[३९]स्ताँस्ततोसुरान् ।
मङ्गलान्यवमन्यन्त[४०] तेन ते निधनं गताः ॥३५॥

रत्नान्यूचुः ।

यस्माद्यूयं दुरात्मानो नास्मान्नन्दथ दारुणाः ।
तस्मात् समीहितं यद्वस्तत्तथा न भविष्यति ॥३६॥
वारुणीं नाप्यगृह्णन्ता[४१]सुरा मदबलावहाम्[४२] ।
यस्मात्ततोसुरास्ते वै दुरात्मानश्च सर्वशः ॥३७॥
तत उच्चैःश्रवा नाम[४३] वाजी[४४] परमशोभनः ।
हस्ती चैव चतुर्दन्तो भिषक् च सुमहायशाः ॥३८॥
घृताची पूर्वचित्तिश्च देवी रम्भा मनोरमा ।
अमृतं च ततः सोमो गृहीत्वोत्थितवान्[४५] सुराः[४६] ॥३९॥

---

३२ मथध्वममृतं - क. ख. । ३३ प्राप्स्यत - क. । ३४ ...मनुवाप्य - ख. । ३५ कुर्वन्ति - ख. ।
३६ तम्पपौ - क. ख । ३७ ह्युदतिष्ठत् - क. ख. । ३८ तान्यगृह्णन्ति - क., ...न्तु - ख. ।
३९ ... नशपं - क. ख. ४० ... न्यवमन्यन्ते - क. । ४१ वारुणीश्चाप्यगृह्णन्त - ख. । ४२ ...न्महान् - क. ।
४३ नाम्ना - ख. । ४४ हयः - घ. । ४५ यः प्रगृह्योत्थितवान् - क. । ४६ सुरः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

तत उत्सृज्य ते रत्नान्यसुरा[४७] दर्पिता भृशम् ।
सोमहस्ताद्[४८]बलेनैव अमृतं जगृहुस्तदा[४९] ॥४०॥
तान्देवाः सहिताभ्येत्य ऊचुः सान्त्वेन मोहितान्[५०] ।
न युक्तं कर्तुमेवं वः सहिता उपयुञ्ज्महे ॥४१॥
सख्यं हि नोस्तु सुदृढं मा नो बलमदान्विताः[५१] ।
क्लेशमेनं वृथा येह[५२] कुरुध्वं दानवेश्वराः ॥४२॥
ताँस्तथावादिनः सर्वान् प्रह्लादो दानवेश्वरः ।
इदमाह महामायो धर्मं कृत्वा तु पृष्ठतः ॥४३॥॥

प्रह्लाद उवाच

यदा रत्नान्य[५३]गृह्णीध्वं सागरादुत्थितानि वै ।
तदा न यूयमस्माभिः किञ्चिदुक्ताः सुरेश्वराः ॥४४॥
इदमेवं [५४] वयं सर्वे रत्नं गृह्णीम देवताः ।
नैतद् विना हि युद्धेन दास्यामो वयमद्य वै ॥४५॥
इदमस्मद्गतं देवा अमृतं सर्वमङ्गलम् ।
युद्धेन यदि वः कार्यं गृह्णीध्वं यदि शक्यते ॥४६॥

सनत्कुमार उवाच

त एवमुक्तास्तैः क्रूरैर्देवा भीता इवाभवन् ।
विवर्णवदना दीना न किञ्चित्ताँस्तदोचिरे[५५] ॥४७॥
व्रीडितास्ते[५६] महासत्वा विनिवृत्ताः सुरेश्वराः ।
निरुत्साहा बभूवुर्हि हता[५७] स्मेति च चिन्तयन्[५८] ॥४८॥
ताँस्तथा चिन्तयानाँस्तु सहस्राक्षः पुरन्दरः ।
उवाच किं विषादेन युद्धेनैनान्निहन्महे[५९] ॥४९॥

---

४७ रत्नानामसुरा - क., ते नागमसुरा - घ. । ४८ सोमं हस्ताद् - क. । ४९ अजहुस्तथा - क. ।
५० मोहिताः - ख. । ५१ मदबलान्विताः - (?) । ५२ क्लेशमेवंविधंचेह - घ., तथा - क., विधं - घ ।
५३ रत्नानि - क.ख. । ५४ इदमेव - ख., इदमेकं - ख । ५५ ...त्ताँस्तदाब्रुवन् -(?)। ५६ बृडितास्ते - क. ख. ।
५७ हाहताः (?) । ५८ चाब्रुवन् (?), चेत्यचिन्तयन् (?) । ५९ ...न्निहन्यते - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विष्णुरुवाच

अबुद्धिरेषा शक्रस्य युद्धं प्रति सुरेश्वराः ।
नहि युद्धे सुराः शक्याः सर्वे हन्तुं महाबलाः ॥५०॥
तस्मात्ते न पिबन्ति स्म यावदेवामृतं शुभम् ।
तावदेव हरिष्यामि मायामास्थाय तच्छलात्[६०] ॥५१॥
सन्नह्यध्वं सुरास्सर्वे[६१] व्यूहं कृत्वावतिष्ठत[६२] ।
गृहीत्वा यावदमृतमिहायामि दिवौकसः ॥५२॥

सनत्कुमार उवाच

ततः सं[६३]मोहनीं[६४]मायामास्थाय विबुधेश्वरः ।
यज्ञश्रीरूपमास्थाय जगाम दितिजान्प्रति ।५३॥
स गत्वासुरराजं तमिदमाह महाबलः ।
यज्ञश्रीरूपसंपन्नः पद्महस्तोऽमलेक्षणः[६५] ॥५४॥

विष्णुरुवाच

अबलान् दैवतान्[६६] ज्ञात्वा[६७]बलिनस्सुदुरासदान् ।
यज्ञश्रीरस्मि संप्राप्ता दानवान् बलदर्पितान् ॥५५॥
प्रतिगृह्णन्तु मां सर्वे दानवाः सुरविद्विषः ।
गतास्ते निधनं देवा यूयं देवा न संशयः ॥५६॥
ततोऽसुरास्तदोत्थाय प्रह्लादश्चैव दानवः ।
प्रदक्षिणमुपावृत्य हस्तेऽस्य[६८] कलशं ददुः[६९] ॥५७॥
स प्राह दानवान् देवः स्त्रीरूपा[७०]कृष्टमानसान्[७१] ।
नेदं मयि भवन्तोद्य क्षेप्तुमर्हन्ति सर्वशः ॥५८॥
मायामास्थाय विबुधा माहार्षुस्ते[७२] कदाचन ।
ते हि सर्वे दुराचारा मायानिकृतिमाश्रिताः ॥५९॥

---

६० तं बलात् - क. ख. तद्बलात् (?) । ६१ भवन्तो वै - क. ख. । ६२ च तिष्ठत - क ख. । ६३ स - ख. । ६४ मेंहनी - क. । ६५ पद्महस्तोपलक्षणः - ख., ...त्पलेक्षणः - घ. । ६६ देवतान् क. ख. । ६७ त्यक्त्वा - घ. । ६८ हस्तयोः - घ. । ६९ दधुः - घ. । ७० श्रीरुगो - घ.; स्त्रीरूपी - क. । ७१ दृष्टमानसः - क. घ. । ७२ मामार्षुस्ते - घ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रह्लाद उवाच

जाने मायाविदस्ते वै निकृत्या बलिनश्च ह [७३] ।
माययैव वयं तान्वै निहंस्यामः सुदंशितान् [७४] ॥६०॥
निकृत्या निकृतिज्ञास्तु हन्तव्या दुष्टचेतसः ।
मायाविदश्च मायाभिरिति धर्म [७५] प्रभाषितम् [७६] ॥६१॥
त्वन्तु नो गतिरद्येह तथा चैव परायणम् ।
त्वया दत्तमिदं सर्वे उपोयक्ष्याम [७७] शोभने ॥६२॥
त्वञ्चेन्न [७८] यच्छसेस्माकं तद्धि ते परमं हितम् ।
वयं च त्वां [७९] तथा सर्वे नावमंस्यामहे सदा ॥६३॥
ततः स तं तदा धीमान् प्रहस्य शुभदर्शनः ।
उवाच यत् त्वया गीतं सत्यं तच्च करोमि ते ॥६४॥

सनत्कुमार उवाच

ततो निरीक्षतां [८१] तेषां [८२] विष्णुः कृत्वा स्वकं वपुः ।
प्रगृह्यामृतमुत्पत्य देवेभ्यःप्रददौ विभुः ॥६५॥

⊙ इति स्कन्दपुराणे अमृताहरणे त्रयोदशोत्तरशततमोध्यायः ⊙

व्यास[१] उवाच

कथं तदुत्थितं घोरं विषं सूर्यायुतप्रभम्[२] ।
कथं पीतं भगवता शङ्करेणामितौजसा ॥१॥
कथञ्च देवदेवस्य कण्ठे कुन्देन्दुसप्रभे ।
नीलो वर्णः समुत्पन्न एतदिच्छामि[३] वेदितुम् ॥२॥

सनत्कुमार उवाच[४]

कस्मिन्देशे महापुण्ये एतदाख्यानमुत्तमम् ।
वृत्तां ब्रह्मपुरोगाय कस्मिन् काले महाद्युते ॥३॥

---

७३ निकृता निपुणाश्च ये - घ. । ७४...स्तु दंशितान् - घ. । ७५ धर्मे - क., धर्मः (?) । ७६ प्रभाषित. (?), प्रभाषत - क., प्रभाषते (?) । ७७ उपभोक्षाम (?) । ७८ तं (तद्) - क. । ७९ वयमेतत् - ख, वयं तत् - क । ८० निरीक्ष्यत तान् - क. । ८१ सर्वान् - क. । ८२ अमृतमथन अध्यायः १६६ इति ख.। पूर्वाध्यायोपि १६६ ।

१ कृष्णद्वैपायन - ख. । २ सूर्यानलप्रभमम् - घ. । ३ एतदिच्छाम – क. । ४ अत्र सन उवाचेत्यनन्तरं दीर्घसत्रगाजिषट्कुलीयप्रश्नवायूत्तररूप पूर्वापरसंबन्धाधायकः कियानंशः खंण्डितः प्र तभाति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एतदाख्याहि नः सम्यग् यथावृत्तं तपोधन ।
नीलकण्ठः कथं देवः शर्बस्त्रिभुवनेश्वरः ॥४॥

सूत उवाच

यथा श्रुतं मया पूर्वं वायुना जगदायुना ।
कथ्यमानं द्विजश्रेष्ठाः सत्रे वर्षसहस्रिके ॥५॥
नीलता केन कण्ठस्य देवदेवस्य शूलिनः ।
तदहं[५] कीर्तयिष्यामि श्रृणुध्वं संश्रितव्रताः[६] ॥६॥
उत्तरे शैलराजस्य सरांसि सरितो ह्लदाः ।
- - - - - कीर्णेषु देशेषु पर्वतेषु च ॥७॥
गिरिश्रृङ्गेषु तुङ्गेषु गह्वरोपवनेषु च ।
- - भक्षा महात्मानो मुनयः शंसितव्रताः ॥८॥
संस्तुवन्ति महादेवं यजन्तोत्र यथाविधि ।
ऋग्यजुःसामवेदैश्च नृत्यगीतार्चनादिभिः ॥९॥
- - - - - - - - - - - - - - - - - - ।
प्रवृत्तो ज्योतिषां चक्रे मध्यं प्राप्ते दिवाकरे ॥१०॥
दैवता[७] नियतात्मानः सर्वे तिष्ठन्ति[८] तां कलाम् ।
नियमानि समाप्यान्ते[९] तस्मिन् काले दिवौकसाम् ॥११॥
तेषां मध्ये गतो[१०] वायुः प्राणिनां जीवितोद्भवः[११] ।
नमस्ते नीलकण्ठाय इत्युवाच[१२] सदागतिः[१३] ॥१२॥
तच्छ्रुत्वा भावितात्मानो मुनय : संशितव्रताः[१४] ।
बालखिल्या[१५] इति ख्याताः पतङ्गसहचारिणः ॥१३॥
अष्टाशीतिसहस्राणि मुनीनामूर्ध्वरेतसाम् ।
ते स्म पृच्छन्ति वै[१६] वायुं वायुपर्णाम्बुभोजनाः ॥१४॥

---

५ तमहं - ख. । ६ संशितव्रताः - ख. । ७ देवता - क. ख. । ८ उपतिष्ठन्ति (?) । ९ समाप्यैते - क. ।
१० मध्यगतो (?) । ११ ... द्भवं - ख. । १२ ... (यो) मित्युवाच - क. । १३ समागतः - ख. ।
१४ शंसितव्रता. (?) । १५ वालिखिल्या - क. ख. । १६ तं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

बालखिल्या ऊचुः

नीलकण्ठेति यत् प्रोक्तं त्वया पवनसत्तम ।
तद्वयं[१७] श्रोतुमिच्छाम त्वत्प्रसादात् प्रभञ्जन ॥१५॥
नीलता केन कण्ठस्य[१८] प्रकारेणाम्बिकापतेः[१९] ।
श्रोतुमिच्छामहे सम्यक् त्वद्वक्त्रात्तु[२०] विशेषतः ॥१६॥
एतत्पृष्टं यदस्माभिस्तद्धि नः[२१] परमं हितम् ।
वाचो याः संप्रवर्तन्ते[२२] सर्वास्तास्तु त्वयेरिताः[२३] ॥१७॥
वर्णस्थानगते वायौ वाग्विधिः[२४] संप्रवर्तते ।
ज्ञानं विज्ञानमुत्साह[२५]स्त्वत्तो वायो प्रवर्तते ॥१८॥
- - - - - र्ति न[२६] योगेन[२७] सर्वे वर्णाः प्रवर्तिताः ।
यतो[२८] वाचो निवर्तन्ते[२९] देहबद्धाश्च[३०] दुर्लभाः ॥१९॥
तत्रापि तेऽस्ति सद्भावः[३१] सर्वगस्त्वं सदानिल ।
नान्यः सर्वगतो देवस्त्वदृतेऽस्ति समीरण[३२] ॥२०॥
स चैव जीवलोकोयं धारितः पवन त्वया ।
एष वै जीवलोकस्ते प्रत्यक्षो[३३] जीवितोद्भव[३४] ॥२१॥
वेत्थ वाचस्पतिं देवं[३५] मनोनायकमीश्वरम् ।
ब्रूहि त्वं[३६] केन देशेस्थ[३७] किं कृता रूपविक्रिया[३८] ॥२२॥
श्रुत्वा वाक्यं ततस्तेषामृषीणां भावितात्मनाम् ।
प्रत्युवाच महातेजा वायुर्लोकनमस्कृतः ॥२३॥

वायुरुवाच

पुरा कृतयुगे[३९] विप्रा[४०] वेदनिर्णयतत्परः[४१] ।
वसिष्ठो नाम धर्मात्मा मानसो वै प्रजापतिः[४२] ॥२४॥

---

१७ यदयं - ख. १८ कण्ठेस्य (?) । १९ प्रहारेणाम्बिकापतेः - क. । २० तव वक्त्राद् - ख. । २१ नो - घ. । २२ यतो वाचःप्रवर्तन्ते - घ., सुप्रवर्तन्ते - क. । २३ ...स्त्वत्पुरोदिताः - ख. । २४ र्वायोर्वाग्विधिः - ख. । २५ ज्ञानपूर्वमधो... - ख. । २६ त्वयाद्ध्व - घ., निष्पत .. - ख, निष्ठीव - घ. । २७ मानेन - ख. घ. । २८ यत्र - क. । २९ प्रवर्तन्ते - ख., विवर्तन्ते(?) । ३० ...वत्त्वाच्च - ख. । ३१ सद्भावो - क. ख. । ३२ शरीरिणः – घ. । ३३ प्रत्यक्ष्यं - क. ख. । ३४ जीवितोद्भवं - क. । ३५ देव - ख. । ३६ तत् - ख. । ३७ देशस्य - क. ख. । ३८ त्वापविक्रिया - क. । ३९ कृते युगे - क. । ४० विप्रो - क. । ४१ तत्पराः - ख. । ४२ प्रजापतेः (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पप्रच्छ कार्तिकेयं वै मयूरवरवाहनम् ।
क्रौञ्चदेहान्तकरणं [४३] देव्या हृदयनन्दनम् [४४] ॥२५॥
महिषासुरनारीणां [४५] नयनाञ्जनतस्करम् ।
महासेनं महात्मानं [४६] मेघस्तनितनिस्वनम् ॥२६॥
उमामनोहर्षकरं [४७] बालकं छद्मरूपिणम् [४८] ।
बहुमङ्गलसंयुक्तां [४९] कथां पापप्रणाशनीम् ।
वसिष्ठः प्रार्थयामास तस्मिन् काले महातपाः ॥२७॥

वसिष्ठ उवाच

शुचिं प्रपद्ये वरदं ब्रह्मण्यममितौजसम् ।
भक्तानुकम्पिनं नित्यं सर्वज्ञं प्रियदर्शनम् ॥२८॥
- - - - - - - - - - - - - - - - म् ।
नमस्ते - - - ष्यन्द अग्निगर्भ नमोस्तु ते ॥२९॥
नमस्ते शरजन्माय नमस्ते कृत्तिकासुत ।
नमो द्वादशनेत्राय षण्मुखाय नमोस्तु ते ॥३०॥
नमस्ते शक्तिहस्ताय दिव्यस्त्र - - - - - ।
- - - - - - - - - - - - - - - - - - ॥३१॥
नमो हिरण्यरेताय नमस्ते भूतशम्भवे ।
नमः कुक्कुटहस्ताय तथा छागप्रियाय च ॥३२॥
नमस्ते रक्तवासाय नमो नीलशिखण्डिने ।
नमोत्यन्तकुमाराय सर्वदैवतपूजिते [५०] ॥३३॥
नमः क्रौञ्चविनाशाय महिषासुरघातिने [५१] ।
नमस्तेर्णव - - - मूर्त्तये - - - - - ॥३४॥
नमस्ते बालरूपाय उन्मत्तललिताय च ।
यदेतद् दृश्यते स्थाणोः [५२] शुभं शुभ्राञ्जनोपमम् ॥३५॥

---

४३ ...जीवितनाशेशं - क. । ४४ पार्वतीहृदि नन्दनम् - ख., ४५ तारकासुरनारीणाम् (?) । ४६ महात्मानं महासेनं - घ. । ४७ मनःप्रहर्षणं - क., वनप्रहर्षण - घ. । ४८ बुद्धरूपिणम् - घ. । ४९ ब्रूहि - क. । ५० सर्वदेवतपूजिते - ख. । ५१ तारकासुरघातिने (?) । ५२ न्चर्यी - क., शुर्या - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तत् किमर्थं समुत्पन्नं कण्ठे कुन्देन्दुसन्निभे ।
एतदाप्ताय दान्ताय भक्ताय तव[५२] पृच्छते ।।३६।।
ब्रूहि मङ्गलसंयुक्तां कथां पुण्यसमाश्रिताम् ।
एवं स्तुतो[५३] वसिष्ठेन मुनिना[५४] भावितात्मना ।।३७।।
श्रुत्वा वाक्यं ततस्तस्य वसिष्ठस्य महात्मनः ।
प्रत्युवाच महातेजा दैत्यारिः पावकोद्भवः ।।३८।।
यदुक्तं भवता[५५] प्रश्नं यन्मां पृच्छसि वै द्विज ।
श्रूयतां वदतां श्रेष्ठ कथ्यमानमिदं मया ।।३९।।
उमोत्सङ्गोपविष्टेन यथा पूर्वं मया श्रुतः[५६] ।
पार्वत्याश्चैव[५७] संवादः शंकरस्य[५८] महात्मनः ।।४०।।
तमहं[५९] संप्रवक्ष्यामि यथातथ्यं[६०] महामुने[६१] ।
कैलासशिखरे रम्ये नानाधातुविचित्रिते[६२] ।।४१।।
तरुणादित्यसंकाशे तप्तकाञ्चनसन्निभे ।
वज्रस्फटिकसोपाने चित्रपट्टशिलातले ।।४२।।
जाम्बूनदमये दिव्ये नानारत्नविभूषिते ।
नानाद्रुमलताकीर्णे नानापुष्पफलोदके ।।४३।।
हंसकारण्डवाकीर्णे चक्रवाकोपशोभिते ।
षट्पदोद्गीतकमले धारासंपातनादिते ।।४४।।
मत्तक्रौञ्चमयूराणां[६३] नादैर्विक्रुष्टकन्दरे[६४] ।
अप्सरोगणसंकीर्णे किन्नरैश्चोपशोभिते ।।४५।।
जीवन्जीवकदात्यूहविरुतैश्च[६५] प्रणादिते ।
कोकिलारावमधुरे सिद्धचारणसेविते ।।४६।।
सौरभेयनिनादाढ्ये मेघस्तनितनिस्वने ।
विनायकभयोद्विग्नैः कुञ्जरैर्मुक्तकन्दरे ।।४७।।

---

५२ ब्रूहि - क. । ५३ स्तुत्वा - ख. । ५४ मुनीनां - ख. । ५५ भविता - ख. । ५६ श्रुतं - ख. ।
५७ चैव - (?) । ५८ शर्वस्य च - ख । ५९ तदहं - ख । ६० क्रियार्थन्तु - ख । ६१ महात्मोने - ख ।
६२ विभूषिते - क. । ६३ तत्र क्रौञ्चमयूराणां - ख. । ६४ विस्पष्टनो(ना?)दिते - ख. । ६५ जातीनां विरुतैश्च - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वंशवादित्रनिर्घोषे श्रोत्रेन्द्रियमनोहरे ।
दोलाललितविक्षेपै[६६] र्वनितासिद्धसेविते[६७] ॥४८॥
ध्वजैर्ल्लम्बितदोलानां[६८] घण्टानां विरुताकुले ।
बल्लकीघोषबहुले नृत्तव्यापारसंकुले ॥४९॥
मुखैर्दर्द्दरवाद्यैश्च[६९] वल्गितास्फोटिते तथा ।
क्रीडाचेष्टाविनोदानां रवैराक्रन्द(?)कन्दरे ॥५०॥
हासैः सन्त्रासजननैर्विकरालैस्तथा मुखैः ।
देहबन्धैर्विचित्रैश्च प्रक्रीडितगणेश्वरे[७०] ॥५१॥
व्याघ्रसिंहमुखै[७१] र्घोरैस्सर्पाखुवदनैरपि ।
मृगमेषमुखैश्चान्यैर्गजवाजिमुखैस्तथा ॥५२॥
विडालवदनैश्चोग्रैः क्रोष्टुकाकारमूर्त्तिभिः[७२] ।
ह्रस्वैर्दीर्घैः कृशैः स्थूलैर्लम्बोदरमहोदरैः ॥५३॥
ह्रस्वजंघैः प्रलम्बोष्ठैस्तालजंघैस्तथापरैः[७३] ।
गोकर्णैरेककर्णैश्च महाकर्णैरकर्णकैः ॥५४॥
एकपादैर्महापादैर्बहुपादैरपादकैः ।
एकमूर्धभिरत्युग्रैर्बहुमूर्धभिरुल्बणैः ॥५५॥
अमूर्धभिश्च गणपैर्महामूर्धभिरेव च ।
एकनेत्रैर्महानेत्रैर्बहुनेत्रैश्च सर्वशः ॥५६॥
कबन्धाकृतिभिश्चान्यैरनेत्रैर्गणनायकैः ।
एकनासैर्महानासैर्बहुनासैरनासिकैः ॥५७॥
एकवक्त्रैर्महावक्त्रैर्बहुवक्त्रैरवक्त्रकैः ।
एकदंष्ट्रैर्महादंष्ट्रैर्बहुदंष्ट्रैरदंष्ट्रकैः ॥५८॥
एकहस्तैर्महाहस्तैर्बहुहस्तैरहस्तकैः ।
विश्वरूपैर्विरूपैश्च सुरूपै रूपवर्जितैः ।
एवंविधैर्महायोगैर्भूतैर्भूतपतिर्वृतः ॥५९॥

---

६६ दोलालम्बितविक्षेपै (?) । ६७ सिंहसेविते - क. । ६८ ध्वजोल्लम्बितदोलानां (?) । ६९ मुखदर्दर-वाद्यैश्च - क. । ७० .. गणेश्वरैः - क. । ७१ सिंहव्याघ्रमुखै (?) । ७२ क्रोष्टुकाकारिमूर्तिभिः ख. । ७३ ...स्तथापरे - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विशुद्धरत्नाङ्गविभूषिताङ्गदा[७४] शिलातले हेममये मनोरमे ।
सुखोपविष्टं मदनाङ्गनाशनं चुचोद[७५] वाक्यं गिरिराज्यनन्दना[७६] ॥६०॥

देव्युवाच

भगवन् भूतभव्येश गोवृषाङ्कितशासन ।
तव कण्ठे महादेव भ्राजतेम्बुदसन्निभम्[७७] ॥६१॥
नात्युल्वणं शुभं शुभ्रं[७८] नीलाञ्जनचयोपमम् ।
किमिदं देव दीप्तं ते[७९] कण्ठे कामाङ्गनाशन ।
को हेतुः कारणं किं वा येनेदं नीलमीश्वर ।
एतत्सर्वं यथान्यायं श्रोतुमिच्छामि तत्त्वतः[८०] ॥६२॥
श्रुत्वा वाक्यं ततो देव्याः पार्वत्याः पार्वतीप्रियः ।
कथां मङ्गलसंयुक्तां कथयामास शङ्करः ॥६३॥

महेश्वर उवाच

मथ्यमानेमृते पूर्वं क्षीरोदे सुरदानवैः ।
अग्रे समुत्थितं घोरं विषं कालानलप्रभम् ॥६४॥
कालमृत्युरिवोद्भूतं युगान्तादित्यवर्चसम् ।
त्रैलोक्योत्सादसूर्याभं विस्फुरत्तत्[८१] समन्ततः ॥६५॥
तं दृष्टवा[८२] सुरसंघाश्च दैत्याश्चैव वरानने ।
विषण्णवदनाः सर्वे गतास्ते ब्रह्मणोन्तिकम् ॥६६॥
दृष्टवा सुरगणान् भीतान्ब्रह्मोवाच महाद्युतिः ।
मया[८३]ष्टगुणमैश्वर्यं भवतां संप्रकल्पितम् ॥६७॥
त्रैलोक्यस्येश्वरा यूयं सर्वे च विगतज्वराः ।
विमानचारिणः[८४] सर्वे सर्वे स्वच्छन्दचारिणः ॥६८॥
प्रजाभिः सत्कृताः सम्यङ् नित्यं बहुमता मम ।
किमर्थे वा[८५] महाप्रज्ञा भृशमुद्विग्नचेतसः ॥६९॥

---

७४ रत्नांशुविभूषिताङ्गदा - ख. घ., विभूपिताङ्गै (ङ्गे) - क टि., ... ङ्गीं - घ । ७५ जगाद - घ., उवाच - ख. । ७६गिरिराज पुत्री - ख. । ७७ ...म्बुजसन्निभम् (?) । ७८ शुभ्रे (?) । ७९ दीप्यंते - क, दीप्यते - ख. । ८० वक्तुमर्हस्यशेषतः - ख. । ८१ विस्फुरन्तं - क. । ८२ तन्दृष्ट्वा - क. । ८३ यथा - ख. । ८४ विमानगामिनः - ख. । ८५ वो - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

केन व्यावर्तितैश्वर्या येन मां समुपस्थिताः ।
प्रजासर्गे न सोत्रास्ति[८६] योज्ञान्मम निवर्तयेत् ॥७०॥
अध्यात्मे चाधिभूते च अधिदैवे च नित्यशः ।
प्रजाकर्मविपाके च शक्ता यूयं प्रवर्तितुम् ॥७१॥
किं कार्यं कारणं किं वा[८७] कुतो वा भयमागतम् ।
येन[८८] यूयं समुद्विग्ना मृगाः सिंहार्दिता इव ॥७२॥
एतत्सर्वं यथान्यायं शीघ्रमाख्यातुमर्हथ ।
श्रुत्वा वाक्यं ततस्तस्य[८९] ब्रह्मणः सुमहात्मनः[९०] ॥७३॥
ऊचुस्त ऋषिभिः सार्धं सुरदैत्येन्द्रदानवाः[९१] ।
सुरासुरगणैर्ब्रह्मन्[९२] मथ्यमाने[९३] महोदधौ[९४] ॥७४॥
भुजङ्गभृङ्गसंकाशं नीलजीमूतसन्निभम्[९५] ।
प्रादुर्भूतं विषं घोरं संवर्त्ताग्निसमप्रभम् ॥७५॥
कालमृत्युरिवोद्भूतं युगान्ताग्निसमप्रभम् ।
त्रैलोक्योत्सादसूर्याभं विस्फुरत्तत्[९६] समन्ततः ॥७६॥
तेजसामिव संघातं सुमहत् समुपस्थितम् ।
विषण्णवदनाः सर्वे दृष्टोद्भूतं महाविषम् ॥७७॥
विषेणोत्तिष्ठता तेन[९७] कालानलसमत्विषा[९८] ।
निर्दग्धो रक्तगौराङ्गः कृतः कृष्णो जनार्दनः ॥७८॥
तं दृष्ट्वा रक्तगौराङ्गं कृतं कृष्णं जनार्दनम् ।
सर्वे भीता[९९] वयं ब्रह्मं[१००]स्त्वामेव शरणं गताः ॥७९॥
सुराणामसुराणाञ्च श्रुत्वा वाक्यं भयावहम् ।
प्रत्युवाच महातेजा ब्रह्मा लोकपितामहः[१०१] ॥८०॥

---

८६ सोर्ऽस्त - ख. । ८७ किन्नु - ख । ८८ केन - ख. । ८९ तु ते तस्य - क. । ९० परमात्मनः - क. । ९१ सुरा.दैत्येन्द्रदानवाः - क. । ९२ सुरासुरैर्मथ्यमाने - क. । ९३ पयोत्सङ्गात् - क. । ९४ महातपाः - क, महोदधेः (?) । ९५ ...सप्रभं - क. । ९६ विस्फुरन्तं - क. । ९७ विषेणोत्तिष्ठमानेन - क., ...त्थितमात्रेण (?) । ९८ ...समार्चिषा - क. । ९९ ततस्सर्वे - क. । १०० भीता - क । १०१ लोकनमस्कृतः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शृण्वन्तु देवताः सर्वे ऋषयश्च[१०२] तपोधनाः ।
यत्तदग्रे[१०३] समुद्भूतं मथ्यमाने महोदधौ[१०४] ।।८१।।
विषं कालानलप्रख्यं कालकूटमिति श्रुतम्[१०५] ।
तस्य[१०६] प्रोद्भूतमात्रस्य विराजन्ते न[१०७] देवताः ।।८२।।
तस्य[१०८] विष्णुरहं वापि सर्वे वा सुरपुङ्गवाः ।
शक्नुवन्ति न वै[१०९] सोढुं वेगमन्यत्र शङ्करात् ।।८३।।
इत्युक्त्वा पद्मगर्भाभः पद्मयोनिरयोनिजः ।
मामेवं स्तोतुमारेभे[११०] ब्रह्मा वेदविदां वरः ।।८४।।

ब्रह्मोवाच

नमस्तुभ्यं विरूपाक्ष नमस्ते नैकचक्षुषे[१११] ।
नमःपिनाकहस्ताय वज्रहस्ताय वै नमः ।।८५।।
नमस्त्रिशूलहस्ताय दण्डपाशासिपाणये ।
नमस्त्रैलोक्यनाथाय भूतानां पतये नमः ।।८६।।
नमः सुरारिहन्त्रे च[११२] सोमसूर्याग्निचक्षुषे ।
ब्रह्मणे चैव रुद्राय विष्णवे चैव ते नमः ।।८७।।
सांख्याय चैव योगाय भूतग्रामाय वै नमः ।
मन्मथाङ्गविनाशाय कालकालाय[११३] वै नमः ।।८८।।
रुद्राय वसुरेताय देवदेवाय रंहसे ।
उष्णीषिणे सुवक्त्राय सहस्राक्षाय मीढुषे ।।८९।।
कपर्दिने करालाय[११४] शङ्कराय हराय च ।
विरूपाय सुरूपाय शिवाय वरदाय च ।।९०।।
त्रिपुरघ्ने मखघ्नाय मातॄणां पतये नमः ।
बुद्धाय चैव शुद्धाय मुक्ताय[११५] केवलाय च ।।९१।।

---

१०२ मुनयश्च - ख । १०३ यत्र चाग्रे - ख । १०४ पयोनिधौ - क । १०५ कालकूटेति विश्रुतम् - क. ।
१०६ येन - ख । १०७ प्रोद्भूतमात्रेण न विराजति - ख । १०८ न च - क. । १०९ न शक्नुवन्ति च - क. ।
११० इदं स्तोत्रं समारब्धो - क, गत्वेशं स्तोतुमारब्धो - घ. । १११ नेकचक्षुषे - ख । ११२ ...,नाशाय - क. ।
११३ कालाकालाय - ख. । ११४ कधीराय - क. । ११५ मुक्तायै - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

लोकत्रयविधात्रे च शक्राय वरदाय च[११६] ।
अग्रायाथ तथोग्राय विप्रायानन्तचक्षुषे[११७] ॥९२॥
रजसे चैव सत्वाय तमसेव्यक्तयोनये ।
नित्याय चैवानित्याय नित्यानित्याय वै नमः ॥९३॥
व्यक्ताय चैवाव्यक्ताय व्यक्ताव्यक्ताय वै नमः ।
चिन्त्याय चैवाचिन्त्याय चिन्त्याचिन्त्याय वै नमः ॥९४॥
सूक्ष्माय चैवासूक्ष्माय सूक्ष्मासूक्ष्माय वै नमः ।
भक्तानामार्तिनाशाय प्रियनरायणाय च ॥९५॥
उमाप्रियाय शर्वाय नन्दिवक्त्राङ्कनाय च ।
पक्षमासार्धमासाय[११८] ऋतुसंवत्सराय च ॥९६॥
बहुरूपाय मुण्डाय दण्डिनेथ वरूथिने[११९] ।
रथिने [१२०] धन्विने नित्यं[१२१] जटिने ब्रह्मचारिणे ॥९७॥
ऋग्यजुःसामरूपाय[१२२] पुरुषायेश्वराय च[१२३] ।
नमस्ते भगवन्[१२४] त्र्यक्ष नमस्ते भगवञ्छिव ॥९८॥
नमस्ते देवदेवेश नमस्ते भूतभावन ।
इत्येवमादिचरितैः स्तुतं स्तुत्यं [१२५] नमोस्तुते[१२६] ॥९९॥
प्रणम्य मूर्ध्ना प्रणतोस्मि रुद्रं जगद्गुरुं देववरं त्रिनेत्रम् ।
सूक्ष्मोसि योगातिशयाधिगम्यं तेजोनिधे[१२७]व्यक्तमुपैमि रुद्रम् ॥१००॥
ज्ञात्वा तु भक्तिं मम देवदेव प्रसीद गङ्गाम्बुनिषिक्तकेश ।
त्वां सौरभेयाम्बुदचित्रयानं[१२८] शिवं प्रयत्नात् शरणं गतोस्मि[१२९] ॥१०१॥
एवं तेन तदा[१३०] पूर्वं ब्रह्मणा लोककर्तृणा ।
स्तुतोहं विविधैः स्तोत्रैर्वेदवेदाङ्गसंभवैः ॥१०२॥

---

१६ इन्द्रियाणां वराय च - ख. । ११७ नेकचक्षुषे - क. । ११८ वर्षाय (?) । ११९ ...न्धवरूथिने - घ. ।
२० छत्रजिने (?) । १२१ चैव - क. । १२२ सामर्ग्यजुरथर्वाय (?), ...माथर्वाय - क. । १२३ पुरुधामे-
राय च (?) । १२४ भगवान् - क ख. । १२५ स्तुतिस्तुत्यं - क. ख., तुभ्यं - क. । १२६ नमो
मः - (क?) । १२७ योगातिशयाभिगम्यं तेजोनिधिं - ख. । १२८ ...चिन्तयानं - ख. । १२९ शरणा-
गतोस्मि - ख. । १३० भगवता - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ततः प्रीतो ह्यहं तस्य[१३१] ब्रह्मणोथ महात्मनः[१३२] ।
नतस्तं[१३३] मुख्यया वृत्त्या पितामहमथाब्रुवम् ॥१०३॥
भगवन् भूतभव्येश भूताधिप[१३४] महातपः[१३५] ।
किं[१३६] कार्यं ते मया ब्रह्मन्[१३७] कर्तव्यं वद[१३८] सुव्रत ।
श्रुत्वा वाक्यं ततो ब्रह्मा प्रत्युवाचाम्बुजेक्षणे ॥१०४॥

ब्रह्मोवाच

भूतभव्यभवन्नाथ श्रूयतां कारणेश्वर[१३९] ।
सुरासुरगणैर्देव मथ्यमाने महोदधौ[१४०] ॥१०५॥
मयूरभृङ्गसंकाशं[१४१] नीलजीमूतसन्निभम् ।
प्रादुर्भूतं विषं घोरं संवर्त्ताग्निसमप्रभम् ॥१०६॥
कालमृत्युरिवोद्भूतं युगान्तादित्यवर्च्चसम् ।
त्रैलोक्योत्सादसूर्याभं विस्फुरत् तत्[१४२] समन्ततः ॥१०७।
विषेणोत्तिष्ठता तेन[१४३] कालानलसमत्विषा ।
निर्दग्धो रक्तगौराङ्गः कृतः कृष्णो जनार्दनः ॥१०८॥
तं दृष्ट्वा रक्तगौराङ्गं कृतं कृष्णं जनार्दनम् ।
ततः सर्वे वयं[१४४] भीता स्त्वामेव शरणं गताः[१४५] ॥१०९॥
तत्[१४६] पिबस्व महादेव लोकानां हितकाम्यया ।
भवानग्रस्य भोक्ता वै भवान्देववरः[१४७] प्रभुः ॥११०॥
भवाँस्तस्य[१४८] महावेगं समर्थः सन्नियच्छितुम् ।
नान्यः कश्चित् पुमाञ्छक्तो जगत्यस्मिँश्चराचरे[१४९] ॥१११॥
पातुमेको महादेव समर्थस्त्वं महाद्युते[१५०] ।
तस्यैवोग्रप्रभावस्य कालानलसमत्विषः(?) ॥११२॥

---

१३१ प्रीतोस्मि तस्याहं - ख. । १३२ ब्रह्मणः परमात्मनः - क. । १३३ ततस्तं - क., तमहं - ख. ।
१३४ लोकनाथ - ख. । १३५ भूताधिक - क., जगत्पते - ख. । १३६ यत् - क. । १३७ महाब्रह्मन् - ख. ।
१४८ तव - क. । १३९ कारणं परम् (?) । १४० सुरासुरैर्मथ्यमाने क्षीरोदे भगवञ्छिव - क. ।
१४१ अभवन्मेघसंकाशं - क. । १४२ त्रिस्फुरन्तं - क. । १४३ विषेणोत्तिष्ठमानेन - क. ख., ...त्थितमात्रेण(?) ।
१४४ भयं (भयाद?) - क. । १४५ भृशं वृषभवाहन - ख. । १४६ तं - क. । १४७ भवांश्च वरदः - घ. ।
१४८ भगवान् स्तां (तं) - क. । १४९ पुमाञ्छक्तस्त्रिषु लोकेषु विद्यते - ख. । १५० महाद्युतिः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वेगं सोढुं[१५१] महादेव समर्थोन्यो[१५२] न विद्यते ।
तस्यैवं ब्रुवतो देवि[१५३] ब्रह्मणः परमेष्ठिनः ।।११३।।
बाढमित्येव तद्वाक्यं प्रतिगृह्य वरानने ।
तदहं[१५४] पातुमारब्धो विषमन्तकसन्निभम् ।।११४।।
लोकत्रयहितार्थाय सुरदैत्येन्द्रसन्निधौ[१५५] ।
पिबतो मे महाघोरं बिषं सुरगणार्चिते[१५६] ।
कण्ठे समभवत् क्षिप्रं कृष्णं कृष्णाम्बुजे[१५७]क्षणे ।।११५।।
तद् दृष्ट्वोत्पलपत्राभं[१५८] कण्ठे सक्तं महाविषम्[१५९] ।
तक्षकं नागराजानं लेलिहानमिवोरगम् ।।११६।।
अथोवाच महातेजा ब्रह्मा लोकपितामहः ।
शोभसे त्वं महादेव कण्ठेनानेन सुव्रत ।।११७।।
इति तस्य वचः श्रुत्वा मया गिरिवरात्मजे ।
पश्यतां सुरसंघानां दैत्यानाञ्च वरानने ।।११८।।
यक्षगन्धर्वसिद्धानां[१६०] पिशाचोरगरक्षसाम् ।
धृतं कण्ठे विषं घोरं ततः श्रीकण्ठता मम ।।११९।।
तत्कालकूटं विषमुग्रतेजः[१६१] कण्ठे धृतं पर्वतराजकन्ये[१६२] ।
पश्यन् समस्तः[१६३] सुरदैत्यसंघो[१६४] हृष्टः[१६५] परं विस्मयमाजगाम[१६६] ।।१२०।।
ततः सुरगणाः सर्वे सयक्षोरगराक्षसाः ।
ऊचुः प्राञ्जलयो देवि[१६७] मत्तमातङ्गगामिनि ।।१२१।।
अहो बलं वीर्यपराक्रमस्ते अहो वपुर्योगबलं तवेदम्[१६८] ।
अहो विभूतिस्तव देवदेव गङ्गाजल[१६९]प्लावितचन्द्रमौले[१७०] ।।१२२।।
त्वमेव विष्णुश्चतुराननस्त्वं त्वमेव सूर्यो रजनीकरस्त्वम् ।
त्वमेव कालो नियतिस्त्वमेव त्वमेव मृत्युर्धनदस्त्वमेव[१७१] ।।१२३।।

---

१५१ समर्थोन्यो - ख. । १५२ वेगं सोढुं - ख. । १५३ ब्रुवतस्तु वरारोहे - ख. । १५४ ततोहं - क ख. । १५५ लोकत्रयहितार्थायासुरदैत्येद्रवन्दिते - क. । १५६ सुरगणार्चितं (न्तिकं?) - क. । १५७ सुरगणार्चितं (ते?) - क. । १५८ तन्नीलोत्पलपत्राभं - क. । १५९ शक्तामिवान्तकं - क. । १६० नागानां - ख. । १६१ ...मुग्रतेजं - क. ख. । १६२ ... पुत्रि - क. । १६३ संपश्यमानाः - क. ख. । १६४ ... संघाः - क. ख. । १६५ हृष्टाः - क. ख. । १६६ ...मीयुरन्ये (?) । १६७ भूत्वा - ख, तेषां - क. । १६८ तदेव - ख. । १६९ देव सङ्गोजटा ? - क. । १७० जलाप्लावितकेशदेश - ख. । १७१ मृत्युर्दहनस्त्वमेव - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

त्वमेव सूक्ष्मः[१७२] पुरुषोव्ययस्त्वं त्वमेव सूक्ष्माच्च परं च सूक्ष्मम् ।
व्यक्तं त्वमेव प्रकृतिस्त्वमेव त्वमेव सत्वं च[१७३] भवोद्भवं च ।।१२४।।
त्वमेव भूमिः सलिलं त्वमेव त्वमेव वह्निः पवनस्त्वमेव ।
त्वमेव खं भूतभविष्यभव्यं त्वमेव भूतं भवभव्ययुक्तम् ।।१२५।।
त्वमेव यज्ञो नियमस्त्वमेव त्वमेव सर्वं प्रकरोषि धर्मम् ।
त्वमेव सर्वस्य चराचरस्य पृथग् विभक्ता प्रलये च गोप्ता[१७४] ।।१२६।।
इत्येवमुक्त्वा[१७५] वचनं सुरेन्द्राः प्रणम्य मां सिद्धगणाश्च हृष्टाः[१७६] ।
व्यपेतशोकाः प्रविभक्तसोमा गता विमनैरनिलोग्रवेगाः[१७७] ।।१२७।।

इत्येतत् परमं गुह्यं पुण्यात्पुण्यतरं महत् ।
स्वयं[१७८] स्वयंभुवा प्रोक्तं स्तोत्रं[१७९] पापप्रणाशनम् ।।१२८।।
यस्तु धारयते नित्यं मत्परो नियमे स्थितः[१८०] ।
ब्रह्मोद्गीतं शिवं ह्यतेतत्[१८१] सर्वरोगनिवर्हणम् ।।१२९।।
गतिं तस्य प्रवक्ष्यामि परत्रेह च देहिनः[१८२] ।
विषं तस्य वरारोहे स्थावरं जंगमं तथा[१८३] ।।१३०।।
संप्राप्य गात्रं[१८४] सुश्रोणि क्षिप्र सप्रतिहन्यते[१८५] ।
शममेत्य[१८६] शुभं घोरं दुःस्वप्नं चापकर्षति ।।१३१।।
स्त्रीषु वल्लभतां याति सभायां पार्थिवस्य च ।
विवादे जयमाप्नोति युद्धे चैव न संशयः ।।१३२।।
गच्छतोध्वनि च क्षेमं[१८७] सत्वं चैवोपजायते[१८८] ।
शरीरभेदे वक्ष्यामि गतिं तस्य वरानने ।।१३३।।
हरिश्मश्रुर्नीलकण्ठ : शशाङ्काङ्कितमूर्धजः ।
त्र्यक्षोभेद्यस्त्रिशूली च वृषकेतुर्महाबलः ।।१३४।।

---

१७२ ब्रह्मन् - ख. । १७३ नन्तवश्च - ख. । १७४ भोक्ता - ख. । १७५ ... मुक्ता - क. ख. । १७६ प्रगृह्य सोमं प्रणिपत्य माश्च - ख. । १७७ ...रनिलोग्रवेगैः - क. ख., इत "उत्तर स्वमालयं मेरुमुपेत्य सर्वे" । इत्यधिकं ख.पुस्तके । १७८ तदा - क. । १७९ स्तवं - ख. । १८० ब्रह्मोद्गीतमिदं शुभं - ख. । १८१ ह्ये (ही?) दं - क. । १८२ वरप्रदं - ख. । १८३ वापि जंगमं - ख. । १८४ गात्रं प्राप्य तु - ख. । १८५ विप्रतिहन्यते - ख. । १८६ शमय क. । १८७ गच्छतो [illegible]नमध्वानं - ख. । १८८ शरीरे नास्ति वै भयं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नन्दितुल्यवपुश्चैव नन्दितुल्यपराक्रमः ।
विचरत्यखिलं[१८९] सिद्धः सप्तलोकं[१९०] ममाज्ञया ॥१३५॥
न हन्यते[१९१] गतिस्तस्य वायोरिव नभस्तले[१९२] ।
मम पार्श्वचरो भूत्वा[१९३] तिष्ठत्याभूतसंप्लवम्[१९४] ॥१३६॥
येपि चैतद्वरारोहे सदा शृण्वन्ति मानवाः ।
तेषां चैव प्रवक्ष्यामि फलं फलसहस्रदे ॥१३७॥
ब्राह्मणो वेदमाप्नोति क्षत्रियो विन्दते महीम् ।
वैश्यस्तु लभते लाभं शूद्रः प्राप्नोति सद्गतिम् ॥१३८॥
व्याधितो मुच्यते रोगाद् बद्धो मुच्येत बन्धनात् ।
गुर्विणी जनयेत् पुत्रं कन्या विन्दति सत्पतिम् ॥१३९॥
नष्टञ्च लभते द्रव्यमिह लोके परत्र च ।
गवां शतसहस्रस्य सम्यग् दत्तस्य यत्फलम् ॥१४०॥
तत्फलं समवाप्नोति श्रुत्वा मर्त्यः कथामिमाम् ।
अक्षरं वाथ पादं वा श्लोकं श्लोकार्धमेव वा ॥१४१॥
अथवा सर्वमध्यायं देवब्राह्मणसंसदि ।
यः पठेन्मानवो नित्यं मद्गतेनान्तरात्मना ॥१४२॥
श्रद्दधानः सदोद्युक्तो रुद्रलोके महीयते ।
पठस्व देवि भद्रन्ते पाठयस्व च बान्धवान् ॥१४३॥
अतः परतरं स्तोत्रं न भूतं न भविष्यति ।
नापि यक्षाः पिशाचा वा न भूता न विनायकाः १४४॥
कुर्युर्विघ्नं गृहे तत्र यत्रायं तिष्ठते स्तवः ।
यथाविमुक्तं क्षेत्रेषु क्षेत्रं श्रेष्ठं प्रकल्पितम् ॥१४५॥
तथा स्तवो वरिष्ठोयं स्तवानां ब्रह्मनिर्मितः ।
यश्चैनं श्रावयेच्छ्राद्धे ब्राह्मणान् पादमन्ततः ॥१४६॥
अक्षय्यमन्नपानं वै पितॄँस्तस्योपतिष्ठति ।
मनसा चिन्तितं यच्च यच्च वाचाप्युदाहृतम् ॥१४७॥

---

१८९ ..त्याव्रतान् - क. । १९० सप्तलोकान् - ख. । १९१ हन्यति - क. ख. । १९२ अनिलस्याम्बरे यथा - ख. । १९३ धरोभूमि - ख. । १९४ प्रत्याभूतः समृद्ध (ध्य) ति - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सर्वं संपद्यते तस्य स्तवस्यास्यानुकीर्तनात् ।
श्रुत्वैतत् परमं गुह्यं येपि स्युः पापयोनयः ।।१४८।।
स्त्रियः शूद्राश्च तेपीह रुद्रलोकं व्रजन्त्युत ।
यदा मानुष्यतामेति कदाचित् कालपर्ययात् ।।१४९।।
वेदवेदाङ्गतत्त्वज्ञो विमले जायते कुले ।
देवभक्तश्च भवति धर्मञ्च कुरुते तदा ।।१५०।।
इतिहासमिदं पुण्यं सर्वकिल्विषनाशनम् ।
ऊक्तं मयात्र तुष्टेन स्वयमेवाम्बुजेक्षणे ।।१५१।।

⊙ इति स्कन्दपुराणे अमृतमथने नीलकण्ठोपाख्याने ब्रह्मदेवकृतं महादेवस्तोत्रं नाम चतुर्दशोत्तरशततमोध्यायः ⊙

व्यास उवाच

अमृतेपहृते तस्मिन् विष्णुना छद्मरूपिणा ।
दैत्याश्च दानवाश्चैव किं चक्रुस्तदन्तरम्[1] ।।१।।

सनत्कुमार उवाच

ते क्रोधाद्वञ्चिताः सर्वे विष्णुना दानवेश्वराः ।
सन्नह्य युद्धाय तदा गर्हन्तो[2] ष्णिुमूचिरे ।।२।।
धिग्बलं धिक् च ते शौर्यं पाप धिक् ते पराक्रमम्[3] ।
विश्रम्भघाती[4] नित्यं त्व[5]न्नीचकर्मा[6] दुरात्मवान् ।।३।।
त्वया निकृत्या निहतो हिरण्यकशिपुः पुरा ।
हिरण्याक्षश्च दैत्येन्द्रोमृतं चेदमपाहृतम्[7] ।।४।।
न तवास्ति बलं युद्धे निकृत्या हि बली भवान् ।
युद्धे स्थितो भवानस्तु न नो[8] मोक्षमवाप्स्यति[9] ।।५।।

---

१ चक्रे तदनन्तरम् - क. । २ गर्हयन् - क. ख. । ३ पराक्रमः - ख. । ४ विश्रम्भघातिन् - ख. ।
५ च - क. ख. । ६ नीचकर्म - ख. । ७ ह्यमृतं चेदमे (मा)हृतं - क. ख. । ८ ततो - क. ।
९ ...मवाप्स्यसि - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

ततः स दैत्याराट् क्रुद्ध उद्गिरन्[१०] पावकार्चिषः[११] ।
रथेनाम्बुदनादेन विष्णुमेवाभिदुद्रुवे ॥६॥
विप्रचितिश्च[१२] दैत्येन्द्रो गजेन गजिनं तदा ।
समाह्वयत् सहस्राक्षं गजिनं वज्रपाणिनम्(?) ॥७॥
विरोचनस्तु संक्रुद्धो धनेशं राक्षसाधिपम् ।
गजेनैवाभिदुद्राव जलदो भास्करं यथा ॥८॥
बलिर्वैरोचनिश्चापि यमं पितृगणाधिपम् ।
रथेनैवाभिदुद्राव विघ्नो विघ्नमिवापरम्[१३] ॥९॥
अनुह्लाश्च दैत्येन्द्रो हिरण्यकशिपोः सुतः ।
वरुणं प्रति दुद्राव नदीवेगो यथार्णवम् ॥१०॥
मयस्तु[१४] दानवश्रेष्ठस्तारस्तारक एव च ।
आदित्यैस्सह संसक्ता[१५] गजा इव महागजैः ॥११॥
शरभः शतकेतुश्च बलो मूकश्च दानवः ।
रुद्रानेवाभ्यधावन्त[१६] सिंहाः सिंहानिवाजने ॥१२॥
शम्भुः कार्तस्वनश्चैव महामायश्च शम्बरः ।
वसुभिः सह संसक्ता व्यसनानीव साधुभिः ॥१३॥
नरकोथ हयग्रीवस्तथेन्द्रदमनोसुरः ।
अश्विभ्यां सह संसक्ता[१७] ग्रहाभ्यामिव तारकाः ॥१४॥
अन्ये चान्यैस्सुरैस्सार्धं महामाया महाबलाः ।
आहूयाहूय युध्यन्ते[१८] सर्वे क्रोधेन दानवाः ॥१५॥
विप्रचित्तिर्महामायः सहस्राक्षं त्रिभिः शरैः ।
अर्दयामास नादेन नादयानो दिशो दश[१९] ॥१६॥

---

१० उत्किरत् (?), उद्गिरत् - क., दानवाः - ख. । ११ पावकार्चिषाः - (?) । १२ ... स्तु - ख. । १३ मिवापरः - ख. । १४ यमस्तु - क. ख. । १५ संयुक्ता - क. । १६ ...नेवाभिधावन्तः - क. । १७ संसक्तो (क्तौ?) - क. । १८ दुद्ध्यन्ति - ख. । १९ दिशः - क, ख, ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तस्येन्द्रः कार्मुकं चित्रमस्यतो लघुहस्तवान् ।
वज्रेण शतधारेण शतधा व्यभजद्[२०] बली ॥१७॥
ततोस्य गजमाधोरे[२१] कार्मुकं गृह्णतोपरम् ।
गजेन पोथयामास स पपात यथा गिरिः ॥१८॥
तमाप्लुतं[२२] गजाच्चैव दानवं देवराड् बली ।
वज्रेणाताडयत् क्रौञ्चं शक्त्या गुह इवाहवे ॥१९॥
स तेन वज्रघातेन दानवो मूढचेतनः[२३] ।
अपतद् भूतले क्षिप्रं वातरुग्ण इव द्रुमः[२४] ॥२०॥
ततो हाहाकृतमभूद्दानवानां बले तदा ।
साधुसाध्विति देवानां सिंहनादाश्च बृंहिताः ॥२१॥
प्रतिलभ्य ततः संज्ञां स शक्त्या[२५] भीमरूपया ।
मातङ्गं तस्य संमत्त[२६]मनयद्यमसादनम् ॥२२॥
ततोस्य पृष्ठरक्षांश्च कवचञ्च महाप्रभम् ।
शातयामास[२७] देवाग्र्यस्स[२८] हित्वा संयुगं ययौ ॥२३॥
बलिर्यमस्य पुण्ड्रं[२९] च कृतान्तं कलहं तथा ।
कालञ्च नियतिञ्चैव किङ्करान् पाशमेव च ॥२४॥
एकैकं पश्यतस्तीक्ष्णैः पञ्चभिः पञ्चभिः शरैः ।
यमञ्चैव चतुष्षष्ट्या हृदये समविध्यत ॥२५॥
तस्य चानदतः क्षिप्रं यमः क्रुद्धो हसँस्तदा ।
दण्डेन रथमाहत्य भस्मसायुज्यमानयत्[३०] ॥२६॥
हते रथे ससूते तु साश्वे[३१] सह पदानुगैः ।
तिष्ठतिष्ठेति सन्नद्य[३२] यमं बलिरधावत ॥२७॥
तस्यापतत एवाशु[३३] यमो दण्डमवासृजत् ।
मूर्ध्नि तेन प्रहारेण ततः सोगान्महीतलम् ॥२८॥

---

२० न्यभजत् - क. । २१ ...माराधे - क., ...मारोहे - ख. । २२ तमाप्नुतं - क. ख. । २३ मूढचेतसः - ख. ।
२४ इवार्णव. - क. । २५ संज्ञामशन्या - ख. । २६ संमतं तस्य - क. ख. । २७ सातयामास - क. ।
२८ देवाग्र्यस्स - ख., ... स्तं - क. ख. । २९ पुण्यं - क., पुण्ड्रां - ख. । ३० सायोज्यमानयत् - क. ख. ।
३१ साश्वैः - क. ख. । ३२ सन्नाद्य - क., संछाद्य - ख. । ३३ एवाथ - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ततो हाहाकृतमभूद्दानवानां बले तदा ।
गृह्ण गृह्णेति चाप्यूचुः कष्टं कष्टं तथापरे ॥२९॥
अनुह्लादस्तु वरुणं नाराचेन महाबलः ।
आहत्य हृदये क्रुद्धो रथोपस्थे न्यपातयत् ॥३०॥
स उत्थाय क्षणाद्देवो विकृष्य बलवद्धनुः ।
सायकांस्तस्य संधार्य[३४] धनुश्चिच्छेद वीर्यवान् ॥३१॥
अश्वाञ्जघान सूतस्य शिरः कायादपातयत् ।
तस्य प्रस्कन्दतश्चापि हताश्वाद्रथसत्तमात् ॥३२॥
बिभेद हृदयं शीघ्रं स पपात यथा मृतः ।
मय[३५]स्तारस्तारकश्च आदित्यान् दृढमार्दयन् ॥३३॥
तेपि तान् विरथाञ्चक्रुः सर्वाञ्छरशतैस्त्रिभिः[३६] ।
शरभः शतकेतुश्च बलो मूकश्च दानवः ॥३४॥
रुद्रानस्त्रैर्बहुविधैर्नादयन्तोर्दयन्युधि ।
तेषामस्त्राणि तानि स्म प्रतिवार्य महाबलाः ॥३५॥
शलभा इव केदारान् मुहूर्तेन व्यनाशयन्[३७] ।
ते काल्यमानास्तै रुद्रै[३८]र्बहुभिर्विरथास्तदा ॥३६॥
रणं त्यक्त्वा महामाया विपलायन्त[३९] सर्वशः ।
शम्भुः कार्तस्वनश्चैव महामायश्च शम्बरः ॥३७॥
वसूनभ्यद्रवन् युद्धे गजाः प्रतिगजानिव ।
तेषान्तु वसवः सर्वे स्वापनास्त्रं[४०] ससर्जिरे ॥३८॥
रथेष्ववस्थिता येन बभुः सुप्ता यथा मृगाः ।
तान् सुप्तान् रथयन्तारो रणात्तस्मादपाहरन् ॥३९॥
हरतां चैव सूतानामुत्तमाङ्गान्यपातयन् ।
ते हतेष्वथ सूतेषु उद्भ्रान्तैर्वाजिभिस्तदा ॥४०॥

---

३४ संवार्य - क. । ३५ यम - क. ख. । ३६ गतस्त्रिभिः - ख., गभस्तिभिः - क. । ३७ व्यशातयन् - ख. ।
३८ आहन्यमानास्तै - ख., ..स्त्रै - क. । ३९ व्यपलायन्त - क. । ४० श्वा (स्वा) पनार्थी - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सुप्ता एव रणे सर्वे भ्राम्यन्ते दितिसूनवः ।
नरकोथ हयग्रीवस्तथेन्द्रदमनोपि च ॥४१॥
अश्विनौ द्वौ[४१] सुसंयत्ता युयुधुस्ते सुरेश्वराः ।
तानापतत[४२] एवाथ तौ देवौ[४३]भिषजां वरौ ॥४२॥
दण्डेनास्त्रेण विरथान् सर्वानेव प्रचक्रतुः ।
पुनश्चापततः सर्वान् गदिनः क्रोधमूर्छितान् ॥४३॥
वायव्यास्त्रेण सहसा संचिक्षिपतुराहवे ।
अन्ये चान्याँस्तदा देवा दितिपुत्रान् व्यपोथयन्[४४] ॥४४॥
अभज्यन्त यथा सिंहैर्मृगारण्येभिसंहताः[४५] ।
प्रह्लादश्चापि दैत्येन्द्रो विष्णुना सह संगतः ॥४५॥
महत् कृत्वा तदा युद्धं विरथः समपद्यत ।
स चक्रेण हताश्वस्तु हतसूतपदानुगः ॥४६॥
गदां गृहीत्वा प्रस्कन्द्य जनार्दनमुपाद्रवत् ।
तस्योद्यतकरस्याथ धावतश्च महामुने ॥४७॥
चिच्छेद तां गदामाशु चक्रेणैव जनार्दनः ।
अथ ते दानवाः शूरै[४६]स्तैर्देवैर्भग्नविक्रमाः ॥४८॥
अभज्यन्त यथा सिंहैर्वने मृगगणा भयात् ।
तान्भग्नान्[४७] भज्यमानाँश्च दृष्ट्वा त्यक्त्वा रणं ययुः ॥४९॥
प्रह्लादोपि रणं त्यक्त्वा तानेवानुजगाम ह ।
तेषु भग्नेष्वथेन्द्रस्य जयशब्दं सुपूजितम् ॥५०॥
समं चक्रुस्तदा देवाः सनारायणलोकापाः ।
सिंहनादाँश्च विविधान् वादित्राणि न्यवादयन् ॥५१॥

⊙ इति स्कन्दपुराणे अमृतमथनेयुद्धे पञ्चदशोत्तरशततमोध्यायः[४८] ⊙

---

४१ च - क. । ४२ नाता - क. । ४३ देवे (?) । ४४ न्यपोथयन् - ख. । ४५ पद्यार्धमेतदत्र प्रमादादापतितं प्रतिभाति । ४६ शूरा - ख. । ४७ ते तान् ...(?) । ४८ अध्यायः १६८ - ख., नात्राध्यायसमाप्तिर्घ-पुस्तके ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

एवं तदभवद् व्यास अमृतस्यावमन्थनम् ।
युद्धञ्च सुमहाघोरं[१] प्रह्लादेन सहैव तु ॥१॥
स तु कालेन महता कृत्वा युद्धशतान्युत ।
पुत्रे विरोचने राज्यं प्रददावसुरेश्वरः ॥२॥
विरोचनः पुनर्व्यास राज्यस्यार्थे महाबलः ।
आटीबके हतो युद्धे देवेन्द्रेण महौजसा[२] ॥३॥

व्यास उवाच

आटीबकः स संग्रामः कथमासीन्महाभयः ।
श्रोतुमिच्छामि भगवन्[३] परं कौतूहलं हि मे ॥४॥

सनत्कुमार उवाच

बभूव पुनरेवेह देवानामसुरैः सह ।
सख्यं[४] ते ददृशुश्चैव[५] दूराद्वै[६] विस्मिताननाः ॥५॥
घोरामिलावृते तस्मिन् वर्षे विकृतरूपिणीम् ।
उग्रामाथर्वणीं कृत्या[७]मसुराणां भयंकरीम् ॥६॥
तां दृष्टवा तेब्रुवन् केयमाटिरित्येव देवताः ।
असुरा बक इत्येव विवादश्चाप्यजायत ॥७॥
सापि कृत्या तदा घोरा देवेभ्यो दर्शनं ददौ ।
आटिरित्येव तेषां च असुराणां बकोभवत्[८] ॥८॥
तेषां पणोभवत्तत्र राज्यं प्रति महामुने ।
यो नो जितः स नो दासो जेता स्वामी भवत्विति ॥९॥
ततस्सा ह्याटिरूपेण सर्वेभ्यो दर्शनं ददौ ।
ततस्ते बिजिता देवान्[९] प्रोचुर्ना स्म[१०] जिता[११] इति ॥१०॥

---

१ सुमहद् घोरं- क. ख. २ हतौजसा - ख., अत्राध्यायसमाप्तिर्घपुस्तके । ३ भगवान् - क.ख. । ४ संख्यं - क. ख. ।
५ ददृशिरे चैव - क. ख. । ६ दुरात्ते - क. ख. । ७ ज्ञात्वा - क. । ८ तु (वै) बकः - ख. ।
९...न्देवान् - क. ख. । १० न स्म (?) । ११...जिता - [illegible] ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

बक [१२] एवैष सुव्यक्तं जिता यूयं न संशयः ।
नायमाटिर्बकोयं वै न बकश्चाटिरेव हि [१३] ॥११॥
एवं विवदतां युद्धमभवद्राज्यकारणात् ।
तेषां दानवमुख्यानां देवैस्सह भयावहम् ॥१२॥
वर्षाणां वै सहस्रं तु हतो यत्र विरोचनः ।
हते विरोचने ब्रह्मा बलिं तेषां महासुरम् ॥१३॥
अभ्यषेचयदिन्द्रत्वे [१४] स च राजा बभूव ह ।
ततस्स लोकाँस्त्रीन् व्यास बलेनाक्रामदव्ययः [१५] ॥१४॥
त्रैलोक्यस्यैश्वरश्चैव स जज्ञे ह्यसुरेश्वरः ।
जित्वा युद्धेन [१६] देवेन्द्रं स्थानादच्यावयत् प्रभुः ॥१५॥
इन्द्रत्वमकरोच्चैव यमत्वञ्च महाबलः ।
स एव वरुणश्चाभूद्धनेशोग्निस्तथैव च ॥१६॥
आदित्यश्चैव सोमश्च पर्जन्यो वृष्टिसर्जनः ।
सर्वं जगति कर्तव्यं स एव कुरुते सदा [१७] ॥१७॥
एवं शासति वै राज्यं [१८] देवानाममसुखं तदा [१९] ।
भ्रष्टैश्वर्या महात्मानो भ्रमन्ति शकुना इव ॥१८॥
तेषां ब्रह्मा ददौ बुद्धिं दुःखितानां महात्मनाम् ।
आश्वास्य बहुधा व्यास कारुण्याद् देवसत्तमः ॥१९॥

ब्रह्मोवाच

देवा न शक्यो [२०] युष्माभिर्बलिरेष प्रबाधितुम् ।
महात्मा धार्मिकश्चायममरश्च न संशयः ॥२०॥
ब्रह्मण्यश्च बलीयाँश्च तथा लब्धवरश्च ह ।
तं गत्वा विप्ररूपेण विष्णुरेष प्रयाचतु [२१] ॥२१॥

---

१२ एक - खा. । १३ च - ख. । १४ ...दिन्द्रन्तु - क., ...दिन्द्रस्तु - ख. । १५ बलेकामयदव्ययः - ख. । वशे कास्यद (?), बलेनाक्रम्य दानवः (?) । १६ जिह्वा(ह्म) युद्धेन - । १७ ...न्यदा - क. । १८ राज्ये - खा. । १९ तथा - ख. । २० शक्यं - क. खा. । २१ प्रयाचतां - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वामनं रूपमास्थाय भूमेर्वै विक्रमत्रयम् ।
दास्यते स गृहीत्वा तत् क्रमतामेष सर्वशः ।।२२।।
भूमिं क्रमसमां सर्वं करिष्यति न संशयः ।
क्रमं द्वितीयं धातास्य[२२] अन्तरिक्षे ततः[२३] स्वयम् ।।२३।।
अहं चैव प्रदास्यामि तृतीयं क्रममित्युत ।
एवं वो राज्यलाभोयं[२४] दृश्यते नान्यथा सुराः ।।२४।।
यस्मिन्काले प्रक्रमते विष्णुरेष त्रिविष्टपम्[२५] ।
तस्मिन्काले च रक्षध्वं सर्वयत्नेन दानवान् ।।२५।।

सनत्कुमार उवाच

त एवमुक्ता देवेशा निश्चित्य बहुधा शुभम् ।
विष्णुमूचुर्महासत्वाः क्रियतां ब्रह्मणो वचः ।।२६।।
दीक्षितश्चासुरश्रेष्ठो हयमेधेन सोद्य वै ।
कल्यं[२६] चावभृथं[२७] तस्य गत्वा याचस्व तं प्रभो ।।२७।।

सनत्कुमार उवाच

एवमस्त्विति तेनोक्ता देवा युद्धाय दंशिताः ।
अतिष्ठन्त तदा सर्वे शक्रं कृत्वा पुरस्सरम् ।।२८।।
नारदोथ तदा गत्वा पूजितस्तेन भक्तितः ।
सुखोपविष्टः प्राहेदं वचनं वदतां वरः ।।२९।।
धर्मेण तव तुष्टोहमृषयश्च तपोधनाः ।
अनासुरमिदं वृत्तं तव दानवसत्तम ।।३०।।
सर्वे[२८] हि दानवाः[२९] क्रूराः[३०] ब्रह्मघ्ना[३१] लोककण्टकाः[३२] ।
त्वं तु ब्राह्मणभक्तश्च लोकानां हितकृत्तथा ।।३१।।
तस्मात्तव शुभं चिन्त्यं सदैवासुरपुङ्गव[३३] ।
यथा च ते शुभं किञ्चित् स्याद् राजन्नित्यमेव[३४] हि[३५] ।।३२।।

---

२२ दातास्य - ख. । २३ तत्र - क. ख. । २४ राज्यलम्भोयं - ख. । २५ तृविष्टपम् - क., त्रिवि... - ख.।
२६ काल्यां - क., काल्यं - ख. । २७ चावभृतं - ख. । २८ सर्वो - क. । २९ दानवः - क. ।
३० क्रूरो - क. । ३१ ब्रह्मघ्नो - क. । ३२ लोककण्टकः - क. । ३३ सदेवासुरपुङ्गवाः - क. ।
३४ राज्यानित्यमेव - क. ख । ३५ च - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एष देवैः प्रणिहितो विष्णुर्विप्रत्वमास्थितः ।
त्रींस्त्वां राज्यार्थमुद्युक्तः[३६] प्रार्थयिष्यति विक्रमान् ।।३३।।
तन्न तस्य त्वया देयं [३७] राज्यं [३८] पश्चान्न ते [३९] भवेत् ।
अतः परं भवान् राजन् प्रमाणमसुरेश्वर ।।३४।।

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा बलिर्वैरोचनिस्तदा ।
उवाच प्रणतो व्यास नारदं दानवेश्वरः ।।३५।।
शत्रवस्ते मम दृढं तेषां चाहं महामुने ।
यदि ते मां प्रयाचन्ते [४०] कृतार्थोस्मि ततो ननु ।।३६।।
स्वधर्मं[४१] सं[४२]परित्यज्य यदि चेन्मधुसूदनः ।
मां प्रयाचति दीनात्मा सफलं जीवितं मम ।।३७।।
व्रतं चेदं मम ब्रह्मन् सदैव हि महामुने ।
याचितो[४३] न ददामीति न[४४] वदेयमिति प्रभो ।।३८।।
उर्ध्वं प्रणा ह्युत्क्रामन्ति याचतो[४५] विप्रसत्तम ।
ब्रुवतो न ददामीति नरकायोत्क्रमन्त्यथ ।।३९।।
देहीति रुदितस्याख्या[४६] नास्तीति प्रतिरोदना ।
मा मां[४७] नारद पश्यन्तु रुदन्तमितरे जनाः ।।४०।।
एषा[४८] भवति सर्वस्य पुरुषस्य महामुने[४९] ।
याचतो मम दातायमिच्छा तद्ध्यक्षयं[५०] फलम् ।।४१।।
सोहं यदि न दास्यामि शत्रुभ्यो याचितं[५१] महत् ।
नरकं रौरवं नाम प्रतिपत्स्याम्यसंशयम् ।।४२।।
यो हि वै याचमानाय न ददाति नराधमः ।
स तं हिनस्ति याचन्तमाशाच्छेदान्न संशयः ।।४३।।

---

३६ स वै त्रीन् सुरकार्यर्थिं - घ । ३७ ते तस्य न त्वया देया - घ. । ३८ राजन् (?) । ३९ पथ्या न ते - क । ४० प्रयाचन्ति - क ख. । ४१ अर्धर्मं - क., सर्धर्मं (?) । ४२ स्वं - ख. । ४३ याचितं - क. । ४४ च - ख. । ४५ याचिते - ख. । ४६ रुदितस्याह्वा - ख. । ४७ मा - ख. । ४८ येषां - ख. । ४९ महात्मनः - ख । ५० तद् व्यत्ययं - ख. । ५१ याचितो - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

भवान्मम पिता व्यक्तं[५२] पुत्रः स्नेहकृतो[५३] ह्यहम्[५४] ।
नाहं न दास्ये विप्रेन्द्र निर्वृतिस्ते[५५] भवत्वियम्[५६] ॥४४॥

सनत्कुमार उवाच

ततस्स तं तदामन्त्र्य तेन चैव सुपूजितः ।
दिवमक्रामदव्यग्र[५७]श्चिन्तयानः कथं भवेत् ॥४५॥
गतेथ तस्मिन्दिवसे रजन्यां स[५८] महायशाः ।
विष्णुर्वामनरूपेण विप्रो भूत्वा तमर्थयत्[५९] ॥४६॥
स चापि राजा विप्रेन्द्र[६०] रत्ननि च वसूनि च ।
ग्रामान्दासीश्च महिषीर्गवाश्वान् रथहस्तिनः ॥४७॥
वाहनानि च चित्राणि सुवर्णं शयनानि च ।
शय्यास्तरणवस्त्राणि भूषणानि गृहाणि च ॥४८॥
यं यमर्थयते[६१] विप्रो यावद्यश्च[६२] यथा यथा[६३] ।
तथा तथा स दैत्येन्द्रो ददात्येवाविचारयन् ॥४९॥
तं तथा वर्तमानं तु वामनः सुमहायशाः ।
प्राह मह्यं प्रयच्छस्व यदहं प्रब्रवीमि ते ॥५०॥
स तमर्घेण[६४] पाद्येन आसनादिभिरेव च ।
संपूज्यैवाब्रवीद्[६५] ब्रूहि यत्तवेष्टं द्विजोत्तम ॥५१॥

वामन उवाच

यदि प्रयच्छसे राजन् याचमानाय कामतः ।
ततो ब्रवीम्यन्यथा तु न वक्ष्याम्यसुरेश्वर ॥५२॥

बलिरुवाच

ज्ञात्वार्थं प्रतिजानीयां देयं ब्राह्मण तद्यदि ।
दातुं च शक्यं तत् स्यात्तु[६६] ततोहं[६७] दातुमुत्सहे ॥५३॥

---

५२ नित्यं - ख. । ५३ पुत्रस्नेहः कृतः - क । ५४ ...द्य त्वै - घ, ५५ निवृतिस्ते - घ । ५६ भवत्वयं - ख. ।
५७ दिवमाक्रमदव्यग्र - ख. । ५८ च - ख. । ५९ तमार्थयत् (?) । ६० विप्रेभ्यो क., विप्रेन्द्रो - ख. ।
६१ यद्यनर्थयते(?)। ६२ यावन्तं च (?) । ६३ तथा - क.। ६४ तमर्घ्येण - क । ६५ संपूज्य चाब्रवीद् - ख ।
६६ ते तस्मात् - घ. । ६७ ततस्तं (तद्) - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वामन उवाच

प्रतिज्ञा भवतो नित्यमियं[६८] ह्यसुरसत्तम ।
यद्यत्प्रयाचते विप्रो दद्यां तत्तदहं त्विति[६९] ।।५४।।
दीक्षितश्चाश्वमेधेन त्वं[७०] ददास्यसुराधिप[७१] ।
यद्यत् प्रयाचते विप्रस्तत्तद्दत्से[७२] न संशयः ।।५५।।

सनत्कुमार उवाच

स एवमुक्तो निश्चित्य पुनरेवाह[७३] तं नृपः ।
प्रहस्य सुमहावीर्य इदं वचनकोविदः ।।५६।।

बलिरुवाच

भवान् विष्णुर्विप्ररूपी[७४] छद्मना मां प्रयाचसे ।
क्षत्रधर्मं समुत्सृज्य कार्पण्यं[७५] च प्रभाषसे ।।५७।।
दीनानामपि[७६] सर्वेषामहं दद्यां[७७] प्रयाचितः ।
राज्यं विना हि देवाय[७८] तुभ्यं दास्ये यथेप्सितम् ।।५८।।

वामन उवाच

सत्यमेतदहं विष्णुर्हृतराज्या वयं त्वया ।
न राज्येद्य स्पृहास्माकं निःस्पृहा हि ततो वयम् ।
गृहं त्वां संप्रयाचामि[७९] यत्र वत्स्यामि[८०] निर्वृतः[८१] ।।५९।।

बलिरुवाच

किंप्रमाणं गृहं तद्वै प्रयाचसि सुरेश्वर ।
कीदृशं क्व च तद्[८२] दास्ये ब्रूहि वामन सर्वशः ।।६०।।

वामन उवाच

सर्वभूमिगुणैर्युक्तं यत्र तत्र महागृहम्[८३] ।
मम क्रमैस्त्रिभिर्युक्तं[८४] दत्स्व[८५] राजन् गृहार्थिने ।।६१।।

---

६८ .. मिदं - क. ६९ प्रति - क । ७० त्वं (स्वं?) - क. । ७१ वदाम्यसुराधिप - ख. । ७२ तत्तद्दत्स्व - घ., तद्ददस्व - क. । ७३ पुनराह च - घ. । ७४ ...विरूपी च - क., भगवान्विष्णुरूपी ख. । ७५ कार्कश्यं - क । ७६ दानानामपि ? । ७७ दद्यात् - क. ख. । ७८ दीनाय - घ. । ७९ प्रयाचामो - ख.। ८० वत्स्य म - ख. । ८१ निर्वृताः - ख. । ८२ तं - क. । ८३ तत्रैवेष्टं गृहं मम - घ. । ८४ ,..स्तुल्यं - घ.। ८५ धत्स्व - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

अथ शुक्रस्तदा व्यास[८६] बलिं प्राह महातपाः ।
न दातव्यं महाराज विष्णुरेष महाबलः ।।६२।।
अयं स हन्ता[८७] सर्वेषां दानवानां दुरासदः[८८] ।
छद्मनैव[८९]मिहायातो[९०] विष्णुरेनं[९१] विसर्जय ।।६३।।
अनादृत्य वचस्तस्य प्रोवाच दितिनन्दनः ।
दास्ये तुभ्यं गृहं विष्णो यादृशं त्वं प्रयाचसे ।।६४।।

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा प्रोवाच मधुसूदनः ।
बलिं राजानमनघं सर्वेषामेव सन्निधौ ।।६५।।

वामन उवाच

साध्यो देवोहमनघ धर्मपुत्रो दितेः सुत[९२] ।
ततः प्रतिग्रहे दोषो न ममास्ति महाबल ।।६६।।
यदि देयं गृहं मध्यं पश्चात् तापो न ते यदि ।
हस्ते मम जलं राजन् पातयस्वासुरेश्वर ।।६७।।

सनत्कुमार उवाच

ततस्स बाढमित्युक्त्वा भृङ्गारेण महाबलः ।
प्रदातुमुपचक्राम वामनाय गृहं महत् ।।६८।।
अथ ते[९३] दानवाः क्रूराः प्रतिषेधनलालसाः[९४] ।
आजग्मुर्भृशमायत्ता[९५] बलिं प्रति महामुने ।।६९।।
प्रह्लादो भ्रातृभिः सार्धं मयो जम्भोर्द्धलोचः[९६] ।
विप्रचित्तिश्च विक्रान्त अन्ये च सुमहाबलाः ।।७०।।
ऊचुस्ते तं तदा गत्वा[९७] कृत्वा प्रह्लादमग्रतः ।
बलिं वैरोचनिं व्यास चिन्तयन्तः पराभवम् ।।७१।।

८६...स्तदाभ्येत्य(?)। ८७ निहन्ता - घ.। ८८ महाबलः - घ. । ८९ छलेनैव - क. । ९०...मिहायातं - क. ख. ।
९१ मेनं (?) । ९२ सुतः - क. । ९३ ततस्ते - ख. । ९४ प्रतिशोधनलालसाः - ख. । ९५ ..मायस्ता - ख. ।
९६ जृम्भणोवै नु ... - घ., ..., द्य लोचनः - ख. । ९७ ज्ञात्वा - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रह्लाद उवाच

किमिदं पुत्र दुर्बुद्धे त्वया व्यवसितं महत् ।
नाशनं दितिपुत्राणां नैतत् कार्यं महाबल ॥७२॥
विष्णुरेष महामायो दुरात्मा दैत्यघातकः ।
लोकत्रयमपि ह्येष क्रमिष्यति न संशयः ॥७३॥
त्वमस्माकं गतिः पुत्र त्वं वीर्यं त्वं पराक्रमः ।
त्वयि जीवितमायत्तं मा नः क्षिप्रं विनाशय[९८] ॥७४॥
हिरण्यकशिपू राजा हिरण्याक्षश्च दानवः ।
तव राज्ञः कलां पुत्र नार्घतः षोडशीमपि[९९] ॥७५॥
मैतस्य विबुधस्य[१००] त्वं गृहं दत्स्व ब्रवीम्यहम् ।
एतद्धि श्रेयः सर्वेषां तव चैव महाबल ॥७६॥

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा प्रह्लादस्य महात्मनः ।
बलिः प्रणम्य[१०१] धर्मात्मा इदमाह महायशाः ॥७७॥

बलिरुवाच

जानेहं[१०२] विबुधोयं वै विष्णुः सर्वासुरान्तकः ।
प्रतिज्ञैव ममेयं हि दातव्यं याचितेन मे ॥७८॥
अहं दानपतिः ख्यातस्त्रिषु लोकेषु विश्रुतः ।
कथं तदन्यथा कुर्याञ्जीविते सति दानवाः ॥७९॥
अधर्म्यमयशस्यञ्च अस्वर्ग्यं भयदं महत् ।
कथं नामानृतं कुर्यामिति[१०३] मे व्रतमाहितम् ।
प्रतिश्रुत्य कथं भूयोसुरास्ते धर्मकारणात् (?) ॥८०॥

प्रह्लाद उवाच

दानवानां सदैत्यानां पुत्र धर्मः स्वयं कृतः ।
अधर्मेण हि वर्धन्ते सदैव दितिदानवाः ॥८१॥

---

९८ नैतत्कार्यं महाबल - घ. । ९९ नार्धन्ते - क., नार्हतः (?), सर्वे नार्हन्ति षोडशीम् - घ. । १०० देव सत्यं - घ. । १०१ बलिम्प्रणम्य - क. । १०२ जानेयं - क. । १०३ कुर्यादिति - ख., कुर्यामिति (?)।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

माया चैवानृतं चैव दम्भः सर्ववधस्तथा ।
यज्ञानां परिमोषश्च धर्म एष[१०४] हि नः शुभः ॥८२॥
स त्वं प्रतिश्रुत्य विभो मा ददस्व[१०५] दुरात्मने ।
तथा हि नो भवेद् वृद्धिरन्यथेह भयं महत् ॥८३॥

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा बलिर्निश्चिन्त्य[१०६] बुद्धिमान् ।
उवाचासुरशार्दूल इदं वचनकोविदः ॥८४॥

बलिरुवाच

य एष धर्मोधर्मेण भवद्भिः संप्रचोदितः ।
न ह्यस्य फलमानन्त्यं क्रूरस्यासुरसत्तम ॥८५॥
हिरण्यकशिपू राजा नात्यन्तं सुखमाप्तवान् ।
हिरण्याक्षस्तथा[१०८] चैव अन्धकश्चैव तत्सुतः ॥८६॥
भवान् पितामहोस्माकं तथा क्रूरेण कर्मणा ।
तस्मान्नेदं प्रशंसन्ति ये केचिद्विदुषो (?) जनाः ॥८७॥
ऋषयः पश्य सत्येन धर्मेण दिवि संस्थिताः ।
देवा जयन्ति चात्यर्थं ग्रहा दिव्यन्ति चैव हि ॥८८॥
न कश्चिद् दृश्यते[१०९] व्योम्नि तथा क्रूरेण कर्मणा ।
प्रसादयन् क्षामये त्वां ब्रवीमि दितिजेश्वर (?) ॥८९॥

प्रह्लाद उवाच

दुष्टं वाप्यथवा क्रूरं शोभनं वापि दानव ।
स्वकर्म न विमोक्तव्यं पारम्पर्यागतं महत् ॥९०॥
- - - पितृभिश्चैव तथा चैव[११०] पितामहैः ।
आचीर्णं पुत्र नैतत्ते[१११] विमोक्तव्यं महामुने ॥९१॥

बलिरुवाच

पितृभिर्हि यथा चीर्णं कर्तव्यं यदशङ्कितैः ।
गर्हितं यत्[११२] सतां चापि पितामह शृणुष्व मे ॥९२॥

---

१०४ एषो - ख. । १०५ ददक्षत्र - ख. । १०६ निश्चित्य (?) । १०७ ...ह्यस्या - ख. । १०८ ...स्तदा - ख. ।
१०९ दीव्यते (?) । ११० तव - ख. । १११ चैतत्ते - ख. । ११२ च - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

आसीदृषिरदीनात्मा वामदेव इति श्रुतः ।[113]
तस्य दृष्टवोर्वशीं मोहाद्रेतः स्कन्दो बभूव ह ॥९३॥
तद् भूमाववविद्धं वै चखाद वडवा किल ।
तस्या[114] गर्भः समभवत् सद्यः सोऽश्वतरी भवत् ॥९४॥
तामृषिः स सुतस्नेहात् पुपोष बहुलाः समाः ।
अथागात्तत्र राजर्षिरष्टको नाम वीर्यवान् ॥९५॥
स तामपश्यद्राजेन्द्र[115] ऋषेराश्रममध्यगाम्[116] ।
अचिन्तयद्धृदा चैव इदं परमहर्षितः ॥९६॥
मम पत्न्यास्तु[117] सदृशी इयं लक्षणसम्पदा[118] ।
यदि दद्यादिमां[119] विप्रः स्यादग्रं मम संगतम् ॥९७॥
न चायं दास्यते विप्रो महत्यमेनां सुदुर्लभाम् ।
उपायं तु करिष्यामि येन दास्यति सुप्रभाम् ॥९८॥

सनत्कुमार उवाच (?)

ततस्स राजा तं गत्वा वामदेवमुवाच ह ।
प्रणम्य बहुमानेन निकृत्या शक्तिनन्दन ॥९९॥

राजोवाच

अश्वतर्यानया कार्यं मम किञ्चिन्महामुने ।
संवत्सरं सुसंपूर्णं प्रयच्छस्व प्रयाचितः ॥१००॥
परिप्राप्ते पुनः कृत्ये तुभ्यं वै द्विजसत्तम ।
पुनः प्रदास्ये विप्रेन्द्र यदि देया प्रदीयताम् ॥१०१॥
ततः स ऋषिशार्दूलस्तस्मै प्रादादनिन्दिताम् ।
तां गृहीत्वा ययौ राजा लब्धेति हृषितस्तदा ॥१०२॥
अथ संवत्सरे पूर्णे तमाह ऋषिसत्तमः ।
तमुवाच ततो विप्रः[120] प्रयच्छाश्वतरीं शुभाम् ॥१०३॥

---

११३ श्रुतिः - ख. । ११४ तस्य - ख. । ११५ ... राजेन्द्रो - ख । ११६ ... मभ्यगात् - ख. । ११७ ममैव बहुयोग्येदं (यं?) - घ. । ११८ शुभलक्षणसम्पदा - घ. । ११९ दद्यादियं - ख. । १२० विप्रो - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

न ददौ स हि[१२१] दुर्बुद्धिर्ऋषिः क्रोधाज्जघान तम् ।
तस्य पुत्रस्ततो राजा बभूव नरपुङ्गवः ॥१०४॥
तमप्याह ततो विप्रो न ददौ स च तां तदा ।
ततो ममार सोप्येवं[१२२] विप्रक्रोधाद् दुरात्मवान् ॥१०५॥
तस्य पुत्रोभवच्चैव राजा दितिजसत्तम: ।
तमुवाच ततो विप्रः प्रयच्छाश्वतरीमिति ॥१०६॥
अथ सोपि तथा कृत्वा याचितः सुदुरात्मवान् ।
उवाच नाहं दास्यामि पितृहन्त्रे दुरात्मने ॥१०७॥
ततस्तमप्यसौ क्रुद्धो विप्रः प्राणैर्व्ययोजयत्[१२३] ।
ततो बालः सुतस्तस्य राजाभवदतिद्युतिः ॥१०८॥
तमप्यसौ तथा[१२४] विप्रः प्रोवाच क्रोधमूर्छितः ।
नाशयिष्ये कुलं तद् वै अष्टकस्य दुरात्मनः ॥१०९॥
तस्य तद्वचनं श्रुत्वा बालः संपूज्य तं द्विजम् ।
उवाच सचिवान् पृष्ट्वा[१२५] पश्चाद्दास्यामि वाडवाम्[१२६] ॥११०॥
सचिवान् स तदानाय्य अपृच्छद् दानवेश्वर ।
इयमश्वतरी ब्रूत दातव्या नेति वा शुभा ॥१११॥

सचिवा ऊचुः

पितामहस्य ते पित्रा इयमश्वतरी पुरा ।
वर्षमेकं प्रयाच्येह[१२७] समानीता[१२८] नरेश्वर[१२९] ॥११२॥
पूर्णे वर्षे तु[१३०] विप्रस्य याचतोपि महामुने ।
न दत्ता स च[१३१] कोपेन विप्रस्यास्य ममार[१३२] ह ॥११३॥
ततः पितामहस्तुभ्यमासीद्राजा प्रजेश्वर[१३३] ।
तथैव सोप्यदत्वैनां विप्रक्रोधान्ममार ह[१३४] ॥११४॥
भवाँस्तु यदि पूर्वेषां वृत्तं समनुवर्तते ।
न देया विप्ररूपस्य मृत्योरस्य दुरात्मनः ॥११५॥

---

१२१ ह - ख. । १२२ सौम्ये ... - ख. । १२३ प्राणैर्वियोजयत् - ख. । १२४ तदा - ख. ।
१२५ दृष्ट्वा - क. ख । १२६ दानवा: - ख, वा न वा (?) । १२७ प्रयाचित्वा - क. ख. ।
१२८ इहानीता - क. ख. । १२९ सुरेश्वर - क. । १३० वर्षस्य - ख. । १३१ तस्य - ख. ।
१३२ महा... - क. । १३३ महेश्वर - क., महेश्वरः - क. ख. । १३४ । ... त्समाहरत् - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तेषान्तद्वचनं श्रुत्वा सचिवानां[१३५] प्रमन्युमान् ।
निर्भत्स्य तान[१३६] धर्मज्ञानिदमाह महातपाः ।।११६।।
पूर्वे ते मौर्ख्यमास्थाय कृतवन्तोतिदारुणम् ।
अधर्म्यमयशस्यञ्च सद्भिश्चैव विगर्हितम् ।।११७।।
अहन्न तेषां पन्थानमनुवर्ते कथञ्चन ।
अद्य तानकृतप्रज्ञान् पितॄनथ पितामहान् ।।११८।।
गर्तस्थान् तारयिष्यामि कुलं च सुमहत्तथा ।
इत्युक्त्वा[१३७] निधने तेषां जातः पुत्रो महामतिः ।।११९।।
विप्रस्याश्वतरीदाने मतिं चक्रे सुनिश्चिताम् ।
ततस्तमृषिमभ्यर्च्य गन्धमाल्यादिभिर्नृपः ।।१२० ।
ताञ्चैवाश्वतरीं प्रादादात्मीयां स नराधिपः ।
वसु चैव हि दत्त्वास्मै ऋषिं तं[१३८] स प्रसादयत् ।।१२१।।
ततः स ऋषिशार्दूलः प्रहृष्टेनान्तरात्मना ।
उत्थाप्य राजशार्दूलमिदमाह तदा विभुः ।।१२२।।
त्वया तीर्णाः सुपुत्रेण पितरः सपितामहाः ।
नरकस्था महाबाहो ब्राह्मणस्वेन वेष्टिताः ।।१२३।।
न कृत्यं मम रत्नैश्च नाश्वतर्या नराधिप ।
तुष्टस्तुभ्यं प्रयच्छामि सर्वमेतन्नराधिप ।।१२४।।
यद्यष्टको ममैवं वै कृतवान् स्याद् दुरात्मवान् ।
तत्पुत्रो वा महाबाहो पिता वा तव दुर्मतिः ।।१२५।।
विनाशं न गतास्ते स्युरहन्तुष्टश्च सर्वशः ।
तदापृच्छे गमिष्यामि तवैषा द्रव्यमेव च ।।१२६।।
ततस्स ऋषिशार्दूलो जगाम वनमेव हि ।
राजाप्यश्वतरीं लब्ध्वा तया रेमे यथासुखम् ।।१२७।।
एवं हि न[१३९] प्रशंसन्ति पूर्वेषां धर्मवर्जितम् ।
कर्म सर्वे द्विजा राजन्[१४०] ये चान्ये धर्मवादिनः ।
तस्माद्दास्याम्यहं राज्यं वामनाय महात्मने ।।१२८।।

---

१३५ सचिवांस्तान् - क. ख. । १३६ निवर्तयित्वा - ख., निभर्त्सयित्वा - क. । १३७ अहन्तु - क, ख. । १३८ ऋषिस्तं - क. । १३९ नः - क. । १४० राजा - क ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

ततस्सोसुरशार्दूलो वामनस्य तदा करे ।
पातयामास विधिवज्जलं परमपूजितम्[१४१] ॥१२९॥
तस्य पातितमात्रे तु जले विष्णोर्महात्मनः ।
दैत्येन्द्रस्योपरि तदा पुष्पवृष्टिः पपात ह ॥१३०॥
साधुसाध्विति भूतानामदृश्यानाञ्च निस्वनः ।
देवदुन्दुभयश्चात्र स्वयं नेदुरनाहताः ॥१३१॥
मरुतश्च शुभान् गन्धानादाय प्रववुः शुभाः ।
हताः स्थ[१४२] दानवास्सर्वे[१४३] इति चात्राभवत् स्वनः ॥१३२॥
तत्कर्म तस्यातिसुदुष्करं[१४४] तदा समीक्ष्य सर्वे ऋषयस्तपोधनाः ।
प्रशंसमाना दितिनन्दनेश्वरं प्रणेमुराराम्मधुसूदनं तदा ॥१३३॥

⊙ इति स्कन्दपुराणे वामने षोडशोत्तरशतोध्यायः[१४५] ⊙

सनत्कुमार उवाच

ततस्स भगवान् विष्णुरुवाचासुरपुङ्गवम् ।
क्रमामि विक्रमैः पश्य दानवेश्वर सुप्रभ[१] ॥१॥
यदि चेत् पूर्यते दत्तं न चेद्दातव्य[२] इत्युत[३] ।
भवता भूमिभागोन्यः सत्यवाग् भव दानव ॥२॥

बलिरुवाच

क्रमस्व वामनश्रेष्ठ क्रमाँस्त्रीनद्य सर्वशः ।
न चेत् पूर्येत[४] दाताहं सत्यमेतद् ब्रवीमि ते ॥३॥

सनत्कुमार उवाच

ततस्स देवदेवेशं महादेवमुमापतिम् ।
प्रणेमे परया भक्त्या क्रमिष्यन् विष्णुरव्ययः ॥४॥

---

१४१ ..पूजितः - क. । १४२ हताम्तु - क. । १४३ स्तर्वा - ख । १४४ तस्याप्यतिदुष्करं - ख. ।
१४५ अध्यायः १६९ - ख. ।

१ सुप्रभः - क. ख, संप्रति - घ । २ भवेद्दातव्य - ख । ३ मित्युत - क. ख । ४ चेत्पूर्यति - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ततो देवाः सुसंयत्ताः सन्नद्धा युद्धलालसाः ।
आकाशेन महासत्वास्तत्राजग्मुर्महाबलाः ॥५॥
ततस्स फुष्करद्वीपे विष्णुः परमदीप्तिमत् ।
रूपं कृत्वा भुवं द्याञ्च - - वै क्रममाचरत् ॥६॥
स पादमुदये कृत्वा द्वितीयं सरितां पतौ ।
पुष्करस्यैवोत्तरतस्तेन लोकमिमं गतः[५] ॥७॥
क्रमित्वा विक्रमं चैकपादमुत्क्षिपतस्तदा ।
अजको नाम दैत्येन्द्रः पादं तं समगृह्णत ॥८॥
स तं सहैवासुरेण उत्क्षिपन्मधुसूदनः[६] ।
क्षिप्तोसावसुरो[७] व्यास अद्यापि न निवर्तते[८] ॥९॥
ततो द्वितीयं रुद्रस्य योगं परसमास्थितः ।
अन्तरिक्षे भुवर्लोक[९] एक एव क्रमोभवत् ॥१०॥
ततोन्तरिक्षाद् भूयोपि ब्रह्मणो[१०] योगमास्थितः ।
स्वर्लोकमखिलं व्यास[११] क्रममेकं चकार ह[१२] ॥११॥
तं तु लोकं समासाद्य निःसृतं देवसत्तमः[१३] ।
जनलोकं समासाद्य[१४] न समाप्तश्च तत्ततः[१५] ॥१२॥
तस्य चो[१६]त्क्रमतस्तत्र[१७] दैत्याः शस्त्रास्त्रपाणयः ।
अभ्यक्रमन्त[१८] वेगेन देवास्तान्सन्न्यवारयन् ॥१३॥
दश पुत्रसहस्राणि तनयानां बलेस्तदा[१९] ।
युध्यमाना हतास्तेन विविधायुधपाणयः ॥१४॥
बाणो वातश्च द्वावेतौ[२०] बलिपुत्रौ महाबलौ[२१] ।
तस्माद् भ्रष्टौ तदा व्यास संग्रामाद्ययतुर्मुने[२२] ॥१५॥
अथ ब्रह्मा तदाभ्येत्य समयं प्रचकार ह ।
विमुच्य पाशान्देवेश इमं[२३] लोक[२४] पितामहः ॥१६॥

---

५ गतं - ख. । ६ ...णोदक्षिपन्मधुसूदनः - (?) । ७ क्षिप्तो वा - क, क्षिप्तः स चासुरो - घ. । ८ न संज्ञातः क्व वा गतः - घ. । ९ च भूर्लोकः पूर्णं - घ. । १० ब्राह्मणो - क. । ११ सर्व - क., सर्वे - ख. । १२ क्रममेवं - क., क्रमे तच्च चकार ह - घ. । १३ पूर्णो नैव तृतीयकः - घ । १४ छलं चक्रे ततस्तस्य - घ. । १५ तत्त्वतः - ख. । १६ तस्योर्ध्वं - क ख. । १७ चाक्रामतस्तत्र - क. । १८ अभिक्रमन्त - क., अति ... - ख. । १९ स्तथा - क. । २० द्वावेत्र ? । २१ महाबलः - क. । २२ संग्रामायोद्यतुर्मुने - क. । २३ इदं - क. । २४ लोकं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

बले त्वयाखिलं राज्यं देवानां प्रतिपादितम् ।
सत्ये त्वं समये स्थित्वा मा राज्यं कामये: पुन:[२५] ॥१७॥
यावन्मन्वन्तरमिदमेष ते समय: शुभ: ।
परिपाल्य: सदा वत्स गच्छ चैव यथासुखम् ॥१८॥
इदं यज्ञफलं सम्यगवाप्स्यसि न संशय: ।
योगश्च मत्प्रसादेन भूय एव ह्यवाप्स्यसि ॥१९॥
सैव[२६] मुक्तस्तमापृच्छ्य[२७] पातालं संविवेश ह ।
देवा अपि तत: प्राप्य स्वं राज्यं[२८] मुमुदुर्भृशम् ॥२०॥

व्यास उवाच

कीदृक् स भगवान् विष्णुस्त्यक्त्वा स्वं धर्ममूर्जितम् ।
प्रत्याहरत त्रैलोक्यं न चैवास्यानयोभवत् ॥२१॥

सनत्कुमार उवाच

क्रमतस्तस्य देवस्य बिष्णोर्दीप्तानलप्रभम् ।
बभौ रूपमतीवोग्रं दुर्निरीक्ष्यं सुरैरपि ॥२२॥
अथ देवा: सहेन्द्रेण विष्णुं परमदैवतम्[२९] ।
तुष्टुवु: प्रशशंसुश्च कृतकृत्या महाबलम् ॥२३॥
प्रीत्या परमया युक्ता: सर्वे दिव्यास्त्रधारिण: ।
दानवैरर्द्यमानानामस्माकं विबुधेश्वर: ॥२४॥
त्राता राज्यप्रदश्चैव त्वमभूस्सुरसत्तम[३०] ।
त्वया स्म सुखिन:[३१] सर्वे कर्मिण: सुकृतैर्यथा ॥२५॥
तव देव प्रभावेण[३२] राज्यं भोक्ष्याम विज्वरा: ।
तपनस्य(?) प्रभावेण यथा पूर्वं सुरेतरा: ॥२६॥
त्वं हि न: परमं धाम तथैव च परा गति:[३३] ।
परं पवित्रं त्वं चैव ऋते देवमुमापतिम् ॥२७॥

---

२५ कामयेत् पुन: - क. ख । २६ स एव - क. । २७ मुक्त्वा आपृष्ट्वा - क, एतं पृष्ट्वा - ख. ।
२८ स्वराज्यं - क. । २९ देवतम् - क. ख. । ३० . त्सुरसत्तम - क. ख. । ३१ .. त्सुखिन: - क. ।
३२ न - क. ख. । ३३ त्वं हि न: परमाङ्गति: - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

तस्यैवं स्तूयमानस्य त्रिदशैः शार्ङ्गधन्वनः ।
अभूत्[३४] तुष्टिस्तदात्यर्थं बहुमानस्तथात्मनि[३५] ॥२८॥
ततोभिमानतस्तस्य[३६] स योगः परमो मुने ।
अभ्रश्यत यथा वह्निः सलिलेन समुक्षितः ॥२९॥
ततस्तदन्तरं लब्ध्वा पाप्मा सा ह्यासुरी मुने ।
प्रहृष्टा संप्रहृष्यैन[३७]मा विवेश जनार्दनम् ॥३०॥
स तया पाप्मया व्यास आविष्टो विष्णुरव्ययः ।
न बभौ दीप्तिमाँस्तत्र सन्तः प्राप्येव दारुणम् ॥३१॥

⊙ इति स्कन्दपुराणे वामने त्रैलोक्यक्रमणे सप्तदशोत्तरशततमोध्यायः ⊙

सनत्कुमार उवाच

तथा स पाप्मया व्यास आसुर्या संगतस्तदा ।
तदेव रूपं संप्राप्तो[१] वामनं देवसत्तमः ॥१॥
तं तथा वर्तमानं तु देवास्सर्वे सवासवाः ।
अब्रुवन् किमिदं देव तव वैकृतमीदृशम्[२] ॥२॥
तेषां तद्वचनं श्रुत्वा ऋषयः शंसितव्रताः ।
मरीचिर्भृगुरत्रिश्च अङ्गिराः क्रतुरेव च ॥३॥
वसिष्ठश्च पुलस्त्यश्च पुलहो रुचिरेव च ।
विश्वामित्रो वामदेवो भरद्वाजस्तथौशिजः ॥४॥
गौतमश्च शरद्वाँश्च कश्यप[३]श्चोद्दल[४]स्तथा ।
वत्सारो नैध्रुश्चैव च्यवनश्चात्मवानपि ॥५॥
दधीचश्च[५] ऋचीकश्च जमदग्निश्च विश्रुतः ।
जामदग्न्यस्तथा रामो ह्यगस्तिश्च महातपाः ॥६॥

---

३४ बभौ - क. ख. । ३५ ... नो तथात्मनि - क., माने तथात्मनि - ख. । ३६ ततोतिमानतस्तस्य - ख. ।
३७ संप्रहृष्यैव - क. ।
१ संप्राप्य - क. ख. । २ वै कृत्यमीदृशम् - क. टि. । ३काश्ययपः - क. । ४ ...श्चोदल्ल - क. । ५ दधीकश्च - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

बृहस्पतिश्च शुक्रश्च शक्तिश्च सपराशरः ।
कुणिश्च कुणिबाहुश्च[६] तथा सारस्वतश्च यः ॥७॥
एते चान्ये च ऋषयो नारदश्च सपर्वतः ।
ऊचुर्देवाँस्तदा व्यास[७] ब्रह्मणा संप्रचोदिताः ॥८॥

ऋषय ऊचुः

वयं देवाद्य संप्राप्ता ब्रह्मलोकात् सुरेश्वराः ।
आज्ञप्ता ब्रह्मणा क्षिप्रं देवस्यास्य कृतेन ह ॥९॥
यदनेन परित्यज्ज्य स्वधर्मं देवबन्धुना ।
प्रतिग्रहः कृतो राज्यं वैकुण्ठेन महात्मना ॥१०॥
ततः पाप्मासुराणां या सर्वप्राणिभयंकरी ।
सासुरान् संपरित्यज्य केशवं संविवेश ह ॥११॥
तयाभिभूतो[८] देवोयमशक्तः शत्रुबाधने ।
न चास्य तेजः सर्वे वै[९] पश्यध्वं पूर्ववच्छुभम् ॥१२॥
स एष यदि मन्यध्वं तीर्थेषु सुसमाहितः ।
स्नात्वाश्वमेधेन पुनर्यजतां दैवतैस्सह[१०] ॥१३॥
ततः पिनाकिनं दृष्ट्वा तेन पूतश्च सर्वशः ।
भविता पाप्मया मुक्त एवमाह पितामहः ॥१४॥

सनत्कुमार उवाच

ततस्ते सहितास्सर्वे देवा मुनिजनैस्सह ।
तीर्थयात्रामकुर्वन् तं[११] गृहीत्वा विष्णुमव्ययम् ॥१५॥
ते तु पुष्करिणो[१२] रम्यां सुषुम्णेति सुविश्रुताम्[१३] ।
नलिनीवनसंछन्नां[१४] प्रहृष्टाण्डजनादिताम् ॥१६॥
बहुवृक्षवनोपेतां फुल्लपङ्कजशोभिताम् ।
बहूपवनवृक्षाढ्यां सूक्ष्मकाञ्चनबालुकाम् ॥१७॥

---

६ कुणिराहुश्च - क. । ७ ... भ्येत्य (?) । ८ विभूतो - क. । ९ सर्वेषां - क., पा (शा) - ख. । १० देवतैः सहः - क. ख. । ११ ... मकुर्वन्त - क. । १२ पुष्किरणीं - क. । १३ सुषुम्नामिति विश्रुताम् - क. । १४ ...षण्डसंछन्ना (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वज्रवैदूर्यनीलाङ्कामिन्द्रनीललतोपलाम् ।
विविधाण्डजशब्दाढ्यां सिद्धचारणसेविताम् ॥१८॥
किन्नरोद्गीतमधुरामप्सरोभिश्च सेविताम् ।
मत्तभ्रमरगीताढ्यां[१५] श्रीनिकेतननिकेतनाम्[१६] ॥१९॥
यस्यां[१७] स्नात्वा नरो मर्त्यः[१८] स्वशरीरेण सुव्रत ।
विमानेनार्कभासेन गच्छन्ति[१९] ह्यमरालयम् ॥२०॥
तामासाद्य तदा देवाः सुषुम्नामृषिभिस्सह ।
पद्मानि जगृहुश्चैव मृणालानि बिसानि[२०] च ॥२१॥
अथ तत्र महापद्मं विकचं सुमनोहरम् ।
सहस्रपत्रसंछन्न[२१]मगस्त्योद्धृत्य गृह्य तत्[२२] ॥२२।
तस्यास्तीरे निचिक्षेप[२३] ततः सस्नौ[२४] यथासुखम् ।
जग्राह तच्च देवेन्द्र अदृष्टः केनचिद्विभुः ॥२३॥
अथागस्त्यः समुत्तीर्णो न तत्पद्ममपश्यत ।
सर्वांश्च तानुपामन्त्र्य इदमाह महामनाः[२५] ॥२४॥

अगस्त्य उवाच[२६]

मम पद्मं महद्देवाः केनादत्तं सुपुष्पितम् ।

सनत्कुमार उवाच

ततस्त ऋषयस्सर्वे देवाश्चापि[२७] ऋषेस्तदा ।
प्रत्ययान् विविधांश्चक्रु[२८]रेकैकश्येन[२९] सुव्रत ॥२५॥

इन्द्र उवाच

स यज्ञैर्यजतामिष्टैर्बहुभिश्चाप्तदक्षिणैः ।
वसेत् स्वर्गे च नियतं यस्ते हरति पङ्कजम् ॥२६॥

---

१५ भ्रमरोन्मत्तगीताढ्यां - क ख. । १६ श्रीनिकेतनिभां शुभां - ख. । १७ योऽस्यां - क. । १८ मर्त्या. - क. । १९ गच्छते - क. । २० वनानि - ख. । २१ संहृष्टः - ख, संगृह्य - क । २२ गृहीतवान्-क.। २३ तीरेथ चिक्षेप - ख.। २४ तस्थौ - घ. । २५ महात्मना - क. ख. । २६ अगस्तिरुवाच - क. ख । २७ देवताश्च - ख. । २८ ...श्चक्रु - क. । २९ ... स्य - क, ... स्येन - ख, ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

 CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

ततस्ते मेनिरे सर्वे देवेन्द्रेण महात्मना ।
गृहीतं पङ्कजं व्यास इन्द्रश्चैनमुवाच[३०] ह ॥२७॥

इन्द्र उवाच

ऋषीणां धर्मतत्त्वानि शृणुयाय वयं कथम् ।
उपायोयं कृतस्तस्माद् गृहाणेदं[३१] जलोद्भवम् ॥२८॥

सनत्कुमार उवाच

ततस्ते तत्र संपूज्य अग्नीन् देवान् पितृनपि ।
ब्राह्मणाँस्तर्पयित्वा च विष्णोः कृत्वा तथाशिषः ॥२९॥
जग्मुरन्यानि तीर्थानि सुपुण्यानि शुभानि च ।
बहूनि व्यास मुनयो देवाश्च सुसमाहिताः ॥३०॥
अथापश्यन्त ते वृक्षमेकं शुष्कं महातरुम् ।
कोटरे च शुकं तस्य शुष्यन्तं व्याकुलेन्द्रियम् ॥३१॥
ते दृष्ट्वा तमपृच्छन्त महेन्द्रेण दिवौकसः ।
दिव्येन चक्षुषा दृष्ट्वा शुकं तुष्ट्वा यशस्विनः ॥३२॥

इन्द्र उवाच

खगेश्वर मृते ह्यस्मिन् कस्मात्तिष्ठसि पादपे ।
अपुष्पफलपत्रे त्वं[३२] शुष्के निरुपजीविते[३३] ॥३३॥

शुक उवाच

एष वृक्षः पुरा ह्यासीत् सुमहान् कल्पवृक्षवत् ।
फलैरमृतकल्पैश्च चिरश्चाप्युपजीवितः[३४] ॥३४॥
दशामिमां पुनः प्राप्तः[३५] कालेन च[३६] वनस्पतिः ।
जह्यादेनं कथं प्राज्ञः कृतज्ञो मादृशः पुनः ॥३५॥

---

३० इन्द्रश्चैवमुवाच - क., इन्द्रश्चेद ...- ख. । ३१ गृहाणेमं - क. ख. । ३२ तु - क. । ३३ निरुपजीव्यते - क. ।
३४ ...जीवितम् - ख. । ३५ प्राप्य - ख. । ३६ कालेनैव - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कृतघ्नः स्यामहं देव[३७] मृतमेनं परित्यजन् ।
ये लोका हृयस्य वृक्षस्य ते मे सन्तु शचीपते ॥३६॥

इन्द्र उवाच

प्रज्ञावानसि मेधावी महात्मा नयतत्त्ववित्[३८] ।
कथं मूढमिवात्मानं करोषि खगपार्थिव ॥३७॥
वनस्पतिरयं साधो धर्म एषोस्य नित्यदा ।
अबुद्धिपूर्वं पक्षीन्द्र स्वभावा[३९]च्चात्र कारितः ॥३८॥
नास्येयं बुद्धिरभवद्वयांसि मयि नित्यशः ।
वसन्तु मम खादन्तु फलानि च यथासुखम् ॥३९॥
अचेतनो यथा हृयग्निरापो वायुश्च तत्त्वतः ।
भूतानामुपकाराय स्वभावान्नान्यथा हि ते ॥४०॥
तद्वत् त्वं खग वृक्षस्य बुद्ध्वा कर्म स्वभावजम्[४०] ।
परित्यज्येममन्यत्र[४१] गच्छ यत्र सुखं भवेत् ॥४१॥

शुक उवाच

न मूढोस्मि सुरेशान मावमंस्था वचो मम ।
शृणुष्व च यथाप्रज्ञा मम देवेश्वर प्रभो ॥४२॥
अचेतनो यथा हृयग्निरापो वायुश्च तत्त्वतः ।
न तथा सुरशार्दूल वृक्षगुल्मलतादयः ॥४३॥
विहितो हृयेष संसारः सर्वेषामेव कर्मिणाम् ।
तस्मादचेतनत्वन्ते न वृक्षेषु सुरेश्वर ॥४४॥
यथा च बुद्धिर्वृक्षाणां कथं कुर्याम सर्वशः ।
उपकारांस्तु भूतानामिति मे तन्निशामय ॥४५॥
स्वयम्भुरेतानवदत् सृष्ट्वा मुख्यान्महायशाः[४२] ।
प्रजानामुपकाराय वर्तध्वमिति सर्वशः ॥४६॥
ततस्ते फलपुष्पत्वक्प्रबालादिभिरन्तशः ।
उपकाराय वर्तन्ते सर्वभूतेषु लोकप ॥४७॥

---

३७ महद्देव - क. । ३८ नयुतत्वविद् - क. । ३९ ...त्रात्र - क. । ४० स्वयं कृतम् - क. ख. ।
४१ परित्यजेममन्यत्र - क. । ४२ महायशं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वायुरग्निस्तथापश्च किन्तवाविदितं प्रभो ।
बुद्धिपूर्वं प्रवर्तन्ते यथावद्धि नगाः शुभाः ।।४८।।

इन्द्र उवाच

कथं तवेदं विज्ञानं को धर्मः कश्च ते श्रमः ।
एतद्वे तुमिच्छामः[४३] कथयस्व खगेश्वर ।।४९।।

शुक उवाच

जन्मप्रभृति देवेश न मित्रद्रुहणे मम ।
बुद्धिः समभवन्नित्यं मृत्यावपि समागते ।।५०।।
मातापितृपरश्चाहं स्वदारनिरतस्तथा ।
नावमन्ये च[४४] भूतानि ऋतुकाले व्रजामि च ।।५१।।
न भक्षयामि धान्यानि परेषां देवताधिप ।
तेन मे ज्ञानममलं प्रवृत्तं सुरसत्तम ।।५२।।

इन्द्र उवाच

तुष्टोस्मि तव सद्बुद्ध्या अनया खगसत्तम ।
वरं वृणु प्रदास्यामि यद् भवान्मन्यते शुभम् ।।५३।।

शुक उवाच

जीवतामेष[४५] देवेन्द्र त्वत्प्रसादाद् वनस्पतिः ।
अतो नान्यमहं[४६] देव वृणुयां वरमुत्तमम् ।।५४।।

इन्द्र उवाच

कर्मणा स्वेन जन्तूनां गतयः संप्रकीर्तिताः ।
स्वेनैव कर्मणा पातः[४७] किन्तवानेन बुद्धिमन्[४८] ।।५५।।
इदं विमानमारुह्य मया दत्तं खगोत्तम ।
मम लोकं व्रज क्षिप्रं स्तूयमानो यथा नरः ।।५६।।

---

४३ मिच्छम - क., इच्छा मे(?) ख. ? ४४ नावमन्य.मि - क., नावमन्यानि - ख.। ४५ जीवितामेष - क. ख।
४६ नान्यदहं - ख.। ४७ पातः - क. ख., जातः(?)। ४८ बुद्धिमान - ख.।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शुक उवाच

न लोकानहमिच्छामि न विमानं न [४९] वै सुखम् ।
प्रयाचितं[५०] प्रयच्छस्व जीवतामेष[५१] वै नगः ॥५७॥

सनत्कुमार उवाच

सद्भावं [५२] तस्य तं ज्ञात्वा[५३] सर्वं च सुरसत्तमः ।
चकार स[५४] यथापूर्वं वृक्षं सर्वगुणान्वितम् ॥५८॥
शुकश्च कर्मणा तेन दृढभक्तितयापि[५५] च ।
दीनेष्वभ्युपपत्त्या च ब्रह्मलोकं जगाम ह ॥५९॥

⊙ इति स्कन्दपुराणे वामनतीर्थयात्रायाम्[५६] अष्टादशोत्तरशततमोध्यायः ⊙

सनत्कुमार उवाच

ततस्ते दैवता[१]स्सर्वे कृमिलां[२] नाम वै[३] पुरीम् ।
उपागता ह्यवैक्षन्त[४] तत्र चेदं महामुने ॥१॥
ब्राह्मणी[५] गौतमी[६] नाम रुद्राणीव यथापरा[७] ।
धार्मिकी च वदान्या च तपसा दग्धकिल्विषा ॥२॥
तस्यास्तपसि सक्ताया ब्रह्मलोकं गते पतौ ।
कृष्णसर्पेण महता सुतो दष्टो ममार ह ॥३॥
तं देशमागमत्तत्र[८] व्याधोर्जुनक इत्युत ।
स आगतस्तदापश्यद्विषेण समभिप्लुतम् ॥४॥
स गत्वा[९] गौतमीं प्राह सुतोयं ते तपोधने ।
दष्टोहिना ममाराशु किन्नैनमवबुध्यसे ॥५॥

---

४९ निमानं न च - क. ख. । ५० प्रयाचितः - ख । ५१ जीविताेमेष - क. ख. । ५२ सद्भाव्यं - ख. ।
५३ श्रुत्वा - ख. । ५४ च - क ख । ५५ दृढभक्तयापि - ख. । ५६ शुकप्रश्ने - ख. ।
१ देवना - क. ख. । २ किमिलां - क. । ३ तो (नः) - क । ४ ह्यवेक्षेन्त - क, ह्यपेक्षन्त ख । ५ ब्राह्मणीं - क ख. । ६ गौतमीं - क. ख. । ७ ...मपरामिव - क. ख. । ८ शब्दे तमागमत्तत्र - क. । ९ ज्ञात्वा - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सा तथोक्ता समागम्य पुत्रं दृष्ट्वा गतायुषम् ।
रुरोद बहुधा व्यास मृतापत्या महाव्रता ॥६॥
तस्या विलपमानाया व्याधः सोर्जुनकस्तदा ।
विलं खनित्वा निष्कृष्य तस्मिंहि समबन्धत ॥७॥
स बद्धस्तेन दुष्टात्मा कृष्णसर्पः सुदुःखितः ।
उवाच तं तदा[१०] व्याधं योसावर्जुनकः स्मृतः ॥८॥
किं मया तव बद्धेन नाधर्मं परिपश्यसि ।
न चैव भक्ष्या मर्त्यानां वयं किं मां[११] न मुञ्चसि[१२] ॥९॥

अर्जुन उवाच

त्वामाद्य खण्डशः कृत्वा भक्षं[१३] दास्यामि वहिर्णे ।
त्वयायं भक्षितो[१४] यस्मादृषिपुत्रो ममार ह[१५] ॥१०॥

सर्प उवाच

कालेन[१६] चोदितोहं तं[१७] दष्टवानृषिपुत्रकम् ।
न मां दोषेणार्जुनक[१८] क्षेप्तुमर्हसि[१९] तत्त्वतः ॥११॥

अर्जुन उवाच

चोदितो यदि कालेन दष्टवानसि पन्नग ।
निमित्तं त्वं हि मरणे तस्माद्धंस्यामि ते भृशम् ॥१२॥

सनत्कुमार उवाच

ततस्सा गौतमी व्यास कालं[२०] मृत्युमथाकरोत्[२१] ।
दुःखेन परमेणार्ता[२२] कालो भीतस्ततोभ्यगात्[२३] ॥१३॥

काल उवाच

अहं हि सर्वसत्वानां कालो नास्त्यत्र संशयः ।
चोदितो मृत्युनैवाहं हतवानृषितुत्रकम् ॥१४॥

---

१० तथा - क. । ११ भयं - क. । तव भक्षोहं ततः किं मां - घ. । १२ मुच्यसे - क. । १३ भक्ष्यं - ख. ।
१४ संभक्षितो - क. । १५ महाबलः - ख. । १६ नो - ख । १७...तुं - क. ख. । १८ नार्जुनक - क. ख .।
१९ क्षान्तुमर्हसि - ख. । २० काले - क. । २१...मकुर्वंत - क ख. । २२ परमेणार्ता - क. । २३ ... भ्यधात्(?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अर्जुन उवाच

त्वया वा मृत्युना वायं चोदितो दष्टवान्यदि ।
वधे निमित्तमेषोऽस्य तस्मादेनं निहन्म्यहम् ।।१५।।

सनत्कुमार उवाच

अथ मृत्युस्तदाभ्येत्य तं देशं सुमहामनाः ।
गौतम्यास्तपसो भीत इदं प्रोवाच सुस्वरम् ।।१६।।
अहमप्येष संबद्धं नियत्या सुसमाहितः[२४] ।
मारयामि न मे दोषं कर्तुमर्हसि सुव्रते ।।१७।।

अर्जुन उवाच

नियतिर्वास्तु मृत्युर्वा कालो वाप्यस्तु कारणम् ।
कृष्णसर्पो निमित्तं तु तस्माद्वध्यो न संशयः ।।१८।।

सनत्कुमार उवाच

अथागान्नियतिस्तत्र उवाचेदं च सा तदा ।
गौतमीं दुःखितां व्यास भीता प्राह तदा वचः ।।१९।।
कृतान्तवशगा साध्वि जन्तून्नित्यमतन्द्रिता ।
पाशैर्बद्ध्वा वशं मृत्योर्नयामि[२५] वरवर्णिनि ।।२०।।

कृतान्त उवाच

अहं हि किङ्करः साध्वि यमस्य सुमहात्मनः ।
तेन प्रचोदितो जन्तून्नयामि यमसादनम् ।।२१।।

अर्जुन उवाच

यमोपि वा[२६] कृतान्तो वा एते वाप्यस्य कारणम् ।
नैवमेवं दुराचारो विमोक्ष्येत[२७] कदाचन ।।२२।।

सनत्कुमार उवाच

ततो यमस्तदा व्यास स्वयमेव महामनाः[२८] ।
तत्रागात्तामिदं चैव गौतमीं सोऽभ्युवाच ह ।।२३।।

---

२४ सुसमाहिता - क. । २५ ...र्नयामि । २६ वापि - ख. । २७ विमोक्ष्यति - क. ख. । २८ महात्मना - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नाहं नैते महासत्वास्त पुत्रस्य कारणम् ।
मरणे तस्य वीक्षस्व शृणु चापि[२९] वचो मम ।।२४।।
जन्तूनां देहसंयोगो धर्माधर्मकृतः शुभे[३०] ।
वियोगश्चापि देहेन ताभ्यामेव क्षयात्पुनः ।।२५।।
देहिनां धर्म एवैक आयुषो हेतुरुच्यते ।
तत्क्षये मरणं प्रोक्तं कालो मृत्युश्च स स्मृतः ।।२६।।
कृते वर्षसहस्रैस्तु चतुर्भिः काल उच्यते ।
त्रेतायान्तु त्रिसाहस्रो द्वापरे द्विसहस्रिकः ।।२७।।
कलौ तु शतमेवाहुः कालं जन्तोर्महाव्रते ।
अकालेन्यत्ततः प्रोक्तं तच्चापि[३१] मरणं शृणु ।।२८।।
इन्द्रियेष्वस्य ये देवा वसन्ति द्विपदां वरे ।
तेस्य सर्वे हरन्त्येकं भागं दैवतसत्तमाः[३२] ।।२९।।
चक्षुषा पश्यतो दुष्टं दुष्टं च ब्रुवतस्तथा ।
शृण्वतो मन्वतश्चैव[३३] बुध्यतश्चापि पश्यतः[३४] ।।३०।।
तथा स्पर्शयतश्चैव जिघ्रतो भुञ्जतोपि वा ।
आदानाद् गमानाच्चैव आनन्दोत्सर्गतस्तथा ।।३१।।
भागं भूतानि चान्यं तु हरन्ति पुनरेव हि[३५]
सुदुष्टं वर्ततस्तेषु[३६] भागञ्च व्याधयोपरम् ।।३२।।
अपरं पितरो भागं देवाश्चान्यमतोपरम्[३७] ।
अपरं चर्वयो वह्निश्चन्द्रादित्यौ ग्रहास्तथा ।।३३।।
तस्यैवं देहिनः साध्वि यावदेवाहृतं भवेत् ।
तावदेव स जीवेत अकालः स च वक्ष्यते ।।३४।।
यथा च म्रियते[३८] जन्तुरकाले तपसैधिते[३९] ।
तथा शृणु ममाद्येह गदतो वरवर्णिनि ।।३५।।

---

२९ चैव - ख. । ३० शुभैः - क. । ३१ अकालोन्यस्ततः प्रोक्तस्तत्रापि - (?) । ३२ देवतसत्तमाः - क. ख. । ३३ मन्यतश्चैव - क. ख.। ३४ ...भिपश्यतः(?)। ३५ ह - क. ख । ३६ ...स्ते ते - ख.। ३७...दत्तोपरम् - क. ख । ३८ मृयते - क । ३९ तपसेधिते - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यावन्न हीयते[४०] तस्य जन्तोरायुर्महाव्रते[४१] ।
तावत्स जीवितं प्राप्य तस्यान्ते म्रियते पुनः ।।३६।।
तस्य येनापराधेन आयुर्देवा हरन्ति तत्[४२] ।
तेनाधर्मो महांन्तस्य उत्पन्नो जीवितान्तकः ।।३७।।
प्रादुर्भूतस्तदा साध्वि व्याधिर्मर्माणि कृन्तति ।
स कृत्तमर्मा ह्यवशो[४३] देहं त्यक्त्वा महाव्रते ।।३८।।
अन्यद्देहं समासाद्य गतिमन्यां प्रपद्यते ।
येस्य[४४] व्याधिं न कुरुते सोधर्मोनुग्रहात्[४५] पुनः ।।३९।।
देवानां देहवासानां तमप्यन्येन[४६] हन्ति वै ।
विषशस्त्रप्रपतनैर्जन्तुभिश्च पृथग्विधैः ।
अन्यैश्च बहुभिर्घोरैर्नात्र दोषः[४७] प्रपश्यतः[४८] ।।४०।।

सनत्कुमार उवाच

ततस्सा तपसा दृष्ट्वा[४९] गौतमी सुमहाव्रता ।
तमर्जुनकमाहेदं वचनं दुःखवर्जिता ।।४१।।

गौतम्युवाच

मुञ्चार्जुनक[५०] नायं मे पन्नगो वधमर्हति ।
आविष्टोयमधर्मेण दैवतैश्चादशत् सुतम् ।।४२।।
ईश्वरास्ते महात्मानो जन्तूनाविश्य चेतनान्[५१]
अचेतनांश्च[५२] सर्वत्र[५३] प्रयुञ्जन्ति यथातथम् ।।४३।।
मृत एष स्वधर्मेण नास्ति दोषस्तपस्विनाम्[५४] ।
गच्छध्वं दैवताः[५५] सर्वे स्वान् गृहान् किमिहास्यते ।।४४।।

सनत्कुमार उवाच

ततस्ता देवताः सर्वाः प्रेषिता ब्रह्मयोषिता ।
सममूचुस्तदा व्यास गौतमीं तामिदं वचः ।।४५।।

४०...तच्च महते - क. । ४१ महाप्रभे - ख. । ४२ ते - क. ख. । ४३ सुयशो(शे) - क. ख. ।
४४ योस्य(?)।४५ स धर्मानुग्रहात्-क. । ४६ तपमन्येन-क. ख. । ४७ दोषं-ख । ४८ प्रपश्यत - क., प्रपश्य ते-ख. ।
४९ वचनं श्रुत्वा - घ. । ५० मयार्जुनक - ख. । ५१ चेतनाः - क., चेतनं - ख. । ५२ अचेतनाश्च - क. ।
५३ तु - क. । ५४ ...स्तपश्विनः - ख. । ५५ देवताः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

देवा ऊचुः

तुष्टाः स्म तव धर्मज्ञे तपसा दग्धकिल्विषे ।
जीवतामेष ते पुत्रः स्वधर्मे चावतिष्ठतु ॥४६॥
सर्प एष स्वयं साध्वि अधर्मो मूर्तिमान् स्थितः ।
व्यधरूपी च धर्मोयं पश्यैतौ सुमहाव्रते ॥४७॥
परीक्षा ते कृता ह्येषा[५६] देवैरेतैर्महाव्रते ।
तवाक्षया भविष्यन्ति लोकाः सर्वे न संशयः ॥४८॥

सनत्कुमार उवाच

ततस्ते सहसा तत्र देवा इन्द्रपुरोगमाः[५७] ।
अवैक्षन्त यथावृत्तं तच्च सर्वं न्यवेदयम् ॥४९॥
स्नात्वा चान्यदगच्छन्ते[५८] पुनस्तीर्थं समाहिताः ।
सर्व एव महाभागास्तथान्यानि पुनः पुनः ॥५०॥
क्रमेण विहरन्तस्ते कृत्यामभ्यागमत्पुनः ।
यत्र कृत्या हता पूर्वं देवेन्द्रेण महौजसा ॥५१॥

व्यास उवाच

केन सोत्पादिता कृत्या किमर्थं कस्य वा विभो ।
कथं च निहता भूय एतदिच्छामि वेदितुम् ॥५२॥

सनत्कुमार उवाच

तृणबिन्दुरिति ख्यात आसीद्राजा महाबलः ।
स प्रोवाच मुनीन् सप्त इदं वचनकोविदः ॥५३॥
याजयध्वं हि मां विप्रा दास्ये वित्तं हि वो बहु ।
तेब्रुवन्न वयं साधो याजयाम नरेश्वर ॥५४॥
स दीक्षितो[५९] यदान्येन अनावृष्टया[६०] महामनाः[६१] ।
ते वै[६२] बुभुक्षयाविष्टा यज्ञं प्राप्ता यदृच्छया ॥५५॥

---

५६ ह्यद्य - क. । ५७ ...स्सेन्द्रपुरोगमाः-क. ख. । ५८ ...मगच्छन्ते - क. ख., ...मगच्छन्त - क. । ५९ वीक्षितो ख. । ६० अनावृष्ट्यां - ख. । ६१ महात्मना - क., महात्मनां - ख. । ६२ तवा - क., ते वै (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ तानब्रवीद्राजा ब्रूत किं प्रददानि वः ।
ऊचुस्ते क्रुद्धवदनाः सुतं नो दत्स्व[६३] पार्थिव ।।५६।।
तेभ्यः सत्कृत्य पुत्रञ्च धनञ्चैव स पार्थिवः ।
प्रणम्य बहुमानेन पाराशर्योपपादयत् ।।५७।।
तथा तस्यानतस्यैवं[६४] द्रव्यं हित्वा तपोधनाः ।
सुतं गृहीत्वागच्छन्ते[६५] सौकुमार्यात् स बालकः[६६] ।।५८।।
क्षुत्तृषाभ्यर्दितस्तत्र[६७] अध्वना च ममार ह ।
दावाग्नौ ते च तं न्यस्य निरीक्षन्तोवतस्थिरे ।।५९।।
तेषां तत्रेक्षतां व्यास आजगाम नराधिपः ।
उवाच तानृषीँश्चेदं[६८] प्रहसन् दिव्यकुण्डलः[६९] ।।६०।।

तृणबिन्दुरुवाच

यूयं प्रतिग्रहं मत्तो नागृह्णत[७०] तपोधनाः ।
याजयध्वं न चैवास्मान् मुनयस्तपसैधिताः[७१] ।।६१।।
इह दोषं न पश्यध्वं मरणेस्य शिशोर्द्विजाः ।
अधर्म्ये[७२] चायशस्ये च अहो धर्मे हि वो[७३] मतिः ।।६२।।

सनत्कुमार उवाच

ततस्ते तमनादृत्य अनुक्त्वा किञ्चिदेव च ।
जग्मुरन्यां दिशं[७४] व्यास वने[७५] क्षुत्परिपीडिताः ।।६३।।
तृणबिन्दुश्च तपसा तत्र वृक्षान् बहूँस्तदा ।
असृजत् तत्क्षणाद् व्यास तेषां सुखहितेप्सया ।।६४।।
ते च तद्वनमासाद्य बहून् वृक्षान् फलान्वितान् ।
अपश्यन्त तदा व्यास परां तुष्टिं च ते ययुः ।।६५।।
गृहीत्वा बिभिदुश्चैव ददृशुश्चैव तेष्वथ ।
सुवर्णमन्नं भक्षाँश्च[७६] तथा रौप्यञ्च सुप्रभम् ।।६६।।

---

६३ धत्सु - क., धत्स्व (?), यच्छ - ख. । ६४ तस्यानतस्यैव - क. ख. । ६५ ..त्वागच्छन्त - क. ख । ६६ बालकं - ख. । ६७ तृट्क्षुधाभ्यर्दितस्तत्र - क. ख. । ६८ श्चैव - ख. । ६९ दीप्तकुण्डलः (?) । ७० न गृह्णत - क. । ७१ ...स्तपसेधिताः - क. ख. । ७२ अधर्मे - क. । ७३ हिता - क. । ७४ दिशां - ख. । ७५ वनं - क. । ७६ भक्ष्याँश्च - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तृणुबिन्दुकृतं तच्च तेमन्यन्त तपोन्विताः ।
ततस्ते तद्वनं[७७] त्यक्त्वा ऋषयः सप्त सुव्रताः ।
अन्यां दिशं प्रपद्यन्त तृणबिन्दुश्चुकोप च ॥६७॥
उवाच तानृषीन् गत्वा प्रणतः प्राञ्जलिश्च सः ।
मन्युनातिपरीतात्मा संविग्नोथ नराधिपः ॥६८॥

तृणबिन्दुरुवाच

नैवास्मि पतितो विप्रा दुष्टकर्मा न चैव ह ।
न चैव वर्जितो विप्रैर्न चायज्वा न पापकृत् ॥६९॥
नराधिपानां वंशेस्मि जातः[७८] शुद्धे तपोधनाः ।
सम्यक् प्रजाः पालयामि किं मां न बहु मन्यत ॥७०॥
तस्य तद्वचनंच श्रुत्वा ऋषयस्ते महाव्रताः ।
ऊचुर्न ते वयं राजन्[७९] प्रतिगृह्णीम[८०] सर्वथा ॥७१॥
शोभनोसि गुणैर्युक्तः प्रजापालः प्रजापतिः ।
सन्तुष्टाः स्मो[८१] न ते द्रव्यं प्रतिगृह्णीम भूपते ॥७२॥

सनत्कुमार उवाच

त एवमुक्त्वा राजानं सर्व एव ययुर्मुने ।
सोपि राजा महामन्युस्तदा दीप्तं हुताशनम् ॥७३॥
जुहाव कृत्यां तस्माच्च चकार सुमहाबलाम् ।
यातुधानीमिति ख्यातामुवाचेदं च तां तदा ॥७४॥
गत्वा सप्त मुनीन् कृत्ये भक्षयस्व महाबले ।
उपधार्य हि नामानि वसिष्ठादींस्तपोधनान् ॥७५॥
सा गत्वा तु शुभान्नाम दिव्यां पुष्करिणीं शुभाम् ।
तस्यास्तीरं समासाद्य तस्थौ तान् वै प्रतीक्षती ॥७६॥
ऋषयस्तेपि संविग्नाः क्षुत्तृष्णाव्याकुलेन्द्रियाः ।
अन्यान्देशान् विमार्गन्तः[८२] शुभां वापीं ययुस्ततः ॥७७॥

---

७७ तु वनं - क. । ७८ ञ्जात - क. । ७९ राजा - क. । ८० प्रतिगृह्णाम - क. । ८१ स्म - क. ।
८२ विमार्गित्वा - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

तेषां तद्गमने व्यास दृष्टवा दोषं पुरन्दरः ।
परिव्राजकवेषेण श्वद्वितीयो[८३]ऽभ्यगच्छत ।।७८।।
तं दृष्टवा तेब्रुवन् सर्वे परस्परमनुल्वणम्[८४] ।
हसन्तं तं महाबाहुं त्रिदण्डव्यग्रपाणिनम् ।।७९।।

ऋषय ऊचुः

नूनमेष दिवारात्रौ नित्यमेव ह्यतन्द्रितः ।
चखाद यत एषोत्र ततोयं पीवरोभवत् ।।८०।।
अथवोत्तानहस्तोयं नित्यमेव प्रयाचकः ।
तपःस्वाध्यायविक्रेता तेनायं पीवरोभवत् ।।८१।।
तमेवं बहुधा कल्प्य ऋषयस्ते तपोधनाः ।
पप्रच्छुरमितात्मानं कस्त्वमित्येव वादिनः ।।८२।।

इन्द्र उवाच

अहं परिव्राड् विप्रेन्द्रा आगच्छामि दशेरकात् ।
प्रयास्यामि शुभां वापीं नाम्नाहं तु शुनस्सखा[८५] ।।८३।।
श्वानो[८६] मम सदा ह्रीष्टाः शुनां चैव सदा ह्यहम् ।
तस्माच्छुनः सखा नाम्ना ख्यातोहं द्विजसत्तमाः ।।८४।।

सनत्कुमार उवाच

ततस्ते सह तेनैव शुभां पुष्करिणीं ययुः ।
ददृशुस्तां च कृत्यां ते तया चैव निवारिताः ।।८५।।
यदि वा रोचते विप्रा अस्यामभ्यवगाहितुम् ।
नामानि कथयित्वेह चरध्वं सुखमव्ययाः ।।८६।।

सनत्कुमार उवाच

ततस्ते तां तदा कन्यामूचुरेवं भवत्विति ।
श्वसखा चेदमाहैनानृषीन् सर्वानरिदन्दमः ।।८७।।

---

८३ स्वा (श्वा) द्वतीयो - क. । ८४ ...मयोल्वणम् - (?) । ८५ शुनस्सखः - क. । ८६ शुनो - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विप्रा इयं यातुधानी नेयं प्रकृतमानुषी[८७] ।
भवितव्यं हि कार्येण यथेयं वदते हि वः ॥८८॥
ते यूयं यदि मन्यध्वं श्रेयः परमकं हितम् ।
तथा नामानि विब्रूत यथेयं नोपधारयेत् ॥८९॥

सनत्कुमार उवाच

एवं भवत्विति प्रोच्य ते व्यास मुनयः शुभाः ।
नामानि तस्याः श्राव्यैव[८८] यथेष्टं ते जगाहिरे ॥९०॥
नैरुक्तानि[८९] स्वनामानि दुर्बोधानि च तेब्रुवन् ।
न मेने यानि कृत्या सा ततस्ते जलमाविशन् ॥९१॥

सनत्कुमार उवाच

तेषामलक्षयित्वा सा[९०] नामानि तु शिखोद्भवा ।
श्वसखं प्राह ब्रूहि त्वं ततो यास्यसि वा न वा ॥९२॥

श्वसख उवाच

शुनामस्मि[९१] सखा क्रूरे श्वभिश्च सह संगतः ।
श्वसखं तेन मां विद्धि यातुधानि निशाचरि ॥९३॥

यातुधान्युवाच

सकृदेव पुनर्ब्रूहि नाम त्वं मानुषाधम ।
ततो यास्यसि विप्राणां समीपं विदितो मम ॥९४॥

श्वसख उवाच

शुनामस्मि सखा देवः[९२] सख्यं मेनपगं[९३] श्वभिः ।
श्वसखा तेन हन्मि त्वा यातुधानि निशामय ॥९५॥

सनत्कुमार उवाच

स एवमुक्त्वा तां क्रूरां त्रिदण्डेन सुरेश्वरः ।
मूर्घ्न्याजघान तेनाशु भस्मसादभवच्च[९४] सा ॥९६॥

---

८७ प्रकृतिमानुषी - क. ख. । प्राकृत (?) । ८८ श्राव्येयं - क. । ८९ नेरुक्तानि - क. ।
९० तेषां न च लक्षयित्वा - क. । ९१ [illegible] - क. ९२ देवि - घ । ९३ [illegible]मनपगं - क. । ९४ शुभे... - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तृणबिन्दुसुतश्चासौ कृत्यया हतमात्रया ।
शक्रेण जीवितस्तूर्णं[९५] पितरं समुपागमत् ।।९७।।

सनत्कुमार उवाच

एवं तां स निहत्येन्द्रः श्वसखा शक्तिनन्दन ।
मृणालविसपद्मानि ऋषीणामहरत्पुनः ।।९८।।
ततस्ते सम्यगुत्तीर्णा अपश्यन्तो रुषान्विताः ।
चक्रिरे शपथान् विप्राः परस्परमनुव्रताः ।।९९।।
ततस्ते सर्व एवैत्य[९६] श्वसखं मुनिसत्तमाः[९७] ।
अब्रुवन् त्वयि शंका नो[९८] ब्रूहि येन विमुच्यसे[९९] ।।१००।।

श्वसख उवाच

यो वो[१००] हरति मूलानि पुष्पाणि च फलानि च ।
स सुखी मिष्टमश्नातु[१०१] ससुहृत् सपरिग्रहः ।।१०१।।

सनत्कुमार उवाच

ततस्ते ऋषयो व्यास ऊचुः सर्वे पुरन्दरम् ।
त्वया गृहीतं द्रव्यं नस्तत् प्रयच्छस्व[१०२] नः पुनः ।।१०२।।
तेषां स भगवान् व्यास मूलानि च फलानि च ।
सर्वाण्येवाददत् प्रीत इदं चोवाच तानृषीन् ।।१०३।।

इन्द्र उवाच

इयं कृत्या हता विप्रा युष्मदर्थे पुरा कृता ।
मया हितार्थं युष्माकं त्रिदण्डेन तपोधनाः ।
क्रुद्धेन राज्ञा युष्माकं कृतैषा तृणबिन्दुना ।।१०४।।

सनत्कुमार उवाच

तामागम्य[१०३] ततो[१०४] देवा ऋषयश्च तपोधनाः ।
विष्णुं तं स्नपयाञ्चक्रुस्तीर्थे ऋषिगणार्च्चिते[१०५] ।।१०५।।

---

९५ शक्रेणोज्जिजीवित ... (?) । ९६ एवेत्य - क. । ९७ ऋषिसत्तमाः - क. । ९८ नौ - ख. ।
९९ विमुच्यते - ख. । १०० वा - क. । १०१ मृष्टमश्नातु - क. ख. । १०२ न्नो प्रयच्छश्व हि - क. ख.।
१०३ तमागम्य - क. ख. । १०४ तदा - क. । १०५ ऋषिगणान्विते - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

 CC0. In Public Domain. Digitization by eGangotri

ततस्ते हिमवच्छैलं समागम्य मुदान्विताः ।
अयाजययन्[१०६] तदा विष्णुमश्वमेधेन सुव्रताः ।
तस्मिन् यजति देवेशस्त्र्यम्बकः[१०७] सगणेश्वरः ।
यज्ञं प्रति मुदा युक्त आजगाम विहायसा ।।१०७।।

व्यास उवाच

अहो वत त्वयेदं मे कथितं ब्रह्मणः सुत ।
यातुधान्या उपाख्यानं परं गुह्यं सुदुर्विदम् ।।१०८।।
इदं[१०८] हि गुह्यं परमं महार्थवत्[१०९] सदा यशस्यं परमं च पावनम् ।
त्वया[११०] महायोग यथावदीरितं पुरामृतं पूर्णशशिप्रभं यथा ।।१०९।।

⊙ इति स्कन्दपुराणे वामनतीर्थयात्रायां यातुधान्युपाख्याने ऊनविंशोत्तर-शततमोध्यायः[१११] ⊙

व्यास उवाच

अतः परं स भगवान् यथागात्परमेश्वरः ।
यज्ञेन यजमानं तं समीक्ष्य[१] कथयस्व नः ।।१।।

सनत्कुमार उवाच

स तु शूलधरो देवो भगवान् गोवृषध्वजः ।
कृष्णाष्टम्यामुवाचेदं देवीं हिमवतः सुताम् ।।२।।
देव्यद्य सुभगे लोके कृष्णपक्षाष्टमी[२] शुभा ।
रजन्यामद्य यास्याव श्मशानान्यभिवीक्षितुम् ।।३।।

देव्युवाच

यथा ते रोचते देव तथा भवतु लोकप ।
तवेष्टं यन्महादेव ममापि द्विगुणं हि तत्[३] ।।४।।

---

१०६ याजयन्त - क., याजयन्तं - ख. । १०७ देवेशे त्र्यम्बकः - क. । १०८ इमं - क. ख. ।
१०९ महार्थं - क. ख. । ११० मया - क. । १११ आध्यायः १७२ - ख. ।
१ संवीक्ष्य - घ. । २ कृष्णी पक्षाष्टमी - ख. । ३ हितम् - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ तस्मिन्दिने व्यास उज्जयिन्यां[४] महामुने ।
ब्राह्मणस्य सुतो बालः शुचिर्विद्वान्ममार ह[५] ॥५॥
तं तेभिसंस्कृत्य तदा अलंकृत्य यथा[६] विधि ।
क्रोशन्तश्च रुदन्तश्च श्मशानायैव निन्यिरे ॥६॥
ते श्मशानं तदा नीत्वा[७] बालं तं रक्तगादकम् ।
स्नेहाद् दुःखपरीताश्च[८] रुरुदुर्बहुधा भृशम् ॥७॥
तथा तान् रुदतो वीक्ष्य क्रुद्धो गृध्रः क्षुधान्वितः ।
प्राज्ञवत् स तु संदिश्य[९] तानुवाच द्विजाँस्तदा ॥८।
विप्राः श्रृणुत मे वाक्यं मानुषा[१०] यद्वदामि वः ।
बुद्धिहीनाः स्थ सुव्यक्तं निशामयत मद्वचः[११] ॥९॥
मृत एष[१२] हि कालेन किं शोचथ[१३] यथाबुधाः ।
रुदितो नैष जीवेत[१४] स्वार्थं कुरुत विज्वराः ॥१०॥

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा तदा त्यक्त्वा सुतं ययुः ।
मुहुर्मुहुर्निरीक्षन्त अथ तान्[१५] जम्बुकोब्रवीत् ॥११॥
अहो धिङ मानुषाः सर्वे वीक्षध्वं बुद्धिवर्जिताः ।
निःस्नेहाश्चा[१६] कृतज्ञाश्च त्यक्त्वैनं याथ[१७] वै कथम् ॥१२॥
दुःखेन लभ्यते पुत्रस्तथा चैव प्रसूयते ।
दुःखेन च पुनः क्रूरा वर्द्धते[१८] व्याध्युपद्रुतः ॥१३॥
विस्मृतानि हि वस्तानि चाटूनि सुबहूनि वै ।
अकरोद्यान्ययं बाल अहो निःस्नेहता हि वः[१९] ॥१४॥

सनत्कुमार उवाच

ततस्ते जम्बुकवचः श्रुत्वा व्यास समागताः ।
परिवार्य रुदन्तश्च तस्थुः पितृवने तदा ॥१५॥

---

४ उज्जयन्यां - क. । ५ ...न्मनोरहः (हरः?, - क. । ६ तदा - क. । ७ गत्वा - क. ख. । ८ ...स्ते - ख. ।
९ संदृश्ग - क., संविशय - ख., संचित्य - घ. । १० यत्नेन - घ. । ११ किमर्थं रुद्यते भृशं - घ. । १२ एव - क. ।
१३ शोचतं - ख. । १४ भविता न सजीवोयं - घ. । १५ अथैतान् - ख., तथैतान् - क. । १६ श्च - क. ।
१७ यात - क. ख. । १८ वध्यते - क. । १९ निःस्पृहतामिव - क., .. नि च - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथागान्निशि देवेशः कपर्दी प्रियया सह ।
गणैः सर्वैर्वृतो देवः सह नन्दीश्वरेण च ॥१६॥
स तानीशः समभ्येत्य सर्वभूतसुखावहः ।
वरदोस्मीति तांस्तत्र रुदतः प्रत्युवाच ह ॥१७॥

सनत्कुमार उवाच

ततस्ते दीनया वाचा वाष्पपर्याकुलेक्षणाः ।
ऊचुर्जीवः सुतो नोयं भवेद्देवाज्ञया तव ॥१८॥
तेषां स भगवांस्तत्र जीवयित्वा सुतं शिशुम्[२०] ।
गणेशत्वं ददौ दिव्यं वासं तत्रैव चाक्षयम् ॥१९॥

सनत्कुमार उवाच

एवं स तां निशां प्राप्य[२१] श्मशानानि यथाविधि ।
गत्वा[२२] जगाम वैदूर्यकूटं हिमवतः शुभम् ॥२०॥
स दीप्ततेजा विभुरव्ययात्मा पिनाकधृक् पर्वतकूटवासी ।
उवाच तान् यज्ञवरेण दीक्षितान् वरं वृणीध्वं त्रिदिवैकसंश्रयाः[२३] ॥२१॥

⊙ इति स्कन्दपुराणे विंशोत्तरशततमोध्यायः ⊙

सनत्कुमार उवाच

तेथ[१] दृष्ट्वा महादेवं सप्तलोकैकबान्धवम् ।
ऊचुःप्राञ्जलयः सर्वे जानुभ्यां शिरसा नताः[२] ॥१॥
भगवँल्लोककामेन हरिणा देवसत्तम ।
कृतः प्रतिग्रहः पूर्वं येन पाप्मा तमच्छर्त[३] ॥२॥
तदस्य जगतो नाथ भक्तस्य प्रणतस्य च ।
अस्माभिर्याच्यमानस्त्वं कुरु श्रेयः[४] सुरेश्वरः ॥३॥
समाप्यतामयं यज्ञः पाप्मना मुच्यतां हरिः ।
स्वामूर्जां प्रतिपद्यन्तां[५] देवाः सर्वे सवासवाः ॥४॥

---

२० शिशुं सुतम् - ख । २१ शतानि संप्राप्य - क, स तानि संप्राप्य - (?) । २२ तत्त्वं - ख., ततो (?) । २३ त्रिदिवौकसंश्रयाः - क. ख., ... संश्रयादिति - ख. ।

१ ते तं - घ. । २ च शिरोनताः - क. ख. । ३ पाप्मानमच्छर्त - क. ख. । ४ श्रेष्ठाः - ख. । ५ प्रतिपद्यन्तु - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

तेषां तद्वचनं श्रुत्वा भगवान् हृषिताननः ।
समाप्य यज्ञं शूलेन गिरिं तं समदारयत् ॥५॥
तस्माद् भेदात्ततो ह्यापः सुधाशंखेन्दुपाण्डराः ।
निःसृतास्तत्र ते[६] विष्णुं स्नपयाञ्चक्रिरे तदा ॥६॥
तस्याथ स्नातमात्रस्य शरीरादभिनिःसृता ।
पाप्मासुरी महाघोरा विकृता विकृतानना ॥७॥
देवानभिद्रुता हन्तुं निरुद्धा देवबन्धुना ।
- - - - - - - - - - - - - - - - - - ।
उवाच तां न हन्तव्या देवाः सर्वे सवासवाः ॥८॥
इहैव च तव स्थानं भविष्यति सुपूजितम् ।
पुण्या च[७] सर्वतीर्थेभ्यः सर्वपातकनाशनी[८] ॥९॥
सप्त पूर्वान् पराँश्चैव तारयिष्यसि[९] नित्यशः ।
संध्येति जगति ख्याता सर्वतीर्थवरा शुभा ॥१०॥
वारिधारा शुभा दिव्या सर्वयज्ञफलप्रदा ।
त्वामुपास्य[१०] कुलान् सप्त[११] तारयिष्यन्ति मानवाः ॥११॥

सनत्कुमार उवाच

ततस्ते दैवताः[१२] सर्वे रुद्रस्य वचनात्तदा[१३] ।
अर्चयित्वा यथान्यायं देवदेवमुमापतिम् ॥१२॥
देवस्यायतनं कृत्वा जग्मुस्त्रिदिवमेव च[१४] ।
गतेषु देवसंघेषु शिवकूटे[१५] तदा हरिः ॥१३॥
अश्वमेधं तदा यष्ट्वा देवमाराधयत् स्थितः ।
तस्याथ वर्षैः षड्भिस्तु सहस्रेण च तन्यतः ।
मासैः षड्भिश्च देवेशस्तुतोष वृषभध्वजः ॥१४॥
सोमः सनन्दिः सगण इदं प्रोवाच तं पुनः ।
हृष्यमाणः सुतुष्टात्मा[१६] ब्रूहि किं प्रददानि ते ॥१५॥

---

६ तं - क. ख. घ. । ७ पुण्यं च - ख । ८ ... नाशना - क. । ९ तारयिष्यति - ख । १० तामुपास्य - क. ।
११ सप्तकुलं (?), कुलान्युपास्य त्वां सप्त (?) । १२ देवताः - क ख. । १३ वचनन्तदा - क. ।
१४ ह् - ख. । १५ शिवकूटं - क. ख. - । १६ सुहृष्टात्मा - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विष्णुरुवाच

भगवन् पाप्मना[17] वापि तपसा वापि लोकप ।
लोपो न मे यथा स्याद्वै तन्ममाचक्ष्व कालहन् ॥१६॥

सनत्कुमार उवाच

ततः प्रहस्य देवेशः प्रीयमाणः प्रजापतिः ।
उवाच विष्णुमामन्त्र्य गुह्यं चर महाव्रतम् ॥१७॥
स चाथ[18] कृतरक्षरतं[19] सर्वधर्मविहं शुभम् ।
योगं यन्त्रं व्रतं चैव परमैश्वर्यसाधनम्[20] ॥१८॥
यत्तत्पाशुपतं दिव्यं विधानं सार्वकामिकम् ।
तच्चीर्त्वा द्वादश समाः परमैश्वर्यमाप्तवान् ॥१९॥
तस्य देवः स्वयं शूली तुष्टः प्रेक्ष्य तथाविधम् ।
शरीरार्धं ददौ तस्मै[21] तदभूद्विष्णुशङ्करम् ॥२०॥
य इमं शृणुयान्मर्त्यः सदा पर्वसु पर्वसु ।
अर्चयेच्छिववविष्णुं च स गच्छेत् परमां गतिम्[22] ॥२१॥
एवं स विष्णु[23] र्जित्वा तु वामनः सुमहाबलः[24] ।
त्रैलोक्यं सर्वदेवेभ्यः सर्वं[25] प्रति समर्पयत्[26] ॥२२॥

सनत्कुमार उवाच

ततो देवैः समाक्रान्ते त्रैलोक्ये मुनिपुङ्गव ।
येसुरा हतशेषास्तु ते समाश्रित्य दानवौ ॥२३॥
तारकं च मयं चैव चक्रुर्युद्धं सहामरैः[27] ।
मयश्च तारकश्चैव पुत्रपौत्रसमावृतौ ॥२४॥
विप्रचित्तिश्च दनुजो[28] ये च तस्य सुताः स्मृताः ।
निवातकवचाः सर्वे पौलोमाः कालकासुताः ।
सैंहिकेयाश्च विक्रान्ता बालेयश्च[29] तथा[30] गणः ॥२५॥

---

१७ कर्मणा - क. । १८ पश्चार्थं - क । १९ रक्षन्तं - क. । २० ...साधकम् - ख. । २१ ददावस्मै - क. । २२ अत्राध्यायसमाप्तिपुष्पिका घ.पुस्तके । २३ एवञ्जित्वा - ख । २४ वामनश्च महाबलः - क. ख., महाबलं - ख., एवं विष्णुः स जित्वा तु वामनत्वे महाबलः - घ । २५ सर्वान् - क. । २६ प्रतिसमर्पणं . - ख. । २७ महामुनैः (ने?) - ख. । २८ ... स्तदनुजो - घ. । २९ जाने यश्च - ख. । ३० यथा - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एते चान्ये च बहवो दानवा बलदर्पिताः ।
सन्नद्धाः समभिक्रुद्धा आह्वयन्त तदा सुरान् ॥२६॥
संप्रेक्ष्य तानाह्वयतो[३१] देवा अपि सुदंशिताः ।
तैस्सहैत्य तदा चक्रुः समरं समरैषिणः[३२] ॥२७॥
तेषां तदभवद् युद्धं तुमुलं लोमहर्षणम् ।
वर्षाणान्तु [३३] शतान्यष्टौ सहस्राणि च षोडश ॥२८॥
दिव्यानि न च संग्रामे[३४] एकपक्षे[३५] जयोभवत् ।
अथ देवास्तदा[३६] युद्धे सैंहिकेयैर्दुरासदैः ॥२९॥
पराजिता महासत्वाः सिंहैः पशुगणा इव ।
तेषां तद्बलमालक्ष्य सहस्राक्षः पुरन्दरः ॥३०॥
जगाम देवदेवेशं शरणं रुद्रमव्ययम् ।
स गत्वा स्वर्णचूडस्य[३७] गिरेः शृङ्गे कृतालयम् ॥३१॥
देव्या सह महादेवमपश्यद् गणसंवृतम् ।
दीप्यमानं यथा वह्निं दुर्दृश्य[३८]मकृतात्मभिः ॥३२॥
तमसौ नन्दिना पूर्वमाख्यातो[३९] देवसत्तमः[४०] ।
दृष्ट्वा प्रणम्य शिरसा इदं वचनमूचिवान् ॥३३॥
देव वर्षशतान्यष्टौ सहस्राणि च षोडश ।
दिव्यानि समतीतानि संग्रामस्य दिवौकसाम् ॥३४॥
तारकश्च मयश्चैव दानवौ युद्धदुर्मदौ ।
तावाश्रित्यासुराः[४१]सर्वे देवान् घ्नन्ति यथा पशून्[४२] ॥३५॥
तेषां तु वध्यमानानां देवानां देवसत्तम ।
जीवितं संप्रयच्छस्व यथा वा देव युज्यते ॥३६॥

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा भगवान् गोवृषध्वजः ।
चिन्तयित्वा ततस्तत्र रामरासेत्यथाब्रवीत् ॥३७॥

---

३१ तानाह्वयतः संप्रेक्ष्य - क. । ३२ दिव्यमाने च संग्रामे नैकपक्ष ... - घ. । ३३ वर्षाणाञ्च - ख. । ३४ ततो दैत्या - घ. । ३५ एकपक्षो - क. । ३६ स्मदा - ख । ३७ गत्वा सुवर्णचूडस्य - क. । ३८ दुर्दर्शं (?) । ३९ ..., माख्यातं (?) । ४० देवसत्तमं (?) । ४१ तावाश्रित्वासुराः - क. । ४२ ...पशुम् - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

भगवानुवाच

राम राम महाबाहो चीर्णं ते सुमहत्तपः ।
गच्छ देवान् सुयुद्धेन कुरु सर्वान् गतज्वरान्[४३] ॥३८॥

सनत्कुमार उवाच

एवमुक्तस्तदा रामो जामदग्न्यः प्रतापवान् ।
उवाच दीनया वाचा प्रणम्य बहुमानतः ॥३९॥

राम उवाच[४४]

भगवन्नल्पवीर्योस्मि तपसा कर्षितो भृशम् ।
अनस्त्रविच्च देवेश न शक्ष्ये संयुगं[४५] विभो ॥४०॥

देववव उवाच

गच्छ शक्ष्यसि विप्राद्य योद्धुं त्वं त्वद्य मा शुचः ।
अहं त्वाप्याययिष्यामि मा व्यथां[४६] कुरु भार्गव ॥४१॥

सनत्कुमार उवाच

ततः स भगवानिन्द्रं प्राह देवपतिं हरः ।
एष हंस्यति ते शत्रून् रथमस्मै प्रयच्छ च[४७] ॥४२॥

सनत्कुमार उवाच

ततः प्रणम्य शक्रोपि राममादाय चैव ह ।
जगाम तं तदोद्देशं[४८] संग्रामो यत्र सोभवत् ॥४३॥
ततः स रथमुख्येन संपाद्य तु पुरन्दरः ।
राममाह स्वयं शक्रः सैंहिकेयानुपाह्वय ॥४४॥
स तेन रथमुख्येन रामः प्रहरतां वरः ।
कवची बद्धतूणीरः शरी खड्गी शरासनी ॥४५॥
बद्धगोधांगुलित्रश्च बद्धध्वजपताकवान्[४८] ।
अभिदुद्राव वेगेन सैंहिकेयान् दुरासदान् ॥४६॥

---

४३ कुरुष्वोद्धारितज्वरान् - ख. । ४४ स.न. उ. - क. । ४५ नक्ष्ये संयुगतां - क. । ४६ मान्यथां - क. ।
४७ प्रधत्स्व च - ख., प्रयच्छत - क. । ४८ ततो देशं - ख. । ४९ बद्धध्वजपताकवान् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तेषां तस्य च संग्रामः सुघोरस्समपद्यत ।
शार्दूलानां यथारण्ये सिंहेन सह भीषणः ॥४७॥
तत्राद्भुतमपश्यन्त[५०] सिद्धगन्धर्वचारणाः ।
येदेकोपि तदा रङ्गे दृश्यतेनेकरूपवान्[५१] ॥४८॥
नाददानः शराँश्चित्रान् सन्दधानस्तथैव च ।
धनुर्विकर्षमाणो[५२] वा दृश्यते भार्गवस्तदा ॥४९॥
मण्डलीकृतमेवास्य कार्मुकं सुमहत्तदा ।
दृश्यते शत्रुभिश्चैव दुर्निरीक्ष्यश्च सोभवत् ॥५०॥
तेषां स भार्गवः क्रुद्धः परावृत्य महाबलः ।
चिक्षेपैकैकशो व्यास मुखे तीक्ष्णाञ्छरान् दश ॥५१॥
तत्राद्भुतमपश्यन्त लाघवं तस्य धीमतः ।
साधु साध्विति भूतानां तत्र शब्दो महानभूत् ॥५२॥

सनत्कुमार उवाच

तैः शरैर्भिन्नवदनाः सैंहिकेया महाबलाः ।
सगन्धा[५३] निपतन्त्युर्व्यां ताला वाय्वाहता इव ॥५३॥
स तदा[५४] दशसाहस्रस्तेषां वै देवविद्विषाम्[५५] ।
भार्गवेण गणो दग्धः कालेनेव[५६] यथा जगत्[५७] ॥५४॥
ततो देवाः सऋषयो गन्धर्वाश्च सचारणाः ।
साधु साध्विति तं प्रोच्य[५८] तुष्टुवुर्हर्षिताननाः ॥५५॥

सनत्कुमार उवाच

तस्य तत्कर्म संवीक्ष्य भगवान् पाकशासनः ।
बहुमामेन संपूज्य भार्गवं सह दैवतैः[५९] ॥५६॥
इदमाह महातेजाः परिष्वज्य[६०] पुनः पुनः ।
तवैतत्कर्म नान्यस्य[६१] सदृशं दिवि विद्यते ॥५७॥

---

५० तत्रार्पितमपश्यन्त - क. । ५१ केन रूपवान् - ख. । ५२ धनुर्विदार्यमाणो - ख. । ५३ स गत्वा(र्वा) - क.ख.।
५४ तथा - ख. । ५५ देवतारिणाम् - क. ख. । ५६ कालेनैव - क. ख. । ५७ गजम् - क. ।
५८ संप्रोच्य - क. । ५९ ...देवतैः - क. । ६० परिपूज्य - क. । ६१ वान्यस्य - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यदि ते सिंहिकापुत्राः सहसैव हतास्त्वया ।
तव वैतन् महत्कर्म[६२] त्रिपुरे त्र्यम्बकस्य वा ।
न त्वयास्ति समो लोके सत्यमेतद् ब्रवीम्यहम् ॥५८॥
एते न तुल्या देवेन मानुषेण न केनचित् ।
अवध्याः सर्वभूतानां त्वयैकेन निषूदिताः[६३] ॥५९॥
तस्मात्तव वयं तुष्टाः प्रयच्छामो ह्यवध्यताम् ।
अक्षयं च बलं युद्धे यशश्च परमं भुवि ॥६०॥
त्र्यम्बकश्च वरैर्दिव्यै[६४]रिष्टैस्त्वां प्रतिपत्स्यते ।
यथाकामश्च युद्धेषु समूहं त्वं विजेष्यसि[६५] ॥६१॥

सनत्कुमार उवाच

स एवमुक्तस्तैर्व्यास देवैस्तुष्टैर्महातपाः ।
जगाम त्र्यम्बकं देवं हृष्टतुष्टमना यतिः ॥६२॥
देवा अपि सुसंयत्तास्तारकं युद्धदुर्मदम् ।
अवाकिरन्त वेगेन मयेन सहितं तदा ॥६३॥
ते दैत्यवेगप्रतिरुद्धवेगा महाबलाः सिन्धुसमानवेगाः ।
जघ्नुर्भृशं दैत्यगणान्निपत्य सिंहा यथारण्यचरा मतङ्गान्[६६] ॥६४॥

⊙ इति स्कन्दपुराणे जामदग्न्यवरप्रदानो नाम एकविंशोत्तरशततमोध्यायः ⊙

सनत्कुमार उवाच

सैंहिकेयवधं दृष्ट्वा सुराणां च जयं तथा ।
सहसा दैत्यसैन्यानि प्रभग्नानि समन्ततः ॥१॥
- ।
- ।
अन्येन प्रच्युतस्तारो[१] मयो वीरो विरोचनः ॥२॥

६२ तवै वैतद्भवेत्कर्म... - ख., बद्धवै ... - ख. । ६३ निसूदिताः - ख. । ६४ शरैर्दिव्यै - क. ।
६५ विजहि (यि?) ष्यसि - क., विजयिष्यसि - ख. । ६६ ...न्मतङ्गान् - क. ।
१ प्रश्रुतस्तारो - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विप्रचित्तिश्च षण्डश्च प्रह्लादश्च महासुरः ।
कालनेमिस्ततः क्रुद्धः केशवं प्रति संयुगे ॥३॥
सरथं महदास्थाय शतनल्वोर्ध्वकेतुमत् ।
अभिदुद्राव वेगेन केशवं प्रति दानवः ॥४॥
तस्यापतत एवाथ चक्रमप्रतिघं महत् ।
ससर्ज केशवो व्यास स तद् व्यष्टम्भयत्तदा ॥५॥
तद् विष्टब्धं तदालक्ष्य सर्वे देवाः प्रमन्यवः ।
पराजिता[2] बभूर्बुहि[3] विशस्त्राः कालनेमिना ॥६॥
- - - - - - - - - - - - - - - - - ।
स तान्विद्राव्य दैत्येन्द्रो विमुखान् प्रचकार ह ।
कृत्वा चकार च तदा लोकपालत्वमव्ययः ॥७॥
भुवं द्याञ्च तदा व्याप्य वर्तमानो महाबलः ।
स्वयम्भू[4]रिव लोकाँस्त्रीनचरल्लोकमायया ॥८॥

सनत्कुमार उवाच

तं तथावस्थितं दृष्ट्वा दैत्यं देवाः सवासवाः ।
भयत्रस्तास्तदा जग्मुः शरणं हरिमव्ययम् ॥९॥
शरण्यः सच देवेशो हरिस्त्रैलोक्यबान्धवः ।
तेषां प्रादाद् भयत्राणं दानवस्य वधेप्सया ॥१०॥
स तदा द्यां भुवञ्चैव व्याप्य रूपेण सर्वशः ।
चक्रं तदब्जं सस्मार यत्तद् रुद्रेण निर्मितम् ॥११॥
ततस्तेन तदा व्यास दानवस्य शिरो महत् ।
जहार पक्वं तालाग्रात्[5] फलं वायुरिवोद्धतः ॥१२॥
तस्मिन् विनिहते दैत्ये तारकश्च मयश्च ह ।
विनिवृत्तौ महायोधौ पातालं प्रतिवेगितौ[6] ॥१३॥

सनत्कुमार उवाच

एवं व्यासाभवद्युद्धमुग्रं तत्तारकामयम् ।
कालनेमिर्हतो[7] यत्र विश्रुतश्च विरोचनः ॥१४॥

---

२ पलायिता (?) । ३ बभूव ते (स्ते) - ख. । ४ स्वयम्भुरिव - क. ख. । ५ तालाग्र्यात् - क. ख. ।
६ वेशितौ - क. । ७ जलनेमिर्हतो - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सैंहिकेयाश्च विक्रान्तास्तुहुण्डश्च महासुरः ।
सुरोचनः[८] शतावर्तो हालो गार्ग्यशिरास्तथा ।।१५।।
विपाकः सह पाकेन चण्डः कार्तस्वनः कुभः ।
एते चान्ये च दैत्येन्द्रा निहतास्तारकामये ।
ध्वजे पुनर्हतः क्रूरो विप्रचित्तिः सहानुजः ।।१६।।

व्यास उवाच

कथं तदभवद्युद्धं[९] देवानामसुरैः सह ।
कथञ्च ध्वज इत्येवं[१०] तस्य नाम बभूव ह ।।१७।।
जामदग्न्यश्च तत्कर्म कृत्वा भृगुकुलोद्वहः ।
दुष्करं सर्वभूतानामागत[११]स्त्र्यम्बकान्तिकम् ।
किमुक्तो देवदेवेन एतदिच्छामि वेदितुम् ।।१८।।

सनत्कुमार उवाच

जमदग्नेस्तदा[१२]सूनुरमरैः प्रेषितः स्वयम् ।
जगाम गुह्यं देवस्य पुरिश्चन्द्रं निवेशनम् ।।१९।।

व्यास उवाच

कथं तदभवद्दिव्यं पुरिश्चन्द्रं निवेशनम् ।
स्थानं गुह्यं महेशस्य कथयस्व दृढव्रत ।।२०।।

सनत्कुमार उवाच

अत्र[१३] ते संप्रवक्ष्यामि पुरावृत्तं महामते ।
यच्छ्रुत्वा पापकर्मापि गच्छेत परमां गतिम् ।।२१।।
पुराभूतां महात्मानौ नरनारायणावृषी ।
ताभ्यां कार्येण देवानां ब्रह्मवध्या कृता किल ।।२२।।
तयाभिभूतौ तौ देवौ पाप्मयातिमहाबलौ ।
अभूतान्नष्टसंज्ञौ तौ तिर्यग्योनिगतौ भृशम् ।।२३।।
अथ संवत्सरे दिव्ये समतीतेमितात्मवान् ।
आगाद् ब्रह्मा स्वयं तत्र दैवतैर्ऋषिभिः[१४] सह ।।२४।।

---

८ प्ररोचनः - ख., मुरोवलः (?) । ९ समभवद्युद्धं - क. ख. । १० इत्येव - क. ख. । ११ ...मामन्त्र्य - क. ।
१२ जमदग्निस्तदा - क । १३ इत्त (?) । १४ देवतैर्ऋषिभिः - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स तं संबोधयामास सनरं देवपस्तदा ।
तथापि हि न तौ बुद्धौ कर्मणा संवृतौ भृशम् ॥२५॥
तान् ब्रह्मा स तदा प्राह सर्वानेव दिवौकसः ।
यूयं नारायणस्यार्थे चरध्वं धर्ममुत्तमम्[१५] ॥२६॥
ततो विमोक्ष्यते देवः[१६] सनरो ब्रह्मवध्यया ।
तमेवंवादिनं देवाः प्रणम्य शिरसा तदा ।
ऊचुः प्राञ्जलयः सर्वे किन्तपः कर्म शाधि नः ॥२७॥

ब्रह्मोवाच

जपध्वं प्रयताः सर्वे वायुभक्षा जितेन्द्रियाः ।
रुद्राणां हृदयं सम्यक् ततो योगमवाप्स्यथ ॥२८॥

सनत्कुमार उवाच

त एवमस्त्विति प्रोच्य जजपुः सलिलेशयाः ।
ऋषिभिस्सह देवेशा वर्षायुतशतानि षट् ॥२९॥
अथ कालेन महता तेषां युक्तात्मनां तदा ।
योगः[१७] प्रादुरभूत्[१८] सूक्ष्मो[१९] यतोग्निरभवच्छुभः ॥३०॥
तेनाग्निना ब्रह्मवध्या नरनारायणौ तदा ।
सा[२०] दग्धा संपरित्यज्य उदकं प्रविवेश ह ॥३१॥
नास्तयापः[२१] समाविष्टा रसवत्यो न जज्ञिरे ।
अगन्धाश्च विवर्णाश्च प्रभावत्यो न चैव ह ।
पृथिवी चाल्पवीर्याभूत्तेजस्तिग्मं च नाभवत् ॥३२॥

सनत्कुमार उवाच

ततस्ते तन्तथा[२२] दृष्ट्वा युयुजुर्भूय एव च ।
हृदयं जजपुश्चैव रुद्राणां युक्तमानसाः ॥३३॥
अथागाद् भगवान्देवः शूलपाणिर्वृषध्वजः ।
उवाच देवान् तुष्टोस्मि ब्रूत यद्वोभिकांक्षितम्[२३] ॥३४॥

---

१५ तप उत्तमम् (?), व्रतमुत्तमं (?) । १६ देवाः - क. ख. । १७ योगं - क. ख । १८ प्रादुर्बभौ - क. ख.।
१९ सूक्ष्मं - क. ख. । २० स - क. ! २१ तास्तदापः - ख. । २२ तत्तथा - (?) । २३ वाञ्छितं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

ततस्ता देवताः सम्यग् रुद्रं दृष्ट्वाभिरेमिरे[२४] ।
तुष्टुवुश्चानता भूत्वा यज्ञजीमूतवाहनम् ॥३५॥

देवा ऊचुः

नमः परमदेवाय युगान्तानलवर्चसे ।
सलिने तप्यमानाय रुद्राणां हृदयाय च ॥३६॥
महापरशुहस्ताय हिरण्यायतनाय[२५] च ।
वसूनां पतये चैव देवानां पतये नमः ॥३७॥
शुचये रेरिहाणाय सद्योजाताय मन्यवे ।
ग्रहाणां पतये चैव ग्रहाणां हृदयाय च ॥३८॥
महाग्रहानुयाताय ग्रहराजाय वै नमः ।
नमः शमदमोग्राय उग्रदण्डधराय च ॥३९॥
यमाय यमनाथाय यमदण्डधराय च ।
नमः परमदेवाय पराणां परमाय च ॥४०॥
महतां पतये चैव कमण्डलुधराय च ।
वामदेवाय ज्येष्ठाय पशूनां पतये नमः ॥४१॥
प्रधानपतये चैव प्रधानस्य प्रवर्तिने ।
नमः सहस्रवक्त्राय गदिने शूलिने नमः ॥४२॥
नमः पवनरूपाय बहुरूपाय वेधसे[२६] ।
नमः क्रतुविहन्त्रे[२७] च कामानलविघातिने ॥४३॥
नमश्छन्दोङ्गरूपाय विरूपनयनाय च ।
इन्द्रियग्रामघाताय नमो वेदान्तगाय[२८] च ॥४४॥
नमोस्त्वशनिघाताय मनसामुन्मनाय च ।
वेदवेदाङ्गमालाय नमस्ते पद्ममालिने ॥४५॥

---

२४ धिनेमिरे - क. । २५ हिरण्यानयाय - क, हिरण्यनयनाय (?) । २६ वेध्रये - ख. । २७ क्रतु-(त्व) हन्त्रे - ख. । २८ वेदान्तकाय - क., वेदान्तताय - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नमः शैलप्रदाहाय[२९] शैलजातोद्भवाय च ।
महते विश्वरूपाय महद्भिर्महिताय च ॥४६॥
सहस्रशतनेत्राय ललाटनयनाय च ।
महायोगप्रणेत्रे च तथा तत्पुरुषाय च ॥४७॥
नमो वेदरहस्याय देववेदस्तुताय[३०] च ।
योगिने ध्यायमानाय अशनीपातहासिने ॥४८॥
हृच्छयाय नमस्तेस्तु नमः सर्वगताय च ।
कुमारवरनाथाय कुमारजनकाय च ॥४९॥
दण्डहस्ताय चरते अन्तकायाजिताय च ।
शुभाय शुभरूपाय शुभसर्वप्रवर्तिने ॥५०॥
शिवाय शिवनाथाय सदा सर्वशिवाय च ।
धनुर्वेदरहस्याय धनुर्वेदप्रवर्तिने ॥५१॥
सर्वपापापहन्त्रे[३१] च सर्वपाप्मविघातिने[३२] ।
शिवः सौम्यश्च देवेश दिश नो यन्मनोगतम् ॥५२॥
यदपव्याहृतं किञ्चिदस्माभिर्भगवन्[३३] विभो ।
तत्सर्वं[३४] भक्तवात्सल्यादस्माकं क्षन्तुमर्हसि ॥५३॥
पाप्मयाभिपरीतात्मा देवबन्धुरयं विभो[३५] ।
नरेण सह देवेश[३६] स भवेच्चन्द्रनिर्मलः ॥५४॥

सनत्कुमार उवाच

य इमं त्र्यम्बकस्तोत्रं भक्तिमान् सततं नरः ।
पठति प्रयतो[३७] व्यास पाप्मया[३८] स विमुच्यते ॥५५॥
सर्वपापैश्च मुच्येत नष्टश्च लभते पुनः ।
न च दुर्गतिमाप्नोति यदि स्याद्वै सुपापकृत् ॥५६॥

सनत्कुमार उवाच

एवं स भगवान् देवैः स्तुतस्तुष्टश्च लोकपः ।
उवाच देवान्देवेशः[३९] सर्वान् सत्यवतीसुत ॥५७॥

---

२९ .. प्रवाहाय - क. ख. । ३० देवदेवस्तुताय - क. ३१ सर्वपापप्रहर्त्रे - ख. । ३२सर्वपाप्माविघातिने - ख. । ३३ भगवान् - क. । ३४ तत्सर्वां - क. । ३५ विभुः - क. ख. । ३६ सर्वदेवेश - ख. । ३७ प्रयतः पठते - क. ख. । ३८ पाप्मायाः - ख. । ३९ देवदेवेशः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

देवदेव उवाच

भो देवाः परितुष्टोस्मि वरं वृणुत कांक्षितम् ।
दास्येहं तन्महाप्रज्ञा मा तूष्णीं ब्रूत सर्वशः ॥५८॥

देवा ऊचुः

हरिरेष महादेव पाप्मया हतमानसः[४०] ।
तामस्य[४१] निर्णुद क्षिप्रं नीहारमिव भास्करः ॥५९॥
एष लोकहितार्थाय देवानाञ्च[४२] महाबलः ।
कुरुते कर्म देवेश पाप्मानं ह्यस्य नाशय ॥६०॥
वयं च समतां तुभ्यं[४३] गणतां गणमध्यगाः ।
लभेम सर्वदैवेश[४४] यदि त्वं मन्यसे विभो ॥६१॥

सनत्कुमार उवाच

तेषामेवं तु वदतां देवानामृषिसत्तम[४५] ।
उवाच भगवाञ्छर्वः प्रहसन् प्रीतमानसः ॥६२॥
विष्णुरेष सुराः सद्यो मोक्ष्यते पाप्मयानया[४६] ।
पाप्मा चेयं महाभागा[४७] ऊषरे संभविष्यति ॥६३॥
निर्यासश्चैव वृक्षाणामपां फेनस्तथैव च ।
महोरगाणां गन्धश्च स्त्रीणां निन्दा तथैव च ॥६४॥
दीक्षितस्य च[४८] विप्रस्य अशुभस्यावकीर्तनम् ।
ब्राह्मणानां परीवादो गवामपरिकीर्तनम्[४९] ॥६५॥
अग्नेरज्वलनञ्चैव नदीनां बन्ध एव च ।
य एतानि नरः कुर्याद्रागमोहसमन्वितः
स एतां प्राप्नुयाल्लोके स्वयंभूरपि[५०] लोकपः ॥६६॥
यदा तु वसुदेवस्य सुतो विष्णुर्भविष्यति ।
तदा स रूपिणीमेनां नर एषोपभोक्ष्यते ॥६७॥

---

४० हृतमानसः - क. ख. । ४१ तामस्मै - क. ख. । ४२ देवार्थञ्च - ख. । ४३ तुल्यं - ख. ।
४४ देवेश - क. ख. । ४५ सत्तमाः - ख. । ४६ तया - क. । ४७ महाभाग - क. । ४८ दीक्षितस्तस्य - क. ।
४९ गवाञ्च परिकीर्तितम् - ख. । ५० स्वयम्भुरपि - क. ख., ...रसि - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तत्रोपभुज्य वरदो हरेर्जातां स्वसान्तदा ।
विमुक्तः पाप्मया भूय[५१] इमं लोकं चरिष्यति ।।६८।।
यथा त्वस्य स्वसापीयं नैव[५२] बाधां[५३] करिष्यति ।
तथा चरत्वयं घोरं तपः परमदुश्चरम् ।।६९।।
यूयं च ऋषिभिः सार्धमिहैव सुसमाहिताः ।
पुरश्चरणमव्यग्राः कुरुध्वं मदनुज्ञया ।।७०।।

सनत्कुमार उवाच

त एवमुक्ता देवेन देवास्सर्वे तदा हरिम् ।
ऊचुः कुरु तपो घोरं ततःश्रेयो ह्यवाप्स्यसि ।।७१।।
ततः स चन्द्रं शैलेन्द्रमारुह्य सुसमाहितः ।
तपश्चचार सुमहदिन्द्रियग्रामतापनम् ।।७२।।
देवा अपि महात्मान[५४] ऋषिभिस्सह सुव्रतैः ।
हिरण्यवर्णे शैलेन्द्रे[५५] तपस्तेपुस्समाहिताः ।।७३।।
अथ तेषां समाप्ते तु व्रते तस्मिन् पिनाकधृक् ।
आदिदेश व्रतं दीप्तं यत्तत् पाशुपतं महत् ।।७४।।
उवाच स तु तुष्टात्मा आभाष्य सुरपुंगवान् ।
मेघदुन्दुभिनिर्घोषं धीरम्भीरशब्दवत् ।।७५।।

देवदेव उवाच

पुरश्चरणमेतद्धि सुचीर्णं लोकपाः स्वयम् ।
इदं[५६] पाशुपतं चीर्त्वा निर्वृता यात[५७] निर्भयाः ।।७६।।
एतत् परं पवित्रञ्च सांख्ययोगाधिकं व्रतम् ।
नास्मात्परतरं किञ्चित् सूक्ष्मं वा विद्यते क्वचित् ।।७७।।
भस्मना दिग्धसर्वाङ्गो[५८] दिग्वासाः शुचिरेव च ।
शरीरस्थैर्यजन् रुद्रं[५९] सर्वमुपापैः प्रमुच्यते ।।७८।।

---

५१ भूयो - क. ख. । ५२ नैवा .. - क. ख. । ५३ बाधं - ख. । ५४ महातमानो - क ख. । ५५ हिरण्यवण-शैलेन्द्रे - ख. । ५६ इमं - क. ख. । ५७ यश - ख. । ५८ सर्वदिग्धाङ्गो - क. ख. । ५९ रुद्रं यजत्-शरीरस्थैः (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

आर्द्रस्नानात् परं भस्म आर्द्रं जन्तुवधो ध्रुवम्[६०] ।
आर्द्रन्तु प्रकृतिं विद्यात् प्रकृतिं चापि बन्धनम् ॥७९॥
प्रकृतेस्तु प्रहाणार्थं[६१] भस्मना स्नानमिष्यते ।
दिग्वासस्त्वं च शौचञ्च येन जायेन्न[६२] कर्हिचित् ॥८०॥
यन्त्राणां[६३] परमं यन्त्र[६४]मन्यद्यस्मान्न विद्यते ।
षडङ्गं सर्वकामीयं सर्वलोकनमस्कृतम् ॥८१॥
शुचि सर्वपवित्रं[६५] च सर्वपापापहं शुभम् ।
तपसो वर्धनं चैव ते चरन्तु[६६] समाहिताः[६७] ।
यन्त्रं त्वपापं[६८] विज्ञेयं प्रकृतिस्सा च संस्मृता[६९] ॥८२॥
बन्धश्च त्रिविधः प्रोक्तः सन्यासफलमेव च ।
तस्मात् सर्वप्रहाणार्थं यन्त्रमेतत् समाचरेत् ॥८३ ।
असम्मतः सदा लोके येन जीर्येन्न[७०] कर्हिचित् ।
योगश्च परमं प्राप्य योगानां यत्परं[७१] महत् ॥८४॥
यस्मात्[७२] परतरं नास्ति षडङ्गं सर्वकामिकम् ।
येन मुक्तः पतेद् भूयो न योगी[७३] मरणादिषु ॥८५॥
तं योगं समनुप्राप्य सिद्धो दिव्येन कर्मणा ।
न लिप्यते[७४] महायोगी कर्मभिस्तु कृताकृतैः ॥८६॥

सनत्कुमार उवाच

एवं ते देवदेवेन समाज्ञप्ता दिवौकसः ।
समाप्य तद्व्रतं घोरं शंकरस्य गणा बभुः ॥८७॥
ते गणत्वमनुप्राप्य तस्य देवस्य शूलिनः ।
अन्वगृहणन्त तं देशं तपसा भाविता भृशम् ॥८०॥

देवा ऊचुः

यस्मादिह सुचीर्णं नः पुरश्चरणमन्ततशः[७५] ।
तस्मादिदं[७६] महेशस्य गुह्यमायतनं स्मृतम् ॥८९॥

---

६० ध्रुवः - ख. । ६१ प्रहारार्थं - ख. । ६२ जायेत - ख. । ६३ मन्त्राणां - घ. । ६४ परमं मन्त्र - ख.। ६५ ... स्सर्वपवित्रं - क. ख. । ६६ चरन्तः - क. ख. । ६७ समाहितः - क. । ६८ तु पापं - घ. । ६९ संस्थिता - घ. । ७० जीर्येत - ख. । ७१ परमं - ख. । ७२ तस्मात् - ख. । ७३ नियोगी - ख. । ७४ लिप्येत - ख. । ७५ पुनश्चरणमन्तशः - क. । ७६ ...दिमं - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पुरिश्चन्द्रमिति ख्यातं त्रिषु लोकेषु दीप्तिमत् ।
पञ्चयोजनविस्तीर्णं तावदेवायतं शुभम् ।।९०।।
सिद्धचारणसंकीर्णमप्सरोगणनादितम् ।
बहुपक्षिनिनादश्च नदीप्रस्रवणाकुलम् ।
भविष्यति महापुण्यं तपोधनतपोवनम्[७७] ।।९१।।
योत्रागत्य चरुं कृत्वा भोजयित्वा च[७८] ब्राह्मणम् ।
अर्चयेद्देवदेवेशं रुद्रलोके स मोदते[७९] ।।९२।।
यश्चात्र नियमं कृत्वा भस्मस्नायी यतव्रतः ।
मुहूर्तमपि तिष्ठेत स गच्छेद् गणमध्यताम् ।।९३।।
अक्षयश्चामरश्चैव जरारोगविवर्जितः[८०] ।
रुद्रस्य गणपो भूत्वा योगैश्वर्यमवाप्स्यति ।।९४।।
कामचारी[८१] सुपापात्मा योप्यत्र दिवसं वसेत् ।
सोश्वमेधफलं प्राप्य सर्वपापैः प्रमुच्यते ।।९५।।
सकामोपि दुराचारो योत्र प्रणान् परित्यजेत् ।
सोपि देवसदः[८२] प्राप्य देवैः सह चरिष्यति ।।९६।।

सनत्कुमार उवाच

ततस्ते दैवताः[८३] सर्वे प्राप्य तत्परमं तपः ।
इज्यास्नानं तदा चक्रुरीशस्य परमात्मनः ।।९७।।
अथ ते कृतकृत्याश्च महायोगबलान्विताः ।
हरिं प्रति मनश्चक्रुर्गन्तुं सर्वे दिवौकसः ।।९८।।
तं ज्वलन्तमिवादित्यमागच्छन्तो[८४] महाबलाः ।
हरिश्चन्द्रगिरौ[८५] व्यास हरिं ददृशुरव्ययम् ।।९९।।
सोपि कालेन महता धूतपाप्मा[८६] महातपाः ।
तदैव[८७] लब्ध्वा देवानां समतां मुदितात्मवान् ।।१००।।

---

७७ तपोधनं - ख. । ७८ तु - ख. । ७९ मोदति - क. ख. । ८० मृत्युरोगविवर्जितः - क. ख. ।
८१ कामकारी - क. । ८२ देवसम- - क., सदा - ख. । ८३ देवताः - क. ख. । ८४ गच्छन्तं (?) ।
८५ हरेः - क., हरिश्चचन्द्रे गिरौ - ख. । ८६ धौतपाप्मा - ख. । ८७ तमेव - क ख ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

- - [८८] प्रति तदा वेगादुत्थाय[८९] ऋषिसत्तम[९०] ।
शिखरात् सन्निपत्याशु तेषां मध्येवतिष्ठत[९१] ॥१०१॥
ततस्ते मुदिताः सम्यग्घरिणा सह संगताः ।
शिखरं तद् गिरेस्तस्य फलेन[९२] समयोजयन् ॥१०२॥
यस्माद्धरिरयं[९३] ह्यत्र चन्द्रवन्निर्मलो बभौ ।
तपसा महता चैव तस्मादेषोचलेश्वरः ॥१०३॥
हरिश्चन्द्र इति ख्यातो भविष्यति न संशयः ।
यस्मादप्रकृतेनैव प्रपातोत्र कृतः पुनः ।
तस्माद् भृगुरयं लोके पुण्यो भवतु सर्वशः ॥१०४॥
अत्र[९४] योभ्येत्य देवेशा भृगुप्रपतनं नरः ।
साधयेत स गच्छेत हरेर्लोकमतिप्रभम् ॥१०५॥
महापातकसंयुक्तो व्याधिना समुपद्रुतः ।
योत्र साधयते प्राणान् सोपि मुच्येन्महाभयात् ॥१०६॥
यद्वा प्रार्थयते[९५] नित्यं प्रपाते चात्र[९६] किंचन ।
तत्प्राप्नुयान्नरः सर्वमचिरात्तच्च[९७] वै स्मृतम् ॥१०७॥

सनत्कुमार उवाच

हरिश्चन्द्रमिमं[९८] यस्तु पुरिश्चन्द्रन्तु[९९] धर्मवित् ।
पठेत शृणुयाद्वापि स पाप्मानं विशस्यति ॥१०८॥
इदं तु यः शुचिरनसूयवान्[१००] सदा नरः पठेद् द्विजगणदेवसंसदि ।
स निर्मलो रविरिव तेजसा ज्वलन् त्रिविष्टपे वसति यथामरोवरः[१०१] ॥१०९॥

⊙ इति स्कन्दपुराणे हरिश्चन्द्रगिरिवर्णनो नाम द्वाविंशोत्तरशततमोध्यायः[१०२] ⊙

---

८८ नदात् (? , - ख. । ८९ दुत्थितो - क. ख. । ९० मुनिसत्तम - घ., ऋषिसत्तमः - क. ख. ।
९१ व्यवस्थितः - ख. । ९२ वरेण - घ. । ९३ तस्माद्धरिरयं - क. । ९४ यत्र - क. । ९५ प्रार्थयन्तु - ख. ।
९६ नात्र - क. । ९७ सर्वानचिरात्तच्च - क. ख. । ९८ इदं - क. ख. । ९९ पुरिश्चन्द्रश्च - ख. ।
१०० ...रनुसूयवान् - व., शुचितनु... - ख. । १०१ ...परः(?) ।१०२ १७५ - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

तं पुरिश्चन्द्रमासाद्य[१] स रामः शक्तिनन्द ।
अपश्यत् परमेशानमसुरैः क्लिष्टमानसः ।।१।।
स दृष्टवा तु [२] महादेवं साम्बं सगणमव्ययम् ।
प्रणतः प्राञ्जलिर्भूत्वा तस्थौ प्रह्वस्तदाग्रतः[३] ।।२।।

सनत्कुमार उवाच

सोपि देवस्तदा[४] प्रीतो जामदग्न्यं महामनाः ।
उवाच वचसां योनिरिदं गम्भीरशब्दवत् ।।३।।
किंशुकैरिव संछन्नं चन्दनेनोक्षितं यथा ।
तथा तं क्षतजेनैव सर्वतश्च समुक्षितम् ।
स्रवन्तं[५] गैरिकं धातुमचलेन्द्रमिवापरम् ।।४।।

देवदेव उवाच

जामदग्न्य महत् कर्म कृतं सुरहितेप्सया ।
त्वया पुत्राद्य संग्रामे सैंहिकेयान् विनिघ्नता ।।५।।
तवानेन महाबाहो कर्मणा परितोषितः ।
प्रयच्छामि वरान् सप्त[६] तान्वदस्व यथेच्छसि[७] ।।६।।

राम उवाच

भगवन् यदि तुष्टोसि मम देहि [८] स्वयं प्रभो ।
सर्वज्ञानसमुत्पत्तिं[९] सर्ववेदप्रवर्तिताम्[१०] ।।७।।
अवध्यः स्यामहं युद्धे धनुर्वेदञ्च यच्छ मे ।
परशुं सर्वहन्तारमसङ्गं रथमेव च ।।८।।
अस्त्रग्राममञ्च विपुलममरत्वं तथाक्षयम्[११] ।
वरान्मह्यमिमान्देव प्रयच्छस्व नमस्तव ।।९।।

---

१ पुरिश्चन्द्रंसमासाद्य - ख, हरि... - घ । २ च - क. । ३ ...स्तयाग्रतः - ख. । ४ ...स्तथा - क. ।
५ स्रवन्ति- क. । ६ वरानष्टौ - घ - ७ ...प्स्यसि-ख. । ८ देव - क. ख. । ९ सर्वज्ञज्ञानमुत्पत्ति क. ।
१० देवप्रवर्तिनं - क., वेदप्रवक्तिवान् (प्रवक्तृतां?)- ख. । ११ ...क्षतं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

तस्यैवं वदतो व्यास प्रहस्य भगवान् हरः ।
उवाच सर्वमेतत्तो भविष्यति ममाज्ञया ॥१०॥
धनुर्वेदव्रतञ्चैव वर्षमेकं चरिष्यसि[१२] ।
तस्मादिहैव वस्तव्यं[१३] त्वया भृगुकुलोद्वह ॥११॥
ततस्तस्मै स भगवान् स्वयमेव त्रिलोचनः ।
आदिदेश व्रतं घोरं चचार स च संयतः ॥१२॥
समाप्ते तु व्रते देवः स्वयमागम्य यज्ञहा ।
धनुर्वेदं ददौ तस्मै समन्त्रं सहसङ्ग्रहम्[१४] ॥१३॥
सशुल्वं सपरिस्तोमं सोद्यमं सानुकर्षणम् ।
अस्त्रग्रामं च विपुलं प्रत्यस्त्रसहितं तथा[१५] ॥१४॥
प्रादात्तस्मै तदेशान[१६] इदं चोवाच सुस्वरम्[१७] ।
अयं त्वया धनुर्वेदः सहास्त्रैः सुमहाबल[१८] ॥१५॥
क्षत्रियेभ्यो न दातव्य इति मच्छासनं स्मर ।
यदि चेद्दास्यसे मोहात् क्षत्रियेभ्यः कदाचन ।
लघुत्वं यास्यसे तेषां युद्धे चापि जयो[१९] न ते[२०] ॥१६॥

सनत्कुमार उवाच

ततः स परशुं दत्वा रथं कामगमेव च ।
मनसा चिन्तिते[२१] युक्तमुपतिष्ठन्त[२२]मक्षयम् ॥१७॥
यन्तृणा[२३] यक्षराजेन अमरेणाभिसंभृतम्[२४] ।
जगामादर्शनं तस्य सहसैव[२५] पिनाकधृक् ॥१८॥
सोपि लब्ध्वा वरान् व्यास[२६] जगाम पितुरन्तिकम् ।
न चापश्यत तं तत्र कार्तवीर्यसुतैर्हतम् ॥१९॥

---

१२ इतः पूर्वं 'तस्मादिहैव वस्तव्य'मित्यादि पञ्चर्तिपद्यार्धं दत्तं ख.पुस्तके । १३ स्थातव्यं - ख. । १४ सपरिग्रहं (? । १५ तदा - क. ख. । १६ तदीशेन - ख. । १७ सुस्वनम् - ख. । १८ सुमहाबलः क । १९ युद्धेषु विजयो - ख. । २० तत् - ख. । २१ चिन्तितं - ख. । २२ मुपतिष्ठन्ति - क. । २३ यन्त्रिणा - क., मन्त्रिणा - ख. । २४ संवृत्तम् - क. ख. । २५ समासेन - क. । २६ तस्य - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अकृत्वा तस्य कर्तव्यं सोपि रामः प्रतापवान् ।
निःक्षत्रां पृथिवीं चक्रे सप्तकृत्वश्च[27] सत्रिकम्[28] ॥२०॥
रुधिरेण स तेषाञ्च ह्रदान् सप्त चकार ह ।
समन्तपञ्चके व्यास पितॄँस्तेनाभ्यतर्पयत् ॥२१॥
ततश्च कृत्वा निःक्षत्रां पृथिवीं भृगुसत्तमः।
महादेवप्रसादात्तु त्रैलोक्यस्येश्वरो बभौ ॥२२॥
तं श्रीस्तुष्टिर्धृतिश्चैव सिद्धिः कीर्तिर्यशस्तथा ।
श्रद्धा मेधा तथा क्षान्तिरनसूया[29] प्रसंयमः ॥२३॥
ऊहा ह्यपोहा तर्कश्च दमश्च शम[30] एव च ।
रूपिण्यो भार्गवं सर्वा मातरस्समुपस्थिताः ॥२४॥
तान्सर्वान् स तदा प्राह विशध्वं मामशङ्किताः ।
श्रीरियं तु दुराचारा दूर एवावतिष्ठताम् ॥२५॥

सनत्कुमार उवाच

तं तथावादिनं साध्वी उवाच श्रीर्महाबलम् ।
किमर्थं मां महाबाहो नाभिनन्दसि[31] दुर्लभाम् ॥२६॥

राम उवाच

चपला मदनीया च अध्रुवा चासि[32] शोभने ।
अतस्त्वां नाभिनन्दामि मम त्वं[33] दूरतो भव ॥२७॥
त्वयाविष्टो नरः[34] सर्वो यदि स्यात् स्वयमीश्वरः[35] ।
ऐश्वर्यमदसंमूढ[36] अकार्येष्वेव वर्तते[37] ॥२८॥

सनत्कुमार उवाच

स राजा भार्गवः श्रीमान् यज्ञैरीजे महामनाः ।
अधोगमच्च पृथिवी तस्य यज्ञे पुरा द्विज[38] ॥२९॥

---

२७ कृत्वा च - क. । २८ सप्तकाम् - क., सप्तवान् - ख. । २९ ...रनुसूया - क. ख. । ३० ... स्सुमय - क. ख. । ३१ नातिनन्दति - क. । ३२ चापि - क । ३३ मत्तस्त्वं (?) । ३४ विष्णोर्नरः - क. । ३५ स्वयमी-दृशः - ख. । ३६ समूढो - क ख. । ३७ रज्यते - ख., वर्तसे - ख. । ३८ विभो - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

व्यास उवाच

किमर्थं पृथिवी तस्य यज्ञे पातालमाविशत् ।
कारणं तत्र किं मन्ये एतदिच्छामि वेदितुम् ॥३०॥

सनत्कुमार उवाच

स गत्वा[३९] पृथिवीपालः कश्यपं[४०] मुनिसत्तमम्[४१] ।
उवाच मम होता त्वं भव सत्ववतां वर[४२] ॥३१॥
तं तथावादिनं व्यास तदोवाच नराधिपम् ।
कश्यपः कुपितस्तत्र निन्दमानो भृगूत्तमम् ॥३२॥
पतितस्त्वं दुराचारो भिन्नशीलः सुपापकृत् ।
कथं त्वा याजयिष्यामि भ्रूणवध्या[४३]भिकारिणम् ॥३३॥

सनत्कुमार उवाच

ततः स तेन वाक्येन उवाच ऋषिसत्तमम् ।
विषये मम मा तिष्ठ त्वमद्य[४४] मुनिसत्तम ॥३४॥
स्वाम्यहं जगतो विप्र[४५] नाहं यत्र ततो व्रज ।
ततस्स तस्य तं देशं परित्यज्या[४६]व्रजत्तदा ॥३५॥
नाससाद च तं देशं यत्रासौ न भवेत् प्रभुः ।
अनासादयमानश्च अटवीमाश्रितस्तदा ।
अन्तर्धानगतो भूत्वा चचार बहुलाः समाः ॥३६॥
अथापश्यत् समासीनं[४७] कपोतं वृक्षसंस्थितम् ।
अनङ्गेनाभिसंबद्धं कपोत्या हार्यतां[४८] गतम् ॥३७॥

कपोत उवाच

यदाप्रभृति सुश्रोणि मया दृष्टासि शोभने ।
तदाप्रभृति शुष्यामि रतिं नाप्नोमि शोभने ॥३८॥

---

३९ कृत्वा - ख. । ४० काश्यपं - क । ४१ मुनिसत्तमः - क., ... सत्तम (?) । ४२ वरं - क. ।
४३ भ्रूणत्रन्ध्या - क. । ४४ मा तिष्ठेस्त्वमद्य - क. ख. । ४५ विप्रो - क., विप्रा - ख. ।
४६ परित्यक्त्वा - क. ख. । ४७ समासीनः - क. ख. । ४८ कार्यतां - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कपोत्युवाच

मैवं ब्रूया दुराचार अधर्म्यं हि कदाचन ।

कपोत उवाच

न चेद्दास्यसि मेत्र त्वं बलात्त्वाहं सुमध्यमे ।
स्वीकरिष्यामि यच्छस्व[४९] नतोस्मि तव पादयोः ।।३९।।

कपोत्युवाच

किन्न तेस्ति भयं क्रूर जामदग्न्यान्महाबलात् ।
येन त्वं धर्षसे[५०]ह्येह पतिहीनां पतिव्रताम् ।।४०।।

सनत्कुमार उवाच

एवमुक्तः स तु तया कपोतः शक्तिनन्दन ।
उवाच रामः कोयं वै मम तुल्यो न केनचित्[५१] ।।४१।।
तस्यैवं वदतस्तत्र रामनामाङ्कितस्तदा ।
बाणः शिरो जहाराशु कश्यपस्तदपश्यत[५२] ।।४२।।
स तं दृष्ट्वा तथावृत्तां भीतस्तस्मान्महाबलात्[५३] ।
याजयामास राजानं जामदग्न्यं महामनाः[५४] ।।४३।।

कश्यप उवाच

याजयाम्यहमद्यैव राजन् भार्गवसत्तम ।
यदि चेदीप्सितां मे त्वं ददासि शुभदक्षिणाम्[५५] ।।४४।।

राम उवाच

यद् ब्रवीषि न सन्देहो दाताहं[५६] तन्महातपः ।
मां याजय[५७] यथान्यायं तवास्म्यद्य[५८] वशे स्थितः ।।४५।।

सनत्कुमार उवाच

ततस्तस्याभवद् व्यास सुमहान् भूरिदक्षिणः ।
यज्ञोश्वमेधो देवानां यत्र तृप्तिरजायत ।।४६।।

---

४९ यच्छत - क. । ५० घर्त्ती (र्षं?) से - क. । ५१ मम तुल्यः स किं भवेत् - घ । ५२ काश्यपस्तदपश्यत - क. ...तमपश्यत-क, ख. । ५३ तथा भीतस्तस्माद्रामाद् यज्ञदक्षिणाम् । ५४ यज्ञात्मना -क. ख. । ५५ शुभलक्षणां -क. ख. । ५६ तदा (ददे?) हं - क. । ५७ याजयस्व - घ. । ५८ ...स्माद्य - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तस्याथ दक्षिणाकाले जामदग्न्यः प्रतापवान् ।
उवाच कस्यपं[५९] ब्रूहि दक्षिणां कां ददानि ते ।।४७।।
स प्राह पृथिवीं कृत्स्नां सशैलवनकाननाम् ।
दक्षिणां दत्स्व[६०] मह्यं त्वं यच्च तेस्ति गृहे वसु ।।४८।।
स तस्मै तत्तथा कृत्वा विशुद्धेनान्तरात्मना ।
चीराण्यादाय तं प्राह कश्यपं किं करोम्यहम् ।।४९।।

कश्यप उवाच

इमं[६१] देशं परित्यज्य देशमन्यं प्रयाहि भो[६२] ।
मम देशे न वस्तव्यं त्वयाद्य भृगुनन्दन ।।५०।।

सनत्कुमार उवाच

स एवमस्त्विति[६३] प्रोच्य कृत्वा चाभि[६४]प्रदक्षिणाम्[६५] ।
जगाम सरितां योनिं समुद्रं वरुणालयम् ।।५१।।
तं[६६] गत्वा सागरं भीममुवाच भृगुनन्दनः ।
मम देशं प्रयच्छस्व निवासाय महोदधे ।।५२।।

समुद्र उवाच

योजयस्व यथान्यायं भवान् माद्य वशे स्थितः ।
वेलासमीपे त्वं स्थित्वा विकृष्य वलवद्धनुः ।
मुञ्चस्व सायकं राम परीप्सन् देशमुत्तमम् ।।५३।।
यावत्स सायकः क्षिप्तस्तव प्राणसमीरितः ।
यास्यते तावदेवाहं[६७] प्रदास्यामि तवालयम् ।।५४।।

सनत्कुमार उवाच

ततः स भृगुशार्दूलः कृत्वादरमतन्द्रितः[६८] ।
युयोज[६९] सायकं व्यास विकृष्य बलवद्धनुः ।।५५।।
कृत्वा मनसि संकल्पं योजनानां शतं तदा ।
गमिष्यति ममायं वै अथैनमभिमन्त्रयत्[७०] ।।५६।।

---

५९ काश्यपं - क. । ६० धत्स्व - क., दद - ख. । ६१ मम - क. ख. घ. । ४ वः - क., वै - घ., त्वम् - ख. । ६३ एवमस्त्विति तं - क. घ. । ६४ चापि - क. ख. । ६५ प्रदक्षिणं - क. । ६६ स - घ. । ६७ तावदेवान्तं - ख. । ६८ दमरतन्द्रितः - क., देवमतं त्रिभिः - घ. । ६९ मुमोच - क. ख. । ७० ...मभ्यमन्त्रयत् (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सागरेण तदा शम्भुः स्तुतस्तदुपशान्तये ।
सुराणां हितकामार्थं सागराशोषणाय च ।।५७।।
तं[७१] क्षिप्तं जामदग्न्येन रुरोधाप्रतिमं शरम् ।
स रुद्धो योजनान्येत्य[७२] न्यपतद् द्वादशैव तु ।।५८।।
तावच्च[७३] देशमुदधिर्विससर्ज हसन्निव ।
आवसच्च[७४] महातेजा जामदग्न्योपि तं तथा[७५] ।।५९।।
तं देशं भृगुतनयः सुरेन्द्रकल्पो हृष्टात्मा मृगगणपक्षिसंघजुष्टम्[७६] ।
सिंहेन्द्रद्विपशरभर्क्षघोरनादं श्रीमन्तं पुरमिव देवता चकार ।।६०।।

⊙ इति स्कन्दपुराणे राममाहात्म्ये त्रयोविंशोत्तरशततमोध्यायः[७७] ⊙

सनत्कुमार उवाच

जामदग्न्येन सा दत्ता तथा पृथ्वी महात्मने ।
गिरिश्शृङ्ग इवापातादधस्तात् सा तदाव्रजत् ।।१।।
तामुवाच मुनिःक्रुद्धस्तिष्ठतिष्ठ वसुन्धरे ।
किमर्थं मां परित्यज्य अधस्ताद् व्रजसे शुभे ।।२।।

पृथिव्युवाच

जामदग्न्यं[१] विना रामं प्रियं पतिमतिद्युतिम् ।
न शक्नोमि मुने स्थातुं तद्गुणाहृतचेतना ।।३।।
यदि मा यच्छसेद्य त्वं[२] रामाय मुनिपुङ्गव[३] ।
यास्याम्यहमधो[४] नाथ न तिष्ठेयमतोन्यथा[५] ।।४।।

सनत्कुमार उवाच

तस्यास्तद्वचनं श्रुत्वा कश्यप[६]स्तपतां वरः[७] ।
उवाच वसुधां क्रुद्धो दहन्निव तदौजसा[८] ।।५।।

---

७१ तत् - क । ७२ योजनान् गत्वा - क. ख, योजनं गत्वा - घ. । ७३ तावन्तं ?) । ७४ अवसच्च - घ. । ७५ तदा - घ. । ७६ . संजुघुष्टं - क. । ७७ १७६ - ख. ।

१ जामदग्नि - क । २ वा यच्छ मह्यं त्वं - क., प्रयच्छ... - ख. । ३ प्रयच्छ मां तु रामाय रक्षार्थं मुनिपुंगव - घ. । ४ वधो - क. । ५ तिष्ठाम्यद्य तेन्यथा - क. ख. । ६ काश्यप - क. । ७ ...स्तपतां वरः - घ. । ८ तदोजसा - क., ततो... - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कश्यप उवाच

गच्छ त्वं सुदुराचारे अधः पुनरवाग्गतिम् ।
वसुधाहं भविष्यामि पश्य मे तपसो बलम् ॥६॥
ततस्स भगवान् व्यास योगं परममास्थितः ।
पृथिवीत्वमनुप्राप्तो धारयामास मानुषान् ॥७॥
बहून्यब्दसहस्राणि यदसौ पृथिवी बभौ ।
तदा पृथ्वी विषण्णा तं प्रसादयत कश्यपम् ॥८॥

पृथिव्युवाच

भगवन् तपसा तुभ्यं योगेन च बलेन च ।
न कश्चिदपि तुल्योस्ति दिवि वा भुवि वा विभो ॥९॥
प्रसादये त्वां शिरसा दृष्टन्ते बलमुत्तमम् ।
यन्मयापकृतं किञ्चित्तत् क्षमस्व महामुने ॥१०॥
अहमेव हि लोकेषु पृथिवी स्यां तवाज्ञया ।
दीनाया मम विप्रेन्द्र प्रसादं कर्तुमर्हसि ॥११॥

सनत्कुमार उवाच

तां तथोपस्थितां दृष्ट्वा भगवानृषिसत्तमः ।
उवाच प्रहसन् देवीं पृथिवीं प्रणतां तदा ॥१२॥
तवैव ह्यपचारेण मयेदं कृतमीदृशम् ।
त्वमिदानीं मया दत्तं पृथिवीत्वं समाचर ॥१३॥
मम त्वं दुहितृत्वं च गत्वा कश्यपवंशजा[१] ।
काश्यपी विदिता लोके भविष्यसि वसुन्धरे ॥१४॥

सनत्कुमार उवाच

एवं सा पृथिवी व्यास अधोगत्वा पुनः स्थिता ।
पृथिवीत्वं समासाद्य बभूव विगतज्वरा ॥१५॥

---

१ वंशजं - क., वंशजां - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

य इमं पृथिवीभावं कश्यपस्य महामुनेः ।
पृथिव्यागमनञ्चैव पुनर्भावं तथैव च ॥१६॥
शृणुयात्पठते वापि शुचिर्भूत्वा सदैव हि ।
स लभेताक्षयाँल्लोकान्[१०] पृथिवीफलमेव च[११] ॥१७॥
तां सर्वलोकप्रभवामनेकशो मुने[१२] प्रणम्येह सदा नरोत्तमः ।
प्रकीर्त्तयेद्यो वसुधां वसुप्रदां स लोकमाप्नोति ऋषेरथाक्षयम् ॥१८॥

⊙ इति स्कन्दपुराणे कश्यपस्य पृथिवीभावो नाम चतुर्विंशोत्तरशततमोऽध्यायः[१३] ⊙

सनत्कुमार उवाच

अतः परं प्रवक्ष्यामि ध्वजसंग्राममूर्जितम् ।
देवानामसुराणाञ्च प्राणयोगविनाशनम् ॥१॥
आसीद् दनुसुतः[१] श्रीमान् विप्रचित्तिर्महाबलः ।
तपस्तेपे स[२] युक्तात्मा भस्त्रापद इति श्रुतिः[३] ॥२॥
स राध्य[४] तत्र देवेशं भगवन्तं त्रिलोचनम् ।
वरं वव्रेमरत्वञ्च तस्मै प्रादात् स देवपः ॥३॥
ध्वजं मायामयं दिव्यं सर्वगं काञ्चनं[५] शुभम् ।
उवाच चैनं तुष्टात्मा भगवान्दानवेश्वरम् ॥४॥
अयं तव दनोः पुत्र विश्वरूपो ध्वजोत्तमः ।
एनमाश्रित्य युद्धेषु त्वमजय्यो भविष्यसि ॥५॥
अमरश्च महाबाहो शब्दं चेन्न करिष्यसि ।
अतोन्यथा तु ते भाग्यै[६]र्भविता[७] विजयो[८] रणे ॥६॥
स एवमुक्तो देवेन[९] ध्वजेन महता युधि ।
दनुजैः सह विप्रेन्द्र देवान्सर्वान्समाह्वयत्[१०] ॥७॥

---

१० ...दक्षयाँल्लोकान् - क. ख. घ. । ११ राज्यमेव वा - घ. । १२ नमः - क. ख. घ. । १३ १७६ - ख. ।
१ धुन्धुसुतः - घ. । २ सु - क. ख. । ३ श्रुतः - घ., श्रुतं (?) । ४ संराध्य - क.. सोराध्य (?) ।
५ काञ्चनं सर्वगं - घ., नामयं - क. । ६ साम्यै - क. । ७ भविष्यति - क. । ८ जयो - क., न जयो - घ. ।
९ कालेन - ख. । १० ...नुपाह्वयत् - ख. घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तद्युद्धमभवद् घोरं तुमुलं लोमहर्षणम् ।
वर्षाणान्तु शतान्यष्टौ दश[११] चैव सुदारुणम् ॥८॥
तत्राद्भुतमपश्यन्ते[१२] दनुपुत्रस्य धीमतः ।
ध्वजेन विश्वरूपेण यदेको न्यवधीद् बहून्[१३] ॥९॥
युध्यतश्चास्य संग्रामे ध्वजमाश्रित्य मायया ।
न[१४] देवाः प्रहरन्त्यस्य पश्यमानास्तु[१५] मोहिताः ॥१०॥
नापश्यन्ते[१६] दनुसुतान्नापि दैत्याँस्तथा रणे[१७] ।
ध्वजमेवाभिपश्यन्ति सर्वे मूढा दिवौकसः ॥११॥
मुमुचुर्यान्यमोघानि आयुधानि दिवौकसः ।
तानि छन्नान्यभूवन् हि ध्वजच्छायानिलेन वै ॥१२॥
अग्रतः पृष्ठतश्चैव पार्श्वयोरूर्ध्वमेव च ।
ध्वजमेवा[१८]भिपश्यन्ति न दैत्यान्नापि दानवान् ॥१३॥
तत्र ते सायकास्तीक्ष्णा ज्वलन्तः पावकार्चिषः[१९] ।
निःसृत्य तु ध्वजाद् व्यास दारयन्ति सुरोत्तमान् ॥१४॥
गदाश्च परिघाश्चैव भिन्दिपालास्सतोमराः ।
निःसृतानि तथान्यानि दृश्यन्तेस्त्राणि वै ध्वजात् ॥१५॥
ते देवास्तेन दैत्येन ध्वजमाश्रित्य सर्वशः ।
भग्ना विचेतसः संख्ये कृता नष्टपराक्रमाः ॥१६॥
तान् भग्नान् भज्यमानाँश्च सर्वान्दृष्ट्वा सुरोत्तमान्[२०] ।
जगर्ज जलदो यद्वद् ध्वजमाश्रित्य दानवः ॥१७॥
तस्य तच्छिद्रमालक्ष्य भगवान् पाकशासनः ।
ध्वजमालक्ष्य चिक्षेप वज्रं परममन्युमान् ॥१८॥
ज्वलदादित्यसंकाशं[२१] तद् वज्रं भीमशब्दवत् ।
सध्वज दानवेशानमकरोद्यमगोचरम् ॥१९॥

---

११ शतं - घ. । १२ ...मपश्यामां क., . मपश्यन्तो - घ., . श्यंस्ते (?) । १३ भृशम् - क. । १४ स - घ. ।
१५ ...स्त - घ. । १६ न पश्यन्ते - क. । १७ ... न्सुदारुणान् - घ. । १८ न ध्वजे वा - क. ख. ।
१९ पावकार्चिषा - क. ख. । २० सुरसत्तमाः - क. । २१ ज्वलनादित्यसंकाशं - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ध्वजे लक्ष्यं समादिश्य देवेन्द्रेण महात्मना ।
हतास्ते नानवास्सर्वे सहस्राणि चतुर्दश ।।२०।।
ते तेन शब्देन महानुभावा हतास्समालक्ष्य सुरेन्द्रकल्पाः ।
ध्वजे निवेश्यैन्द्रसमानचिह्ना वज्रेण देवेन्द्रबलेन सर्वे ।।२०।।

⊙ इति स्कन्दपुराणे ध्वजयुद्धे पञ्चविंशोत्तरशततमोध्यायः[२२] ⊙

व्यास उवाच[१]

भस्त्रापदमिति प्रोक्तं त्वया ब्रह्मसुताव्यय ।
कथं तदभवत् स्थानमेतदिच्छामि वेदितुम् ।।१।।

सनत्कुमार उवाच

इक्ष्वाकुकुलसंभूतो बाहुर्नाम प्रजेश्वरः ।
हैहयैस्तालजंघैश्च तस्य राज्यमशेषतः ।
हृतं विप्रेन्द्र विक्रम्य सभार्यः स वनं[२] ययौ ।।२।।
स ऋचीकाश्रमं गत्वा ऋचीकेनानुपालितः ।
उवास[३] वनमध्ये तु[४] गर्भिण्या भार्यया सह ।।३।।
तस्याः प्रसवकाले तु[५] भार्यायाः शक्तिनन्दन ।
सपत्न्या रागमोहेन गरोस्यै संप्रदापितः ।।४।।
सा तेन वेदनां प्राप्य तप्यमाना[६] रुजान्विता ।
शीतं तोयमिति प्रोच्य मूर्च्छिता न्यपतद्[७] भुवि ।।५।।
तां तथा पतितां दृष्ट्वा स राजा मन्युतापितः[८] ।
कुम्भमादाय वृद्धोपि तोयार्थं सरितं ययौ ।।६।।
स पूरयित्वा[९] कुम्भं तं स्कन्धेनादाय दुःखितः ।
वृद्धभावाच्छ्रमाच्चैव पापात च ममार चा ।।७।।

---

२२ १७६ - ख., अत्र नाध्यायसमाप्तिर्दृश्यते घ.पुस्तके ।
१ सन. उ. - क. । २ शरणं - घ. । ३ उवाच - क. । ४ वनमध्येत्र - क । ५ च - ख. ।
६ दह्यमाना - ख. । ७ ,, ह्यपतद् - क. ख. । ८ ,,.पासितः - ख. । ९ पूरयित्वा स - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मृतो मृत इतीत्येवमृषिभिः समुदाहृते ।
सा देवी मूर्च्छितोत्तस्थौ[१०] पतिशोकसमाहता ।।८।।
सा गरस्य च तापेन पतिमृत्युकृतेन च ।
समाहता तदा व्यास कुररीव व्यनादयत् ।।९।।
बाहोस्तु ऋषयस्सर्वे वसिष्ठाद्याः समागताः ।
कृत्वा तु चयनं सम्यक् संस्कारमभिरोचयन्[११] ।।१०।।
तमग्निं प्रविशन्ती सा[१२] शैव्या गर्भेण दूषिता ।
वारिता ऋषिभिर्व्यास और्वेण[१३] च महात्मना ।।११।।
तस्यास्तत्र दिने व्यास सायाह्ने मन्युनाशनः ।
गरेण सह गर्भोसौ निःसृतोनलसप्रभः[१४] ।।१२।।
तस्मै[१५] सगर इत्येव नाम चक्रे ऋषिस्तदा ।
संस्कारञ्चाकरोत्तस्य सर्वमेव कृपान्वितः ।।१३।।
धनुर्वेदं ददौ चैव वेदान् साङ्गाँस्तथैव च ।
अस्त्रग्रामञ्च विपुलं रथञ्चासङ्गमव्ययम् ।।१४।।
स तेन रथमुख्येन युधि शत्रूञ्जघान ह ।
और्वास्त्रं[१६] चैव सन्धाय तेषां धर्ममनाशयत् ।।१५।।
स हत्वा ताँस्तथा व्यास प्राप्य राज्यमथापि च ।
वैनतेयस्वसां प्राप्य शैव्याञ्चैव सुमध्यमाम् ।।१६।।
अनपत्यो महाबाहुस्त्यम्बकं देवसत्तमम् ।
आराधयन् महातेजाः पुत्रहेतोर्नराधिपः ।।१७।।
तस्मै प्रादात् स भगवान् पुत्रवंशकरं प्रभुः[१७] ।
षष्टिं चैव सहस्राणि सुतानां सुमहात्मनाम् ।।१८।।

सनत्कुमार उवाच

लब्ध्वा स तु वरं राजा भार्याद्वयमुवाच ह ।
वैनतेयस्वसां चैव शैव्याञ्चैव महामनाः[१८] ।।१९।।

---

१० मूर्छिता तस्थौ - क. ख. घ. । ११ ...मभ्यरोचयन् (?) । १२ सा प्रविशती - क. । १३ ऊर्वेण - क., पूर्वेण - ख. । १४ ... सन्निभ. - ख. । १५ तस्यै - क.; १६ ऊर्वास्त्रं - क. । १७ शुभं - क. । १८ महात्मना - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सगर उवाच

मह्यं देवेन दत्तश्च पुत्रो वंशकरः शुभः ।
षष्टिं चैव सहस्राणि पुत्राणां सुमहात्मनाम् ॥२०॥
तत्र का वृणुते देव्यौ वरं देवी शुभं हितम् ।
ब्रूत[19] नाहं विभागं वः[20] करोमि विदितात्मनाम् ॥२१॥

वैनतेयस्वसोवाच

षष्टिः पुत्रसहस्राणि[21] मम सन्तु नराधिप ।
शैव्याब्रवीत् सुतो मह्यमेको वंशकरोस्तु वै ॥२२॥

सनत्कुमार उवाच

असमञ्जसुतं[22] शैव्या ततः सा संप्रसूयत ।
वैनतेयस्वसास्तुम्बं[23] महान्तं संप्रसूयत ॥२३॥
तस्मात्तुम्बात्ततस्तानि सहस्राणि दशैव तु ।
गुणितानि व्यास[24] षड्भिः[25] संभवन्त महाबलाः ॥२४॥
असमञ्जः परित्यक्तः सगरेण सुतस्ततः ।
अधार्मिक[26] इति ज्ञात्वा अनाचारे व्यवस्थितः[27] ॥२५॥
अंशुमाँस्तस्य पुत्रस्तु बाल एवाति धार्मिकः[28] ।
तस्मिन्[29] प्रीतिं तदा चक्रे सगरो राजसत्तमः ॥२६॥
असमञ्जे परित्यक्ते हयमेधेन दीक्षितः ।
षष्टि तानि सहस्राणि हयस्यारक्षणे दधौ[30] ॥२७॥
तेषां हयं चारयतामुद्युक्तानां महात्मनाम् ।
अन्तर्धानगतः शक्र आक्षिपत्तं हयोत्तमम् ॥२८॥
ते लोकान् सर्वशो गत्वा अपश्यन्तो[31] हयोत्तमम् ।
पितरं दीक्षितं प्राप्य तं हयं संन्यवेदयन्[32] ॥२९॥

---

१९ ब्रूयो - क. ख. । २० विभागश्च - ख., वां (?) । २१ षष्टिपुत्रसहस्राणि - क. ख. । २२ असमञ्जसुतं - क., ...ञ्जसं (?) । २३ स्तम्बं - ख., तुम्बं ?) । २४ तथा - क., त्रिधा - ख. । २५ व्यास - क. ख. । २६ आधर्मिक - क. । २७ अनाचारव्यवस्थितः - क. ख. । २८... भिधार्मिकः - - क. । २९ तस्मात् - क. । ३० ददौ - क. ख. । ३१ अपश्यन्त - क. ख. । ३२ हयं नष्टं न्यवेदयन् (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स संक्रुद्धस्तदा राजा निर्दहन्निव तान्सुतान् ।
उवाच क्रोधताम्राक्षो नश्यध्वं क्षिप्रमद्य वै ॥३०॥
नागन्तव्यं विना वोद्य[३३] हयं क्रूरा विमार्गत[३४] ।
सुतैः किं मम युष्माभिर्यात सर्वे यमक्षयम् ॥३१॥

सनत्कुमार उवाच

त एवमुक्ता[३५] विप्रेन्द्र त्रैलोक्यमखिलं तदा ।
विमृग्य[३६] खानयामासुरिमां सर्वां वसुन्धराम् ॥३२॥
दिग्गजाँस्ते ततो दृष्ट्वा ऋषीँश्च नियतव्रतान् ।
धारयन्तोर्वनिं[३७] सर्वान् दृष्ट्वा चाभिप्रणम्य च ॥३३॥
कपिलं ते मुनिं सुप्तमवैक्षन्त[३८] जलाशये ।
अदूरेस्य हयं चैव क्रुद्धास्ते[३९] मेनिरे तदा ॥३४॥
प्रेरिता भावितार्थेन[४०] काले पक्वा मुमूर्षवः[४१] ।
पितृशापादथोचुस्ते कपिलं मुनिसत्तमम् ॥३५॥
एष नो हयमुख्यस्य हर्ता सुप्तो दुरात्मवान् ।
एनमद्य वयं सर्वे नयाम पितुरन्तिकम् ॥३६॥

सनत्कुमार उवाच

ततस्ते कालपाशेन बद्धास्सर्वे महाबलाः ।
नियतेर्वशगाश्चैव[४२] पद्भिस्तं समताडयन् ॥३७॥
स तैरभ्यर्दितः क्रुद्धः शरदामयुतं तदा ।
निरुद्धं सहसा वायुमुत्ससर्ज यथाहिराट् ॥३८॥
तस्य वक्त्राद्विनिःसृत्य स वायुर्ज्वलनात्मकः[४३] ।
ददाह सागरान् सर्वान् न्यायधर्मबहिष्कृतान् ॥३९॥

---

३३ चाश्वैः - घ. । ३४ विमार्गतः - क. ख. । ३५ एवमुक्त्वा - क. ख. । ३६ विमृग्य - क. ख., विमृष्य (श्य) घ. । ३७ दारयन्तोर्वनिं - घ. । ३८ ... मवेक्षन्त - क. । ३९ क्रूरास्ते - ख. । ४० भाविनार्थेन (?) । ४१ मुमूर्पुवत् - ख., .. र्थेन कालमूर्तिना - घ. ४२ नियतीवशगाश्चैव - क. ख. । ४३ र्जलदा... - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तेषु दग्धेषु सर्वेषु ऋषयो नारदादयः ।
सगराय यथावृत्तमाचख्यु[४४]रतिदुष्करम् ॥४०॥
ततस्स राजा दुःखार्त्तः संस्तभ्यात्मानमात्मना ।
अंशुमन्तं प्रियं पौत्रमादिदेश महामना:[४५] ॥४१॥

सगर उवाच

इमं रथं समारुह्य गच्छ तं[४६] हयमुत्तमम् ।
इहानय महाबाहो कालो नो नात्यगाद्यथा ॥४२॥
समाचरेथास्तद्वाक्यं यथासावृषिसत्तमः ।
क्रोधं न कुरुतेस्मासु[४७] त्वयि नः सन्ततिर्ध्रुवा ॥४३॥

सनत्कुमार उवाच

स एवमुक्तो रथमास्थितो नृपो महानुभावः सुरसिद्धपूजितः ।
जगाम वेगेन[४८] सुरेन्द्रविक्रमः स यत्र योगी सगरान्तको[४९] बभौ ॥४४॥

⊙ इति स्कन्दपुराणे सगरोत्पत्तिर्नाम षड्विंशोत्तरशततमोध्यायः[५०] ⊙

सनत्कुमार उवाच

स गत्वा तं तदोद्देशं[१] महागजनिषेवितम् ।
अपश्यद् भस्मभूतांस्तान्मुनिश्च ज्वलनप्रभम् ॥१॥
ततस्तं स तदा वाग्भिः स्तवयुक्ताभिरन्तिके ।
प्रणम्याक्षामयत्[२] सर्वं पूर्वैर्यद् दुष्कृतं कृतम् ॥२॥

कपिल उवाच

राजन्निहाहमेकान्ते युक्तस्तिष्ठामि विज्वरः ।
तैरर्दितोस्मि सहसा वायुं वक्त्रादवासृजम् ॥३॥

४४..,माचक्ष्यु (क्षु?) - ख. । ४५ महात्मना - क. ख. । ४६ त्वं - घ. । ४७ कुर्यादस्मासु(?) ।
४८ विप्रेन्द्र - घ. । ४९ मुनिरिति(?), भवेत (भवत् ?) - घ. । ५० शतं षड्विंशत्यधिकं समाप्तं - घ., आध्याय १७६ - ख. ।
१ सगतस्तु ततो देशं - घ. । २ प्रणम्यमक्षयं - घ., म्य क्षमवत्(?) - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दशवर्षशतानि स्म संरुद्धः[३] सोनिलो मया ।
विमुक्तः सहसा सर्वांस्तान् ददाह पितॄंस्तव[४] ॥४॥
न बुद्धिपूर्वं ते दग्धा मया राजन् रुषापि वा ।
हतास्ते कालपक्वेन फलेनैव यथा खगाः ॥५॥
अश्वोयं मम पार्श्वस्थः केनापि विदितात्मना ।
हृतस्तेषां विनाशाय मा क्रुधो[५] नीयतां हयः ॥६॥

सनत्कुमार उवाच

तस्य त्वनुमते व्यास[६] अंशुमान् स नराधिपः ।
पानीयमुपचक्राम तेषां दातुं महामनाः ॥७॥
वैनतेयस्तमाहेदं स्वस्रीयाणां ममोदकम् ।
न दातव्यं महाबाहो नैतत्तेषां[७] गमिष्यति ॥८॥

अंशुमानुवाच

कथं मे[८] पितरस्ते वै लोकान् दिव्यानवाप्नुयुः ।
एतदिच्छामि[९] कथितं[१०] त्वया कश्यपन्दन[११] ॥९॥

वैनतेय उवाच

देवलोके सरित् पुण्या गङ्गानामाशुभापहा ।
तदम्भोभि[१२]स्तवास्थीनि बन्धूनामिह सर्वशः ॥१०॥
संस्पृष्टानि[१३] यदा राजन् तदैते[१४] मोक्षमाप्नुयुः[१५] ।
अशुभाद्राजशार्दूल अन्यथा किं जलेन ते ॥११॥

सनत्कुमार उवाच

ततः सोश्वं समादाय निवृत्तो व्यास भूपतिः ।
पितामहाय प्रददौ तमश्वं सुकृतात्मवान् ॥१२॥
सोपि राजा तदा प्राप्य हयमेधं महामनाः ।
समुद्रनाशने बुद्धिं चक्रे सुतवधार्दितः ॥१३॥

---

३ निरुद्धः - घ. । ४ ...स्तदा - क. । ५ क्रुद्धो - क ख. । ६ ... तेर्व्यास - क. । ७ नैवं तेषां - क. ।
८ अत्रमे - क. । ९ श्रोतुमिच्छामि - ख. । १० कथितुं - क. । ११ काश्यपनन्दन - क. ।
१२ तस्याम्भोभि - क. ख. । १३ संसृष्टानि - ख. । १४ तदा ते - क., तदेते - ख. । १५ मोक्षमवाप्नुयुः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ तं सरितां भर्त्ता प्रणम्याभिप्रसाद्य च ।
जगाम पुत्रतां तस्य इदं चोवाच तं तदा ॥१४॥
राजँस्त्वद्वंशजेनाहं कर्तव्यः किल सुप्रभ[१६] ।
यथापूरं महावाहो पूर्णो गङ्गाम्भसा नृप ॥१५॥
मा क्रुध[१७]स्तव पुत्रोहं यशस्कृदमितप्रभ[१८] ।
रत्नानि च प्रदास्यामि शममेहि[१९] मम प्रभो ॥१६॥
शान्तः क्रोधस्ततस्तस्य समुद्रं प्रति भूपतेः ।
विष्णुश्चास्मै तदा तुष्टः[२०] प्रददावीप्सितान् वरान् ॥१७॥
हयमेधशतं साग्रं स्वर्गे वासं तथाक्षयम् ।
वंशस्य चाक्षयं नित्यं यशश्चाग्र्यं तथाक्षयम् ॥१८॥
वयस्यत्वं तथा चैव परां धर्मे[२१] च संस्थितिम्[२२] ।
एतान्वरान् स लब्ध्वा तु भुक्त्वा राज्यमकण्टकम् ॥१९॥
जगाम वनमेवाथ तपस्तप्त्वा ततो दिवम् ।
ततोंशुमान् बभौ राजा धार्मिकः सत्यसंगरः ॥२०॥
पुत्रं राज्येभिषिच्यैव गङ्गावतरणाशया ।
तपस्तप्त्वा दिवं यातो महाबलपराक्रमः ॥२१॥
ततो दिलीपः पुत्रोस्य महात्मा देवराडिव ।
कृत्वा राज्यं ययौ व्यास वनमेव महाबलः ॥२२॥
तत्र गङ्गार्थमुद्युक्तस्तपस्तप्त्वा दिवं[२३] गतः ।
अनवाप्यैव तं[२४] काममस्य पुत्रोभवत् पुनः ॥२३॥
राजा भगीरथो नाम जम्बूद्वीपपतिः शुभः ।
धार्मिकः सत्यवाक् शूरो[२५] धर्मो विग्रहवानिव ॥२४॥
तस्य जन्मप्रभृत्येव[२६] हृदये मुनिसत्तम ।
स्थितं गङ्गावतरणं कथं कुर्यामिति प्रभो[२७] ॥२५॥

---

१६ सलिलैर्युतः - घ. । १७ क्रुद्ध - क. ख. । १८ ...प्रभः - क. ख. । १९ सममेहि - क. । २० त्रिष्णुस्तुतोष विज्ञाय - घ. । २१ परन्धर्मं - ख. । २२ संस्थितम् - क. । २३ वनं - क. ख. । २४ तां - क. । २५ सत्यवाञ्छूरो - क. ख. । २६ जन्मप्रभृत्यैव - ख. । २७ प्रभोः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ कालेन महता कृत्वा सर्वक्रियां नृपः ।
तपस्ततापं सुमहद्येनातुष्यज्जगत्प्रभुः[२८] ॥२६॥
ब्रह्मा स्वयमथाभ्येत्य तमुवाच यतव्रतम् ।
ब्रूहि किन्ते प्रयच्छानि[२९] वरान् वृणु नरधिप ॥२७॥

सनत्कुमार उवाच

ततस्स राजा[३०] तं दृष्टवा[३१] प्रणम्य हृषितानन: ।
उवाच धर्मस्याक्षय्यं स्वर्गे वासं तथाक्षयम् ॥२८॥
वंशस्य चाक्षयं[३२] सम्यक् पुत्राणां च शतं वरम् ।
शूराणां धार्मिकाणाञ्च समरेष्वनिर्वातिताम्[३३] ॥२९॥
जयश्च युद्धे सततं लोके कीर्त्ति तथाक्षयाम् ।
गङ्गायास्सरितश्चापि अवतारमनुत्तमम् ॥३०॥
भागीरथीति च यथा लोके ख्याततमा भवेत् ।
एतदिच्छामि देवेश यदि त्वं मन्यसे विभो ॥३१॥

सनत्कुमार उवाच

एवमुक्तस्य भगवान् सर्वमेतदशेषतः ।
प्रादात्तस्मै स्वयं स्रष्टा[३४] इदं चोवाच तं नृपम् ॥३२॥
गङ्गां त्वं राजशार्दूल स्वर्गान्नेष्यसि भूतलम् ।
तां पतन्तीं दिवः[३५] कश्चिच्छक्तो धायितुं नहि ।
ऋते लोकगुरोर्देवात् त्र्यम्बकाच्छूलपाणिनः[३६] ॥३३॥
तस्मात्त्वं देवदेवेशमाराधय यतव्रतः[३७] ।
स धारयिष्यते व्यक्तं वरदानेन ते विभुः ॥३४॥

सनत्कुमार उवाच

एवमुक्तस्तु राजेन्द्रो वायुभक्षोनिमेषणः ।
निरूच्छ्वासोभवत्[३८] तत्र हिमवच्छिखरे शुभे ॥३५॥

---

२८ जगद्गुरो (रु:) - ख. । २९ प्रयच्छामि - क. ख । ३० दृष्ट्वा - क. ख. । ३१ राजा - क. ख ।
३२ चाक्षति - ख. । ३३ ष्वनिवर्तताम् - क. । ३४ सृष्ट्वा - क. । ३५ दिवि - क. । ३६ ...च्छूलधारिणः (?) ।
३७ यतव्रतम् - ख., यतव्रताम् - क. । ३८ बभौ - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तस्य वर्षसहस्रेण तत्परस्य तदाशिषः ।
तुतोष भगवान्देवः कपर्दी नीललोहितः ।।३६।।
वरदोस्मीति चाप्युक्त्वा इत्युवाच पुनः प्रभुः ।
दिव्यं चक्षुः प्रयच्छामि पश्य मां राजसत्तम ।।३७।।
स तं दृष्ट्वा महेष्वासं त्रिदृष्टिं देवमीश्वरम्[३९] ।
उवाच सरितं देव धारयस्व वरं वृणे ।।३८।।
गङ्गां त्रिपथगां दिव्यां यदि मे तुष्यसेव्यय ।
मम कामो महादेव मृतान् पूर्वपितामहान् ।।३९।।
स्वर्गं नयेयं निरयात्तारयित्वाथ तान्[४०] शुभान् ।
तेषामर्थे महादेव प्रयासोयं मया कृतः ।
प्रसादात्तव ते स्वर्गं गच्छेयुर्गङ्गयाप्लुताः ।।४०।।

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा भगवान् गोवृषध्वजः ।
उवाच राजशार्दूलं सुतुष्टेनान्तनात्मना ।।४१।।

देवदेव उवाच

भगीरथ तथा तत्तो भविष्यति न संशयः ।
मत्प्रसादाच्च गङ्गा ते दुहिता सा भविष्यति ।।४२।।
धारयिष्ये त्वदर्थे[४१] च तां पतन्तीं त्रिविष्टपात्[४२] ।
विस्मापनाय लोकानां हितार्थञ्च नृपोत्तम ।।४३।।

सनत्कुमार उवाच

तस्य तद्वचनं श्रुत्वा गङ्गा सा सरितां वरा ।
उवाच को धारयिता मम वेगं सुरोत्तमः ।।४४।।
अहं तं सहसैवाद्य गृहीत्वाशु सुदुःसहा ।
गमिष्यामि न सन्देहः पातालं सुदुरासदम् ।।४५।।

---

३९ तां वरम् - क. ख. । ४० ..,क्षयं - क, । ४१ तदर्थे - क, । ४२ त्रिपिष्टपात् - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्वयंभूर्यद्यसौ[४३] ब्रह्मा शक्रो वापि[४४] सुरेश्वरः ।
विष्णुर्वाप्यदितेः पुत्रो नयाम्येव न संशयः ॥४६॥
अद्य पश्यन्तु मे लोका[४५] महद्वेगं दुरासदम् ।
पतन्त्या भुवि दुर्धर्षमेवं सा सरिदब्रवीत् ॥४७॥

सनत्कुमार उवाच

तस्यास्तद्वचनं श्रुत्वा सावलेपं[४६] च शंकरः ।
चकार निग्रहीतुं तां संकल्पं सरितां वराम् ॥४८॥
तस्य संकल्पमात्रेण देवान् वै ज्वर आविशत् ।
मम्लुर्माल्यानि सर्वेषामुत्पाताश्चैव जज्ञिरे ॥४९॥
विपर्ययोभूल्लोकानां[४७] विमानानि च पेतिरे ।
असुराश्च बलोन्मत्ता दृश्यन्तेतिमहाबलाः ।
आह्वयन्तो[४८] दितेः पुत्रान् ज्वलनादित्यवर्चसः ॥५०॥

सनत्कुमार उवाच

वैकृतं तदथालक्ष्य देवा ऊचुः शतक्रतुम् ।
विपर्ययोयं नाकस्माच्छीघ्रं विज्ञायतां प्रभो ॥५१॥
संमोहश्चाभवत्तस्य देवस्य ऋषिभिः सह ।
तस्मिन् काले समागम्य ब्रह्मा तानवबोधयत् ॥५२॥

ब्रह्मोवाच

मा विषण्णावतिष्ठध्वं यूयं सर्वे दिवौकसः ।
यद् ब्रवीमि निबोधध्वं कालो मा वो[४९]तिगादयम् ॥५३॥
एष देवो महेष्वासः कपर्दी मेघवाहनः ।
गङ्गां नाशयितुं बुद्धिमकरोद्भीमविक्रमः ॥५४॥
तेनैवं मनसा देवाश्चिन्तिते लोकनाशने ।
विपर्ययो यथा न स्यात् तथा कुरुत मा चिरम् ॥५५॥

---

४३ स्वयंभुर्यदसौ - क. । ४४ ... प्यनु (त्र?) क. । ४५ लोको - क. । ४६ अवलेपं - क. ख. ।
४७ विपर्ययश्च लोकानां - क. ख. । ४८ आह्वयन्ते - ख. । ४९ माद्य... - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मया सह इतो गत्वा ऋषिभिः सह संगताः ।
आपद्भावेन देवेशं शरणं यात[५०] शङ्करम् ॥५६॥

सनत्कुमार उवाच

ते सहैव तदा देवा ब्रह्मणा पद्मयोनिना ।
जग्मुर्हिमवतः कूटं सर्वरत्नविभूषितम् ॥५७॥
नाम्ना हिरण्मयं नाम यत्र हैरण्वती नदी ।
अपश्यन्त च तं देवास्तपोभक्त्या सुरेश्वरम् ॥५८॥

सनत्कुमार उवाच

ते तं क्रुद्धमिवालक्ष्य युगान्तानलसप्रभम् ।
दुर्निरीक्ष्यं तदा व्यास देवीं शरणमागताः[५१] ॥५९॥

देवा ऊचुः

सदेवतानां लोकानां जनन्यसि विभावरि ।
अतोसि भस्त्रा रुद्राणि यच्छ नोभयदं पदम् ॥६०॥
शरणागता वयं मातः पुत्रास्तव वयं शुभे ।
रक्ष नो देवदेवेशे एतदिच्छामहे वयम् ॥६१॥

सनत्कुमार उवाच

तेषां तद्वचनं श्रुत्वा भीतानां शरणैषिणाम् ।
देवानामभयं देवी ददौ वरमनुत्तमम् ॥६२॥
ततस्तं देवदेवेशं भगवन्तं पिनाकिनम् ।
प्रणम्य शिरसोवाच भीतवत्साचलात्मजा ॥६३॥

सनत्कुमार उवाच

तां भीतां प्रणातां देवः पादयोर्गतमूर्धजाम्[५२] ।
उत्थापयामास तदा पाणिनाब्जदलत्विषा[५३] ॥६४॥
उवाच च तदा साध्वीं भीतासि हिमवत्सुते ।
किमर्थं किञ्च ते सुभ्रु[५४] भयं ब्रूहि शुभानने ॥६५॥

---

५० याम - क. ख. । ५१ ...मागताम् - क. । ५२ गंजित... - क. । ५३ ... ब्जतलत्विषा - क. ।
५४ सुभ्रू - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

उवाच तं तदा व्यास भीतवत् हिमवत्सुता ।
दृढं भीतास्मि ते देव रूपं दृष्ट्वातिभास्वरम् ॥६६॥
संवर्त्तकानलप्रख्यं दुर्निरीक्ष्यं सुरैरपि ।
लोका विषण्णा देवेश देवाश्च ऋषिभिस्सह ॥६७॥
उपासते[५५] भीतभीताः सर्व एते सुरेश्वराः ।
भीताहं ते महादेव मत्तोधिकमिमे सुराः ॥६८॥
मां चैव शरणं प्राप्तास्तेषां त्वमभयं दिश ।
त्वं कर्ता सर्वलोकानां देवानामृषिभिस्सह ।
मा विनाशय तान् कृत्वा याचे त्वां शिरसा नता ॥६९॥

सनत्कुमार उवाच

तस्यास्तद्वचनं श्रुत्वा देवान्दृष्ट्वा च यज्ञहा ।
उवाच न भयं वोस्ति मत्तस्त्रिदशसत्तमाः ॥७०॥
इयन्तु स्त्रीस्वभावेन[५६] हिमवत्तनये सरित् ।
मयि दुष्टं मनः कृत्वा पतिष्यति ममोपरि ॥७१॥
तामहं सन्निरोत्स्यामि पतन्तीं सरितं दिवः ।
यूयमप्यालयान् स्वान्स्वान् विश्रब्धा[५७] व्रजतानघाः ॥७२॥

सनत्कुमार उवाच

ततस्ते तद्वचः[५८] श्रुत्वा प्रणता विबुधोत्तमाः ।
ऊचुः प्राञ्जलयो भूत्वा वाचा ते लज्जमानया ॥७३॥

देवा ऊचुः

एषा लोकहितार्थाय त्वया सृष्टा सरिद्वरा ।
चपलाः सरितश्चैव स्त्रीस्वभावश्च[५९] तादृशः ॥७४॥
सैषा तेन स्वभावेन अस्माकं चाभिसंश्रयात्[६०] ।
गर्वं महान्तमास्थाय[६१] कत्थते ह्यकुतोभया ॥७५॥

---

५५ उपासन्ते - क. ख. । ५६ स्त्रीसभावेन - क. । ५७ विश्रब्धं - ख. । ५८ ततस्तद्वचनं - ख. ।
५९ स्त्रीस्वभावाच्च - क. । ६० चापि संश्रयात् - ख. । ६१ सुमहदास्थाय - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गर्वोयं च यतस्तस्या[६२] येन सा [६३] कत्थते[६४] नदी ।
तन्नः शृणुष्व देवेश मा क्रुधो[६५] भीमविक्रम[६६] ॥७६॥
कार्यार्थं प्रार्थ्यमानो हि सर्वो भवति गर्वितः ।
लोके तनुरपि स्वामिन् किमुतेयं सरिद्वरा ॥७७॥
सैषा सरिन्महादेव धारणायेप्सिता त्वया ।
सर्वश्रेष्ठेन देवेन गर्विता कत्थते[६७] ततः[६८] ॥७८॥
त्वया दैवतनाथेन धारितेयं सरिद्वरा ।
पुण्या भवित्री लोकेस्मिन् सर्वकिल्विषनाशनी॥७९॥
यः कश्चित् पातिनीमेनां [६९]सरितं देवताधिप ।
शक्तो धारयितुं देवो न तु श्रेयो[७०] भवेत्ततः ॥८०॥
तस्मात्त्वं याचितो देवै राज्ञा चानेन कालहन् ।
धारयस्व[७१] नदीमेनां[७२] शिवो[७३] भूत्वा सुरोत्तम[७४] ॥८१॥

सनत्कुमार उवाच

एवं स भगवान् देवै[७५]स्तथ्यं बह्वविरोधि च[७६] ।
उक्तः सब्रह्मकैर्देवः सनारायणलोकपैः[७७] ॥८२॥
राज्ञो वरप्रदानं च तदवेक्ष्य पुनः पुनः[७८] ।
उवाच देवान्देवेश[७९] इदं गम्भीरशब्दवत् ॥८३॥
एतं[८०] राजानमुद्दिश्य क्षुधापर्याकुलेन्द्रियम् ।
भवतां चैव मान्यानां वचनाद्देवसत्तमाः ॥८४॥
न नाशयिष्ये सरितमिदं तु शृणुतानघाः ।
यद् ब्रवीमि महासत्वा गर्वस्यास्य विनाशनम् ॥८५॥
पर्वतेन्द्रोस्य गर्वस्य विघातो भविता महान् ।
अनु[८१] जह्नुश्च धर्मात्मा गर्वं नाशयिता पुनः ॥८६॥

---

६२ चैव यत्तस्या - घ. । ६३ वा (?) । ६४ कत्थयसे - ख., गर्विता - घ. । ६५ क्रुद्धो - क. ख. । ६६ ... विक्रमः - क. ख । ६७ कत्थ्यते - ख. । ६८ तत्र - क., यतः (?) । ६९ पनिनीमेनां - क., पतितामेनां - ख. । ७० श्रेयं - क., श्रेष्ठा - ख. । ७१ तां धारय - घ. । ७२ नदीमेकां - ख. । ७३ विवो - क. । ७४ सरित्तमाम् - घ., सरित्तमः - क. । ७५ देव - घ. । ७६ पक्ष्यविरोधि - क., च मुनिबोधितः - घ. । ७७ देवैः - घ., नारायणसलोकपैः - क. । ७८ ...न्तु यदुक्तवान् - घ. । ७९ देवदेवश - घ. । ८० एवं - ख. । ८१ अथ - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मच्छापोपहता चेयं दुराचारा महानदी ।
पतिं मानुषमासाद्य पुत्रान् सप्त निहंस्यति ॥८७॥

सनत्कुमार उवाच

एवमुक्त्वा ततः शर्वो देवान् दैवतसत्तमः[८२] ।
उवाच ब्रूत किं वोन्यद् ददान्यद्य यथेप्सितम्[८३] ॥८८॥

देवा ऊचुः

भगवन् स्थानमिच्छामो[८४] देवस्य[८५] सुमहर्द्धिमत् ।
समन्तपञ्चकं क्षेत्रं सदाविरहितं त्वया ॥८९॥
भस्त्रेत्युक्ता[८६] यदस्माभिर्हिमवत्तनयाव्यया ।
पदं चाभयमिच्छन्ति तस्माद्[८७] भस्त्रापदं स्मृतम् ॥९०॥
योत्रागच्छेन्नियमवानर्चयेद् वृषभध्वजम् ।
सोश्वमेधफलं प्राप्य रुद्रलोकमवाप्नुयात् ॥९१॥
अहोरात्रोपवासेन चरुं यश्च निवेदयेत् ।
स नन्दीश्वरतुल्यस्ते भविता देवसत्तम ॥९२॥
प्राणान् यश्चात्र देवेश त्यजेत् सनियमो नरः ।
अथवानियमाद्देव यदृच्छामरणेन तु ॥९३॥
सोपि भूत्वा गणैस्तुल्यः[८८] स्थास्यत्याभूत[८९]संप्लवम् ।
युक्तो दिव्येन वपुषा तवानुचरतां गतः ॥९४॥
नमो[९०] भस्त्रेश्वरायेति यश्च कृत्वा सदा शुचिः[९१] ।
उत्तिष्ठेद्वा स्वपेद्वापि शक्रलोके स मोदते ॥९५॥
इदं[९२] महद् दिव्यमनन्तलाभं पठेत् सदा यो द्विजदेवसंसदि[९३] ।
महानुभावो गणपो महाजवो भवेत् स दिव्यस्तव देव संश्रयात् ॥९६॥

⊙ इति स्कन्दपुराणे गङ्गावतारे[९४] सप्तविंशोत्तरशततमोध्यायः[९५] ⊙

---

८२ दैवतसत्तमः - क. । ८३ दाता - क., .. न्यद्य दातान्यन्मवसे - ख., ... द्ददामि वरमीप्सितम् - घ. ।
८४ - मिच्छाम् - क. ख. । ८५ देवश्च - क. । ८६ ... त्युक्त्वा - क. ख. । ८७ चाभयमिच्छद्भिस्तस्माद् - घ. ।
८८ तुल्यो गणैर्भूत्वा - क. ख. घ. । ८९ ... त्याहूत - क. । ९० भूयो - क. । ९१ शुचि - ख. ।
९२ इमं - क. । ९३ द्विजवैद्यसंसदि - क. । ९४ गङ्गावतरे - ख. । ९५ अध्यायः १७७ - ख., अ. १२७ - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

तस्मिन् सब्रह्मका देवाः स्थाणोः स्थाने मनोरमे ।
लिङ्गं संस्थाप्य तीर्थानि सर्वे चक्रुः पृथक् पृथक् ॥१॥
- - - - - - - - - - - - - - - - - - - ।
- - - दित्यतीर्थञ्च विख्यातं चाश्वमेधिकम् ॥२॥
रुद्रतीर्थं स्थाणुतीर्थं ब्रह्मणस्तीर्थमेव च ।
इन्द्रतीर्थं वसूनाञ्च अश्विनो[१]रपरं स्मृतम् ॥३॥
यमस्य चापरं तीर्थं वायोस्तीर्थमथापरम् ।
विष्णोश्चाप्यपरं तीर्थं विख्यातं सुरपूजितम् ॥४॥
स्नात एतेषु विप्रर्षे चरुं कृत्वा निवेद्य च ।
एषु स्थानेषु दिव्येषु चरते ह्यकुतोभयः ॥५॥
अद्यापि तत्र ब्रह्मर्षे श्रूयते मधुरः स्वनः ।
मेखलावलयोन्मिश्रो[२] वंशवीणारवोत्कटः ॥६॥
गायन्तीनां वराङ्गीनां नृत्यन्तीनां तथैव च ।
नित्यमप्सरसां व्यास स्तुवन्तीनां त्रिलोचनम् ॥७॥

सनत्कुमार उवाच

ततस्ते सहिता देवा[३] ब्रह्मणा देवसत्तमम्[४] ।
ऊचुः पश्येम[५] भगवन्नस्या धारणमुत्तमम्[६] ॥८॥

देवदेव उवाच

यथेष्टं श्वः प्रभाते मां पश्यध्वं विबुधेश्वराः ।
धारयन्तं त्रिपथगां नदीं स्वगुणगर्विताम् ॥९॥
ते तथोक्ताः[७] प्रणम्येशं जग्मुर्गङ्गान्तिकं तदा ।
उवाच तां ततो[८] ब्रह्मा देवीं लोकसुखावहाम् ॥१०॥

---

१ अश्विनो - ख. । २ मलयोर्मिश्रो - ख. । ३ सह देवेन - क. ख. । ४ देवसत्तमाः - क. ख. ।
५ कल्ये समभवत् - क., ..दन्त्ये (न्ये) - ख. । ६ तव योगो (योगं) महेश्वर - क. ख., ...न्नद्या (?) ।
७ तथोक्त्वा (?) । ८ तदा - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मा गर्वं त्वं[९] कृथा गङ्गे मा विनाशमवाप्नुहि[१०] ।
ऋजुभावं समास्थाय पतेथास्त्वं सरिद्वरे ॥११॥
स्तुवती त्र्यम्बकं सोमं भक्त्या परमया युता ।
तवाकूतं विदित्वासौ विनाशायोद्यतः[११] प्रभुः ॥१२॥
कृच्छ्रेण तोषितः शम्भुस्तवैव[१२] हितकाम्यया ।
मापराधं कृथा भूयो लोकानां हितकाम्यया ॥१३॥
नाशात्तव सरिच्छ्रेष्ठे ध्रुवं लोकक्षयो भवेत् ।
एवं ते तां[१३] समाधाय देवाः सब्रह्मकास्तदा ॥१४॥
द्वितीयेहनि लोकेशाः समाजग्मुर्दिदृक्षवः ।
हिमवच्छिखरं दिव्यं नाम्ना वज्रोपलं[१४] महत् ॥१५॥
ब्रह्मा विष्णुरथानन्तो नरा[१५] ऋषय एव च ।
आदित्या वसवो रुद्रा अश्विनौ समरुद्गणाः ॥१६॥
साध्या देवास्सपितरो यक्षराक्षसपन्नगाः[१६] ।
पिशाचाश्चासुराश्चैव शृङ्गिणः पृश्नयस्तथा ॥१८॥
ऋषिरत्रिर्वसिष्ठश्च मरीचिः पुलहस्तथा ।
पुलस्त्यश्चाङ्गिराश्चैव भृगुः कश्यप एव च ॥१९॥
औशिजो[१८] वामदेवश्च गौतमश्च महतपाः ।
च्यवनोथ भरद्वाज इन्द्रप्रमतिरेव च ॥२०॥
रैभ्यश्च जमदग्निश्च कुणिबाहुश्च[१९] वीर्यवान् ।
अथर्वा श्वेतकेतुश्च दत्तात्रेयश्च विश्रुतः ॥२१॥
रुचिर्धर्मश्च दक्षश्च सावर्णी मुनयश्च ये[२०] ।
अग्निश्च वेदबाहुश्च शङ्खपान्नामतश्च यः ॥२२॥
अम्बरीवाँश्च विख्यातः केतुमानपि चापरः ।
एते चान्ये च बहव[२१] ऋषयो देवतास्तथा ॥२३॥

---

९ तं - ख. । १० ..मवाप्स्यमि - ख. । ११ विनाशायोद्यते - ख. । १२ स्तथैव - ख. । १३ तेषां - ख. । १४ वज्रोत्तमं - ख., भज्ञापदं (?) । १५ नरो - ख. । १६ यक्षा रा.ासपन्नगाः - ख. । १७ शृङ्गि त... - ख. । शृङ्गिणो दंष्ट्रिणस्तथा - घ । १८ कौशिको - घ. । १९ दानवाहुश्च - घ., ...वाहुश्च (?) । २० सावर्णाः साधवश्च - घ. । २१ बहवो - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विमानानि च सर्वाणि गन्धर्वाप्सरसां गणाः[२२] ।
जम्भका ऋतवश्चैव निकायाश्चैव सर्वशः ॥२४॥
तत्राजग्मुर्मुदा युक्ताः सर्वे परमवर्चसः ।
तेषां गगनसंस्थानां देवानां प्रेक्षतां तदा ॥२५॥
मेरुमन्दरसंकाशे[२३] तस्मिञ्छिखरसत्तमे[२४] ।
उमासहायो देवेशः सहसैवान्वदृश्यत ॥२६॥
तडिज्ज्वलनपिङ्गेन जटाभारेण राजता ।
ऊर्ध्वस्थितेन महता भगीरथमुवाच सः[२५] ॥२७॥

देवदेव उवाच

भगीरथ क्व सा गङ्गा पितॄणां तव तारणी[२६] ।
समाह्वय[२७] महाबाहो धारयिष्ये न संशयः ॥२८॥

सनत्कुमार उवाच

ततः स राजशार्दूलः स्मृत्वा तद् ब्रह्मणो वचः ।
सस्मार सरितं व्यास शिरसा प्राञ्जलिर्नतः ॥२९॥
सा तेन मनसाहूता स्वर्लोकनिलया नदी ।
क्षणेनाभ्याययौ देवी भुवर्लोकं[२८] शुभावहा[२९] ॥३०॥
तं लोकं सा[३०] समासाद्य मनोनिलजवा नदी ।
अलंचक्रे महावेगा सर्वं शुभशतारणिः[३१] ॥३१॥
ततः सा तिर्यगागम्य आकाशस्था महानदी ।
आकाशगङ्गा संजज्ञे नाम्ना ओघवतीति वै ॥३२॥
आकाशगङ्गा सा भूयो महावेगा महानदी ।
शिवमस्तु ममेत्येवं[३२] पापातार्धपथात्तु सा[३३] ।
शिवगङ्गा ततः प्रोक्ता नाम्ना शिवतरा[३४] हि सा ॥३३॥

---

२२ तथा - घ. । २३ संकाशाः - ख. । २४ शिर्खरि सत्तमे (?) । २५ ह (?) । २६ तारणात् (णीं) - ख. । २७ तामाह्वय - घ. । २८ भुवं लोकं - ख. । २९ सुखावहा - ख. । ३० च - ख । ३१ .. थ नोरणिः - ख. । ३२ शिवं मेस्तु शिवो देव - घ. । ३३ धर्म्यस्तु सा - ख., पातालगमनो यथा - घ. । ३४ शिवकरा - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कुर्वंती विपुलं शब्दं नदी वज्राशनिस्वनम्[३५] ।
यतो देवैः समं दृष्टा[३६] देवगङ्गा ततः स्मृता ॥३४॥
तां दृष्ट्वा मुनयः सर्वे देवलोकाश्च सर्वशः ।
जेपुस्ते[३७] सहसा शान्तिं संप्रहृष्टतनूरुहा ॥३५॥
तेषां सा जपतां व्यास नदी लोकसुखावहा ।
स्तुवंती भीतभीतेव त्रिधा भूत्वापतद् भुवि[३८] ॥३६॥
तां पतन्तीं महादेवस्त्रिभिर्वेगैर्महाजवाम् ।
जटाभारेण जग्राह देवानामेव सन्निधौ[३९] ॥३७॥
तं[४०] जटाभारमासाद्य सा त्रिस्रोता निरुल्वणा[४१] ।
न तस्यान्तं[४२] समासेदे निरुद्धा योगमायया[४३] ॥३८॥
यस्मात्सा भीतभीता तु स्तुवंती[४४] पतिता तदा ।
तस्मात्सा भीतगङ्गेति स्तोत्रगङ्गेति चोच्यते ॥३९॥
त्रिभिर्वेगैश्च पतिता यस्मात्सा सरिदुत्तमा ।
त्रिस्रोतेति ततः सा वै प्रोच्यते ब्रह्मवादिभिः[४५] ॥४०॥

सनत्कुमार उवाच

सा तु तस्मिन्निपतिता धृता देवेन मायया ।
जटारन्ध्रं[४६] विचिन्वाना उवास बहुलाः समाः ॥४१॥
पूर्णं सहस्रं वर्षाणां[४७] संस्थितां तां[४८] जटागृहे ।
देवास्तां ददृशु[४९]स्सर्वे कोटरान्तर्गतामिव ॥४२॥
ततस्ते सहसा देवाः प्रणिपत्य वृषध्वजम् ।
ऊचुर्विमनसो व्यास सरितं मा विनाशय[५०] ॥४३॥

---

३५ ...शनिप्रभम् - घ. । ३६ दृष्ट्वा - घ । ३७ जग्मुस्ते(?) । ३८ स्तुवतां भीतभीतेति त्रिधाभूत्वापतद्दिवः - घ. । ३९ पश्यतां - घ. । ४० तां - ख. । ४१ तिस्रोतोता - ख., त्रिभिः स्रोतोभिरुल्वणैः - घ. । ४२ च सा तं (न्तं?) - घ. । ४३ लोकबन्धुना - घ. । ४४ स्तुवता (तीं?, - ख. । ४५ ब्रह्मचारिभिः - ख. । ४६ तत्र रन्ध्रं (?) । ४७ ..वर्षसहस्रं तु - घ. । ४८ तां म (तां) - ख. । ४९ देवा ना (न?) ददृशुः - ख., ते देवाः - घ. । ५० व्यनाशय - क. ख., ... यः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

तेषां तद्वचनं श्रुत्वा दृष्ट्वा राजानमेव च ।
विदुधाव जटाभारं[५१] देवदेवो दयामयः ॥४४॥
विधुन्वतो जटाभारं पेतुर्वै तत्र बिन्दवः ।
ते मुक्ताफलसंकाशाः पूर्णचन्द्रांशुनिर्मलाः[५२] ॥४५॥
चक्रुर्बिन्दुसरो दिव्यं सागराकारवर्चसम्[५३] ।
तस्माच्छ्रोतांसि[५४] सप्तैव निःसृतानि महान्ति च ॥४६॥
नलिनी ह्लादिनी[५५] चैव प्लावनी[५६] चैव पूर्वगा ।
सीता चक्षुश्च सिन्धुश्च तिस्रस्ता वै प्रतीचिगाः[५७] ॥४७॥
मध्यमं[५८] त्वन्वगात्स्रोतो राजा येन भगीरथः ।
भागीरथीति सा गङ्गा प्रोच्यते ब्रह्मवादिभिः ॥४८॥
दारयन्ती[५९] जगामाथ हिमवन्तं सरिद्वरा ।
निरुद्धा हिमवत्पादे रत्नशृंगे शिलोच्चये ॥४९॥
तां निरुद्धां ततो वीक्ष्य विषण्णवदनस्तदा[६०] ।
राजा भगीरथो व्यास ब्रह्माणं मनसास्मरत् ॥५०॥
ततस्स भगवान् ब्रह्मा सुप्रतीकं महागजम् ।
उवाच दन्तवज्राभ्यां[६१] दारयैनं शिलोच्चयम् ॥५१॥
स यत्र गिरिराड् भिन्नः सुप्रतीकेन हस्तिना ।
गङ्गाद्वारं तु तत्[६२] प्रोक्तं सुपुण्यं चैव तत् स्मृतम्[६३] ॥५२॥
गजश्चाभिमुखो यावन्नातिष्ठत महायशाः ।
स्रोतसा तावदध्वानमूढो द्वादशयोजनम् ॥५३॥

सनत्कुमार उवाच

एतत् पुण्यतमं व्यास गङ्गावतरणं स्मृतम् ।
स्थानं भस्त्रापदं नाम मया यत् परिकीर्तितम् ॥५४॥

---

५१ विन्रु (दु) धाव - क., विधुन्वनो जटाभारं - घ. । ५२ शीतलाः - ख. । ५३ वर्चसा - क. ख. ।
५४ तस्य स्रोतांसि - ख. । ५५ ह्लादनी - क., ह्लदिनी - ख. । ५६ मालिनी - घ. । ५७ प्रतीच्यगाः - क.ख. ।
५८ मध्यगं - क., तटगा - घ. । ५९ जग्मुपी सा (?), जिगमीषुर् (?) । ६० .. स्तथा - ख. ।
६१ वज्रहस्ताभ्यां - घ. । ६२ यत् - ख. । ६३ दैवतं स्तुतम् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

य इदं[६४] शृणुयान्मर्त्यः सदा पर्वसु पर्वसु ।
स देवलोकं संप्राप्य देवैःसह चरिष्यति ।।५५।।
इदं महत्पापविमोचनं[६५] शुभं विमानयानाप्सरसां विलम्भनम्[६६] ।
शृणोति यो नित्यमदीनमानसः स याति लोकान्विदितान्दिवौकसाम् ।।५६।।

⊙ इति स्कन्दपुराणे गङ्गावतरणे अष्टाविंशोत्तरशततमोध्यायः ⊙

सनत्कुमार उवाच

अतः परं प्रवक्ष्यामि हालाहलमशेषतः ।
संग्रामं दितिपुत्राणां देवानां च भयावहम् ।।१।।
हालाहल इति ख्यातो गणो विक्रान्तपौरुषः ।
असुराणां बभौ व्यास दारुणो ब्रह्मकण्टकः ।।२।।
गतेषु[१] दनुपुत्रेषु स गणः[२] क्रोधमूर्च्छितः ।
बलं कृत्वा मुखं[३] सर्वान्[४] देवान्युद्धे समाह्वयत् ।।३।।
तेषां तेषाञ्च संग्रामः सुघोरः समवर्तत ।
असुराणां जयश्चैव सदैव समपद्यत ।।४०।।
ततस्ते विबुधाः सर्वे विदर्पा हतविक्रमाः ।
हृतराज्याभ्यगच्छन्त ब्रह्माणं लोककारणम् ।।५।।
ते तमूचूश्च संहत्य हृतराज्याः स्म सांप्रतम् ।
कथं राज्यं पुनर्देव लभेम तव तेजसा ।।६।।
तेषां श्रुत्वा वचस्तद्वै देवः सलिलसम्भवः ।
उवाच देवान् देवेशं प्रसादयत मा चिरम् ।।७।।
स वो दाता महावीर्यो बलं देवस्त्रिलोचनः ।
येन तान् समरे सर्वान् विक्रमेण विजेष्यथ[५] ।।८।।

---

६४ इमं - क. । ६५ विनाशनं - ख । ६६ विले (लो) भनं - क. ।
१ हतेपु (?) । २ बलः - ख. । ३ मुखे (?) । ४ सर्वे - ख. । ५ विजेष्यत - क., विजेष्यते - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

त एवमुक्ता देवेशं तपसाराध्य शङ्करम् ।
ऊचुः प्राञ्जलयो देवा बलं नो देहि यज्ञहन् ॥९॥
तेषां तु जपतामेवं[6] तपसा तोषितो हरः ।
ददौ मन्त्रमनाधृष्यं[7] सर्वमन्त्रोत्तमं[8] तदा ॥१०॥
तं ते संप्राप्य विप्रर्षे कृतरक्षा दिवौकसः ।
अमूढा मूढवत् सर्वे असुरेष्वचरन् ततः[9] ॥११॥
असुरास्तु[10] तदा मूढान् दृष्ट्वा सर्वान्दिवौकसः ।
अमन्यन्त दुराचारा मूढा इति यथातथम् ॥१२॥
हृतरज्या इमे देवाः सर्वे मूढेन चेतसा ।
उन्मत्ता विभ्रमन्त्येवं पश्यतैतान्[11] सुरेतराः ॥१३॥
आक्रोशन्तोपरे तांस्तु अभिजघ्नुश्च दारुणम् ।
बबन्धुश्च यथाकामं मुमुचुश्च तथापरे ॥१४॥
एवं तेषां तदा व्यास वर्ततां शुभकर्मणाम् ।
सुमहानभवद् धर्मः असुराणां व्यनीनशत् ॥१५॥
तेषां तेनापचारेण असुराणां दुरात्मनाम् ।
धर्मनाशाद् बलं क्षीणं बुबुधुर्देवतागणाः[12] ॥१६॥

सनत्कुमार उवाच

ततस्ते ब्रह्मणा[13]भ्युक्ताः[14] सर्वे दिव्यास्त्रधारिणः ।
आहूयासुरशार्दूलान् युद्धे सर्वान्व्यसूदयन् ॥१७॥
बलो यत्र हतः संख्ये[15] वज्रेण शतपर्वणा ।
देवेन्द्रेणाभिविक्रम्य बलहा स यतः[16] स्मृतः ॥१८॥

सनत्कुमार उवाच

अन्धकारकमन्यच्च[17] युद्धमासीत् सुभैरवम् ।
दशवर्षसहस्राणि शतानि च पुनर्दश ॥१९॥

---

६ जपतामेव - क. । ७ यन्त्रमनाधृष्यं - घ. । ८ ...यन्त्रोत्तमं - घ. । ९ तदा - क., तपः - ख. ।
१० असुराँस्तु - क., असुरास्तान् (?) । ११ पश्यैनं (नान्?) - क. । १२ ववृधुर्देवतागणाः - घ. ।
१३ ब्राह्मणा - क. ब्रह्मणो (?) । १४ युक्ताः - क. । १५ शंखे - क. ख. । १६ ततः - घ. ।
१७ अन्धकारं तथान्यश्च - घ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

आसीद् दनुसुतः श्रीमान् देवतान्तक इत्युत ।
स मायां संपरीप्सन्[१८] वै रुद्रमाराधयत् पुरा ।।२०।।
तस्मै वर्षसहस्रेण वरकाल उपस्थिते ।
ब्रह्मा ददौ वरं व्यास दनोः पुत्राय धीमते ।।२१।।
स वव्रे तामसीं मायां सर्वभूतप्रबाधनीम् ।
अभेद्या[१९]मनिवार्याञ्च यां तु[२०] वेत्ति न[२१] कश्चन ।।२२।।
तस्मै प्रादात् स तां मायामिदं चोवाच तं तदा ।
भविष्यति हि[२२] मायेयं यथोक्ता[२३] ते महाबल ।
करिष्यसि[२४] न चेच्छन्दं[२५] यथाकामं दनोः सुत ।।२३।।

सनत्कुमार उवाच

अथ लब्धवरो व्यास मायाच्छन्नोसुरस्ततः ।
बहुभिर्दानवैः सार्धं सर्वाँल्लोकानबाधत ।।२४।।
देवा अपि भयात्तस्य नावतिष्ठन् तदग्रतः ।
देवाः सर्वे भयोद्विग्नास्तस्थुर्नैव तदग्रतः ।
स्थानानि ते परित्यज्य यत्र तत्रावतस्थिरे ।।२५।।
आहूताः क्रूरशब्देन दानवैर्बलदर्पितैः ।
तथापि नावतिष्ठन्त तेषामग्रे दिवौकसः ।।२६।।
ऋषयस्तानिदं प्राप्य ऊचुः सर्वे प्रमन्यवः ।
रक्षां कुरुत लोकानां मावलीनावतिष्ठत ।।२७।।
वयं च तपसा[२६] देवा धारयिष्याम संयताः ।
मा भयं वोस्तु युध्यध्वं कुरुध्वं विज्वरं जगत् ।।२८।।
त एवमुक्तास्तैर्व्यास ऋषिभिर्लोककारणात् ।
भयान्नैवावतिष्ठन्त तस्य दस्योस्तदाग्रतः ।।२९।।

---

१८ परिसन्धाय - घ. । १९ अवेद्या - ख. । २० तान्न - क. घ. । २१ हि - घ. । २२ च - घ. ।
२३ यथोक्तं - क. । २४ करिष्यति - ख. । २५ भवेच्छब्दं - ख., ...च्छन्दं - क. । २६ वस्तपसा - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यदा नैवावतिष्ठन्ते तथाप्युक्ता दिवौकसः ।
उपायमपरं प्राहुस्तदा ते मुनिसत्तमाः ।।३०।।
आहूयाप्सरसः सर्वा विसृज्यन्तां सुरोत्तमाः ।
कामेनाविष्टमनसामसुराणामुपान्तिकम् ।।३१।।
ताँस्तास्वासक्तहृदयान् पीतमैरेयविह्वलान् ।
विक्रम्य हंस्यथ[२७] सुरा बलाद्युद्धे[२८] बलीयसः ।।३२।।
ततस्ताः प्रहिता देवैर्वञ्चनार्थं सुरद्विषाम् ।
क्वणन्नूपुरनिर्ह्लादकूजितोत्कर्णसारसाः[२९] ।।३३।।
पीनोत्तुङ्गस्तनाभोगहारविक्षिप्तयष्टयः[३०] ।
वित्रस्तबालहरिणीसदृशायतलोचनाः ।।३४।।
चलत्कुण्डलसंघृष्टपाण्डरागण्डमण्डलाः ।
शिखिकण्ठच्छविहर[३१]श्लक्ष्णवासोधराः पराः ।।३५।।
प्रत्यग्रविद्रुमच्छेदताम्रोष्ठाधरपंक्तयः[३२] ।
वस्त्रान्तकुसुमापीडसंसक्तकरपल्लवाः[३३] ।।३६।।
नैकरत्नप्रभाकीर्ण्णकेयूराबद्धबाहवः ।
मयूरबर्हसंकाशचारुकुञ्चितमूर्धजाः ।।३७।।
कल्पद्रुमसमुद्भूतकुसुमस्त्रग्विभूषणाः ।
शुकाङ्गहरिताकारकञ्चुकोत्तांसितस्तनाः ।।३८।।
मत्तमातङ्गविक्रान्तलीलाविभ्रमरेचकाः ।
मत्तकोकिलदात्यूहकलनिस्वनभाषिताः ।।३९।।
महतामप्युपात्तानां तपसां विघ्नहेतवः ।
दर्शयामासुरात्मानं विद्विषां वधहेतवः ।।४०।।
अथ तेप्सरसो दृष्टवा दैतेयाः काममोहिताः ।
तासामर्थे वराङ्गीनामभिजघ्नुः परस्परम् ।।४१।।
गदा[३४]परिघचक्रासिशूलमुद्गरशक्तिभिः ।
धनुःकुलिशतीक्ष्णाग्रभिन्दिपालपरश्वधैः ।।४२।।

---

२७ हंस्यत - क. । २८... न्युद्धे - क. ख । २९ ... त्कीर्णसारसाः - ख. । ३० दृप्टयः (?) । ३१ हरि (हरि) - क., हरित् - घ. । ३२ पल्लवाः - (?) । ३३ ...संरक्तपल्लवाः - क. । ३४ तदा - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ममेयश्चारुसर्वाङ्गी न तवेयं सुमध्यमा ।
अथवा युद्धशुल्कास्तु मुञ्चैनां प्रहरस्व माम् ।।४३।।
इत्युक्त्वा विविधा वाचो दैतेयाः कालचोदिताः ।
अन्योन्यवधमासाद्य प्रजग्मुस्ते यमक्षयम् ।।४४।।
हतशिष्टास्तु ये तत्र दानवाः शान्तपौरुषाः ।
विबुधैरुग्रतेजोभिस्तेपि सर्वे रणे हताः ।।४५।।
य इदं[35] पठने विशुद्धबुद्धिर्निधनं[36] संसदि[37] दानवेश्वराणाम् ।
मनुजो युवतीरिहैव लोके स लभेदप्सरसां समानरूपाः ।।४६।।

⊙ इति स्कन्दपुराणे अन्धकारयुद्धे ऊनत्रिंशोत्तरशततमोध्यायः[38] ⊙

व्यास उवाच

अन्धकः स कथं दैत्यो हरेण विनिपातितः ।
यस्य त्रैलोक्यमखिलं भयात् सर्वं वशे स्थितम् ।।१।।

सनत्कुमार उवाच

अन्धको नाम दैत्येन्द्र आदौ[1] त्रैलोक्यकण्टकः ।
ब्रह्मणस्तु वरान् प्राप्य सोवध्यो देवमानुषैः ।।२।।
न तस्य युध्दे क्रुद्धस्य विष्णुः शक्रो यमोथवा ।
शक्तो ह्यभिमुखे स्थातुं किमुतान्ये दिवौकसः ।।३।।
स कदाचिद् बलोद्वृत्तः पर्यटन् पृथिवीमिमाम् ।
अपश्यन्मन्दरप्रस्थे देवीं हिमवतः सुताम् ।।४।।
स तामालोक्य दैत्येन्द्रः कामोपहतचेतनः ।
अहमेव प्रभुरिति देव्यां[2] दौष्ट्यमचिन्तयत् ।।५।।
चिन्तयित्वा तु तां[3] प्राह दानवाननुयायिनः ।
आनयध्वमिमां शीघ्रं मत्समीपं नगात्मजाम् ।।६।।

---

३५ इमं - क. ख. । ३६ शुद्धिर्निधनं - ख. । ३७ संगति (?) । ३८ १७९ - ख., ११९ - घ. ।
१ आसीत् - ख. । २ दैत्यो - क. । ३ तान् (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तच्छ्रुत्वा तस्य वचनं मन्मथाविष्टचेतसः ।
प्रह्लादो वदतां श्रेष्ठ इदं वचनमब्रवीत् ॥७॥
दानवेन्द्र हितं वाक्यं यदायत्यां विशुध्यते ।
अवश्यं तन्मया वाच्यं बन्धुस्नेहाद्विशेषतः ॥८॥
एषा हिमवतः पुत्री पत्नी शर्वस्य धीमतः ।
नास्यां दौष्ट्यं[४] त्वया चिन्त्यं मा नो[५] धक्ष्यति[६] तेजसा ॥९॥
जगतो मातरं देवीं पूज्यां दुष्प्रेक्ष्यतेजसम्[७] ।
उमां दानवशार्दूल नाधिक्षेप्तुमिहार्हसि ॥१०॥
किं कण्ठे महतीं बद्ध्वा शिलां मूढेन चेतसा ।
गम्भीरावर्तिनीं भीमां[८] नदीं त्वं तर्तुमिच्छसि[९] ॥११॥
भूत्वा पतङ्गः किं मोहाच्छिखां दीप्तां विभावसोः ।
दानवानामधिपते नाशाय स्प्रष्टुमिच्छसि ॥१२॥
मा विनाशं नयेः[१०] सर्वान् समूलान्दानवेश्वर ।
निवर्त्यतां मनो देव्या नैतद्युक्तं विपश्चिताम् ॥१३॥
त्वं विपश्चित् कुलीनश्च कुलीनानां च गोत्रजः ।
यज्वा च धर्मनित्यश्च नैतद्युक्तं तव प्रभो ॥१४॥
तव सन्ति स्त्रियो बह्व्यः सर्वाश्च स्थिरयौवनाः ।
प्रकृत्यैव सुरूपाङ्ग्यो देव्याश्चेतो निवर्त्यताम्[११] ॥१५॥
योस्माकं तपसा तुष्टो यच्छते कांक्षितान् वरान् ।
तस्य त्वं देवदेवस्य देव्याः पापं चिकीर्षसि ॥१६॥
येन दक्षः क्रतुः कालः कामश्च गमितः क्षयम् ।
तस्य त्वं देवदेवस्य देहार्धं हर्तुमिच्छसि ॥१७॥
लिङ्गेषु योर्च्यते देवः सुरासुरमहोरगैः ।
तस्य देवीं जगद्धात्रीं कथं त्वमवमन्यसे ॥१८॥

---

४ दुष्टं - क. ख. । ५ मारो - क. । ६ धक्ष्यसि - ख., धक्ष्येत ?) । ७ तेजसः - ख., चेतसः - क. ।
८ अप्सुतः सत्सु (वर्षत्सु?) महतीं - क. । ९ तरितुमिच्छसि - क. । १० मा विनाशाय नः - ख., नय - क. ।
११ निवर्तताम् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स चैको नाभिमन्तव्य[१२]स्त्वया देवः पिनाकधृक् ।
इच्छन्[१३] कुर्याद्धि रूपाणां सहस्राणि शतानि च ॥१९॥
प्रमथानां सहस्राणि योगिनां भीमकर्मणाम् ।
तस्याग्रतो व्रजन्त्येते यथैव तव दानवाः ॥२०॥
यो हरेद् भास्कराद्दीप्तिं चन्द्रात्कान्तिं क्षितेः क्षमाम् ।
वासुकेर्यो हरेद् दंष्ट्रां स हरेत्तस्य पार्वतीम् ॥२१॥
तस्योत्तमाङ्गं सकलं शतधा शकलीभवेत् ।
यः शर्वभार्यां तामार्यामिवमन्येत बालिशः ॥२२॥
पितामहेन यच्चोक्तस्तदा त्वं पद्मयोनिना ।
वरदानावसाने तु वचस्तत्[१४] स्मर्तुमर्हसि ॥२३॥
यैषा[१५] श्रीस्ते दितिसुत मया दत्ता सुदुर्लभा ।
दुर्नयेन तवैवेयं यास्यत्यन्यत्र दनाव[१६] ॥२४॥
कटुकान्यपि पथ्यानि बन्धूनां[१७] वचनानि ये ।
न शृण्वन्त्यनयोपेतास्ते यान्ति निधनं नराः ॥२५॥
समेष्याम वयं देवं प्रियार्थे तव शङ्करम् ।
समेत्यानुसमेष्यामः सर्वे वैवस्वतक्षये ॥२६॥
इत्युक्तः स तदा तेन बन्धुना शोभनं वचः ।
नैतदेवमिति प्राह प्रहसन् कालचोदितः ॥२७॥
तस्मिन्नपरिहार्ये[१८] तु कार्याकार्ये प्रिये मम ।
यदि युद्धे क्षयो मे स्यात् क्षयोपि विजयो मम ॥२८॥
मनसैव हि भूतानां विदधानः शुभाशुभम् ।
तथा वाप्यन्यथा[१९] वापि काल एव[२०] करिष्यति ॥२९॥
प्रत्याख्याय ततो[२१] रागात् प्रह्लादं दानवेश्वरः ।
देवीं स्प्रष्टुं[२२] दधे चेतः[२३] पतङ्गोग्निशिखामिव ॥३०॥

---

१२ नाति (नाव?) मन्तव्यः - क. । १३ इत्थं - क. । १४ .. स्त्वं - क. ख. । १५ येषां (यैषां?) - क. ।
१६ दानवान् - क. । १७ बहूनां - ख. । १८ तस्मिन्नपिमहार्ये - क. । १९ चाप्यन्यथा - क. ।
२० एष - क. । २१ तथा ? । २२ द्रष्टुं - ख. । २३ (ध) ... च्चेतः - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्वा भगवती दुष्टभावं[२४] दुरात्मनः ।
गणानाज्ञापयामास[२५] युद्धाय सुमहाबलान् ॥३१॥
अथ ते ज्ञापिता देव्या विविधायुधपाणयः ।
दानवाभिमुखीभूताः सोमनन्दिपुरस्सराः ॥३२॥
ते कृत्वा सुमहद्युद्धं दानवानुचरैः सह ।
विक्षिप्ता दानवेन्द्रेण वायुना जलदा इव ॥३३॥
एतस्मिन्नन्तरे देवी दृष्ट्वोदीर्णं तमन्धकम् ।
स्वयमेवाभिदुद्राव गृहीत्वा सशरं धनुः ॥३४॥
अन्धकं[२६] पंचविंशत्या सा जघान स्तनान्तरे ।
शराणां निशिताग्राणां स मुमोह पपात च ॥३५॥
स मुहूर्त्तात्तदा संज्ञां लब्ध्वा मानाच्च दानवः ।
उत्तस्थौ वेगवाञ्छीघ्रमुग्रोद्यतशरासनः[२७] ॥३६॥
ततः स उत्थाय पुनर्देवीं प्रति महासुरः ।
मुमोच शरवर्षाणि वर्षाणीव बलाहकः ॥३७॥
ततस्त्रिशूलमुद्यम्य[२८] देवीं[२९] दीप्ताग्नितेजसम्[३०] ।
अन्धकं हन्तुमारब्धां[३१] शनैर्देवो न्यषेधयत् ॥३८॥
दानवेन्द्रो ममैवायं शास्यो मा त्वं श्रमं कृथाः ।
अहमेवास्य शूलेन भेत्स्यामि हृदयं रणे ॥३९॥
एवमुक्ता[३२] तु सा देवी देवदेवेन पार्वती ।
विरराम ततो युद्धाददृश्या संबभूव च ॥४०॥
ततो देवः स्वयं प्राह नन्दिनं गणनायकम् ।
युध्यध्वं दानवैस्सार्धं गणानाहूय सर्वशः ॥४१॥
आहूय नन्दी[३३] तान्सर्वान् गणाञ्छर्वाज्ञया तदा ।
उवाच भूयो[३४] देवेशं शृणु येभ्यागता गणाः ॥४२॥

---

२४ दुष्टं भावं - ख. । २५ गणानां ज्ञापयामास - क । २६ अन्धकः - क. । २७ मुद्यतोग्रशरासनः (?) ।
२८ ततश्शूलं समुद्यम्ध - घ. । २९ देवी (?) । ३० दीप्तार्कतेजसमम् - घ. । ३१ समारब्धा (?) ।
३२ एवमुक्त्वा - क. ख. । ३३ ततो नन्दी तु - घ । ३४ तत उवाच - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विशिष्टेष्टास्त्वया[३५] सृष्टाः स्वयं सृष्टौ सनातनाः[३६] ।
प्रजाभावेन[३७] नानात्वं येषां[३८] तत्वं सुदुर्वचम्[३९] ॥४३॥
वृषध्वजा वृषरथाश्चन्द्रावयवभूषणाः ।
त इमे समनुप्राप्ता रुद्रा रुद्र तव प्रियाः ॥४४॥
कोटीशतसहस्राणां शतमेषां महात्मनाम् ।
तावन्ति च सहस्राणि शतानि च तथा विभो ॥४५॥
षष्टिश्चैव[४०] सहस्राणि येषां तुल्यो न विद्यते ।
देवानां नीलकण्ठानां नीलकण्ठमहात्मनाम् ॥४६॥
एते शूरा बलेषूग्रा[४१] उग्रोदग्रपराक्रमाः[४२] ।
युध्यमानाः करिष्यन्ति तव प्रमुदितं मनः ॥४७॥
एतेषामेव रुद्राणामनुरूपाः प्रभावतः ।
तन्मात्रा द्वारपाला वै विक्रान्ताः क्रान्तमन्यवः ॥४८॥
इतीमे कपिसिंहास्याः कपिसिंहबला रणे ।
दानवैस्सह योत्स्यन्ति वारणा इव वारणैः ॥४९॥
रुद्राश्च रुद्रपुत्राश्च रुद्राणां ये च पार्षदाः ।
रुद्राधिप न किञ्चिद्धि येषां[४३]साध्यं[४४] न विद्यते ॥५०॥
एकैकस्यास्य रुद्रस्य पुत्राः पुत्रवतां[४५] वर[४६] ।
पञ्च पञ्च महावीर्याः काकपक्षधराश्च ते ॥५१॥
भुजतः सहसोत्पन्नास्तव ये क्रोध सम्भवाः[४७] ।
वीरभद्रं पुरस्कृत्य त इमे[४८] समुपथिताः ॥५२॥
एषां षष्टिः स्मृताः कोटयः सहस्राणि च षोडश ।
गणपानां गणाध्यक्ष त्वत्प्रियाणामिहागताः ॥५३॥
एवं देव प्रियार्थं ते दक्षयज्ञः समृद्धिमान् ।
यैर्ध्वस्तः पुरहन् देव पश्य तान् पुनरागतान् ॥५४॥

---

३५ ...ष्टेष्ट त्वया - क. । ३६ सनातना - क., सनातनः (न) - ख. । ३७ प्रजाभावन - क. । ३८ तव - ख. । ३९ धनुर्धराः - ख. । ४० षष्टिश्चैव - क. । ४१ एतेषुबलषूदग्रा - ख. । ४२ उग्रा उग्रपराक्रमाः - ख. । ४३ एषां (?) । ४४ शोध्यं - क. । ४५ पुत्रशतां - क. । ४६ वराः - ख. । ७४ सन्निभाः - क. ख. । ४८ य इमे - क., इतीमे - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

आपद्भावप्रपन्नास्तु[४९] येन ध्यातास्त्वयानघ ।
कोटीशतसहस्राख्यास्तेष्वमी समुपस्थिताः ॥५६॥
महानला[५०] यथा वृक्षान् प्रदीप्तान् वायुना सह ।
एतेभिर्निर्दहिष्यन्ति दानवाँस्त्वत्प्रिये रताः ॥५७॥
गुहावास गुह्यस्यापि क्रीडमानस्य ये सुरैः ।
प्रियार्थं गणपा दत्ता नानामृगशताननाः[५१] ॥५८॥
ज्वलनाचलवत्तेषां त्रिंशत्कोटयो महेश्वर ।
गणपानामनुप्राप्ताः प्रियं कर्तुं तवानघ ॥५९॥
इमे रक्तम्बरधरा रक्तस्रगनुलेपनाः ।
ओष्ठजाद्रुधिराज्जाता रक्ता नाम गणेश्वराः ॥६०॥
अङ्गारकस्यानुचरा महाबलपराक्रमाः ।
षष्टिकोटिसहस्राणि त इमे समुपस्थिताः ॥६१॥
मन्तव्यं न बलं चापि एतन्मात्रं त्वयानघ ।
एते ह्यष्टगुणैश्वर्यं तव देव प्रसादजम् ॥६२॥
संविश्राणा[५२] महेशान करिष्यन्ति बहूनपि ।
लोकानेते समुद्युक्तान् सदेवासुरमानुषान् ॥६३॥
संयुगे युगमूलान्तं दहेयुः सुरदानवान् ।
य एते कुन्दसंकाशाः स्वर्णोत्पलविभूषिताः ॥६४॥
दंशिता गणपेशान सर्वे युद्धकुतूहलाः ।
ब्रह्मण्या[५३]स्त इमे शूराश्चन्द्रावयवभूषणाः ॥६५॥
रुद्रा रुद्रपते प्राप्ताः पश्येमान् युद्धलालसान् ।
बालार्कसमवर्णाभाः सशस्त्राश्च चतुर्भुजाः ॥६६॥
द्वारपाला ह्यमी देव कपीन्द्रसदृशाननाः ।
रक्ताम्बरा रक्तमाल्या रक्तचन्दनरूषिताः ॥६७॥

---

४९ आमद्भावप्रपन्नास्तु - क. । ५० महानलो - ख. । ५१ शुभाननाः - ख. । ५२ विभूच्चाणा - क. । विकुर्वाणा - ख. । ५३ ब्रह्मणा - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ब्रह्मण्या वरदाः शूराः कौमारब्रह्मचारिणः ।
मत्तबर्हिसमारूढाः सर्वे वै शक्तिपाणयः ॥६८॥
एते विक्रान्तविक्रान्ताः स्कन्दा नाम कुमारकाः ।
उच्चैःश्रवःप्रतिसमानश्वान् ये हेममालिनः ॥६८॥
विरेजुरास्थिता देव[५४] पीतकौशेयवाससः ।
बालार्कसमवर्णाभा बालोत्पलदलेक्षणाः ॥७०॥
विशाखा नाम ते पुत्रा रुद्राणां शक्तिपाणयः ।
यानेतानीक्षसे देव सितवस्त्रान् सिताननान् ॥७१॥
विद्योतमानान् वपुषा[५५] बहूँश्चन्द्रानिवोदितान् ।
काकपक्षधरान्मुण्डाँस्ताम्रचूडेष्ववस्थितान् ॥७२॥
एते विख्यातवीर्यास्ते शाखा नाम कुमारकाः ।
य इमे छागमेषस्थाः किंशुकाशोकवर्चसः ॥७३॥
शूराश्चौदार्यवन्तश्च[५६] शिशुतामरसाननाः ।
नैगमेषस्य पुत्रस्य तव तुल्यपरिच्छदाः ॥७४॥
नैगमेषा इति ख्याता ह्येते देव कुमारकाः ।
य इमे कालमेघाभाः कालमेघनिभस्वनाः ॥७५॥
केशजास्तव ते देव प्रमथाः[५७] समुपस्थिताः ।
इमे च रक्ता बहवो गणाः परबलार्दनाः ॥७६॥
बरूथिनो वर्मिणश्च रथिनश्चित्रयोधिनः ।
नानाप्रहरणाः सर्वे सर्वे युद्धविशारदाः[५८] ॥७७॥
कृतिनो युद्धशौण्डाश्च सर्व एव च दंशिताः ।
सितासितानां मेघानां गिरीणां च समत्विषः ।
सनक्रमीनमकरा ये समुद्रा इवोद्धताः ॥७८॥
सिंहव्याघ्रवराहास्याः परिघाशनिपाणयः ।
तवैवानुग्रहादेते प्रमथास्त्वामुपस्थिताः ॥७९॥

---

५४ देवाः - क. । ५५ विद्योतमानवपुषा (?) । ५६ औदार्यवन्तश्च - क. । ५७ प्रथमाः - क. ।
५८ सर्वयुद्धविशारदाः (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एते वै पार्षदाः शूराः स्कन्दस्य परमात्मनः
त्रिदशैः क्रीडनं दत्ताः सर्वशस्त्वामुपस्थिताः ।।८०।।
दृप्तप्रमुदितं स्फीतं प्रमथानीकमीश्वर[५९] ।
दानवानीकभेदार्थे समर्थमिति मे मतिः ।।८१।।
प्रविहायान्यकार्याणि[६०] परमादरमास्थितम् ।
देवारीणामनर्थाय विध्वंसयदनन्तरम् (?) ।।८२।।
करिगिरितरुतोरणप्रभास्तरुणदिवाकरतुल्यतेजसः ।
गणपतिपतयस्तव ह्यमी रिपुबलमीश्वर जेतुमुद्यताः[६१] । ८३।।
अचरचरपते ततोन्धकः प्रतिसमतां लभते रणे स्थितः ।
गणपतिशतयूथसंवृतो विसृज विभोवनतान् गणेश्वरान् ।।८४।।

⊙ इति स्कन्दपुराणे अन्धकयुद्धोपक्रमे त्रिंशदुत्तरशततमोध्यायः ⊙

सनत्कुमार उवाच

अथापश्यत्तदायातान् भगवान् गणनायकान् ।
स्वैरनीकैस्सुबहुशः सन्नद्धान् युद्धलालसान् ।।१।।
दिण्डिञ्च भारभूतिञ्च सोमशर्माणमेव च ।
करिकं मेघनादं च उदरेमणिमेव च ।।२।।
आर्सात्ति धूतपापं च चन्द्रमौलिनमेव च ।
आदित्यमालं विक्रान्तं सुकेशं च महाबलम् ।।३।।
तालकेतुं ज्वरञ्चैव दण्डपाणिनमूर्जितम् ।
एताँश्चान्याँश्च विख्यातान् गुह्याँश्च गणनायकान् ।।४।।
महागणपतिञ्चैव खोठामुद्गरमेव च ।
संपूज्य भगवान् सर्वान् प्रसाद्य[१] च पुनः पुनः ।।५।।

---

५९ ... मीश्वरं - क. ख. । ६० विप्रहायान्यकार्याणि - क. । ६१ .. मुद्यतान् - क. ।
१ प्रसह्य (?) क., संभाष्य - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

उवाच मेघनिर्ह्लादः शलदुन्दुभिनिस्वनः ।
दानवैः सह यूयं मे योद्धुमर्हथ सत्तमाः ॥६॥

यूयमेव गणाध्यक्षाः पर्याप्तास्तान्प्रबाधने ।
तस्माद्यूयं महासत्वाः सगणाः सपदानुगाः ।
गच्छध्वं संविनाशाय पूजितोस्मि महाबलाः ॥७॥

त एवमुक्ता देवेन प्रणम्य शिरसा हरम् ।
विप्रजग्मुर्महात्मानो देवोपि संप्रतिष्ठत[२] ॥८॥

ततः समभवच्छब्द उदधेरिव भिद्यतः ।
अन्धकासुरसैन्यस्य मन्दरं समुपेयुषः ॥९॥

निशाम्य दानवारावं श्रोत्रायासकरं भृशम् ।
प्रमथा[३] रुरुधुर्घोरं[४] युगान्ते जलदा इव ॥१०॥

तावन्योन्यबलोद्धूतावभूतां[५] सैन्यसागरौ ।
प्रलयान्त इवोद्धूतौ भिद्यमानौ महार्णवौ ॥११॥

देवदेव उवाच

जुहुध्यरिविनाशाय[६] ब्रह्मन्तस्मज्जयाय च ।
त्वं चापि नन्दिन् रक्षस्व सर्वैरेतैर्गणैर्वृतः ॥१२॥

आकाशस्थाश्च ये ह्येते नदन्त्यम्बुमुचो यथा ।
आकाशगानेव रिपूनेते बाधन्तु[७] दानवान् ॥१३॥

सनत्कुमार उवाच

इत्युक्तौ तौ प्रारभेतां[८] कर्तुं भगवतो वचः[९] ।
बृहस्पतिर्जुहावाग्निं नन्दी चापि ररक्ष[१०] तम्[११] ॥१४॥

व्यायच्छद्भिर्महद्भिश्च प्रमथैर्मन्दरो गिरिः ।
विप्रस्थित इवाभाति त्रस्तकुञ्जरकेसरिः ॥१५॥

ततोन्धकबलं दृप्तं दृष्ट्वा सिंहबलं यथा ।
आरोहमाणं तत्तूर्णं चालयत्तमिवाचलम्[१२] ॥१६॥

---

२ समतिष्ठत - क. । ३ प्रथमा - ख. । ४ रुरुन्धुर्घोरं (?) । ५ भवतु - क., बभतुः - ख. । ६ जुह्वतारिविनाशाय - क., जुह्वतो ... - ख. । ७ धावन्तु - ख. । ८ प्रारभेते - क., .. तं - ख. । ९ इत्युक्तोसौ चकाराशु तत्तत्कर्म विचार्य च - घ. । १० ररक्षि - ख. । ११ ताम् - क., सः - घ. । १२ चालयन्तमिवाचलम् - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ततो हलहलाशब्दः प्रमथानामजायत ।
दैत्यान् वारयतां युद्धे तरुपाषाणसायकैः ॥१७॥
दानवा वार्यमाणास्तु प्रमथैर्जितकाशिभिः ।
विदार्य प्रमथानीकं शीघ्रमारुरुहुस्तदा ॥१८॥
प्रमथा ह्यपि निस्सङ्गं[13] योद्धव्यमिति निश्चिताः ।
चिच्छिदुर्बिभिदुश्चैव पफलुश्च सुरेतरान्[14] ॥१९॥
गृह्णीष्व[15] मुञ्च तिष्ठेति स्थितस्त्वं किं करिष्यसि ।
एवं वाचः समुत्तस्थुः प्रमथासुरसैन्ययोः ॥२०॥
समूलाग्रैस्तरुवरैः[16] पर्वतैश्च सपादपैः ।
अन्योन्यं चूर्णयन्ति स्म निर्घृणाः प्रमथासुराः ॥२१॥
ततो दाक्षायणीपुत्रैर्दक्षाध्वरविनाशनाः ।
पराङ्मुखा न शकिताः कर्तुं भक्तचपराङ्मुखाः[17] ॥२२॥

सनत्कुमार उवाच

अरोहणेचलाग्रस्य[18] अशक्तान् निर्जितान् रिपून् ।
देवोपलभ्य प्रमथानवारयदशेषतः ॥२३॥

देवदेव उवाच

आरोहन्तु दनोः पुत्रा[19] मन्दरं चारुकन्दरम् ।
क्रीडार्थं मम युध्यध्वमेभिस्सह गणाधिपाः ॥२४॥

अथ ददृशुरनेकचारुकुञ्जस्थितमृगराजविमुक्तभीमनादम् ।
प्रसृतगजकुलाभिघातरुग्ण[20]क्षितिरुहपुष्पसमाचितप्रदेशम् ॥२५॥
भुजगपतिशिरोमणिप्रदीपप्रतिहतचारुशिलागृहान्धकारम् ।
शिशिरविमलनिर्झराम्बुवेगस्फुटितमहोपलजालदृष्टरन्ध्रम् ॥२६॥
क्वचिदभिनवताम्रपल्लवाग्रप्रतिहतबालदिवाकरांशुजालम् ।
क्वचिदमरविलासिनीमुखेन्दुप्रविरचितस्फुटचारुपत्रलेखम्[21] ॥२७॥

---

१३ सन्नद्धाः - ख. । १४ परेतरान् - क. । १५ गृह्णष्व - क. ख. । १६ समूलाग्रैस्तरुवरैः - क. ।
१७ भक्त पराङ्मुखाः - क. । १८ वनाग्रस्य - घ. । १९ आरोहत यदाकामं - घ. । २० भुग्न (?) ।
२१ चित्रलेखम् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

क्वचिदनिलविधूतचारुपुष्पस्तबकविचित्रितकाननप्रदेशम् ।
स्फटिकमणिशिला[22]तलोपविष्टस्थितकपियूथविलोकितात्मदेहम् ॥२८॥
सुरयुवतिनिकेतबर्हिकेकाश्रवणसुखप्रतिबुद्धसिद्धसार्थम् ।
कमलदलरजःसुगन्धितोयस्थितकलहंसकलप्रलापरम्यम् ॥२९॥
दिनकरकरतप्तसूर्यकान्त[23]प्रविगलिताग्निविलीनहेमधातुम् ।
क्वचिदभि[24]पतितांशुचन्द्रकान्त[25]प्रविसृतशैलनदीविकीर्णतोयम् ॥३०॥
वरहरिकरवज्रसन्निपातस्फुटितमहागजकुम्भ[26]मौक्तिकौघैः[27] ।
सितकुसुमचयैरिव प्रकीर्णैःक्वचिदुपशोभितविस्तृतोपकण्ठम् ॥३१॥
प्रमुदितगणभैरवाट्टहासप्रसृतमहारवपूरितान्तरालम् ।
तरुगहनलतागृहान्तलीनप्रमुदितसिद्धवधूप्रनृत्तरम्यम् ॥३२॥
बहुकटकविचारिमत्तनागं[28]बहुमृगशाव[29]निपीतनिर्झराम्बुम्[30] ।
बहुविषमतटप्रपातकुञ्जं[31]बहुविधगुल्मलतावतानवृक्षम् ॥३४॥
मरकतमणिपद्मरागशृङ्गद्युतिशबलीकृतपादपादपाग्र्यम् ।
अलिकुलकलकोकिलाविनादप्रचुरविनादितचारुकाननान्तम् ॥३४॥

यस्मिन्[32] सदा प्रमुदिता जितमृत्युशोका
गोरोचनाञ्जनशिलालनिधानसिद्धाः ।
सिद्धाः सदा प्रमुदिता वनितासहाया-[33]
स्तिष्ठन्ति चन्द्रकिरणोपमचारुहाराः ॥३५॥
विद्याधराः[34] प्रियतमाविनिबद्धरागाः
पीनेषु तुङ्गतटवत्सु पयोधरेषु ।
धातूत्करैर्हरितरक्तपिशङ्गवर्णै-
र्यत्रालिखन्ति[35] विविधान् कुसुमावतंसान् ॥३६॥
यस्मिन् सदा सुरतखेदितगात्रयष्ट्यः
कान्ताग्रहस्तविनिवेशितहस्तपद्माः ।
सेवन्ति निर्झरजलप्रणयातिशीत-[36]
मभ्यागतं[37]पवनमप्सरसोतिहृष्टाः[38] ॥३७॥

---

२२ शिखा - क. । २३ ..तापसूर्यकान्त - क. ख. । २४ ... दपि - क. ख. । २५ चन्द्रकान्ति - क. । २६ गण्ड (?) । २७ मुक्तिकौघम् - ख., मौक्तिकौघाः - ख. । २८ विचारितमत्तनागं - ख । २९ सार्थ - ख. । ३० निर्झरोदम् - (?) । ३१ कूजद् - ख. । ३२ तस्मिन् - क. । ३३ विनितासहायाः - क. । ३४ विद्याधरा - क, ख, । ३५ किरन्ति - क. । ३६ गीत - ख. । ३७ मन्यागतं - ख. । ३८ ...धिहृष्टाः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नूपुररावविबोधितहंसं हंसतनूरुहघट्टितपद्मम् ।
पद्मरजोरुणितामलतोयं तोयपरिष्कृतकाञ्चनशृङ्गम् ॥३८॥
शृङ्गसमुत्थितचन्दनवृक्षं[३९] वृक्षसमास्थितकोकिलवृन्दम् ।
वृन्दविमुक्तगजेन्द्रनिनादं नादभयाकुलितर्क्षतरक्षुम्[४०] ॥३९॥
ऋक्षतरक्षुनिलीननिकुञ्जं कुञ्जगुहामुखनिर्गतसिंहम् ।
सिंहविदारितनैकपकुम्भं कुम्भविनिर्गतमौक्तिकरत्नम् ॥४०॥
रत्नमयूखविभासितपृष्ठं पृष्ठसमास्थितशङ्करपादम्[४१] ।
पादसमुत्थितपादपषण्डं[४२] षण्डलताकुसुमोत्करमार्गम् ॥४१॥
मार्गमार्गमणितोरणचित्रं चित्रचित्रमणितोरणपट्टम् ।
पट्टपट्टविनिवेशितपुष्पं पुष्पपुष्पपरिचुम्बितभृङ्गम् ॥४२॥
नानाधातुविचित्रनितम्बं नानापुष्पलतागृहरम्यम् ।
नानामत्तविहङ्गमघुष्टं नानाशृङ्गसमास्थितसिद्धम्[४३] ॥४३॥

तन्मन्दरं विविधचारणसिद्धसंघै[४४] रम्यं स्वयं त्रिनयनेन कृताधिवासम् ।
दैत्यास्तदा भगवतानुमतप्रवेशाः सर्वे समारुरुहुरात्म(?)जयैषिणस्ते[४५] ॥४४॥

ततो विसृष्टाः प्रमथैरारोहन्त दितेः सुताः ।
मन्वानाः प्रमथा भीता निवृत्ता इति सत्वरम् ॥४५॥
मन्दरस्य ततः पृष्ठे नानाद्रुमसमाकुले ।
बद्धस्कन्धाः[४६] स्थिता दैत्या आदित्यसदृशप्रभाः ॥४६॥

स मन्दरो भीमशिलोपलद्रुमो विवृद्धशार्दूलतरक्षुवारणः ।
महासुरैर्दर्पितवाजिवारणैर्विकीर्यते मेघ इवानिले[४७]भृशम्[४८] ॥४७॥
क्षिपन्ति शुभ्राभ्रनिभाः शिलाः क्वचित् तरूनसमुत्पाट्य नदन्ति मेघवत् ।
निवार्यमाणाः प्रमथान्[४९] समार्दयन् वनेषु सिंहा मृगयूथपानिव ॥४८॥
ततस्तु तद् गजरथवाजिदानवैः समावृतं क्षुभितमहोदधिप्रभम् ।
विराजते दितिसुतबाहुपालितं वनं यथा मृगपतिबाहुपालितम् ॥४९॥

⊙ इति स्कन्दपुराणे अन्धकयुद्धोपक्रमे मन्दरवर्णनं नाम एकत्रिंशदुत्तरशततमोऽध्यायः ⊙

---

३९ ...समुच्छ्रितचन्दनवृक्षं (?) । ४० ...कुलमृक्षतरक्षुम् - क. । ४१ समर्पितशङ्करपादम् - ख. । ४२ समुच्छ्रूत-पादपषण्डं (?) । ४३ समाश्रितसिद्धम् (?) । ४४ सिद्धसंघं - ख. । ४५ शत्रुजयैषिणस्ते - क. ख. । ४६ बद्धस्कन्धा - क. ख. । ४७ इवानलै - क. ख. । ४८ ...वृंतम् - क. । ४९ प्रमथाः - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

मन्दरप्रस्थमासाद्य सोन्धको दानवाधिपः ।
प्राञ्जलिः शुक्रमाहेदं शक्रार्कसदृशद्युतिम्[१] ॥१॥

अन्धक उवाच

प्राप्ताः स्म भगवञ्छैलं[२] मन्दरं चारुकन्दरम् ।
प्रमथैर्भीमसंकाशैः सन्निरुद्धशिलातलम् ॥२॥
खेचरा मायिनश्चैव योगिनश्च महाबलाः :
प्रसभं दानवैर्जेतुं[३] न शक्या गणनायकाः ॥३॥
प्रायेण बलवन्तोपि ह्युपायेनैव साधवः ।
कार्येष्वादौ प्रवर्तन्ते पश्चात्तु विपरीतवत्[४] ॥४॥
तदुपायं[५] समास्थाय विशेषेण समाहिताः ।
प्रमथान् संप्रबाधाम यथा वा रुचितं तव[६] ॥५॥
स त्वमस्मज्जयप्रेप्सुर्दानवानां जयाय च ।
कुरु देव गिरिव्यूहं परव्यूहविदारणम्[७] ॥६॥
के चेमे सूर्यकोटीनां प्रभावर्णवपुर्धराः ।
प्रमथानीकमध्येषु स्थिताः पश्यन्ति मां मुहुः ॥७॥

सनत्कुमार उवाच

ततोन्धकवचः श्रुत्वा क्रुद्धो दैत्यपुरोहितः ।
उवाच दैत्याधिपतिं गोपतिं दर्शयन्निव ॥८॥

शुक्र उवाच

य एष मधुपिङ्गाक्षस्त्र्यम्बकश्चन्द्रभूषणः ।
व्याघ्रचर्माम्बरधरो देव एष पिनाकधृक् ॥९॥
यस्त्वेष कपिसिंहास्यो नीलवस्त्रश्चतुर्भुजः ।
तरुणार्कसमो भाति नन्द्येष गणनायकः ॥१०॥
तनुरुच्चोग्निसंकाशो य एषोग्निरिवोज्ज्वलः ।
ब्राह्मणाधिपतिर्ह्येष[८] बृहद्बुद्धिर्बृहस्पतिः ॥११॥

---

१ सहस्रार्कसमद्युतिम् -, घ. । २ ते प्राप्ताः स्न वयं शैलं - घ. । ३ प्रसभैर्दानवैर्जेतुं - क. । ४ ततो विजयमाप्नुयुः घ. । ५ तमुपायं - क. ख. । ६ वचः - ख. । ७ विधारणम् (?) । ८ ...पतिर्येष - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

य एष नातिदूरस्थो वृषकेतोस्त्रिशूलधृक् ।
एषोन्धक महाकायो महागणपतिर्वरः ॥१२॥
यैष[९] आस्थाय कूजन्तं भाति चित्रकलापिनम् ।
मयूरं बालसूर्याभः शक्तिपाणिर्महाबलः ॥१३॥
ब्रह्मण्यो ब्रह्मनिरतो ब्रह्मचारी यतव्रतः ।
स्कन्द एष[१०] हि देवानामग्रणीर्दानवा रणे[११] ॥१४॥
य एष ताम्रचूडस्थस्ताम्रचूडशिलाप्रभः[१२] ।
शक्तिमुल्लोलयन्[१३] भाति[१४] तोयदस्तडितं यथा ॥१५॥
काकपक्षधरो ह्येष पूर्णचन्द्रनिभाननः ।
विशाखो नाम कौमारः[१५] कौमारब्रह्मचर्यवान् ॥१६॥
तरुणस्तरुणप्रज्ञस्तरुः शाखायुतो यथा ।
स्वाहायास्तनयो ह्येष शाखो नाम[१६] महाद्युतिः ॥१७॥
एतस्य यो ह्यसौ पार्श्वं[१७] सव्यमावृत्य[१८] तिष्ठति ।
दर्शयानः प्रदेशिन्या माञ्च त्वाञ्च पुनःपुनः ॥१८॥
मेषमास्थाय बलवान् बाल[१९] एव[२०] व्यवस्थितः ।
नैगमेष इति ख्यात एषोन्धक हरात्मजः[२१] ॥१९॥
चतुर्भिरेष पुत्रैस्तु दृश्यतेसुरहा वृतः ।
देवैश्चतुर्भिः संपृक्तो यथैव हि पितामहः ॥२०॥
देवमीशं महेष्वासं नन्दिसूनुपुरस्सरम्[२२] ।
व्यतियुध्या[२३] सुरश्रेष्ठ सन्मन्त्रपरिपालितः[२४] ॥२१॥
प्रमथैर्निहतान् दैत्यान् शतशोथ सहस्रशः ।
अहमुत्थापयिष्यामि शस्यानि जलदो यथा ॥२२॥

---

९ य एवा - क, य एषो ... - ङ. । १० एषो - क. ख. । ११ दानवानृणे - क. ख., दानवाधिप - घ.।
१२ चूर्णशिखाप्रभः - क., चूडानखि... - घ. । १३ ..मुल्लालयन् - क., ...मुल्लापयन् - घ. मुत्तोलयन्(?) ।
१४ याति - घ. । १५ गणपः - घ. । १६ विशाखोपि - घ. । १७ पार्श्वे - क । १८ समाश्रित्य च - घ.।
१९ बल - ख. । २० एवं (?) । २१ महात्मजः - क. । २२ पुरन्दरम् - क । २३ विधियुक्त - क. ।
२४ ...समन्त्रपरिपालितः - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

तं[२५] भार्गव इति प्रोच्य दानवान्[२६] दानवाधिपम् ।
गिरिव्यूहेन तत्सैन्यं प्राक्रमद् व्यूहितुं ततः ॥२३॥
शूलेन्धकरथं कृत्वा सान्धकं साश्वसारथिम् ।
पादातै[२७]र्बहुसाहस्रैः पादान् तस्य चकार ह ॥२४॥
तेषु पादसहस्रेषु गिरिव्यूहस्य दानवैः ।
वृक्षशैलशिलासंघान् कारयमास भार्गवः ॥२५॥
कोटिभिर्दशभिस्तस्य दानवानां महात्मनाम् ।
नितम्बाँस्ताम्रनयनान् प्रचकार ग्रहेश्वरः ॥२६॥
धातुनिष्यन्दचित्रेषु[२८] नितम्बेष्वपि दानवान् ।
तृणवत् क्षुपवच्चापि स्थापयामास भार्गवः ॥२७॥
त्रिंशता कोटिभिश्चापि त्रिदशाधिपविद्विषाम्[२९] ।
गिरिव्यूहस्य शृङ्गाणि चकारार्कसमप्रभः[३०] ॥२८॥
तेषु शृङ्गेषु तुङ्गेषु दानवान्सायुधानथ ।
अमी प्रपाता इत्येवमाचख्यौ[३१] भृगुनन्दनः ॥२९॥
ते प्रपातस्थिता दैत्या नीलाम्बुधरवर्चसः ।
शस्त्रतोयानि मुदिताः क्षरन्त इव संस्थिताः ॥३०॥
बलस्था ये जवोपेता दैत्या दैवतकण्टकाः[३२] ।
श्येनवत्ते भ्रमित्वा तु निलीनाः[३३] स्युर्गिरिव्रजे[३४] ॥३१॥
निवातकवचान् सर्वान् विविधायुधधारिणः[३५] ।
अकरोद् भार्गवो देवो गिरिव्यूहस्य सानुवत्[३६] ॥३२॥
प्रह्लादमथ संह्लादमनुह्लादं शिबिं तथा ।
जम्भं कुजम्भं तारञ्च मयं नमुचिमेव च ॥३३॥

---

२५ स - क. । २६ तादिदं - घ. । २७ पादपै - क. ख. । २८ विष्यन्दचित्रेषु - क. ख. । २९ विद्विषोः - क. ।
३० चक्रार्कस्य समप्रभः - ख. । ३१ माचि ... क. ख. । ३२ देवतकण्टकाः - क. । ३३ न्यलीयन्त - ख. ।
३४ गिरिवद् व्रजे - क. । ३५ पाणयः - क. ख. । ३६ सानवः - क., रक्षकान् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विरोचनं बलिं बाणं वातं कार्तस्वनं कुशम्[३७] ।
शम्भुं च भावयत्यं[३८] च इल्वकं विल्वकं[३९] तथा ॥३४॥
वितं वृत्तं तुहुण्डं च हुण्डं दण्डं च दानवम् ।
अञ्जनं रुषणं राहुं स्वर्भानुमजकं गजम् ॥३५॥
हस्तिदुर्योधनौ चैव पाकं धुन्धुञ्च दानवम् ।
एताँश्चान्याँश्च बलिनो दैत्यान्दैवतकण्टकान्[४०] ॥३६॥
व्यूहं रक्षत युध्यध्वमित्युवाचासुराधिपः ।
हिमवानिव शैलेन्द्रो विन्ध्यो वाद्भुतगह्वरः ॥३७॥
स गिरिव्यूह आभाति शस्त्रकण्टकितद्रुमः ।
अन्धकारमिवैकस्थं मेघानामिव संचयम् ॥३८॥
दृष्ट्वा दृष्ट्वा गिरिव्यूहं प्रमथा विस्मयं ययुः ।
पर्वतव्यूहमालोक्य पर्वतव्यूहसंस्थिताः[४१] ॥३९॥
नेदुस्तेसुरशार्दूला मेघा लोकात्यये यथा ।
ऊचुश्च न हि शक्योयं भेत्तुं देवैस्सवासवैः ॥४०॥
प्रमथाः किं करिष्यन्ति स्वल्पवीर्यपराक्रमाः ।
जीवयिष्यति नः शुक्रो मृतानपि न संशयः ।
युध्यध्वं दानवश्रेष्ठा निश्शङ्कैरन्तरात्मभिः ॥४१॥

सनत्कुमार उवाच

गिरिव्यूहं ततो दृष्ट्वा भार्गवोत्तमनिर्मितम् ।
देवः कपर्दी प्राहेदं बृहद्बुद्धिं बृहस्पतिम् ॥४२॥
वाचस्पते गिरिव्यूहं पश्य शुक्रेण निर्मितम् ।
शृङ्गवन्तं दरीवन्तं हिमवन्तं यथा गिरिम् ॥४३॥
लोकान् सजलपातालान् सविष्णून्[४२] सपितामहान् ।
ग्रसेदेष गिरिव्यूह[४३] उपेक्षा क्रियते यदि[४४] ॥४४॥

---

३७ कुभम् - ख., बलं - घ. । ३८ शुंभं च पवनं यक्षं - घ., भावयच्यं - ख, सावपत्यं - क ।
३९ पिल्वकं - क., पिण्वक - घ. । ४० दैतेयान्दनुजांस्तथा - क. । ४१ संथितम् - क. ।
४२ सविष्णुं - क. । ४३ गिरिव्यूहो - क. ख. । ४४ उत्क्षेपः - ख., यदि चायमुपेक्ष्यते - घ., यद्युपेक्षेत सांप्रतम् (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नैनं देवा न गन्धर्वा न नागा न नगास्तथा ।
शक्नुयुर्भेत्तु मुक्त्वा विनैतान् गणनायकान् ॥४५॥
गिरिव्यूहस्य विप्रेन्द्र नान्यं[४५] पश्यामि भेदनम् ।
वज्रव्यूहमृते धीमन् सर्वव्यूहभिदं महत् ॥४६॥
स त्वं ब्रह्मविदां श्रेष्ठ गिरिव्यूहविदारणम् ।
वज्रव्यूहं कुरुष्वाद्य प्रमथायुतसंवृतम् ॥४७॥
शम्भुना चैवमुक्तस्तु ब्राह्मणेन्द्रो[४६] बृहस्पतिः ।
वज्रव्यूहेन तं[४७] व्यूहं प्रत्यव्यूहत्तदा[४८]नवम् ॥४८॥
बाहुजान् बहुसाहस्रान् भक्ताँश्चैव[४९] गणाधिपान् ।
वज्रव्यूहस्य मध्ये वै स्थापयामास बुद्धिमान् ॥४९॥
स्कन्दस्य पार्षदैः शूरैः सुरासुरनिघातिभिः ।
सहस्रं पर्वणां तस्य वज्रव्यूहस्य निर्ममौ[५०] ॥५०॥
कोटिं कोटिप्रवीराणां प्रमथानां प्रहारिणाम् ।
वज्रधारासु सर्वासु स्थापयामास स द्विजः ॥५१॥
कुमारश्च विशाखश्च शाखं छागमुखं तथा ।
चकार सोऽङ्गिरा देवो वज्रव्यूहस्य कुड्मलम् ॥५२॥
कुड्मलाग्रे चतुर्बाहुः कपीन्द्रवदनोऽरिहा ।
स्थितो वज्रोद्यतकरो नन्दी दिनकरप्रभः ॥५३॥
कुण्डोदरं नन्दिषेणं[५१] घण्टाकर्णं महोदरम् ।
पश्चार्धे तस्य वज्रस्य कुड्मलं सन्न्यवेशयत्[५२] ॥५४॥
सोमनन्दी तु तस्याग्रे व्याघ्रवक्त्रो गणेश्वरः ।
सार्कचन्द्रायुतप्रख्यः[५३] स्थितो वै पट्टिशायुधः[५४] ॥५५॥
रुद्राणां[५५] द्वारपालाश्च रुद्रा रुद्रसुताश्च ये ।
इतश्चेतश्च विन्यस्ता वज्रव्यूहाभिरक्षिणः ॥५६॥

---

४५ नान्यत् (?) । ४६ प्राणेन्द्रो च - क । ४७ तद् (?) । ४८ प्रति व्यूहन्दा -(?) । ४९ रक्तश्वेतां - घ., रक्तां (?) । ५० निर्मिमौ - क, निर्ममे - घ. । ५१ नन्दिसेनं - ख. । ५२ सन्निवेशयत् - क., स न्यवेशयत् - ख. । ५३ सार्कचन्द्रायुधप्रख्यः - क. ख. । ५४ पट्टशायुधः - क. ख. । ५५ रुद्राश्च - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वज्रव्यूहस्य मध्ये तु रथवर्ये प्रतिष्ठितः ।
तस्थावीशो भवः[५६] शर्वः कपर्दी नीललोहितः ॥५७॥
तस्य केतुर्महाञ्छ्वेतो विभातीन्द्रध्वजोपमः[५७] ।
मन्दरश्चन्द्रबिम्बेन जुष्टशृङ्ग इवाचलः ॥५८॥
शतधारो नैकपर्वा चारुशोभितकुड्मलः ।
वज्रव्यूहो गिरिव्यूहं भेत्तुकाम इवाभवत् ॥५९॥
तं दृष्ट्वा निर्मितं व्यूहं देवगन्धर्वगुह्यकाः ।
साधुसाध्विति वै नेदुर्विस्मयोत्फुल्ललोचनाः ॥६०॥
अथ गणपबलेषु सिंहनादाः
पणवमृदङ्गमशंखनादमिश्राः[५८] ।
दितितनयभयप्रदाः प्रवृत्ताः
क्षुभितसमुद्रपयोदनादकल्पाः ॥६१॥

⊙ इति स्कन्दपुराणे अन्धकमथने व्यूहरचनानाम द्वात्रिंशदुत्तरशततमोध्यायः[५९] ।

सनत्कुमार उवाच

तौ दृष्टवा निर्मितौ व्यूहौ प्रमथासुरयोः सुराः ।
विमानकोटिभिः शीघ्रं रुरुधुः सर्वतो नभः ॥१॥
सर्वं तेजोभिराकीर्णं तदम्बरतलं बभौ ।
मेरुकूटवनं रम्यं दह्यमानमिवाग्निना ॥२॥
देवदुन्दुभिशब्दाढ्यं दिव्य[१]स्त्रीशतसंकुलम् ।
तद्देवमण्डलं भाति यथैवादित्यमण्डलम् ॥३॥
दिव्यपुष्पसमाकीर्णं दिव्यगन्धाधिवासितम् ।
प्रेक्षकैः शतशः पूर्णं खतलं दिव्यमाबभौ ॥४॥

---

५६ तस्थावशोभनः - ख. । ५७ वभौ शक्रध्वजोपमः - क., बभाविन्द्र ...(?) । ५८ सशङ्खनादमिश्राः - क. ख.।
५९ द्वयत्रिंशो - क. ।
१ दीव्या - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वादित्राण्यभ्यहन्यन्त जगुश्च सुरगायनाः ।
रम्भाद्या ननृतुश्चापि शुभापाङ्गाः सुराङ्गनाः ॥५॥
अथ वज्रगिरिव्यूहौ परस्परजयैषिणौ ।
समीयतु[2]र्महानादै[3]र्वातोद्धूतौ[4] यथार्णवौ ॥६॥
मा त्वरध्वमिति[5] प्रोक्ताः[6] शुक्रेण सु[7]महात्मना ।
योधा निवार्यमाणापि चक्रुर्युद्धमसंहतम्[8] ॥७॥
ततः शंखाश्च भेर्यश्च पणवा गोविषाणकाः ।
आडम्बरा डिण्डिमाश्च मण्डूकाः[9] पणवा ह्यपि ॥८॥
भेर्यो दुन्दुभयश्चापि मृदङ्गाः किंखरानकाः ।
उभयत्र बले गाढं प्रावाद्यन्त[10] सहस्रशः ॥९॥
ततः सुरगणैर्नादाः सह गन्धर्वचारणैः ।
कृतास्तूर्यरवं श्रुत्वा प्रमथासुरसैन्ययोः ॥१०॥
बलयोस्तूर्यशब्देन देवसिंहरवेण[11] च ।
मन्दरे रुरुवुर्घोरं सिंहशार्दूलकुञ्जराः ॥११॥
तूर्यारसितब्देन तेन तेमितविक्रमाः[12] ।
अभिन्दन्तः स्वकं व्यूहं युयुधुः प्रमथासुराः ॥१२॥
प्रथमे सन्निपाते तु[13] तेषां युद्धे कृतात्मनाम्[14] ।
अभवद् दारुणो रावो हस्तिनामिव गर्जताम्[15] ॥१३॥
देवासुराः करस्थैस्तु आयुधैस्ते[16] सहस्रशः ।
विशेषयन्ति युद्धे स्म[17] परस्परजिघांसवः ॥१४॥
तच्छूलवज्रोपलवृक्षबाण[18]दृढप्रहारातिशयातिहर्षम् ।
विवर्धते पारिषदासुराणां युद्धं युगं तिष्यमिवातिघोरम्[19] ॥१५॥

⊙ इति स्कन्दपुराणे गणयुद्धे त्रयस्त्रिंशदुत्तरशततमोऽध्यायः[20] । ⊙

---

२ सीमीयतु - क. । ३ महानादौ - क. । ४ वातोद्वृत्तौ - ख. । ५ तरध्वमिति - क. । ६ प्रोच्य (?) ।
७ तु - क. ख. । ८ महोत्सवम् - क., युद्धोत्सवं महत् - क. । ९ पनुवा (?) - क. । १० प्रवाद्यन्त - क. ख. ।
११ शंखरवेण - घ. । १२ स्तिमितविक्रमाः - घ. । १३ प्रमथ (प्रथमः) सन्निपातस्तु - क. । १४ युद्धोद्ध - (द्य)
तात्मनाम् - ख. । १५ गर्जितम् - ख. । १६ स्वायुधैस्ते - ख., ...श्च - घ. । १७ युद्धे ... - क. ख.,
पु - घ. । १८ बाणं - ख., बाणैर् (?) । १९ युगान्तव्यतिपातघोरम् (?) । २० १८३ - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

संकुले[१] वर्तमाने तु प्रमथासुरसैन्ययोः ।
श्रूयन्ते कार्मुकरवाः सिंहनादाश्च दारुणाः ॥१॥
व्याविद्धाङ्गुलयो देवाश्चारणोरगगुह्यकाः ।
नेदुरुद्धूतवस्त्रान्ता युद्धोद्धवकृतस्वनाः ॥२॥
शूरारसितशब्देन तेनोदीरितविक्रमाः ।
चक्रुः कर्माण्यसह्यानि दर्पिताः प्रमथासुराः ॥३॥
असिभिर्व्यायतैश्छिन्नाः[२] पट्टिशै[३]र्भिन्नवक्षसः ।
शरसंकृत्तमर्माणः[४] पतन्ति प्रमथासुराः ॥४॥
शिरसां पात्यमानानां बाहूनां[५] चोरुभिः सह ।
राशयस्तत्र दृश्यन्ते प्रमथासुरसंयुगे ॥५॥
भग्नचक्रा विध्वजाश्च विवरूथा विकूबराः ।
दृश्यन्ते शतशो व्यश्वा हतसारथयो[६] रथाः ॥६॥
सपताकाः सकेयूराः सवर्मायुधकेतवः ।
निष्कृष्टदन्तमुशलाः[७] पतन्ति गजपुङ्गवाः ॥७॥
शरप्रहाररुग्णाङ्गाश्चामरापीडकोज्ज्वलाः ।
ससादिनो निपात्यन्ते[८] हयाः सूर्यहयोपमाः ॥८॥
उद्भ्रान्तैस्तुरगैस्त्रस्तैर्दानवैः सरथैरपि ।
तद्बलं[१०] प्रबभौ मत्तं भ्रान्तग्राहार्णवोपमम्[११] ॥९॥
वासोभिरातपत्रैश्च मुकुटैर्मणिकुण्डलैः ।
हारार्धहारैः केयूरैरङ्गुलीयैः स्रगुत्तमैः ॥१०॥
कराननैः प्रकृत्तैश्च[१२] चरणैश्च निपातितैः ।
युद्धभूमिर्वृता भाति द्यौर्नक्षत्रैरिवोदितैः ॥११॥
रुधिरास्रावसना नानाभरणभूषणाः ।
रक्तवस्त्रावृतैर्गात्रैर्मही मृत्युरिवाबभौ ॥१२॥

---

१ संयुगे (?) । २ व्यायतश्छिन्नाः - क. । ३ पट्टिशै - क. ख. । ४ ...वर्माणः - क. । ५ बहूनां - क. ख. ।
६ सारथिनो - क. । ७ निकृष्टदन्तमुशलाः - क. । ८ सहसा विनिपात्यन्ते - क., सहसादिनो... - ख. ।
९ माया - क. १०ख. । तत्कालं - क. । ११ .. पमाः - क. । १२ प्रवृत्तैश्च - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ वाजिगजौघानां शोणितोदकवाहिनी ।
नदी प्रववृते[१३] घोरा यमसादनवाहिनी ॥१३॥
मृगहस्तिखराश्वोष्ट्रमहाग्राहसमाकुला ।
मांसमेदोग्रकृतपंका धनुर्ध्वजशतद्रुमा ॥१४॥
छिन्नशीर्षोपलशता हस्तपञ्चाननोरगा ।
केशशैवालसंछन्ना धनुर्ज्याशततन्तुका ॥१५॥
पाण्डराम्बरहर्षा वै मुकुटाटिकुलाकुला ।
भेरीकच्छपसंकीर्णा[१४] वराभरणदर्दुरा ॥१६॥
शरमीनसमाकीर्णा[१५] खड्गनक्रदुरासदा[१६] ।
रथचक्रमहानक्रा गद[१७]यादोविलोडिता ॥१७॥
विशीर्णहारसिकता[१८] कफसंजातफेनिनी[१९] ।
रक्तोत्पलानां मालेव कौङ्कुमी स्रगिवोज्झिता ॥१८॥
जिह्वेवोरगराजस्य यमस्याज्ञा इवाद्भुता ।
भयदा भीरुयोधानां शूराणां हर्षवर्धिनी[२०] ।
प्रवृत्ता[२१] रुधिराम्भोभिः स्वर्गलोकवहा नदी ॥१९॥
संरब्धदैत्येन्द्रविवृद्धधूमं[२२] नन्दीश्वराग्निज्वलितान्तरालम् ।
बभौ बलं सागरतुल्यनादं विनाशि यद्वज्जगदन्तकाले ॥२०॥

⊙ इति स्कन्दपुराणे गणयुद्धे चतुर्स्त्रिशदुत्तरशततमोध्यायः[२३] । ⊙

सनत्कुमा उवाच

विवर्धमाने संग्रामे तस्मिन् पारिषदासुरे ।
गिरिव्यूहप्रपातस्थाः[१] क्रुद्धा दानवसत्तमाः ॥१॥
ते क्रोधा[२]च्छूलशक्त्यृष्टि[३]गदावर्षमतन्द्रिताः ।
ववर्षुः प्रमथानीके[४] वर्षं जलधरा इव ॥२॥

---

१३ प्रवर्तंते - क. । १४ संपूर्णा - क. ख. । १५ शवमीनसमाकीर्णा - घ. । १६ ... नक्रा दुरासदा - क. ।
१७ सदा - क., गज - घ. । १८ सिकाङ्गा - घ । १९ ... फेनिला - घ. । २० हर्षवर्धनी - क., हर्षवर्धना - ख. । २१ प्रकृता - ख. । २२ संहृष्टदैत्येन्द्रविवृद्धधूमं - ख. । २३ १८४ - ख. ।
१ गिरिव्यूहप्रवातस्थाः - क. । २ क्रुद्धाः - ख. । ३ शक्त्य... - क. ख. । ४ प्रमथानीकं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शस्त्रवर्षेण पनतात्ताडच्यमाना ह्यनेकशः ।
अचिन्तयित्वा तत्सर्वं युद्धायैव मनो दधुः ॥३॥
मेघाः सस्यानि हि यथा द्विरदाः पादपानिव ।
पृषतानिव शार्दूलाः शरभा इव वारणान् ॥४॥
वज्रा इव यथा शैलान् कालदूता नरानिव ।
विध्नानिव च शान्त्यर्था नयानविनया इव[5] ॥५॥
भावानिव यथा भावा दोषा दोषान्यथापि च ।
तथा निवातकवचान्[6] शूलशक्त्यृष्टिवृष्टिभिः[7] ।
निजघ्नुः प्रमथाः[8] शूराः शतशोथ सहस्रशः ॥६॥
शूलनिर्दारितोरस्का मुशलैर्भिन्नमस्तकाः ।
वज्रावघातम्लानाङ्गा[9] दानवाः पतिता भुवि ॥७॥
तेषां निनादाः श्रूयन्ते नदतामतिदारुणाः ।
संवर्त्तकानां मेघानां नदतामिव[10] सर्वतः ॥८॥
इषुभिर्बहुधा विद्धा भग्नत्रिककशेरवः[11] ।
चेष्टन्ते[12] ह्यसुरा भूमौ भग्नपृष्ठा इवोरगाः ॥९॥
ततोतिकदनं वीक्ष्य शूरास्तत्र महासुराः ।
निवृत्ताः शतशस्तत्र क्रोधसंरक्तलोचनाः ॥१०॥
तैर्भृशं[13] प्रमथास्तेपि विद्धा व्यास त्रपान्विताः ।
संमीलिताक्षा वृषभा वर्षं निपतितं यथा ॥११॥
सहन्ते तत्तथा वर्षं[14] प्रमथा दानवेरितम् ।
ते चापि युद्धं तुमुलं कृत्वान्ते[15] पीडितास्तदा ॥१२॥
भग्नाः पराङ्मुखा जाता[16] श्छिन्नभिन्नांगसन्धयः ।
तस्मिन् भग्नेथ सैन्ये तु प्रामथे[17] प्रमथोत्तमाः ॥१३॥
दश चक्रुर्महावेगं दशनागशतोपमाः ।
शंकुकर्णश्च बलवान् घण्टाकर्णश्च वीर्यवान् ॥१४॥

---

५ ...श्चाविनयानिव - घ. । ६ कवचाः - क. । ७ शक्तचष्टिवृष्टिभिः - क. ख., .. ष्टिष्टयः - क. ।
८ प्रमथान् - क. । ९ वज्रावपातग्लानाङ्गाः - क. ख. । १० नर्दतामिव(?). ददाति च - क. ।
११ ...करोरवः(?) । १२ वेष्टचन्ते - ख । १३ तैरितः - घ. । १४ तच्छस्त्रवर्षं(?) । १५ ते - घ. ।
१६ भीता - घ. । १७ प्रमथे - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

महाकालश्च कालाभो नन्दिषेणश्च विश्रुतः ।
पिङ्गलो लोहिताक्षश्च सोमनन्दी च वीर्यवान् ॥१५॥
विनायकश्च - - - नन्दी च - - - - - ।
छागः कुण्डोदरः[१८] स्कन्दो मयूरवरमास्थितः ॥१६॥
एते सह समुन्नेदुः[१९] पयोदा इव साम्भसः ।
विविशुश्चासुरं सैन्यं समुद्रं मकरा इव ॥१७॥
शंकुकर्णहता दैत्या घण्टाकर्णविदारिताः ।
नन्दिषेणशराभ्यस्ता महाकालप्रकालिताः ॥१८॥
कुण्डोदरगदावेगैश्चूर्णितास्त्रविभूषणाः ।
पिङ्गलालोडिता नेशुः[२०]स्कन्दशक्तिविदारिताः[२१] ॥१९॥
मुष्टिप्रहारभिन्नास्यै[२२]स्तलताडितमस्तकैः ।
अपाहस्तप्रहारैश्च[२३] क्षिप्यमाणैरितस्ततः ॥२०॥
विशस्त्रवस्त्रकवचैर्मुक्तमुर्द्धजबन्धनैः ।
प्रभग्नैर्दानवैस्तूर्णं व्यूहभेदो बभूव ह ॥२१॥
भिद्यमानो गिरिव्यूहो विबभौ घोरदर्शनः ।
इन्द्रवज्राहतःपूर्वं यथा विन्ध्यो महागिरिः ॥२२॥
भिन्नव्यूहाँस्ततो[२४] दैत्यान्[२५] प्रमथा जितकाशिनः ।
दुद्रुवुः शतशो वृक्षान् पक्वाञ्छकुनयो[२६] यथा ॥२३॥
ततः पुनरभूद्युद्धं[२७] कोलाहलसमाकुलम् ।
प्रमथानाञ्च शूराणामसुराणाञ्च दारुणम् ॥२४॥
सन्निपाते[२८] पुनस्तेषां गजानामिव दारुणे ।
नेदुर्देवाः सगन्धर्वाः सिद्धाश्च दिवि हर्षिताः ॥२५॥
नानाविधास्तूर्यरवास्ततो दानवपार्षदैः[२९] ।
अश्रूयन्त कृता घोरा मेघानां नदतामिव ॥२६॥

---

१८ छागस्तुण्ड कु .. - क , स्तुकुर्कुट - ख. । १९ सहस्रशः समुन्नेदुः - क., वै सहसा नेदुः - घ. । २० नेदुः - घ. । २१ ..त्तचा(?), निपातिताः - ख. । २२ प्रहन (तिभिन्नाश्यै) - क । २३ अपहस्तप्रहारैश्च (?) । २४ भिन्नव्यूहास्तता - क. । २५ दैत्याः - क. । २६ ...स्त्यक्त्वा शकुनयो - घ. । २७ व्यावर्त्यं लज्जया चक्रुः - घ. । २८ सन्निपातः - क. । २९ ...दो - क., दानवपर्श्वगैः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गजैश्च नीलाचलसन्निकाशै रथैश्च गन्धर्वविमानकल्पैः।
हयैश्च वायुप्रतिमानवेगैश्चरन्ति दैत्याः समरे ह्यभीताः ॥२७॥
ते शूलशक्त्यृष्टिभुशुण्डिबाणैः शैलोपलैश्चक्रसशूलवज्रैः ।
अन्योन्यमुत्सादयितुं प्रवृत्ता गणेश्वरा दानवपुंगवाश्च ॥२८॥

⊙ इति स्कन्दपुराणे गणयुद्धे पञ्चत्रिंशोत्तरशततमोध्यायः[३०] ⊙

सनत्कुमार उवाच

विरोचनस्तु दैत्येंद्रो[१] विरोचन इवोदितः ।
विवेश प्रमथानीकं मेघानीकमिवांशुमान् ॥१॥
मन्दराग्रप्रतीकाशमीषादन्तं क्षरन्मदम् ।
चतुर्दन्तं समास्थाय दन्तिनं दन्तभूषितम् ॥२॥
स नागस्कन्धगस्तत्र भ्राजतेसुरपुंगवः ।
उदयाग्रं समास्थाय सहस्रांशुर्ज्वलन्निव ॥३॥
तोमरैः सशरैश्चापि दिवाकरकरप्रभैः ।
प्रमथानपतस्तार[२] शतशोथ सहस्रशः ॥४॥
वैनतेयो यथा नागान् सिंहो गोवृषभान् यथा ।
द्रावयामास प्रमथान् तथा शूरो विरोचनः ॥५॥
यान्तमायान्तमप्राप्तं प्राप्तं दूरस्थमेव च ।
प्रमथं पश्यते यं यं तं तं दारयते[३]सुरः ॥६॥
मृगाः सिंहं यथा दृष्ट्वा गरुडञ्च यथोरगाः ।
विरोचनं तथा[४] दृष्ट्वा प्रमथा दुद्रुवुर्भयात् ॥७॥
गणेश्वरबलं दृष्ट्वा गणेश्वरवरो द्रुतम् ।
विनायकः सन्निवृत्तः प्रमथानीकनायकः ॥८॥

---

३० १८४ - ख. ।
१ देत्येयो - क. । २...वतस्तार - ख. । ३ वारयते - ख. । ४ यथा - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रसारयन् करं घोरं पूर्वमैरावतो यथा ।
विरोचनं[५] सोऽभ्यधावच्छार्दूलो हरिणं यथा ॥९॥
तमापतन्तं संवीक्ष्य तीक्ष्णदन्तं गजाननम् ।
कुम्भान्तरे तोमरेण[६] दारयामास दानवः ॥१०॥
तं तोमरं कराग्रेण निष्कृष्य स विनायकः ।
हस्ताक्षिप्तेन[७] तेनैव विरोचनमदारयत् ॥११॥
स तोमरेण निर्भिन्नःकरपातातुरश्च ह ।
चचाल विह्वलो रक्तं चक्षार च विरोचनः ॥१२॥
घूर्णमानं तदालक्ष्य दानवेन्द्रं विरोचनम् ।
दन्ताभ्यां चन्द्रशुभ्राभ्यां निर्बिभेद विनायकः ॥१३॥
वैनायकं तत्तु समीक्ष्य कर्म देवाः शशङ्का मुमुचुः प्रणादान् ।
तस्योत्तमाङ्गोपरि पुष्पमाला[८]पपात देवस्य यथा त्रिमार्गा[९] ॥१४॥
तया तु नानाविधपुष्पवत्या विभाति देवः स तदा स्रजा रणे ।
नक्षत्रमालावलिचारुशोभः[१०] समुन्नतो मेरुरिवापरः स्थितः ॥१५॥
उद्भिन्नरक्तं तु विदार्यमाणं विरोचनं वीक्ष्य विनायकेन ।
जम्भोम्बुदाभोतुरमारसित्वा[११] दुद्राव मा भैरिति[१२] भाषमाणः[१३] ॥१६॥
तमापतन्तं बहुधा नदन्तं जम्भं वियन्मेघमिवाप्रमेयम् ।
रुरोध नन्दी समताडयच्च वज्रेण वज्री कुपितो यथाद्रिम् ॥१७॥
स वज्रवाताच्छिथिलः क्रियासु व्यसुर्यथा[१४] दानवदेवपुत्रः ।
पपात भूमौ मुहुरुत्थितश्च घृतावसिक्तः सदसीव वह्निः ॥१८॥
जम्भेवसन्नेरिबले प्रसन्ने षड्[१५] दानवाः षण्मुखपूर्वजं तम् ।
कुठारशूलासिपरश्वधैस्तु म्लेच्छा यथा क्रुद्धमुखास्ततक्षुः ॥१९॥
विनायकस्तैरवतक्षितस्तु प्रह्लाददेहात्[१६] प्रविकृष्य दन्तौ[१७] ।
मुमोच तं वै रुधिरावसिक्तं राहुर्विवस्वन्तमिवार्धभुक्तम्[१८] ॥२०॥

---

५ वैरोचनं - क. । ६ तोमरेन - ख. । ७ करेणाहत्य (?), हस्तेनाक्षिप्य (?) । ८ तस्योत्तमाङ्गे बर्हि - क. ख., ..माङ्गे पुष्पमाला (?) । ९ त्रिमार्गात् - ख. । १० ...चारुशोभाः - क. । ११ हत्य(?), ..दामारसित्वा(?)। १२ भोरिति - क. । १३ भाषमाणः - क. । १४ ... व्यसुर्यथा - क. ख. । १५ ते - ख. (क. टि.) । १६ ह्लाददेहात् - क., प्राह्लादिदेहात् (?) । १७ दन्ते - ख. ।
१८ ...विभास्वन्तमिवार्धभुक्तम् - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स तेन मुक्तोतिरुजावृतश्रीर्विरोचनो नातिबभौ मनोज्ञः ।
मेघाभिरुद्धो[१९] नवमेघकाले संपूर्णबिम्बो[२०]नभसीव चन्द्रः ॥२१॥
विनायकाभान् स विनायकस्तु षड् दानवान् षण्मुखसन्निकाशः[२१] ।
विशालदन्ताशनिसंप्रहारैर्व्यद्रावयत् सिंह इव द्विपेन्द्रान् ॥२२॥
करीन्द्रवक्त्रः करमुच्छ्रयित्वा करी सुराणामिव जातदर्पः ।
प्राकालयद्[२२] दानवमुङ्गवाँस्तान् यथा गजान् दर्पितसिंहपोतः ॥२३॥
सिंहेक्षितानामिव गोपतीनां[२३] कालेक्षितानामिव मानवानाम् ।
विनायकेनेक्षितकालितानां[२४] भयं तदासीन्मिषतां[२५] बलानाम् ॥२४॥
यतो यतः प्रेक्षति वै स देवो हस्तीव हस्तं स्वकमुच्छ्रयित्वा[२६] ।
ततस्ततो दैत्यबलं प्रभग्नं चण्डानिलेनेव वनं सपुष्पम् ॥२५॥
दृष्ट्वा बलं तद् बलिनाभिभूतं बलेः सुतोसौ बलिनां वरिष्ठः ।
विनायकं हन्तुमनाः ससार मत्तं रणे मत्त इव द्विपेन्द्रः ॥२६॥
तमापतन्तं तरसातिवेगं क्रुद्धं रणे कालमिवात्तचापम् ।
ससार रोद्धुं समरे च योद्धुं कुण्डोदरः सिंह इवान्यसिंहम् ॥२७॥
तौ सिंहपोताविव जातदर्पौ प्रकीर्णहस्ताविव हस्तिपोतौ ।
समागतौ युद्धरसाभिमत्तौ कुण्डोदरो वै[२७] बलिनन्दनश्च ॥२८॥
शतानि पंचैव स कार्मुकाणां[२८] विकृष्य वज्राशनिनिस्वनानाम् ।
कुण्डोदरायेषुवरान्[२९] ससर्ज गर्जन् स बाणस्तु यथा पयोदः ॥२९॥
तानागतां[३०]स्तीक्ष्णमुखाँस्तदानीं बाणस्य बाणान् कुपिताहिकल्पान् ।
कुण्डोदरः शैलरुहेण[३१] सर्वान् मनोरथान् विघ्न इवाजघान ॥३०॥
तान्निष्फलान् प्रेक्ष्य[३२] शरान् सुरारिः सुरेतरारिप्रहतान् क्षितिस्थान् ।
शक्त्या स कुण्डोदरमाजघान शक्त्या गुहः क्रौञ्चमिवाचलेन्द्रम् ॥३१॥
वक्षः प्रदेशात्तु गणेश्वरस्य बाणस्य शक्तिः क्षतजं पपौ सा ।
शक्रोपनीतं रुचिरं सुगन्धि[३३] यथामृतं वज्रधरस्य भार्या ॥३२॥

---

१९ ...भ्ररुद्धो - क. ख. । २० मंपूर्ण बम्बे - क. । २१ ...सन्निकायः - ख. । २२ प्रकालयद् - क ख., प्रकालयन् - ख. । २३ (ह) स्तिनीनां ?) । २४ कालिकान्तं - ख. । २५ विद्विपतां (?) । २६ प्रविशार्य सर्वशः - घ । २७ ... सौ - घ । २८ कार्मुकानां - क. ख. । २९ कुण्डौदरायेषुवरान् - क. । ३० नानागणां - क. । ३१ शैलवरेण - घ. । ३२ वीक्ष्य - ख. । ३३ सुगन्धं - क ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शक्तिप्रहाराभिहतस्तु यक्षः[३४] कुण्डोदरोदर्दरमन्दराभः[३५] ।
पपात संज्ञां विपुलां प्रहाय दावाग्निना दग्ध इवोच्चवृक्षः ।।३३।।
कुण्डोदरं तन्निहतं समीक्ष्य विनायकोसौ च्युतपद्ममालः ।
दुद्राव बाणं प्रति हन्तुकामः करीव भृङ्गारकरोच्छ्रयेण[३६] ।।३४।।
तमानने वज्रनिभाननैः शरैर्विनायकं ह्याततमेव बाणः ।
बिभेद भित्वा च ततो ररास[३७] ग्रीष्मव्यपाये नभसीव मेघः ।।३५।।
तृणाग्रपातानिव सेषुपातानचिन्तयित्वैव गजेन्द्रवक्त्रः ।
ईषेष[३८] नेत्रं[३९] सवरूथचक्रं बभञ्ज बाणस्य रथं ससूतम्[४०] ।।३६।।
बाणस्य वाहान् तु तमारुजन्तं[४१] विनायकं भूमिगतं यथेभम् ।
सिंहीसुतः सिंह इवाभिपत्य स बाहुपाशेन बबन्ध राहुः ।।३७।।
स राहुणा बहुयुगावबद्धो[४२] विनायकः सर्पसहस्रमालः ।
प्रस्पदन्त[४३] भ्रामितपुष्कराग्रो गजस्तरन् देवनदीं यथैव ।।३८।।
तं राहुबाहुप्रतिबद्धचेष्टं विनायकं वीक्ष्य तदा दिविस्थाः ।
देवाः सशक्राः सह यक्षसिद्धै र्हाहेति हाहेत्यसकृद्विनेदुः ।।३९।।
कुण्डोदरो यक्षवरस्तु सोथ आश्वस्य सस्यं हि यथाम्बुसिक्तम् ।
कुठारमादाय जघान राहुं जत्वन्तरे संहतमुष्टिना च ।।४०।।
कुठारघातात् स तु मुष्टिना च दृढाहतो यक्षवरेण राहुः ।
विनायकं भीमबलो मुमोच शुभेतरं कर्म यथा कुलीनः ।।४१।।
तं वै परावृत्य करीव मत्तो गजाननः काननषण्डवासी[४४] ।
पद्भिश्च दन्तैश्च जघान राहुं प्रकीर्णहस्तेन च भीमहस्तः ।।४२।।
विनायकेनाभिहतस्तु राहुर्दर्पञ्च गर्वञ्च बलञ्च हित्वा ।
निस्तोयमेघप्रतिमोमरारिः स्थितो यथा सिंहहतो गजेन्द्रः ।।४३।।
राहौ तु[४५] कुण्डोदरमुष्टिघातै[४६] र्विनायकेनैव च पीडयमाने ।
कुजम्भसंह्लादमयाः सतारा हुण्डस्तुहुण्डश्च तदा तमीयुः[४७] ।।४४।।

---

३४ . स्रा तेन - घ. । ३५ मन्दरदर्शनाभः - घ. । ३६ भृङ्गाग्रकरोच्छ्रयेण (?) । ३७ ररास तत्र - घ. ।
३८ इयेष - क. ख. । ३९ नेतुं - ख. । ४० सयन्तृ - क. ख. । ४१ द्रुतमारुजन्तं - ख. ।
४२ बुद्धो - क., न (?) । ४३ प्रस्पदन्ते - क. ख. । ४४ ...वासः - ख. । ४५ राहुस्तु - क. ।
४६ मुष्टिपातै - क । ४७ तु - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मयस्तु कुण्डोदरमाजघान शूलेन तारो मुशलेन कुक्षौ ।
बलस्तु लम्बाम्बुदसन्निकाशं तं[४८] मुष्टिना वज्रनिभेन चापि ।।४५।।
हिरण्यनेत्रावरजात्मजश्च विनायकं भीमबलं तलेन ।
तस्यात्मजश्चापि जघान रोषात् स चापि गत्वा बलवाँस्तुहुण्डः ।।४६।।
विनायकस्तं तु तदा गृहीत्वा करेण विक्रम्य तुहुण्डमाजौ ।
आक्षिप्य चोत्क्षिप्य[४९] च भीमवेगश्चिक्षेप दूरं यमदूतकल्पम्[५०] ।।४७।।
प्रह्लादमाहत्य ततः स देवो मयश्च मत्ताञ्जनतुल्यवक्षाः ।
उत्पाट्य तं घोररवं ननाद शुभ्राम्बुपूर्णो नभसिव मेघः ।।४८।।
कुण्डोदरश्चापि बलं सतारं कुजम्भमाहत्य[५१] च यक्षवर्यः ।
उभौ रणस्थौ[५२] गजयूथपालौ[५३] व्याधूतमालौ[५४] भृशजातकोपौ ।।४९।।
ससर्जतुस्तौ[५५] शरवृष्टिमुग्रां यथाम्बुवृष्टिं जलदौ सनादौ ।
ततः पुनश्चायुधसर्जगानि[५६] पयोदविस्फूर्जितगर्जितानि[५७] ।
बलानि तान्यासुरपार्षदानां संसक्तभावं परमं गतानि ।।५०।।

⊙ इति स्कन्दपुराणे गणयुद्धे षट्त्रिंशदुत्तरशततमोध्यायः ⊙

सनत्कुमार उवाच

ततो व्यतिकरो भूयः पार्षदासुरसैन्ययोः ।
संबभूवोदधिक्षोभान्मकराणामिवाद्भुतः ।।१।।
पट्टिशासिधनुष्मन्तो[१] विद्युत्वन्त इवाम्बुदाः ।
विबभुर्दानवास्तत्र प्रमथाश्च युयुत्सवः ।।२।।
सहस्व प्रहरस्वेति नश्य नष्टस्त्वमित्यपि ।
तेषामेवं प्रवदतामश्रूयन्त गिरो मुहुः ।।३।।

---

४८ सन्निकाशस्तं - ख. । ४९ सोत्क्षिप्य - क. ख. । ५० यमदूतकल्पः - ख. । ५१ कुभञ्जमाहत्य - क. ।
५२ रणस्ते (स्थो) - ख. । ५३ गजयूथपालो - ख. । ५४ व्याधूतमालो - ख. । ५५ तुष्टो - ख. ।
५६ पुनस्त्वायुधसर्जनानि - ख. । ५७ नादितानि - घ. ।
१ पट्टशासिधनुष्मन्तो - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शूलैस्त्रिशूलैश्चक्रैश्च हुण्डैर्लगुडकम्पनैः[२] ।
भिन्दिपालैः करसमैः प्रसृतैर्नखरैरपि ॥४॥
टंकैः कटंकटैः प्रासैः पाशैः[३] परशुपट्टिशैः ।
द्रुमोपलशिलाघातैर्गिरीणां शिखरैरपि ॥५॥
एतैः प्रहरणैस्ते वै सूदयन्ति परस्परम् ।
घण्टाकर्णोहमसुर जम्भोहं प्रमथेश्वर ॥६॥
सोमनन्द्यहमिन्द्रारे कुजम्भोहं गणाधिप ।
विल्वकोहमहं[४] यक्ष पिङ्गलो नाम दानव ॥७॥
प्रह्लादोहमहं नन्दी शंकुकर्णो बलो[५] ह्यहम् ।
त्वं कः कुण्डोदरोहं वै वृत्रोहं[६] कुण्डकोदर[७] ॥८॥
नन्दिषेणोस्म्यहं शंभुर्महाकाल[८]मयो ह्यहम् ।
विशाखोहं बलिरहमहं बाणो गुहो ह्यहम् ॥९॥
प्रह्लादोहमहं[९] शाखो[१०] नैगमेषोहमन्धकः[११] ।
इत्येवं दानवानां च प्रमथानां च भैरवाः[१२] ॥१०॥
दर्पोद्रेकादधिक्षेपाः[१३] श्रूयन्ते युध्यतां रणे ।
गजानामिव मत्तानां मेघानामिव चागमे ॥११॥
भिद्यतामिव[१४] शैलानां समुद्राणां क्षयेष्विव ।
प्रलयान्तेषु महतां वायूनां जवतामिव ॥१२॥
तेषामासीन्महाञ्छब्दः परस्परनिजघ्नुषाम्[१५] ।
ब्रह्मदण्डप्रतीकाशैर्यमदण्डनिभैरपि ।
आयुधैस्सूदयन्ति स्म तेन्योन्यकुपिता[१६] भृशम् ॥१३॥
वज्राणामिव शैलेषु वंशानामिव[१७] दह्यताम् ।
अभूच्चटचटाशब्दः शस्त्राणां पात्यतां[१८] तदा ॥१४॥

२ हुलैर्लकुल... - ख. । ३ कर्णैः - ख. । ४ पिल्वलोहमहं - ख. । ५ बले - क. ।
६ वृत्तोहं - ख. । ७ कुण्डकोदरः - क. ख., ८ महाकायो - ?, य (?) । ९ संह्लादोहमहं (?) ।
१० शम्भो - ख. । ११ ...मप्युत - घ. । १२ दारुणाः - क. (?), बभौ रवः - घ. । १३ अधिक्षेपाः (?) ।
१४ विध्यतामिव - ख. । १५ शस्त्राणां पात्यतां तदा - ख., विजघ्नतां - घ. । १६ क्षुभिताः - घ. ।
१७ वेणूनामिव - क. (?) । १८ पततां - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गणेश्वरविमुक्ताभिः शक्तिभिः सुदृढाहताः[१९] ।
निपेतुरारसन्तस्ते[२०] सोल्का इव यथा घनाः[२१] ॥१५॥
द्रुमप्रहारभग्नाङ्गा गदाचूर्णितसन्धयः ।
दानवा निपतन्त्युर्व्यां वाजिनश्च्युतजीविताः ॥१६॥
छिन्नध्वजपताकेषा भग्नाक्षयुगकूबराः ।
विध्वस्तास्तत्र दृश्यन्ते विमानप्रतिमा रथाः ॥१७॥
मातङ्गैश्च तुरङ्गैश्च स्यन्दनैश्चावचूर्णितैः ।
विन्ध्याक्रान्तेव सा भूमिर्दुर्गमा समपद्यत ॥१८॥
तत्र देवाः स गन्धर्वाः सयक्षोरगकिन्नराः ।
उत्कृष्टवरशब्दाढ्यं[२२] चक्रुः सुबहुशोम्बरम् ॥१९॥
दिव्यानां सुविचित्राणाममृतोपमगन्धिनाम् ।
वर्षं पपात पुष्पाणां युध्यन्ते यत्र[२३] ते रणे[२४] ॥२०॥
तथा तु ते गजघननादगर्जनाः[२५] शरासिशक्त्यृष्टि[२६]गदाविसर्जनाः ।
परस्परं युयुधुरतीव संहता[२७] दितेः सुताः प्रमथगणाश्च दर्पिताः ॥२१॥

⊙ इति स्कन्दपुराणे गणयुद्धे सप्तत्रिंशोत्तरशततमोऽध्यायः ⊙

सनत्कुमार उवाच

ताम्यमानेषु[१] दैत्येषु दैत्ययूथपयूथपाः[२] ।
चक्रुर्वेगं महावेगा युगान्तेष्विव सागराः ॥१॥
प्रह्लादश्चानुह्लादश्च संह्लादः शिनिबाष्कलौ ।
प्रह्लादस्य च ये पुत्राश्चत्वारो भीमविक्रमाः ॥२॥
बलिर्बाणश्च वातश्च शम्भुः कार्तस्वनः कुभः[३] ।
करभो[४] नमुचिस्तारस्तारकश्चेन्द्रतापनः[५] ॥३॥

---

१९ प्रासतोमरैः - घ. । २० रारसन्तो वै - क. ख. । २१ घनाघनान् - (नाः?) - घ. । २२ खरशब्दाढयं - क. । २३ तत्र - क. । २४ तोरणें - ख. । २५ गर्जिताः - क. । २६ शरर्ष्टिशक्त्यसि - (?) । २७ संकटे (टा) - क. ख. ।

१ नाम्यनानेषु - क., नाश्य... - घ. । २ अन्ये दैत्या महारथाः - घ. । ३ शुभः - क. । ४ शरभो (?) । ५ ...स्सेन्द्रतापनः - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अञ्जनो रूषणो व्यंसो गविष्ठः[६] पृथिवीञ्जयः[७] ।
इल्वकः[८] पिल्वकश्चैव धुन्धुर्मूकश्च दानवः ॥४॥
खरो[९] मुरोथ[१०] नरकः केशी धेनुक एव च ।
लम्बः प्रलम्बो ह्याजरो[११] भावयव्योममार्दवाः[१२] ॥५॥
वृषपर्वा शतावर्तो गवाक्षो गोमुखस्तथा ।
सरो[१३]लिसुन्दः सुन्दश्च महाबलपराक्रमाः ॥६॥
पाको विपाकः सन्तापो[१४] हस्ती दुर्योधनस्तथा ।
मोहनो मथनश्चापि सचक्रश्चक्र एव च ॥७॥
कालकावदनः कालः कालनेमी[१५] कलिर्द्रुमः[१६] ।
हयशीर्षश्चेन्द्रशिरा[१७]स्त्रिशिराः शंकुरेव च ॥८॥
तथा गगनमूर्धा च अविरोमा महामनः[१८] ।
असिलोमा तुहुण्डश्च हुण्डो वृत्रश्च दानवः ॥९॥
दशग्रीवश्च बालिश्च मेघनीलः[१९] प्रभाकरः ।
यश्चादित्यरथाच्चक्रं जहार बलदर्पितः ॥१०॥
स विप्रचित्तिः सबलः सन्यवर्तत दंशितः(?)[२०] ।
एते चान्ये च दितिजाः समदास्ते गजा इव ॥११॥
चक्रुरुत्साहमुत्सर्तुं[२१] प्रमथ्य प्रमथान्[२२] रणे ।
आमिषार्थे[२३] यथा सिंहा वासितार्थे[२४] यथा गजाः ॥१२॥
दानवा विविशुस्तद्वत् प्रमथान् संजिघांसवः ।
तेषामापततां वेगो भीमोभूद्देवविद्विषाम्[२५] ।
सनक्रमकरो घोरो वेगः सिन्धुपतेरिव ॥१३॥
ते वै शस्त्रोपलशिलापादपाशनिपाणयः ।
प्रमथैरुद्धतै रुद्धा नदीवेगा इवार्णवैः[२६] ॥१४॥

---

६ गर्विष्ठः - ख., गविजः - क. । ७ पृथिवीजयः - क. । ८ इल्वलः - खः । ९ सुरो - ख., गर्वेवरोथ - घ. । १० वै - क. । ११ ह्यजको - घ. । १२ ...श्च प्रमर्दनः - घ., मार्दवः - क. । १३ खरो - घ. । १४ सन्तापी - घ. । १५ कान्नेमि: - घ । १६ द्रुमाः - घ. । १७ हयःशिरोथेन्द्रशिरा - क, हयशिरा - ख. । १८ महामनाः (?) । १९ नीलमेघः - घ. । २० दंशिताः - घ. । २१ ...मत्यर्थं - ख. । २२ प्रमथाः - क., प्रमथो - ख, प्रमथ - घ, प्रथमं - (?) । २३ आमिषार्थं - क. ख. । २४ वासितार्थं - क. ख. । २५ देवतारिणाम् - क. ख, देवताद्विषाम् (?) । २६ इवार्णवे (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गणेश्वराधिपो नन्दी महाकायश्च[२७] वीर्यवान् ।
घण्टाकर्णः शंकुकर्णः कुण्डोदरमहोदरौ ।।१५।।
नन्दिषेणः सोमनन्दी करिकश्च गणेश्वरः ।
विघ्नो विनायकश्चैव स च सर्वविनायकः[२८] ।।१६।।
पिङ्गलो लोहितश्चैव मयूरः कुक्कुटोपि च[२९] ।
पञ्चाक्षो वीरभद्रश्च विट्पतिः पावकार्दनः ।।१७।।
आदित्याप्यायनश्चैव सोमाप्यायन एव च ।
समुद्राप्यायश्चान्यः पावकाप्यायनस्तथा ।।१८।।
वरबर्हिध्वजश्चैव विशाखः शाख एव च ।
नैगमेषश्च बलवान् रुद्रवीर्यपराक्रमाः[३०] ।।१९।।
बाहुलेयोद्भवा[३१] ये च प्रमथा भीमरूपिणः ।
तेभ्ययुर्दानवान् युद्धे वृषभा वृषभानिव ।।२०।।
तेषां तेषांञ्च संग्रामस्तुमुलः समपद्यत ।
अजने[३२] गन्धहस्तीनां(?) शरभैरिव दारुणः ।।२१।।
महागजैरिव गजाः पर्वतैरिव पर्वताः ।
सागराः सागरैर्यद्वत् पावकैरिव पावकाः ।।२२।।
तथा[३३]सुरा जातदर्पाः क्रोधवैश्वानरावृताः ।
धृताः पारिषदैः[३४] शूरैर्विघ्ना धर्मपरैरिव ।।२३।।
टङ्कैर्विदार्यमाणानि गिर्यग्राणि समन्ततः ।
गृध्रचक्रायमाणानि[३५] पतन्त्युर्व्यां सहस्रशः ।।२४।।
चक्राणि चक्रैश्छिद्यन्ते शूलैः शूला विदारिताः[३६] ।
इषुभिश्चेषवो विद्धाः पतन्ति भुजगा इव ।।२५।।
वदनैश्चन्द्रपद्माभैः करैश्च परिघोपमैः ।
आस्तृता मेदिनी भाति व्याघ्रचर्माम्बरैरिव ।।२६।।

---

२७ महाकालश्च - ख. । २८ दर्प्पविनायकः - क. । २९ ह्यपि - क. ३० पराक्रमः - क. । ३१ बाहुलोमोद्भवा - क, बहुलासोदरा - घ. । ३२ अयने - क., अजले - घ. । ३३ तेषां - ख. । ३४ विवृताः पार्षदैः - घ. । ३५ चक्रोपमानानि - घ. । ३६ विरेजिताः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मेदो मज्जास्थिपङ्काङ्क[३७] केशकश्मलसंकुलम्[३८] ।
बभूवायोधनं घोरं श्मशानवनसन्निभम् ।।२७।।
हया गजा रथाश्चापि दानवानां गणेश्वरैः ।
संचूर्णिताः प्रदृश्यन्ते तत्र तत्र महीतले ।।२८।।

- ।

परीक्षणीय[३९]स्समितौ त्वमद्य सुरेतराणां सुरराजशत्रो[४०] ।।२९।।
नन्दिन्यथैवं ब्रुवतीन्द्रकल्पे[४१] शक्रेन्दुवायु[४२]प्रतितुल्यवीर्यः[४३] ।
बद्ध्वा त्रिशाखां भ्रुकुटीं ललाटे स नन्दिनं प्राह तदा[४४] कुजम्भः ।।३०।।
वानरानन किं वाग्भिर्मां भीषयितुमिच्छसि ।
हिरण्यकशिपोः पौत्रो[४५] नाहं प्राकृतदानवः ।।३१।।
यमात्सदण्डाद्वरुणात्सपाशादिन्द्रात्सवज्रात्सगदाद्धनेशात्[४६] ।
नाहं[४७]रणस्थो भयमाहरामि भयन्न दैत्येषु पलायितं वा ।।२३।।
अद्येह ते[४८] पिङ्गललोलनेत्रं मुखं त्वपात्रं[४९] विकृता[५०]मनोज्ञम् ।
मद्बाणलूनं पततामवन्यां तालाद्यथा तालफलं सुपक्वम् ।।३३।।
इत्येवमुक्त्वा शरजालवृष्टया नन्दीश्वरं दानवराजमेघः[५१] ।
सिंहो यथातीव विमुच्य नादं प्राच्छादयन्[५२] मेघ इवाचलेन्द्रम् ।।३४।।
तरुं यथा पक्वफलं शकुन्ता वल्मीकमुच्चं भुजगा इवोग्राः ।
तथा शरा दानवराजमुक्ता नन्दीश्वरं दीप्तमुखा[५३] विशन्ति ।।३५।।
वज्रेण वज्री स तु ता[५४]ञ्छरौघान् शैलः पयोधानिव[५५] सन्निवार्य ।
कुजम्भमुद्दिश्य मुमोच वज्रं ननाद चोच्चैर्नभसीव मेघः ।।३६।।
तद्विस्फुलिङ्गोद्गतघोररूपं समाहतारावविमुक्तरावम् ।
वज्रं प्रधावत्यसुरं निहन्तुं गिरिं यथा देवतराजवज्रम् ।।३७।।
तद्वत्सदन्तैः सुविपाटवस्तैः[५६] समीपगैर्दिग्धविकर्णिणभिश्च[५७] ।
जघान वज्रं शतधा[५८] कुजम्भः संवर्त्तकाग्नि समये व[५९] मेघः ।।३८।।

---

३७ मेदोमांसास्रगापूर्णं - घ. । ३८ शाद्वलसंकुलम - घ. । ३९ निरीक्षणीयः - क. । ४० तिष्ठ त्वरेणा-सुरराजशत्रो - घ । ४१ ... कल्पः - क. । ४२ शक्रेन्द्रवायु - क. । ४३ वेगान् - ख., पुत्र - घ. । ४४ तथा - क । ४५ पुत्रो - क. ख । ४६ धनेशाः - क । ४७ ...न्नाहं - क. । ४८ अद्याह(वे) - ख. । ४९ नत्रात्रा - घ. । ५० विकृतं - घ । ५१ ... राजमेघं - क. । ५२ प्रच्छादयन् - क. ख. । ५३ दीपमुत्रं - ख. । ५४ वज्रीशहता - घ. । ५५ पयोदानिव - ख. । ५६ सविपाटवस्तैः - ख । ५७ .. दिग्ध(वीर्य?)... - क. । ५८ स तदा - घ । ५९ स यथैव - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तद्बाणवेगप्रहतातिवेगं शैलादिनिर्मुक्तममोघवेगम् ।
वज्रं कुजम्भाभिहतं निवृत्तं दत्तं[६०] यथोन्मादविकारदत्तम् ।।३९।।
विष्टम्भितं वज्रवरं निशाम्य निशाम्य नादश्च कुजम्भमुक्तम् ।
ससार नन्दी कुपितो रिपुं तं राहुर्यथा वै खतले तमोन्ध्रम् ।।४०।।
बलात्स संगृह्य रथं करेण ईषावराग्रे[६१] प्रमथेशपालः ।
आक्षिप्य विक्षेप ससूतवाहं क्षिप्त्वा च भूयस्स ररास घोरम् ।।४१।।
संभ्रान्तवक्त्रः सविसन्धिताश्वः[६२] प्रभ्रष्टसूतासिशिरोग्रनेमिः[६३] ।
कुजम्भवाहः खतलात् पपात गिरिर्यथा वज्रनिकृत्तपक्षः ।।४२।।
तस्माद्रथान्नन्दिगजप्रनुन्ना[६४]दपेत्य[६५] प्रह्लादिरदीनसत्वः ।
शक्तिं समादाय[६६] न दीनसत्वस्तस्थौ सविद्युत्सरवो यथाब्दः ।।४३।।
तां सर्पजिह्वामिव लेलिहानां मृत्युं क्षुधार्तामिव भोक्तुकामाम् ।
शिखां महाग्नेरिव दीप्यमानां स नन्दिने सं[६७]प्रमुमोच जम्भः[६८] ।।४४।।
सा शक्तिरिन्द्रारिभुजप्रमुक्ता उग्रातिदीप्ताङ्गिरसीव कृत्या ।
अभ्याहता नन्दिमुखानलेन दग्धा पतङ्गीव यथानलेन ।।४५।।
शक्तिं स दग्ध्वा वदनानलेन कपीन्द्रवक्त्रस्तपनप्रभावः ।
वज्रेण तं सत्वरमाजघान वज्रेण मेरुं भगवानिवेन्द्रः ।।४६।।
स वज्रघातादवचूर्णितास्थिः संशीर्णदन्तेक्षणभग्नजानुः ।
कुब्जः कुजम्भो निपपात भूमौ शक्रेण वज्राभिहतो यथाद्रिः ।।४७।।
तस्मिन् हते देवगणा विनेदुः सेदुः[६९] सुराणामरयश्च दैन्यात्[७०] ।
भूताधिपं भूतपतिश्च देवं[७१] प्रपूजयामास शाशाङ्कचिह्नम्[७२] ।।४८।।

⊙ इति स्कन्दपुराणे गणयुद्धे जम्भवधे अष्टात्रिंशदुत्तरशततमोध्यायः ⊙

---

६० दानं - क. । ६१ ईशा - क. ख. । ६२ प्रविसन्धिताश्वः (?) । ६३ प्रन (ण) ष्टसूतासि - ख. ।
६४ प्रतुन्ना - ख. । ६५ ...दुत्पत्य (?) - ख. । ६६ ह्य (?) - ख. । ६७ तां - घ. । ६८ शक्तिं - घ. ।
६९ सुखात् - घ. । ७० दैत्याः - क. । ७१ देवाः (वः) - ख. । ७२ चिह्न(?)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

कुजम्भं निहतं दृष्ट्वा नन्दिना देवनन्दिना[१] ।
निनादं[२] चक्रिरे[३] देवाश्चारणाश्च महोरगाः ॥१॥
तेन देवनिनादेन कुजम्भनिधनेन च ।
जम्भो दानवशार्दूलः क्रोधमाहारयन्महत् ॥२॥
तस्य क्रुद्धस्य गात्रेभ्यो निष्पेतुः पावकार्चिषः ।
मेरोर्वज्राहतस्येव विस्फुलिङ्गाः समन्ततः ॥३॥
सोल्काम्बुदनिभाभासो जम्भः[४] क्रोधसमावृतः[५] ।
दुद्राव नन्दिनं हन्तुं कुञ्जरं सिंहराडिव ॥४॥
सोर्धभारसहस्रस्य कृतं सैक्यायसं[६] महत् ।
उद्वहन् परिघं घोरं दैत्यो दुद्राव नन्दिनम् ॥५॥
तिष्ठेदानीं दुराचार मया दृष्टः क्व यास्यसि ।
एष त्वां वज्रसंकाशः परिघश्चूर्णयिष्यति ॥६॥
इत्युक्त्वा घोरया वाचा जंभो नन्दिनमग्रतः ।
परिघं तस्य चिक्षेप दण्डं यम इवापरः ॥७॥
स तस्य करनिर्मुक्तो[७] निर्मुक्तोरगसन्निभः ।
परिघो नन्दिनं याति हन्तुं कालानलोपमः[८] ॥८॥
तं वासुकिभुजङ्गाभं ब्रह्मदण्डनिभं महत् ।
वज्रेणाभ्यहनन्नन्दी देवराजो यथा बलम्[९] ॥९॥
वज्रप्रहारं तृणवद्विचिन्त्य परिघः स तु ।
शक्राग्निरिव[१०] दुर्दृश्यः प्रधावन्नन्दिनं[११] प्रति ॥१०॥
कृतो निनादः सुमहान् प्रमथैश्च सहस्रशः ।
श्रुत्वा निनादं देवानां परिघं वीक्ष्य चागतम् ॥११॥
शंकुकर्णोभिदुद्राव[१२] परिघं प्रति वेगितः ।
स तं कर्कोटकप्रख्यं दुर्निवार्यं महास्त्रवत् ॥१२॥

---

१ देववन्दिना । २ अकुर्वन् - ख. । ३ निनदं - ख., अकरोद् - क. । ४ भंजः - क. ।
५ क्रोधाग्निनावृतः - ख. घ. । ६ शैक्यायसं - क. । ७ नियुक्तो - क. । ८ कालानलोपमं - क. ।
९ यथाचलं - क. । १० वज्राग्निरिव - घ. । ११ प्रधावन् नन्दिनं - क. ख. । १२ ...भिजग्राह - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

- - - - - - - - - - - - - - - - - - ।
शंकुकर्णेन परिघं गृहीतं वीक्ष्य तद्बलात् ।।१३।।
विनेदुर्मुदिता देवा:[१३] शंकुकर्णञ्च तुष्टुवु: ।
शंकुकर्णोपि परिघं गृहीत्वा बलवान् पुन: ।।१४।।
ररास जम्भमुद्दिश्य ससार च रणप्रिय:[१४] ।
ततो दानवशार्दूल: ससार रणलालस: ।।१५।।
ततो गणेश्वरबले दानवानां बले तथा[१५] ।
जज्ञे वादित्रनिनद: सिंहनादविमिश्रित: ।।१६।।
अथ गगनतले बभूव शब्द: क्षुभितसमुद्रपयोदनादकल्प:[१६] ।
दनुतनयगणाधिपेशयुद्धं तदुपनिशाम्य दिवौकसां तदानीम् ।।१७।।
प्रमथगणवरास्सनागरुद्रा[१७] ह्यसुरवराश्च सहान्धका रणस्था: ।
व्युपरतकलहा[१८]स्तदावतस्थुर्गणपतिदानवयुद्धमीक्षमाणा: ।।१८।।

⊙ इति स्कन्दपुराणे गणयुद्धे ऊनचत्वारिंशदुत्तरशततमोध्याय:[१९] ⊙

सनत्कुमार उवाच

शंकुकर्णं तु धावन्तं जम्भं प्रति महाबल:[१] ।
वृत्रोभ्यधावत्तं हन्तुं पंचानन इव[२] द्विपम् ।।१।।
उत्सृज्य शंकुकर्णोपि जम्भं गणपपुंगव: ।
वृत्रमेवाभिदुद्राव विघातो वै दमं[३] यथा ।।२।।
परिघेणाहनच्चैनं शंकुकर्णो गणेश्वर:।
महागिरिं यथा शक्रो वज्रेण शतपर्वणा ।।३।।
वृत्रोपि चाथ दैत्येन्द्र: परिघेणायसेन[४] वै ।
बभ्राम ताडितोत्यर्थं वायुनुन्न इव द्रुम: ।।४।।

---

१३ दुरितान्देवा: - क. । १४ रणे प्रिय: - क.. रणाप्रिय: - ख. । १५ तदा – ख. । १६ पयोदसमुद्रनादकल्प: - क. ख. घ. । १७ ...श्च नागरुद्रा - क. ख. । १८ व्यपगतकलहा - क. । १९ १८८ - ख. पु. ।
१ महाबलं - ख. । २ नरसिंहो यथा - क. ख. । ३ द्रुमं - क. । ४ ...नायसेन - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स तेन सुप्रहारेण रुधिरस्त्रावचित्रितः ।
स्वर्णधातुरसोद्गारी नीलाचल इवाबभौ ॥५॥
वृत्रे घूर्णति दैत्येन्द्रे परिघाभिहते भृशम् ।
विनेदु[५] देवगन्धर्वाः पूजयन्तो गणेश्वरम् ॥६॥
ततश्चिरात् समाश्वस्य वृत्रो दानवपुङ्गवः ।
गिरेः शृङ्गं[६] समुत्पाट्य शङ्कुकर्णमधावत ।
स तस्य तत्सवृक्षर्क्षं सधातूपलपन्नगम् ।
गणेश्वरायाचलाग्रं चिक्षेप च ररास च ॥८॥
तद्वृत्रभुजनिर्मुक्तं[७] गिर्यग्रशिखरं महत् ।
बिभेद नन्दी वज्रेण केशरीव मतङ्गजम् ॥९॥
अथ तौ गणदैत्येन्द्रौ भुजैर्भुजगकोपनौ[८] ।
समेतौ घोरसंह्लादौ नियुद्धकुशलावुभौ ॥१०॥
निष्टनन्ताविवादित्यौ दीप्यमानाविवानलौ[९] ।
गर्जमानाविव घनौ बृंहन्ताविव कुञ्जरौ ॥११॥
मत्ताविव च शार्दूलौ निःश्वसन्ताविवोरगौ ।
नर्दमानौ यथा सिंहौ वल्गमानौ वृषाविव[१०] ॥१२॥
चलन्ताविव शैलेन्द्रौ घूर्णमानाविवार्णवौ[११] ।
पूरयन्तौ यथा मेघौ स्पर्धन्तौ मकराविव ॥१३॥
इत्येवं शंकुकर्णश्च वृत्रश्चासुरपुंगवः ।
प्रयुद्धौ युद्धकुशलौ परस्परजिघांसया ॥१४॥
मुष्टिभिर्वज्रकल्पैश्च तलैश्चाशनिसन्निभैः ।
पादप्रहारैर्घोरैश्च[१२] ऊर्ध्वमुत्क्षेपणैस्तथा ॥१५॥
आक्षेपैरथ विक्षेपैः कर्षणैरपकर्षणैः ।
पौरुषाख्यापनै[१३]रुग्रै[१४]र्नामसंश्रावणैरपि ॥१६॥

---

५ युयुधु - घ. । ६ गिरेरग्रं - ख. । ७ . भुजविनिर्मुक्तं - क., हस्त... - क. टि. । ८ भुजौ भुजगकोपनौ - क., भुजगोपमौ - घ. । ९ ...चलौ - क. ख. । १० वेपमानाविव ध्वजौ - घ. । ११ नर्दन्ताविव गोवृषौ - घ..। १२ बाहुप्रहारैर्घोरैश्च - घ. । १३ पौरुषख्यापनै - ख.,. ख्यापनै - क. । १४ ...रुग्रै - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

करजाग्रप्रतुदनै[१५]र्गलग्रहणनिग्रहैः ।
सिंहनादैः सवादित्रैर्वृक्षशैलशिलोपलैः ॥१७॥
शंकुकर्णो गणाध्यक्षः स च वृत्रो[१६] दनोस्सुतः ।
जघ्नतुस्तावथान्योन्यमन्योन्यस्यान्तरैषिणौ[१७] ॥१८॥
शंकुकर्णेन वृत्रस्तु[१८] दृढमूल इव द्रुमः ।
हस्तावबन्धनोत्क्षिप्तः[१९] सहसा पातितः क्षितौ ॥१९॥
ततो[२०] गणेश्वरबले दानवानां तथा बले[२१] ।
साधुशब्दो बभूवोच्चैर्वृत्रे[२२] तु विनिपातिते ॥२०॥
मुष्टिना तमथाहत्य वृत्रं भुवि निपात्य[२३] च ।
शंकुकर्णो ह्यपक्रान्तो देहाज्जीव इवाशुगः ॥२१॥
वृत्रस्तु[२४] सुमहावीर्यो मुष्टिताडनविह्वलः[२५] ।
इन्द्रकेतुरिवोत्तस्थौ दुद्राव च गणेश्वरम् ॥२२॥
तमापतन्तं वृक्षेण शंकुकर्णो गणेश्वरः ।
शालेन[२६] ताडयामास इत एहीति चाब्रवीत् ॥२३॥
क्रुद्धेन शंकुकर्णेन वृत्रो वै शालताडितः ।
उपेत्य पादे जग्राह शंकुकुर्णं बली बलात् ॥२४॥
शंकुकर्णं गृहीत्वा तु वृत्रो नाग इवाण्डजम्[२७] ।
भ्रामयामास विवशं लोकं मोह इवोद्यतः ॥२५॥
शंकुकर्णस्य वृत्रेण भ्राम्यमाणस्य सर्वशः ।
शरीरात्समदीर्यन्त भूषणानि सहस्रशः ॥२६॥
तं भ्राम्यमाणं प्रसमीक्ष्य देवा वृत्रेण सर्वे च तदा गणेशाः ।
हाहेति कृत्वा धृतशस्त्रबाणाः प्रदुद्रुवुस्तस्य विमोक्षणार्थम् ॥२७॥
आगच्छातस्तान् प्रसमीक्ष्य वृत्रः सर्वान् गणेशान् शितशस्त्रहस्तान्[२८] ।
मुमोच तं संसदि[२९] शंकुकर्णं नागं गरुत्मानिव पक्षिराजः ॥२८॥

---

१५ करञ्जनाग्रनुदनैः - क. । १६ वृत्तो - ख । १७ ...मन्योन्यस्य वधैषिणौ - घ. । १८ वृत्तस्तु - ख. । १९ बन्धेनोत्क्षिप्त (?) । २० गते - क. । २१ बले तथा - क. । २२ वृत्ते - ख. । २३ तु विनिपात्य - क. । २४ वृत्तस्तु - ख. । २५ मुष्टिघातेन विह्वलः - घ. । २६ सालेन - ख. । २७ इवाण्डकान् - क., शुभं - घ., इवांशुकम् (?) । २८ सितशस्त्रहस्तान् - क. । २९ संयति (?)।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वृत्रमुक्तस्तु[३०] गणपः शंकुकर्णो महाबलः ।
योद्धुकामः पुनर्वृत्रं निवृत्तो[३१] हस्तिराडिव ।।२९।।
ततः पुनः सिंहरवाः समन्तात्[३२] तस्मिन्बले दुन्दुभिनिस्वनाश्च ।
हे शंकुकर्णेति च साधुवादो मनोहरस्तस्य रणे बभूव ।।३०।।

⊙ इति स्कन्दपुराणे गणयुद्धे चत्वारिंशोत्तरशततमोध्यायः ⊙

सनत्कुमार उवाच

शंकुकर्णं भ्रामयित्वा वृत्रस्त्यक्त्वा च भूतले ।
ममर्द प्रमथानीकं वनं मत्तो यथा गजः[१] ।।१।।
स नन्दिनं नन्दिषेणं सोमनन्दिनमेव च ।
आहत्य[२] द्रावयित्वा च ननर्द जलदो यथा ।।२।।
तस्याथ नर्दमानस्य विट्पती रुद्रसत्तमः ।
मुमोच वज्राग्निसमं रिपुक्षयकरं शरम्[३] ।।३।।
स विट्पतिविनिर्मुक्तः शरो रविकरप्रभः ।
विवेश वृत्रं निर्दार्य सिद्धोम्बुदमिवाम्बरे ।।४।।
उच्छ्रित्य[४] स्वकरं सोथ करं हस्तीव दानवः ।
विट्पतिं दुद्रुवे[५] संख्ये पयोदमिव मारुतः ।।५।।
तं शूलेन महाकायो[६] नन्दी वज्रेण दानवम् ।
सोमनन्दी कुठारेण नन्दिषेणस्तलेन च ।।६।।
बाणानाञ्च सहस्रेण विट्पतिर्वृत्रमाहवे ।
बिभेद परमक्रुद्धः पुनश्चान्यैस्त्रिसप्तभिः ।।७।।
सोर्दितो गणयूथेशैर्दानवः पर्वतोपमः ।
पात्यमानो[७] ररासोच्चैस्सदैवत इव द्रुमः ।।८।।

---

३० वृत्तमुक्तस्तु - (?) । ३१ निर्वृत्तो - क., प्रवृत्तो – घ. । ३२ सशंखाः - क. ख., १८९ - ख. ।
१ महागजः - ख. । २ आहत - क., आहत्य - ख. । ३ शुभम् - ख. । ४ उच्छृत्य - क. ।
५ दुद्राव विट्पतिं (?) । ६ महाकालो (?) । ७ पश्यमानो - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथमयबलमूकतारजम्भा[८] नमुचिगणे[९]ल्वलबाणबाणपुत्राः ।
विविधशरवरायुधा[१०]वतस्थुर्गणपतिवीरतमं[११] निवारयन्तः ।।९।।
रुचिरकनकचारुहारशोभाश्चलवलयाभरणा[१२] महेन्द्रकल्पाः ।
दितिवरतनयातिहृष्टरूपाः प्रमथबलेषु चरन्ति कालरूपाः[१३] ।।१०।।
मुशलहलशरावदारितास्या गिरिशिखराशनिवज्रचूर्णिताङ्गाः।
- ।।
गिरय इव च वज्रताडिता गणपतयः क्षितिमापुरातुराः ।।११।।
व्रणजपृषतविप्रुषोक्षिताश्च्युतसितहारविभूषणस्रजः[१४] ।
भयचकितमुखाः प्रदुद्रुवुस्ते प्रमथगणा रिपुभिर्भृशार्दिताः ।।१२।।
दिवि सितविरजा यथोच्छ्रिता[१५] नवजलदा नवतोयवृष्टयः ।
विससृजुरुरुवेगदारुणा दितितनयाः शरवृष्टिमर्दनीम् ।।१३।।
अथ करिगिरिमेघसन्निभा ज्वलनदिवाकरतुल्यतेजसः ।
विमलशितविसृष्टबाणजालाः[१६] प्रमथगणान् प्रहरन्ति[१७] दैत्यमुख्याः ।।१४।।
अथ परिघशरासिपट्टशैः[१८] करवरयन्त्रशतप्रनिःसृतैः[१९] ।
त्रिदशरिपुभयप्रदा रणे समरमुपेत्य विचक्रमुर्गणाः[२०] ।।१५।।
गिरिशिखरनिभाश्च दन्तिवर्या द्रुतगमना बहवश्च वाजिमुख्याः ।
सुरसदननिभा रथाश्च भीमाः समरमुखे निपतन्ति भग्नदग्धाः ।।१६।।
इषुवदनदृढावतक्षिता व्रणजसमुक्षितसूक्ष्मवाससः ।
प्रसृतनयनसत्वजीविता दनुतनयाः शतशोवपोथिताः[२१] ।।१७।।
च्युतसितवरहारकुण्डलैर्मुकुटकिरीटमणिस्रगम्बरैः ।
समरमुखमही विराजते रुचिरवराभरणैरिवोर्वशी ।।१८।।
क्षुभित इव यथा महार्णवो जलसमये च यथा नभो महत् ।
असुरगणबलं[२२] तथाभवत् प्रजवितवारणवाजिदानवम् ।।१९।।

---

८ मयबलिमूकतारजम्भा(?)। ९ बले (?)। १० शतवरायुधा(? । ११ वीरतमान् - घ. । १२ बहुलाभरणा - ख.।
१३ कालभूताः - क. ख. । १४ विभूषितस्रजः - क. । १५ यथेच्छिताः - क., यथोदिताः - घ. ।
१६ शतविसृष्टबाणजालाः - ख. । १७ प्रतिहन्ति - क. । १८ पट्टशैः - क. ख. । १९ यन्त्रगतप्रनिःसृतैः - क. ।
२० र्वाणः .. - क., शूरा... - घ. । २१ विपोथिताः - घ. । २२ बलगणं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यमवरुणधनेशवासवा भगवत्सुसूर्यशशाङ्कमाहृताः ।
हृषितनयनवक्त्रपङ्कजा रुरुधु[23]रमित्रगणार्दनोद्धताः[24] ॥२०॥
प्रविचरितगजेन्द्रतोयदं तुरगविधावितवायुसञ्चरम्[25] ।
अशनिशरशतह्रदाविलं न तु विरराम रणान्तदुर्दिनम् ॥२१॥
कमलदलनिकाशलोचनैः कमलदिवाकरचन्द्रसन्निभैः ।
दनुतनयवराननैर्मही प्रतिविबभौ कमलैरिवावृता ॥२२॥
विमथितगणदानवेश्वरं रुधिरवपामदसेकरूषितम् ।
समरमतिसुरौद्रदारुणं गरुडपिशाचबलावलोकितम्[26] ॥२३॥

⊙ इति स्कन्दपुराणे गणयुद्धे एकचत्वारिंशदुत्तरशततमोऽध्यायः[27] ⊙

सनत्कुमार उवाच

तस्मिन् वर्तति संग्रामे प्रमथासुरसैन्ययोः ।
धनुषां श्रूयते शब्दः प्रावृडम्बुधरोपमः[1] ॥१॥
गर्जताञ्च गजेन्द्राणां ह्रेषताञ्चैव वाजिनाम् ।
युद्धगान्धर्वरक्तानां नादाश्चामरराक्षसाम् ॥२॥
श्रोत्रायासकरा[2] घोरा वज्राशनिरवा इव ।
श्रूयन्ते[3] हि विवर्धन्ते ह्यर्था[4] ह्याधर्मणामिव[5] (?) ॥३॥
ततः कार्तस्वनो नाम दानवो मेघनिस्वनः ।
जघान प्रमथान् युद्धे कालो मर्त्यानिवागतः ॥४॥
स रथी कार्मुकी बाणी कवची कुण्डली तथा ।
प्रमथानीकमदहच्छुष्कं तृणमिवानलः ॥५॥

---

२३ रुरुधु - क । २४ र्दगोद्धुताः - क. ख., र्दिनोद्भुताः - घ. । २५ विधारितवायुचञ्चरं - ख.।
२६ बलाबलोर्क्रमति - क. । २७ १९० - ख. पु. ।

१ प्रावृड्मेघरवोपमः - घ. । २ श्रोत्रयो कटुका - घ. । ३ स्रवन्ते (?) । ४ नर्था(? । ५ ह्यधर्मिणामिव-(?), ह्याथर्वणा इव (?), ह्यधर्मिणामिव (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कार्तस्वनधनुर्मुक्ताः कार्तस्वरमहाशराः[६] ।
प्रमथान्दार्य निस्सङ्गं दारयन्ति रणावनिम्[७] ।।६।।
शलभा इव केदारानन्नया इव मानवान् ।
खगा इव तरून् पक्वान् गरुडः पन्नगानिव ।।७।।
तथा ते पृथवो बाणाः कार्तस्वनधनुश्च्युताः ।
प्रमथान् व्याकुलीचक्रुर्वासवृक्षानिवाण्डजाः ।।८।।
- - - - - - - - - - - - - - - - - - - ।
शरव्राता गणानीके निपतन्ति गिराविव[८] ।।९।।
प्रशान्तवाद्यनिनदं शरघातातिवेजितम् ।
गणेश्वरबलं जज्ञे बन्धुजीववनं यथा ।।१०।।
घनानिव[९] यथा वायुर्वैनतेय इवोरगान् ।
पृषतानिव[१०]शार्दूलस्तमौघानिव भास्करः ।।११।।
तथा कार्तस्वनः क्रुद्धः शरवज्रैः[११] सुदारुणैः ।
निर्ददाह गणाध्यक्षान् लोकान् संवर्तको यथा ।।१२।।
गणेश्वरबलं दृष्ट्वा दग्धं जग्धं रुजातुरम् ।
विट्पतिः कुपितो देवः कार्तस्वनमथाब्रवीत् ।।१३।।
शरपातेथ संस्थित्या रुद्रो रुद्रपराक्रमः ।
दानवेन्द्रं प्रकुपितो निषङ्गादुद्धरञ्छरम्[१२] ।।१४।।
कार्तस्वन बलं वीर्यं प्रतापश्च तवोत्तमः ।
किमेतानबलान् हंसि[१३] दानवेन्द्र गणेश्वरान् ।।१५।।
आगच्छ यदि ते शक्तिर्यदि वा विद्यते बलम् ।
मया कुरुष्व संमर्दं मा नर्दः[१४] पश्य मे बलम् ।।१६।।
कुण्डलालंकृतं तेद्य दंष्ट्रांकुरविभूषणम्[१५] ।
पातयामि शिरो दैत्य तालाद् वातः[१६] फलं यथा ।।१७।।

---

६ कार्तस्वनमहाशराः - ख. । ७ रणावरं(जिरं?) - ख. । ८ पतन्ति गिरयो यथा - ख । ९ घनानीव - घ. ।
१० पृषतानीव - घ. । ११ शरवर्कैः - घ., शरवर्षैं (?) । १२ नैषङ्गानुद्वहन् शरान् - घ., ...दुद्वहन - क. ।
१३ हन्तुं - ख. । १४ मा नर्दीः (?) । १५ दीप्तांगुरवभीषणम् - घ. । १६ वायुः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यद्यपि त्वाद्य रक्षन्ति[१७] दानवाः सान्धका[१८] रणे ।
तथापि ते हरिष्यामि प्राणानसुरपांसन ॥१८॥
इत्येवं नर्दमानस्य विट्पतेर्दानवो नदन्[१९] ।
ससर्ज बाणं मुक्त्वा च जगर्ज जलदो यथा ॥१९॥
ज्वलमानः स तु शरो घृतसिक्त इवानलः ।
घर्मार्कसदृशो[२०] भासा प्राधावद्[२१] विट्पतिं प्रति ॥२०॥
निष्प्रभोर्कोभवत्तत्र तस्य भासा पतत्रिणः ।
कार्तस्वननिनादेन[२२] पतन्ति विहगाः[२३] क्षितौ ॥२१॥
सोपि भासायुतो वाणः संवर्तक इवानलः ।
विट्पतेः कंकणे[२४] मग्नो निरये दुष्कृती यथा ॥२२॥
ततस्तमेव निष्कृष्य दानवप्रहितं शरम् ।
कार्तस्वनाय चिक्षेप विट्पतिर्विननाद च ॥२३॥
स विट्पतिविनिर्मुक्तः शरो दानवनाशकृत् ।
दानवस्य शिरो यन्तुर्जहारेषुपथान् दश[२५] ॥२४॥
हते यन्तरि तस्याश्वाश्चपलाः शबलाः[२६] रणे ।
उद्भ्रान्ता रथमादाय श्येना इव यथामिषम् ॥२५॥
कार्तस्वनरथं यात[२७] किमासत निगृह्णत ।
इत्येवं दानवेन्द्राणां बभूव निनदो महान् ॥२६॥
विस्तीर्णे मन्दरप्रस्थे भ्रमन् भाति रथोत्तमः ।
सादित्य इव सप्ताश्वो मेरौ रथवरो[२८] भ्रमन् ॥२७॥
अवप्लुत्य[२९] ततस्तस्माद् द्रुताश्वाद्[३०] रथसत्तमात्[३१] ।
कार्तस्वनो धनुष्पाणिरभिदुद्राव विट्पतिम् ॥२८॥
बलयोस्तु ततो नादः साधुसाध्विति संबभौ ।
कार्तस्वने योद्धुकामे भूयो विट्पतिना सह ॥२९॥

१७ गच्छन्ति - घ. । १८ सानुगा - घ. । १९ दानवोन्नदन् - ख. । २० यमार्कसदृशो - क., ...र्क - घ. ।
२१ प्रधावद् - क. ख. । २२ कार्तस्वरनिनादेन - घ. । २३ ह खगाः - ख. । २४ कंगणे - क. ख. ।
२५ ...वान्दिशन् - ख. । २६ सवलाः - क. । २७ गणान्देवान् - क. । २८ रथावरे - क. रवो - ख. ।
२९ प्रुत्य - क. । ३० हताश्वाद् - घ. । ३१ रथसत्तमं - क., ...सत्तम - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स विट्पतिं[32] वज्रनिभैर्बहुभिर्निशितैः शरैः ।
दानवोवाकिरन्मेघो यथा धारोत्करैर्गिरिम् ॥३०॥
स कार्तस्वनबाणौघैर्घनौघैरिव[33] सागरः ।
विट्पतिः पूर्यमाणोपि व्यथां नैव तदागमत् ॥३१॥
आकर्णात् कार्मुकं सोथ विकृष्य बलवान् बलात् ।
चिच्छेद दैत्येन्द्रशरान् द्विधैकैकं त्रिधा तथा ॥३२॥
तानिषून् शातयित्वा[34] तु पत्रिभिः प्राणभोजनैः ।
कार्तस्वनं सहस्रेण बिभेद च ननाद च ॥३३॥
पृष्ठतो दृश्यमानास्यैः शरैस्तैर्दानवो बभौ ।
यथाचलो नागवरैर्विवराधविनिर्गतैः[35] ॥३४॥
अथास्य कार्मुकं खड्गं शरावापश्च[36] पञ्चकम्[37] ।
चिच्छेद रुद्रः संक्रुद्ध[38]स्तं च सोभ्यर्दयद्वली ॥३५॥
अथ बाणमिन्द्रकुलिशेन समं कुपितं श्वसन्तमिव नागपतिम् ।
विससर्ज विट्पतिरुदारबलोदितिनन्दनार्दनमजिह्मगतिम् ॥३६॥
शरराट् स रुद्रवरसंप्रहितः समराङ्गणे[39] विसृतधूमलवः[40]।
असुराननं युधि जहार बलात् कमलं यथा मुनिरुदारमतिः[41] ॥३७॥
अथ दैवतै[42]र्मुनिवरैश्च कृतः प्रमथैश्च भीमनिनदैर्निनदः[43] ।
तदरेर्मुखं हृतमुदीक्ष्य[44] तदा वडवामुखाग्निदमनेन रणे ॥३८॥
स तु विट्पतिः प्रमथसैन्यपनिस्त्वभिसृत्य भूतपतिना सुचिरम् ।
अभिपूजितः समरकर्मपटुस्त्रिदशारिसिंहदमनो[45]दमनः ॥३९॥

⊙इति स्कन्दपुराणे गणयुद्धे द्विचत्वारिंशदुत्तरशततमोध्यायः[46]⊙

---

३२ विट्पतिं स - ख. । ३३ र्घनोवैरिव - क. । ३४ सातयित्वा - क., छेदयित्वा - ख. । ३५ विनिः सृतैः - ख. । ३६ शरांश्चापं च - क. । ३७ पञ्चधा - घ. । ३८ विट्पतिस्तस्य ... - घ. । ३९ समरानलो - क. । समवालन - घ. । ४० निशितधूम इव - घ. । ४१ मनि - क., मणिरुदारमतिः - घ. । ४२ देवतै - क. । ४३ ... नंदः - क., श्च नदः - ख. । ४४ हृषितमुदीक्ष्य - ख. । ४५ संहृदमनो - क., दहनो - ख. । ४६ १९१ - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

कार्तस्वनमरिं हत्वा कार्तस्वरमहेषुणा[1] ।
ददाह विट्पतिर्दैत्याननलः शलभानिव[2] ॥१॥
स व्यायत[3] धनुर्देवश्चारुकाञ्चनकुण्डलः ।
जगर्जेषू[4]न्दानवेषु सृजन्[5] सूर्यः करानिव[6] ॥२॥
ते काञ्चनमयैः पुंखैर्गरुडाङ्गरुहच्छदैः ।
दैवसृष्टा[7] इवानर्था दानवेष्वपतञ्छराः[8] ॥३॥
छिन्नानना[9] श्छिन्नकराश्छिन्नपादोदरोरवः ।
दानवाः शतशः पेतुः क्षितौ क्षितिधरा यथा[10] ॥४॥
पृष्ठेष्वभिहताः केचित् केचित् पार्श्वेषु दारिताः ।
नयनेष्वपरे विद्धा भ्रमन्त्यन्धा इवापरे[11] ॥५॥
मृगानिव च शार्दूलो गरूडः पन्नगानिव ।
कृतघ्नः सुकृतानीव तमांसीव दिवाकरः ॥६॥
तथा[12] तानसुरान्देवो विट्पतिः पावकार्दनः ।
अनाशयत तीक्ष्णाग्रैः शरैर्वज्रानलाननैः ॥७॥
विरथाः पातितगजाः शरातुरतुरङ्गमाः ।
धावन्ते दानवास्त्रस्ता विट्पतेः शरवेजिताः ॥८॥
अथ दृष्ट्वासुरबलं मुक्तशस्त्रयशोम्बरम् ।
भग्नं विट्पतिना युद्धे गजेनेव यथा वनम् ॥९॥
ये ये बलोत्कटास्तत्र प्रख्याताश्च सुरेतराः[13] ।
अभिद्रुता[14] विट्पतिना सिंहेनेवेतरे मृगाः[15] ॥१०॥
प्रह्लादश्चानुह्लादश्च संह्लादः शिनिबाष्कलौ[16] ।
जम्भो विरोचनो बाणो बलिश्चैव स[17] दानवः ॥११॥

---

१ कार्तस्वनमहेषुणा - क. । २ ..न्शलभानिव पावकः - घ. । ३ सो - क. ख., सोप्यनिन्द्य - घ. ।
४ ससर्जेष्ठं (षू?) - घ. । ५ व्रजन् - घ. । ६ सूर्यकरानिव - क. ख. । ७ देवसृष्टा - क. ।
८ दानवेषु पतन्सुराः - घ. । ९ भिन्नानना - क. । १० इव (?) । ११ न्यपतन्दानवा रणे - क.,
भ्रमन्त्यर्धा इवाहवे - घ. । १२ अथ - ख. । १३ ...श्चासुरोत्तमाः - घ. । १४ ते विद्रुता - घ. ।
१५ सिंहनेव यथा मृगः (?), श्चैव (?) । १६ संह्लादशिनिभास्कराः - ख. । ... शिनिबाष्कलाः - घ. ।
१७ चः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अजको[१८] नमुचिर्व्यंसः इल्वको विल्वकस्तथा[१९] ।
विप्रचित्तिस्तुहुण्डश्च हुण्डो वक्रश्च दानवः ॥१२॥
मयस्तारस्तारकाक्षो[२०] विद्युन्मालो प्रभञ्जनः ।
अरिष्टश्चैव[२१] रिष्टश्च अञ्जनो[२२] रूशभः[२३] कुभः ॥१३॥
कालश्च कालनेमिश्च कालकाद्दनस्तथा[२४] ।
संपातिरिल्वलश्चापि बलो[२५] नरक एच च ॥१४॥
मधुकैटभयोः पुत्रौ धुन्धुर्मूकश्च दानवः ।
हस्तिर्विपाकः पाकश्च विकर्णः शम्भुरेव च ॥१५॥
उद्यतैर्बहुभिः शस्त्रैरुल्कापातसमप्रभैः ।
विट्पतिं हुद्रुवुः क्रुद्धाः सिंहा इव विनेदुषः ॥१६॥
ते तं शूलोपलै[२६]र्हुण्डैः सायकैश्चाशनिस्वनैः[२७] ।
निजघ्नुर्भीमनिनदाः पयोदा इव पर्वतम् ॥१७॥
तोयवृष्टिं यथा मेघा विसृजन्त्यनिलेरिताः[२८] ।
ससृजुर्दानवा[२९] देवे[३०] शरवृष्टिं[३१] तथैव ते[३२] ॥१८॥
तां शस्त्रवृष्टिमामित्रीममित्रगणमर्दनः ।
अच्छिनद्विट्पतिस्तूर्णं संप्रीतिं कलहो यथा ॥१९॥
ततस्ते दनुदैतेया वियत्स्था[३३] विट्पतिं प्रति ।
नर्दमाना[३४] इवाम्भोदा गिरिवर्षं[३५] सृजन्त्युत ॥२०॥
अन्ये च मन्दराग्रस्था मन्दारस्रगिवास्थिताः[३६] ।
मुमुचुः सालसरलान्[३७] देवदारूंश्च विट्पतौ ॥२१॥
सोम्बरस्थैःक्षितिस्थैश्च दानवैर्दृढमर्दितः[३८] ।
विट्पतिर्विमुखो जज्ञे तोयसिक्त इवानलः ॥२२॥
विट्पतिं विमुखं दृष्ट्वा दानवैः पर्वतैश्चितम्[३९] ।
नमर्षयु[४०]र्भीमबला: प्रख्याता ये गणेश्वराः ॥२३॥

---

१८ अर्जको - ख. । १९ पिल्वकतथा - ख. । २० यमस्तारस्तारकाक्षो - ख. । २१ .. श्च वरिष्ठश्च - क. । २२ कुंजरो - घ । २३ औशनः - ख. । २४ ...नन्दनस्तथा - घ. । २५ वली - क. । २६ शूलोपलहलै - ख., शूलोपलगणै - घ. । २७ पाशनिस्वनैः - घ. । २८ ...लोज्झिताः - क., .. लेर्ह्विताः(?) । २९ विसृजुर्दानिवा - क.। ३० देवो - क । ३१ शरवर्षं - घ. । ३२ च - ख. । ३३ रणस्था - घ. । ३४ नदमाना - घ. । ३५ अग्निवर्षं - घ. । ३६ मन्दरस्रगिवाऽस्थिताः - क. ख. । ३७ कालसरलान् - ख. । ३८ भृंशमर्दितः घ. । ३९ ... श्चिरम् - ख. । ४० ममर्षु (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सोमनन्दी च नन्दी च नन्दिषेणश्च पार्षदः ।
प्रभामयो वीरभद्रः सूर्याप्यायन[४१] एव च ॥२४॥
पञ्चाक्षः कोपपालश्च[४२] त्रिनेत्रः पिङ्गलेक्षणः ।
राक्षसः पिङ्गलश्चैव श्मशाननिनलयोन्नदः[४३] ॥२५॥
घण्टाकर्णः शंकुकर्णः स च कुण्डोदरो बली ।
ऐरावतमुखश्चैव अन्नपालः कपालधृक् ।
प्रलम्बपीवरकरः स्वयमेव विनायकः ॥२६॥
एते चान्ये च गणापाः शतशः शब्दिता गणैः[४४] ।
विविशुर्दानवान्दग्धुं द्रुमाञ्छुष्कानिवानलाः ॥२७॥
ते विट्पतिं संपरिवार्य[४५] सर्वे गजेन्द्रपोता इव गर्जमानाः ।
त्रिशूलचक्रेषुभुशुण्डिहस्ता गणेश्वरा युद्धधियः प्रतीयुः[४६] ॥२८॥
तेषां च तेषां च ततो बभूव संसक्तयुद्धं[४७] समरोद्धतानाम् ।
मदोद्धतानां सहवासितानां महागजानामिव काननेषु ॥२९॥
तं[४८] दानवानां सगणेश्वराणां मुख्याहवं वीक्ष्य दिवौकसास्ते ।
चेरुर्नभो दिव्यविमानायानैः ससिंहनादाः सतलाभिघाताः ॥३०॥

⊙ इति स्कन्दपुराणे गणयुद्धे त्रिचत्वारिंशदुत्तरशततमोध्यायः[४९] । ⊙

सनत्कुमार उवाच

तेतिसंरम्भसंयुक्ता[१] दर्पिताः प्रमथासुराः ।
संसक्तयुद्धं युयुधुः परस्परकृतागसः ॥१॥
शक्त्युल्लालितहस्तेन[२] कुमारेणावनिञ्जयः ।
कालनेमिः कालकल्पो विशाखं समयोधयत् ॥२॥

४१ सोमाप्यायन - ख. । ४२ कोपपालश्च - घ. । ४३ नदन् - घ., नयः - ख. । ४४ .. ला(..णाः?) - घ.। ४५ संप्रतिवार्यं - क. । ४६ प्रतस्थुः - ख । ४७ संयुक्तयुद्धं - ख. । ४८ तद् - क. । ४९ १४४ - घ., १९२ - ख. ।

१ संरक्तसंयुना - क. । २ शक्त्युल्लोलितहस्तेन - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यश्चादित्यरथाच्चक्रं जहार बलदर्पितः ।
स विप्रचित्तिः शाखेन संसक्तो[३] युद्धलालसः ॥३॥
नैगमेषो हयग्रीवं सुग्रीवं दानवाधिपम् ।
योधयामास सोऽग्नेयो मधुं मधुनिहा यथा ॥४॥
प्रायुध्यन्[४] नन्दिना जम्भस्तुहुण्डः सोमनन्दिना ।
हुण्डो विनायकं शूरमयोधयत दानवः ॥५॥
महाकायस्तु[५] कालेन घनेन नमुचिस्सह ।
पिङ्गलाभ्यां गणेशाभ्यामिल्वकः पिल्वकस्स च ॥६॥
शंकुकर्णेन ह्लादस्तु[६] ह्यनुह्लादेन विट्पतिः ।
आदित्याप्यायनो रुद्रः संह्लादेन समागतः ॥७॥
कुण्डोदरश्च यक्षेन्द्रो घण्टाकर्णश्च पार्षदः ।
बलेल्वलाभ्यां संसक्तौ सिंहाभ्यामिव कुञ्जरौ ॥८॥
पञ्चाक्षेण बलिस्सार्धं रुद्रेणादित्यवर्चसा ।
बलेर्जनयिता सक्तो वीरभद्रेण दानवः ॥९॥
सुमुखेन मयस्सार्धं तारो दुर्मुखमासरत्[७] ।
मयूरो वज्ररोमाणं कुक्कुटो मुरमागमत् ॥१०॥
शेषा ह्यपि गणाध्यक्षाः शेषैर्दैत्यैस्समागताः ।
परस्परेण संसक्ता गजाः सिंहैरिवाहवे ॥११॥
दह्यतामिव वेणूनां विजने कृष्णवर्त्मना ।
अभूत्[८] तटतटाशब्दः शस्त्राणां विनिपात्यताम् ॥१२॥
मा द्रवीर्द्रव तिष्ठेति पश्य पश्येतिवादिनः ।
अन्योन्यमभिजघ्नुस्ते संसक्ता गणदानवाः ॥१३॥
वपामेदोभिदिग्धाङ्गाश्छिन्नाननकरोरवः ।
दानवाः प्रमथाश्चैव ह्यधावन् शस्त्रमक्षिताः ॥१४॥

३ संयुक्तो - ख. । ४ प्रयुद्धो - क. ख., प्रयुध्यन् (?) । ५ महाकालस्तु - क. । ६ सह्लादः - क. ।
७ ,,, मासदत् - क. । ८ बभौ - क. ख. । ९ चटचटाशब्दः (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

आननैरुरुभि:[१०] पादैः करदन्तेक्षणैरपि ।
हारैर्विकीर्णै:[११] केयूरैः स्रगम्बरविभूषणैः ॥१५॥
गजेन्द्रास्तपरिस्तोमैः[१२] कम्बलैरायुधैरपि ।
रराज स रणोद्देशो नभस्ताराग्रहैरिव ॥१६॥
नखदन्ताग्रजनितै[१३]श्चित्रैः क्षतजबिन्दुभिः ।
रक्तचन्दनदिग्धाङ्गी भूमिः स्त्रीरिव निर्बभौ ॥१७॥
विनायकस्य स शरं तुहुण्डः सूर्यतेजसम् ।
प्रेषयित्वा जहासोच्चैः कोपं तस्य विवर्द्धयन् ॥१८॥
तस्यापि हसतो[१४] वक्त्रं बृहत्कुण्डलमण्डितम् ।
असिना तीक्ष्णधारेण चिच्छेद स विनायकः ॥१९॥
तुहुण्डं निहतं दृष्ट्वा हुण्डो भ्रातृवधातुरः ।
शक्तिं चिक्षेप नागास्ये[१५] शक्रोशनिमिवाचले ॥२०॥
विनायकस्य[१६] सा शक्तिर्मणौ मणिशताचिता[१७] ।
पतितासृक् पपौ क्रोडाज्[१८]ज्वलदग्निशिखोपमा[१९] ॥२१॥
विनायकस्य सा क्रोडे लग्ना शक्तिर्विनिर्बभौ ।
इन्द्रनीलं मणिं प्राप्य रेखा[२०] चामीकरी यथा ॥२२॥
स हुण्डशक्तिं करपुष्करेण निकृष्य देवो रविरश्मिकल्पाम् ।
तयैव हुण्डं सहसा जघान तस्यानुजः क्रौञ्चमिवावनीध्रम् ॥२३॥
प्रमापितौ[२१] वीक्ष्य तुहुण्डहुण्डौ विनायकेनारिविनायकेन ।
बलं समस्तं गणनायकानामुन्मत्तगङ्गाप्रतिमं[२२] बभूव ॥२४॥

⊙ इति स्कन्दपुराणे गणयुद्धे चतुश्चत्वारिंशदुत्तरशततमोध्यायः ⊙

---

१० ...र्जानुभि: - ख. । ११ विशीर्णै: - ख. । १२ गजेन्द्रास्त्रपरिस्तोमै: - ख. । १३ पतितै (?) - ख. ।
१४ तस्यावहसतो (?) । १५ नागस्य - क. ख. । १६ विनायकाय - क. ख. । १७ मणिश्चितागता - क. ।
१८ कृतत् - ख. । १९ शिखा यथा - ख । २० लेखा - क. । २१ प्रमाथितौ - ख. । २२ प्रमत्तगङ्गाप्रतिमं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

विनायकेन हुण्डे च तुहुण्डे च प्रमापिते[1] ।
गणेश्वरासुराणां तद्युद्धं[2] संकुलमाबभौ ॥१॥
ते नदित्वा यथा मेघा जलमत्ता जलागमे ।
संसाधयन्ते[3] युध्यन्त[4]स्त्वरयैव परस्परम् ॥२॥
असृक्स्रवैस्सुरक्ताङ्गास्सन्दष्टदशनच्छदाः ।
अन्योन्यमभिसंजघ्नुः शूलशक्त्यृष्टिपट्टिशैः ॥३॥
शक्तीनां क्षिप्यमाणानामसीनाञ्च निपात्यताम् ।
श्राव्यतां नामधेयानां धनुषां कूजतामपि[5] ॥४॥
श्रोत्रायासकराञ्छब्दान् निशाम्य बलिनां वरः ।
जम्भो भ्रातृवधामर्षी प्रविष्टः प्रामथं बलम् ॥५॥
व्याघ्रपूर्वं त्रिशूलेन[6] जम्भो भित्त्वा गणेश्वरम् ।
ननर्द महिषं हत्त्वा वने वनपतिर्यथा ॥६॥
नर्दमानस्य तस्याथ प्रथमो[7]मगपूर्वकः[8] ।
शिरोभिहत्य शक्त्या तु शेषान्दैत्यान् प्रदुद्रुवे ॥७॥
गणपापि ततः ख्याताः ख्यातवीर्ययशःश्रुताः ।
प्रतीयुरसुरान् युद्धे शरभाः कुञ्जरानिव ॥८॥
ततोसुरगणेशानां सन्निपातोभवन्महान् ।
संघट्ट इव वज्राणां सह काञ्चनपर्वतैः ॥९॥
विरोचनश्चान्धकश्च ववर्षतुरमर्षणौ ।
शरवृष्टीस्सुसंरब्धौ जलवृष्टीरिवाम्बुदौ ॥१०॥
स्वयंप्रभेण तौ दैत्यौ शरवर्षविसर्जनौ ।
विमुखौ संयुगमुखे कृतौ शरवरार्दितौ[9] ॥११॥
स्वयंप्रभो दानवसैन्यसागरं[10] शरैरनेकैर्धनुयन्त्रनिःसृतैः ।
संशोषयद्[11] दीप्तमरीचिमण्डलो यथा विवस्वान् जगतः क्षयेर्णवम् ॥१२॥

---

१ निपातिते - ख. । २ तु युद्धं - ख. । ३ संमाधयन्तो (?) । ४ युध्यन्तो (?) । ५ ...मिव - क. ख. ।
६ व्याघ्रपूर्णमहस्रेण - घ. । ७ रागणो - घ. । ८ मृतपूर्वकः - क. । ९ वर्षवरार्दितौ - ख. ।
१० ... सागरौ - क । ११ संशोषयन् - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ततोन्धको दानवलोकसारथिः स्वसारथिं[१२] प्राह विवृत्तलोचनः[१३] ।
शुक्रं[१४] प्रति प्रापाग्र सारथे सां स[१५] नः सदा दुःखहरो गुरुश्च[१६] ॥१३॥
स तं रथं दानवयूथपास्थितं तथेति च प्रोच्य सदश्वसंयुतम् ।
सं[१७] प्रापयामास पयोदनिस्वनं स यत्र शुक्रो ग्रहसत्तमो द्विज ॥१४॥

⊙ इति स्कन्दपुराणे गणयुद्धे पञ्चचत्वारिंशदुत्तरशततमोध्यायः[१८] ⊙

सनत्कुमार उवाच

अपसृत्य ततो युद्धादन्धकोसुरसत्तमः ।
शुक्रान्तिकमुपागम्य इदमाह नताननः ॥१॥
भगवँस्त्वां समाश्रित्य वयं देवान् सहानुगान् ।
गणयामस्तृणैस्तुल्यान् सदा सत्यं ब्रवीम्यहम् ॥२॥
कुञ्जरा इव सिंहानां गरुडानामिवाहयः ।
अस्माकं बिभ्यति सदा देवा युष्मत्प्रसादतः ॥३॥
दुर्गं देवगणव्यूहं भवता प्रतिपालिताः ।
विविशुर्निर्भया दैत्या ह्रदमुष्णार्दिता[१] इव ॥४॥
वयं त्वच्छरणा भूत्वा पाषाणा इव निश्चलाः[२] ।
स्थित्वा वधाम[३] निःशंका[४] ब्राह्मणेन्द्रेन्द्रमाहवे ॥५॥
आपद्भावेन च वयं पादौ तव सुखप्रदौ ।
सदाराः ससुताश्चैव शुश्रूषामो[५] दिवानिशम् ॥६॥
अभिरक्षस्व सततं स नस्त्वच्छरणागतान्[६] ।
भयेषु सततं देवान् नारायण इवापरः ॥७॥
पश्य हुण्डं तुहुण्डं च कुजम्भं जम्भमेव च ।
पाकं कार्तस्वनं चैव विपाकं च महासुरम् ॥८॥

---

१२ ससारथिं - ख. । १३ सुमन्दलोचनः - ख. । १४ शुक्लं - ख. । १५ सो - क. ख., सोयं (?) ।
१६ गुरुश्च नः (?) । १७ तं - क. । १८ १९४ - ख. ।
१ ह्रदन्तृष्णार्दिता - ख. । २ निर्भयाः - ख. । ३ बाधाम - क., चराम - घ. । ४ निःसंस्त्रा - क. ।
५ शुश्रूषाम - क. ख. । ६ ...स्त्वं शरणागतान् - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तं चेन्द्रदमनं शूरं शूरामरनिपातनम् ।
प्रमथैर्भीमविक्रान्तैः क्रान्तमृत्युव्यथादिभिः[७] ॥९॥
सूदितान्पतितानेतान् हरिणैरिव चन्दनान्[८] ।
या पीत्वा कणधूमं वै सहस्रं शरदां पुरा[९] ।
विद्या हराद्वरा[१०] प्राप्ता तस्याः कालोयमागतः ॥१०॥
अथ विद्याफलं तत्तो जीवयानस्य[११] दानवान्[१२] ।
पश्यन्तु प्रमथाः सर्वे लोकाश्चोत्फुल्ललोचनाः ॥११॥
त्वया सञ्जीवितान् दृष्ट्वा दानवा दानवान् युधि[१३] ।
सर्वे मृत्युभयं[१४] हित्वा[१५] योत्स्यन्ते[१६] प्रमथैः सह ॥१२॥
- - - - - - - - - - - - - - - - - - ।
विद्या किल त्वया सा वै दानवानां हितार्थिना[१७] ॥१३॥
आराध्य देवं संप्राप्ता तां दर्शय[१८] नमस्तव ।
इत्यन्धकवचः श्रुत्वा स्थिरधीर्भार्गवो मुनिः ॥१४॥
ईषत्स्मितं तदा कृत्वा दानवाधिपमब्रवीत् ।
दानवाधिप तत्सत्यं यत्त्वया प्रेरितं वचः ॥१५॥
विद्योपार्जनमेतद्धि दानवानां मया कृतम् ।
पीत्वा वर्षसहस्रं वै कणधूमं सुदुस्सहम् ॥१६॥
एषा प्राप्ता मया विद्या बान्धवानां सुखावहा ।
एतया विद्यया सोहमेतान् दैत्यान् परैर्हतान्[१९] ॥१७॥
उत्थापयिष्ये सस्यानि म्लानान्यम्बुधरो यथा ।
निर्व्रणान्नीरुजान्[२०] स्वस्थान् सुप्त्वेव पुनरुत्थितान् ॥१८॥
अस्मिन् मुहूर्ते द्रष्टासि[२१] दानवान्दानवाधिप ।
उत्थितान्दानवान् दृष्ट्वा हतान् युद्धे गणेश्वरैः ॥१९॥

---

७ मूर्ध्याह्यु पाधिभिः - घ । ८ चन्दनम् - क. ख. । ९ कालधूमं सुदुःसहं - घ । १० विद्यारघीत्व (त्य) या - घ. । ११ तस्य - क. । १२ दानवान् - घ. । १३ दानवाधिप - घ. । १४ राज्यं - घ., कष्टं महाभयं (?) - क. ख. । १५ कृत्वा - घ. । १६ मुच्यंत - घ., युध्यन्ते (?) । १७ हितार्थिनी - क. । १८ तद्दर्शय - ख. । १९ सुरैर्दत्तान् - ख. ! २० ...न्निरुजम् - क. । २१ अस्मिन् युद्धे हते द्रष्टा - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विस्मयाच्च भयाच्चैव द्रविष्यन्ति गणेश्वरा: ।
इत्येवमुक्त्वा स तदा भार्गवो दावेश्वरम् ॥२०॥
एकैकं दैत्यमुद्दिश्य विद्यामावर्तयत् कवि: ।
आवर्तमानया तत्र विद्यया ब्राह्मणेन ह ॥२१॥
उत्तस्थुर्दानवा: सुप्ता: शयनादिव निद्रया ।
वेदार्था इव चाभ्यस्ता: समयेनेव चाम्बुदा: ॥२२॥
कालेन प्रलयं[२२] प्राप्तौ[२३] यथा वा धूमकेतव: ।
तथा शुक्रेण ते दैत्या: प्रमथै: सन्निषूदिता: ॥२३॥
उत्थाप्यमाना विबभुर्यथा स्वस्था: पुरातना: ।
शुक्रेणोज्जीवितान् दृष्ट्वा दानवान् तान् गणेश्वरा: ॥२४॥
आश्चर्यमेतद्देवेशा इति तेन्योन्यमब्रुवन् ।
उज्जीविताँस्तु तान्दृष्ट्वा तुहुण्डाद्यान् महासुरान् ।
विनेदु: पूर्वदेवास्ते जलमत्ता इवाम्बुदा: ॥२५॥
तानुत्थितान्वीक्ष्य सहस्रशोन्ये कुठारवज्राशनिशूलहस्ता: ।
प्रदुद्रुवु: शङ्करकिङ्कराणां बलं समुद्धूतमहार्णवाभम्[२४] ॥२६॥
समागमस्तत्र पुनर्बभूव गणासुराणामतिभीमनाद:[२५] ।
युगात्यये मारुतवेजितानां यथा समुद्योग इवार्णवानाम् ॥२७॥

⊙ इति स्कन्दपुराणे गणयुद्धे दैत्योज्जीवने षट्त्रत्वारिंशदुत्तरशततमोध्याय:[२६] ⊙

सनत्कुमार उवाच

उत्थापितेषु दैत्येषु भार्गवेणोग्रकर्मणा ।
नेदुर्देवा: सगन्धर्वा दानवाश्च सहान्धका:[१] ॥१॥
तत: शंखरवोन्मिश्रा माडुकानकनिस्वना:[२] ।
बभूवु: सिंहनादाश्च रथ[३]हस्तिरवैस्सह ॥२॥

२२ प्रलये - क. । २३ प्राप्ते - ख. । २४ महार्णवाभा: (?) । २५ भीमरूप: - ख. । २६ १९५ - ख. ।
१ महोरगा: - घ. । २ मण्डूकानकनिस्वना: - ख. । ३ यूथ - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

हुण्डस्तुहुण्डो जम्भश्च कुजम्भश्च महासुरः ।
शैलशूलशिलाघातैर्युयुधुर्देवतारयः ॥३॥
पाकेन्द्रदमनौ तौ च स च कार्तस्वनो बलिः ।
ममर्दुः[४] प्रमथानीकं वैरं प्रतिचिकीर्षया ॥४॥
तेषां वेगं सन्निवार्य प्रमथा अपि दर्पिताः ।
शिलातरुकराः सर्वे दानवानभिदुद्रुवुः ॥५॥
गणेश्वराः सुराणां तु[५] तस्मिन्युद्धेऽति भैरवे ।
श्रूयन्ते धनुषां शब्दा रथशब्दाश्च भैरवाः ॥६॥
प्रमथानां जये सक्ता[६] दानवानां तथापरे ।
चक्रुः कोलाहलं घोरं पक्षवादाँस्तथाम्बरे ॥७॥
गर्जतां धावतां चैव बलानां समभूत् स्वनः ।
गर्जतां धावतां चैव समुद्राणामिवात्यये ॥८॥
युद्धातिशयमत्ताश्च सिद्धगन्धर्वचारणाः ।
नेदुश्चैवोत्ससर्जुश्च नानाकुसुमसञ्चयान् ॥९॥
नानाविधानि पुष्पाणि पतमानानि रेजिरे ।
सिद्धचारणमुक्तानि नक्षत्राणि यथात्यये[८] ॥१०॥
देवगन्धर्वतूर्याणि प्रसस्वनुरनेकशः ।
युद्धसंसक्तभावानां विरेमुश्च पुनः पुनः ॥११॥
विनायकेन स्मृत्वा तु जम्भो युधि पराभवम् ।
तं सक्रोधोभिदुद्राव गजं गज इवापरः ॥१२॥
तमापतन्तं दृष्ट्वा तु दानवं जम्भमाहवे ।
सिंहो गजमिव क्रुद्धो रुरुधे स विनायकः ॥१३॥
ऐरावतकरप्रख्यं करं करिनिभाननः ।
उत्क्षिप्य दानवं युद्धे तताड स विनायकः ॥१४॥

---

४ प्रमर्द्दुः - ख., ममर्द - घ. । ५ गणेश्वगणां सर्वत्र - घ. । ६ प्रमथाञ्जयसंसक्ता - ख. ।
७ सम्बमू (भौ?) - क. । ८ घनात्यये - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कुम्भयोरन्तरे तं तु जम्भो दानवकुञ्जरः ।
बिभेद शरमुख्येन यथा सिद्धोर्कमण्डलम् ।।१५।।
कुम्भयोरन्तरे[९] तस्य निममज्ज स वै शरः ।
शृङ्गयोरचलेन्द्रस्य तडित्वानिव चाम्बुदः[१०] ।।१६।।
स शरारोषितमना[११] विधूय[१२] सशिरःकरम्[१३] ।
कराग्रेण[१४] महादैत्यमानम्याहत्य सोनदत् ।।१७।।
प्रस्पन्दमानो जम्भस्तु विनायककराहतः ।
विनायकं शरैरुग्रैरवतस्तार रोषितः[१५] ।।१८।।
शलभा इव केदारं भ्रमरा इव पादपम् ।
जम्भेषवस्तदा देवं विविशुस्ते[१६] विनायकम् ।।१९।।
रुधिरं क्षरमाणास्ते त्रिवित्रै(?)र्दारितनानाः[१७] ।
शरा विनायके रेजुः सर्पा मेरुमिवाश्रिताः[१८] ।।२०।।
स जम्भबाणैरतिभिन्नगात्रः[१९] कुम्भास्रुतावाप्लुतरक्तनेत्रः[२०] ।
धुन्वन् कराग्रं च शिरश्च देवो दुद्राव जम्भं तृषितो[२१] यथाम्भः[२२] ।।२१।।
स तं कराग्रेण दृढं दृढेन मुहुः समाहत्य मुहुर्विनद्य ।
रथं गृहीत्वा बलवाँस्तदाजौ चिक्षेप[२३] साश्वध्वजशस्त्रचक्रम्[२४] ।।२२।।
सोद्धूत[२५]भग्नातिपताककेतुश्च्युतासिशक्त्यृष्टिसहस्रबाणः ।
रथः पपातासुरनन्दनस्य मनोरथस्तीव्र इवाधनस्य ।।२३।।
पतीष्यमाणं तु[२६] रथं विहाय प्रह्लादिरिन्द्राम्बुधरप्रभावः ।
स्थितोम्बरे शक्तिधरो रराज स्थितोम्बरे शक्तिधरो यथैव ।।२४।।
स तां सघण्टां कनकावदातां कृशानुलेखामिव दीप्यमानाम् ।
विनायकायासुरराजपुत्रश्चिक्षेप शक्तिं समुदीर्णशक्तिः ।।२५।।

---

९ कुचयोरन्तरे - ख. । १० तडित्वन्त इवाम्बुदाः - क । ११ रोपितमना - क. । १२ गणपो - घ. । १३ सशरं करम् - घ. । १४ राराग्रेण - घ. । १५ ...रतक्षतदतिरोषितः - घ. । १६ ... स्तं - घ. । १७ यद्यथानिमृतानकाः - घ. । १८ समीपेरुधिराश्रिताः - घ. । १९ ...दतिभिन्नगात्रो - क. । २० कुम्भसृतावाप्लुतरक्तनेत्रः घ. । २१ तृषिता - घ. । २२ यथास्तः - घ. । २३ जंभ ... - घ. । २४ चक्रशस्त्रं (स्त्रस्तं) - ख. घ. । २५ सोधू... - ख. । २६ स (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सा खात्पतन्ती भुजगाङ्गनेव शस्त्राङ्गना प्रज्वलमानवक्त्रा ।
शराहता विट्पतिना पपात शक्तिर्यथाग्न्या पुरुषे हताशे ।।२६।।
आश्चर्यभूते प्रमथासुराणां तस्मिन् तथा वर्तति युद्धयज्ञे ।
अमर्षितो भार्गवकर्म दृष्ट्वा शिलादपुत्रोऽभ्यगमन्महेशम् ।।२७।।
जयेति सोक्त्वा[२७] जययोनिमुग्रमुवाच नन्दी कनकावदातम्[२८] ।
गणेश्वराणां रणकर्म देव देवैः सहेन्द्रै रपि[२९] दुष्करं यत् ।।२८।।
तद् भार्गवेणाद्य कृतं वृथा नः संजीवयानेन हि दानवेन्द्रान् ।
एते हि ते दानवयूथपाला[३०] यमालयादद्य पुनर्निवृत्ताः ।।२९।।
विद्रावयन्तः प्रमथाँश्चरन्ति नागानिवाजौ शरभाः सदर्पाः ।
यदि ह्यसौ दैत्यवरान्निरस्तानुज्ज्जीवयत्येव पुनः सदैव[३१] ।।३०।।
जयः कुतो वै भाविता महेश गणेश्वराणां कुत एव शान्तिः ।
वक्रस्थितश्चैष[३२] न चैष वध्यो[३३] अयुध्यमानो[३४] वृषवाह शुक्रः ।।३१।।
नैवाभिनाशोस्ति[३५] तव प्रसादाद् हतं च तं त्वं कुरुषे प्रसादम्[३६] ।
भवेत्तवेशान[३७] मतं स वध्यो यथा जयस्ते समरेनिशं स्यात् ।
तथा कुरुष्वोत्तमबुद्धिबुद्ध[३८] न ते महेशान समोस्ति बुद्ध्या ।।३२।।

सनत्कुमार उवाच

इत्येवमुक्तः प्रमथेश्वरेण नन्दीश्वरेणेश्वरदेवदेवः ।
उवाच देवः प्रहसँस्तदानीं स नन्दिनं[३९] सर्वगणेशनायकम् ।।३३।।
नन्दिन् प्रयाहि त्वरितोतिमात्रं द्विजेन्द्रबन्धुं[४०] दितिनन्दनानाम् ।
मध्यात्समुत्पाट्य तमानयस्व यथोपहारं धनवान्[४१] मनुष्यः ।।३४।।
स एवमुक्तो वृषभध्वजेन वृषध्वजो वै वृषसिंहनादः[४२] ।
जगाम तूर्णं[४३] प्रविगाह्य सेनां यत्राभवद् भार्गववंशदीपः ।।३५।।

---

२७ चोक्त्वा - घ. । २८ ...वदातः - क. ?) । २९ सहस्त्रै रपि - क. ख. । ३० दानवायुद्धपाला - क. ख. ।
३१ सुरेषु (श) देव - क. ख. । ३२ वक्त्रः स्थितश्चैव - घ. । ३३ महानुभावः - घ. । ३४ अयुध्यमानो - घ. ।
३५ नैषां हि ले (ा)पोस्ति - क. । ३६ हतां च तं त्वं तु कुरु प्रसादम् - क. । ३७ न चेत्तवेशान - क. ।
३८ युद्धं - ख. । ३९ उवाच देव- प्रहसं नन्दिनं गणनायकं - क. । ४० वर्णं - क. । ४१ बलवान् घ. ।
४२ नन्दीश्वरोयं भृशसिंहनादः - घ. । ४३ हन्तुं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तं रक्ष्यमाणं दितिनन्दनैस्तैः पाशासिवृक्षोपलशूलहस्तैः ।
विक्षोभ्य दैत्यान् वृषराड् जहार शुक्रं स नन्दी शरभो यथेभम् ॥३६॥
स्रस्ताम्बरं तं च्युतभूषणं च विमुक्तकेशं रिपुणा गृहीतम् ।
विमोक्षयिष्यन्त इवाभ्यधावन्[४४] सुरारयः सिंहरवान् सृजन्तः ॥३७॥
ते वज्रशूलेषुपरश्वधानां सचक्रदण्डोपलकम्पनानाम् (?) ।
नन्दीश्वरस्योपरि दानवेन्द्रा वर्षं ववर्षुर्जलदा इवोग्राः ॥३८॥
स भार्गवं प्राप्य गणाधिपाग्र्यो वक्त्राग्निना शस्त्रशतानि दग्ध्वा ।
आयात् स शुक्रन्तु करे गृहीत्वा नन्दीश्वरो दानवयूथपालम्[४५] ॥३९॥
तेषां च तेषां च ततो बभूव प्रमुक्तशस्त्रास्त्रसुभीमपातः ।
जहीति[४६] गृह्णेति च वादिनां वै महाहवो देवमनःप्रतोषः ॥४०॥
तेनान्तरेणैत्य भवस्य पार्श्वं नन्दीश्वरः क्रोधविवर्णनेत्रः ।
अयं स शुक्रो भगवन्निनोशे[४७] निवेदयामास भवाय शीघ्रम् ॥४१॥
जग्राह शुक्रं स च[४८] देवदेवो यथोपहारं शुचिना प्रदत्तम् ।
वक्त्रस्थितं शुक्रमरिं जगार[४९] न किञ्चिदुक्त्वा स हि भूतगोप्ता ॥४२॥
ततः पुनर्दानवदैत्यसैन्यं[५०] गणेश्वरास्तस्य तदा विजघ्नुः ॥४३॥

⊙ इति स्कन्दपुराणे गणयुद्धे भार्गवहरणे सप्तचत्वारिंशदुत्तरशततमोध्यायः ⊙

सनत्कुमार उवाच

शुक्रेऽथ शुक्रपतिनागीर्णेन्नेव भुजङ्गिना[१] ।
बभूवुर्दानवाः सर्वे दरिद्रा इव निष्क्रियाः ॥१॥
विशरीरा यथा जीवा गरुडा विरया[२] इव ।
विहस्ता इव मातङ्गा विश्रृङ्गा इव गोवृषाः ॥२॥
निर्विषा इव नागेन्द्रा निर्विद्या[३] इव च द्विजाः ।
सागरा इव निस्तोया विवेगा इव मारुताः[४] ॥३॥

४४ इवाभिधावन् - क. ख. । ४५ यूथगा धपम् - - क., यूथपदानवानां - घ. । ४६ याहीति - ख. ।
४७ भगवन्नितीद - क । ४८ च म - क. । ४९ वक्त्रस्थितं - क., चिक्षप वक्त्रे तु कवि नुवन्तं - घ. ।
५० देवसैन्यं - क. ।

१ ..र्नत्र (र्णत्र?) भुजागिनना - क., शीर्णे गठरवह्निना - घ. । २ विरथा - क. । ३ अविधा - क. ।
४ शाकुना - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पयोदा इव निश्शब्दा विशिखा इव चाग्नयः ।
गतोत्सवा व दिवसा[५] विपुष्पा इव पादपाः ।।४।।
हरिणा इव संत्रस्ता विपक्षा इव पक्षिणः ।
ग्रहा इव प्रशान्ताभा ग्राहा इव जलोद्धृताः ।।५।।
नन्दिनापहृते शुक्रे गीर्णे चापि कपर्दिना ।
दानवा जज्ञिरे शूरा दीनमानपराक्रमाः[६] ।।६।।
वैमनस्यं परं प्राप्तो[७] दानवानां रणेन्धकः ।
उवाच मेघनिनदः संयुगस्थः स दानवः ।।७।।
विक्रम्य नन्दिना शुक्रं नयता[८] नयिनां वरम्[९] ।
हृतानि नोद्य सर्वेषां जीवितानि न संशयः ।।८।।
प्रमथैर्निहतान्दैत्यान् कः पुनर्जीवयिष्यति ।
भार्गवं तमृते शुक्रं[१०] कोन्यो नो[११] धारयिष्यति ।।९।।
धैर्यञ्च विक्रमस्तेजः सत्वं वीर्यं बलं धृतिः ।
शत्रुभिर्नो हृतं सर्वं देवे[१२] शुक्रेपवाहिते ।।१०
भार्गवेपहृते[१३] देवे[१४] ममापि व्यथितं मनः ।
न त्वहं संयुगं जह्यां[१५] प्रमथैस्समभिद्रुतः ।।११।।
संस्तम्भयत माभैष्ट युध्यध्वमरिभिः सह ।
सूदयिष्याम्यहं सर्वान् प्रमथान् सह नन्दिना ।।१२।।
अद्यैतान्[१६] विवशान् कृत्वा[१७] हत्वा च त्रिदशानपि ।
भार्गवं मोक्षयिष्यामि पञ्जरस्थं यथा हरिम्[१८] ।।१३।।
स चापि योगी योगेन यदि नाम स्वयं प्रभुः ।
शरीरान्[१९] निष्क्रमेत्तस्य अस्माकं शेषपालितः ।।१४।।
इत्यन्धकवचः श्रुत्वा दानवा मेघनर्दनाः ।
प्रमथानर्दयामासुर्मर्त्तव्यकृतनिश्चयाः ।।१५।।

---

५ इव दिनाः - क. । ६ हीननानपराक्रमाः (?) । ७ दृष्ट्वा - ख. । ८ नयिना - क., जयिना? - ख. । ९ वरः - क. । १० शुक्रे - क. । ११ मे - ख. । १२ देवैः - ख. । १३ प्रहृते - ख. । १४ देवा (वैः?) - ख. । १५ जह्य - क ख. । १६ अदैत्यान् - क., प्रमथान् - ख. । १७ हत्वा - क. । १८ सिंहं पञ्जरगं यथा - ख. । १९ उदरात (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तत्र षाणासिवज्रौघैः कटङ्ककटशिलोपलैः ।
अन्योन्यमवकृन्तन्तस्ते चक्रुः[२०] कदनं महत् ।।१६।।
कार्मुकाणां विकृष्टानां विसृष्टानां च पत्रिणाम् ।
निपात्यतामसीनां च शब्दोभूद् भृशदारुणः[२१] ।।१७।।
भग्नध्वजपताकानि क्षीणप्रहरणानि च ।
रुधिरास्रावचित्राणि[२२] व्रणाकुसुमितानि च ।।१८।।
पिपासितानि श्रान्तानि[२३] हतवाजिगजानि च ।
समुद्राम्बरकल्पानि बलान्यासन् समन्ततः ।।१९।।
अथ भूयो गजेन्द्रेण चतुर्दन्तेन गर्जता ।
अञ्जनाचलकल्पेन अञ्जनद्विपवर्चसा ।।२०।।
सतूणीरपताकेन अंकुशारोषितेन च[२४] ।
जम्भो दानवशार्दूल अभिदुद्राव नन्दिनम् ।।२१।।
गजस्कन्धगतो दैत्यो बभौ जम्भः सतोमरः ।
कृष्णापर्वतशृंगस्थस्सबलाक इवाम्बुदः ।।२२।।
स्तब्धलाङगूलदृक्कर्णः प्रसारितमहाकरः ।
चदितो दानवेन्द्रेण समधावन्महागजः ।।२३।।
युगान्तेर्णववातस्य अनौपम्यो यथा जवः ।
अनौपम्यस्तथा तस्य जवो नागस्य धावतः।।२४।।
तुरङ्गा ये च मातङ्गा प्रमथा ये च दानवाः ।
तस्य मार्गादपक्रान्ता मृत्योरिव यथा नराः ।।२५।।
तं मत्तनागं धावन्तं नदन्तमिव नीरदम् ।
वारयामास बलवान् विक्रम्य स विनायकः ।।२६।।
स तं देववरो दन्ती[२५] करिणं[२६] पर्वतोपमम्[२७] ।
प्रकीर्णेन कराग्रेण प्रमुखेभिजघान[२८] ह ।।२७।।

---

२० ...मवकृन्तन्तः प्रचक्रुः - क. । २१ दारुणाम् - क. । २२ रुधिरस्रवच्चित्राणि - ख. । २३ भिभूतानि - ख. ।
२४ रोपितेन च ?) । २५ नन्दी - ख. । २६ किरिणं - क. । २७ पर्वतत्विषं - क. ।
२८ प्रभुखोमिजघान (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विनायकेनाभिहतो नायकः सर्वहस्तिनाम् ।
स रुजा घोरया नुन्नो मुहूर्त्तमभवज्जडः ॥२८॥
अथाश्वस्य च[२९] विश्रम्य[३०] संवर्त्यातमकरं[३१] करी ।
विनायकमुरोदेशे[३२] ताडयामास नर्दयन्[३३] ॥२९॥
स विन्ध्यकूटकल्पेन तेन नागेन ताडितः ।
पदात्पदं न चलितो महासत्वो विनायकः ॥३०॥
नासया स गृहीत्वा तं नासायां[३४] दानवद्विपम् ।
आक्षिप्य पातयामास गिरिवर्ष्मा[३५] विनायकः ॥३१॥
स सिंह इव सिंहेन वनमध्ये निपातितः ।
रराम विस्फुरन्नागो मेघो वाय्वाहतो यथा ॥३२॥
तं नागं पातययानं तु नागवक्त्रमसृक्स्रवम्[३६] ।
बिभेद तोमरेणाशु करेणार्क इवाम्बुदम् ॥३३॥
मोचयन्तं तु चरणौ ग्रीवायां दानवोत्तमम् ।
तेनैव तोमरेणाथ आजघान विनायकः ॥३४॥
स सुप्रहाराभिहतो गजवक्त्रेण दानवः ।
चक्षार रुधिरं जम्भो निर्ज्झराम्भो गिरिर्यथा ॥३५॥
पुनश्चास्य वधाकांक्षी असिं जग्राह वीर्यवान् ।
तस्योद्यतासेर्नदतश्चिच्छित्सोर्जम्भकन्धराम्[३७] ॥३६॥
असिं कुजम्भश्चिच्छेद गरुडः पन्नगं यथा ।
तञ्चापि सुविकृष्टेन शरेणासृग्भुजा तदा ॥३७॥
कुजम्भो ह्यहनद्बाहौ वज्रेणेन्द्र[३८] इवाचलम् ।
स दृढाभिहतस्तेन घूर्णितस्सालवृक्षवत्[३९] ॥३८॥
कुजम्भमभिदुद्राव केसरी कुञ्जरं यथा ।
समुच्छ्रितकरो देवस्तं दानवमभिद्रवन् ॥३९॥

---

२९ स (?) । ३० विक्रम्य - ख. । ३१ संवर्ध्यातिमकरं - ख. । ३२ ... मुरोद्देशे - क. ख. ।
३३ निर्दयं - क. । ३४ नासया - क. । ३५ व(ध)र्म्मा - ख. । ३६ ... वस्रजम् - ख. ।
३७ चिच्छेद जम्भकस्तदा - ख. । ३८ वजेन्द्रेण - क. । ३९ ...स्तालवृक्षवत् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ऐरावत इवाभाति बलोद्‌वृत्तो विनायकः ।
व्यंसस्तं[४०] धावमानं तु कुजम्भवधकांक्षिणम् ।।४०।।
ववार स गतोंसेन[४१] पातयामास तं[४२] क्षितौ ।
व्यंसमंसेन[४३] हत्वा तु नागवक्त्रो महाबलः ।।४१।।
कुजम्भस्यान्तिकं प्राप[४४] सिंहस्य शरभो यथा ।
कुजम्भस्तस्य भित्वा तु शरेण करमुद्यतम् ।।४२।।
गदयाभ्यहनन्[४५] मूर्ध्नि मुद्‌गरेण च वक्षसि ।
त्रिभिः प्रहारैः स बभौ शोणिताक्तो विनायकः ।
नागायुतसहस्त्रौजास्त्रिप्रभिन्न इव द्विपः ।।४३।।
धरायां[४६] नासयादाय कुजम्भं तु विनायकः ।
प्रचिक्षेप महावीर्यो यथा भूतबलिं नरः ।।४४।।
कुजम्भे मन्दरप्रख्ये[४७] विनायकभुजेरिते ।
चुक्रुधुर्दानवाः सर्वे तेर्दयंश्च विनायकम् ।।४५।।
सोर्दितो दानवशतै[४८]र्नानियुधवितक्षितः ।
चचार देवो दैत्येषु पृषतेषु यथा हरिः ।।४६।।
स दन्तैश्चरणैश्चापि शुण्डयाततयापि च ।
ममर्द दानवान् क्रुद्धः कुञ्जरो नड्वलानिव ।।४७।।

ततो गणेशा ह्यपि[४९] वीक्ष्य दानवैर्विनायकं शस्त्रशतैः परिक्षतम् ।
गृहीतशस्त्रा गर्जसिंहविक्रमा विमुक्तरावाः शतशोभिदुद्रुवुः ।।४८।।
ततः पुनः शस्त्रसहस्त्रवेजितं[५०] शरासिशक्त्यृष्टिनिपातदुःसहम् ।
गणासुराणामसुनाशनं[५१] महद् बभूव युद्धं हतवाजिकुञ्जरम् ।।४९।।

⊙ इति स्कन्दपुराणे गणयुद्धे अष्टचत्वारिंशदुत्तरशततमोध्यायः[५२] ⊙

४० स्त्वं – क. । ४१ सङ्गतांसेन – ख., समनङ्गेन - क. । ४२ च - ख । ४३ अंशमंसेन - ख. । ४४ प्राप्य – क., प्राप्तः - क. । ४५ गदयास्य हनन् - क., न्यहनन् - ख. । ४६ धारयां(यत्) - क. । ४७ मन्दरप्रस्थे - ख. । ४८ गतै - क. । ४९ ...पि हि - क ख. । ५० तेजितं - ख. । ५१ .. मसुनाशननप्रदं - क. ख. । ५२ १९७ - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

व्यास उवाच[1]

निगीर्णो ब्राह्मणः सोथ चन्द्रावयवधारिणा ।
किं चक्रे कोष्ठगस्तस्य देवदेवस्य भार्गवः ॥१॥
कथं च तपतां श्रेष्ठो योगी योगेन स द्विजः ।
न निःसृतो योगबलाद् देवदेहान्महातपाः ॥२॥
अन्धकश्चासुरश्रेष्ठः स तदा भार्गवं विना ।
चकार कथमावापं[2] गणेशैः समभिद्रुतः ॥३॥
एतन्मे सर्वमखिलं खिलवेदविदां[3] वर ।
कथयस्व न मे तृप्तिः श्रृण्वानस्येशचेष्टितम् ॥४॥

सूत उवाच

अथैवं[4] पृच्छतस्तस्य व्यासस्य मुनिसत्तमः[5] ।
सनत्कुमारोकथयच्छुक्रस्याथ विचेष्टितम् ॥५॥

सनत्कुमार उवाच

निगीर्णे भार्गवे तेन भूतोमादेवबन्धुना ।
अन्धको निष्प्रभो जज्ञे घनरुद्धो यथा रविः ॥६॥
दृष्ट्वा स्वसैन्यं प्रमथैर्भज्यमानं पुनः पुनः ।
दुद्राव रथमास्थाय स्वयमेवान्धको गणान्[6] ॥७॥
शरवज्रप्रहारैस्तैर्वज्राघातैर्द्ध रा (?) इव ।
प्रमथाः पेतिरेवन्यां निस्तोया इव तोयदाः ॥८॥
क्रोडेषूरुकपोलेषु पृष्ठबाहूदरेषु च ।
रुरुवु[7]र्बाणनिर्भिन्नाः प्रमथाः कुञ्जरा यथा ॥९॥
यान्तमायान्तमप्राप्तं प्राप्तं दूरस्थमेव च ।
अपश्यद्यं यतस्तं तं निर्बिभेद शरैर्भृशम् ॥१०॥
बिभेद शतमेकेन शतेन च शतं पुनः ।
सहस्रं च सहस्रेण कोटिं कोटचा तथैव च ॥११॥

---

१ सन. उ. - क. । २ कथमाबाधं - ख. । ३ बिलवेदविदां - ख । ४ अथैनं - क. । ५ सुरसत्तमः - ख. । ६ गणम् - क. । ७ रुरुधु - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ध्वजाः[८] पताकाश्छत्राणि[९] वैजयन्त्योऽङ्कुशाः कुथाः ।
चामराणि किरीटानि कुण्डलान्यम्बराणि च ॥१२॥
प्रमथानां बले यच्च कम्पते धावतेऽपि वा ।
तत्सर्वं चिच्छिदे तूर्णं[१०] शरैरन्धकदानवः ॥१३॥
विस्फुलिङ्गान् यथैवाग्निर्धारासारान् यथाम्बुदः[११] ।
सिन्धुराजो यथोद्गारान्[१२] करानिव दिवाकरः ॥१४॥
नादान् सिंहा इवारण्ये सीकरानिव कुञ्जराः ।
मुमोच बाणाँस्तीक्ष्णाग्रान् परसैन्यविमर्दनान्[१३] ॥१५॥
अन्धके युध्यमाने तु निश्चयेनासुरोत्तमे[१४] ।
असुरा अप्ययुध्यन्त[१५] निश्चयेनान्धकादनु ॥१६॥
निवातकवचा ये ते अन्योन्यसदृशा भृशम् ।
चक्रुस्ते बहवो युद्धं रुद्रैश्च बहुभिः सह ॥१७॥
कालेयाः षष्टिसाहस्राः कालकल्पा महासुराः[१६] ।
बाहुजैः षष्टिसाहस्रैः प्रमथैर्युयुधुः सह ॥१८॥
प्रह्लादश्चानुह्लादश्च संह्लादः शिनिबाष्कलौ ।
विरोचनो बलिर्बाणः कुजम्भोथावनिञ्जयः ॥१९॥
अञ्जकः[१७] कालनेमिश्च नमुचिर्व्यंस एव च ।
एकादशैते प्रख्याता एकादशरविप्रभाः ॥२०॥
एकादशैव प्रमथानर्दयन् कलहैषिणः ।
प्रभामयं वीरभद्रं त्रिटर्पातं पिङ्गलं तथा ॥२१॥
वेगपं पवनादं च सोमार्काप्यायनावपि ।
संवर्त्तकानलञ्चैव[१८] पावकाप्यायनावपि (?) ॥२२॥
यक्षोन्नदश्च बलवान् विद्युत्केशश्च राक्षसः[१९] ।
प्रह्लादप्रमुखैरेतैर्दानवैर्देवपुङ्गवाः ॥२३॥

---

८ ध्वजान् - क. । ९ ...च्छत्राणि - क. । १० चिच्छेद सर्वं तत्तूर्णं (?) । ११ ...निवाम्बुदः - क. । १२ सिन्धुराज इवोद्गारान् - क. । १३ विमर्दनीन् - क. । १४ दानवोत्तमे - ख. । १५ असुरा अपि युध्यन्ति - क. । १६ महाबलाः - ख. १७ अन्धकः - क., अज (र्ज) कः (?) । १८ ...श्चैव - क. । १९ दानवः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विहस्तशस्त्रकवचावृताः शस्त्रशताचिताः ।
द्वारपालाश्च रुद्रणां रुद्राणां ये च सूनवः ॥२४॥
स्कन्दपारिषदा[20] ये च ये च शक्तिगणेश्वराः[21] ।
ते दनोस्तनयै[22]स्सार्धं दनोः पुत्रान्वयाश्च[23] ये ।
चक्रुः कृतान्तसदृशाः कलहं कलहप्रियाः ॥२५॥
तस्मिन् तथा वर्तति संप्रहारे विशीर्णहाराभरणस्रगस्त्रैः[24] ।
व्याविद्धवस्त्रा[25] विकसत्सुनेत्रा नेदुः सुराः सिद्धगणाश्च खस्थाः ॥२६॥

⊙ इति स्कन्दपुराणे गणयुद्धे ऊनपंचाशदुत्तरशततमोध्यायः[26] ⊙

व्यास उवाच

मायावीर्यं च वीर्यं च अन्धकस्यामरद्विषः ।
सृष्टं भगवता सम्यग् देवरूपनिमित्तजम् ॥१॥
निगीर्णो यस्य देवेन शरीरे भार्गवो मुनिः ।
कथं तु कृतवाँस्तत्र देवदेवशरीरगः ॥२॥
कथं च तपसो वीर्याद् योगवीर्याच्च स द्विजः ।
श्वेताभ्रादिव वै चन्द्रो निःसृतो[1] भृगुनन्दनः ॥३॥
एतत् कौतूहलं जातं ममाद्य मुनिसत्तम ।
कथयेशानचरितं भार्गवस्य च धीमतः ॥४॥

सूत उवाच

स एवमुक्तो व्यासेन पद्मगर्भसुतः प्रभुः ।
सनत्कुमारोकथयच्छिवाच्छुक्रस्य निर्गमम् ॥५॥
देहे तस्य तदा शम्भोः शुक्रो विनिहतद्युतिः[2] ।
छिद्रान्वेषी भ्रमन्नेव अनिकेतो यथानिलः ॥६॥

---

२० पदा - क. । २१ स - क., भक्तिगणेश्वराः - ख. । २२ ...स्तनया - क. । २३ पुत्राश्रयाश्च - ख. ।
२४ हाराभरणा - क., ... स्रगस्त्राः - ख. । २५ व्याविध्यवस्त्रा - क. । २६ १९८ - ख. ।
१ निभृतो - क. । २ विनिहितद्युतिः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स लोकानग्निवर्णाभान् रुद्रकोटिशतैर्वृतान् ।
रुद्रकन्याविचरितान् रुद्रदेहेष्वपश्यत ॥७॥
कुन्देन्दुशंखवर्णानां दंष्ट्रिणां नखिनामपि ।
दीर्घलाङ्गूलजुष्टानां सदर्पाणां क्षमावताम्[३] ॥८॥
ज्वलनप्रभकेशानां नन्द्यावर्तकधारिणाम् ।
किंशुकप्रभजिह्वानां कैलासगिरिवर्ष्मणाम् ॥९॥
अग्निबन्धनबद्धानां[४] सिंहानां भीमरूपिणाम् ।
सहस्रं ददृशे देहे देवदेवस्य भार्गवः ॥१०॥
सुरांश्च सेन्द्रान् सादित्यान्[५] साप्सरोगणमानवान्[६] ।
गणेशासुरयुद्धं च सोपश्यद्धरदेहगः[७] ॥११॥
वर्षाणां तु शतं कुक्षौ भ्रममाणो भवस्य सः[८] ।
न तस्य ददृशे छिद्रं शुचेरिव यथा कलिः ॥१२॥
योगमप्यस्य सैश्वर्यमणिमादिगुणान्वितम्[९] ।
प्रजहार महादेवो मनोवाग्यतचेतसः[१०] ॥१३॥
अथ शब्दो महानासीत् प्रमथासुरसैन्ययोः ।
तं श्रुत्वा शब्दमाविग्नो भार्गवः प्रतिबोधितः ॥१४॥
सोन्तर्गत उमाभर्तुर्ब्राह्मणस्तपसैधितः[११] ।
तुष्टावेष्टैः स्तवैर्देवं सोमं सोमविभूषणम् ॥१५॥
आपद्भावं प्रपन्नस्य तस्य देवेन शूलिना ।
लिङ्गेन निष्क्रमस्वेति प्रसादाभ्युदयः[१२] कृतः ॥१६॥
सूक्ष्मरूपस्ततो भूत्वा स शुक्रो मुनिसत्तमः ।
शुक्रवन्निःसृतो लिङ्गाद् देवदेवस्य धीमतः ॥१७॥
शुक्रवन्निःसृतो यस्माच्छिश्नाद् भार्गवनन्दनः ।
तस्माच्छुक्र इति ख्यातिं गतो गतिमतां वरः ॥१८॥

३ ...ताम् - ख ४ ...बद्धानां(?) । ५ सादित्यान् - क. ६ साप्सरोगणमानवान् - क. ७ अपश्यद्धरदेहजः - क. । ८ च - क । ९ गणान्वितः - ख । १० वाग्यतचेतसः - क. । ११ ...स्तपसेधितः - क ख. । १२ प्रा (प्र) सादः परमः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वन्दमानश्च[१३] तेनोक्तः पयोदपतिकेतुना ।
शुक्रवन्निःसृतो मेद्य यस्मात्त्वं भृगुनन्दन ॥१९॥
कर्मणा तेन शुक्रोसि मम पुत्रश्च गम्यताम् ।
इत्येवमुक्तो देवेन शुक्रोर्कसदृशद्युतिः ॥२०॥
विवेश दानवानीकं मेघानीकं शशी यथा[१४] ।
तं दृष्ट्वा चन्द्रसंकाशं चन्द्रोदयनिभोदयम् ॥२१॥
चन्द्रोदये यथा नृणां प्रीतिरासीत् सुरद्विषाम् ।
ते दृष्ट्वा दनुदैतेयाः शुक्रं चन्द्रसमप्रभम् ॥२२॥
सर्वे सिंहरवाँश्चक्रुः[१५] संप्रहृष्टा युयुत्सवः ।
निहता दानवा ये तु प्रमथैर्जितकाशिभिः ॥२३॥
तानागतान्मृत्युमुखान्मेनिरे भार्गवागमात्[१६] ।
ववन्दुस्तं[१७] ननन्दुश्च प्रसेदुश्च[१८] महासुराः ॥२४॥
शुक्रोदयमुदं लेभे स दानवमहार्णवः ।
यथा चन्द्रोदये नित्यं सागरो राक्षसैर्युतः ॥२५॥
अथ शाखो विशाखश्च छागवक्त्रश्चतुर्मुखः ।
नन्दी च सोमनन्दी च नन्दिषेणश्च वीर्यवान् ॥२६॥
घण्टाकर्णः शंकुकर्णः कुण्डोदरमहोदरौ ।
विट्पतिर्वीरभद्रश्च स च देवः प्रभामयः ॥२७॥
संवर्तकानलोवौ[१९] च यशोदीप्तो[२०] विभाकरः ।
वेगपश्च[२१] शिखण्डी च ताम्रचूडश्च कुक्कुटः[२२] ॥२८॥
अन्नदः पिङ्गलो यक्षः पिङ्गलश्च वटुः[२३] पटुः ।
विद्युत्केशः सुकेशश्च राक्षसौ चापराजितौ ॥२९॥
एते चान्ये च गणपा लोकपालसमत्विषः ।
विविशुर्दानवानीकं शुक्रोदयसमुद्धतम् ॥३०॥

---

१३ वन्द्यमानश्च - क. । १४ शशिर्यथा - क ख. । १५ चक्रुस्सर्वे सिंहनादान् (?), ना (न) दाँ ... - ख.।
१६शुक्रोद्गमात् - क. ख.। १७ ववन्दुश्च - क. ख.। १८ प्रक्ष्येदुश्च - ख. । १९ सर्वर्त्तकानल्नोकौ - ख., नलोवौ - ग.।
२० दीप्तौ - क. ग. । २१ वेगपश्च - क., छगपश्च - क. । २२ कुर्कुटः - ख. । २३ पटुः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ वादित्रशब्दास्तु सिंहनादरवैः सह ।
बभूवुः सेनयोरुग्राः सर्वभूतप्रकम्पनाः ॥३१॥
ततः प्रहरणैर्घोरैस्तुण्डनिर्वापितैस्तलैः[२४] ।
परस्परं समासाद्य निर्जध्नुस्ते[२५] परस्परम् ॥३२॥
नन्दीश्वरं पुरस्कृत्य कार्त्तिकेयञ्च षण्मुखम् ।
मृद्नन्ति[२६] प्रमथा दैत्यान् सर्पाँस्तार्क्ष्य इवाहवे ॥३३॥
असिपातावलूनाग्रा मुशलाहतमस्तकाः ।
दानवाः शेरते भूमौ वज्रभिन्ना इवाचलाः ॥३४॥
शरनिर्भिन्ननिर्भग्नाः[२७] संभग्नोरुप्रबाहवः
रिरिङ्गुस्समरे[२८] दैत्याः सर्पास्तार्क्ष्यार्दिता इव ॥३५॥
भग्नत्रिकोरुजघना[२९] घनबाणावपीडिताः[३०] ।
दैत्या विनिष्टनन्त्यार्त्तास्तोयपूर्णा इवाम्बुदाः ॥३६॥
तस्मिन् गणपदैत्यानां मथने भृशदारुणे ।
बभूव पूर्णा[३१] दैत्यानां[३२] धरा द्यौरिव नीरदैः ॥३७॥
किरीटैर्मुकुटैर्हारैर्वलयाभरणाङ्गदैः ।
पारिहार्यैस्स[३३] केयूरैः श्रोणीसूत्रैस्सकुण्डलैः[३४] ॥३८॥
शिरस्त्रैर्मणिभिः शुभ्रैर्ग्रैवेयैरपि सुप्रभैः ।
स्रग्दामैश्चारुकुसुमैर्नेत्रै रत्नाग्रबाहुभिः[३५] ॥३९॥
अस्त्रैः शस्त्रैश्च वस्त्रैश्च छत्रै[३६]श्चेन्दुसमप्रभैः ।
रक्तकुंकुमचित्राङ्गी[३७] नानाभरणभूषणा[३८] ॥४०॥
धनाढ्या स्त्रीरिवाभाति तत्र तत्र रणावनिः ।
सिंहानामिव दृप्तानां हस्तिनामपि वा यथा ॥४१॥
उत्साहोभूद् गणेशानां दानवान् संमप्रर्दताम् ।
ते हन्यमानाशरणा[३९] भयार्त्ताः शरणार्थिनः ॥४२॥

२४ निर्धाचितैस्तलैः - ख. । २५ निजघ्नु - क. । २६ ममर्दुः ।?) । २७ निर्म्मग्नाः - ख. । २८ ररङ्गुःसमरे - क. । २९ त्रिसा(का) स्थिजघना - ख. । ३० बाणग्रपीडिताः (?) । ३१ देव - ख. । ३२ ...दित्यानां - क., दिव्यानां - ग. । ३३ परिहार्यैश्च - ख. । ३४ ...स्सबन्धनैः - ख. । ३५ रत्नाग्रबाहुभिः - क. । ३६ तीक्ष्णैः - ख. । ३७ रणकुङ्कुमचित्राङ्गी - क. ख. ग. । ३८ भूषिता - ख. । ३९ आहन्यमानाशरणाः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रमथैरनुबद्धाश्च दानवाः सागरं श्रिताः ।
दृष्ट्वा तद्रेचितं[४०] सैन्यं दानवैः प्रमथार्दितैः ॥४३॥
प्रविष्टेषु च दैत्येषु सागरं मकरालयम् ।
भार्गवः सुमहातेजा यथाग्निरिव मूर्छितः ॥४४॥
स समुद्रालयान् दैत्याञ्छशाप कुपितो भृशम् ।
यस्मात्सहायानुत्सृज्य मां चापि पितृवद्धितम् ॥४५॥
प्राणत्राणार्थमबलाः प्रविष्टाः स्थ[४१] पयोनिधिम् ।
तस्मात्तत्रैव निर्ह्रीका[४२] मम शापपरिक्षताः ॥४६॥
मीनभावमनुप्राप्ता[४३] जाताजाता भविष्यथ ।
यावल्लोका भविष्यन्ति पर्वताश्च ससागराः ॥४७॥
तावद्यूयं जले मत्स्या भविष्यथ जलेचराः ।
नरमांसाशनाः पापा नरभक्ष्या भविष्यथ ॥४८॥
क्षपयिष्यथ मच्छापं वर्षकोटीशतान्युत ।
इति शापहतान् शेषान्[४४] कृत्वार्णवजलौकसः[४५] ।
विरराम महातेजाः शुक्रश्चन्द्रसमद्युतिः ॥४९॥

सनत्कुमार उवाच

ततस्ते वार्धितोयेषु गुरुशापहतासुराः ।
सायुधाः सतनुत्राश्च दृश्यन्ते दंशिताश्च ह ॥५०॥
अन्धकं तु ततः शुक्रः[४६] शुक्रारिभयविह्वलम्[४७] ।
उवाच पाणिना स्पृश्य जीवयन्निव तं गिरा । ५१॥
माभैस्त्वं[४८] दानवश्रेष्ठ प्रतियुध्यस्व[४९] शत्रुषु ।
अहं त्वां धारयिष्यामि आहार इव जीवितम् ॥५२॥
इत्येवमुक्तः शुक्रेण सोन्धको दानवेश्वरः ।
एवमेतदिति प्रोच्य रुरोध प्रमथान् रणे ॥५३॥

---

४० तद्रचितं - ख. । ४१ ...स्तु - क. ग. । ४२ निस्ती(श्री)का - ख. । ४३ ग्रासभावमनुप्राप्ता - क. ग. । ४४ चैतान् - ख., तेषां - ग. । ४५ जलौकसान् - क. ग. । ४६ शुकाः - क. । ४७ शुक्रारिं - क । ४८ भीस्त्वं - क. । ४९ ...बुद्धस्य - क., युद्धस्व ख. - ग. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ततः प्रविष्टेष्वसुरेषु सागरं निहन्यमानेषु च शङ्करानुगैः ।
दधार सर्वान्प्रमथान् तदान्धको[५०] नदीनदान् भूरिजलो यथार्णवः ।।५४।।
स नन्दिनं द्वादशभिः पराभिनत् तदान्धकः पञ्चभिरेव चाग्निजम् ।
विशाखशाखौ दशभिः शतेन च स नैगमेषं प्रतुतोद दानवः ।।५५ ।
स वीरभद्रं च तथा च विट्पतिं प्रभामयं यक्षवरं च पिङ्गलम् ।
विबभेद बाणैस्तपनीयभूषणैर्यथाङ्कुशाग्रैरिव हस्तिपो गजम्[५१] ।।५६।।
न सोस्ति तस्मिन् पुरतो न पृष्ठतो हयो गजो वा प्रमथोथवेतरः ।
शरान्न यो धारयतेन्धकेरितान् प्रदीप्तकालानलसूर्यसन्निभान् ।।५७।।
विवृश्चिताश्चन्दनवद् गणेश्वरा भुजोदरे वक्षसि[५२] मूर्ध्नि चासकृत् ।
निरुद्यमास्तस्थुरमित्रनन्दना यथा गजाः पञ्जरबन्धबन्धनाः[५३] ।।५८।।
ततोसुरैः सिंहरवास्तदा कृताः सशंखभेरीशतदुन्दुभोत्कटाः[५४] ।
पुनश्च युद्धं प्रबभौ भयानकं गणेश्वराणां सह दानवेश्वरैः ।।५९।।

⊙ इति स्कन्दपुराणे गणयुद्धे सुरशापे पञ्चाशदुत्तरशततमोध्यायः ⊙

सनत्कुमार उवाच

वर्तमानेन्धके युद्धे विद्रवत्सु गणेषु च ।
त्रिदशाधिपतिं शक्रमित्युवाच पितामहः ।।१।।
विमुखान्पश्य भद्रन्ते प्रमथानमराधिप ।
काल्यमानान् रणे घोरैर्दानवैरन्धकेन[१] च ।।२।।
निहतान्निहतानेष प्रथमैर्दानवान् युधि ।
शुक्र उज्जीवयन्नास्ते सस्यानि[२] जलदो[३] यथा ।।३।।
असौ विकृष्टचापश्च सेन्द्रायुधघनोपमः ।
सृजतीषुमयं वर्षमन्धकः क्षपयन् रिपून् ।।४।।

---

५० ...स्तथान्धको - ख. । ५१ गजान् - ख ग. । ५२ चक्षुषि - ग. । ५३ बद्धबन्धनाः - ख. ।
५४ ...कोतकटाः - ख. ।
१ घोरे दानवैरन्धकेन ,?) । २ सस्यं हि - ख., सस्यं ह्य - क. । ३ तोयदो - ख., म्बुमुचो - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रमथाभ्यर्दनं ह्येतदहितं ह्ययशस्करम् ।
क्षममाणा ह्यतिष्ठध्वं कस्मादेतत् पराजयम् ।।५।।
जित्वा ह्येष गणन्सर्वानन्धको दानवेश्वरः[४] ।
अस्माकमपि[५] मूलानि निर्मूलानि करिष्यति ।।६।।
तद्यावदेष नो बाणैः प्रमथान्नयति क्षयम् ।
तावदेव वयं पार्ष्णि गृह्णाम कृत्तिवाससः ।।७।।
एवं तव च कार्यार्थः सेत्स्यते देवताधिप ।
रुद्रस्य च कृतं ह्येवं भविष्यति महत् प्रियम् ।।८।।
स्वयम्भुवचनं श्रुत्वा बलवृत्रनिबर्हणः ।
युक्तमेतदिति प्रोच्य सुरान् सुरपतिर्जगौ ।।९।।
गृहीतवर्मशस्त्रास्त्राः शीघ्रं शीघ्रपराक्रमाः ।
साहाय्यं करवामाद्य[६] गणानां युध्यतां रणे ।।१०।।
ततो नारायणानन्तौ[७] नरेन्द्रौ चन्द्र[८] एव च ।
स्वयम्भुरनलो वायुः सूर्यो धनद एव च ।।११।।
पूषार्यमा भगो मित्रो यमश्च रविनन्दनः ।
अंश[९]स्त्वष्टा जयश्चैव जयन्तश्चैव शक्रजः ।।१२।।
मरुतो वसवः साध्यास्तथाश्विगरुडोरगाः ।
तुषिताश्चैव लेखाश्च विश्वेदेवाश्च गुह्यकाः ।।१३।।
गन्धर्वाश्चैव यक्षाश्च[१०] ये चान्ये देवपक्षिणः ।
ते सर्वे वातरन् युद्धे[११] हन्तुकामास्तथान्धकम् ।।१४।।
अथ दुन्दुभिशब्दाश्च सिंहनादाश्च भैरवाः ।
बभूवुर्देवसैन्येषु प्रमथानां प्रियंकराः ।।१५।।
देवैः पतद्भिस्तत्सैन्यं दानवानां विलोडितम् ।
प्रभूतमीनं क्षीणाम्बु राजहंसैर्यथा सरः ।।१६।।

---

४ दानवैस्सह - क. ख. । ५ युष्माकमपि - ख. । ६ कुर्म देवस्य - क. ख. । ७ नारायणोनन्तो (?) । ८ नरेन्द्रचन्द्र (?) । ९ अंशु - ख. । १० योद्धुकामाश्च - ख. । ११ ... वतरन् युद्धे - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ततो हलहलाशब्दः संजज्ञेतीवभैरवः ।
देवताध्युषिते सैन्ये दानवानां समाकुले ।।१७।।
सामुद्रमम्भस्तिमिभिर्घनैरिव यथा नभः ।
कफपित्तैर्यथा देहो गरुडैर्भोगिनो यथा ।।१८।।
तथा तदन्धकबलं बलेन त्रिदिवौकसाम् ।
मुहूर्त्तेन कृतं सर्वं विहस्तकवचध्वजम्[१२] ।।१९।।
एकतः सेन्द्रकै[१३]र्देवैरेकतश्च गणेश्वरैः ।
हन्यते दानवानीकमजा[१४] वृकशतैरिव ।।२०।।
वज्रोद्यतकरो देवो देवानां देवपुङ्गवः ।
ओङ्कार इव वेदानां[१५] तेषामासीत् पुरस्सरः ।।२१।।
वज्रास्त्रपावकेनेन्द्रो ददाह समरे रिपून् ।
दुरितानि तु सर्वाणि प्रायश्चित्तानलो यथा ।।२२।।
देवैश्च प्रमथैश्चैव हन्यमाने बलेन्धकः ।
उवाच क्रोधरागान्धो दानवान्दानवाधिपः ।।२३।।
उत्पाद्य वैरं रुद्रेण सर्वलोकाभिरक्षिणा ।
न शक्यं प्रमथान् जेतुमनिर्विण्णैः सहामरान्[१६] ।।२४।।
मरणाच्च न[१७] भेतव्यं युध्यध्वं दैत्यदानवाः।
भार्गवस्तिष्ठति ह्येष यो नः संजीवयिष्यति ।।२५।।
तत् प्राणेष्वदयन्तो वै यूयं देवगणेश्वरान् ।
यथाबलं यथोत्साहं वारयध्वमशङ्किताः ।।२६।।
मायाभिरेतान् बह्वीभिर्गूढाभिर्गूढरूपिणः ।
निवारयत युद्धेन सर्वान् देवान् समागतान् ।।२७।।
इत्युक्त्वा[१८] - - - - - - - - - - - - - - ।
- - - चक्रुर्घोराणि कल्पान्ते नीरदा इव ।।२८।।

---

१२ विध्वस्तकवचध्वजम् (?) । १३ सैन्यकै - ख । १४ शतानीकमाजं (?) । १५ देवानां - क. ख. ।
१६ सहामराः सहामरारैः (?) - क. । १७ मरणान्न च - ख. । १८ इत्युक्त्वा - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

धनुःशब्दान् प्रकुर्वाणाः सिंहनादरवाँस्तथा[१९] ।
दुद्रुवुर्दानवा देवानन्धकेन प्रचोदिताः ॥२९॥
विकृष्य तु महाचापं[२०] सागराम्बुदनर्दनः[२१] ।
रुद्रमुद्दिश्य वेगेन ससारान्धकदानवः ॥३०॥
तं दानवेन्द्रं दुर्वारं धावमान - - - - ।
वारयामास शैलादिर्धर्मचित्तमिवाशुभम् ।
- - - - - - - - - - - - - - - - - - ॥३१॥
स नन्दिनं त्रिभिर्बाणैर्ज्वलनादित्यसन्निभैः ।
निर्बिभेदान्धकः क्रोधाद् बाहुमध्ये निपीडयन् ॥३२॥
गाढं विदारितस्तेन दानवेन गणेश्वरः ।
सं[२२] जुघूर्ण तदा नन्दी वायुनुन्नो यथा द्रुमः ॥३३॥
घूर्णमानो बभौ नन्दी मृष्टकुण्लभूषणः ।
चलत्पल्लवपुष्पाढ्यो यथाशोकतरुस्तथा ॥३४॥
ततश्चिरात्समाश्वस्य सुयशाः सुयशापतिः ।
वज्रमूर्जितमुत्क्षिप्य सोन्धकाय ससर्ज ह ॥३५॥
तत्पावकरविप्रख्यं वज्रमागतमूर्जितम् ।
व्यष्टम्भयत वाणौघैरन्धकः प्रजहास च ॥३६॥
हसतस्तस्य[२३] नेत्राभ्यां सुभ्रूभ्यामश्रुबिन्दवः ।
न्यस्रवन्त यथार्कस्य किरणा दीप्तमण्डलात् ॥३७॥
भूतराज[२५]स्तस्तोत्पाट्य द्रुमं व्याकुलपल्लवम् ।
हतोसि हेन्धकेत्युक्त्वा ससर्ज च जगर्ज च ॥३८॥
तं धावमानमाकाशे तरुमारुतवीजिताः[२६] ।
अनुव्रजन्ति भ्रमरा मित्रं व्यसनगं यथा ॥३९॥

---

१९ ...स्तदा - क. । २० महच्चापं - क । २१ ..नर्दनं - क. ख., ... वन्नदन् (?) । २२ स - क. ।
२३ हतस्य तस्य - ख. । २४ शुभ्राभ्यामश्रुबिन्दवः - क., शुभाभ्या... - ख. । २५ भूतराज्य - क. ।
२६ मरुतजीवितम् - ख., जीविताः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तमभ्यस्यान्धको बाणैश्चारुकाञ्चनभूषणैः ।
चकर्त धर्ता[२७] लोकानां दितिगर्भं यथाहिहा ॥४०॥
वृक्षे कृते ततो नन्दी समृगव्यालपन्नगम् ।
मन्दराग्रं समुत्पाट्य दुद्रावान्धकमाहवे ॥४१॥
गिरिकूटं तु तं नन्दी गिरिकूटवनालयः ।
अपातयद्रथे तस्य विन्ध्ये वज्रमिवाहिहा ॥४२॥
स रथस्तेन शृङ्गेण नन्दिना दृढमाहतः ।
सचक्रकूबरहयः पांसुसायुज्यमागमत्[२८] ॥४३॥
ततोन्धकरथं दृष्ट्वा सचक्राक्षं विचूर्णितम् ।
नेदुर्देवाः सगन्धर्वाः प्रमथाश्च सगुह्यकाः ॥४४॥
ततोन्धकस्त्रिशूलेन नदित्वा कालमेघवत् ।
नन्दिनं ताडयामास गजेन्द्र इव पादपम् । ४५॥
त्रिशूलिदयितस्तेन त्रिशूलेनाभिताडितः ।
नन्दी विह्वलसर्वाङ्गश्चकम्पेन्तर्जलेन्दुवत् ॥४६॥
नन्दीश्वरे घूर्णमाने प्रहारेण भृशार्दिते ।
असुराणां बले जज्ञे सिंहनादरवो मुहुः ॥४७॥
सिंहनादेन शत्रूणां तेन नन्दी प्रबोधितः ।
परश्वधेनाभ्यहनदन्धकं भूतबान्धवः ॥४८॥
परश्वधहतो रक्तं चक्षरान्धकदानवः ।
गजदन्ताहतो रक्तं स्वरसं चन्दनो यथा ॥४९॥
अन्धकं विरथं दृष्ट्वा ररक्षुरमरद्विषः ।
आशास्ववस्थिता[२९] देवा यथा लोकमिमं तथा[३०] ॥५०॥
अथ बाणो बलेः पुत्रो बाणपुष्पसमप्रभः
अन्धकं रथयानेन संवादयत दानवः[३१] ॥५१॥

---

२७ भर्ता (?) । २८ पांशु ग्रायोज्यमानयत् - क. । २९ ...वस्था - ख. । ३० यदा - क । ३१ दानवः समपादगत् (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स तं रथं दानवेन्द्र आरुरोह तदान्धकः ।
यथोदयं[३२] तु भगवान् दिनकृत् पूर्णमण्डलः[३३] ॥५२॥
ततः पुनर्युज्यत देवदानवैः[३४] प्रकर्तुकामैः कलहं सुदारुणम् ।
त्रिशूलवज्राशनिसायकै रणे प्रधूपितोग्निर्ज्वलितस्तरां बभौ[३५] ॥५३॥

⊙ इति स्कन्दपुराणेऽन्धकनन्दियुद्धे एकपञ्चाशदुत्तरशततमोध्यायः[३६] ⊙

सनत्कुमार उवाच

विष्णु[१] मर्दयमानं तु दानवान् दानवार्दनम् ।
जम्भोम्बुद इवारावं कृत्वा दुद्राव दानवः ॥१॥
तमापतन्तं दृष्ट्वा तु जम्भमम्बुदनिस्वनम् ।
न स संविविजे देवः सिंहो दृष्ट्वेव कुञ्जरम् ॥२॥
कुजम्भश्चैव जम्भश्च यवीयान् दानवाचलः ।
अनन्तमन्तं शत्रूणामाववार ररास च ॥३॥
वृत्रोऽञ्जनगिरिप्रख्यः संवर्त्तकनिकाशदृक्[२] ।
जिघृक्षुरभ्यगादिन्द्रं नदमानः[३] पयोदवत् ॥४॥
तं धावन्तं नदन्तं च दानवं शतलोचनः ।
कुहरे गिरीसंकाश[४]माजघान पुरन्दरः ॥५॥
भावयत्यो (?) गदायोधी शतायुं वायुमाहवे ।
योद्धुकामोभ्ययात्तूर्णं जगर्ज च जहास च ॥६॥
तुहुण्डहुण्डावश्विभ्यामयुध्येतां महासुरौ ।
प्रह्लादेन भगस्सार्धमंशेम च विरोचनः ॥७॥
अर्यमाणं[६] यमञ्चैवा[७]युद्धेतां विल्वकेल्वलौ[८] ।
विप्रचित्तिमुखा ये च बलिष्वग्रा[९] महासुराः ॥८॥

---

३२ यथोदग्रं - क. । ३३ पूर्णवण्डलं - क. । ३४ ...र्गणर्पातदेवद नवैः - क. । ३५ प्रधूपितज्वालितरं बभौ रणम् - क. । ३६ आ. २०० - ख. ।

१ विष्णुं - क. । २ पिनाकधृक् - ख. । ३ नर्दमानः - ख. । ४ गिरिसंकाशे - क. । ५ ररास - ख. । ६ अर्यमन्तं - क., आर्य ... ख. । ७ यमश्चैव - क. ख. । ८ युध्येतामितवकेल्वलौ - क. । ९ .. मग्रा - क., ग्राम - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गणेश्वरांस्ते देवाँश्च अयुध्यन्त सहस्रशः ।
अन्धकस्तु समागम्य नन्दिनं[१०] दानवर्षभः ॥९॥
ततक्षे वत्सरदनैः[११] शरैः कार्मुकनिःसृतैः ।
सोन्धकेन दृढं विद्धः शरैर्मर्मविदारणैः ॥१०॥
चुकोप नन्दी क्रुद्धश्च ससारान्धकमहाहवे ।
सवज्रमुद्यम्य करं दिवाकरकरप्रभम् ॥११॥
ररास नन्दी संरब्धः पयोद इव संक्षये ।
वज्रेण शतधारेण सोन्धकस्य गणेश्वरः ॥१२॥
चूर्णयामास तुरगान्नियन्तारं रथं तथा ।
ततोन्धकं कर्णमूले कुण्डलालकशोभिते ॥१३॥
आजघान घनारावो वरदश्चारुकुण्डलः[१२] ।
तेनाप्यपावृत्य हस्तो हस्तिहस्तनिभस्ततः ॥१४॥
पातितो नन्दिनः क्रोडे कुञ्जरेणेव संयुगे ।
अपहस्ताहतस्तेन[१३] दानवेन गणेश्वरः ॥१५॥
अपासर्पत् पदान्यष्टौ तान्येवापतितः पुनः ।
साधु साध्विति वै दैत्यास्ततो ह्यन्धकमब्रुवन् ॥१६॥
स तेन सुप्रहारेण दानवं प्रति रोषितः ।
क्रोधमाहारयन्तीव्रमभिदुद्राव चैव हि[१४] ॥१७॥
तस्य गत्वा धनुश्चित्रं कवचं च महाप्रभम् ।
वज्रेण शतधारेण खण्डशः प्रचकार ह ॥१८॥
बाहुपाशेन चैवैनं बद्ध्वा भूतपातिः स्वयम् ।
इयेष भूमौ निष्पेष्टुमन्धकश्चावमोचयत् ॥१९॥
स मोचयित्वा ह्यात्मानं मायामास्थाय मोहनीम् ।
अभिदुद्राव शैलादिं तिष्ठतिष्ठेति चोचिवान्[१५] ॥२०॥

१० नन्दिना - क. ख. । ११ वस्त्रवदनै - क. । १२ कुण्डलं - क. । १३ अपाहस्ताहतस्तेन - क., अपहस्ताद्धतस्तेन - ख. । १४ ह - ख. । १५ चाब्रवीत् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तमापतन्तं वेगेन गणेश्वरमहत्तराः ।
सर्वे संक्रुद्धमनसो विविधायुधपाणयः ॥२१॥
नन्दिषेणः सोमनन्दी शंकुकर्णो महोदरः ।
घण्टाकर्णो वीरभद्रः स च देवः प्रभामयः ॥२२॥
भर्त्तारमभिरक्षन्तस्तेषां पारिषदाग्रगाः[१६] ।
अन्धकं योधयन्ति स्म सिंहाः[१७] शक्रगजं[१८] यथा ॥२३॥
तं नन्दिषेणः शूलेन सोमनन्दी च मुष्टिना ।
शरेण वीरभद्रश्च घण्टाकर्णोसिनापि च ॥२४॥
शंकुकर्णो चलाग्रेण पादपेन प्रभामयः ।
अन्धकं चिच्छिदुर्देवा द्रमिडा[१९] इव चन्दनम् ॥२५॥
नन्दीश्वरस्तु गणपो गणपैर्विमुखीकृतम् ।
आजघानोत्तमाङ्गे तु अन्धकं दानवाधिपम् ॥२६॥
दृष्ट्वासुरपतिं देवैर्गणपैः समभिद्रुतम् ।
असुराणां बले जज्ञे धाव गृहणेति निस्वनः ॥२७॥
ततोसुराः समाजग्मुः प्रह्लादप्रमुखा द्रुतम् ।
तान्युद्धायागतानेको विष्णुः सर्वानदीधरत् ॥२८॥
चक्रहस्तं तु दृष्ट्वैवं विक्रान्तं रणमूर्धनि ।
चकार सुमहद्वेगमन्धकः क्रोधमूर्च्छितः ॥२९॥
व्यायच्छमानं निश्चेष्टं प्रधावन्तं प्रगर्जितम् ।
यं यतः[२०] पश्यतेसौ वै[२१] तन्तं विव्याध सायकैः ॥३०॥
पृथवः पीतनिशिता गरुडाङ्गरुहन्धराः[२२] ।
अन्धकस्य शरा घोराश्चयवन्ते[२३] धनुषोक्षयाः ॥३१॥
मुखेषु दन्तवेष्टेषु उदरेषु करेषु च ।
अन्धकेन गजा विद्धास्त्यजन्त्यतिमदा मदम् ॥३२॥

---

१६ एते - क., एतेषां पार्षदाग्रगाः - ख । १७ सिंहः - क, सिंहाः - ख. । १८ गजान् - क., गजं - ख. । १९ द्राविडा (?) । २० यन्तु (?) । २१ सोरि(म्) - क. । २२ ... स्वराः - क. । २३ ...श्चव्यन्ते - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अन्ये श्रयन्ति देवेशमन्ये चेन्द्रं सुराधिपम् ।
देवं नारायणं चान्ये नन्दिनं चापरे गणाः ।।३३।।
अन्ये शाखं विशाखं च कुमारमपि चापरे ।
व्यपाश्रित्य स्थिता देवाः शकुन्ता इव पादपान् ।।३४।।
यथाशनिभयान्मर्त्या यथा सिंहभयान्मृगाः ।
यथा च गरुडान्नित्यं भुजगा भुजगाशिनः ।।३५।।
तथान्धकस्य युद्धस्था देवा दैवतवैरिणः
वित्रेसुः शरजालार्त्ता[२४] मूढा इव[२५] च बभ्रमुः[२६] ।।३६।।
बन्धुजीववनं यद्वद् भ्राजते पुष्पसन्नतम्[२७] ।
तथा व्रणजसिक्ताङ्गं तद् बभौ[२८] पार्षदं बलम् ।।३७।।
कम्पन्ते पादपा यद्वत् काननेष्वनिलेरिताः ।
तथान्धकभयाद्देवाः सन्त्रस्ता रणमूर्धनि ।।३८।।
ततो नारायणोनन्त[२९] ऊर्जितः शक्र एव च ।
अश्विनौ वसवश्चाष्टावादित्या द्वादशैव तु[३०] ।।३९।।
नन्दी विशाखः शाखश्च वीरभद्रः प्रभासयः ।
विट्पतिः शंकुकर्णश्च सोमनन्दी विनायकः ।।४०।।
एते बले हन्यमाने अन्धकेन बलोर्मिभिः ।
दुद्रुवुस्सायुधा देवास्तं दानवगणाधिपम्[३१] ।।४१।।
गन्धर्वभवनाकारं तं तस्य रथसत्तमम् ।
परिवार्य बभंजुस्ते[३२] जगर्जुश्च पयोदवत् ।।४२।।
भज्यमानः सुरैरासीदन्धकस्य महारथः ।
अधर्मे प्रकृतो[३३] यद्वद् विघ्नैरिव मनोरथः ।।४३।।
चक्रायुधं स चक्रेण शक्रं वज्रेण दानवः ।
अनन्तमिषुणैकेन शूलेन च विनायकम् ।।४४।।

---

२४ शरजालाङ्का - ख. । २५ वै इव - क. । २६ विभ्रमुः - क., इव विबभ्रमुः - क. । २७ सन्ततं - ख. । २८ स बभौ - क. । २९ नारायणोनन्तो - क. । ३० च - ख. । ३१ गणाधिपाः - क. । ३२ ...श्च - क. ख. । ३३ अधर्मेपु कृतो - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मुष्टिना नन्दिनं चैव पट्टिशेन[३४] प्रभामयम् ।
भल्लेन चैव पूषाणं गदया यममेव च ॥४५॥
आहत्य वैरिणस्तूर्णं[३५] सर्वानेव रणेन्धकः ।
उत्पत्य चानदद् व्योम्नि जलमत्त इवाम्बुदः ॥४६॥
स कूटयोधी कूटानि गिरीणां गिरिसन्निभः ।
सवृक्षक्षुपसर्पाणि ससर्ज च जगर्ज च ॥४७॥
गिर्यग्रवर्षं[३६] तद्[३७] घोरं सवृक्षर्क्षमहोरगम् ।
पपात देवसैन्येषु शीतमम्बुरुहेष्विव[३८] ॥४८॥
अविराममविश्रामं[३९] निरुच्छ्वासं[४०] भयाकुलम् ।
- - - - - - - - - - - - - - - - - - ॥४९॥
छिन्ननासाक्षिदन्तौष्ठा[४१] भग्नपादकटीकराः ।
उत्त्रस्तोद्भ्रान्तचकिता दृश्यन्ते प्रमथामराः ॥५०॥
सौधाग्रश्रृङ्गोपलशस्त्रवर्षी[४२] मुहुः सृजन्भात्यसुरोम्बरस्थः ।
ता मे - ॥५१॥
- शब्दम् ।
अब्जं महद्धूमलावृतश्च खद्योततुल्यं च महाग्निचूर्णम् ॥५२॥
सोप्यायितोद्वृत्तसमुद्रनादो[४३] नभोगतो दैवतसंघवैरी[४४] ।
मुहुः सृजत्येव महाम्बुवर्षं यथान्तकालेम्बुमुगुग्रवर्षम् ॥५३॥

⊙ इति स्कन्दपुराणे अन्धकयुद्धे द्विपञ्चाशदुत्तरशततमोध्यायः[४५] ⊙

सनत्कुमार उवाच

ततोन्धको वियत्स्थितो महाम्बुदौघसन्निभः ।
विसृज्य वर्षमौपलं[१] यथैव वर्षमम्बुदः ॥१॥

---

३४ पट्टशेन - क. ख. । ३५ वैरिणं तूर्णं - ख. । ३६ गिर्यग्रपर्वतं - क. । ३७ तं - ख. । ३८ शीताम्त्वरुरुहेष्विव - ख. - ख. । ३९ अविरामश्च विश्रामं - ख. । ४० चिरश्वासं - ख. । ४१ भिन्नना नाक्षिदन्तौष्ठा (?) । ४२ सौहार्यश्रृङ्गोपलशस्त्रवर्षी - क., सस्त्रवर्षं (?) । ४३ सोप्पायतोद्वृत्तसमुद्रनादो - ख. । ४४ देवतसंघवैरी - क. ख. । ४५ २०१ - ख. ।

१ मौशलं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पुनः प्रगृह्य कार्मुकं महेन्द्रकार्मुकोपमम् ।
मुमोच बाणदुर्दिनं बभूव चातिदुर्दिनम् ॥२॥
ततः सुपर्णपुंखिनां[२] सुपर्णपत्रपत्रिणाम् ।
सुपर्णतुल्यपातिनां सुपर्णतुङ्गतुण्डिनाम्[३] ॥३॥
शतं शरीरभेदिनां शरीरसारभोजिनाम् ।
ससर्ज दानवाधिपो जगर्ज चापि दर्पितः ॥४॥
धनुः प्रपूरितेरिता रणप्रचारितैर्वृताः ।
स्वमार्गयानदेशिका जवे मनोनिलोपमाः ॥५॥
महेषवोन्धकस्य ते पतन्ति देवतोपरि ।
यथा दिवाकरेरिताः करा महाचलेष्विव ॥६॥
शराहताश्च कुञ्जराः शराहताश्च वाजिनः ।
शराहताश्च देवता गणेश्वराश्च सर्वतः ॥७॥
विनिर्गतान्त्रशेणिता[४] विकीर्णहारभूषणाः ।
विमुक्तकेशबन्धनाः पतन्ति गाढवेदनाः ॥८॥
स्थितं चलन्तमुत्थितं प्रधावितं प्रवल्गितम् ।
हयं गजं सुरं यथा प्रपश्यते हि यं यतः ॥९॥
तमन्धकस्तदा रिपुं शरैस्तमोरिविग्रहैः ।
बलान्निपात्य नर्द्दते जलागमे यथाम्बुदः ॥१०॥
व्रणार्त्तमुक्तनिस्वनं[५] समुद्भ्रमत्तुरङ्गमम् ।
बलं नदीनवद्वभौ[६] प्रशान्ततूर्यनिस्वनम् ॥११॥
विभिन्नछिन्नदारितं प्रदग्धजग्धनिर्धुतम् ।
यथा मदान्धकुञ्जर[७]प्रणष्टपादपं वनम् ॥१२॥
मुखेषु केचिदाहता निरीक्षणेषु चापरे ।
उरोदरेषु[८] चापरे[९] तथा हताश्च पृष्ठतः ॥१३॥

---

२ सुवर्णपुंखिनां - क. । ३ तुण्डतुण्डिनाम् (?), तुल्यतुण्डिनाम् (?) । ४ न्तषोशिता - ख. । ५ निस्वनिस्वनम् - ख. । ६ नदीनवद् वभौ - क. । ७ महामतङ्गज (?) । ८ उरुदरेषु - क., उरूत - ख. । ९ चार्पिताः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शतघ्नयो यथाचिता: शरैस्तथा मरुद्गणाः ।
गणाश्च भीमविक्रमा नभूमिमापुराहताः ॥१४॥
सुरासुरैः प्रवर्तिता ततो व्रणाम्बुवाहिनी ।
गजेन्द्रनक्रसंकुला रथाङ्गचारुकच्छपा ॥१५॥
निकृत्तहस्तपन्नगा धनुर्ध्वजोत्तमद्रुमा ।
किरीटकूटदर्दुरा धनुर्गुणाभितन्तुका[१०] ॥१६॥
विकीर्णहारशर्करा सिताम्बरातिफेनिनी ।
सुरासुरैः प्रवर्तिता सुरासुरातिदुस्तरा ॥१७॥
ततोऽञ्जनाम्बुदत्विषस्तडित्प्रहासहासिनः[११] ।
पिशाचयक्षराक्षसाः पिपासयातिकर्षिताः ॥१८॥
सुरा यथा वरामृतं पपुस्तथैव शोणितम् ।
ततः पुनः समाकुलं बभूव युद्धमद्भुतम्[१२] ।
तदान्धके[१३] शराहते[१४] महेषुणाथ नन्दिने ॥१९॥

⊙ इति स्कन्दपुराणे युद्धभूमिवर्णने त्रिपञ्चाशदुत्तरशततमोध्यायः[१५] । ⊙

सनत्कुमार उवाच

हन्यमाने बले तस्मिन् देवैः सप्रमथेश्वरैः ।
चुक्रुधुर्दानवा[१] घोराश्चतुर्विंशतिदर्पिताः ॥१॥
प्रह्लादश्चानुह्लादश्च संह्लादः शिनिवाष्कलौ ।
जम्भो विरोचनो वृत्रो बलिर्बाणोवनिञ्जयः ॥२॥
तथा तुहुण्डो हुण्डश्च शम्भुः कार्तस्वनः कुभः[२] ।
शम्बरो विप्रचित्तिश्च इल्वकः[३] पिल्वकस्तथा ॥३॥
मयस्तारस्तारकाक्षो विद्युन्माली प्रमोहनः ।
एतेमर्षवशं प्राप्ताश्चतुर्विंशतिदानवाः ॥४॥

---

१० धनुर्गुणादितन्तुका - क., ...ति - ,?) । ११ हासिताः - ख. । १२ ...सुर्महाद्भुतम्-ख. । १३ तदान्धकः - क.।
१४ शराहतो (?) । १५ २०२ - ख. ।
१ चुक्रुशुर्दानवा - ख. । २ कुशः - क. । ३ इल्वलः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दुद्रुवुः सायुधं देवं[४] नन्दिनं समवस्थितम्[५] ।
तेऽञ्जनाचलसंकाशाः काञ्चनाचलसन्निभम् ॥५॥
नन्दिनं ताडयामासुः शूलशक्त्यृष्टिपट्टिशैः ।
तथा तैररिभिः शस्त्रैस्ताडितो वारितश्च वै ॥६॥
नाक्षुभ्यत तदा नन्दी नार्त्तिमापन्न च व्यथाम् ।
ततो विकृष्य भगवानाततं कार्मुकं महत् ॥७॥
त्रिभिस्त्रिभिर्बिभेदाशु सर्वान्दानवसत्तमान् ।
ते बाणमार्गनिस्त्रावै[६] र्दानवाः शोणितक्षराः ॥८॥
क्षरन्त इव शैलेन्द्रास्तपनीयरसान् बभुः ।
ततो रोषोद्धतो नन्दी शुक्रेणोज्जीवितं पुनः ॥९॥
कार्त्तस्वनं शरैर्घोरैरनयद्यमसादनम् ।
जीवितस्रंसनं प्राप्य स दानवमहाचलः[७] ॥१०॥
शीर्णोपलः पपाताशु वज्राहत इवाचलः ।
पतमाने क्षितौ[८] तस्मिन्नन्दिबाणाहते हते ॥११॥
बलिरुत्पाट्य शैलाग्रं चिक्षेपोद्दिश्य नन्दिनम् ।
तत् सधातुमृगव्यालं सर्क्षवृक्षं गिरेस्तटम्[९] ॥१२॥
निभ्रान्तोपलवृक्षालमभ्यधावद् गणेश्वरम् ।
शृङ्गस्य बलिमुक्तस्य तस्य व्यालादयो जवात् ॥१३॥
अपक्रान्तानयार्त्तस्य पुरुषस्येव बान्धवाः ।
तदापतत् तद् गिर्यग्रं[१०] नन्दी बाणेन वीर्यवान् ।
मेघानिव महावायुर्बिभेद च ननाद च ॥१४॥
तद्विदार्य गिरेः शृङ्गं गिरिशृङ्गनिकेतनः ।
बलिं बिभेद बाणेन बलिर्विघ्नमिवोत्थितम्[११] ॥१५॥

---

४ देवा - ख. । ५ समुपस्थितम् (?) । ६ मार्त्तनिस्त्रावै - ख. । ७ बलल - क. दानवः स महाबलः (?) ।
८ गिरौ (?), ...ह्यरौ - क. । ९ ...स्तदा - ख. । १० तदापतन्तं - क. । ११ ...च्छ्रितं - ख ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सोभ्याहतो गणेशेन प्राह्लादितनयोवश:[१२] ।
पपात सहसा भूमौ वाताहत इव द्रुम:[१३] ॥१६॥
ततो बलौ निपतिते नन्दीषुवरताडिते[१४] ।
जहु: समरमारात्तां[१५] दानवा: शरपीडिता: ॥१७॥
प्रसृताम्बुदसंकाशाँ[१६]स्ततोम्बुदनिभाकृति:[१७] ।
अन्धक: खात् क्षितिं प्राप्य दानवानिदमब्रवीत् ॥१८॥
अद्य दाक्षायणीपुत्रा निबोधध्वं वचो मम ।
मया चोक्तानि पथ्यानि कुरुध्वं यदि मन्यत ॥१९॥
कुलेषु जाता वीराश्च सर्वास्त्रकृतनिश्चया: ।
द्रवध्वे[१८] वै किमुद्दिश्य पटुनाराचवेजिता: ॥२०॥
जल्पितानि क्व वस्तानि कथितानि च संसदि ।
क्व वस्तद्वैरबाहुल्यं[१९] दैवतैस्सह[२०] सांप्रतम् ॥२१॥
एकेन नन्दिना भग्ना: शतशोथ सहस्रश: ।
ह्री: कथं वै न भवति जल्पतां[२१] वो गृहाजिरे ॥२२॥
निवर्तध्वमधर्मज्ञा युध्यध्वं किं सृतेन वै[२२] ।
भवेन्न नो[२३] यत्र मृत्यु: सोवकाशो न विद्यते ॥२३॥
प्राश्निका:[२४] पार्श्वत: स्थित्वा निर्वैरा वीतमत्सरा: ।
द्वैरथं नन्दिना सार्धमेतत्[२५] पश्यत साम्प्रतम् ॥२४॥
इत्यन्धकवच: श्रुत्वा सर्वे ते दानवा रणे ।
पुनर्निवृत्ता युद्धाय प्रगृहीतवरायुधा: ॥२५॥
ततोन्यं रथमास्थाय नल्वमात्रं पताकिनम् ।
अन्धक: सोभ्ययान्नन्दिं सार्धं दानवपुङ्गवै: ॥२६॥
शिताग्ररुक्मविकृता: पृथव: प्रियदर्शना: ।
अन्धकस्य धनु:सृष्टा[२६] निष्पतन्ति महेषव: ॥२७॥

१२ प्रह्लादतनयोत्रश: - क. ख. । १३ द्विर: · ख. । १४ नन्द्येषुवरनाडिते - ख. । १५ समररागात्तां - ख. । १६ संकाश - क. । १७ इवाकृति: - क. । १८ द्रवध्वं - ख. । १९ गतं वैरबाहुल्यं - ख. । २० देवतै:सह - क. ख. । २१ जल्पितां - क. । २२ व: - क. । २३ वो - ख. । २४ प्राश्नीका: - ख., प्राणा: का: - क. । २५ सार्धं मम - (?) । २६ धनुषोन्धक (केन)सृज्यन्तो (न्ते) - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शलभैरिव केदारा भ्रमरैरिव पादपाः ।
तोयदैरिव नागेन्द्राः सागरा मकरैरिव ॥२८॥
महेषुभिर्विनिर्मुक्तैर्नागादित्यसमप्रभैः ।
अन्धकेन कृता देवाः शतघ्नय (?) इवोत्तमाः ॥२९॥
वायवोप्रतिघा यद्वद् यथा मृत्युर्यथा जरा ।
यथा चाप्रतिघाः सूक्ता नियतं ब्राह्मणाशिषः ॥३०॥
तथा ते निशिता ह्युग्रा ब्रह्मदण्डा इवोद्यताः ।
अनिवार्या ह्यमोघाश्च तेन्धकस्य महेषवः ॥३१॥
यतो यतोसुरास्सर्वे सोन्धकश्च रणे रिपुः ।
ततस्ततः स्म दीर्यन्ते प्रमथा विबुधैस्सह ॥३२॥
सोपि नित्यायतधनुः परिवेषीव भास्करः ।
असृजद्बाणनिकरान्[२७] किरणान् भास्करो यथा ॥३३॥
तस्य बाणरुजः[२८] प्राप्य नदीतीर इव द्रुमाः ।
सीदन्ति गणपास्सर्वे देवाश्च सहवासवाः ॥३४॥

स विष्णुमेकेन शरेण विद्ध्वा द्वाभ्यामनन्तं त्रिभिरेव शक्रम् ।
यमञ्च सोमञ्च जलाधिपञ्च वसूंश्च निर्दार्य[२९] ररास घोरम् ॥३५॥
अश्विद्वयञ्चापि शरद्वयेन विद्ध्वा भगांशार्यमचन्द्रपूष्णः[३०] (?) ।
ततोथ नन्दीश्वरमुग्रकर्मा गणेश्वरांश्चापि शरैस्ततक्ष ॥३६॥
तथा दहत्यन्धक आततायी यथा पतङ्गान् भगवान् हुताशः[३१] ।
निवारितास्ते शरदारिताश्च तदान्धकेनामरयोधमुख्याः[३२] ॥३७॥
न स्पन्दितुं[३३] शेकुरुदीक्षितुं वा रणेन्धकं खे मनुजा इवार्कम् ।
यशांसि दीप्तानि ततः प्रहाय देवाः सनारायणदेवपालाः ।
शरार्दितास्तेन्धकदावेन प्रदुद्रुवुर्दानववेधखिन्नाः ॥३८॥

---

२७ किरणान् - क. ख. । २८ रजः - क. ख. । २९ निर्वार्य - ख. । ३० ... श्चार्यमचन्द्रपूष्णः - क. ।
३१ हुताशनः - क. । ३२ ...वारितावश्ववदन्धकेनामरयोधमुख्याः - ख. । ३३ निस्पन्दितुं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विष्णुः पितामहश्चैव अनन्तोथ शतक्रतुः ।
अन्धकेन रणे भग्नाः शरैरग्निशिखोपमैः ॥३९॥
आदित्या वसवः साध्या अश्विनौ च सुरोत्तमौ ।
अन्धकेन रणे भग्ना वज्राघातैः पतत्त्रिवत्[३४] ॥४०॥
तुषिताश्चैव विश्वाश्च देवाश्चैव स्वधाभुजः ।
अन्धकेन शरैर्भग्ना मारुतेन यथा द्रुमाः ॥४१॥
चन्द्रमा भगवान् वह्निर्वित्तपालश्च राक्षसः ।
अन्धकेन रणे[३५] भग्नाः[३६] शरैराशीविषोपमैः ॥४२॥
गन्धर्वा गुह्यकाः सर्पा[३७] गरुडाश्च महोरगाः[३८] ।
अन्धकेन रणे भग्ना विद्धानलसमैः शरैः ॥४३॥
विट्पतिः शंकुकर्णश्च सोमनन्दी प्रभामयः ।
पिङ्गलो नन्दिषेणश्च घण्टाकर्णो महोदरः ॥४४॥
विद्युत्केशः सुकेशश्च[३९] स च देवो विनायकः ।
अन्ये च प्रमथाः शूरा वीरभद्रपुरोगमाः ॥४५॥
अन्धकेन रणे भग्नाः शतशोथ सहस्रशः ।
त्रैलोक्यं प्रसभं सर्वमुद्युक्तं सचराचरम् ॥४६॥
अन्धकेन रणे भग्नं सनारायणदेवपम् ।
तस्मिन्सुरबले देवं विमुच्यैकं गणाधिपम् ॥४७॥
महामणिशिरोमौलिं न कश्चिदवतस्थिवान् ।
ततोसुरबले घोरस्सर्वप्राणिकृतो[४०] महान् ।
सिंहनादरवो जज्ञे सवादित्ररवोद्भुतः ॥४८॥

⊙ इति स्कन्दपुराणेन्धकविजये चतुष्पञ्चाशदुत्तरशततमोध्यायः[४१] । ⊙

---

३४ पतत्रिणः - क. ख. । ३५ रणेन्धकेन वै - क. । ३६ निहताः - ख. । ३७ सर्वे - ख. ।
३८ महाबलाः - ख. । ३९ सुनासश्च - क. । ४० प्राणाः - क. ख., भृतो - ख. । ४१ २०३ - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

एतस्मिन्नन्तरे देवाः सर्वे शक्रपुरोगमाः ।
ब्रह्मणा सहिता जग्मुः शरण्यं शूलपाणिनम् ॥१॥
ते प्रणम्य महादेवमिदमूचुर्भयार्दिताः ।
विजिताः सर्व एव स्मः[१] किमन्धकमुपेक्षसे ॥२॥
देवदेवस्ततः प्राह देवान् ब्रह्मपुरोगमान् ।
मया दत्तवरो यस्मात् तस्माद् यूयं विनिर्जिताः ।
क्रीडार्थमेव च मया संगरे स उपेक्षितः[२] ।
अधुना भवतामर्थे शामयिष्येहमन्धकम्[३] ॥४॥
ततो देवः स्मितं कृत्वा पार्श्वस्थं शूलमैक्षत ।
देवाभिप्रायतत्त्वज्ञः शूलो जज्वाल तत्क्षणात् ॥५॥
अभिसृत्य द्रुतञ्चैवमन्धकं जितकाशिनम् ।
युद्धे विक्रम्य सहसा निर्बिभेद स्तनान्तरे ॥६॥
ततोन्धकं तदा भित्त्वा स शूलस्तं महाबलम् ।
दानवेन्द्रं महाकायमानिन्ये शङ्करान्तिकम् ॥७॥
तस्य भिन्नस्य शूलेन येक्षरन् रक्तबिन्दवः ।
पतिताः[४] पुरुषा भूत्वा तेप्ययुध्यन्त दुस्सहाः ॥८॥
तस्यैव तुल्यरूपास्ते तस्य तुल्यपराक्रमाः ।
नानाशस्त्रप्रहरणास्तेप्ययुध्यन् गणेश्वरैः ॥९॥
- - - - - - - - - - -ो द्यतपाणयः ।
जघ्नुः केचिद् गणानेव द्रवतस्ते महाबलाः ॥१०॥
न तेषां युध्यमानानां कश्चित्तस्थौ गणेश्वरः ।
संग्रामे दानवेन्द्राणां भयात् सर्वे प्रदुद्रुवुः ॥११॥
तान्दृष्ट्वा विद्रुतान् सर्वान् गणान् सह सुरेश्वरैः ।
महादेवोसृजत् - - ो ि - - - - - - - - ॥१२॥

---

१ एवास्म - क. घ. । २ समुपेक्षितः - ख । ३ तमन्धकम् (?) । ४ उत्थिताः (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

- - - - - - - - - - - - - - - - करन्तदा ।
- वा विज्ञापयामासु[५]राज्ञां नो दातुमर्हसि ॥१३॥
देवदेवस्तदा प्राह सर्वाः प्रहरणोद्यताः ।
असृग्बिन्दुसमुद्भूतान् भक्षयध्वं महासुरान् ॥१४॥
एवमुक्तास्तु तास्सर्वा योगेश्वर्यो महाबलाः ।
हत्वा हत्वासुरान् युद्धे चखादुश्च म - - - ॥१५॥
देवोपि ज्वलितं शूलमब्रवीदन्धकान्तकृत् ।
अन्धकं पच[६] सूर्याग्नौ सहस्रं शरदां[७] शतम् ॥१६॥
अन्धकोपि हि शूलाग्रे पच्यमानोर्कतेजसा ।
पूर्णे सहस्रे वर्षाणां सात्विकं भावमभ्यगात् ॥१७॥
सात्विकं भावमापन्नो विनिर्धूतरजस्तमः ।
लोकानां कारणं देवं बुबुधे गोवृषध्वजम् ॥१८॥
तं बुद्ध्वा च ततो भक्त्या निर्मलेनान्तरात्मना ।
स्नाय्वस्थिशेषस्तुष्टाव देवं चद्रार्धमौलिनम् । १९॥

अन्धक उवाच

कृत्स्नस्य योस्य जगतः सचराचरस्य कर्ता कृतस्य च तथा सुखदुःखदाता ।
संहारहेतुरपि यः पुनरन्तकाले, तं शङ्करं शरणदं शरणं व्रजामि ॥२०॥
यं योगिनो विगतमोहतमोरजस्का भक्त्यैकतानमनसो[८] विनिवृत्तकामाः ।
ध्यायन्ति निश्चितधियामितदिव्यभावं, तं शङ्करं शरणदं शरणं व्रजामि ॥२१॥
यश्चन्द्रखण्डममलं विकसन्मयूखं बध्वासयं (?) प्रियतया शिरसा बिभर्ति ।
यश्चार्धदेहमददाद् गिरिराजपुत्र्यै, तं शङ्करं शरणदं शरणं व्रजामि ॥२२॥
यः सिद्धचारणनिषेवितचारुतोयां गङ्गां महोर्मिरभसां गगनात्पतन्तीम् ।
मूर्ध्ना दधे स्रजमिवाप्रतिलोलपुष्पां, तं शङ्करं शरणदं शरणं व्रजामि ॥२३॥
कैलासश्रृङ्गशिखरं प्रविकम्प्यमानं कैलाशश्रृङ्गसदृशेन दशाननेन ।
यः पादपद्मपरिपीडनया दधार, तं शङ्करं शरणदं शरणं व्रजामि ॥२४॥

---

५ विज्ञापयामास - ख. । ६ पश्च - ख. । ७ शरदं - ख. । ८ भक्त्येकतानमनसो (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

येनासक्तदितिसुताश्च दनोः सुताश्च[९] विद्याधरोरगगणाश्च वरैस्समग्राः ।
संयोजिता मुनिवराः फलमूलभक्षा,स्तं शङ्करं शरणदं[१०] शरणं व्रजामि ॥२५॥
दक्षाध्वरं च नयनञ्च तथा भगस्य पूष्णस्तदा दशनपंक्तिमशातयच्च[११] ।
व्यष्टम्भयत् कुलिशयुक्तमहेन्द्रबाहुं, तं शङ्करं शरणदं शरणं व्रजामि ॥२६॥
- क्र -- त्रिविधबन्धविमोक्षभावा ज्ञानान्वयश्रुतगुणैरपि नैव युक्ताः ।
यं संश्रिताः सुखभुजः पुरुषा भवन्ति, तं शङ्करं शरणदं शरणं व्रजामि ॥२७॥
अग्रे मृतस्य रविकोटिसमानतेजः[१२] सन्त्रासनं विबुधसत्तमदानवानाम्[१३] ।
यः कालकूटमपिबत् समुदीर्णवेगं, तं शङ्करं शरणदं शरणं व्रजामि ॥२८॥
ब्रह्मेन्द्रविष्णुमरुतां च सषण्मुखानां योदाद् वरान् सुबहुशो भगवान्महेशः ।
नन्दिञ्च मृत्युवदनात्प्रभुरुज्जहार,[१४] तं शङ्करं शरणदं शरणं व्रजामि ॥२९॥
कामश्च कार्मुकधरो भुवि पञ्चबाणो हास्यात्कृतो भगवता स तदा विदेहः ।
एकेषुणा त्रिपुरमेव पुरा जघान, तं शङ्करं शरणदं शरणं व्रजामि ॥३०॥
आराधितः सुतपसा हिमवन्निकुञ्जे धूमव्रतेन मनसापि परैरगम्ये ।
सञ्जीवनीमदित यः परमार्थगम्य,[१५]स्तस्मै नमः शिवकराय शिवाय नित्यम् ॥३१॥
नानाविधैर्गजविडालसमानवक्त्रैर्दक्षाध्वरप्रमथनैर्वलिभिर्गणैन्द्रैः[१६] ।
योभ्यचर्यतेमरगणैः सहलोकपालै,स्तं शङ्करं शरणदं शरणं व्रजामि ॥३२॥
क्रीडार्थमेव भगवान् भुवनानि सप्त नानानदीविहगपादपमण्डितानि ।
सब्रह्मकानि ससृजे सुकृतेहितानि, तं शङ्करं शरणदं शरणं व्रजामि ॥३३॥
यस्याखिलं जगदिदं वशवर्ति नित्यं योष्टाभिरेव तनुभिर्भुवनानि भुंक्ते ।
यः कारणं सुमहतामपि कारणानां, तं शङ्करं शरणदं शरणं व्रजामि ॥३४॥
----ँ -----ँ ----ँ आसज्य मां क्षितिधरेन्द्रसुतानुयात ।
-------म विभूषणाङ्ग तं शङ्करं शरणदं[१७] शरणं व्रजामि ॥३५॥
श्वेतं मुनिं यमनियोगपरायणैस्तैर्भीमैर्महोग्रपुरुषैः प्रतिनीयमानम् ।
बद्ध्वा ------------ तं शङ्करं शरणदं शरणं व्रजामि ॥३६॥

---

९ दनोश्च पुत्रा - ख. । १० शरणजं - ख. । ११ श्च - ख., मशातयद्यः (?) । १२ समानतेजं - ख. । १३ विबुधदानवसत्तमानां (?) । १४ ...त्पुनराजहार - ख. । १५ परमार्थगभ्यं - ख. । १६ ...गंजेन्द्रैः - ख. । १७ शरणजं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

-------------------------------- ।
-------------------------------- ॥३७॥
-------------------------------- ।
--------- परिचिन्त्यमानं तं शङ्करं शरणदं शरणं व्रजामि ॥३८॥
------------ विमूढा, जानन्ति नास्य जगतो भवबन्धरूपाः ।
ऐश्वर्यदोषविषये --- भिबद्धा , निर्यातमाद्यनुभवन्ति यथाहमेव ॥३९॥

----------------- ।
---- प्रसादाद्धि ------ स्तदा ।
शुभकर्मा ---- शिवलोकमकल्पयः[१८] (?) ॥४०॥

सनत्कुमार उवाच

तस्यैवं स्तुवतो देवः शूलपाणिर्वृषध्वजः ।
पूर्णे वर्षसहस्रे तु प्रीतः प्रोवाच शङ्करः ॥४१॥
पुत्र तुष्टोस्मि भद्रं ते जातस्त्वं निर्मलोधुना ।
दिव्यं ददामि ते चक्षुः पश्य मां दानवेश्वर ॥४२॥
----- यत्किञ्चित् कांक्षितं फलमुत्तमम् ।
तत्सर्वमेव दास्यामि ब्रूहि दानवसत्तम ॥४३॥
ब्राह्मं वैष्णवमैन्द्रं वा पदं विबुधदुर्लभम् ।
अथवा सर्वलोकानां भव राजा यथा पुरा ॥४४॥

अन्धक उवाच

ब्राह्मं वैष्णवमैन्द्रञ्च पदमावृत्तिलक्षणम् ।
विदितं मम तत्सर्वं मनसापि ---- ॥४५॥
यदि तुष्टोसि देवेश गाणपत्यं विधत्स्व मे ।
अविशेष्यं विशुद्धञ्च तदक्षय्यं च सर्वदा ॥४६॥

देवदेव उवाच

----------------- ।
--------- सर्वलोकनमस्कृतः ॥४७॥

---

१८ ...मयम् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कामरूपी महायोगी सहासत्वो महाबलः ।
अणिमादिगुणैर्युक्तः प्रियः पुरुषसत्तमः ।।४८।।

सनत्कुमार उवाच

ततो - - - - - - - - वरं दत्त्वा सुदुर्लभम् ।
महादेवः . . भूत्वा तत्रैवान्तरधीयत ।।४९।।
- - - - - - - - - - - - - - - - - - ।
- - - - - - - - - - - - - - - - - - ।।५०।।
वरेण्यं वरदं देवं ब्रह्मण्यममितौजसम् ।
आगत्य चैव - - - - - - - - - - - - - ।।५१।।
- - - - - - - - - - - - - - - - - - ।
- - - - - - - - - - - - - - - - - - ।।५२।।
- - - - - - - - - - - - - - - - - -
- - शूलं - - परमं विक्रमैः स्तम्भयित्वा ।
- - - - - - - - - - - - - - - - -
- - - - - - - - - - - - - - - - - - ।।५३।।
- ।
- ।।५४।।
- ।
- वाङ्मनोभिः ।।५५।।
येन्ये कुशास्त्रमलपङ्कविमग्नदेहा मोक्षेप्यतस्तव विभो चरणा - - - ।
ते वा - - - - - - - - - - स्तुवन्ति मूढा मृगा इव वने मृगतृष्णिकाभिः ।।५६।।
- - ङकुशङ्कितटे स्मृति ि- - - - - - - - - - - - - - - - - ।
- - - - - - - - - - - प्यटेन पूषा[१९] करोति विमलं किरणौघजालैः ।।५७।।
पक्षे तपश्चरति येन कलावशेषश्चन्द्रोपि ते हरतवोत्तमपादमूले ।
नक्तं तु शूलहसितै रजमीमुखानि सम्पूर्णमण्डलवपुर्धवलीकरोति ।।५८।।

१९ करोकरो - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

- वसवो मरुतोऽश्विनौ च ।
भृग्वादयश्च ऋषयस्तव देव सिद्धाः[२०] सिद्धिं गताश्चरणपद्मवरप्रसादात् ॥६०॥
कैलास - - - - - - - - - द्रं वाय देवाय - - लयलाञ्छितमेखलाय[२१] ।
बद्ध्वासनं परममुन्नतचारुमूर्ति योगेश्वरं दिभुमहद् भुवनस्य भूत्यै ॥६१॥
- - - - - सासि पूर्व[२२]मदृष्टपूर्वा सा सा स्पृहां प्रकुरषे महतीं जनस्य ।
तस्माज्जटेन्दुरिवजा(?)र्धशरीरयोगाद् गङ्गां च[२३] देव भजसे त्वमपूर्ववत्ताम् ॥६२॥
- - - - - - - - - शीर्ण - - - संस्थैः सम्यग्वरेश्वररुषा सदसोग्रकण्ठ (?) ।
ते देव लोकविजयं तत्र देव यावद् दुष्टस्य वक्त्रकमलानि निवेदितानि ॥६३॥
कैलासमेरुमलयोदरमन्दरेषु विद्याधरैर्मुनिमहोरगकिन्नरैश्च ।
अभ्यर्च्यसे कुल - टायन - - - - - - - - - - - - - - मधुरैर्वचोभिः ॥६४॥
- - - - - - - ये - भक्त्या सर्व - - - - - - मजरं - - - मात्मवेद्यम् ।
पश्यन्ति सत्वमचलास्तव योगदृष्ट्या त्वामेव ते शिव विशन्त्यनिवर्तनाय ॥६५॥
विद्यावयोर्- ि स्य समेत्य शक्तास्तेजःसृजाशुगमित - - - - - - - - - ।
- -[२४] ॥६६॥
- ।
- ॥६७॥
- ।
- र पा व – य – ॥६८॥
दक्षाध्वरस्सुरवरैः कृतसर्वरक्षो भृग्वादिभिर्मुनिवरैरुपगीतवेदः ।
क्रोधोद्भवेन तव देव हतस्सलीलमेकेन शूलवरचक्रभृता गणेन ॥६९॥
लिङ्गस्य यो हर हरिः प्र - - ह्यधस्तादूर्ध्वन्त्वहं - - - - - - - ब्रुवाणः ।
- - - - - रवन्दतवादिमध्ये कोन्यः प्रवीण इह वक्ष्यति[२५] तेलपबुद्धिः ॥७०॥
शर्वोसि सर्वगतसर्वफलप्रदोसि योगोसि योगधर योगविदां वरोसि ।
मातापितासि जगतः प्रभुरव्ययोसि शान्तः शिवोसि परमोसि शिवङ्करोसि ॥७१॥

---

२० सिद्धि - ख. । २१ लाञ्छित(?)। २२ ...य - ख । २३ ..य- ख. । २४ एतस्य पादटिप्पण्यां 'चामीकरोत्कर-समूहसमानवर्ण, इत्यादिका पंक्तिर्दृश्यते । सा च वृष्टाक्षरतया दुष्पठेति तथैवोपेक्षिता । २५ वक्ष्यसि - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्तवमिमममलार्थं[२६] ब्रह्मणा गीतमग्र्यं
द्विजसदसि पठेद्यः कल्यमुत्थाय शश्वत् ।
इह सुखमनुभूय प्रेत्य चाग्रे च तस्य
धनकनकसमृद्धे जायते जन्म वंशे ।।७२।।

⊙ इति स्कन्दपुराणे गणयुद्धेन्धकमथने ब्रह्मकृतस्तवकथने च
पंचपंचाशदुत्तरशततमोध्यायः[२७] ⊙

सनत्कुमार उवाच

एवं स्तुतस्स भगवान् ब्रह्मणायुग्मलोचनः ।
उवाच देवाँस्तान् सर्वान् ब्रह्मणा सहिताँस्तदा ।।१।।
प्रीतोस्मि त्रिबुधा यात नाशितो देवकण्टकः ।
किमन्यत् करवाण्यद्य[१] प्रियं वो वरतानघाः ।।२।।
इत्युक्ता देवदेवेन देवाः सर्वे बभाषिरे[२] ,
स्तुवन्तः प्रह्वमूर्धानो देवेशं हृष्टमानसाः ।।३।।
त्वमेव देव सर्वेषामस्माकं शरणं परम् ।
त्वं पिता[३] सर्वलोकानां त्वयायं नाशितोन्धकः ।।४।।
इत्युक्त्वा विबुधास्सर्वे प्रणिपत्य च शङ्करम् ।
ब्रह्मणा सहिता जग्मुर्यथास्थानं मुदा युताः ।।५।।
ततो गणानपीशानो युद्ध - - कृतश्रमान् ।
अर्चयित्वा यथावद्धि विससर्ज महामनाः[४] ।।६।।

सनत्कुमार उवाच

एवं तमन्धकं जित्वा कृत्वा च गणनायकम् ।
विसृज्य च सुरान् देवो विजहार सुरार्तिहा ।।७।।
इमं यो ह्यन्धकवधं पठेत द्विजसंसदि ।
ब्राह्मणो लभते - -- यो रक्षां न संशयः ।।८।।

२६ स्तवमिदममलार्थं - ख. । २७ २०४ - ख. ।

१ किमन्य द्वाकरोम्यद्य - ख. । २ बभासिरे - ख. । ३ पितुः - ख. । ४ महात्मनाम् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शरीर - - - योगं - रूपं धर्म विन्दति ।
यच्छ्रुत्वा गाणपत्येन युज्यते देहपर्यये ।

⊙ इति स्कन्दपुराणे गणयुद्धे दैवतवरकीर्तने षट् पञ्चाशदुत्तरशततमोध्यायः[५] ⊙

व्यास उवाच

अनुगृह्यान्धकं देवो विसृज्य सगणान् सुरान् ।
चराचरेशो यच्चक्रे तन्ममाचक्ष्व तत्त्वतः ।।१।।

सनत्कुमार उवाच

दिवं देवेषु यातेषु गणपे चान्धके कृते ।
देवेशोन्धकनन्दिभ्यां सहदेव्या - - - - ।।२।।
चिरस्य चन्द्रमौलिस्तु प्रमथाधिपतिर्गृहान् ।
प्रविश्य रञ्जयामास - - म्मेरुगृहानिव ।।३।।
सोमां सोमानुवदनां सोमार्धतिलको हरः ।
- - - - - - - - - - - - - - - - - - ।
सखीनां दृश्यते मध्ये ताराणामिव रोहिणी ।।४।।
दृष्ट्वा देव्यपि देवेशमुपायातं[१] वृषध्वजम् ।
उत्तस्थावासनात्तूर्णं सखीभिः[२] सहिता तदा ।।५।।
शिरस्यञ्जलि[३]माधाय पद्मकुड्मलसन्निभम् ।
ववन्दे चरणौ तस्य प्रीयमाणेन चेतसा ।।६।।
देवोपि तां समुत्थाप्य तयैव सहितः प्रभुः ।
निषसादासने रत्नमयूखपरिपिञ्जरे ।।७।।
अन्धकञ्च जितं युद्धे देव्याः प्रियचिकीर्षया ।
शङ्करः कथयामास पुनश्च प्रवरीकृतम् ।।८।।
अन्धकोयं तव सुतो ममैव नयनोद्भवः ।
आसुरं त्याजितो भावं त्वामवज्ञातवान्[४] हि यः ।।९।।

---

५ २०५ - ख. ।
१ ...मुपयातं - ग. । २ सखिभिः... । ३ ...मादाय - ख. । ४ तामवज्ञातवान् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

इत्युक्तवति देवेशे शङ्करेन्धकदानवः ।
प्रणतः प्राञ्जलिर्भूत्वा व्यज्ञापयत[५] पार्वतीम् ॥१०॥
देव्यन्धकोहं देवेन प्रकृतानुग्रहः शुभे ।
तव प्रेष्यत्वमायातः पश्य मां सौम्यचक्षुषा ॥११॥
अम्ब तन्मे व्यतिक्रान्तं यन्मे दानवजं तव(?)।
देवेनानुगृहीतोहं तव हासश्च[६] किङ्करः ॥१२॥
क्षान्तं दान्तञ्च भक्तञ्च त्वदाश्रयपरायणम् ।
विद्धि मामम्ब शुद्धेन भावेन समवस्थितम् ॥१३॥
इत्येवमुक्त्वा गिरिजां ग्रिरिकूटनिभोन्धकः ।
वाग्भिराहवनीयाभिरस्तुवत् प्राञ्जलिर्नतः ॥१४॥
विभावरी[७] वारिचरी शर्वरी शर्ववल्लभा ।
धृतिर्मतिस्तथा कीर्तिर्दीप्तिः प्राप्तिः प्रमोहिनी ॥१५॥
मेधा सुधा तथा साध्वी स्वधा स्वाहा महाद्युतिः ।
पुष्टिरिष्टिस्तथा तुष्टिर्गृष्टिर्दृष्टिस्त्रुटिस्तडित् ॥१६॥
स्मृतिः प्रीतिः स्पृहा हानिर्वाणी ग्लानिर्दया क्रिया ।
लक्ष्मीः श्रीः सन्नतिः श्रद्धा माया मायाधरार्चिता ॥१७॥
अदितिर्दितिस्तथा कद्रूः सिंहिका सुरसा[८] दनुः[९] ।
राका कुहूः सिनीवाली चर्षणी[१०] सुखदायिनी[११] ॥१८॥
दीक्षा दक्षावरा रक्षा शिक्षा कक्षनिकेतना ।
सुगन्धा[१२] सुभगा भव्या भूतभव्यभवत्करी[१३] ॥१९॥
धरणी धारणी धन्या वीरणी वै गुहारणी ।
- ला गोला तथा चैव मङ्गलाविधा - तथा ॥२०॥
- रोवृता सता - श्च - - सक्षत्रनन्दिनी (?) ।
नक्षत्रचित्रा द्यौः पृथ्वी क्रिया स्मृतिरलोलुपा ॥२१॥

---

५ विज्ञापयत - ख. । ६ ह्यासश्च (?), दास (?) । ७ विभावरि - ख. । ८ सरमा - ख. ।
९ कुः - ख. । १० वर्पणी - क. । ११ शुभदायिनी - क. । १२ सुसज्जा - ख. । १३ भवङ्करी (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शुद्धा[१४] शुद्धिः सुधीः कीर्तिः कृत्तिवासोधरप्रिया ।
धनुर्ज्या जयिनी पूज्या ईज्या व्रज्या जयप्रदा ॥२२॥
वरावरेण्या वरदा वरनारी[१५] वचोरणिः[१६] ।
भूतिर्भूताधिजननी[१७] सुकृतिः[१८] सुमना रतिः ॥२३॥
भारती भासमायुक्ता युक्तरक्तवचोधरी ।
आज्ञा प्रज्ञा तथा संज्ञा उल्का नासासमुद्भवा ।
वेदमाता[१९]थ गायत्री दुर्गा सावित्र्यथापि च ॥२४॥
धर्म्मिणी धर्मजननी तेजनी तेजसां वरा ।
रजनी रञ्जनी धीरा योनिर्वनजलोचना ॥२५॥
श्रर्दथिनी[२०] दनुनदी श्रुतार्धा[२१] श्रुतवत्तरा ।
बलयालातकधरा[२२] मेखला मेखलाधरा ॥२६॥
प्रीयतां मे जगद्धात्री श्यामा श्यामाम्बरा[२३] ह्युमा ।
इत्येवमन्धकेनेशा स्तुता स्तुतिशतस्तुता ॥२७॥
अन्धकस्य तुतोषाति तुष्टा चेदमुवाच तम् ।
प्रीतास्मि पुत्र यत् प्राप्तं गाणपत्यं त्वया शुभम् ।
प्रियोधुना वरस्तूर्णं व्रियतां[२४] प्रवरोत्तम ॥२८॥

सनत्कुमार उवाच

भवानीं[२५] वरदां दृष्ट्वा सोन्धको गणपोत्तमः ।
प्रणतः प्राञ्जलिः प्राह हिमवत्तनयामुमाम् ॥२९॥
यश्च त्वं मे[२६] वरं देवि ददासीशानबल्लभे ।
मम तेन समस्तेन त्वयि भक्तिः स्थिरा भवेत् ॥३०॥
तस्य तद्वचनं श्रुत्वा भगवत्यपराजिता ।
उवाचान्धकमासाद्य[२७] प्रीयमाणा पुनस्तदा ॥३१॥
ज्ञानेनानेन तुष्टास्मि तव पुत्र शुभेन वै ।
यन्मत्तोर्थितवानद्य त्वं भक्तिं प्रवरेश्वर[२८] ॥३२॥

---

१४ श्रद्धा ?) । १५ नरनारी - क. । १६ रणी - क. ख. । १७ भूनाभूताधिजननी - ख. ।
१८ सुगतिः - ख. । १९ वेदमाया - ख । २० सु(स)र्दथिनी - क. । २१ श्रुतार्थं - क. ।
२२ ...लकधारा - ख. । २३ श्यामावरा - क., श्यामाचरा - ख । २४ वृयतां - क. । २५ भावनीं - क. ।
२६ तन्मे - क. । २७ सद्यः (?) । २८ प्रवरेश्वरः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मच्छन्दादेव चाप्येतद् गाणपत्यं तवानघ ।
दत्तं देवाधिदेवेन तेन चास्मि सुतोषिता ॥३३॥
तस्माच्चादित्यपाकात्तो [२९] सुयुद्धेन च पुत्रक ।
पापव्ययो महानासीत् तेनासि प्रवरीकृतः[३०] ॥३४॥
अमरो जरया त्यक्तो बली बलवतामपि ।
तपस्वी ह्यक्षयो जेता नन्दिवत्त्वं भविष्यसि ॥३५॥
मम देवस्य चापीष्टःकिङ्करो मम चाप्यथ ।
भव[३१] त्वमनघः श्रीमान् गणेश्वरगणेश्वरः ॥३६॥
ये च त्वां[३२] कीर्त्तयिष्यन्ति दिवा रात्रावथापि[३३] वा ।
तेषां कीर्त्तिर्यशः स्वर्गो धर्मश्चैव भविष्यति ॥३७॥
स त्वेवमुक्तः[३४] पार्वत्या अन्धकोऽर्चितमानितः ।
अनुज्ञातश्च पार्वत्या मुमुदे हरपार्श्वगः ॥३८॥
इत्येवमन्धकं देवस्तमोरिक्तमूषणः ।
अनुगृह्य गिरौ तस्मिन् विजहार यथासुखम्[३५] ॥३९॥

⊙ इति स्कन्दपुराणे अन्धकवरप्रदानं नाम सप्तपञ्चाशदुत्तरशततमोध्यायः[३६] ⊙

व्यास उवाच

अन्धकं गणपं कृत्वा देव्या सह महेश्वरः ।
किं चक्रे तः[१] परं ब्रूहि नुद कौतूहलं मम ॥१॥

सनत्कुमार उवाच

जित्वान्धकं ततो व्यास कृत्वा च गणनायकम् ।
गिरीन्द्रसुतया सार्धं विजहार सुरार्त्तिहा ॥२॥

---

२९ ...च्चादित्यपाकान्ते ? - क. । ३० प्रचरीकृतः - क. । ३१ मम - ख. । ३२ त्वा - ख. । ३३ रात्रौ तथापि - ख. । ३४ एवमुक्तः - ख. । ३५ रराम च - ख. । ३६ २०६ - ख. ।
१ नः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ भूतेशजनानी षडाननतनूकरी[२] ।
अपृच्छत् पुत्रसम्बद्धं प्रश्नं प्रश्नविदां वरा ॥३॥
किमर्थं गीयते देव गाथेयं सद्भिरुत्तमा ।
वरं भूमिरुहाः[३] पञ्च [४] न च कोष्ठरुहा दश ॥४॥
षोडशेहाङ्गमङ्गानि भित्त्वा पुत्रोभिजायते ।
तस्मात्पुत्रात् कथं श्रेष्ठः कोष्ठजाद् भुविजः[५] सुतः ॥५॥
इत्येवं वृच्छतीं पृच्छां शिक्षां दीक्षां क्रियां[६] मतिम्[७] ।
उमामनुपमां देव इदं वचनमब्रवीत् ॥६॥
सूक्ष्मार्थ एष रम्भोरु यं पृच्छसि वरानने ।
अहं ते तं[८] प्रवक्ष्यामि शैलेन्द्रतनयेव्यये ॥७॥
कोष्ठजात्तनयाद्यस्माद् भूमिजस्तनयो वरः[९] ।
शाल्मलौ वैतरण्यां च असिपत्रवनेषु च ॥८॥
कुम्भीपाके रौरवे च महारौरव एव च ।
एवमाद्येषु चान्येषु कुकृतैरनुवेष्टितान्[१०] ।
शास्यतो मृत्युवचनाद्राक्षसैः क्रूरकर्मभिः ॥९॥
पितॄँस्तथाशुभै[११]र्घोरैर्वेष्टितान् राक्षासार्दितान् ।
सत्पुत्रस्त्रायते देवि नेतरः पापनिश्चयः ॥१०॥
नरस्य न च[१२] सत्पुत्राः सर्व एव भवन्त्युत ।
एक एवात्र भवति यः पितॄँस्त्रायते भयात् ॥११॥
तत्र ये दुष्टचारित्राः पुत्रसंख्यां[१३] न ते गताः ।
शठो यद्वद्बलीवर्दः षण्ढो वापि नराधिपः[१४] ॥१२॥
तत्रापि चोद्यते[१५] दुःखं दुःखं च नरकं विदुः ।
यत्[१६] पितॄँस्त्रायते तस्मात्[१७] सुतः पुत्रस्ततः स्मृतः ॥१३॥

२... रा - ख. । ३ भूमिरुहा - क., ...हां - क. । ४ तश्च - क. । ५ भूमिजः (?) । ६ शिक्षाक्रियां - ख. ।
७ पतिम् - ख., मतीं - क । ८ तत् - ख. । ९... व्यये - ख. । १०... ताः - क. । ११ सुरै - ख. -
१२ नरकस्य न - ख. । १३ संज्ञां (?) । १४ नराधमः (?) । १५ ...व्यति चोम्युच्यते (?) - ख. ।
१६ यः - क, ख. । १७ यस्मात् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नान्यः सम्बद्धको देवि पितुः पुत्रस्य चोभयोः ।
पाति पुत्रं पिता तस्मात् पुत्रो यत् त्रायते भयात् ॥१४॥
इन्द्रियाणां तु प्राबल्यात् तत् पुत्रेष्वपि[१८] पार्वति ।
पापकान्यपि कुर्वन्ति[१९] तेसत्पुत्रा भवन्त्युत ॥१५॥
इमे हि तरवो देवि दक्षशापाद् हृतेन्द्रियाः ।
पापकानि न कुर्वन्ति संवृतैः करणैश्च ह ॥१६॥
एतस्मात् कारणाद् देवि कोष्ठजानां शतादपि ।
एको भूमिरुहः पुत्रः शस्यते न तु कोष्ठजः ॥१७॥
छेदं भेदं तथा त्रासं पाटनञ्च निशाचरैः ।
कुर्वद्भिस्तरवः पुत्राः पितॄणां - - - - f - - ॥१८॥

उमोवाच

छेदं भेदं त्रासनं च राक्षसैर्निरयोपगैः ।
कथं पितॄणां तरवो वारयन्ति यमक्षये ॥१९॥

देवदेव उवाच

शृणुष्व छेदं भेदं च पितॄणां यमसादने ।
यथा वं[२०] पारयन्त्येते[२१] तरवो नागनन्दिनि ॥२०॥
एते निरुद्यमा देवि विहीनाः करणैरुत ।
यज्ञेर्थितास्ते देवानां तरवो - - - - - - ॥२१॥
- - - - - - - - - - - - - - - - - - - ।
दक्षशापेन भगवन् वयं ह्युपहतेन्द्रियाः ॥२२॥
तमोबाहुल्यतां प्राप्ता निष्क्रियानिष्परिक्रमाः ।
असुखाः करणैर्हीना महता तमसावृताः ॥२३॥
एतां दशामनुप्रप्ता धर्मयुक्तान् कुरुष्व नः ।
इत्येषां वचनं श्रुत्वा देवः सलिलसम्भवः ॥२४॥

१८ तत् - क ,...द् येषु त्रिष्वपि - ख. । १९ कुर्वन्तः - (?) । २० यथैवं (व) - क. । २१ तारयन्त्येते - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यज्ञवृक्षार्थमाहेदं वृक्षान् वृक्षपतिर्वचः ।
स्थावराः स्वागतं वोस्तु तुष्यामि शरणैषिणाम् ।
नाशयाम्येष वो वत्सा दक्षशापकृतं तमः ॥२५॥
शाला विल्वाः पलाशाश्च वरुणा:[२२] किंशुकास्तथा ।
रोहीतकाश्च ये चान्ये यज्ञांगप्रभवा द्रुमाः ॥२६॥
ते सूपयुक्ता यज्ञेषु त्वक्पत्रफलशाखिनः ।
मूर्त्ताः सुभास्वराः प्राप्य मम लोके निवत्स्यथ[२३] ॥२७॥
एषां यज्ञियवृक्षाणां[२४] यूयमप्यनुगामिनः ।
यज्ञोपयुक्ता गच्छध्वं तेषामेव सलोकताम् ॥२८॥
स्थाणुलिङ्गोपयुक्ताश्च[२५] जनैर्भक्तिपुरस्सरैः ।
धर्मेण शुद्धदेहाश्च गतिमिष्टामवाप्स्यथ[२६] ॥२९॥
उपयोगं च गच्छन्तो यज्ञायतनवस्तुषु[२७] ।
दक्षशापतमोमुक्ता मम लोके चरिष्यथ ॥३०॥
पुत्रहीनो नरो यश्च[२८] पुत्रकान्वः[२९] करिष्यति ।
तं भयात्[३०] त्रायतां चैव धर्मो वो भविता महान् ॥३१॥

तरव ऊचुः

कथं वयं पुत्रकृतास्तान्[३१] पितॄन्निरयोपगान् ।
- - - - - - - - - - - - - - - - - - ॥३२॥
सोमविक्रयिणो ये च ये च विश्वस्तघातिनः ।
ये च प्राणिवधे युक्ताः पृष्ठमांसाशिनश्च ये ॥३३॥
राज्ञामाक्रोशका ये च ये च पिण्डापहारकाः ।
एते[३२] स्वकर्मभिर्घोरैर्वेष्टिता लोमहर्षणैः ॥३४॥
पच्यन्ते निरये घोरे क्रोशन्तो भैरवान् रवान् ।
अहो भृशं[३३] यातनाभिरशिवाभिरभिद्रुताः ॥३५॥

---

२२ तरुणाः - ख. । २३ निवत्स्यत - क, निवृक्ष्यथः - ख. । २४ याज्ञिय - ख., याज्ञिकवृक्षाणां - क. ।
२५ शृणु लिङ्गप्रयुक्ताश्च - क. । २६ गमि... - क. । २७ वास्तुषु (?) । २८ यच्च - ख. ।
२९ पुत्रकार्थं - क ख. । ३० तद्भूयात् - क ख. । ३१ पुत्रकृतान् स्तान् - क., तान्स्वान् - ख.,... तस्तान् (?) ।
३२ ये ते (?) । ३३ नृशम्स - क. ख ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शास्यन्ते मृत्युवचनाद्राक्षसैर्भीमविक्रमैः ।
तानेवं तुद्यमानांश्च कुट्यमानांश्च राक्षसैः ।
पितॄन्निरयसंमग्नानुद्धरिष्यामहे कथम् ॥३६॥

ब्रह्मोवाच

ताँस्तथा[३४] तुद्यमानांश्च कुट्यमानाँश्च राक्षसैः ॥ ।
पितॄन्निरय संमग्नान् यूयमभ्युद्धरिष्यथ ॥३७॥
निरयस्थान् यथा चैतान् पितॄन् निस्तारयिष्यथ[३५] ।
तन्मे सुमनसो भूत्वा निशामयत पादपाः ॥३८॥
पुत्रप्रकृतका यूयं यस्य यस्य भविष्यथ ।
तस्य तस्य स्मृताः[३६] शीघ्रं तं देशं यास्यथानघाः[३७] ॥३९॥
- - - निरयप्राप्तान् पितॄन् क्लेशैरुपद्रुतान् ।
सुखाय धास्यथ यथा स्थाबरा स्तन्निबोधत[३८] ॥४०॥
मन्त्रवद् विधितश्चैव[३९] यो वः संस्कारमन्तशः ।
गर्भाधानादिभिः कृत्वा पुत्रत्वे कल्पयेन्नरः । ॥४१॥
ये चापि[४०]पूर्वजातान् यो विधिना[४१] निष्परिग्रहान् ।
पुत्रप्रकृतकान् कुर्य्युस्ताँश्च निस्तारयिष्यथ ॥४२॥
सर्वकामाँश्च दास्यध्वं सुखञ्चैव तथोत्तमम् ।
कर्मक्षयं च सर्वेषां लोकाँश्चैव तथाक्षयान्[४२] ॥४३॥

सनत्कुमार उवाच

ततः शैलसुता भूयोपृच्छत्तद्विधिमुत्तमम्[४३] ।
तां पृच्छतीं महादेव इदं वचनमब्रवीत् ॥४४॥
देवि नागेन्द्रनासोरु नागेन्द्रगतिगामिनि ।
शृणुष्व येन विधिना गृह्यतेवनिजः सुतः ॥४५॥

---

३४ तानेवं (?) । ३५ स्ताँस्तारयिष्यथ - ख. । ३६ मृताः - ख. । ३७ ..तानघाः - क. । ३८ स्तान्निबोधत - क. ख. । ३९ विधितच्चैव - ख. । ४० वापि - ख. । ४१ विविधां - क. । ४२ ...क्षयम् - क. । ४३ अपृच्छद्विधिमुत्तमम् - क. ख. । ४४ च निज. - क ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

श्वो भूतेहं[४५] भुविरहं ग्रहीष्यामीति[४६] पार्वति ।
सोपवासा भवेन्नारी शुचिशीला शुचिव्रता ।।४६।।
ततः शतसहस्रांशावस्तश्रृङ्गं गते रवौ ।
उदिते विमले चापि चन्द्रे चन्द्रनिभानने ।।४७।।
आपद्भावेन सुभगे परेण परमात्मिके ।
विप्रानामन्त्रयेद्रात्रौ पावनान् वेदवादिनः ।।४८।।
श्रुतीनामाकरा ह्येते रत्नानामिव सागराः ।
विप्रा विप्राधिपमुखि पूजनीयाः सहस्रशः ।।४९।।
यत्र मन्त्रविदो विप्रा न प्राश्नन्त्युत्तमं हविः ।
न तत्र देवा[४७] देवेशे हविर्भुञ्जन्ति कर्हिचित् ।।५०।।
न स्कन्दते न व्यथते नैनमाक्रमते[४८] तमः ।
वरिष्ठमेतद्दानानां यद् ब्राह्मणमुखे हुतम् ।।५१।।
ब्रह्मणत्वे[४९] (?) महासत्वे अणधातुस्तु भक्षणे ।
ब्रह्म भक्षयते यस्माद् ब्राह्मणस्तेन स स्मृतः ।।५२।।
जायन्ते ये पुनर्जाता ह्युपनीता महात्मभिः ।
ततो देवि द्विजाख्येयं तेषु नित्यं निपात्यते ।।५३।।
वियदित्युच्यते व्योम प्रकारः[५०] प्रापणे स्मृतः ।
दिवं संप्रापयन्त्येते देवि[५१] विप्रास्ततःस्मृता ।।५४।।
सत्य[५२]सारमया ह्येते[५३] विप्राः सृष्टाः स्वयंभुवा ।
सिद्धिर्न तेष्वतुष्टेषु[५४] शक्या प्राप्तुं सुरैरपि ।।५५।।
अहं नारायणोनन्तो ब्रह्मा शक्रोनिलः शिखी[५५] ।
तद्दानं नाभिनन्दामो विप्रा यत्र[५६] न पूजिताः ।।५६।।
येषां प्रसादात् सुलभा आयुर्धर्मो बलं सुखम् ।
श्रीर्यशः स्वर्गवासश्च तान्[५७] विप्रानर्चयेद् बुधः ।।५७।।

---

४५ श्वो हि भूते - क. । ४६ गृहीष्यामीति - क., ग्रहि... - ख. । ४७ देव - ख. । ४८ नैतमाक्रमन्ते - क. ख. । ४९ ब्राह्मणत्वे - क. ख., महाहव्ये (?) । ५० पकारः - क. । ५१ दिवि - क. ख. । ५२ साव्य (ध्य) - ख. । ५३ सागर याह्येते - क. । ५४ सिद्धिर्नै तेष्वतुष्टेपु - ख. । ५५ ...स्विति (?) । ५६ येन (?) - क. । ५७ तद् - क. । क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विप्रानामन्त्रयित्वाथ[५८] शुचिवस्त्रा शुचिस्मिता ।
शयीत सनमस्कारा सदर्भा[५९] भूमिमाश्रिता ॥५८॥
गमयित्वा ततो रात्रिं सवितर्युत्थितेपि[६०] च ।
भक्ष्यंभोज्यं समादाय व्रजेत् यत्र भवेत्तरुः ॥५९॥
ततस्तं सपताकं च सातपत्रं सभूषणम् ।
तरुकं प्रमदा[६१] कृत्वा तरुच्छायानुगामिनी ॥६०॥
यथोपपन्नमन्नं तु भोजयित्वा द्विजोत्तमान् ।
पुण्याहं कारयित्वाथ ऋत्विजा ह्यथवात्मना[६२] ॥६१॥
तृप्तानां ब्राह्मणानां च तत्त्वेनाकूत[६३]मात्मनः ।
निवेद्य परमुद्दिश्य सद्भावेन परेण ह ॥६२॥
अपुत्रा भगवन्तोहं[६४] पुत्रप्रकृतकं[६५] तरुम् ।
ग्रहीष्ये तदनुज्ञां वै कर्तु[६६]मर्हथ मेनघाः ॥६३॥
ततस्तैरभ्यनुज्ञातं तं तरु तरुणं प्रिये ।
भूमिदेवसमक्षं वै गृह्णीयात्तनयं प्रिये ॥६४॥
अनेन विधिना देवि गृहीतस्तरुकः सुतः ।
पितृणां निरयस्थानां मधु सोमञ्च वर्षति ॥६५॥
गृहीतो विधिनानेन सुभ्रु भूमिरुहात्मजः ।
शुभे[६७] सुखाय भवति विपरीतेन दुःखदः ॥६६॥
सत्पुत्राणां[६८] शताच्चापि देवि चन्द्रनिभानने ।
एको भूमिरुहः[६९] श्रेष्ठः पुत्रत्वे कल्पितः सुतः ॥६७॥
इत्येतत्ते मया शिष्टं[७०] श्रिष्टम्लिष्ट[७१] वचोरणि ।
यथा भूमिरुहः पुत्रो विशिष्टः कोष्ठजात् सुतात् ॥६८॥
ततः पुनर्देवदेवी[७२] प्रणिपत्य महेश्वरम् ।
प्रणयात् कौतुकाच्चैव इदं वचनमब्रवीत् ॥६९॥

---

५८ तु - ख. । ५९ सदर्पा - ख. । ६० सवितर्युदितेपि (?) । ६१ प्रयता (?) । ६२ विप्रान्भोज्याथंनात्मना - घ । ६३ तत्तेनाक्षत - घ । ६४ हुङ्हिभगवन् तेहं - क. ख. । ६५ पुत्रत्वेकृतकं - क. । ६६ वै दातु (?) । ६७ सुभगे - क ख. घ. । ६८ सपुत्राणां - ख. । ६९ एकोपि भूमिजः - ख. । ७० श्लिष्टं - ख. । ७१ मृष्ट - ख. । ७२ ततो देवी पुनर्देवं - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रोषिते त्वयि देवेश भ्रमन्त्या मन्दरे मया[७३] ।
अशोकतरुको दृष्टः कोमलः सुमनोरमः ॥७०॥
आसीच्च मे तदा भाव एष मे तरुपोतकः ।
भविष्यति सुतो रुद्रे निर्विघ्नं[७४] पुनरागते ॥७१॥
आभ्यां च मे महादेव कुचाभ्यां द्विजपावन[७५] ।
क्षीरमागात् सुधासारं पुत्रस्नेहात् सुखप्रदम्[७६] ॥७२॥
तमहं देव गृहणीयां पुत्रप्रकृतकं तरुम् ।
यदि मे कुरुषेनुज्ञां तवाहं वशवर्तिनी ॥७३॥
देवैः पुत्रफले क्षिप्ते स हि मे तरुपोतकः ।
तुष्टिप्रदो ह्यपुत्रायाः पुत्रको भवितानघ[७७] ॥७४॥
इत्येवं भाषमाणान्तु भवानीं[७८] भगवान्[७९] भवः ।
सद्भावान्निःसृतं[८०] वाक्यमवदत् परतापनः ॥७५॥
देवि फुल्लारविन्दाक्षि कथं नाम न ते सुतः ।
भविष्यति तपस्विन्या ऐश्वर्यपरमे[८१] मया[८२] ॥७६॥
शक्ता जनयितुं पुत्रान् तपसा त्वमनिन्दिते ।
अहं च ते प्रदास्यामि पुत्रान् परमशोभनान् ॥७७॥
अथवायमनुग्राह्यस्तवाशोकतरुः प्रिये ।
अनुज्ञाता मया देवि कुर्वशोकतरुं सुतम् ॥७८॥
अनुकूलं पतिं ज्ञात्वा तं तामरसलोचना ।
प्रणिपत्याव्यया[८३] तुष्टा[८४] इदमाह महेश्वरम् ॥७९॥
देव जानाम्यहं धर्मं यथा स्त्रीणां न विद्यते ।
दैवतं पतिमुत्सृज्य पूजनीयं हि यद् भवेत् ॥८०॥
अनामन्त्र्य हि भर्त्तारं यद्ददाति यदर्चति ।
न फलं विन्दते तस्य नारी इत्येव नः श्रुतम् ॥८१॥

---

७३ यथा - क. । ७४ निर्विघ्ने - ख. । ७५ पावनः - क. । ७६ सुखप्रदः - क. । ७७ ... नघः - ख. । ७८ भावनीं - क. । ७९ भवतां - ख. । ८० ...न्निसृतं - क. ख. । ८१ .. मैश्वर्यपरमे - ख. । ८२ यया - क., त्वया - ख., स्वयं (?) । ८३ ... भ्यया - ख । ८४ ... त्तुष्टा - ख ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

या तु भर्तारमामन्त्य नारी धर्मं समाचरेत् ।
तस्या देवाश्च तुष्यन्ति धर्मश्च सुमहान् विभो ॥८२॥
अवमन्य तु या नारी भर्तारं दैवतं गुरुम् ।
स्वबुद्ध्या कुरुते पुण्यं निरयं सा प्रपद्यते ॥८३॥
अतीतमपि या नारी भर्तारं परिपृच्छति ।
अनुमान्य यथावद्धि जीवन्तमिव शोभना ॥८४॥
अनुज्ञाता हि सा तेन प्रीयमाणेन चेतसा ।
धर्मकृत्येषु देवेश फलं प्राप्नोति पुष्कलम् ॥८५॥
तपोपवासो दानं च आर्जवं सत्यमेव च ।
पतिशुश्रूषणस्यैते कलां नार्घन्ति[८५] षोडशीम् ॥८६॥
या ह्यन्यनरलोलापि[८६] सद्भावाच्छयनासने ।
शुश्रूषां कुरुते भर्तुः सा सत्येव[८७] विभाव्यते ॥८७॥
इत्येवं गिरितनया गिरीशमुक्त्वा गिर्यग्रे गिरितरुपुष्पपुञ्जचित्रे ।
तेनाग्र्या सह विचचार चारुरूपा भानोर्भा इव सह[८८] भानुना भवानी ॥८८॥
इति तौ सुरपूजितावपरस्परपूजितौ ।
सहितौ प्रविचेरतुः प्रवरेश्वरवन्दितौ ॥८९॥

⊙ इति स्कन्दपुराणे भूमिजपुत्रवर्णने अष्टपंचाशदुत्तरशततमोध्यायः[८९] । ⊙

सनत्कुमार उवाच

पार्वत्या निश्चयं ज्ञात्वा भगवान् त्र्यम्बकस्तदा[१] ।
सुमालि[२] पिङ्गलं यक्षं प्राह वाक्यविदां वरः ॥१॥
भक्तिमन्तं[३] महायोगं पुरा लब्धवरं गणम् ।
पार्श्वस्थं नन्दिनं[४] तत्र[५] भगवान् शङ्करः स्वयम्[६] ॥२॥

---

८५ नार्हन्ति (?) । ८६ ह्यन्यतरलोलापि - क., द्यतर ... - ख., .. लोकापि - घ. । ८७ तस्यैव - ख. ।
८८ ...स्सह इव - क. ख. । ८९ २०७ - ख., १४८ - घ. ।
१ ...स्तथा - ख. । २ सुमालं - क. । ३ भक्तिवन्तं - क. । ४ दयितं - घ. । ५ .. न्तत्र - क. । ६ भगवान-ब्रवीदिदम् ? - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पर्वतेन्द्रसुताशोकं तरुं पुत्रं ग्रहीष्यति ।
त्वय्यायत्तं च तत्सर्वं तस्मात् कुरु ममाज्ञया ॥३॥
यत्राशोकतरुस्तत्र यथान्नमुपलक्षितम्[७] ।
भवेत् सुप्रचुरं वीर तथा कुरु[८] गणेश्वर ॥४॥
प्रदेशश्च गिरेस्तस्य यथा रम्यो भविष्यति ।
तथा विधत्स्व यक्षेन्द्र यत्राशोकतरुः स्थितः ॥५॥
इत्युक्तः परमेशेन पिङ्गलः पिङ्गलेक्षणः ।
उवाच सोमया सार्धं त्रिदशानां पतिं पतिम् ॥६॥
गणाधिप यथाज्ञप्तं तत् करिष्यामि यज्ञहन् ।
यथा सोमः स नन्दी च प्रसन्नो मे भविष्यति[९] ॥७॥
इत्युक्त्वा सोभ्यनुज्ञातो यक्षो लोकान्नदस्तदा ।
तस्याशोकतरोः पार्श्वे विदधावन्नमुत्तमम् ॥८॥
सुमालावथ निष्क्रान्ते सिंहक्रोधस्त्रिलोचनः ।
नन्दिनं तेजसां राशिंदण्डि[१०]चण्डेश्वरोब्रवीत्[११] ॥९॥
ब्रह्मण्यान्[१२] ब्रह्मणान्[१३] नन्दिन् देवी यज्ञेन यक्ष्यति[१४] ।
श्वः प्रभाते महाबुद्धे तत्र विप्रैः प्रयोजनम् ॥१०॥
स त्वं मत्प्रहितो देव[१५] यत्र यत्र[१६] वदाम्यहम् ।
तत्र तत्र गतो विप्रान् निमन्त्र्यय पदत्रये ॥११॥
औदकायां विरूपास्य[१७]ब्राह्मणा ब्रह्मसंभवाः[१८] ।
उपासते ये वरुणं[१९] पातालतलसंश्रयाः ॥१२॥
ये सुरेव्यासुराद्याश्च[२०] रसावयवमुत्तमम्[२१] ।
पिबन्ति फेनपा नाम तान्निमन्त्रय मा चिरम् ॥१३॥
संयमन्यां तथा चैव[२२] ये यमं पर्युपासते ।
ब्राह्मणा ब्रह्मणा तुल्या[२३]स्तान्निमन्त्रय भूतप ॥१४॥

---

७ यथार्थमुपलक्षितम् - घ. । ८ तथार्घन्तु - घ. । ९ भविष्यसि - घ. ।... १० दन्तिं - घ. । ११ दण्डेश्वरोब्रवीत् - घ । १२ ब्राह्मण्या - क. टि । १३ ...न्ब्राह्मणान् - क. । १४ यं भोजयिष्यति - घ. । १५ प्रहितः शीघ्रं - घ. । १६ तत्र - क. । १७ वरुणस्य - घ. । १८ संगताः - क., सत्तमाः - घ. । १९ वरुणं ये ह्युपासन्ति - क. । २० सुरभ्याः सुराद्यश्च (?) । २१ रसायनवरं शुभम् - घ. । २२ देव - ख. । २३ ब्रह्मणस्तुल्था - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तथोदयगिरेः शृङ्गे सत्यो नाम महाह्रदः ।
राजहंसानुचरितः कान्ततामरसावृतः ॥१५॥
वसन्ति यत्र ते सत्याः[२४] सत्यानाम तपोधनाः ।
सत्येन येषामादित्यो दिनं नयति नित्यशः ॥१६॥
तेषां निष्कल्मषस्तस्मिन् ह्रदे स्नातो दिवाकरः ।
प्रत्यहं कुरुते देवः प्रयाणं[२५] शुभकर्मकृत् ॥१७॥
तेषां प्रणम्य शिरसा ह्यात्मानं सन्निवेद्य च ।
सद्भावं दर्शयन्नग्रे नन्दीश्वर निमन्त्रय ॥१८॥
ये चादित्यरथं शश्वत् परिवार्य व्रजन्त्युत ।
अथर्वाङ्गिरसस्तांश्च[२६] निमन्त्रय गण द्विजान् ॥१९॥
ये च चक्रवराः सिद्धा ये कपोतोञ्छवृत्तयः ।
उपासते ये च शक्रं[२७] तानामन्त्रय वै द्विजान् ॥२०॥
ततो ब्रह्मसदो[२८] गत्वा ब्रह्मण्यान्[२९] ब्रह्मणः प्रियान् ।
ब्रह्माणं च सपत्नीकं ब्राह्मणांश्च निमन्त्रय ॥२१॥
क्षीरोदवेलानिलयास्तपोवननिवासिनः ।
ब्रह्मणो भवनादेत्य बालखिल्यान्[३०] निमन्त्रय ॥२२॥
ये मां सदाराः ससुताः साग्निहोत्रपरिच्छदाः ।
भक्ता येषामहं नित्यं प्रसादसुमुखोग्रणीः[३१] ॥२३॥
तान् बालखिल्यान् वागीश व्यालानिव दुरासदान् ।
आमन्त्रय यतो भूत्वा सुयशाः[३२] सुयशापते ॥२४॥
सञ्चरँश्च त्रिभुवनं वायुरव्याहतो[३३] यथा ।
यान्यतः पश्यसे विप्रान् सर्वानिव निमन्त्रय ॥२५॥
ये चापि प्रमथाः केचिद् गोचरे ते सुरारिहन् ।
ते च सर्वे समायान्तु विप्राणां परिवेशकाः[३४] ॥२६॥

---

२४ तस्याः - ख । २५ प्रण मं - क. । २६ माथर्वो ङ्गिरसस्तांश्च - घ । २७ ये च शक्रमुपासन्ते - क. । चक्र .. - (?) । २८ ब्रह्मसदं - क. । २९ ब्र(ब्रा) ह्मणाः - क. । ३० बालिखिल्यान् - क ख. । ३१ गणे - ख । ३२ सुयशः (?) । ३३ वायुरभ्याहतो - ख. । ३४ परिवेषकाः - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कपर्दिनैवमुक्तस्तु नन्दी सूर्यसमप्रभः ।
शूलं ज्वलन्तमुद्यम्य प्रययौ वरुणालयम् ॥२७॥
सागरं सोम्बराकारं साम्बरोम्बगोचरः[३५] ।
आससाद प्रवलगन्तं रङ्गस्थमिव वारणम् ॥२८॥
स तं तिमिशताकीर्णमर्णवं[३६] प्रमथाग्रणीः ।
प्रविवेश प्रदीप्तोर्कः[३७]पयोदनिचयं यथा[३८] ॥२९॥
सुतले[३९] स तु पाताले गां गजेन्द्रेन्द्रविक्रमः[४०] ।
अपश्यत् क्षरतीं क्षीरं दिव्यं तदमृताकरम् ।३०॥
सुरभीमभिवाद्यैव शङ्करानुचरोरिहा ।
विवेश नन्दी वरुणो यत्रास्ते सगणोर्चितः[४१] ॥३१॥
स दिव्यवस्त्राभरणं[४२] पुत्रपौत्रगणान्वितम्[४३] ।
अपश्यदम्बुगोप्तारमादित्यायुतसन्निभम् ॥३२॥
वरुणं द्वारपालेन पूर्वमेव निवेदितः ।
प्रविवेश तदा नन्दी वरुणस्य निवेशनम् ॥३३॥
स चाप्यपात्तदा (?) राजा दूरादेव प्रहृष्टवत् ।
दृष्ट्वा नन्दिनमुत्तस्थौ पूजयन्मन्मथार्दनम् ॥३४॥
तस्यार्घं गाञ्च पाद्यञ्च निवेद्य वरुणः स्वयम् ।
आसीनं तमपां गोप्ता पप्रच्छ वदतां वरः ॥३५॥
भगवन् किं चिरस्याद्य त्वया वयमपेक्षिताः[४४] ।
दर्शनं देवदेवस्य मन्यामस्तव[४५] दर्शनात् ॥३६॥
विवक्षोरिव ते वक्त्रमिन्द्रगोपायतेनघ ।
वद सर्वानभिप्रायान् कर्ता तेहं न संशयः ॥३७॥
वरुणेनैवमुक्तस्तु तत्परेण शिलादजः ।
ततः स वरुणं प्राह दानवैरपराजितम् ॥३८॥

---

३५ स्ता - क., सोम्बराम्बरगोचरः - घ. । ३६ . मार्णव - क. ख. । ३७ प्रदीर्णार्कः - क., प्रदीपार्चिः - घ. ।
३८...धिमयं - ख., पयोधिमिव भास्करः- घ.। ३९ सुतलं - घ.। ४० गत्वा नागेन्द्रविक्रमः- घ., गजेन्द्रेन्दुविक्रमः- क ।
४१ सगणोर्चितः - क., सगणार्चितः (?), स्वगणार्चितः (?), सगणोर्चितम् - क. । ४२ शस्त्राभरणं - क. ख. ।
४३ ...वृताम् - ख. । ४४ ...मवेक्षिताः (?), मुपे ... (?) । ४५ तव - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अशोकतरुकं पुत्रं गिरिपुत्री ग्रहीष्यति ।
क्रीडार्थमुमया सार्धं निमन्त्रयति ते हरः ॥३९॥
तद्वेव पुत्राभिवृतः सदारः सह फेनपैः ।
श्वो याहि मन्दरगिरिं प्रीतिं वर्द्धय शूलिनः ॥४०॥
इत्युक्त्वा सोभ्युनुज्ञातो वरुणेन गणेश्वरः ।
निष्क्रान्तो वरुणावासाच्छ्वेताभ्रादिव भास्करः ॥४१॥
स पूज्यमानः सिद्धैश्च[४६] चारणैश्च सुरैरपि ।
प्रापोदयगिरिं[४७] नन्दी हरेषुस्त्रिपुरं[४८] यथा ॥४२॥
सोथ तस्य गिरेः[४९] शृङ्गे रञ्जिते तापनैः करैः ।
निलिल्ये गरुडः पक्षी प्रभञ्जनपथे यथा ॥४३॥
ह्रदं तत्रार्णवाकारं काञ्चनाम्बुजशोभितम् ।
शीर्णोत्पलतरङ्गाढ्य[५०]मपश्यत्सोप्सरोवृतम् ॥४४॥
ह्रदस्य तस्य रोधस्सु साशोकेषु सहस्रशः ।
अपश्यत ऋषीन् सत्यानादित्यायुतसन्निभान् ॥४५॥
स तान् तपोधनान् दृष्ट्वा तपनाभान् तपोधनान्[५१] ।
नन्दी प्रह्वाञ्जलिपुटो ह्यासाद्यावन्दत द्विजान्[५२] ॥४६॥
ते सर्वे नियमान् हित्वा नियमस्थास्तपोधनाः ।
नन्दिनं समयुज्यन्त[५३] वासद्रुममिवाण्डजाः[५४] ॥४७॥
तैः सूर्यकिरणापीतैः पीतचीराम्बरैरपि ।
संवृतः स बभौ[५५] नन्दी जम्बुद्वीप इवाचलैः ॥४८॥
स पूज्यमानो गणपः सत्यः सत्यैस्तपोधनैः ।
अतीव प्रबभौ व्यास तीर्थेष्विव[५६] महेश्वरः ॥४९॥
ते नन्दिनं[५७] सुखासीनं सत्यं सत्यास्तपोधनाः ।
ऊचुर्हर्षाकुलैर्वाक्यै[५८]र्विस्मिताननलोचनाः[५९] ॥५०॥

---

४६ वरुणे - क । ४७ प्राप्तोदयगिरिं - क. ख. । ४८ त्रिपुरं - क. ख. । ४९ सोदयस्य गिरेः - क. । घातय - ख. । ५० शर्णोत्पलतरङ्गाक्ष्यं तल - क. ख. । ५१ तपोधन (?) । ५२ वन्दिनो द्विजान् - क, वन्द्य तान् द्विजान् - ख. । ५३ समसर्पन्त - घ. । ५४ इवाण्डजाः - क. ख. । ५५ प्रबभौ - क. । ५६ तिथिस्वि र (व) - ख. क. । ५७ तन्नन्दिनं - क. ख । ५८ ... र्हर्षकरैर्वाक्यै - ख., हर्षफलै - क. । ...र्वाह्यै - क. । ५९ ...विस्तृतानमुलोचनाः - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नन्दीश्वर चिरस्याद्य ह्यु दयो[६०] ह्यु दयप्रभः[६१] ।
समाक्रान्तस्त्वया तात धर्मेण निरयो यथा ।।५१।।
किमिहानघ देवेशस्त्रिनेत्रस्त्रिपुरार्दनः ।
विहर्तुमागतो देवो दृष्टोस्माभिस्ततो[६२] भवान् ।।५२।।
सत्यं सुचरितं शुद्धं तपोस्माभिर्गणेश्वर[६३] ।
सहोमं[६४] यत् त्वया सार्धं द्रक्ष्याम इह शङ्करम्[६५] ।।५३।।
एवं कपीन्द्रवदनो वन्दमानाँस्तपोधनान् ।
स सत्यान्[६६] सत्यवचन इदमाह[६७] शिलादजः ।।५४।।
- - -[६८] मन्दरं शैलं न कथञ्चित्त्यजेदजः ।
अहन्तु कार्यवानागां युष्माकमिममाश्रमम्[६९] ।।५५।।
अशोकतरुकं पुत्रं गिरिपुत्री ग्रहीष्यति ।
निमन्त्रयति वस्तत्र सर्वाञ्छर्वो द्विजोत्तमान् ।।५६।।
मानयन्तो भवं सर्वे साम्बमम्बार्पितं द्रुतम् ।
श्वो गच्छत तपोनित्या मन्दरं धरणीधरम् ।।५७।।
तत्र शर्वममराधिपप्रभुं तारकाधिपविभूषणं शिवम् ।
द्रक्ष्यथेशमसुरप्रमर्दनं देवतार्तिनिखिलं हरं[७१] हरम् ।।५८।।

⊙ इति स्कन्दपुराणे तरुपुत्रकग्रहणे[७२] ब्राह्मणामन्त्रणे ऊनषष्ट्युत्तरशततमोध्यायः ⊙

सनत्कुमार उवाच

आमन्त्र्य तानृषीन् सर्वान् सत्यवीर्ययशःश्रुतान् ।
नन्दी विसर्जितस्तैस्तु ययौ सूर्यरथं प्रति ।।१।।
स तं सप्तोत्तमहयं शकुन्तवरसारथिम् ।
हराज्ञया रविं देवमुपासर्पत भूतपः ।।२।।

---

६० चिरस्यास्य उदयो - क. । ६१ .. त्प्रभः - ख., .. प्रहः - क. । ६२ ... र्यतो - ग. । ३ तपोस्माकं गणेश्वर (?) । ६४ ससोमं - क. । ६५ सह - क. ख. । ६६ सुनत्यान् - क. । ६७ मिदमाह - क. । ६८ दयितं (?) । ६९ ... मिदमाश्रमम् - क. ख. । ७० द्रक्ष्यते - क. ख । ७१ ... र्मतिनिखिलं - घ. । ७२ हिवाहे - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सूर्यरश्मिसहस्रेषु तापसान् स मरीचिपान् ।
अपश्यत् स[1] सुखासीनान् छायास्विव विहङ्गमान् ।।३।।
ततः सूर्यरथं शीघ्रमुपेत्यारुणसारथिम् ।
सोंशुमालिनमत्रिञ्च अथर्वाङ्गिरसावपि[2] ।।४।।
देवानृषीन् भुजङ्गाँश्च अश्वाँश्चामन्त्रयच्छुभः[3] ।
आदित्याश्वादिभिर्नन्दी रुद्रपिप्रीषुभिस्तदा । ५।।
तथेत्युक्तोपचक्राम सूर्यवाहा[4]दथ द्रुतम् ।
देवानृषीन् भुजङ्गाँश्च तत आमन्त्र्य भूतपः ।।६।।
स वायुरिव शीघ्रस्तु गरुडो वा यथाण्डजः ।
धनेशभवनं नन्दी कैलासं समुपागतः[5] ।।७।।
स तं पाण्डरमेघाभं कुन्देन्दुरजतप्रभम् ।
पर्वतं धनदावासं पश्यमानः प्रहृष्यत[6] ।।८।।
स भूतेशो धनेशस्य गिरीशवचनङ्करः ।
आससाद नगस्याग्रे[7] भवनं काञ्चनं शुभम् ।।९।।
कैलासाग्रे सन्निविष्टं[8] कैलासाग्रसमत्विषम् ।
हर्म्यप्रासादसंपन्नं सम्पन्नमिव भासितम्[9] ।।१०।।
पाताकाभिर्ध्वजैश्चापि किङ्किणीजालमालिभिः[10] ।
हासैश्च पुरघोषाणां सन्नादितमहर्निशम् ।।११।।
भेर्या परमघोराणां वादित्रशतनादितम् ।
इज्याध्ययनसंपन्नास्तिष्ठन्त्यत्र[11] सभासदः ।।१२।।
भाभिर्जुष्टां सभां तस्य ततो रुद्रसभासदः[12] ।
आससाद स यत्रास्ते मुनेर्विश्रवसः[13] सुतः ।।१३।।
तमृद्ध्या परया युक्तं सेव्यमानं श्रिया तथा[14] ।
अपश्यद् धनदं नन्दी दिव्यस्त्रीगणसेवितम् ।।१४।।

१ सु - क. । २ ..सामपि - ख. । ३...च्छुभं - ख. । ४...द्रथाद् - ख. । ५ समुयागतं - क.। ६ पश्यमनोपहृष्यत -क .। ७ रा चास्याग्रे - ख. । ८ सन्निविष्टः - ख. । ९ भापितम् - ख. । १० किङ्कजीजालमःलिभिः - ख., हासिभि. (?)। ११ स्तिठँन्स्त्यत्र - ख , तिष्ठन् अतिष्ठन् (?) । १२ सभासतः - ख. । १३ ...विश्र्ववसः - ख. । १४ तया (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शुक्तिकर्णं शुक्तिकर्णैर्यक्षेन्द्रै रभिसंवृतम्[१५] ।
उपगीयमानं गन्धर्वै[१६]रेकपिङ्गायतेक्षणम्[१७] ॥१५॥
महेश्वरसखत्वेन[१८] वरदानमदेन च ।
माद्यन्तं[१९] स्वर्णया[२०] नद्धमालयामललोलया[२१] ॥१६॥
धनदश्चापि तं दृष्ट्वा शङ्करानुचरं वरम् ।
पूजयञ्छङ्करं सोम[२२]मुत्पपातासनाद् द्रुतम् ॥१७॥
स्वर्णादुत्पतमानस्तु आसनाद् धनदो बभौ ।
साशोकादिव[२३] पुष्पाढ्यादुदग्रात् पर्वताद्रविः ॥१८॥
तमुत्पतन्तमुत्पेतुर्यक्षा यक्षपतिं[२४] द्रुतम् ।
ग्रहा यथा दीप्यमाना दिनहानौ ग्रहाधिपम् ॥१९॥
नन्दिने[२५] स तदार्घश्च[२६] पाद्यश्चावेद्य वित्तदः[२७] ।
सपुत्रदारः सामात्यः[२८] प्रणेमे मनसा हरम् ॥२०॥
ततःकथा बहुविधाः कृत्वोद्दिश्य महेश्वरम् ।
पप्रच्छ धनदो नन्दिं चिरस्यागमनं कृतम् ॥२१॥

नन्द्युवाच

अशोकतरुकं पुत्रं गिरिपुत्री ग्रहीष्यति ।
निमन्त्रयति तत्र त्वां द्रविणेश महेश्वरः ॥२२॥
श्वः सपुत्रः सदारश्च सानुगः साप्सरोगणः ।
मन्दरं याहि वित्तेश देवेशः प्रीयते[२९] त्वया ॥२३॥
एवमामन्त्र्य धनदं धनदेन विसर्जितः ।
ययौ संयमनीं[३०] नन्दी यमस्य यमसन्निभः ॥२४॥
स यमं धर्मवक्तारं हर्तारं प्राणिनां प्रभुम् ।
साग्निं सधर्मं सव्याधिमपश्यद् गणनायकः ॥२५॥

---

१५ सेवितम् - घ. । १६ गन्धर्वैरुपगीय(त?)न्तं - क. ख. । १७ ...रेकपिङ्गायतेक्षणः - क. ग. । १८ सखित्वेन - क. ग. । १९ माम्यन्तं - ग., आप्यन्त - ख., साज्यन्तं - घ. । २० स्वर्णया - क. ख., स्वर्णनक्षत्रमालया - घ., नद्धं - क. ग. । २१ माल .. - क. ग. मनतोयथा - घ. । २२ पूजां कर्तु नन्दिनस्तु - घ.। २३ अशोकादिव - घ. । २४ रक्षपतिं - ख. । २५ नन्दिनं - क. ग. । २६ तदार्घ्यस्य - क., .. र्घस्य - ग । २७ षः (पः) - घ. । २८ सामान्यः - ग. । २९ प्रियते - ख. । ३० संयमनं - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

आयांतं[३१] नन्दिनं दृष्ट्वा यमो भूतशतावृत:[३२] ।
पादाभ्यां नन्दिन:[३३] सोथ निपपात तुतोष च ॥२६॥
रुद्रस्येव[३४] यमस्तस्य पूजां कृत्वा ह्यनुत्तमाम् ।
पप्रच्छ नन्दिनं यत्नाच्चिरस्यागमनं कृतम् ॥२७॥

नन्द्युवाच

अशोकतरुकं पुत्रं गिरिपुत्री ग्रहीष्यति ।
तत्र त्वां[३५] सानुगं देवो निमन्त्रयति शङ्करः ॥२८॥
ये चैव विषये[३६] ह्यस्मिन् निवसन्ति द्विजातयः ।
ताँश्चामन्त्रयते देवः संमान्य बहुमानतः ॥२९॥
कल्यं[३७] स भगवान् कल्यः[३८] कालः कालप्रियं गिरिम्[३९] ।
मानयन् प्रभुमीशानं गन्तुमर्हसि मन्दरम् ॥३०॥
तथेत्युक्तो यमेनाथ तैश्चाग्निसदृशैर्द्विजैः[४०] ।
सूर्यात्मजगृहान्नन्दी शक्रलोकं ततो गतः[४१] ॥३१॥
सुकृतीनां तमावासं[४२] वासवं लोकमद्भुतम्[४३] ।
विवेश त्वरितं नन्दी[४४] दितिगर्भं यथाहिहा ॥३२॥
स सुधर्मा सुधर्मायां सुधर्ममरैर्वृतम् ।
गान्धर्वमुपश्शृण्वानं नन्दी शक्रमपश्यत ॥३३॥
शक्रश्च नन्दिनं देवं[४५] देवदेवस्य किङ्करम् ।
हर्षान्नेत्रसहस्रस्थं कृत्वा सम्यगपश्यत ॥३४॥
स पूजां रुद्रसदृशीमवाप्य त्रिदशेश्वरात् ।
उपाविशदमेयात्मा शक्राभ्यासे वरासने[४६] ॥३५॥
तमासीनमुपासीनः[४७] शतक्रतुररिन्दमः ।
पिबन्नेत्रसहस्रेण न तृप्तिं सोभ्यगच्छत[४८] ॥३६॥

---

३१ आयातं - क. ग. । ३२ भूतशतावृत: - घ. । ३३ नन्दिनं - घ. । ३४ रुद्रस्यैव - क. ख. ग. ।
३५ ततस्त्वां - ग. । ३६ ऋषयो - घ. । ३७ काल्यं - क. ख. ग. । ३८ काल्यः - ख । ३९ गिरिप्रियः -घ. ।
४० स्तैश्चाग्निसदृशैर्द्विजैः- क. । ४१ ...गमत्-ख. । ४२ तदावासं - क. ख. ग. । ४३ वासवस्यामरावतीम् - घ. ।
४४ नन्दी त्वरितं - क. ख. । ४५ देवो - ख. । ४६ शक्रोद्यानवरासने - घ. । ४७ तमुपास्त - घ., उपसीनं - घ, त - क. । ४८ योभ्यगच्छत - ग. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ततो वृत्रबलारिस्तं नन्दिनं दिनकृत्प्रभम्[४९] ।
पर्यपृच्छत हर्षेण किं चिरादागतो भवान् ॥३७॥
इत्युक्तः स तु देवेन देवः स्वर्गनिवासिना ।
मन्दारवासितोऽव्यग्रः[५०] प्रोवाच कुलिशाधरः[५१] ॥३८॥
अशोकतरुकं पुत्रं गिरिपुत्री ग्रहीष्यति[५२] ।
तत्र त्वां सामरं देवो निमन्त्रयति भूतपः[५३] ॥३९॥
द्विजपूर्वं[५४] द्विजा ये च तवालयनिवासिनः ।
सपुत्रदारांस्तांश्चापि निमन्त्रयति शङ्करः ॥४०॥
श्वस्सपुत्रः सदारस्त्वं देवदेवस्य शासनात् ।
मन्दरं गच्छ देवेश गिरीशमभिनन्दय[५५] ॥४१॥
त्वयि याते सुरश्रेष्ठ अशोकतरुकोत्सवे[५६] ।
प्रीतिं यास्यति देवेशः[५७] परां सुरनरार्त्तिहा ॥४२॥
शितशूलधरं पिनाकिनं गिरिराजेन्द्रसुतापतिं प्रभुम् ।
प्रणिपत्य महेशमूर्जितं पुनरेवैष्यसि नाकसंसदम् ॥४३॥

⊙ इति स्कन्दपुराणे विप्रामन्त्रणे षष्ट्युत्तरशततमोध्यायः ⊙

सनत्कुमार उवाच

शक्रेण तु कृतानुज्ञो नन्दी प्रमथनायकः ।
ब्रह्मणो भवनं गन्तुं मतिं दध्रे महाद्युतिः[१] ॥१॥
स मुहूर्त्तान्महावेगो महावेग[२] इवानिलः[३] ।
वैराजं भवनं प्राप्तश्चतुर्वक्त्रस्य पार्षदः ॥२॥
हतक्लमां स तु सभां सभां मेरुगिरेरिव ।
विवेश नन्दी तेजस्वी दिवाकरकरो यथा ॥३॥

---

४९ प्रभुं - ख. । ५० मन्दरावासमव्यग्रं - ग., मन्दरावासितनव्यग्रः - घ. । ५१ धरं ? ।
५२ ग्रहिष्यति - क. ख. । ५३ भूमिपः (प) - क. ग. (ख) । ५४ द्विजापूर्त्रं - ग. । ५५ मनन्दयन् - ग. ।
५६ ...त्सवम् - क. ग. । ५७ देवेश - क. ।
१ महामतिः - ख. । २ मुहुर्त्तं स महावेगो - ग. । ६ इवानलः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तां कथामिव चित्रार्थां चित्रार्थैर्बहुभिर्युताम् ।
ददर्श[४] स सभां नन्दी बह्वाश्चर्यसमाकुलाम्[५] ॥४॥
तस्यां सभायामालीनं यतिभिस्सह सोद्भुतम् ।
अपश्यदब्जजं नन्दी देवैः पञ्चभिरावृतम् ॥५॥
वेदार्थं भाषमाणं तं[६] यतीनां परिपृच्छताम् ।
तांश्च भाष्यविदः सर्वान् श्रुत्वा साध्विति वादिनः ॥६॥
नन्दी पितामहं सम्यक् पूजयामास सत्वरम् ।
ततः पितामहः प्राह नन्दिनं गणनायकम् ॥७॥
किं चिरादागतोसीति स च तं प्रत्यभाषत ।
अशोकतरुकं पुत्रं गिरिपुत्री ग्रहीष्यति ॥८॥
भगवँस्तत्र[७] देवस्त्वां निमन्त्रयति शङ्करः ।
इमांश्च तपसाग्न्याभान्[८] सवेदान् वेदवादिनः ॥९॥
निमन्त्रयति देवेशो यज्ञकोटीनिमन्त्रितः[९] ।
यतिभिस्सह सर्वैस्त्वं मन्दरं चित्रकन्दरम् ॥१०॥
व्रज मानद देवानामेवमाज्ञापयत्यजः ।
इत्येवं वचसां कर्ता वचः श्रुत्वा स नन्दिनः ॥११॥
जप्यप्रियमुवाचेदं हृष्टरूपः[१०] पितामहः ।
नन्दीश्वर व्रजस्व त्वमविघ्नेन शिवेन च ॥१२॥
अहमप्यागमिष्यामि एभिस्सह शिवान्तिकम् ।
मोक्ष्यते चाप्यशोकोसौ दक्षशापकृतं तमः ॥१३॥
पुत्री हिमवतो देवी यं ग्रहीष्यति पुत्रकम् ।
इत्युक्तः प्रतिमान्येश[११]मीशस्य[१२] दयितोग्रणीः ॥१४॥
ब्रह्मणो भवनात्तूर्णं क्षीरोदमुदधिं ययौ ।
मालामिव समुद्रस्य स तु वेलाममालिनीम् ॥१५॥

---

४ ददृशे - क. । ५ अश्चर्यबहुसकुलाम् - क ख. । ६ स विभाषन्तं - क. ख. । ७ भगवाँस्तत्र - क. । ८ तपनाभासान् - घ. । ९ कोटिनिमन्त्रित; - ख. ग. । १० दृष्टरूपः - क. । ११ इत्युक्तस्तु प्रणम्याथ - घ. । १२ ...मीशेश - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गणेश्वरसदोमुख्य आससाद दुरुत्सहाम् ।
स वेलानिलयान् विप्रान् बालखिल्याँ [13]स्तपोधनान् ॥१६॥
नानानियमसंयुक्तानपश्यद्[14] गणनायकः
वन्दमानं[15] तमालोक्य गणेशं सुयशापतिम् ॥१७॥
आशीर्भिरनुकूलाभिर्ननन्दुस्ते[16] तपोधनाः ।
तपोधनानां हृष्टानां नन्दी मध्यगतो बभौ ॥१८॥
ग्रहाणां सौम्यरूपाणां यथा[17] मध्यगतोडुपः[18] ।
अथ पाद्यार्घ्यदानेन फलदानेन चैव हि ॥१९॥
संपूज्य नन्दिनं देवं बालखिल्यास्तमब्रुवन् ।
कुतश्चिरस्यागमनमिह ते प्रमथाधिप ।
कच्चिद् द्रक्ष्याम देवेशं साम्बमम्बापतिं भवम् ॥२०॥
ततो नन्दी द्विजश्रेष्ठान्[19] श्रेष्ठो वै प्रमथाधिपः ।
सालाङ्कारमिदं वाक्यमब्रवीद् द्विजसंसदि ॥२१॥
मन्दरे साम्बिको देवो नेहागच्छति शङ्करः ।
इह चागमनं[20] यन्मे तच्छृणुध्वं तपोधनाः ॥२२॥
अशोकतरुकं पुत्रं गिरिपुत्री ग्रहीष्यति ।
तत्र वो गोपतिर्देवो निमन्त्रयति शङ्करः ॥२३॥
श्वः सर्वे दारसहिताः सशिष्यतनयाग्नयः ।
मन्दरं यात विप्राग्र्या मामम्बां[21] चानुगृह्णत[22] ॥२४॥
इत्येवं नन्दिना प्रोक्ता बालखिल्या[23] महर्षयः[24] ।
देवे भक्ति[25]प्रकर्षेण[26] गणेशमिदमब्रुवन् ॥२५॥
भो नन्दिन्नागमिष्यामः श्वः प्रभाते वयं प्रभो ।
पर्वतं याह्यविघ्नेन मन्दरं चारुकन्दरम् ॥२६॥

---

१३ वालिखिल्याँ - क. ख. । १४ लीनानियमसंयुक्तानपश्यद् - घ. । १५ वन्द्यमान - क. । १६ स्तं - घ. ख. ।
१७ म्थितो - क. ख. । १८ इवोडुपः (?) - घ । १९ नन्दिर्द्विजश्रेष्ठान् - ख. । २० त्वागमनं - घ. ।
२१ मामम्बां - क. ख. । २२ चानुगृह्णथ - क. ख., .. गृह्य च - घ । २३ वालिखिल्या - क. ख. ।
२४ महावलाः - ख. । २५ देवभक्ति क. । २६ प्रहर्षेण - क. ख. । २७ देवेश - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स बालखिल्यैः प्रणतोभिपूजितो
निमन्त्र्य[२७] सर्वान् त्रिपदे द्विजोत्तमान् ।
पुनर्निवृतोभिजगाम मन्दरं
स यत्र देव्या सहितोवतिष्ठते ॥२७॥
अथ भुवनपतिं पतिं सुराणां
गिरितनयामुखपङ्कजद्विरेफम् ।
धनदवरदमेत्य भूतनाथं
गणपतिनाथ इदं तदावभाषे ॥२८॥
दिवि च भुवि च ये चरन्ति विप्राः
शमदमसंयमशौचसत्वयुक्ताः[२८] ।
त्रिपुरदमन कालनाश सर्वे
तव वचनाद्विनिमन्त्रिता मया ते[२९] ॥२९॥

⊙ इति स्कन्दपुराणे तरुपुत्रग्रहणे विप्रामन्त्रणं नाम एकषष्ट्युत्तरशततमोध्यायः ⊙

सनत्कुमार उवाच
आमन्त्रितेषु विप्रेषु नारायणपदत्रये[१] ।
नन्दिन्यथ निवृत्तो च गणयूथपयूथपे ॥१॥
भगवान् क्रतुकामघ्नः पूष्णो दन्तनिपातनः ।
माली मौली बली कालः काले वचनमब्रवीत् ॥२॥
अम्बिके जगतः[२] सर्वे ब्राह्मणा ब्राह्मणः[३] समाः ।
आमन्त्रिता वरारोहे कुरु यत्तो मनोगतम् ॥३॥
स यत्राशोकतरुकः पुत्रकस्ते भविष्यति ।
तत्र सज्जीकरोत्यन्न[४]मन्नदः पिङ्गलः[५] प्रिये ॥४॥

---

२८ ...भिमन्त्र्य - क. । २९ दमयममंयमशौचसत्वयुक्ताः - क., दमशम . - ख. घ. । ३० मयेति - ख. ।
१ त्रिलोकपुरवासिषु - घ. । २ ...ध्यागताः - घ. । ३ ब्रह्मणा (?) । ४ करोत्वन्नं - क, ..करोद् देवि - घ.।
५ ...त्व - क., पिञ्जलः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

श्वः प्रभाते यथा देवि नन्दिना सह नन्दिनि ।
यामोशोकतरोः[६] पार्श्वं तथा कुरु गिरीन्द्रजे ।।५।।
साकाशजलपातालं[७] जगज्जननि तत्र हि[८] ।
पिण्डीकृतं त्वद्धितार्थे[९] भविष्यति गिरेः सुते ।।६।।
अनेन चामन्त्रयता नन्दिना वै द्विजोत्तमान् ।
क्रान्तं त्रिविक्रमाक्रान्तं[१०] नारायणपदत्रयम् ।।७।।
सोहमस्य वरारोहे वरेण्ये[११] वरदायिनि ।
वरं दास्यामि वरदे यदि ते रुचितं प्रिये ।।८।।
अथ देवी दिवोनाथं डिण्डिमुण्डेश्वरं[१२] हरम् ।
अवदद्वरदं कान्तं कान्तं चन्द्रार्धभूषणम्[१३] ।।९।।
अयन्नन्दीश्वरो देव आवयोः परमो हितः ।
वरकोटीसहस्राणि त्वत्तोर्हति न संशयः ।।१०।।
वरदो ह्यसि लोकानां लोकानामपि चेश्वरः ।
यदि तुष्टोसि शैलादेर्दिशस्व प्रवरं वरम् ।।११।।
कृत्तिवासास्ततो देवो मूर्ध्न्युपाघ्राय नन्दिनम् ।
उवाच प्रमथेशानं[१५] व्रियतामीप्सितो[१६] वरः ।।१२।।
ततः कपीन्द्रवदनः सुरेशसदृशद्युतिः ।
प्रणम्य शिरसा प्राह नन्दी शङ्करवल्लभः[१७] ।।१३।।
प्रभावात्तव देवेश वरदास्म्यजरामरः[१८] ।
भोगवान् पूजितः पूज्यैर्देवदानवकिन्नरैः ।।१४।।
किं मे वरेण योहं ते वरकोटिप्रपूजितो[१९] ।
पश्यामि चरणौ शर्व साम्बस्य प्रमथार्चितौ ।।१५।।

---

६ माया ... - क., यामी (म्य, शोकतरोः - ख., याह्यशोकतरोः - घ. । ७ सकालजलपातालं - घ. । ८ जगत्सर्वं निमन्त्रितं - घ, ... मन्त्र (त्र, - क. । ९ त्वद्धितार्थं - ख. ग । १० त्रिविक्रमम् - घ., ...माक्रान्त - क. ग. । ११ वरदो - घ. । १२ चण्डाण्डेश्वरं - घ. । १३ कान्तचन्द्रार्धभूषणम् - क. ग. । १४ सर्वेषां - घ. । १५ प्रमथेशान - क. । १६ वृयतामीप्सितो - क. ग. । १७ नन्दीशो हरवल्लभः - घ. । १८ वरदोस्म्यजरामरः - क. ग. । १९ प्रपूजितः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वरेण तु ममानेन गोपते यदि तुष्यसि[२०] ।
नित्या भवतु मे भक्तिस्त्वयि साम्बे महेश्वर[२१] ॥१६॥
शिष्टानां मद्विशिष्टानां गणानां गणपाधिपः[२२] ।
त्वया कृतो देववर किमतोन्यत् करिष्यसि ॥१७॥
इत्येवं नन्दिनं देवो भाषमाणं तदा नतम्[२३] ।
प्रीत्यापश्यद्[२४] विरूपाक्षः शशाङ्ककृतशेखरः ॥१८॥
तप्तोत्पलनिकाशेन करेण भगवान् हरः ।
प्रमृज्य प्राह हर्षेण हर्षयन् नन्दिनं भृशम् ॥१९॥
भक्तिमानसि मे[२५] नन्दिन् सदारं सगणाश्रयम् ।
तां च भक्तिं पुरस्कृत्य पार्श्वस्थोसि मया कृतः ॥२०॥
सत्याद्धर्मात्तपोदानाद् गोभ्यो वेदेभ्य एव च ।
एभ्यो मे त्वं प्रियतरः सर्वेभ्यो गणपेश्वर ॥२१॥
प्रभाते[२६] यश्च ते नाम कीर्तयिष्यति लोकप[२७] ।
सोश्वमेधस्य च फलं सम्यगिष्टस्य लप्स्यते[२८] ॥२२॥
यश्च त्वां द्वेष्टि विद्विष्टः[२९] स मे धर्मरतोपि हि ।
यस्य त्वं दयितोसौ[३०] मे दयितस्तु भवेत् सदा ॥२३॥
नमो नन्दीश्वरायेति प्रोच्य यः स्वप्स्यते नरः ।
तस्य कुष्माण्डराजेभ्यो[३१] न भविष्यति वै भयम् ॥२४॥
इत्येवं ब्रुवतस्तस्य नन्दीश्वरगुणस्तवम् ।
ब्रह्मणस्तनुरत्युग्रा[३२] सन्ध्या समभिवर्तत ॥२५॥
संध्याकालन्तु[३३] कालज्ञः कालः कालनिहा[३४] हरः ।
उपोढं वीक्ष्य नृत्तस्य देवः कालममन्यत[३५] ॥२६॥

---

२० तुष्यति - क., तुष्यसे - घ. । २१ साम्ब महेश्वर - ग., गणेश्वर - क. । २२ गणपाधिप - क. । २३ नुतं - ख. । २४ पृत्यापश्यद् - क. । २५ मां (?) । २६ प्रयतः - ख. । २७ लोकपः - क. । २८ लक्ष्यते - ख. । २९ वै द्वेष्टि - क । ३० दयितः सो - क. ग. । ३१ कुष्माण्डराजभ्यो - क. । ३२ ...रत्यग्रा - ख. ग. । ३३ संन्ध्याकालन्तु - क. ग. । ३४ कालावहो - घ. । ३५ यं रक्तं वीक्ष्य संसारं कालं मत्वेत्यजोव्ययः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

उपस्पृश्य ततः सोद्भिरपां स्रष्टा त्रिलोकपः ।
अन्वास्त[३६] भगवान् सन्ध्यां लोकसंस्थां नु पालयन्[३७] ॥२७॥
प्रसारितकरो देवो न्यस्तजानुकमण्डलः[३८] ।
प्रसरितकरो व्योम्नि दिवाकर इवाभवत् ॥२८॥
जप्त्वा तु परमं जप्यं त्रिवेदरससंभवम् ।
भवः प्रनृत्य[३९]च्चतुर[४०]श्चतुरं चतुराननः[४१] ॥२९॥
भर्त्तारं वीक्ष्य नृत्यन्तं[४२] विषक्तकरपल्लवम् ।
सहधर्मचरी देवी भर्त्तारं सान्वनृत्यत[४३] ॥३०॥
दम्पती वीक्ष्य नृत्यन्तौ साट्टहासं गणाग्रणीः ।
प्रानृत्यत[४४] ततो नन्दी देवयोः प्रीतिमावहन् ॥३१॥
देवमम्बाञ्च नृत्यन्तौ नन्दिनञ्च समीक्ष्य तु ।
प्रमथा नीलमेघाभाः[४५] प्रनृत्तास्तूर्यनिस्वनैः ॥३२॥
ततो भेर्यो झर्झराश्च[४६] किखिरानकमण्डुकाः[४७] ।
आडम्बरा डिण्डिमाश्च शंखाश्चैव प्रसस्वनुः ॥३३॥
मुहुर्मुहुः साधयते नृत्तं चतुरसम्बिका ।
नन्दी विसृजते[४८] हासं प्रमथा नेदुरुल्वणाः ॥३४॥
तत्तूर्यवरशब्दाढंच[४९] शिवाशनिरवाकुलम् ।
सन्ध्यामुखं बभौ रौद्रं वडवामुखसन्निभम् ॥३५॥
ननृतुर्जहसुश्चान्ये[५०] जजपुश्च तथापरे ।
जगुश्चान्येतिमधुरं गन्धर्वा इव पार्षदाः ॥३६॥
ततोम्बरतलापीडे पूर्णविम्बेतिनिर्मले ।
मृगाङ्के ह्युदिते चन्द्रे चन्द्रावयवभूषणः[५१] ॥३७॥

---

३६ अन्वास्ते - क.। ३७ लोकसंस्थान्तु पालयन् - घ., ... भिपालना (नी म् (नात्) - क. । ३८ जानुन्यस्त (?), कमण्डलुः - क. ख. । ३९ प्रहृष्ट - क. । ४० चतुर - ख. । ४१ ... श्चतुराननः - क. ख., प्रनृत्यच् चतुरः (?) । ४२ नृत्तन्तं - क. ग. । ४३ ...सत - ख. । ४४ प्रनृत्यत - घ. । ४५ निलमेघाभः - क. । ४६ मर्मराश्च - ख.। ४७ किखरानक - क. ख., मेण्डुका - ग. । ४८ विससृजे - ख. । ४९ खरशब्दाढंच - क. ख. ग. घ. । ५० नर्नतुर्जहसुश्चान्यें - क. ख. ग. । ५१ ...भूषणे - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

समाप्य नियमं देवः साम्बनन्दीशपार्षदः[५२] ।
विररामोत्सवात्तस्मात् पार्वतीं चेदमब्रवीत् ।।३८।।
उषित्वा शर्वरीमेतां शर्वर्यमितविक्रमे ।
अशोकतरुकं पुत्रं ततः श्वस्त्वं ग्रहीष्यसि ।।३९।।
धारेयी सा सदर्भायां धरायां[५३] धारणीधरा[५४] ।
सुष्वाप देववचनादेकां[५५] रात्रिं यतव्रता ।।४०।।
ततः शतसहस्रांशावुदितेऽर्केऽर्कभावनः ।
उमामाह प्रयामेति[५६] यत्राशोकः सुतः[५७] स ते[५८] ।।४१।।
ततो भगवती धन्या धनदा धनदार्चिता ।
भवमाह प्रयामेति सिञ्जमानविभूषणा[५९] ।।४२।।
पादचारेण भगवान् पादपं पादपालयः ।
तमशोकतरुं प्राप सनन्दी साम्बिको हरः ।।४३।।
स तत्र पिङ्गलं यक्षं[६०] पिङ्गलानलसन्निभम् ।
साधयानं ददर्शान्निमन्नदं प्रमथैः सह ।।४४।।
अथात्र भक्ष्यभोज्यस्य चोष्यलेह्यस्य च प्रभुः ।
सोपश्यत् पर्वतप्रख्यान् राशीन् राशिविदां वरः ।।४५।।
स साधितं[६१] ततो दृष्ट्वा यक्षेणान्नं पिनाकधृक् ।
प्रहर्षमतुलं[६२] लेभे साम्बिकः सह नन्दिना ।।४६।।
ततः पितामहो देवः सह देवाप्सरोरगैः[६३] ।
तत्रागान्मुदितो भूत्वा[६४] यत्र साम्बोम्बिकापतिः ।।४७।।
ते प्रणम्य महादेवं[६५] देवास्तेनाभिपूजिताः ।
परिवार्य तदाशोकमिदमूचुर्हराग्रतः[६६] ।।४८।।

---

५२ सप्तार्षद - ख. । ५३ धारया - क । ५४ धरणीधरा - ख. । ५५ देवा(तां) - क. ।
५६ व्रजाम्येति - घ. । ५७ यत्राशोकसुतः - क., यत्राशोकतरुः - ख. । ५८ सुतः - ख., शुभे - ग. ।
५९ सिञ्जन्मणिविभूपणा (?) । ६० पिङ्गलाध्यक्षं - क. । ६१ संसाधितम् (?) । ६२ सहर्षमतुलं - ख. ।
६३ देवसुरोरगैः - क ख. । ६४ बुद्ध्वा - घ. । ६५ प्रणेमुर्महादेवं - ख. । ६६ महासुराः - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अद्यप्रभृति वृक्षोयं सर्वत:[६७] सुखसंयुतः ।
दक्षशापतमोन्मुक्तो भविष्यति दिवौकस:[६८] ॥४९॥
अमरो जरया त्यक्तः सर्वदु:खविवर्जितः ।
सर्वाभरणपुष्पाढ्यः सर्वगन्धरसान्वितः ॥५०॥
सर्वकामप्रदश्चैव इच्छापुष्पफलस्तथा[६९] ।
भविष्यति न सन्देहो देव्याश्च सुदृढं प्रियः ॥५१॥

सनत्कुमार उवाच

ततो गिरीन्द्रतनयां गिरीशः प्रणतार्तिहा ।
पश्यान्नपर्वतानेलानिति प्रोवाच कामदः[७०] ॥५२॥
सा वीक्ष्य भक्ष्यभोज्यस्य उच्छ्रयान् पर्वतोपमान् ।
दृढं तुतोष देवेशा पिङ्गलस्य गुहारणिः ॥५३॥
सुमालिनं यक्षवरं पिङ्गलं पर्वतात्मजा ।
युयोज वरदानेन तामाह च महेश्वरः ॥५४॥
देवि सर्वमिदं सज्जं भक्ष्यं भोज्यं[७१] तवोत्तमम् ।
यत्ते मनीषितं कार्यं तत्कुरुष्व किमास्यते ॥५५॥
ततः सातिप्रमुदिता दिव्याम्बरनिवासिनी ।
मनोजवमनुज्ञाप्य शङ्करं भुवनेश्वरम् ॥५६॥
दैत्यशोकप्रदा देवी तमशोकं[७२] विभावरी ।
अलञ्चकार सस्नेहा अलङ्कारैः पृथग्विधैः ॥५७॥
आतपत्रं च तस्याग्रे मुक्तादामावभासितम्[७३] ।
उच्छ्रयामास गिरिजा मयूराङ्गरुहैः सह ॥५८॥
नानावर्णेन चाप्यस्य चन्दनेन सुगन्धिना ।
आमूलादकरोद्देवी वरपङ्काङ्कितां[७४] तनुम् ॥५९॥

---

६७ सर्वगः - घ. । ६८ विनिश्चयम् (?) । ६९ स्वेच्छापुष्पफलस्तथा - ग. । ७० कामहा - घ. । ७१ भक्ष्यभोज्यं - क. ख. । ७२ तदशोकं - क, तपशोकः - ख. । ७३ विभूषितं - क. । ७४ करपङ्काङ्कितां - क., करपट्टाङ्कितां - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जाम्बूनदमयैश्चापि पट्टैर्मणिविराजितैः ।
सर्वतो भूषयामास अशोकतरुकं प्रियम् ।।६०।।
तस्य शाखाप्रशाखासु मुक्तादामानि[७५] पार्वती ।
आबबन्ध[७६] स तैर्भाति नक्षत्रैरिव चन्द्रमाः ।।६१।।
अथ वासोयुगैः श्वेतैस्तमशोकं गुहारणिः ।
वासयामास लोकानां जननी पुत्रलालसा ।।६२।।
श्रीवेष्टकं नमेरुञ्च गुग्गुलं घृतमेव च ।
समवेतं ततो धूपं ददौ देववरप्रदा ।।६३।।
ततः शंखनिनादेन देवतूर्यरवेण च ।
बलिं बलवतो भार्या चकार चरती तपः ।।६४।।
तथार्चयन्त्यास्तं[७७] वृक्षं चन्द्रहारामृतप्रभम् ।
स्तनाभ्यामस्रवत् क्षीरं[७८] पुत्रस्नेहाभिसंगमात्[७९] ।।६५।।
उमया[८०] सोऽर्चितो वृक्षः अशोको वनदीपकः[८१] ।
अतीव शुशुभे तत्र वसन्त इव रूपवान् ।।६६।।
नन्दिनाथ समानीतान् ब्राह्मणान् ब्रह्मणःसमान् ।
वाचयामास पुण्याहं दत्त्वा तेषां यथेप्सितम्[८२] ।।६७।।
ततः पुण्याहघोषान्ते आशीर्वादस्य चोभयोः ।
अनुमान्य पतिं देवी ऋषींस्तानब्रवीत्तु सा[८३] ।।६८।।
अपुत्रा भगवन्तोहमशोकतरुकं[८४] सुतम् ।
इममद्य[८५] ग्रहीष्यामि समनुज्ञातुमर्हथ[८६] ।।६९।।
इत्येवं ब्रुवतीं देवीं पार्वतीं पुत्रलालसाम् ।
समभूचुर्द्विजाः सर्वे इष्टतो गृह्यतामिति ।।७०।।
ततः शंखरवो[८७] दिव्यः सर्वतूर्यरवान्वितः[८८] ।
प्रबभौ पूरयन् सर्वं नारायणपदत्रयम् ।।७१।।

---

७५ मुक्तामाला(त्या)नि - ख. । ७६ आबबद्ध - ख. । ७७ ..र्चयत्यास्तं - क. । ७८ ...मभवत् क्षीरं (?), क्षीरमभवत् - क. । ७९ संगतम् (?) । ८० उमाया: - क. । ८१ अशोकवनदीपकम् - क. ख. । ८२ गोधनमेव च - घ. ...ताम् - क., ..तान् - ख. । ८३ ब्राह्मणान्ब्रवीत् (?), विप्रांस्तानब्रवीत् - क., ऋषीन्स्तानब्रवीत् - ख. । ८४ अपुत्राहं हि भगवन्नशोकतरुकं - क., ...हं द्विजाः स्वामी - घ. । ८५ इदमद्य - क., इयमद्य - ख । ८६ मामनुज्ञातुमर्हथ (?) । ८७ वरो - घ. । ८८ आडंबरवरान्वित :- घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वेदानुच्चारयन्[८९] विप्रा नृत्यन्त्यप्सरसां गणाः ।
नेदुश्च प्रमथास्सर्वे सगन्धर्वमहोरगाः ॥७२॥
ऋतवः षट् च संहृष्टाः स्वैः स्वैः कुसुमसंचयैः ।
अलञ्चक्रुरशोकञ्च तच्च दैवतमण्डलम् ॥७३॥
तत्प्रवादितगान्धर्वं प्रनृत्ताप्सरसां गणम् ।
पश्यन्ति हृषिता देवा अशोकतरुकोत्सवम्[९०] ॥७४॥
वादयन् कच्छपीं वीणां वीणावादयतां वरः[९१] ।
नारदो नृत्यते हर्षाद् वातनुन्न इवानलः[९२] ॥७५॥
तपोधनैश्च धनिनी देवैश्च धनदार्चिता ।
पूज्यमाना बभौ तत्र रवेरिव यथा प्रभा ॥७६॥
समाप्य नियमं साथ गृहीत्वाशोकपुत्रकम्[९३] ।
गिरीन्द्रतनया[९४] भाति धरा इव जनोक्षिता ॥७७॥
अथ नन्दीश्वरादिष्टाः प्रमथास्ते सहस्रशः ।
अददन् स्वासनान्याशु विप्राणां विप्रवत्सलाः ॥७८॥
स्वर्णानां राजतानां च स्फटिकानां[९५] प्रभावताम् ।
प्रमथैः कीर्यमाणाना[९६]मासनानामभूत् स्वनः ॥७९॥
मेरोः शिखरवर्षाणां महती कुशजैरिव । ?
तथासनान्युद्वहतां प्रमथानां बभौ रवः[९७] ॥८०॥
वर्षान्नमृष्टाकामानां (?) मेघानां स्तनतामिव ।
स्कन्धस्थैश्च करस्थैश्च उत्तमांगस्थितैरपि[९८] ॥८१॥
आसनैः प्रमथा रेजुः सार्काग्नय इवाचलाः ।
आनयन्त्यपरे तूर्णमपरे धारयन्त्युत ॥८२॥
प्रमथास्ते [९९] हृष्टरूपा ह्यासनानि महासनाः ।
एकैकयोजनशतं विस्तृतायोजनान्तरम् ॥८३॥

---

८९ सामान्युच्चारयन् - घ. । ९० शक्रब्रह्म पुरोगमाः - घ. । ९१ वीणां वादयितां - क. ख. । ९२ गन्ध-नुन्न इवाचलः - घ. । ९३ कं स (सु) त - घ. । ९४ वत्रपं हर्पिता - घ । स्फाटिकानां - घ. । ९६ कीयमाणाना - घ., ८८ मीर्य (?) । ९७ प्रमथानामभूद (?) । ९८ शतैरपि - घ. । ९९ प्रकृतास्ते - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

असंसक्तासना पंक्तिर्निर्मिता विश्वकर्मणा ।
मन्दरस्य शुभे[१००] पृष्ठे विप्रपंक्त्यो विनिःसृताः ।।८४।।
तपनैर्निर्गतैः सर्वैः समामेघास्वसेचतान् ? ।।८५।।
स्नाते पथ इव दृष्ट्वा रेजुरासनभूषणाः । ?
सहस्रपंक्तयस्तास्तु मंदरे विस्तृते[१०१] गिरौ ।।८६।।
द्विजातीननुलिप्ताँस्तु यक्षजम्बालमिश्रकान् । ?
सशेखरान् सस्रग्दामाननुहूय समोद्यतान् ? ।।८७।।
मंदारैस्तु[१०२] ससंतानैः पारिभद्रैस्तथैव च ।
अनिलैः सांगनादाश्च (?) रेजुर्देवा इव द्विजाः ।।८८।।
सुश्लक्ष्णैश्च सुगन्धैश्च गन्धचूर्णैः सपिञ्जरैः ।
अवकीर्णास्ततोदेवैर्भूमिदेवाः समंततः ।।८९।।
दिव्यचन्दनपङ्काङ्का दिव्यचूर्णविचूर्णिताः ।
ब्राह्मणा रेजुरेकस्था एकस्था इव पावकाः ।।९०।।
दिव्यं धूपं चारयित्वा मामाज्ञा (?) सर्वशश्च ह ।
ततः स्फटिकसंकाशं पद्मरेणुरिवार्जिताः (?) ।।९१।।
हस्तशौचं मुहूर्त्तेन दत्तं शंकरकिंकरैः ।
बद्धकक्षास्ततः शूरा बद्धकक्षा इव द्विपाः ।
परिवेष्टुमुपक्रान्ताः प्रमथा ब्राह्मणर्षभान् ।।९२।।
भाजनान्यथ स्वर्णानि राजतस्फाटिकानि च ।
मुहूर्त्तेन द्विजातीनां ददुर्देवा[१०३] विनीतवत् ।।९३।।
हृत्वा हृत्वा बभ्रूरेखं दंडे वारि समंडलम्(?) ।
भक्ष्यभोज्यान्नपानानि[१०४] ददुः सम्यक् समन्ततः ।।९४।।
अर्थवद्यो हरिपुरासराटपुरकान्यपि[१०५] ।
नेत्रस्थं हृदयस्थं च मुखस्थं हस्तसूचितम् ।।९५।।

---

१०० शुभाः - घ. । १०१ विसृते - घ. । १०२ मंदरैस्तु - घ. । १०३ दधुर्देवा (?) । १०४ भोक्ष्य-भोज्यानि पानानि - घ. । १०५ ... त्यपि - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ब्राह्मणानां विदुश्चैव ददुश्च प्रमथाधिपाः ।
भृङ्गारैः काञ्चनैः केचित्[१०६] पानीयं गुणवर्धनम्[१०७] ॥९६॥
दिशंतोपि चरंत्येते पानीयमितिवादिनः ।
अपरे चन्द्ररश्म्याभैश्चामरैः सत्सुगन्धिभिः ॥९७॥
आबीजुर्ब्राह्मणान्[११८] हृष्टाःप्रमथाः तपसोनिलः (?) ।
दिव्या देवस्त्रियश्चैव लोकत्रयनिवासिनः ॥९८॥
एकैकं ब्राह्मणाँस्तत्र सेवन्ते वासवं यथा ।
अप्सरोवारसंघाश्च सर्वालंकारभूषिताः ॥९९॥
ननृतुर्देवचेतांसि मुष्णन्त्यः सर्वतोदिशम् ।
विश्वावसुर्नारदश्च तुम्बुरुः पर्वतस्तथा ॥१००॥
कुस्तुम्बुरुः शालिशिराः पर्जन्यो गण्डमण्डकः ।
चित्राङ्गदश्चित्रसेनश्चित्रश्चित्ररथस्तथा ॥१०१॥
एते दैवतगन्धर्वा रक्तातोद्या हरप्रियाः ।
दिव्यतानेषु गायन्ति गेयं मन्मथदीपनम् ॥१०२॥
नमेरुर्गुग्गुलून्मिश्रो घृतधारावसेचितः[१०६] ।
धूपः सञ्चार्यते तत्र प्रतीहारीभिरुत्तमः[११०] ॥१०३॥
यदर्थमेष भ्रमति नारायणपदत्रये ।
पूज्यमानः सुरैः सेन्द्रैः श्लोको धूपत्रयाङ्कनः[१११] ॥१०४॥
गुग्गुलोश्च नमेरोश्च आज्यधूपस्य चैव ह ।
तृप्तिं न देवा गच्छन्ति प्रियाणामिव दर्शनात् ॥१०५॥
त्रयाणामेव धूपानां जहुर्न पवना गतिम्[११२] ।
गुग्गुलोश्च नमेरोश्च आज्यधूपस्य चैव ह ॥१०६॥
तं दृष्ट्वा चन्द्रमौलिस्तु[११३] तरुकोत्सवमीश्वरः ।
पार्वतीहर्षदो हर्षं पुपोषानुत्तमं मुहुः[११४] ॥१०७॥

---

१०६ कश्चित् - घ. । १०७ वर्द्धतः - घ. । १०८ अविदुर्ब्राह्मणान् - घ. । १०९ ... वसेचितं - क. ।
११० प्रतीहारिभिरुत्तमः (?) । १११ ...ङ्करः - क., कङ्कणः - ख. । ११२ न जहद् गन्धमागतं - घ. ।
११३ ततः स कृतातुलाल (?) - घ. । ११४ बहु - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

हृष्यमाणे पशुपतौ मुहुर्व्रतपतौ हरे ।
चराचरं पशुपतौ त्रैलोक्यं[११५] हर्षणायते[११६] ॥१०८॥
प्रनृत्ताप्सरसोवारं[११७]दिव्यधूपाधिवासितम् ।
ऋतुभि:[११८] कुसुमैः कीर्णं तत्सदो गगनायते ॥१०९॥
ततः शाल्योदनं तूर्णं - - - - - - - -[११९] ।
तेन तेमृतकल्पेन सर्व एव द्विजोत्तमाः ।
भक्ष्यभोज्यान्नपानेन ततृपुर्लोकपूजिताः[१२०] ॥११०॥
ततः श्रुतिसुखः पुण्यो राक्षसासुरवेजनः ।
पुण्याहशब्दः प्रकृतो विप्रैस्त्रैलोक्यपूरणः ॥१११॥
ततः साम्बमशोकं तं सहरं सह नन्दिना ।
कुसुमाक्षतसंयुक्तमाशीर्भिरभिनन्द्य च ॥११२॥
महान्तः सुस्वनाः सर्वे ब्रह्मसूत्रजटाधराः ।
प्रणमन्तो विरूपाक्षं ययुर्विप्रा यथागतम् ॥११३॥
सुराश्च पूजिता दानैर्वाक्प्रदानैश्च शूलिना ।
यथागतं[१२१] गताः सर्वे परिवार्य शतक्रतुम्[१२२] ॥११४॥
गणाश्च गणपालेन[१२३] पूजिताः सगणाधिपाः ।
यथावासं ययुः सर्वे हर्षादुद्धूतवाससः ॥११५॥
अहो देव्या हि सौभाग्यमहोस्या[१२४] वल्लभो हरः ।
अहो देवस्य देव्यर्थं संभ्रमो लक्षितो हि नः ॥११६॥
या नैवं[१२५] दयिता भर्त्तुर्यथेशस्य गिरेः सुता[१२६] ।
कथं सा सुभगा नाम स्त्रीत्वं चापि बिभर्त्ति किम् ॥११७॥

---

११५ पशुपातेस्त्रैलोक्यं - ख. । ११६ हर्षं जायते - क. ग. । ११७ वारी - घ. । ११८ धातुभिः - घ. । ११९ इतः परं कतिपयोंशः खण्डितः । १२० ततृपुर्लोकपूजिताः - क. ख. ग. । १२१ पितामहं - क. ग. । १२२ शतक्रतु - क., ...तु - ग. । १२३ गणपाः मर्वे - क. ग. । १२४ ...तिसौभाग्यमह्रोस्या - क., भि... - ख. । १२५ नैव - ग. । १२६ सुतां - क. ग. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गिरिपुत्र्या कृतं मन्ये तपः परमभास्वरम् ।
तपसाभिजितो[१२७] यस्या वरदो [१२८] वृषभध्वजः ।।११८।।
अहो स्त्रीणां बलं सूक्ष्मं देवैरपि सुदुर्जयम् ।
येन रुद्रसमा ईशाः स्त्रीणां वश्यत्वमागताः ।।११९।।
अन्ये तानब्रुवँस्तत्र महात्मानो गणाधिपाः ।
देव एवैष रूपेण भार्या भूत्वावतिष्ठते[१२९] ।।१२०।।
मावमन्यत देवीं तां योगात् किं नावबुध्यथ ।
इत्येवं जल्पमानास्ते अन्योन्येन[१३०] गणोत्तमाः[१३१] ।
जग्मुः स्वभवनान्येव दीप्यमाना यथाग्नयः ।।१२१।।
देवोपि नन्दिना सार्धं सोम्बया[१३२] चाभिरूपया ।
अशोकतरुकस्याध उपविष्टोम्बिकार्चितः[१३३] ।।१२२।।
ततः प्रणम्य[१३४] वरदं[१३५] सोमा[१३६]सोमविभूषणम् ।
उवाच वचसां योनिर्भूतसंघपतिं पतिम् ।।१२३।।
सुनिर्वृतास्मि संवृत्ता त्रिपुरान्धकसूदन[१३७] ।
यन्मयाशोकतरुकः पुत्रः[१३८] प्रकृतकः कृतः ।।१२४।।
समस्तव्यस्तमखिलं त्रैलोक्यं लोकभावन ।
समागतं त्वत्प्रभावात् मम पुत्रतरूत्सवे[१३९]।१२५।।
नूनं मे सुकृतं देव तपः परमभास्वरम् ।
लब्धोसि यन्मया देव सर्वभूतपतिः पतिः ।।१२६।।
देवैर्यच्चापि[१४०] मुषितमिष्टपुत्रफलं पुरा[१४१] ।
तन्मे सर्वं[१४२] व्यपगतं प्राप्याशोकतरुं सुतम् ।।१२७।।
मत्तो[१४३] धन्यतरा देव[१४४] नास्त्यन्या त्रिदिवे[१४५]ङ्गना[१४६] ।
पतिर्वृतपतिर्वीर[१४७] यस्या मे त्वं महेश्वर[१४८] ।।१२८।।

---

१२७ निर्जितो - घ.। १२८ वशगो - घ.। १२९ भूतावर्तिष्ठते - क. ग., भार्याभूतो... (?)। १३० अन्योन्यं तु - घ.। १३१ दिवौकसः - घ.। १३२ साम्बया - क., सोमया - घ.। १३३ ... म्बिकाश्रितः - घ.। १३४ ततोभिपूज्य - घ.। १३५ वरदां - घ.। १३६ सोमं - क. घ.। १३७ त्रिपुरान्तक... - घ.। १३८ पुत्र - क.। १३९ तरुपुत्रमहोत्सवे (?)। १४० देवैर्यच्चात्र - घ.। १४१ ... मिष्टं पुत्रफलं - घ.। १४२ सव्यं (त्यं) - क.। १४३ मया - घ.। १४४ देवि - क.। १४५ त्रिदिवो - ख., त्रिदिवा - घ.। १४६ त्रिदिवाङ्गना - ख.! १४७ पतिता पतिवीरस्य - घ.। १४८ महेश्वरः - क. ख.।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

भवं भवानी प्रीत्यैवमुक्त्वा मुक्तावलीधरा ।
पपात पद्भ्यां देवस्य नेत्रास्रापूरितेक्षणा ॥१२९॥

तामुत्थाप्य गिरीशस्तु परिष्वज्य च पीडितम्[१४९] ।
निवेश्य - - - रुमूरूभ्यां[१५०] सस्नेहमिदमब्रवीत्[१५१] ॥१३०॥

देवी सती च साध्वी च सहधर्मचरी च मे ।
ब्रह्मण्या च शरण्या च त्वं मे नित्यं प्रिया प्रिये ॥१३१॥

अकार्यमपि कार्यं हि अतो[१५२]देवि मया तव ।
किं पुनर्यद्यशोऽन्मिश्रमीदृशं[१५३] धर्मसंयुतम् ॥१३२॥

तर्पिता ब्राह्मणा देवि देवाश्च सगणास्त्वया ।
गृहीतः पुत्रकश्चायं त्वयाशोकतरुः प्रिये ॥१३३॥

एहि देवि गृहान् याम संपूर्णस्ते मनोरथः ।
भूयः सुतं[१५४] तं द्रक्ष्यामः स्तबकैः समलंकृतम् ॥१३४॥

इत्युक्ता पतिना साध्वी हर्षपूर्णमुखेक्षणा ।
प्राहेदं वचनं तत्र हरितं हरिणेक्षणा[१५५] ॥१३५॥

हरिणाक्ष स्थितमिह[१५६] अमुं[१५७]पुत्र सुपुत्रकम् ।
गोपायस्व हरे यत्नाद् गजाश्वाच्चाण्डजाण्डपात् ॥१३६॥

यदि वापि भवेदेष स्तबकैः समलंकृतः ।
अशोकपुत्रको मह्यं तदा मां द्रष्टुमर्हसि ॥१३७॥

इति संदिश्य हरितमुद्भ्रान्तहरिणेक्षणा ।
सापाङ्गचक्षुर्विक्षेपं कृत्वोमा पतिना सह ।
विवेश सदनं देवी प्रभेवादित्यमण्डलम् ॥१३८॥

इति पशुपतिना सहैव देवी सुतमुपगृह्य तरुं ह्यशोकपोतम्[१५८] ।
प्रमुदितगणमध्यगा विवेश स्वभवनमेव तदा प्रहृष्टचित्ता ॥१३९॥

⊙ इति स्कन्दपुराणे अशोकतरुपुत्रग्रहणे द्विषष्ट्युत्तरशततमोऽध्यायः ⊙

---

१४९ परिष्वज्यावपीडितम् - (?), पीडितां - घ. । १५० . सूरुभ्यां (?) - क., वरशूराभ्यां - घ. । १५१ सस्नेहामिदमब्रवीत् - ख. । १५२ कर्तव्यतो (?) । १५३ यंशसा मिश्रमीदृशं - घ., ... श्चेदृशं - ख. । १५४ शुभं - घ. । । १५५ हरिणेक्षणं - घ. । १५६ स्थितिरिह - घ । १५७ ... मुमं - घ. । १५८ ह्यशोकवृक्षम् - क. ख. । १५९ २११ - ख., इतः परं नियमानुष्टानमहिमाख्यानात्मकाः कतिपयेध्यायाः अधिका घ.पुस्तके ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

व्यास उवाच

शार्वं तेजः समादाय वह्निः किं कृतवाँस्तदा ।
कथं स्कन्दस्समुत्पन्नः कस्मिँस्थाने महाद्युतिः ॥१॥
सेनापत्ये कथञ्चासावभिषिक्तः सुरोत्तमैः ।
किमर्थमभिषिक्तश्च[१] कस्मिन्देशेपि वा प्रभो ॥२॥
तारकश्च कथं तेन निहतो रणमूर्धनि ।
एतदिच्छाम्यहं वेत्तुं त्वत्प्रसादान्महामुने ॥३॥
इति विज्ञापितो धीमान् व्यासेनाक्लिष्टकर्मणा ।
प्रोवाच वदतां श्रेष्ठः पितामहसुतस्तदा ॥४॥

सनत्कुमार उवाच

अथ त्रैलोचनं तेजः सुतसंकल्पसंभवम् ।
न धारयितुमुत्सेहे दीप्तिमानपि पावकः ॥५॥
दाहात्मकोपि भूतानां दह्यमानस्स तेजसा ।
गङ्गामभ्यर्थयामास धारणे तस्य तेजसः ॥६॥
सा तेनाभ्यर्थिता देवी हुताशेन त्रिलोकगा ।
एवमस्त्विति साशङ्कमुवाच मधुरस्वरा ॥७॥
तत्तेजो देवदेवस्य तेजस्वी हव्यवाहनः ।
तदा संक्रामयाञ्चक्रे गङ्गायां योगमायया ॥८॥
ज्ञात्वापि दुर्धरं तत्सा प्रतिपेदे वरानना ।
अर्थिप्रणयनिर्भङ्गदोषभीता[२] सरिद्वरा ॥९॥
अथ सा क्षिप्रमभवन्मन्थरालसगामिनी ।
प्रभावात्तेजसस्तस्य श्यामोन्मुखपयोधरा[३] ॥१०॥
भिन्नाञ्जनरुचा तन्व्या[४] रोमराज्या रराज सा[५] ।
घनराज्या घनापाये लेखेवानुष्णदीधितेः ॥११॥

---

१ कमर्थमभिषिक्तश्च - क. । २ प्रणयिनिर्भङ्गदोषभीता - क ख. । ३ श्यामामुखपयोधरा - क. । ४ तन्वी (?)।
५ च - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जगाम च तदा ग्लानिं किञ्चिदाविप्लुतेक्षणा ।
नोपलेभे तदा देवी रतिं शय्यासनेषु च ॥१२॥
अमृतस्यन्दिभिः शीतैः[६] स्पृष्टापि शशिनः करैः ।
मम्लौ[७] सा तेजसा तेन दह्यमाना तदानघा[८] ॥१३॥
- - - - ि - - ि - - शरस्तम्बाभिराजिते ।
सोत्ससर्ज तदा तेजो हरस्योग्रं शुभेहनि[९] ॥१४॥
शरमध्यात् समभवद् बालो[१०] बालपराक्रमः ।
षड्वक्त्रो द्वादशभुजः सूर्यकोटिसमद्युतिः ॥१५॥
समिध्य विधिना तत्र पावकं पावकत्विषः ।
विश्वामित्रस्तदा चक्रे जातकर्म सुजन्मनः ॥१६॥
कृत्तिकास्तं[११] तदा दृष्ट्वा प्रस्नुतोरुपयोधराः[१२] ।
आजग्मुरन्तिकं तस्य - - - - - - - - ॥१७॥
उपतस्थुश्च तं वेदास्सोपवेदास्ससंग्रहाः ।
कला विद्याश्च निखिला लक्ष्मीर्मेधा सरस्वती ॥१८॥
कान्तिर्धर्मो दया क्षान्तिर्धृतिर्धैर्यं पराक्रमः ।
योगस्तेजो बलं प्रज्ञा स्थितिर्गाम्भीर्यसत्क्रियाः ॥१९॥
अथातो धनुरादाय दिव्यमद्भुतविक्रमः[१३] ।
सन्धाय लीलया बाणं स मुमोच गिरौ - - ॥२०॥
प्रोद्भिन्नं सहसा तेन भूभृतः शिखरोत्तमम् ।
पपाताशु परित्रस्तभीतोद्भ्रान्तविहङ्गमम् ॥२१॥
तद् दृष्ट्वा महदाश्चर्यं सत्वानां तन्निवासिनाम् ।
विस्मयश्च भयञ्चैव युगपत् संबभूवतुः ॥२२॥
अथ प्रेक्ष्य भयं तस्मादात्मनो बलसूदनः ।
मातृः संप्रेषयामास विनाशायामितद्युतेः ॥२३॥

---

६ अमृतस्यन्दनिःशीतैः - क । ७ मम्ले - ख. । ८ तदानघाः - क. । ९ इतः परं पत्रमेकं खण्डितं क. पुस्तके । १० बलो - ख. । ११ कृत्तिकास्ते - ग. । १२ प्रग्वं (पुत्रं) चारुपयोधराः - ख. । १३ घ.पुस्तके भिन्नक्रममेतदाख्यानम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

आगत्य मातरस्तत्र दृष्ट्वा तं तेजसां निधिम् ।
तमेव शरणं जग्मुस्तत्तोजोहृतचेतसः ।।२४।।
आजगाम ततः क्रुद्धः सह व्रातैर्दिवौकसाम् ।
ऐरावतगजस्कन्धमारूढः पाकशासनः ।।२५।।
आगच्छतः सुरान्दृष्ट्वा ननादोच्चैर्महाद्युतिः ।
अभ्यद्रवच्च संक्रुद्धः सिंहो मत्तान् गजानिव[१४] ।।२६।।
बभूवुस्तेन नादेन मुहुर्मूढा दिवौकसः ।
अभूदैरावणस्यापि मदध्वंसः[१५] कपोलयोः ।।२७।।
अर्चींषि च[१६] प्रदीप्तानि विससर्ज सहस्रशः ।
त्रिलोचनसुतस्तेषां सुराणां सुरदर्पहा ।।२८।।
अर्चिर्भिर्हृतकान्तीनि मुखान्यसुरविद्विषाम् ।
बभूवुर्हिमदग्धानि सरोजानि सरःस्विव[१७] ।।२९।।
अथ वज्रं समादाय ज्वलितं ज्वलनद्युतेः ।
रोषादाताम्रनेत्रान्तो विससर्ज शतक्रतुः ।।३०।।
तेन वज्रप्रहारेण स द्विर्मूर्त्तिस्तदाभवत् ।
द्वाभ्यामपि च मूर्त्तिभ्यामभ्यधावत् पुरन्दरम् ।।३१।।
अथ दर्पं विहायाशु प्रणेमे पाकशासनः ।
तेजसां निधये तस्मै प्राह चैवं[१८] विनिर्जितः[१९] ।।३२।।
गृहाण राज्यमप्येयत्[२०] प्रार्थनीयं मनस्विनाम् ।
त्वमेव युक्तो[२१] लोकानां पालने पावकात्मज ।।३३।।
सत्स्वप्यन्येषु[२२] तेजस्सु तमसां[२३] विनिहन्तृषु[२४] ।
अग्नावेव हविः पुण्यं हूयते - - - - - ।।३४।।
- - - - - - - - - - - - - - - - - ।
प्राह प्रभवतां श्रेष्ठो विहस्य विबुधाधिपम् ।।३५।।

---

१४ मत्तगजानिव - घ. । १५ समदध्वं (त्वं) - ख. । १६ स (?) । १७ सरेष्विव - ख. ग. । १८ चेत्यं - ग., चैनं (?), चेदं (?) । १९ विनिर्मितः - ग., दिवि स्थित (?) - ख. । २० ...मद्यैव - ग. । २१ मुक्तो - ख, शक्तो - ग. । २२ सत्स्वप्येसु (षु) च - ख. । २३ तपसा - ख । २४ विनिवर्तिषु - ख.।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शाधि शक्र त्वमेवेदं राज्यं चिरमभीप्सितम् ।
अनेन बहुदोषेण नाहमर्थी पुरन्दर ॥३६॥
निशाम्य तद्वचः श्रीमान् स्कन्दस्याक्लिष्टचेतसः ।
अर्थवद्वचनं श्लक्ष्णं पुनराह शचीपतिः ॥३७॥
- - - - - - - - - - - - - - - - - - - ।
- - - - - - - - - - - - - - - - - - - ॥३८॥
दर्शय नो विचित्राणि कार्यजातान्यनेकधा ।
संगतानि विभिन्नानि - - - - - - - - ।
त्रैलोक्यराज्यग्रहणं स्वनुबद्धमनव्ययम् ॥३९॥
एवमुक्तवति प्राह सम्भवत्यनलद्युतिः[२५] ।
स्निग्धगम्भीरया वाचा स्मितपूर्वमिदं वचः ॥४०॥
न विचालयितुं चेतः[२६] शक्र[२७] शक्ता[२८] हठान्मम[२९] ।
न वारि सरितां पत्युरलातैः संप्रतप्यते ॥४१॥
राज्यं राजीवपत्राक्ष न जातु मनसाप्यहम् ।
दोषाणां नित्यमावासं[३०] कामये[३१] पाकशासन ॥४२॥
तस्य तद्वचनं श्रुत्वा पुनर्वक्तुमियेष सः ।
सुधानिष्यन्दिभिः स्कन्दं स्नपयन्निव लोचनैः ॥४३॥
आकरे[३२] तेजसां श्लाघ्ये नैतच्चित्रं त्वयि प्रभो ।
शक्ता एवं[३३] न सज्जन्ते भोगेषु सुमहत्स्वपि ॥४४॥
सेनापत्येभिषिच्यस्व सुराणामर्थसिद्धये ।
वपुः (?) संमानयामीह[३४] नाहमाज्ञापये विभो[३५] ॥४५॥
अथ तद्वचनं श्रुत्वा पुरुहूतं महाभुजः ।
द्वादशाक्षः सहस्राक्षमिदमाहोरुविक्रमः ॥४६॥
मम प्रभवति श्रीमान् लोकानां प्रभुरव्ययः ।
अनन्यभूरमेयात्मा वृषकेतुः पुरन्दर ॥४७॥

---

२५ शम्भवत्यनिलद्युतिः - ख. । २६ चैव - क. । २७ शक्रः - ग. । २८ शक्तः (क्तः) - ग. ।
२९ शठा मम - ख. ग. । ३० निलयं नित्यं - ग. । ३१ कामोयं - ख. । ३२ आधारे - ख. । ३३ एव - ख.।
३४ ..माहं - ख., ... म्यहं - ग., नाज्ञापकमहं - ख. । ३५ प्रभो - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तमाराध्य प्रभुं भक्त्या गृहाणाज्ञां शतक्रतो ।
तामहं प्रतिपत्स्यामि[३६] यामसौ दास्यति प्रभुः ॥४८॥
तस्याभिप्रायमाज्ञाय देवदेवो वृषध्वजः ।
आजगाम सपत्नीको दिदृक्षुस्तनयं तदा ॥४९॥
स्वाहया सहितो वह्निर्गङ्गा च सरितां वरा ।
कृत्तिकाश्च सुसंहृष्टाः श्वेतं शिखरिणां वरम् ॥५०॥
युगपत्ते तदा तत्र श्वेतस्य शिखरोत्तमे ।
चिन्तयामासुरायान्तः कन्नु स्कन्दोभियास्यति ॥५१॥
अथ तेषामभिप्रायं ज्ञात्वा मतिमतां वरः ।
षोढा समभवत् स्कन्दो योगीशो बलवत्तदा ॥५२॥
स्कन्दोभ्यगान्महादेवं विशाखो हिमवत्सुताम् ।
नैगमेषो ययौ गङ्गां वह्निं शाखो महाद्युतिः ॥५३॥
स्वाहां जगाम संहृष्टः काकपक्षधरो गुहः ।
कृत्तिकाः[३७] षण्मुखः श्रीमान् वेगादभिससार च ॥५४॥
मनोरथान् स सर्वेषां देवदेवात्मजः प्रभुः ।
युगपद्योगिनामीशः पूरयामास मूर्तिभिः ॥५५॥
अथ तस्मै ददौ शम्भुरस्त्रग्रामं चतुर्विधम् ।
सुधाकणपरिस्रावि चूडारत्नं च पार्वती ॥५६॥
स्वमनोनिर्मलां गङ्गा विशुद्धाममृतोद्भवाम् ।
एकावलिं ददौ तस्मै गुहायोत्फुल्ललोचना ॥५७॥
द्विषत्प्राणहरां गुर्वीममोघां हव्यवाहनः ।
अर्चिष्मतीं ददौ चास्मै शक्तिं शक्ताय सूनवे ॥५८॥
पताकां महतीं रक्तां ज्वलत्पावकसप्रभाम् ।
किङ्किणीनादितां दिव्यां प्रादात् स्वाहा महात्मने ॥५९॥
सुपुण्यगन्धामुत्फुल्लां स्वरजःपरिपिञ्जराम् ।
कृत्तिकाश्च ददुस्तस्मै[३८] मालामञ्चितकेसराम् ॥६०॥

३६ प्रतिवक्ष्यामि - ग. । ३७ कृत्तिकां - क. ख. । ३८ ददौ तस्मै - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथाजग्मुः सुराः सर्वे पितामहपुरःसराः ।
श्वेताद्रेः शिखरं रम्यं वृषकेतुं दिदृक्षवः ॥६१॥
तानागतान् समं सर्वान् तदा तत्र दिवौकसः ।
दृष्ट्वा संभावयामास महादेवः प्रसन्नया ॥६२॥
प्रणम्य देवदेवेशं[३९] लब्ध्वानुज्ञां[४०] दिवौकसः ।
शिलासु शशिगौरीषु निषेदुरमितौजसः ॥६३॥
प्रोत्तुङ्गशिखरः श्वेतो द्युतिमानपि भूधरः ।
तेजसां सन्निपातेन बभूव द्युतिमत्तरः ॥६४॥
अथ प्रचोदितः सर्वैर्विबुधैर्विबुधाधिपः ।
व्यज्ञापयन्महादेवं प्रणम्य वदतां वरः ॥६५॥
तारकाख्येन नो लक्ष्मीरामृष्टा[४१] प्रसभं प्रभो ।
वज्रं वक्षःस्थले तस्य कठिने कुण्ठतां[४२]ययौ ॥६६॥
चक्रं हरेः सहस्रारं ज्वलितं ज्वलितौजसः ।
आसाद्य मृदुतां भेजे कण्ठं तस्यामरद्विषः ॥६७॥
दण्डो वैवस्वतस्यापि प्रदीप्तानलभास्वरः[४३] ।
अलातमिव तोयौघे निर्वाणो दानवोरसि ॥६८॥
समरे रिपुदुर्वारो महापाशः प्रचेतसः ।
तस्य कण्ठे समभवन्मन्त्रेणेव वशीकृतः[४४] ॥६९॥
उत्पाटच[४५] प्रसभं तेन नन्दने कल्पपादपाः[४६] ।
निवेशिता यथाकामं स्वगृहोद्यानभूमिषु ॥७०॥
समीपे तस्य साशङ्कस्तालवृन्तायतेनिलः ।
स्वपुष्पनिकरैर्भीता ऋतवस्तमुपासते ॥७१॥
हविर्भुजि हुतं हव्यमाच्छिनत्ति बलादसौ ।
मिषतां सर्वदेवानां देवदेव दितेः सुतः ॥७२॥

---

३९ देवदेवाय - क. ख. ग. । ४० लब्धानुज्ञां - क., लब्धानुज्ञा - ग. । ४१ ...रामिष्टा - क., ...राशिष्टा - ग. । ४२ कुण्ठितां - ख., कुण्ठितं (?) । ४३ भासुरः - क. । ४४ वशीकृते - ख. । ४५ उत्पाटचाप्रसभं - क. । ४६ पादपान् - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अभिषिच्य सुराः स्कन्दं सेनापत्ये महाद्युतिम् ।
जेतुमिच्छन्ति दैत्येन्द्रं प्रसादात्तव शङ्कर ॥७३॥
एवं विज्ञापितस्तत्र वज्रिणा वृषभध्वजः ।
दादावनुज्ञां स्कन्दाय[४७] सेनापत्याभिषेचने ॥७४॥
अथ विबुधसमूहैर्वन्दितो वन्दनीयो
मदनतनुविहन्ता बालचन्द्रार्धमौलिः ।
तनयमभिसमीक्ष्य स्नेहसंफुल्लनेत्रः
शशिकिरणसिताद्रेराशु सोन्तर्बभूव ॥७५॥

⊙ इति स्कन्दपुराणे स्कन्दाभिषेकानुज्ञाने त्रिषष्टयुत्तरशततमोध्यायः[४८] ⊙

सनत्कुमार उवाच

अथ ते स्कन्दमादाय सुरा ब्रह्मपुरस्सराः ।
समन्तपञ्चकं पुण्यमाजग्मुरमितौजसः ॥१॥
तस्मिँस्तीरे सरस्वत्याः प्रागुदक्प्रवणे समे ।
विस्तीर्णे श्वभ्रपाषाण[१]कण्टकोषरवर्जिते ॥२॥
स्कन्दस्य[२] परितः सर्वे तदा संहृष्टचेतसः ।
निषेदुस्ते सुरश्रेष्ठा[३] ज्वलितानलवर्चसः ॥३॥
तत् पुण्यममरैः पृक्तं स्थानं पुण्यतरं[४] पुनः ।
अभूद् गाङ्गैरिवाम्भोभिः समेतं[५] यामुनं पयः ॥४॥
आजगामाथ तं देशं क्षितिर्मूर्त्तिमती तदा ।
स्कन्दाभिषेके सञ्जाते हर्षसंफुल्ललोचना ॥५॥
अथासौ क्षिप्रमभवद् देशः कनकबालुकः ।
विचित्रः परितश्चित्रैः स्फुरद्रत्नगभस्तिभिः ॥६॥

---

४७ स्कन्दस्य (?) । ४८ २११ - ख. पु. ।
१ स्वर्णपाषाण - ख. । २ स्कन्दश्च (?) । ३ विषेदुरमरश्रेष्ठाः - ख. । ४ पुण्यतमं - क. । ५ संपृक्तं (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अध्यासत[६] महात्मानो यं देशमपमत्सराः ।
निरस्तदुरितः सोभूत्तत्र[७] तेषां विभूतिभिः[८] ॥७॥
अथ सिंहासनं दिव्यं शातकुम्भं सुसंस्कृतम्[९] ।
गृहीत्वा गिरिभिः सार्धमाजगाम हिमलयः[१०] ॥८॥
रत्नैरोषधिभिर्गन्धैः पूर्णान् पुण्यैश्च वारिभिः ।
आदाय कलाशान् हैमान् फुल्लाम्बुरुहमालिनः ॥९॥
उदन्वन्तः सुसम्भ्रान्ताः प्रचलन्मणिकुण्डलाः ।
आजग्मुस्त्वरितास्तत्र हारविभ्राजितोरसः ॥१०॥
गङ्गा रत्नमयाँश्चारून् कलशान्[११] स्फुरितत्विषः ।
हैमाम्बुजकृतोत्तंसान् पूर्णान् परमवारिणा ॥११॥
गृहीत्वा सह सर्वाभिस्सरिद्भिस्सरिताम्बरा ।
आजगाम तदा हर्षात् प्रस्खलन्ती समेष्वपि ॥१२॥
अभिषेचनिकान् कुम्भान् ग्राहयित्वा सुसंस्कृतान् ।
नानारत्नप्रभोद्योतप्रतिरक्तार्कदीधितीन् ॥१३॥
देवीभिः सह बह्वीभिराजगाम दिवौकसाम् ।
आक्रामन्तीव तेजांसि तेजसा स्वेन पार्वती ॥१४॥
अद्भिः परमपुण्याभिः पूर्णान् रत्नांशुमालिनः ।
कलशान् स्फाटिकान् शुभ्रान्[१२] ग्राहयित्वा सुसंस्कृतान् ॥१५॥
मुकुटं च महच्छ्लाघ्यं दीप्तिमच्चारुविग्रहम् ।
नानारत्नविचित्रांशुसमूहस्फुरितोदरम् ॥१६॥
हारञ्च निर्मलं[१३] शुद्धं शशाङ्ककिरणत्विषम् ।
कान्तं मुक्तावितानञ्च[१४] चेतोहारि सुनिर्मलम्[१५] ॥१७॥
अभ्यागमत्तदा तत्र प्रहृष्टो यादसां पतिः ।
दानवाधिपमातङ्गविषाणोल्लिखिताङ्गदः ॥१८॥

---

६ अध्यासन्त - क. ख. । ७ शश्वत्तत्र - ख., सश्च - क । । ८ विभूतयः - क. ख. । ९ शातकुम्भसुसंस्कृतम् - क. । १० हिमाचलः - ख. । ११ ... श्चारुकलशान् - ख. । १२ स्फाटिकमयान् - क. ख । १३ निस्ततं - क., कान्तमुक्तावितानञ्च - ख. । १४ चेतसां हार्रनिर्मलम् - क. ख., हारि ... (?) । १५ निर्मलम् - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

रत्नाङ्गदानि चारूणि द्युतिमन्ति धनेश्वरः ।
समादायाभ्यगात् सारं सर्वासामिव सम्पदाम् ।।१९।।
निशाकरांशुगौराणि [१६] दीर्घाणि रुचिमन्ति च ।
आदाय रत्नदण्डानि चामराणि महाद्युतिः [१७] ।।२०।।
वैवस्वतोपि सं [१८] पूर्णशरच्चन्द्रांशुनिर्मलम् ।
प्रोद्वहन् वक्षसा हारमाजगाम तदन्तिकम् ।।२१।।
आतपत्रापदेशेन ददौ तस्मै महात्मने ।
फलं सुराधिपत्यस्य समग्रमिव वासवः ।।२२।।
भूषयन्तस्तरूँस्तत्र खपुष्पनिकरोद्‌गमैः ।
ऋतवस्तं तदा देशमाजग्मुस्तुष्टचेतसः ।।२३।।
अरुन्धती शची स्वाहा सिनीवाली गिरीन्द्रजा ।
अदितिर्देवमाता च निशा सानुमतिः [१९] कुहूः ।।२४।।
ह्रीः श्रीः पुष्टिर्दिशो [२०] द्यौश्च सुताः सर्वाः प्रजापतेः ।
राका च धिषणा चैव सुरभिर्देवयोषितः ।।२५।।
ओषध्यो मूर्त्तिमत्यश्च कौशिकी वनदेवता ।
अहः काष्ठा मुहूर्त्ताश्च मासाः संवत्सरः कलाः ।।२६।।
ऐरावणः सुप्रतीको वामनः कुमुदोञ्जनः ।
पुष्पदन्तो महापद्मः [२१] सार्वभौमश्च दिग्गजाः ।
आभिषेचनिकं सर्वमुपनिन्युर्महात्मनः [२२] ।।२७।।
ज्वलितवह्निसमानरुचो जटाः परिनियम्य हिमाचलवासिनः ।
तमभिजग्मुरुदीर्णतपोबला मुनिवरा मुदिता दहनात्मजम् ।।२८।।
विबुधसद्मरता ज्वलितौजसस्त्रिदशवन्दितपादसरोरुहाः [२३] ।
ऋषिगणास्त्वरिताभिययुर्गुहं [२४] नियमितोर्जितनित्यतपःक्रियाः [२५] ।।२९।।

---

१६ निशाकरोंशुगौराणि - ख. । १७ महाद्युते (तेः) - क. । १८ यत् - क. । १९ सानुमती - क. ।
२० ह्रीः पुष्टिर्विदिशो - ख. । २१ पुष्पदन्तः पुण्डरीकः (?) । २२ अभिषेचनिकीः सर्वे अपो निन्युर्महात्मनः - ख. ।
२३ ... पादविवन्दिसरोरुहाः - क. । २४ गुंहं - क. । २५ नियमिता नियतेन्द्रिय... - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

समुदिता मुदितोत्सुकमानसाः कमलयोनिसुताश्च महौजसः ।
तमभिजग्मुरुदारयशोभृतस्त्रिनयनात्मजमग्र्यबलोदयम् ॥३०॥
अभियुयुस्त्वरिता भुजगेश्वराः स्वफणिरत्नमरीचिवितानिनः[२६] ।
विषभृतोप्यतिसौम्यवपुर्धरा दहनसूनुमलंघ्यपराक्रमम् ॥३१॥
उपययुर्गरुडाश्च विमत्सरा भुजगराजसुरूढबलोदयाः ।
द्रुततरं तरुणार्कसमद्युतिं पवनवेगविजिह्मितपादपाः ॥३२॥
ननृतुरायतलोलविलोचना विविधभावविलासरसान्विताः ।
परमयौवनरूपगुणान्विताः[२७] प्रमुदिताः परितोप्सरसोलसाः ॥३३॥
विविधपुष्परजोरुणमूर्त्तयः सुरभिगन्धवहा विववुस्तदा ।
विरजसोतितरां मृदुवृत्तयो[२८] विबुधचित्तसुखाश्च समीरणाः ॥३४॥

आभिषेचनिकं कृत्स्नं विधिं तस्य बृहस्पतिः ।
समिद्ध्य ज्वलनं सम्यक् चचार शरजन्मनः ॥३५॥
आशीर्भिराशिषां धाम समाश्लिष्य शिवात्मजम् ।
स्तुत्यं स्तुतिभिरग्र्याभिस्तुष्टुवुर्मुनयस्तदा ॥३६॥
मङ्गलानि जगुस्तस्य गन्धर्वा नारदश्च यः ।
प्रतिसार्य तदा वीणां तारं रक्तमनाकुलम् ॥३७॥
अथ तं दक्षिणे पाणौ गृहीत्वा कृतमङ्गलम् ।
गुरुः सिंहासने तस्मिन् प्राङ्मुखं संन्यवेशयत्[२९] ॥३८॥
अनाहतास्तदा व्योम्नि नेदुरुच्चैर्दिवौकसाम् ।
भृशं दुन्दुभयश्चित्राः सम्यक् चेतोपहारिणः ॥३९॥
मत्तद्विरेफसंगीताः स्वकिञ्जल्कारुणत्विषः ।
पुण्यगन्धा विचित्राश्च निपेतुः पुष्पवृष्टयः ॥४०॥
चतुर्भिर्वदनैः स्कन्दं स्तुवन् गीर्भिः प्रजापतिः ।
आददे कलशं पूर्वं पूर्णं पुण्येन वारिणा ॥४१॥

---

२६ विकाशिनः - ख. । २७ गुणाचिताः - ख. । २८ मृविवित्तदा (?) - क. । २९ स न्यवेशयत् - क, ख, ग, ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

समाधायाम्बरं पीतं ततो विष्णुः समाददे ।
कलशं कौस्तुभमणेः परामृष्टं[३०] गभस्तिभिः ॥४२॥
ततः केयूररत्नांशुखचितं पाकशासनः ।
उत्तरीयं नियम्याशु जग्राह कलशं तदा ॥४३॥
निबध्य शशिलेखाङ्का जटा ज्वलनपिङ्गलाः[३१] ।
जगृहुः कलशान् रुद्रा भुजङ्गकृतकङ्कणाः ॥४४॥
बिभ्रतोपि परां दीप्तिं सुखसंस्पर्शमूर्त्तयः ।
आदित्या[३२] जगृहुः पूर्णान् कलशान् पुण्यवारिभिः ॥४५॥
वसवोपि सुरेन्द्रारिगजदन्तक्षतोरसः ।
आददुः कलशाँस्तत्र पूर्णान् पुण्येन वारिणा ॥४६॥
अश्विनावपि पुण्याभिः पूर्णाविद्भिः सुसंस्कृतौ ।
आददाते तदा कुम्भौ हैमौ रत्नांशुमालिनौ ॥४७॥
कुम्भानाददिरे तत्र ज्वलना ज्वलितत्विषः ।
हैमाम्बुरुहसंछन्नान् चित्रान् रत्नगभस्तिभिः ॥४८॥
नागगन्धर्वराजानो लोकपाला मरुद्गणाः ।
ऋषयो बालखिल्याश्च[३३] पितरः पतगेश्वराः ॥४९॥
धर्मो धाता विधाता च कालो मृत्युर्वसुन्धरा[३४] ।
सन्ध्या कान्तिर्धृतिर्मेधा कीर्तिर्लक्ष्मीः सरस्वती ॥५०॥
समुद्रास्सरितो वेदास्तीर्थानि गिरयो ग्रहाः ।
कुम्भानाददिरे तत्र पूर्णान् परमवारिणा ॥५१॥
अथ ते हृष्टमनसः प्रहृष्टं पावकात्मजम् ।
अभ्यषिञ्चन् तदा सर्वे सेनापत्ये महौजसम् ॥५२॥
जयशब्दं ततश्चक्रुः समं सर्वे दिवौकसः[३५] ।
जयिनः शर्वपुत्रस्य[३६] ऋषयश्च समागताः ॥५३॥

---

३० पृष्टं - क. । ३१ ज(ज्व)लज्ज्वलनपिङ्गलाः - क. ख. । ३२ सूर्याश्च - क ख. । ३३ बालिखिल्याश्च - क. ख. ग. । ३४ वसुन्धराः - क. ख. ग. । ३५ समं सर्वदिवौकसः - क., सममेव दिवौकसः - ग. । ३६ सर्वभूतस्य - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जग्राह मघवा तस्य[३७] श्वेतमातपवारणम् ।
सर्वरत्नप्रभाव्रातवितानपरिवेषवत् ॥५४॥
दुधुवुश्चामरैर्दीर्घैः शरच्चन्द्रांशुनिर्मलैः[३८] ।
परितो रत्नदण्डैश्च लोकपाला महाद्युतिम् ॥५५॥
अमृतादुत्थितं दिव्यमुपनीतं प्रचेतसा ।
मौलिमारोपयाञ्चक्रे[३९] सुतस्य हिमवत्सुता ॥५६॥
हेमावदाते[४०] विस्तीर्णे शशाङ्ककिरणद्युतिम् ।
तस्य वक्षःस्थले हारं बबन्ध सरितां वरा ॥५७॥
हारेणालंकृतं वक्षः किन्नु हारो गुहोरसा ।
इति तत्र वितर्कोभूत्तदा विबुधसंसदि ॥५८॥
आबबन्ध महाबाहोरङ्गदानि स्वलंकृता[४१] ।
भुजेषु पारणालानस्तम्भपीनेष्ववरुन्धती[४२] ॥५९॥
दीप्तिमान् पावकसुतस्तदाभूद्दीप्तिमत्तरः ।
सर्पिषा हूयमानेन ज्वलितोग्निरिवाध्वरे ॥६०॥
ददौ तस्मै चतुर्वक्त्रःप्रभुः प्रीतो महात्मने ।
महापारिषदान् शूरान् बलिनः कामरूपिणः ॥६१॥
घण्टाकर्णं सुरक्ताक्षं नन्दिषेणं च दुर्जयम् ।
चतुर्थं बलिनां श्रेष्ठं ख्यातं कुमुदमालिनम् ॥६२॥
ददौ स्थाणुर्महावीर्यं[४३] महापारिषदं क्रतुम् ।
संप्रवृत्तो तदा घोरे संग्रामे तारकामये ॥६३॥
क्रुद्धो जघान दैत्यानां योयुतानि[४४] चतुर्दश ।
विबुधाश्च ददुस्तस्मै सेनां नैर्ऋतसंकुलाम् ॥६४॥
दैत्ययक्षक्षयकरीमजेयां[४५] विश्वरूपिणीम् ।
ददौ वैवस्वतस्तस्मै महापारिषदावुभौ ॥६५॥

३७ ...न्तस्य - क. ख. ।}३८ सरश्चन्द्रसुनिर्मलैः - क. । ३९ ...मारोपमामास - ख. । ४० हैमावदाते - ग. ।
४१ स्वलंकृतां - क. ग. । ४२ ...नालस्तम्भपीनेस्वरुन्धती - क., काल ... - ख. ।४३ महावीर्यो - ख. ।
४४ प्रयुतानि - क. ख. । ४५ मजेयं - क. ग. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

उन्माथश्च[४६] प्रमाथश्च महावीर्यपराक्रमौ ।
सुभ्राजं भास्वरञ्चैव ददौ सूर्योनुयायिनौ ।।६६।।
कार्त्तिकेयाय संहृष्टो रणे परमदुर्जयौ ।
कैलासशिखराकारौ श्वेतस्त्रगनुलेपनौ ।।६७।।
चन्द्रमापि ददौ तस्मै मणिं सुमणिमेव च ।
ज्वालाजिह्वं तथा ज्योतिमात्मजाय विभावसुः ।।६८।।
ददौ परमसंप्रीतः शत्रुसैन्यनिबर्हणौ ।
परिघं पटहं[४७]भीमं दहातिदहनौ तथा ।।६९।।
अंशोप्यनुचरान् पञ्च ददौ स्कन्दाय धीमते ।
उत्क्रोशं सत्वरञ्चैव वज्रदण्डधरावुभौ ।।७०।।
सुताय देवदेवस्य ददौ प्रीतः शतक्रतुः ।
चक्रं विक्रमकञ्चैव संक्रमञ्चातिदुर्जयम् ।।७१।।
ददौ ज्वलनपुत्राय विष्णुः प्रीतो महायशाः ।
बर्द्धनं नन्दनञ्चैव सर्वविद्यान्तगावुभौ[४८] ।।७२।।
स्कन्दाय ददतुः[४९] प्रीतावश्विनौ[५०] च महाबलौ ।
कुन्दरं कुमुदं चोग्रं कुमुदञ्च(?) महाबलम् ।।७३।।
डम्बराडम्बरौ[५१] चौभौ ददौ धाताग्निसूनवे ।
वक्रानुवक्रौ बलिनौ मेषास्यौ[५२] दुर्जयौ रणे ।।७४।।
ददौ त्वष्टा महामायौ स्कन्दायानुचरावुभौ ।
सुव्रतं सत्यसन्धञ्च ददौ मित्रो महात्मने ।।७५।।
सुप्रभञ्च महामायं शुभकर्माणमेव च ।
प्रादाद्विधाता स्कन्दाय शत्रुपक्षनिषूदनौ ।।७६।।
पालिन्तकं महावीर्यं कालकञ्च महाबलम् ।
ददौ पारिषदौ[५३] पूषा स्कन्दायामिततेजसे ।।७७।।

---

४६ प्रमंथश्च - ग. । ४७ वटकं(हं) - क., पट्टहं - ख. । ४८ विद्योत्तमाबुभौ - क. । ४९ प्रददुः - ख. ।
५० अश्विनौ - क. । ५१ डम्बरोदुम्बरौ - ख. । ५२ मेघास्यौ - क. ख. । ५३ च पार्षदौ - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

बलश्चातिबलश्चैव महाकायौ महाबलौ ।
प्रददौ कार्त्तिकेयाय वायुः प्रीतो महात्मने ॥७८॥
घसश्च प्रघसश्चैव तिमिवक्त्रौ महोदरौ[५४] ।
ददौ ज्वलनपुत्राय वरुणः पाशधारिणौ ॥७९॥
सुवर्चसं महावीर्यं तथा चाप्यतिवर्चसम् ।
हिमवान् प्रददौ तस्मै स्कन्दायातिबलावुभौ ॥८०॥
काञ्चनश्च महामायं तथा जीमूतमालिनम् ।
ददावनुचरौ मेरुरुभौ[५५] ज्वलनसूनवे ॥८१॥
स्थिरश्चातिस्थिरश्चैव तथा परिषदावुभौ ।
पुनर्ददौ महामेरुः स्कन्दायामिततेजसे ॥८२॥
उच्छृङ्गं च विश्रृङ्गं[५६] च शिलापाषाणयोधिनौ ।
प्रादाद्विन्ध्यो महासत्वौ स्कन्दाय ज्वलितौजसे ॥८३॥
संग्रहं विग्रहं चैव समुद्रश्च गदाधरौ ।
प्रददौ कार्त्तिकेयाय महापारिषदौ तदा ॥८४॥
उन्मादं[५७] पुष्पदन्तं च शङ्कुकर्णञ्च दुर्जयम् ।
महावीर्यान्महासत्वान् प्रादात् पुत्राय पार्वती ॥८५॥
जयं महाजयं चैव ददुर्नागा महात्मने ।
ददौ च[५८] परमप्रीतः स्कन्दाय वृषवाहनः ॥८६॥
बहून्पारिषदाञ्छूरान् समरे दुर्जयान्परैः ।
गजकर्णं निकुम्भञ्च पद्मं कुमुदमेव च ॥८७॥
सनन्दं द्वादशभुजं तथा कृष्णोपकृष्णकौ[५९] ।
कृतग्रीवं कपिस्कन्धं काञ्चनाक्षं जलन्धमम् ॥८८॥
अक्षिसन्तर्दनं कुण्ठं[६०] पार्श्वग्रीवं महोदरम् ।
एकाक्षं द्वादशभुजमेकपादं[६१] महाजटम् ॥८९॥

---

५४ समुद्रश्च गदाधरौ - ख. । ५५ उभौ - क. ख. । ५६ उच्छृतं पातिश्रृङ्गं (?) - क. । ५७ उन्नादं (?) ।
५८ स - ख । ५९ कृष्णापकृष्णकौ - क. । ६० क्रुष्ठं - ख. । ६१ द्वादशभजं वक्त्रपादं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सहस्रबाहुं विकचं व्याघ्रास्यं क्षितिकम्पनम् ।
पृष्ठवक्त्रं सुनामानं पार्श्वाननमहाननौ ॥९०॥
परिस्रुतं कोकनदं प्रियमाल्यानुलेपनम् ।
अजोदरं[६२] गजस्कन्धं स्कन्धाक्षं शतलोचनम् ॥९१॥
ज्वालाजिह्वं करालं च[६३] शितकेशं ततोदरम्[६४] ।
अष्टजिह्वं चतुर्दंष्ट्रं मेघनादं पृथूदरम् ॥९२॥
विद्युदक्षं धनुर्वक्त्रं[६५] जरठं[६६] मारुताशनम् ।
उदराक्षं ऋषाक्षं[६७] च वज्रनाभं च सुप्रभम्[६८] ॥९३॥
समुद्रवेगं गोकर्णं शैलकम्पनमेव च ।
पत्रमेषं प्रबाहुं[६९] च तथा नन्दोपनन्दकौ ॥९४॥
धूम्रं श्वेतं कलिङ्गं च सिद्धार्थं वरदं तथा ।
प्रियकं[७०] गर्दभास्यं च गोनर्दं[७१] भूततापनम् ॥९५॥
आनन्दं च प्रमोदं च स्वस्तिकं ध्रुवकं तथा ।
क्षेपवापं[७२] सुजातं च सिद्धयात्रं महावरम् ॥९६॥
गोव्रजं कनकापीडं महापार्श्वं महोदरम् ।
गायनं हसनं चैव बाणखड्गधरं[७३] प्रभुम् ॥९७॥
वैतालिं चातितालिं च तथा शठिकवातिकौ ।
मांसजं पङ्कदिग्धं च समुद्रोन्माथमव्ययम् ॥९८॥
रणोत्कटं प्रभासं च श्वेतमूर्धानमच्युतम् ।
कालकण्ठशरीरश्च[७४] कुष्माण्डं शत्रुतापनम् ॥९९॥
गोमायुवक्त्रं श्येनास्यं भूतलोन्माथनं तथा ।
यज्ञवाहं प्रवाहं च काकास्यं काकलोचनम् ॥१००॥
मञ्जुलं वक्रनासं च महानासं गजोदरम् ।
तुहनं च तुहानं[७५] च चित्रदेवमजं[७६] खरम् ॥१०१॥

---

६२ अञ्जोदरं - क. । ६३ करालास्यं - ख. । ६४ नतोदरम् - ख. । ६५ धनुष्कण्ठं (?) - क. । ६६ जठरं - क. ख. । ६७ मयाक्षं - ख. । ६८ वसुप्रभम् - ख. । ६९ प्रवाहं - क. । ७० प्रियाक्षं (?) । ७१ गोनदं - ख. । ७२ क्षेमवापं - ख. । ७३ पाण्योः खड्गधरं - ख. । ७४ बालकण्ठशरीरश्च - ख. । ७५ तुदानं - ख. । ७६ चित्रदेहमजं (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मधुरं सुप्रसादं च किरीटं मकुटोत्कटम्[७७] ।
वसनं मधुवर्णश्च[७८] कलशं कलशोदरम् ॥१०२॥
रेवन्तं[७९] मन्मथकरं सूचीवक्त्रं गजाननम् ।
श्वेतवक्त्रं सुवक्त्रं च चारुवक्त्रं च पाण्डरम् ॥१०३॥
कण्ठबाहुं सुबाहुं च बकं कोकिलकं तथा ।
अचलं कनकाक्षं च बलानामग्रनायकम् ॥१०४॥
सञ्चारं च कोकमुखं गृध्रास्यं जम्बुकं तथा ।
लोमशश्च जरास्यं च उष्ट्रग्रीवं कमण्डलुम्[८०] ॥१०५॥
दण्डकं दीर्घवक्त्रं च हंसवक्त्रं महाबलम् ।
टुण्डुकं[८१] शतपादं च शताक्षं चापपृष्ठकम् ॥१०६॥
शिक्षकं चापवक्त्रं च शाखवक्त्रं[८२] च कुण्डकम् ।
महायोगान्महासत्वान् सततं ब्रह्मचारिणः ॥१०७॥
अप्रधृष्यान्महावीर्यान् समरे रिपुसूदनान् ।
नानाशस्त्रप्रहरणान् नानारूपान् महौजसः ॥१०८॥
नानावक्त्रैः परिवृतान् गणैश्च गणनायकान् ।
गजेन्द्रचर्मवसनान् व्याघ्रकृष्णाजिनाम्बरान् ॥१०९॥
रक्तकेशान् हरिश्मश्रून् मुण्डान् दिग्वाससोपरान् ।
जटिनः पिङ्गनेत्राँश्च भुजङ्गकृतमेखलान् ॥११०॥
पन्नगाङ्गदिनः शूराञ्छ्वसद्भोगीन्द्रकुण्लान् ।
पावनैः परिदिग्धाङ्गान्[८३] भस्मभिश्चन्द्रपाण्डरैः ॥१११॥
नृत्यतो वल्गमानाँश्च हासोत्फुल्लविलोचनान् ।
गणैः परिवृतानन्यैर्बहुभिर्गणनायकान् ॥११२॥
कूर्मकुक्कुटवक्त्रैश्च शशगोधावृकाननैः ।
खरोष्ट्राश्वमुखैर्भीमैर्वराहमहिषाननैः ॥११३॥

---

७७ किरीटम(मु)कुटोत्कटम् - ख. । ७८ मधुपर्णश्च - ख. । ७९ एवन्तं - ख. । ८० कमण्डलं (?) ।
८१ कन्डुकं - ख. । ८२ शाखावक्त्रं - क. । ८३ परिदुग्धाङ्गान् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मनुष्यमेढवक्त्रैश्च[८४] श्वभृगालमृगाननैः ।
भीमैर्मकरवक्त्रैश्च शिशुमारझषाननैः ।
मार्जारवृकवक्त्रैश्च[८५] दीर्घवक्त्रैरवक्त्रकैः ॥११४॥
लकुलोलूकचक्राह्वशतपत्रनिभाननैः ।
आखुबभ्रु विडालानां तुल्यास्यै रिपुदुर्जयैः ॥११५॥
छागमेषमुखैश्चान्यैः शुककारण्डवाननैः ।
ऋक्षशार्दूलवक्त्रैश्च द्विपिसिंहाननैस्तथा[८६] ॥११६॥
भीमैर्द्विरदवक्त्रैश्च[८७] तरक्षुवदनैस्तथा[८८] ।
गरुडक्रोष्टुकास्यैश्च काककोकिलवक्त्रकैः ॥११७॥
गोवानरमुखैश्चान्यैः[८९] श्येनगृध्रमुखैस्तथा ।
महाजठरपादाङ्गैस्तारकाक्षैर्महाबलैः ॥११८॥
पारावतमुखैश्चान्यैः कृकवाकुमुखैस्तथा ।
लावतित्तिरिवक्त्रैश्च कृकलासमुखैरपि ॥११९॥
पीतकौशेयवासोभिश्चीरवल्कलधारिभिः ।
फणीन्द्रानद्धगात्रैश्च चित्रगोनसकङ्कणैः[९०] ॥१२०॥
स्थूलोदरैः कृशाङ्गैश्च स्थूलाङ्गैश्च कृशोदरैः ।
ह्रस्वग्रीवैर्महाकर्णैर्नानाव्यालविभूषणैः ॥१२१॥
गजेन्द्रचर्मवासोभिः शूरैः समरदुर्जयैः ।
स्कन्धवक्त्रैरवक्त्रैश्च पृष्ठास्यैः सर्वतोमुखैः ॥१२२॥
नानाकृतिभुजैर्वीरैर्नानाभुजगभीषणैः[९१] ।
नानावेषै[९२]र्महायोगैर्नानास्थाननिवासिभिः ॥१२३॥
नानावस्त्रधरैश्चान्यै[९३]र्नानामाल्यानुलेपनैः ।
नानाचर्माम्बरैरन्यैर्नानाभरणधारिभिः ॥१२४॥
उष्णीषिभिर्मुकुटिभिः कम्बुग्रीवैः सुसंस्थितैः ।
किरीटिभिः पञ्चशिखैर्जटामुकुटधारिभिः ॥१२५॥

---

८४ मेषवक्त्रैश्च - ख.,। मृष .. - क. । ८५ शुकवक्त्रैश्च - क. । ८६ तरक्षुवदनैस्तथा - क. ।
८७ द्वीपिसिंहाननैश्चैव - क. । ८८ भीमैर्दिरदवक्त्रकैः - क. । ८९ गोधानरमुखैश्चान्यैः (?) ।
९० गोनासकङ्कणैः (?) । ९१ भूषणैः (?) । ९२ नानावेगै - ख. । ९३ नानावक्त्रधरैश्चान्यै - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

त्रिशिखैर्द्विशिखैश्चापि[९४] तथा सप्तशिखैरपि ।
शिखण्डिभिर्दीर्घजटैर्मुण्डैः कपिलमूर्धजैः ॥१२६॥
चित्राक्षकैश्चित्रमुखैश्चित्रस्रगनुलेपनैः ।
चित्राम्बरधरैः वीरैः सततं प्रियविग्रहैः[९५] ॥१२७॥
कृष्णनिर्मांसवक्त्रैश्च[९६] दीर्घपृष्ठैः कृशोदरैः ।
स्थूलपृष्ठैर्महाग्रीवैर्लम्बोदरमहोदरैः[९७] ॥१२८॥
महाभुजैर्महावक्त्रैर्ह्रस्वग्रीवैः कृशाननैः ।
कुब्जैश्च दीर्घजंघैश्च हस्तिकर्णशिरोधरैः ॥१२९॥
दीर्घोष्ठैर्दीर्घजिह्वैश्च[९८] दीर्घाक्षैर्दीर्घनासिकैः ।
महादंष्ट्रैः सुदंष्ट्रैश्च चित्रदंष्ट्रैर्महाबलैः ॥१३०॥
सुविभक्तशरीरैश्च दीप्तिमद्भिः स्वलंकृतैः ।
पिङ्गलाक्षैर्महाकर्णैः शंकुकर्णैरकर्णकैः ॥१३१॥
दीर्घदंष्ट्रैःपृथूरस्कैः स्थूलोष्ठै[९९]र्हरिमूर्धजैः ।
नानापादोष्ठदंष्ट्रैश्च नानाहस्तशिरोधरैः ॥१३२॥
नानाचर्मभिराच्छन्नैर्नानावासोभिरावृतैः ।
हृष्टैः परिपतद्भिश्च नृत्यद्भिश्च महारवैः ॥१३३॥
लम्बकर्णैर्महोरस्कैर्नीलकण्ठै[१००]स्त्रिलोचनैः ।
शुकोदरनिभैः कैश्चित् कैश्चिदञ्जनसन्निभैः ॥१३४॥
श्वेताङ्गैर्लोहितग्रीवैः पिङ्गाक्षैर्भीमदर्शनैः ।
कल्माषपाणिपादैश्च जातीहिङ्गुलकप्रभैः[१०१] ॥१३५॥
चामीकरापीडनिभैः[१०२] श्वेतैर्लोहितराजिभिः[१०३] ।
राजावर्त्तसवर्णैश्च[१०४] मयूरसदृशप्रभैः ॥१३६॥
पाशोद्यतकरैः[१०५] कैश्चिद् व्यात्तवक्त्रै[१०६]र्महारवैः ।
पिङ्गाक्षैर्नीलकण्ठैश्च महापरिघबाहुभिः ॥१३७॥

९४ श्चैव - क. ख. । ९५ विग्रहप्रियैः (?) । ९६ निर्माल्यवस्त्रैश्च (?) । ९७ प्रलम्बोदरमेहनैः (?) ।
९८ दीर्घजंघैश्च - ख. । ९९ स्थूलाक्षै - ख. । १०० ...नीलकर्णैः - क., नीलकण्ठैः - ख. । १०१ जातिहिङ्गु-
लकप्रभैः - ख. । १०२ ...पीतनिभैः - ख. । १०३ श्वेतलोहितराजिभिः (?) । १०४ लाजावर्तसवर्णैश्च (?) ।
१०५ पादोद्यतकरैः - ख. । १०६ व्याघ्रवक्त्रै - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शतघ्नीशक्तिहस्तैश्च गदामुशलपाणिभिः ।
शूलासिपाणिभिः कैश्चिन्महाकायैर्महाबलैः १३८॥
भुशुण्डीप्रासहस्तैश्च वीरैः परशुपाणिभिः ।
पाशमुद्गरहस्तैश्च चक्रतोमरपाणिमिः ॥१३९।
चित्रायुधधरैर्वीरैरावृण्वद्भिर्दिशो दिशम् ।
घण्टाजालविनद्धाङ्गैः किंकिणीजालधारिभिः ॥१४०॥
वृता गणैर्गणाध्यक्षा महासत्वैर्महाबलैः ।
उपतस्थुर्महात्मानं कार्त्तिकेयं यशस्विनम् ॥१४१॥
मातृश्च प्रददौ तस्मै कौशिकीदेहसंभवाः ।
महाबला [१०७] महासत्वाः समरेष्वपराजिताः ॥१४२॥
प्रभावतीं विशालाक्षीं पलितां[१०८] वृषनासिकाम् ।
श्रीमतीं बहुलां सिंहीं विजयां बहुपुत्रिकाम् ॥१४३॥
गोपालीं सुप्रभां षष्ठीं बृहदम्बालिकां[१०९] कृशाम् ।
जयावतीं मालतिकां ध्रुवरत्नां[११०] प्रभाकरीम् ॥१४४॥
सुप्रभां वसुदां[१११] चैव विशोकां नन्दिनीं तथा ।
वज्रचूडां महचूडां वज्रनेमिं[११२] महाप्रभाम् ॥१४५॥
अञ्जनीश्च भरतसेनां कमलाक्षीं शशिप्रभाम् ।
शत्रुञ्जयां महानासां क्रोधनां शलभीं खषीम् ॥१४६॥
माधवीं शुकवक्त्राञ्च कीर्तिनेमिमनिन्दिताम्[११३] ।
गीतप्रियां महामायां वायसीममृतां सतीम् ॥१४७॥
सरस्वतीं भोगवतीं सुभ्रूञ्च कनकावतीम् ।
सुतां लक्ष्मीं वीर्यवतीं विद्युज्जिह्वां महाबलाम् ॥१४८॥
पद्मावतीं सुनक्षत्रां कन्दरां बहुयोजनाम्[११४] ।
सन्तानिकां शिवां चैव कमलां मलदामपि ॥१४९॥

---

१०७ महाबलम् - क. । १०८ पालितां - क. ख । १०९ बृहदत्पालिशां - क. । ११० ध्रुवनन्दां - ख. ।
१११ वसुधां - ख. । ११२ वक्रनेमि - ख. । ११३ ... मनन्दताम् - ख । ११४ बहुभोजनाम् (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सुदामां बहुदामां च सुप्रभां च यशस्विनीम् ।
नृत्तप्रियां वरारोहां सितोलूखलमेखलाम्[११५] ॥१५०॥
शतघण्टां शतानन्दां शतनेत्रां यशस्विनीम् ।
वपुष्मतीं च शीलाञ्च भद्रकालीञ्च भैरवाम् ॥१५१॥
संहारिकां निष्कुटिकां भूतां[११६] चत्वरवासिनीम् ।
सुमङ्गलां स्वस्तिमतीं वृद्धिकामां जनप्रियाम् ॥१५२॥
धनदां सुप्रदां[११७] चैव भवदां सुखदामपि ।
ऐलीं[११८] भेलीं समेलीं[११९] च वेतालीं जननीं निशाम् ॥१५३॥
कण्डूं पिङ्गलिकां चैव देवमित्रां यशस्विनीम् ।
लम्बुषीं[१२०] सनकां चैव चित्रसेनामथाचलाम् ॥१५४॥
कुकूनिकां[१२१] शंखिनिकां[१२२] तथा फर्झरिकामपि[१२३] ।
कुण्डालिकां कोलविलां[१२४] कण्डराञ्च शतोदरीम् ॥१५५॥
उत्क्वाथनीं जुरेलाञ्च[१२५] महावेलां च[१२६] कङ्कणाम् ।
मनोजवां कण्टकिनीं विघसां पूतनां तथा ॥१५६॥
वैशयां[१२७] चर्चिकां[१२८] वामां क्रोधनां मुखमण्डिकाम् ।
मण्डोदरीं च टुण्डाञ्च कोटरां मेघवासिनीम् ॥१५७॥
सुभगां लम्बिनीं लम्बां वामधूलीं[१२९] विकत्थनाम् ।
ऊर्ध्ववेणीधरां चैव ललाटनयनां तथा ॥१५८॥
पृथुबर्हां महाकायां मधुकुम्भां तडित्प्रभाम् ।
मन्थानिकामुन्मनिकां जरायुं जर्जराननाम् ॥१५९॥
ख्यातां दहदहां चैव तथा धमधमामपि ।
खटंखटां[१३०] महावीर्यां वृषणां मणितुण्डिकाम् ॥१६०॥
बद्धवेणीं[१३१] धराधारां पिङ्गाक्षीं लम्बकर्णिकाम् ।
आमोदां च प्रमोदां च तथा लम्बपयोधराम् ॥१६१॥

---

११५ श्वेतोलूखलमेखलाम् - ख. । ११६ भ्र-ां - ख. । ११७ सुगधां - ख. । २१८ वेलीं - ख. ।
११९ समेर्लि - क. । १२० लम्बुमीं - क. ख. । १२१ कुक्कूणिकां - ख. । १२२ शंखनिकां - ख. ।
१२३ जम्भनिकामपि - ख. । १२४ कोलविकां - ख. । १२५ जरेल्लाञ्च - क. । १२६ महावेशां च - ख. ।
१२७ वैशायां - क. । १२८ च द्रूहां - ख. । १२९ शतधूर्लि (?) - क. । १३० खट्वखटां - ख. ।
१३१ बहु (ऊर्ध्वं?) वेणीं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शशोलूकमुखीं कृष्णां खरजंघां महारवाम् ।
शिशुमारमुखीं श्वेतां लोहिताक्षीं विभीषणाम् ॥२६२॥
जटालिकां कामचरीं[१३२] दीर्घजिह्वां च लोलुपाम् ।
कनेलिकां[१३३] वासनिकां मुकुटाञ्च महाबलाम् ॥१६३॥
लोहिताक्षीं[१३४] महाकायां हरिपिण्डीञ्च दुर्जयाम् ।
पशुदां वित्तदां वीरामङ्गदाञ्च महबलाम् ॥१६४॥
पयोदां गोप्रदां शंखां सुनिषण्णां तरस्विनीम् ।
प्रतिष्ठां सुप्रतिष्ठां च रोचमानां सुरोचनाम् ॥१६५॥
गोकर्णीमश्वकर्णीञ्च सशिरां[१३५] खरिकां तथा ।
कचक्रचां मेघरवां मेघमालां विरोचनाम् ॥१६६॥
एता[१३६]श्चान्याश्च[१३७] बहुला मातरो[१३८] मारुतस्यदाः ।
एकाक्षरां[१३९] सुगन्धां[१४०] च कृष्णकर्णीं च दारुणाम् ॥१६७॥
क्षुरकर्णी चतुष्कर्णी कर्णप्रावरणां तथा ।
चतुष्पथनिकेतां च गोकर्णी महिषाननाम् ॥१६८॥
खरकर्णी महाकर्णी भेरीस्वनमहास्वने ।
शंखकुंभश्रवां[१४१] चैव संग्रामेष्वपराजिताम् ॥१६९॥
गणां[१४२] च सुगणां चैव तथा वार्तीं[१४३] च कामगाम् ।
चतुष्पथरवां[१४४] चैव भूतिनीं वन्यगोचराम्[१४५] ॥१७०॥
कार्त्तिकेयानुयायिन्यो नानारूपाः सहस्रशः ।
दीर्घदन्त्योतिनख्यश्च[१४६] दीर्घवक्त्रातिभीषणाः[१४७] ॥१७१॥
चतुरा[१४८] मधुराश्चैव यौवनस्थाः स्वलंकृताः ।
माहात्म्येन च संयुक्ताः कामरूपा महाबलाः ॥१७२॥
निर्मांसगात्र्यः श्वेताश्च जाम्बूनदसमप्रभाः ।
कृष्णा जीमूतवर्णाश्च धूम्रकेश्यो महाभयाः ॥१७३॥

---

१३२ कामचरां - क. । १३३ क्रमेलिकां (?) । १३४ रोहीताक्षीं (?) । १३५ ससिरां - ख. ।
१३६ एतां - क. । १३७ .. श्चान्याश्च - क. । १३८ मारुतो - ख. । १३९ एकाक्षदां - ख. ।
१४० युगन्धां - ख. । १४१ कुम्भस्रवां - क. ख. । १४२ ...गणां - क. । १४३ वापीं - ख. ।
१४४ चतुष्पथरतां - ख. । १४५ वा(धा)न्यगोचराम् - क. । १४६ .. तिनख्यश्च - क. । १६७ .. श्च दारुणाः -ख. ।
१४८ चर श्च - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अमुराणां महादंष्ट्रा दीर्घदंष्ट्राः सिताम्बराः ।
ऊर्ध्वकर्णीधराश्चैव पिङ्गाक्ष्यो लम्बमेखलाः[१४९] ॥१७४॥
लम्बोदर्यो विलम्बोष्ठ्यो लम्बकर्णपयोधराः ।
ताम्राक्ष्यस्ताम्रवक्त्राश्च हर्यक्ष्यो[१५०] हरिमूर्धजाः ॥१७५॥
वृक्षचत्वरवासिन्यश्चतुष्पथनिकेतनाः ।
गुहाश्मशानवासिन्यः शैलप्रस्रवणालयाः ॥१७६॥
नानाभरणधारिण्यो नानास्रगनुलेपनाः ।
नानावस्त्राणि बिभ्रत्यो नानायुधधरास्तथा[१५१] ॥१७७॥
एताश्चान्याश्च संहृष्टा[१५२] ददौ स्कन्दाय कौशिकी ।
वैजयन्तीं ददौ तस्मै मालामञ्चितकेसराम् ॥१७८॥
विष्णुर्विविधगन्धाढ्यामुत्फुल्लां चारुदर्शनाम्[१५३] ।
वाससी विरजस्के च तरुणार्कसमप्रभे ॥१७९॥
संप्रीता प्रीतमनसे[१५४] ददौ स्कन्दाय पार्वती ।
कमण्डलुं सुधावारिसंपूर्णममृतोद्भवम् ॥१८०॥
ददौ प्रीता कुमाराय गङ्गा गम्भीरचेतसे ।
गरुत्मान् दयितं पुत्रं चित्रबर्हं शिखण्डिनम् ॥१८१॥
ददौ स्कन्दाय संप्रीतो बलिनं कामरूपिणम् ।
ताम्रचूडमदाद्वीरमरुणश्चरणायुधम् ॥१८२॥
भववीर्यजवोपेतं स्कन्दाय प्रियदर्शनम् ।
महाभारसहं छागं कामगं कामरूपिणम् ।
प्रददौ वरुणस्तस्मै स्कन्दाय बलवत्तरम् ॥१८३॥
ब्रह्मण्याय ददौ ब्रह्मा मेध्यं कृष्णाजिनाम्बरम् ।
प्रमदाहावविभ्रान्तं[१५५]लोचनोदरसन्निभम् ॥१८४॥
तेजसां निधये तस्मै ददौ दण्डं बृहस्पतिः ।
स्कन्दाय परमप्रीतश्चारुचामीकरस्रजम् ॥१८५॥

---

१४९ लम्बुमेखला: - ख. । १५० हर्यक्षा - क. । १५१ ... स्तदा - क. । १५२ बिभ्रत्यो - क. ।
१५३ ...लोचनाम् - क. । १५४ प्रीतमनसा - क. । २५५ बिभ्रान्तं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सेनापतिं तमभिषिच्य हुताशपुत्रं
सम्यक् प्रहृष्टमनसो विबुधाः समेताः ।
दैत्येश्वरस्य निधनाय महाप्रभावा
यात्रां सुरारिजयिनी[१५६] सहिताः प्रचक्रुः[१५७] ।।१८६।।

⊙ इति स्कन्दपुराणे सेनापत्याभिषेके चतुःषष्ट्युत्तरशततमोऽध्यायः ⊙

सनत्कुमार उवाच

स्कन्दं पुरोधाय सुराः समस्ताः सन्नाहयामासुरनीकमाशु ।
आहत्य भेरीः शतशो महद्भिर्दण्डैर्दृढं हाटकरत्नचित्रैः ।।१।।
दिग्वारणान् भूधरकूटकल्पान् मन्दाकिनीवारिभिराप्लुताङ्गान् ।
आनाय्य गन्धैर्विविधैश्च माल्यैरभ्यर्च्चयाञ्चक्रुरनीकमुख्याः ।।२।।
चित्राणि वर्माणि ततो बबन्धुर्बद्ध्वा[१] प्रयत्नातिशयेन कक्षे[२] ।
तेषां सुयत्नाद्[३] गजवाजिमुख्यान् हैमानि यन्त्राणि तथायुधानाम् ।।३।।
चित्राः समुच्छिश्रियिरे[४] पताका ध्वजाश्च चामीकरचारुदण्डाः ।
क्षुरप्रमाला विविधा बबन्धुः पक्षेषु[५] घण्टाश्च समाससर्ज्जुः[६] ।।४।।
रथञ्च कार्तस्वरचारुचक्रं[७] सांग्रामिकं रत्नमरीचिचित्रम् ।
संयोजयामासुरुदारवेषैः प्रहृष्टचित्तैः खगमैस्तुरङ्गैः ।।५।।
पर्यच्छ[८]मम्भोरुहगर्भगौरं बबन्ध शक्रः कवचं महार्हम् ।
वक्षस्यभेद्ये हरिचन्दनाक्ते वज्रप्रभाप्रज्वलितप्रकाशम् ।।६।।
बबन्धुरुच्चैर्विनियम्य पिङ्गा जटा भुजङ्गैर्बृहतीः श्वसद्भिः ।
चित्राणि हृष्टाः कवचानि रुद्रा वक्षस्सु दैत्यद्विपविक्षतेषु ।।७।।
चित्रं दधानः[९] कवचं महाद्युतिर्निबद्धनिस्त्रिंशतलाङ्गुलित्रवान्[१०] ।
बिभ्रद्धनुः सज्जमपोढपौरुषो जहौ शशाङ्कः सहजां न सौम्यताम् ।।८।।

---

१५६ दमनीं - क. टि. । १५७ प्रजग्मुः - क. ख. ।
१ वुध्वा - क. ख. । २ कक्ष्ये - क. ख. । ३ सयत्ना (?) । ४ समुच्चिच्छ्रियिरे - क । ५ वक्रेपु - क. ।
६ समाससर्जुः - क ख. । ७ कार्तस्वनचारुचक्रं - क. ख. । ८ प्रयच्छ - क. ख. । ९ बध्नान - ख. ।
१० लताङ्गुलित्रवान् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यत्नाद् बन्द्वधुः कवचानि सूर्याः किञ्चित्प्रदीप्तानि तदा स्वदीप्त्या[११] ।
लौहान्यभेद्यानि[१२] शरैः परास्तैश्चारूणि चामीकरचित्रितानि ॥९॥
निबद्धभास्वत्कवचः सुधन्वा[१३] सुपीननिर्स्त्रिंशनिबद्धपार्श्वः ।
गृहीतदण्डो विनिबद्धमौलिर्भयानकोभूत् सुतरां यमोपि ॥१०॥
रुचा परीतः परयातिमात्रं स्फुरन्मुहुः प्रोन्नतपूर्वकायः ।
पराभवं विद्विषतां समाजे प्रचेतसः ख्यापयतीव पाशः ॥११॥
दृष्टिं धनेशोपि हुताशपिङ्गां दधद् गदायां परिघोरुबाहुः ।
ईशप्रसादेन निजेन[१४] वेत्ति सुरद्विषामाहनने विनाशम् ॥१२॥
सैन्येथ देवद्विषतां निपेतुरुल्काः स्फुरद्वह्निकणा बृहत्यः ।
विना घनैर्व्योम रास भीमं सवृक्षशैला विचचाल चोर्वी ॥१३॥
रजो नभस्तः परितः पपात वातेरितं रासभपृष्ठधूम्रम्[१५] ।
ध्वजा निपेतुर्दृढहेमदण्डा रक्ताम्बुवृष्टिं ससृजुः पयोदाः ॥१४॥
मुहुर्मुहुर्दैन्यपरितचिताः कदुष्णभस्त्रं[१६] मुमुचुस्तुरङ्गाः ।
कपोलभित्तीः[१७] प्रजहौ गजानां मदश्च पारावतकण्ठनीलः ॥१५॥
स्थानेषु दीप्तेषु विनेदुरुच्चैर्दीप्तस्वराः पक्षिमृगाश्वसंघाः[१८] ।
प्रसादमालाः[१९] परितो विमृद्नन् ववौ[२०] विवृद्धः[२१] परुषो नभस्वान् ॥१६॥
सेना प्रहृष्टा महती सुराणामभ्याययौ दैत्यपतिं रराणा[२२] ।
दैत्योपि देवागमनं विदित्वा सन्नाहयामास[२३] तदा स्वसैन्यम् ॥१७॥
सैन्यानि तानि[२४] त्रिदशासुराणामन्योन्यमासेदुरुदायुधानि ।
क्षुब्धान्यतीव प्रलये महाब्धेः[२५] पूर्वापराणीव तदा जलानि ॥१८॥
निशाम्य दैत्या रणतूर्यनिस्वनं प्ररूढगर्वा बलिनो जयोत्सुकाः ।
अतिप्रहर्षादसमाप्तमङ्गला गृहीतशस्त्राः समराय निर्ययुः ॥१९॥
रथाश्वपादातसमुद्धतं[२६] रजो रणाजिरे वानरकण्ठधूसरम् ।
स्वनश्च तेषामतिदारुणो महान् नभस्तदा व्याप दिशश्च सर्वतः ॥२०॥

---

११ स्वर्दाप्ती - क. । १२ लोहान्यभेद्यानि - क. ख. । १३ सुधर्मा - क. । १४ जिनेन - क. ।
१५ ..धोम्रं - क, ...धौम्रं - ख. । १६ मास्रं - क. । १७ कपोलभित्ती - क., . भित्तौ - ख. ।
१८ पक्षिमृगाश्च संघाः - क. ख. । १९ माला - क. ख. । २० बभौ - क. ख. । २१ विबद्धः - ख. ।
२२ रणाय - ख., सुराणां - क. । २३ समाह्वयामास - क. । २४ सैन्ये हि तानि - क. ख. ।
२५ महोदधेः - क. ख. । २६ पादातिसमुद्धतं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

समुद्यतैर्दानवदेवतायुधैर्ध्वजैः पताकातपवारणैस्तथा ।
बभौ सविद्युच्छशिशक्रकार्मुकं[२७] सहंसपंक्तीव तदा नभस्तलम् ॥२१॥
शस्त्राणि गात्रेषु तनुत्रवत्सु निपात्यमानानि परस्परस्य ।
दैत्यामरैराहनने प्रचक्रुः शब्दं स्फुरद्वह्निकणैः समेतम् ॥२२॥
दृष्ट्वासुरान् सत्वबलोपपन्नान् सुरास्सहायानपेक्ष्य[२८] केचित् ।
सन्नेहिरे मत्तगजानिवेभा मदाम्बुभिः श्यामकपोलदेशाः ॥२३॥
बलानि वेगादभिसृत्य दूरमग्रेसराणि[२९] त्रिदशासुराणाम्[३०] ।
स्वजीविताशामपहाय जघ्नुरन्योन्यमाविष्कृतपौरुषाणि ॥२४॥
निकामवैराशयमानसानां जिघांसतां तत्र परस्परेण ।
स संप्रहारस्तुमुलस्तदासीत् सुरासुराणामनवो महाजौ[३१] ॥२५॥
सेदुर्गजास्तोमरशक्तिभिन्नास्तुरङ्गमा बाणहता निपेतुः ।
सफेनमास्यै रुधिरं वमन्तो दृढप्रहारान्मुमुहुश्च योधाः ॥२६॥
छिन्नानि पेतुर्निशितैः क्षुरप्रैः सकुण्डलान्याननपङ्कजानि ।
अन्योन्यमाविष्कृतदर्परोषैर्महाहवे दानवदेवमुख्यैः[३२] ॥२७॥
ता मातरस्ते च गणा विचेरुर्विपोथयन्तः समरेरिसंघान्[३३] ।
मुष्टिप्रहारैस्तलपार्ष्णिघातैर्विकर्षणावेष्टनपीडनैश्च ।
- ॥२८॥
मातङ्गमुख्यान् द्विरदैः प्रभिन्नैस्तुरङ्गमान् वाजिभिरुत्तमाँश्च ।
रथान् रथैः[३४] पत्तिगणान् पदातैर्गणा निजघ्नुर्युधि दानवानाम् ॥२९॥
उत्पत्य वेगादिषुभिर्गणेन्द्रा[३५] गजाधिरूढान् दितिजेन्द्रयोधान् ।
मुष्टिप्रहारैः कुलिशोग्रपातैर्विभिन्नमस्तिष्कविनिर्गताक्षान् ॥३०॥
परश्वधैश्चिच्छिदुरात्तरोषाः[३६] खड्गैश्चकर्तुर्बिभिदुश्च शूलैः ।
महाद्विपालाननितान्तपीनैः[३७] प्रपोथयाञ्चक्रुररीन्[३८] भुजैश्च ॥३१॥

---

२७ सविद्युच्छत्रिशक्रकार्मुकं (?) । २८ महायानपेक्ष्य - क । २९ ...मग्रेश्वराणां - क. । ३० ददृशे सुराणाम् - ख. ।
३१ ...मनवं महाजौ - क, मभवत्तदाजौ - ख. । ३२ महाहवैर्दानवदैत्यमुख्यैः - क. । ३३ ...सिहान् - ख. ।
३४ रथाद्रथैः - क. । ३५ वेगान्निषुभिर्गजेन्द्रा - क., ... दिषु तद् गजेन्द्रा - ख. । ३६ ...रात्तदोषाः - क. ।
३७ निभात्तपीनैः - ख. । ३८ प्रपोढयाञ्चक्रुररीन् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दैव्योपि तान्[३९] दैत्यगणान् निजघ्नुर्महासमाजे समुपात्तशस्त्रान् ।
उत्पत्य वाजिप्रवराधिरूढान् रथस्थितान् वारणधूर्गतांश्च ।।३२।।
प्रचुक्षुभे तद्बलमासुरं तदा गणेन्द्रनिष्पिष्टबलाग्रनायकम् ।
गुरुत्मतः पक्षसमीरणाहतं[४०] महाह्रदं यद्वदगाधसम्बुधेः[४१] ।।३३।।
अथाभिवीक्ष्य प्रसभं गणाधिपैर्निहन्यमानानि बलानि तारकः ।
रुषा तदा ताम्रतरायतेक्षणः[४२] समभ्यगान्मौलिबलाभिपालितः ।।३४।।
विस्फार्य शक्राशनितुल्यनिस्वनं रत्नप्रभाप्रज्वलितं स कार्मुकम् ।
संछादयन् बाणतलैर्नभस्तलं मर्मातिगैः कङ्कमयूरपत्रिभिः ।।३५।।
तस्यागमं दैत्यपतेर्विदित्वा तदाननादानलसूनुरुच्चैः ।
स्वपाणिसंस्थामभिवीक्ष्य शक्तिं विचित्रचामीकरचारुघण्टाम् ।।३६।।
नभो विगाह्य[४४] प्रदिशो दिशश्च स कार्त्तिकेयस्य तदा निनादः ।
मनांसि देवद्विषतां प्रसह्य विमोहयामास महासमाजे ।।३७।।
अथापतन्तं समभीक्ष्य[४५] तारकं बलेन गुप्तं महता महाहवे ।
मुमोच शक्तिं ज्वलितानलप्रभां विनाशनायामरविद्विषां गुहः ।।३८।।
सा तेन मुक्ता ज्वलनात्मजेन ज्वालाभिरावृत्य नभो दिशश्च ।
अनेकधा व्योम्न्यभवत् सुघोरा[४६] मायेव दैत्यान् परिमोहयन्ती ।।३९।।
पपात वक्षःसु च संहतेषु[४७] सुरद्विषां चित्रतनुत्रभृत्सु ।
समं समस्तैस्त्वनिवार्यवेगा[४८] विदार्य चोरांसि विवेश तूर्णम् ।।४०।।
देवद्विषस्तेभिहतास्समस्ताः[४९] पर्यस्तपृथ्वायतरक्तनेत्राः ।
सन्दष्टजिह्वाधरविह्वलाङ्गाः प्राणाञ्जहुः शोणितमुद्वमन्तः ।।४१।।
तमांसि यद्वत् सविता भिनत्ति समं मयूखैरतिरस्कृतानि ।
बिभेद तद्वद् द्विषतां बलानि रणाजिरे शक्तिभिरग्निसूनुः ।।४२।।
निहत्य देवद्विषतः समस्तान् रणाजिरे प्रोन्नतदर्पवीर्यान् ।
प्रभेव सूर्यं परितप्य लोकान् पुनस्तदा स्कन्दमियाय शक्तिः ।।४३।।

३९ दैव्योततं - क. । ४० पक्षिसमीरणाहतं - क. । ४१ ... दगाधमम्बुधि - क. । ४२ यतेक्षणो - क. ख.। ४३ मुदानान दानलसूनुरुच्चैः (?) । ४४ .. वगाह्य (?) । ४५ समवीक्ष्य - क. । ४६ सुघोरं - क. । ४७ वक्षःसुरसंव(ह)तेषु - क., सुसंह... (?) । ४८ स्तेष्वपि - ... ख., रनिवार्यवेगा (?) । ४९ .. भिर्हिता-स्समस्ताः - क, ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दितितनयसमूहैः सार्धमाविप्रतापैः (?)
समरशिरसि हत्वा तारकं दैत्यराजम् ।
त्रिदशसमितिमुख्यैः स्तूयमानः प्रहृष्टैः
प्रतिगमदमितौजाः[५०] शूलपाणेः समीपम् ॥४४॥

⊙ इति स्कन्दपुराणे तारकवधे पञ्चषष्टयुत्तरशततमोऽध्यायः[५१] ⊙

व्यास उवाच

भगवन् सर्वधर्मज्ञ महायोगबलान्वित ।
श्रुतमेतन्मया कृत्स्नं स्कन्दस्य चरितं महत् ॥१॥
त्वत्तः परमयोगेश गुह्यं भगवतः परम् ।
ततः[१] परं स देवेशस्त्रिपुरारिर्वृषध्वजः ॥२॥
संप्रेष्य सहितं देवैर्महासेनापतिं गुहम् ।
संन्यस्य[२] देवताः स्कन्दे किमन्यदकरोत् प्रभुः ॥३॥
क्व जगाम च देवेशः किमुवाचाचलात्मजा[३] ।
कानि चैनमुमा[४] प्राह शंसैतत् पृच्छतो मम ॥४॥

सूत उवाच

व्यासेनैवं तदा पृष्ट आख्यातुमुपचक्रमे ।
सर्वागमपरार्थज्ञो[५] ब्रह्मसूनुर्महातपाः ॥५॥

सनत्कुमार उवाच

संन्यस्य षण्मुखे देवान् देवदेवो भवस्तदा ।
जगाम सहितो देव्या मन्दरं हेमकन्दरम् ॥६॥
त तस्थावासने[६] तत्र हैमे महति सुप्रभे ।
नानारत्नसमाकीर्णे हेमशृङ्ग इवोच्छ्रिते ॥७॥
तस्य पार्श्वे स्थिता देवी रराज हिमवत्सुता ।
व्यभ्रे त्रियति पूर्णेन्दो रोहिणीव समीपगा ॥८॥

---

५० प्रतिययुर ... - क. । ५१ २०३ (२१६) - ख. पु ।

१ अतः - क. । २ स न्यस्य - क. ख. । ३ ...लात्मजां - क. । ४ चैवमुमा - क. । ५ सर्वागमपरोर्थज्ञो - ख, । ६ सदा वै (स तदा) वसते - क, सेमस्थानुसते (?) - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सोवाच परमेशानं प्रणम्य गिरिजा तदा ।
सहधर्मचरी यस्मात् प्रिया चाहमतीव ते ।।९।।
पूर्वप्रणयलब्धा[7] च तेन पृच्छाम्यशङ्किता ।
पावनानि पवित्राणि नामानि तव कामद ।।१०।।
सार्थानि श्रोतुमिच्छामि कथितानि त्वया विभो ।
एवं पृष्टस्तदा गौर्या प्राह सर्वं सुराधिपः ।।११।।
सर्वयज्ञफलैस्तुल्यं नाम्नामर्थप्रबोधनम् ।
मम देवि परं गुह्यं ब्रह्माद्या यद्विजानते ।।१२।।
तत् प्रवक्ष्यामि ते देवि येन देवत्वमाप्यते ।
रुजः सर्वगतो[8] यस्माद् द्रावयामि जगत्यहम् ।।१३।।
रोदनं हन्मि यस्माच्च रुद्रस्तस्मादहं प्रिये ।
संहरामि जगत् कृत्स्नमन्तकाले यतो ह्यहम् ।।१४।।
मृत्युहर्त्ता यतश्चापि हरस्तेन[9] प्रकीर्त्तितः ।
पुरं शरीरमाख्यातं सर्वेषां प्राणिनामिह ।।१५।।
सर्वप्राणिगतं यस्मात् तत्पुरं शयनं मम ।
तस्मात् पुरुष इत्येव मम नाम महर्द्धिमत् ।।१६।।
कदाचिन्नैव जातोहं न च मे जन्म यत्[10] क्वचित् ।
अजस्ततोहमीशानि सर्वदैव[11] प्रकीर्त्तितः ।।१७।।
अभावं मयि गत्वा तु जगत् स्थावरजङ्गमम् ।
पुनर्भवति मत्तश्च भवस्तेन निरूपितः[12] ।।१८।।
महतामपि देवानामहमेव महान् यतः ।
न च मत्तो महानन्यो महादेवस्ततो ह्यहम् ।।१९।।
पालयामि पशून् यस्मात् सृजामि च यदृच्छया ।
तेषाञ्च पतिरेवाहं तस्मात् पशुपतिः स्मृतः ।।२०।।
ईश एवाहमन्येषां[13] न च मामीशते परे[14] ।
नयामि चेशतां भक्तानीशानस्तेन कीर्त्तितः ।।२१।।

---

७ पूर्वं प्रणयलब्धा - क. ख । ८ सर्वगतं - ख. । ९ . श्चापि हरस्तेन - क. । १० यः - क. ।
११ सर्वदेवैः - क, ख, । १२ विरूपितः - क, ख. । १३ ईशमेवाहमन्येषां - क. ख. । १४ परः - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दिशो हि मम[१५] वासांसि सर्वदिक्षु वसाम्यहम् ।
वासश्चाहं दिशां यस्माद् दिग्वासास्तेन संस्मृतः ॥२२॥
भूतानां शङ्करो[१६] यस्मात् तेनाहं शङ्करः स्मृतः ।
लोकानां शिवकृद् यस्माच्छिवस्तस्मादहं स्मृतः ॥२३॥
नीलं येन ममाङ्गस्य[१७] संरक्तं लोहितत्विषम्[१८] ।
नीललोहित इत्येव तेनाहं परिकीर्तितः ॥२४॥
शूली शूलेन संप्रोक्तो लकुलेन[१९] च लाकुली[२०] ।
रुद्रेति कीर्तिते देवि अग्निष्टोमफलं स्मृतम् ॥२५॥
हरेत्यभिहिते चापि गोसवस्य फलं लभेत् ।
भवेति कीर्तिते सद्यः सर्वपापैर्विमुच्यते ॥२६॥
पुरुषेति परं सौख्यमजेति च सलोकताम् ।
ईशानेति महैश्वर्यं महादेवेति चाक्षयम् ॥२७॥
दिग्वासेति परं मोक्षं शङ्करेति सुखं महत् ।
शिवेति शिवमत्यर्थं शूलीति परमं बलम् ॥२८॥
लाकुलीति[२१] पराँल्लोकान् कीर्तयँल्लभते नरः ।
सर्वयज्ञफानीह कीर्त्तयन्नीललोहितम् ॥२९॥
लभते देवि मद्भक्तो मयि चावासमव्ययम् ।
एवं तत् कथितं व्यास नाम्नामर्थप्रबोधनम् ॥३०॥
शूलिना[२२] देवदेवेन[२३] देव्याः प्रियहितेच्छया ।
किमन्यत् पृच्छसि ब्रह्मन् वद यावद् ब्रवीमि ते ॥३१॥

व्यास उवाच

श्वेतजीवप्रदो रुद्र इति पूर्वं त्वया मुने ।
प्रोक्तं परमधर्मज्ञ तन्मे ब्रूहि समासतः ॥३२॥
प्रददौ कथमीशानस्तज्जीवं मुनये विभो[२४] ।
किमर्थं क्व च योगेश कश्चासौ श्वेत उच्यते ॥३३॥

---

१५ मम हि - क. । १६ शमकृद् - क. ख. । १७... स्या - क. । १८ लोविताद् विषं - क. । १९ लगुडेन - ख., नकुलेन (?) । २० लागुडीति - ख., नाकुलीति (?) । २१ लागुडीती - ख., नाकुलीति (?) । २२ शूलिनो - ख. । २३ देवदेवस्य - ख. । २४ विभुः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

शृणु वत्स यथा दत्तं पुनर्जन्म पिनाकिना ।
यमेन ह्रियमाणाय[२५] श्वेताय विगतायुषे ।।३४।।
आसीद् दर्भध्वजो नाम बृहस्पतिसमो मुनिः ।
सर्वविद्याविनीतात्मा यस्य पुत्रः कुशध्वजः ।।३५।।
बभूव सुमहातेजा विश्वामित्र इवापरः ।
प्रियस्तस्याभवत्पुत्रः श्वेतो नाम महाद्युतिः ।।३६।।
तस्य जन्मप्रभृत्येव[२६] कुशध्वजसुतस्य वै ।
छायेवानपगा भक्तिर्बभूव वृषभध्वजे ।।३७।।
तिष्ठतो गच्छतश्चापि स्वपतस्तप्यतस्तथा[२७] ।
सर्वभावेन देवेशं ध्यायन् तस्थौ महामुनिः ।।३८।।
अथ कालेन विप्रेन्द्र विपृथुर्नाम दानवः
वव्रे दुहितरं गत्वा श्वेतस्य पितरं बली ।।३९।।
न च तस्मै सुतां प्रादात् तामसौ सुरविद्विषे ।
स तेन निहतो रात्रौ बलाद् दर्भध्वजोपि च[२८] ।।४०।।
जामाता कांक्षितश्चासीत् तेन चक्रगदाधरः ।
विष्णुः परमधर्मात्मा दुहित्रा चास्य सुव्रत[२९] ।।४१।।
तस्य तं दुहिता ज्ञात्वा हतं पितरमात्मनः ।
जगाम तपसे[३०] साध्वी परहेतोर्महाव्रता ।।४२।।
श्वेतोपि तत्ततो ज्ञात्वा वैराग्यं परमास्थितः ।
नर्मदातीरमासाद्य एकचित्तो जितेन्द्रियः ।।४३।।
रूद्रमेवार्पितावस्थ[३१]स्तन्निष्ठस्तत्परायणः ।
तप्यमानस्तपो घोरं तस्थौ युक्तस्तपोधनः ।।४४
अथागात् सुमहान् कालस्तप्यतस्तस्य धीमतः ।
आयुर्यद्विहितं धात्रा तत्तस्य क्षयमभ्यगात् ।।४५।।

---

२५ ह्रियते व्यास - क. ख. । २६ प्रभृत्यैव - क. । २७ तिष्ठन् गच्छन्स्वपंश्चापि तप्यँश्चापि · यथा तथा (?) ।
२८ मिथ - ख. । २९ सुव्रतः - क. ख. । ३० तपसा - ख. । ३१ रुद्रे सर्वार्पितावस्थ - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

क्षीणायुषमथो ज्ञात्वा श्वेतं मृत्युर्विचेष्टितम् ।
सुतो विवस्वतो हृष्टः कालमृत्युपुरोगमान् ॥४६॥
किङ्करान् प्रेषयामास तमानेतुं द्विजोत्तमम् ।
तमथा[32]भ्येत्य ते दूताः स्थिताः श्वेतजिघांसया ४७॥
तान् दृष्ट्वा स तदा श्वेतो यमदूतानवस्थितान् ।
हाहेति मरणाद्भीतस्त्रासाद् दुःखपरिप्लुतः ॥४८॥
अन्वचिन्तयदव्यग्रः परित्राणाय शङ्करम् ।
अथ चिन्तितमात्रस्तु गिरीन्द्रशिखरस्थितः[33] ॥४९॥
भक्तानुग्रहकृद्देवः श्वेतं वेद यमार्दितम् ।
तं तथा दुःखितं ज्ञात्वा भक्तं मृत्युवशं गतम् ॥५०॥
शङ्करः प्रहसन् देवीमिदमाह सुरेश्वरः ।
श्वेतो नाम मुनिर्देवि मद्भक्तस्तपसैधितः[34] ॥५१॥
क्षीणायुरभवन्मूढो मृत्युपाशविमोहितः ।
व्यवस्थैषा पुरा सृष्टा ब्रह्मणा लोककर्तृणा ॥५२॥
प्राणिनामायुषो हानिः कालसंस्थानसंक्षये ।
ब्रह्मापि हि सृजँल्लोकान् मूढो भवति शैलजे ॥५३॥
मृत्युदुःखान्वितांल्लोकान् यस्मात्सृजति मोहितः ।
सोपि भक्तो ममात्यन्तं ब्रह्मा लोकपितामहः ॥५४॥
तस्य भक्तिविशेषाच्च गौरवाच्च गिरीन्द्रजे ।
अनुज्ञाता मयाप्येषा सृष्टिर्मृत्युसमन्विता ॥५५॥
तथा तु स मुनिर्देवि मयि सर्वार्पितक्रियः ।
एकभक्तितया[35] तस्य दृढं प्रीतोस्मि पार्वति ॥५६॥
त्राता[36] तस्य भविष्यामि जीवयिष्यामि तं मुनिम् ।
ततो भर्तुर्वचः[37] श्रुत्वा गिरिजा वाक्यमब्रवीत् ॥५७॥
एवं[38] कुरु महादेव भक्तानुग्रहमीप्सितम् ।
शरणं को भवेदन्यस्तस्य भक्तिमतो मुनेः[39] ॥५८॥

---

३२ तमथो - क. । ३३ . शिरसि स्थितः - ख. । ३४ तपसेधितः - क. ख. । ३५ एकभक्ततया - ख. ।
३६ ततो - क. । ३७ भर्तृवचः - ख. । ३८ एतत् - क. । ३९ मुने - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एवमुक्तः स पार्वत्या देवदेवो वृषध्वजः ।
नन्दीश्वरपुरोगाँस्तान् गणेशान् गणपाधिपः ॥५९॥
शंकुकर्णश्च गणपं तथान्यांश्च सहस्रशः ।
मुनेः श्वेतस्य रक्षार्थं प्रेषयामास शूलधृक् ॥६०॥
महाबलास्ते गणनायकेन्द्रा आज्ञां गृहीत्वा परमेशवक्त्रात् ।
तूर्णं ययुः श्वेतमुनेरुपान्तं[४०] दूतान् दिधक्षन्त इवान्तकस्य ॥६१॥
ते गत्वा[४१] श्वेतमैक्षन्त यमदूतैरथार्दितम् ।
मृगमेकमिवारण्ये व्याधैर्बहुभिरावृतम् ॥६२॥
ग्रीवायां कालपाशेन हस्तपादे[४२] च यन्त्रितम् ।
मृत्युना स्वयमाकृष्टं[४२] स्रवद्रुधिरचक्षुषा ॥६३॥
विकृतास्यैर्महादंष्ट्रैः ससंरक्तश्मश्रुमूर्धजैः[४४] ।
विद्युत्सदृशनेत्रैश्च लोहदण्डोग्रपाणिभिः ।
यमदूतैर्महाघोरैः क्षिप्यमाणं समन्ततः ॥६४॥
दृष्ट्वा तथा तं मुनिमार्त्तमुच्चैः क्रोशन्तमीशेत्यसकृद् गणेन्द्रः ।
मुमोच पाशान्मुनिमाशु तस्मात् पाशात्पशूनामिव बन्धमीशः ॥६५॥
गच्छध्वं यमकिङ्करा मुनिमितस्त्यक्त्वा शरीरं दृढैः[४५]
भक्तो ह्येष सुरासुरेश्वरमजं शम्भुं जगत्कारणम् ।
यः स्रष्टा पवनाग्निशक्रमरुतां ब्रह्मादिभिर्वन्दित-
स्त्राता सोस्य वृषेन्द्रकेतुरजितो नैनं यमो द्रक्ष्यति ॥६६॥
ते दृष्ट्वा गणपान् दूताः कालमृत्युपुरस्सराः ।
भयान्मुक्त्वा मुनिं श्वेतमब्रुवन् दूरतः स्थिताः ॥६७॥
पूर्णः कालो मुनेरस्य क्षीणमायुर्गणेश्वराः ।
किमनेन विमुञ्चध्वं नयामैनं यमान्तिकम् ॥६८॥
अथ नन्दीश्वरः प्राह क्रुद्धस्तान् प्रदहन्निव ।
अक्षता गच्छत क्षिप्रं कृपणा यमकिङ्कराः ॥६९॥

---

४० रूपान्तिकं - क, समीपम् (?) । ४१ गगाः - क. । ४२ हस्तपादौ च - क., हस्तपादैश्च - ख. ।
४३ ...माकृष्टं - क. । ४४ मूर्धजं - ख. । ४५ शरीरं दृढम् - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यावच्चैते[४६] न कुप्यन्ति प्रमथेन्द्राः सुरोषणाः ।
मा वः सिंहा इवारण्ये वारणान्मदमोहितान्[४७] ।
सकृदेव समाहृत्य करिष्यन्ति गतायुषः ।।७०।।
अथैवमुक्ता गणनायकेन नन्दीश्वरेणामितिविक्रमेण ।
भीता ययुस्ते पितृराजदूता गत्वा च चक्रुःकथयां यमस्य ।।७१।।
तेषामुपश्रुत्य तदा वचांसि तीव्राणि नन्दीश्वरभाषितानि ।
आदित्यसूनुः प्रचुकोप मोहात् स्वयं प्रयातुं च मतिं चकार ।।७२।।
अथाभ्ययात् क्रोधविरक्तनेत्रः सर्वैर्वृतो मृत्युपुरस्सरैस्तैः ।
विनिःश्वसन्नाग इव प्रचण्डो जगद्दिधक्षन्निव कृत्स्नमेकः ।।७२।।
दृष्ट्वा मुनिं श्वेतमपेतमोहं वृतं गणेन्द्रैर्हरतुल्यरूपैः ।
मुञ्चध्वमेनं तरसेत्यवोचन्[४८] नन्दीश्वराद्यान् ग्रहराजसूनुः ।।७४।।
कस्त्वं यम[४९] श्वेतमुनिं विनेतुं भवस्य धन्यः[५०] प्रमथेशभक्तम् ।
संरक्ष्यमाणं स्वयमेव मूढं[५१] गच्छाकृतात्मन्निति नन्द्युवाच ।।७५।।
अथ श्रुत्वा वचस्तस्य नन्दिनः परुषं महत् ।
यमः प्रोवाच संक्रुद्ध इदं सर्वगणाधिपम् ।।७६।।
गणेन्द्रा गतजीवोयं विप्रस्तिष्ठति मूढवत् ।
किमनेन विमुञ्चध्वं मा वृथा खेदमाप्स्यथ ।।७७।।
रक्षितोपि चिरं ह्येष मामेव समुपैष्यति[५२] ।
कालेन परिपूर्णेन क्षीणायुरिह कश्चन ।।७८।।
तपोधर्मसमायुक्तो विद्वानपि न जीवति ।
यदनेन कृतं कर्म धर्म्यं गर्हितमेव वा ।।७९।।
सन्त्यज्य तदिमं[५३] देहं प्राप्नोतु[५४] गणपाधिपाः ।
ममायत्तमिदं[५५] सर्वं भूतग्रामपरीक्षणम्[५६] ।।८०।।
पुण्यपापीयसोर्नित्यं कर्मणोः प्रविचारणम्[५७] ।
तेनार्पयत मे क्षिप्रं श्वेतमेनं गतायुषम् ।।८१।।

---

४६ यावदेते - ख. । ४७ वारणन्दर्पमोहितम् - ख. । ४८ तरसैत्यवोचन् - क. ख. । ४९ यमः - क. ।
५० धन्यं - क. ख. । ५१ मूढ - ख. । ५२ ...पेष्यते - क., ...पास्यति - ख । ५३ तमिमं - ख. ।
५४ प्राप्तातु - ख. । ५५ मदायत्तमिदं (?) । ५६ भूतग्रामपीक्षणम् - ख., ... समीक्षणम् (?) ।
५७ विप्रचारणम् - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथवैनं गृहीत्वैह सर्वं एव गणेश्वराः ।
प्रयाम शूलिनोभ्यासं नियतं स विमोक्ष्यति ।।८२।।
पितृराजवचः श्रुत्वा नन्दीश्वरपुरोगमाः ।
एवमस्त्विति तं प्राहुर्यमं क्रोधवशं गतम् । ८३।।
ततस्ते सहिताः सर्वे श्वेतश्च मुनिसत्तमः ।
जगन्नाथं हरं द्रष्टुमाजग्मुर्विन्ध्यपर्वतम् ।।८४।।
न्यवेदयद्यथावृत्तां नन्दी सर्वगणाधिपः[५८] ।
प्रणम्य परया भक्त्या भवायामिततेजसे ।।८५।।
श्रुत्वा तु भगवान् वाक्यं नन्दिना संप्रभाषितम् ।
प्राह वैवस्वतं साक्षात् स्निग्धगम्भीरया गिरा ।।८६।।
श्वेतस्यास्य परा भक्तिर्मयि प्रेतगणाधिप ।
अतः[५९] क्षीणायुषोप्यस्य मृत्युर्न प्रभविष्यति ।।८७।।
महता तपसा भक्त्या मयि भावितचेतसः[६०] ।
मत्प्रसादाज्जितो मृत्युः श्वेतेनानेन तापन ।।८८।।
ममादेशात्त्वयाप्यस्य नैव कार्यः पराभवः ।
किन्न वेत्सि रवेः पुत्र मद्भक्ता नरपुङ्गवाः ।।८९।।
न पश्यन्ति तवावासं[६१] देहभेदेप्युपस्थिते ।
अस्य भक्तिविशेषेण परेण परितोषितः ।।९०।।
अनेनैव शरीरेण अमरत्वं ददाम्यहम् ।
इति मत्वा विसन्देह[६२]स्त्वरा गच्छ स्वमालयम् ।।९१।।
इति देववचः श्रुत्वा प्रणम्य तपनात्मजः ।
परमार्थमविज्ञाय प्रोवाचेदं पिनाकिनम् ।।९२।।
त्वयैव भगवन्नेषा स्थितिः सृष्टा पुरातनी ।
कर्मण्यस्मिन्नियुक्तोहं जन्ममृत्युविचारणे ।।९३।।
अधिकार[६३]निवृत्तौ[६४] हि शक्रस्यापि वृषध्वज ।
त्वयैव पवनः सृष्टो ह्यहं[६५] चैव सुरेश्वर ।।९४।।

५८ गणाधिपम् - क. । ५९ अथ - क. । ६० भावितचेतसि - क., चेतसा (?) । ६१ यमावासं - क. । ६२ मत्वापि सन्देह - क. । ६३ अधिकारो (?) । ६४ निर्वृत्तौ - क., नियुक्तौ - ख., निवृत्तौ (?), निवृत्तो (?) । ६५ अहं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

न केनचिदयं[६६] पन्थाः कालमृत्युक्षयात्मकः[६७] ।
व्यभिचीर्णो महादेव कालातिक्रमधारणात्[६८] ॥९५॥
एवमेतां परां सृष्टिं विचिन्त्य विबुधेश्वर ।
मोक्तुमर्हसि विप्राग्र्यं काले पूर्णे[६९] गतायुषम् ॥९६॥
एवं स्थितिरभिन्ना[७०] स्यादहं च न विमानितः ।
मृत्युश्श्रान्तःशरीरस्थः[७१] श्वेतस्तद्वरमाप्स्यति ॥९७॥
इत्युक्तं[७२] प्रेतराजेन श्रुत्वा वाक्यं वृषध्वजः ।
दिप्ताङ्गार[७३] इवैकस्मात्[७४] संहार इव पावकः ॥९८॥
जगत्क्षोभ इवाकस्मादुत्प्रेक्ष्यः[७५] समपद्यत ।
नन्दीशस्य ततः स्कन्धमुपाश्रित्य पिनाकधृक् ॥९९॥
इदं प्राह वचो व्यास तं दृष्ट्वा यममास्थितम् ।
अहो दिनकृतः सूनोरस्य शाठ्यप्रभाषितम्[७६] ॥१००॥
कार्कश्यं वचसः पश्य प्रत्युत्तरसमीरितम् ।
परित्रातो मया श्वेतो यम गच्छेति भाषितः[७७] ॥१०१॥
मुञ्च श्वेतमिति प्राह मामेव गतचेतनः ।
किन्त्वयं मूढ एव स्यादुत पौरुषगर्वितः ॥१०२॥
गच्छेति को मयाज्ञप्ते[७८] स्थातुमत्र भवत्यलम् ।
प्रत्युत्तरं पुनः प्राह मामेव पुरतः स्थितः[७९] ॥१०३॥
एवं स भगवानुक्त्वा जगत्प्रभवकारणः ।
तिर्यग् दृष्टिं समाधाय सरोषं यममैक्षत ॥१०४॥
स तेन चक्षुषा दग्धो निपपात महीतले ।
महावृक्ष इवारण्ये महावायुसमीरितः ।
भस्मसात्त्वं[८०] ययौ तूर्णं प्रजहास ततो भवः ॥१०५॥

---

६६ ...दियं - क. ख. । ६७ क्षयात्मिका - क. । ६८ वारणात् ?)। ६९ पूर्णं - ख. । ७० ...रभिज्ञा - क. ख.।
७१ श्रान्तशरीरस्थः - क., .. श्रान्यशरीरस्थः - ख, .. स्थ - क. ख. । ७२ इत्युक्तः - ख. ।
७३ दीप्तांगव - क. ख. । ७४ इवाकस्मात् (?) । ७५ दुष्प्रेक्ष्यः (?) । ७६ सान्त्वप्रभाषितम् (?) ।
७७ भाषितं - ख. । ७८ . ज्ञप्तः (?) । ७९ स्थितं - क. ख. । ८० भस्मसाच्च - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

श्वेतं ततस्तं प्रणतं मुनिं तु सगद्गदं मृत्युभयाद्विषण्णम् ।
पस्पर्श मूर्ध्नि त्रिपुरासुरारिर्वचो न भेतव्यमिति ब्रुवाणः ।।१०६।।
प्रादाद्वरं शूलधरश्च[८१] तस्मै मृत्युर्न ते विप्र भविष्यतीति ।
ददौ च नित्यं गणपत्वमेव प्रोवाच चैनं परितुष्ट ईशः ।।१०७।।
क्रुद्धश्च यस्मादहमर्कसूनोरस्मिन् गिरौ पुण्यतमस्ततोयम् ।
वत्स्यामि चेहाचलराजमूर्ध्नि क्रोधेश्वरस्तेन भविष्यतीह ।।१०८।।
विन्ध्यप्रदेशेमरसिद्धजुष्टे क्रोधेश्वरे पुण्यगिरौ पुमांसः ।
त्यक्ष्यन्ति ये देहमपेतमोहास्तेषां गतिः श्वेतसमा स्मृता मे ।।१०९।।
द्रक्ष्यन्ति श्वेतेश्वरमत्र ये च ते चापि दिव्या गणपा ममैव ।
तवैव[८२] नाम्ना च नदी सुपुण्या[८३] श्वेतस्य गङ्गेति भविष्यतीतयम्[८४] ।।११०।।
सन्तर्पणान्नैकविधं[८५] पितॄणां स्वर्लोकदं स्थानमतीव यस्याम्[८६] ।
इत्युक्तमात्रे जगदीश्वरेण श्वेतो मुनिर्दिव्यवपुर्बभूव ।।१११।।
नन्दीशचण्डेशसमानधर्मा प्रणम्य देवं पुरतः स्थितोभूत् ।
दृष्ट्वाथ सूनुं विगतासुमर्कः शोकाभितप्तस्त्वरितो जवेन ।।११२।।
ब्रह्मादिभिः शक्रपुरस्सरैस्तैः[८७] सार्द्धं जगत्कारणमाजगाम ।
विज्ञापयामासुरथामरास्ते आदित्यसूनु[८८]प्रतिजीवहेतोः ।। ११३।।
मूढो यतोयं जगदीश्वरेश कृच्छ्रं तत[८९]स्तीव्रमिदं प्रयातः ।
प्रसीद देवेश कुरु प्रसादं जीवत्वयं प्रेतगणाधिराजः। ११४।।
यथापुरा चैष भवत्विदानीमार्त्तिं हि[९०] नश्छिन्धि सुरासुरेश ।
विज्ञप्तिमेवं त्रिदिवालयानां ब्रह्मादिशक्रार्कपुरस्सराणाम् ।।११५।।
श्रुत्वा यमं तं करुणायमान उत्तिष्ठ पुत्रेति विभुर्बभाषे ।
दिव्यं ततः पूर्ववदद्रिकल्पं बिभ्रत् स देहं ग्रहराजसूनुः ।।११६।।
प्रोत्थाय तूर्णं भगवन्तमाशु ननाम पद्भ्यां सहसा गृहीत्वा ।
ब्रह्मादयस्ते च सुरेन्द्रसंघा दृष्ट्वा[९१] ततस्तान् प्रणतानवोचत् ।।११७।।

---

८१ शूलभृतश्च - क. । ८२ तथैव - ख. । ८३ नदीपु पुण्या - ख. । ८४ भविष्यतीह - क. । ८५ सन्तर्पणं नैकविधं - क., .. णनैकविधि - ख. । ८६ यत्स्यात् (?) । ८७ शक्रादिभिर्ब्रह्मपुरस्सरैस्तैः (?), पुरस्सरैश्च - ख. । ८८ ...सूनुं - क. । ८९ जगत् - क. । ९० ह - क. । ९१ दृष्टा - क.।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ब्रह्मार्कविष्णुज्वलनादिनाथः कर्ता सुराणां सुरनाथ एकः ।
सुरेश्वरः सोमजटार्धमौलिर्देवाः प्रयात स्वनिकेतनानि ॥११८॥
विज्ञप्तिरेषा सफला कृता वो मैवं[९२] कृथास्त्वं पुनरात्ममोहम्[९३] ।
प्रेतेश्वरं चेति वचोभ्युवाच जग्मुस्ततो देवगणाः प्रणम्य ॥११९॥
प्रगृह्य सौरिं पितृराजमाशु श्वेतोपि तस्थौ मरणाद्विहीनः ।
नन्दी यथा निर्वृतदुःखभाव[९४]स्तथैव विप्रः परमेशभक्तः[९५] ॥१२०॥

इति कथितमिदं ते श्वेतमृत्युप्रणाशं
हिमगिरितनयाया भर्तुरीशस्य शम्भोः ।
फलमवितथभक्ति[९६]प्राप्तिसंपद्विशेषं
जगति शरणमेकं तं शरण्यं नमस्ये ॥१२१॥

⊙ इति स्कन्दपुराणे श्वेतवरप्रदाने षट्षष्ट्युत्तरशततमोध्यायः[९७] ⊙

व्यास उवाच

यत् प्रोक्तं भवता गुह्यं माहात्म्यमिदमुत्तमम् ।
नान्यस्यैतद् भवेन्मुक्त्वा जगदार्त्तिहरं हरम् ॥१॥
पुण्यान्यायतनानीह देवदेवस्य शूलिनः ।
यानि दृष्ट्वा न शोचन्ति जन्ममृत्यू महामुने[१] ॥२॥
तानि मे ब्रूहि धर्मज्ञ यद्यनुग्राह्यता मयि ।
एवं कृतार्थमात्मानं मुच्ये यन्मुनिसत्तम ॥३॥
व्यासस्य वचनं श्रुत्वा ब्रह्मपुत्रोब्रवीदिदम् ।
साधु व्यास महाबुद्धे भक्तिमानसि शङ्करे ॥४॥

---

९२ यै... - क., मे... - ख. । ९३ ...मोहात् - ख. । ९४ निर्हृतदुःखभाव (?) । ९५ ...भक्त्या - ख. ।
९६ पुण्यं (?) । ९७२१४ - ख. ।
१ जन्ममृत्युभयान्नराः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्थानानि शूलिनो यस्त्वं पुण्यानि श्रोतुमिच्छसि ।
कृतार्थस्त्वं महायोग मुक्तः संसारबन्धनैः ॥५॥
शृणु वक्ष्यामि ते वत्स गुह्यमेतत् परं हि मे ।
स्थानानुवर्णनं[2] शम्भोर्मृत्युजन्मभयापहम् ॥६॥
आदित्यबन्धनं नाम कूटं विन्ध्यगिरेः शुभम् ।
स्थापितं तत्र लिङ्गं तु तपनेन महाप्रभम् ॥७॥
तद्[3] दृष्ट्वा मनुजो व्यास जन्मप्रति न शोचति ।
हेमसोमोद्भवं नाम कूटं हिमगिरेः शुभम् ॥८॥
पुण्यमायतनं तत्र च्यवनेनाभिनिर्मितम् ।
ये तदायतनं शम्भोरभिगच्छन्ति मानवाः ॥९॥
न च्यवन्ति पुनः स्वर्गात् प्रलयेपि समागते ।
उदये तु गिरौ पुण्ये सिद्धसंघैर्निषेविते ॥१०॥
सत्यो नाम ह्लदः पुण्यो हेमपद्मसमावृतः ।
यत्र ते मुनयः सत्याः सत्यानलरविप्रभाः ॥११॥
धारयन्ति महात्मान आशीर्भिस्सरथं[4] रविम् ।
पुण्यमायतनं तत्र स्थापितं तैः पिनाकिनः[5] ॥१२॥
अमरैरर्चितं व्यास सिद्धविद्याधरैर्वृतम् ।
यैस्तदायतनं दृष्टं भवभक्तैर्वियद्गमैः[6] ॥१३॥
ते भवस्य प्रिया भूत्वा भवन्ति प्रमथेश्वराः ।
उशीरवीजः शैलेन्द्र[7]स्तत्राश्रमपदं महत् ॥१४॥
आगस्त्यस्य तृणाङ्गस्य देवदानवपूजितम् ।
महानीलमयं लिङ्गं तस्मिन् व्यास महोच्छ्रयम् ॥१५॥
तस्मिन्नायतने रुद्रं तृणाङ्गः स महानृषिः ।
दक्षिणामूर्त्तिमास्थाय[8] स्तौति नित्यं कपर्दिनम् ।
दिवौकसस्तमभ्यर्च्य भवन्ति गणपाधिपाः ॥१६॥

---

२ स्थानानां वर्णनं - ख. । ३ तं - क. ख. । ४ ...माशीर्मिस्सरथं - ख. । ५ पिनाकिनं - क. ख. । ६ विपद्गतैः - ख. । ७ उशीरवीजशैलेन्द्र - ख. । ८ दक्षिणां मूर्तिमास्थाय - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

उत्तरेण निरालोके रविचन्द्रविवर्जिते ।
मेरुश्रृङ्गे महोत्सेधे सौवर्णं स्थापितं महत् ॥१७॥
लिङ्गं भगवतो व्यास यत्रास्ते शूलधृक् स्वयम् ।
उत्तानपादपुत्रेण भवभक्तिपरात्मना ॥१८॥
नित्यमभ्यर्चितं लिङ्गं ध्रुवेणास्ते[९] महामुने ।
देवानामप्यगम्यं तद् ध्रुवं मुक्त्वा परं वरम् ॥१९॥
जैगीषव्येण मुनिना अस्ते पर्वतराजनि ।
स्थापितं सुमहल्लिङ्गं देवदेवस्य शूलिनः ॥२०॥
तद्[१०] दृष्ट्वा मानवो व्यास रुद्रलोकमवाप्नुयात् ।
मोक्षविद्यास्वभिज्ञाश्च सांख्ययोगविशारदाः ॥२१॥
भवन्ति मनुजा दृष्ट्वा तल्लिङ्गं परमाद्भुतम् ।
नन्दने देवराजेन स्थापितं लिङ्गमुत्तमम् ॥२२॥
तपनीयमयं शुभ्रं देवता यदुपासते ।
तद् दृष्ट्वा देवता लिङ्गं[११] प्राप्नुवन्ति परं पदम् ॥२३॥
क्षीरोदे सागरे दिव्यं[१२] बालखिल्यैः[१३] स्वयं कृतम् ।
महदायतनं पुण्यं सिद्धकिन्नरसेवितम् ॥२४॥
तस्मिंश्चन्द्रप्रभं लिङ्गं स्फाटिकं मणिरञ्जितम् ।
बालखिल्यास्तमभ्यर्च्य जग्मुरीशसलोकताम्[१४] ॥२५॥
सौवर्णं यक्षराजेन स्थापितं गन्धमादने ।
लिङ्गं भगवतो दिव्यं यत् कुबेरेशनामकम्[१६] ॥२६॥
मन्दारकुसुमैर्दिव्यैर्हेमपद्मैश्च भक्तितः ।
तमभ्यर्च्य महेशानं कुबेरो निर्वृतोभवत् ॥२७॥
यैस्तदायतनं दृष्टं कुबेरस्य सुरासुरैः ।
सर्वयज्ञफलं तेभ्यो ददाति वृषभध्वजः ॥२८॥
एभ्यः पुण्यतमानीह यानि गम्यानि मानुषैः ।
श्रृणु तानि महाबुद्धे स्थानानि शशिमौलिनः ॥२९॥

---

९ ध्रुवमस्तौ - ख. । १० तं - क. ख. । ११ देवतास्ते तु - क ख. । १२ दिव्ये - क. ख. ।
१३ बालिखिल्यैः - क. ख. । १४ ...रीशस्य लोकताम् - क. । १५ कुबेरो तना...ह (म्) - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सर्वपर्वतराजस्य शृङ्गे हिमवतः शुभे ।
महालयमिति ख्यातं स्थानमाद्यं स्यम्भुवः ॥३०॥
यत्र सर्वामरा व्यास चतुर्वक्त्रपुरस्सराः ।
संसिद्धा मुनयश्चैव ये च योगीश्वरा भुवि ॥३१॥
समभ्यर्च्य हरं[१६] भक्त्या तदवाप्ताः परं पदम् ।
यत्र साक्षान्महादेवो न्यस्तवान् पदमात्मनः ॥३२॥
यं प्रणम्य नराः सर्वे मुच्यन्ते सर्वकिल्विषैः ।
अभिगम्य तमीशानं महालयनिवासिनम् ॥३३॥
देहभेदं समासाद्य यत्र तत्र यथा तथा ।
न पुनर्जायते मर्त्यो यातः[१७] सिद्धिमनुत्तमाम् ॥३४॥
न तं पश्यन्त्यधर्मज्ञा[१८] येपि पापकृतो[१९] नराः ।
महागणपतिस्तत्र द्वारसंस्थो महाबलः ॥३५॥
स तेषां गमनं हन्ति ये नराः पापकारिणः ।
योगिनो यत्र देवाश्च सिद्धाश्च परमर्षयः[२०] ॥३६॥
तं[२१] प्रणम्य ययुः सिद्धिं पुण्यं पशुपतेः पदम् ।
तस्य संकल्पनादेव द्रक्ष्यामीति महालयम् ॥३७॥
कर्मभिर्मुच्यते जन्तुर्महापातकसंज्ञितैः[२२] ।
महालयं महत्क्षेत्रं मोक्षसिद्धिप्रदं शुभम्[२३] ॥३८॥
कुलान्युभयतः[२४] सप्त दृष्ट्वा त्रायति मानवः ।
ततः पुण्यतमं व्यास केदारं नाम नामतः ॥३९॥
परं धाम वृषाङ्कस्य तस्यैवोत्तरतः शुभम्[२५] ।
स्वयं किल हरो देवस्तस्मिन्नचलसत्तमे ॥४०॥
जटाभाराज्जलं पुण्यं मुमोच - - - - -[२६] ।
- - - दभवत्तत्र हरमौलिविनिःसृतम् ॥४१॥

---

१६ महद् - ख. । १७ जन्तुर्गतः - ख. । १८ धर्मिज्ञा - क. । १९ महापापकृतो - ख. । २० परमर्षभ - क. । २१ तत् - ख. । २२ संज्ञितम् - क. । २३ विभो - ख. । २४ कुलानुभयतः - क. ख. । २५ शुचिम् - ख. । २६ इतः परं पत्रमेकं खण्डितं ख.पुस्तके ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नरास्तदमृतप्रख्यं ये पिबन्ति जलं शुभम् ।
ते भवन्ति गणा व्यास कुष्माण्डा रुद्रवल्लभाः ।।४२।।
महारूपा महात्मनो नन्दिनोप्यधिकप्रभाः ।
केदारवासिनं दृष्ट्वा देवदेवं जगत्पतिम् ।।४३।।
- - - - - - - - - - - - - - - - - - - ।
ब्रह्मा शक्रस्तथा विष्णुः सोमो यक्षगणाधिपः ।।४४।।
अर्चयन्ति स्थितं तत्र भक्तितः परमेश्वरम् ।
केदारसलिलं पीतं यैर्नरैः सुमहात्मभिः ।।४५।।
कथं शोचन्ति ते व्यास प्राप्तं किन्नु न तैः सुखम् ।
केदारे हिमवन्महीध्रशिखरे यत्तत्पयः प्रस्रुतं
मूर्ध्नः सोममहेन्द्रविष्णुमरुतां स्रष्टुर्विभोः शूलिनः ।
पातुं यन्न लभन्त्यधर्मरुचयः शैवं विनानुग्रहं
तत्पीत्वा भवबन्धनप्रतिभयान्मुक्ता भवेयुः प्रजाः ।।४६।।
मध्यमेश्वरमत्रैव स्थानमाद्यमुमापतेः ।
गत्वा[२७] तमपि देवेशं गाणपत्यमवाप्नुयात् ।।४७।।
तत्रापि स्वयमेवेशः सदा सन्निहितो मुने ।
अभिगम्य तमीशानं न शोचेन्मरणं प्रति ।।४८।।
त्रयाणामपि लोकानां प्रदेशे हिमवद्गिरेः ।
एष श्रेष्ठतमो व्यास सर्वसिद्धिप्रदः शुभः ।।४९।।
अस्याभिगमनादेव सर्वयज्ञफलं स्मृतम् ।
विपन्नस्य प्रमादाद्वा गाणपत्या गतिर्वरा ।।५०।।
नातः पुण्यतमं किञ्चित् सर्वलोकेषु विद्यते ।
त्रैलोक्ये चक्रवर्त्तित्वमस्मिन् वा मरणं गिरौ ।।५१।।
चक्रवर्त्तिपदात्तस्मादिह मृत्युर्विशिष्यते[२८] ।
याति सायुज्यतां शम्भोः परमैश्वर्यसंयुतः[२९] ।।५२।।

२७ दृष्ट्वा (?) । २८ ...विशेष्यते - क. । २९ संयुतं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गिराविह मृतो जन्तुः किन्ततः परमं पदम् ।
महद्धिमवतस्त्वन्यत् कूटं सिद्धनिषेवितम् ॥५३॥
यत्र देवी तपस्तेपे गौरवर्णसमीप्सया ।
गौरीशिखरमित्येव त्रिषु लोकेषु विश्रुतम् ॥५४॥
कुचकुण्ड इति ख्याते तीर्थे यत्रोमया कृते ।
तद् गौरीशिखरं पुण्यं येऽभिगच्छन्ति मानवाः ॥४५॥
अश्वमेधफलं प्राप्य ते यान्ति परमां गतिम् ।
ऋषभं शृङ्गमपरं वज्रस्फटिकसन्निभम् ॥४६॥
यत्र नन्दी तपस्तेपे वरश्चावाप शङ्करात् ।
ऋषभं प्राप्य तत्कूटं स्थानं पुण्यमुमापतेः ॥५७॥
दृष्ट्वा पापविनिर्मुक्तो रुद्रलोकमवाप्नुते ।
अन्यद्धिमगिरेः कूटं हेमकूटसमप्रभम् ॥५८॥
यत्र भस्त्रेश्वरं नाम रुद्रस्यायतनं शुभम् ।
रुद्रस्तस्मिन् गिरौ देवो भस्त्रेश्वर इति स्मृतः ।५९॥
तं नमस्य महादेवं किन्नरोरगचारणाः ।
मृत्युभीताश्च पुरुषा जन्मदुःखैस्तथार्दिताः ॥६०॥
तदायतनमासाद्य कामानापुर्यथेप्सितान्[३०] ।
तं दृष्ट्वा मनुजो व्यास राजसूयफलं लभेत् ॥६१॥
गङ्गाद्वारे शुभद्वारे महापुण्ये महात्मना ।
दक्षेण स्थापितं लिङ्गं भक्तिहेतोः कपर्दिनः ॥६२॥
वृक्षाः कनखला नाम यत्रासन् कनकात्मकाः ।
मानुषाणामशीलत्वात् संवृक्णा[३१] दारवो[३२] बभुः ॥६३॥
विश्वात्मा यत्र विश्वेशः शम्भुरम्बिकया सह ।
बहुरूपेश्वरो नाम्ना नैकप्राणिवरप्रदः ॥६४॥
मानवा यन्न पश्यन्ति जन्म चेष(?)मुमुक्षवः ।
वाजिमेधं दशगुणं यं दृष्ट्वा प्राप्नुते नरः ॥६५॥

---

३० कामानाप्नुर्यथेप्सितान् - क. । ३१ संवृत्ता - क. । ३२ दारवा - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यं देवविद्याधरसिद्धसंघा गन्धर्वयक्षोरगदानवाश्च ।
दृष्ट्वेश्वरं नीलपयोदकण्ठं संसारपङ्के न पुनः पतन्ति ।।६६।।

जप्येश्वरमिति ख्यातमन्यदायतनं विभोः[33] ।
यत्र जप्यं पुरा कृत्वा लिङ्गं स्थापितवान् द्विजः ।।६७।।
जप्येश्वरं तदासाद्य[34] प्राणाँस्त्यक्ष्यन्ति ये नराः ।
ते जन्ममरणान्मुक्ता वत्स्यन्ति शिवसद्मनि ।।६८।।
अन्यदायतनं व्यास शशिबिम्बार्धमौलिनः ।
महाभैरव इत्येव ख्यातं[35] जगति यन्मुने ।।६९।।
यत्र शूलधरो देवः स्वयमेव वृषध्वजः ।
चकार भैरवं रूपं नन्द्युमागणभीषणम् ।।७०।।
यद् दृष्टवा[36] हिमवत्पुत्री बभूव भयविह्वला ।
क्रीडाहेतोर्भवो यत्र त्रासयित्वा रिरीन्द्रजाम् ।।७१।।
सौम्यरूपोभवद् भूयः सान्त्वयामास शैलजाम् ।
महाभैरव इत्येव तदायतनमुच्यते ।।७२।।
भैरवेश्वरमागम्य यः पश्येत पिनाकिनम् ।
मरणं जन्म च [37] व्यास नासौ पुनरवाप्नुयात् ।।७३।।
यदेवाश्रमिणां पुण्यं तथेशव्रतचारिणाम् ।
तत्फलं भैरवं दृष्ट्वा प्राप्नोति नरपुङ्गवः[38] ।।७४।।
कुम्भकारेश्वरं[39] चैव तथैवोत्कुटुकेश्वरम्[40] ।
छगलण्डेश्वरं[41] चैव महाभैरवजं स्थलम्[42] ।।७५।।
दृष्टैरेभिस्त्रिभिः स्थानैस्त्रिलोकाधिपतिर्भवेत् ।
रुद्रकोटीति[43] चाप्यन्यच्छिवायतनमुच्यते ।।७६।।
रुद्रकोटीत्रयं जप्त्वा तत्र नन्दी वरोत्तमान् ।
अवाप शङ्कराद् व्यास गणेशत्वं तथोत्तमम् ।।७७।।

---

३३ विभो - क । ३४ तमासाद्य - क. । ३५ ख्यातिं - क. । ३६ यन्दृष्ट्वा - क. । ३७ वा - क. ।
३८ भगपुङ्गवः (?) - क. । ३९ कुम्भकारेश्वरे - ख. । ४० ..कुटुकेश्वरः - क, ... कुटुकेश्वरे (?) ।
४१ छगलण्डेश्वरे - क., .. रं - ख. । ४२ फलम् - क. । ४३ ...भि - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यैस्तदायतनं दृष्टं ते यान्ति परमां गतिम् ।
देवदारुवने चापि भवस्यायतनं वरम् ॥७८॥
देवदारुवनैश्छन्नं सरलैश्च सुगन्धिभिः ।
सदा संसेवितं तद्धि गन्धर्वोरगकिन्नरैः ॥७९॥
यत्र वैखानसा विप्राः शिवभक्तिपरायणाः ।
भास्करानलसंकाशा निवसन्ति तपोधनाः ॥८०॥
भिक्षाहेतोर्वनं तत्तु[४४] प्राविशत् किल शूलधृक् ।
स दृष्टस्तत्र[४५] देवेशो मुनिभिः स्तब्धमेहनः ॥८१॥
ईर्ष्यया मुनिभिर्लिङ्गं तस्य देवस्य तन्महत् ।
विमूढैः पातितं व्यास देवदारुवनाश्रमे ॥८२॥
तस्मिन् निपतिते[४६] लिङ्गे लिङ्गहीनमभूज्जगत् ।
स्थावरं जङ्गमं चैव बभौ सर्वं नपुंसकम् ॥८३॥
ब्रह्मादयस्ततो देवास्ते च सिद्धा मुमुक्षवः ।
ज्ञात्वा शङ्करजं सर्वं तदपायं सुदारुणण् ॥८४॥
संस्तुत्य विविधैः स्तोत्रैः शङ्करं पर्यतोषयन् ।
ततस्तदभवल्लिङ्गं यथापूर्वं पिनाकिनः ॥८५॥
जगतश्च ततः[४७] पुंस्त्वं तत्क्षणात् समपद्यत ।
तत्र तैः स्थापितं लिङ्गं परमेशस्य भक्तितः ॥८६॥
तद् दृष्टवा[४८] वाजिमेधानां दशानां प्राप्नुते फलम् ।
एवं[४९] दारुवनं[५०] पुण्यमीशस्यास्ते महामुने[५१] ॥८७॥
अभिगम्य नराः क्षिप्रं मुच्यन्ते सर्वपातकैः ।
दधीचेन महद्दिव्यं पुण्यमायतनं कृतम् ॥८८॥
स्थानेश्वरमिति ख्यातं त्रिषु लोकेषु[५२] विश्रुतम् ।
नरः स्थानेश्वरं प्राप्य यस्त्यजेदात्मनस्तनुम् ॥८९॥

---

४४ तत्र - क. । ४५ अदृष्टस्तत्र - क, संदृष्टस्तत्र(?) । ४६ हि पतिते (?) । ४७ पुनः - ख. । ४८ तन्दृष्ट्वा - क. ख. । ४९ देव - ख. । ५० दारुवणं - क. । ५१ स - क, ...मीशस्य सुमहामुने - ख., महात्मनः - ख. । ५२ लोकेषु त्रिषु - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

योगैश्वर्यमनुप्राप्य स्वर्गलोके स मोदते[५३] ।
तक्षकेन भुजङ्गेन दृढभक्तेन[५४] शङ्करे[५५] ॥९०॥
तक्षकेश्वरमित्येवं स्थापितं जाह्नवीतटे ।
देवदेवस्य रुद्रस्य यत्र सान्निध्यमुत्तमम् ॥९१॥
तन्दृष्ट्वा पुरुषो देवमश्वमेधफलं लभेत् ।
अगस्त्येन कृतं चान्यत् पुण्यमायतनं महत् ॥९२॥
आम्रातेश्वरमित्येव ख्यातं जगति सुव्रत ।
दृष्ट्वा परमया भक्त्या पुरुषस्तं शुचिव्रतः ॥९३॥
देहभेदमनुप्राप्य शर्वलोकमवाप्नुयात् ।
गिरौ कालञ्जरे लिङ्गं दृष्ट्वा स्थानमुमापतेः ॥९४॥
अश्वमेधफलं प्राप्य रुद्रलोकमवाप्नुयात् ।
पुष्पभद्रमिति ख्यातं विन्ध्यप्रस्थे द्रुमावृतम् ॥९५॥
भवस्यायतनं पुण्यं देवगन्धर्वसेवितम् ।
यत्तद्रावणपुत्रेण मेघनादेन रक्षसा ।
स्थापितं तोषयानेन सर्वभूतपतिं भवम् ॥९६॥
यत्र मन्दोदरीपुत्रः स्थाणुना शशिमौलिना ।
मायारथप्रदानेन कृतः प्राप्तमनोरथः ॥९७॥
तद्[५६] दृष्ट्वा तत्र गत्वा[५७] च प्रणम्य च जगत्पतिम्[५८] ।
पुरुषाः स्वर्गमायान्ति दिव्ययोगसमन्विताः ॥९८॥
अन्ध्रेष्वायतनं चान्यच्छर्वस्य परमात्मनः ।
नाम्ना चित्ररथं नाम योगसिद्धिवरप्रदम् ॥९९॥
त्रिपुरस्य वधे यत्र रथो देवस्य धीमतः ।
अमरैश्चित्रितो[५९] व्यास सोमादित्ययमादिभिः ॥१००॥
सम्यगिष्टे तु[६०] यत् प्रोक्तमश्वमेधे फलं[६१] बुधैः ।
तच्चित्ररथमासाद्य फलं प्राप्नोति[६२] मानवः ॥१०१॥

---

५३ मोदति - ख. । ५४ दृढं भक्तेन - क. । ५५ शङ्कर - क. ख. । ५६ तं - क. । ५७ चाभिगत्वा - ख. । ५८ जगतः पतिम् - ख. । ५९ ...श्चिन्तितो - ख. । ६० सम्यगिष्टेषु - ख. । ६१ ...मश्वमेधफलं - क. । ६२ लभति - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अन्यद्दुक्तरथं नाम भवस्यायतनं शुभम् ।
सुरकिन्नरगन्धर्वैः सदा संसेवितं शुभम् ।।१०२।।
तत्र श्रीपर्वतो[६३] नाम पर्वतः श्रीनिकेतनः ।
सिद्धामरशताकीर्ण्णं सिद्धिक्षेत्रं[६४] तदुत्तमम् ।।१०३।।
शूलिनो यत्र लिङ्गानां पुण्यानां वरदायिनाम् ।
सहस्रं स्थापितं व्यास शिलादेन महात्मना ।।१०४।।
ये पश्यन्ति तमीशानं श्रीपर्वतनिवासिनम् ।।
जन्ममृत्युभयं तेषां नास्ति पुंसां कदाचन ।।१०५।।
अनेनैव शरीरेण तस्मिन् क्षेत्रे भवात्मके[६५] ।
योगाभ्यासपरा विप्राः सिद्धिं यान्ति यथेप्सिताम् ।।१०६।।
मनसाप्यभिगच्छन्ति ये नराः श्रीगिरिं मुने ।
न ते यान्ति यमावासं मृत्यावपि समागते ।।१०७।।
ततश्चोत्तरगोकर्णं हरलिङ्गाङ्किताश्रमम्[६६] ।
तप्तं यत्र तपस्तीव्रं राक्षसैः पिशिताशनैः ।।१०८।।
रावणाद्यैर्महाभागैर्लब्धश्च[६७] वर ईप्सितः[६८] ।
पुरा यत्र तपः कृत्वा प्रसाद्य च पिनाकिनम् ।।१०९।।
त्रैलोक्ये चक्रवर्तित्वं रावणस्समवाप्तवान् ।
अश्वमेधं दशगुणं तद्[६९] दृष्ट्वा लभते नरः ।।११०।।
मृतश्च रुद्रसायुज्यं गच्छत्यत्र न[७०] संशयः ।
ततो दक्षिणगोकर्णं स्थानं पुण्यं पिनाकिनः ।।१११।।
स्पृक्कया जातया यत्र[७१] लङ्कामलयसानुषु ।
अर्च्यते भगवान्देवः सर्वामरवरेश्वरः ।।११२।।
एको[७२] राक्षसशार्दूलो यत्राद्यापि विभीषणः ।
समभ्यर्च्यामरेशानं भुंक्ते राज्यमशङ्कितः[७३] ।।११३।।

---

६३ श्रीपर्वतं - क. । ६४ सिद्धक्षेत्रं - ख. । ६५ भवात्मिके - क. । ६६... श्रयम् - ख. । ६७ महाभाग लब्धश्च (?) । ६८ ईप्सितम् - क. । ६९ तं - क. ख. । ७० गच्छते नात्र - क. ख. । ७१ तत्र - क. । ७२ एक - क. । ७३ ...मशङ्कितम् - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मानवा येभिगच्छन्ति गोकर्णायतनाश्रमम् ।
दशानामश्वमेधानां प्राप्नुवन्ति फलं शुभम् ।।११४।।
हरिश्चन्द्र इति ख्यातो गिरिर्नैकविनिर्झरः ।
जामदग्न्येन रामेण यस्मिन्नायतनं[७४] कृतम् ।।११५।।
यत्र देवाश्च सिद्धाश्च यक्षगुह्यककिन्नराः ।
व्रतिनो योगिनश्चैव नेमिरे[७५] वृषभध्वजम् ।।११६।।
हरिश्चन्द्रगिरेः शृङ्गमाकूटं यैर्निरीक्षितम् ।
न ते वसन्ति मर्त्येषु देवा भूत्वा पुनर्मुने ।।११७।।
उत्तरे नर्मदातीरे योजनैकपथान्तरे[७६] ।
कारोहणमिति स्थानं त्रिनेत्रायतनं महत् ।।११८।।
यत्र काकां[७७] तपस्यन्तीमारुरोह प्रजापतिः ।
आरुरोह यतः काकां[७८] तस्मिन् देशे प्रजापतिः ।।११९।।
तस्मात् कारोहणो[७९] नाम्ना[८०] स देशः परिकीर्तितः ।
तस्मिन् देशेवतीर्णश्च भगवान् वृषभध्वजः ।।१२०।।
पुण्योसौ सर्वदेशेभ्यो देशो येन निबोध तम्[८१] ।
क्षीणे कृतयुगे व्यास त्रेतायुगमुखोदये ।।१२१।।
तस्मिन् पादं मुमोचैकं धर्मोधर्मनिपीडितः ।
द्वितीयं द्वापरे प्राप्त तृतीयं च कलौ युगे ।।१२२।।
चतुर्थेनावतस्थे च यतः स भगवान् प्रभुः ।
एवं स धर्मसंवासाद्[८२] देशः पुण्यतमः स्मृतः ।।१२३।।
भारभूतिस्त्वसौ भूत्वा तस्मिन्देशे पिनाकधृक् ।
भारान्[८३] बद्ध्वा द्विजातीनां नर्मदायां विचिक्षिपे ।।१२४।।
कारुण्येन महादेवो मर्त्त्यजन्ममुमुक्षया ।
त्रेतायां दिण्डिमुण्डश्च शिरांसि विनिकृत्तवान् ।।१२५।।

---

७४ न्नारायणं - ख. । ७५ मेनिरे - ख. । ७६ द्वियोजनपथान्तरे - ख. । ७७ कः कां - क. । ७८ कान्तां - क । ७९ कारोहणं - ख. । ८० नाम - क. ख. । ८१ तत् - (?) । ८२ धर्मसंवासो - ख.। ८३ भारं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

द्वापरे चाषढिर्भूत्वा[८४] नृत्तोनानुगृहीतवान् ।
एवं प्रतियुगं व्यास तस्मिन्देशे शिवः स्वयम् ॥१२६॥
अवतीर्णश्चानुगृह्य[८५] ब्राह्मणान् शुद्धमानसान् ।
तेषामायतनानि स्म सर्वेषामेव[८६] सुव्रत ॥१२७॥
येन दृष्टानि देवस्य ईशान[८७]लोकमाप्नुयात् ।
वर्तमाने कलौ चापि ज्ञात्वा दुःखार्दितं जगत्[८८] ॥१२८॥
चतुरः[८९] पुरुषान् सृष्ट्वा[९०] स्वस्मान्मुखचतुष्टयात् ।
प्रोवाच परमेशानो लोकानुग्रहलिप्सया[९१] ॥१२९॥
यूयं यात महीं सर्वे द्विजा भूत्वा तपस्विनः ।
मामेवैष्यथ योगीशा नीत्वा विप्रान् परं पदम् ॥१३०॥
ते तथोक्त्वा ततो[९२] व्यास संबभूवुः पृथक् पृथक् ।
मानुषेषु[९३] तदा विप्रा मोक्षधर्मपरायणाः ॥१३१॥
उज्जयिन्यां[९४] गुरुज्येष्ठः कौशिको नाम नामतः ।
द्वितीयो गार्ग्य इत्येव[९५] जंबूमार्गे सतापनः (?) ॥१३२॥
तृतीयश्चाभवन्मित्रो मथुरायां महामनाः[९६] ।
ब्रह्मचारी चतुर्थस्तु कुरुष्वेव सुगोत्रजः ॥१३३॥
भगवानपि देवेशो ह्यमरेश्वरसंयुतः[९७] ।
अत्रिवंशप्रसूतस्य नाम्ना वै सोमशर्मणः ॥१३४॥
रूपं कृत्वा सिताङ्गं तु जगामात्रेर्गृहं[९८] शुभम् ।
स तं ब्रह्मविदं विप्रमात्रेयं सकुलं विभुः ॥१३५॥
योगसिद्धिप्रदानेन अनुजग्राह शङ्करः ।
अनुगृह्य तदा व्यास सकुलं द्विजसत्तमम्[९९] ॥१३६॥
जगामोज्जयिनीं देवः श्मशानं च विवेश ह ।
स तत्र भस्मनात्मानमवगुण्ठ्य[१००] वृषध्वजः ॥१३७॥

---

८४ भूत्वा गाढिर्द्वापरे च(?) । ८५ ..मनुगृह्य - क. । ८६ तानि चायतनानीह सर्वाण्येव (?) । ८७ ऐशानं(?)। ८८ जनं (?) । ८९ चत्वारः - क. ख. । ९० दृष्ट्वा - ख. । ९१ कांक्षया (?) । ९२ तथोक्तास्तथा - क. ख. । ९३ तु - क. । ९४ उज्जयन्यां, उज्जयनी - क. । ९५ इत्येवं - ख. । ९६ महात्मना - क. ख. । ९७ देवेगममरेश्वरसंयुतः - क. ख. । ९८ जगामत्रिगृहं - ख. । ९९ द्विजसत्तमः - क. । १०० भष्मासात्मानमवगुण्ठ्य - क ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

उल्मुकं वामहस्तेन गृहीत्वा समुपाविशत् ।
तत्र प्रथममादाय शिष्यं कौशिकमीश्वरः ॥१३८॥
जम्बूमार्गे द्वितीयं च मथुरायां ततोपरम् ।
कान्यकुब्जे ततश्चान्यमनुगृह्य जगत्पतिः ॥१३९॥
स्वसिद्धान्तं ददौ योगमुवाचेदं च लाकुली[१०१] ।
रहस्यं परमं हीदं[१०२] पञ्चार्थ इति संज्ञितम्[१०३] ॥१४०॥
विप्रान्मोचयितुं दत्तो युष्मभ्यं मर्त्यबन्धनात् ।
अनया दीक्षया विप्रान् प्रापयध्वं परं पदम् ॥१४१॥
नदीतीरेषु मेध्येषु पुण्येष्वायतनेषु च ।
शून्यागारेष्वरण्येषु वासो वः सङ्गवर्जितः ॥१४२॥
वचो भगवतः श्रुत्वा शिष्याः पशुपतेः स्वयम् ।
यथाज्ञप्तमकुर्वन्त[१०४] सर्वे ते भवतेजसः ॥१४३॥
धर्मपादाङ्किते देशे अवतीर्णो यतो भवः ।
स देशः परमस्तस्मान्महापुण्यतमः स्मृतः ॥१४४॥
आश्रमो योगिनां यत्र प्रवृत्तः पापनाशनः ।
अष्टायतनमित्येवं स्थानमत्र[१०५] महात्मनः ॥१४५॥
यद्[१०६] दृष्ट्वा मनुजा व्यास प्राप्नुवन्ति परं पदम् ।
कारोहणं शिवस्थानं येभिगच्छन्ति मानवाः ॥१४६॥
गर्भशय्याभयं तेषां न भवेन्मुनिसत्तम ।
महीनर्मदयोर्मध्यं सह्यस्य च यदन्तरम् ॥१४७॥
एतत्पशुपतेः क्षेत्रं पुराणमृषिभिः स्तुतम्[१०७] ।
तदागत्य नरो व्यास यद्यपि स्यात् सुपापकृत् ।
सर्वपापविनिर्मुक्तो[१०८] यथेष्टां[१०९] प्राप्नुयाद् गतिम् ॥१४८॥

---

१०१ लागडिः - ख. । १०२ लीनं - ख. । १०३ संज्ञितः - ख. । १०४ यथाज्ञाप्तमकुर्वन्त - क. ख. । १०५ स्थानं तत्र - ख. । १०६ यं - क. । १०७ ऋषिभिष्टुतं - ख. । १०८ विमुक्तात्मा - ख., विमुक्तोसौ - ख. । १०९ यथेष्टं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कारोहणं स्थानमतीव पुण्यं शैवानि[११०] यत्रायतनानि धीमन्[१११] ।
गत्वा नरास्तानि महाफलानि संसारगेहं न पुनर्विशन्ति ।।१४९।।
पुण्यमायतनं चान्यत् सप्तलोकाभिवन्दितम्[११२] ।
वाराणस्या[११३] मुनिश्रेष्ठ यत्र सन्निहितो हरः ।।१५०।।
तत्र भागीरथी पुण्या उत्तरां भजते दिशम् ।
सिद्धिक्षेत्रं[११४] बृहत्क्षेत्रं लोकेषु त्रिषु विश्रुतम् ।।१५१।।
अविमुक्तं स्मृतं नाम्ना न विमुक्तं हरेण तु ।
अविमुक्तेश्वरं दृष्ट्वा देवं तत्र ह्युमापतिम्[११५] ।।१५२।।
गाणपत्या गतिः प्रोक्ता मृत्युकाले महामुने ।
यत्रास्ते गणपो द्वारि विद्युत्केशो महाबलः ।।१५३।।
दण्डपाणिर्महातेजाः समादेशात् स्वयंभुवः ।
तमदृष्ट्वा न पश्यन्ति देवदेवेश्वरं हरम् ।।१५४।।
योगिनोपि महात्मानः पुण्यं तस्यापि दर्शनम् ।
दण्डपाणिं शुचिर्दृष्ट्वा[११६] हरदत्तवरं[११७] गणम् ।।१५५।।
इह लोके सुखं प्राप्य यान्ति[११८] तस्य सलोकताम् ।
यत्र सिद्धा महात्मानो योगैश्वर्यबलान्विताः ।।१५६।।
छन्नाः प्रदक्षिणं कृत्वा प्रणमन्ति स्वयंभुवम् ।
शक्रः पितामहो विष्णुर्धनेशो वरुणो यमः ।।१५७।।
हुतभुक् पवनः सोमः स्वयं चैव दिवाकरः ।
तथा सप्तर्षयः सिद्धा गन्धर्वाः पन्नगास्तथा ।।१५८।।
अविमुक्तेश्वरं देवमर्चयन्ति यतव्रताः ।
ततः पुण्यतमं नास्ति सिद्धिक्षेत्रमिति श्रुतिः ।।१५९।।
यत्र जन्तोर्विपन्नस्य मुक्तिः संसारबन्धनात् ।
प्रसादाज्जायते शम्भोर्गुह्यमेतत् परं स्मृतम् ।।१६०।।
गङ्गा[११९] दक्षिणतस्तस्मिन्नुत्तरेण वराणसी[१२०] ।
तत्तयो[१२१]र्मध्यतः[१२२] क्षेत्रमविमुक्तं पिनाकिनः ।।१६१।।

---

११० शैलानि - क., शैलाय - ख. । १११ धीमान् - क. ख. । ११२ ... नन्दितम् - ख. । ११३ वारणसी(?) ।
११४ सिद्धक्षेत्रं - ख. । ११५ तत्र देवमुमापतिम् - ख. । ११६ .. न्दृष्ट्वा - क. ख. ।
११७ हरदण्डधरं - ख. । ११८ याति - ख. । ११९ गङ्गां (?) । १२० वराणसी (?) । १२१ तयोः(?),
तद्वयोः -(?) । १२२ ...र्मम तत् - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

लिङ्गे यत् स्थापिते शम्भोः प्राप्यते[१२३] फलमन्यतः ।
तत् सहस्रगुणं प्रोक्तमविमुक्ते निवेशिते ।।१६२।।
स्थापयेद्विधिना योषा[१२४] पुमान्वा विधिपूर्वकम् ।
सहस्रं स्थापितं तेन लिङ्गानां भवति प्रभोः ।।१६३।।
त्र्यक्षः स गणपो भूत्वा रुद्रसायुज्यतां व्रजेत् ।
अतः कृत्वा मुनिश्रेष्ठ ब्रह्मादित्यपुरस्सरैः ।
लिङ्गानि स्थापितानि स्म सर्वैस्तत्र सुरोत्तमैः ।।१६४।।
तस्मिन् भगवतः क्षेत्रे काशिपुर्यामनेकशः ।
दृश्यन्तेद्यापि[१२५] लिङ्गानि स्थापितानि महात्मभिः ।।१६५।।
स्मरणादविमुक्तस्य पृथिव्यन्तेपि[१२६] संस्थितः ।
कल्मषैर्मुच्यते जन्तुर्मृतश्च लभते सुखम्[१२७] ।।१६६।।
ब्राह्मणास्तत्र मुच्यन्ति वेदतत्त्वार्थवेदिनः ।
सिद्धाः पाशुपता ये च[१२८] भवबन्धमुमुक्षवः ।।१६७।।
प्राप्य वाराणसीं पुण्यां सिद्धिक्षेत्रमनुत्तमम्[१२९] ।
पुनर्निष्क्रान्तुमन्यत्र कस्य जन्तोर्मतिर्भवेत् ।।१६८।।
वेदेषु गीयते व्यास तत् क्षेत्रं शशिमौलिनः ।
देहिनस्त्यजतः प्राणान् मोक्षसिद्धिगतिप्रदम् ।।१६९।।
येविमुक्ते वसन्ति स्म नरा रुद्रपरायणाः ।
रुद्रस्य भवने व्यास ते वसन्ति न संशयः ।।१७०।।
तिष्ठन् गच्छन् स्वपन् भुञ्जन्[१३०] कर्म कुर्वन् हसन्नपि ।
योविमुक्तं स्मरेद्देही तस्य जन्मभयं कुतः ।।१७१।।
नाविनुक्तात् परं क्षेत्रं नाविमुक्तात्परं पदम् ।
नाविमुक्तात्परं पुण्यं नाविमुक्तात्परा गतिः[१३१] ।।१७२।।
या गतिर्ध्यायतो[१३२] नित्यं परे ब्रणि लीयतः[१३३] ।
सैव संत्यजतः प्राणानविमुक्ते स्मृता[१३४] गतिः ।।१७३।।

---

१२३ प्राप्स्यते - ख. । १२४ यो वा - क ख. । १२५ दृश्यन्त्यापि - क. ख. । १२६ पृथिव्यान्तेपि - ख. । १२७ शिवम् (?) । १२८ तु - ख. । १२९ सिद्धक्षेत्रमनुत्तमम् - ख. । १३० जाग्रन् - ख. । १३१ परां गतिम् - ख. । १३२ या गतिर्ध्यानितो - ख. । १३३ लीयते - क. ख. । १३४ स्मृता - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

क्षेत्रं पुण्यमुमापतेः सुरवृषैर्जुष्टं सदा सिद्धये
ब्रह्माद्यैरविमुक्तमेतदिति यत् संसेवितं शान्तये ।
ये सेवन्ति तदीशभक्तिपरमा[१३५] मर्त्याः शमप्राप्तये
मुक्तास्ते भवसंभवप्रतिभयाद्[१३६] गच्छन्ति मोक्षं परम् ।।१७४।।

प्रयागे च तपःक्षेत्रे देवस्यायतनं महत् ।
तद्[१३७] दृष्ट्वा मनुजः सम्यगिष्टां गतिमवाप्नुयात् ।।१७५।।
नैमिशे देवदेवस्य[१३८] रुद्रस्यायतनं महत् ।
दृष्ट्वा पापविनिर्मुक्तः[१३९] स्वर्गलोकमवाप्नुयात् ।।१७६।।
धर्मक्षेत्रे कुरुक्षेत्रे स्थानं योगेश्वरं महत् ।
तेन दृष्टेन विप्रेन्द्र गाणपत्यमवाप्नुयात् ।।१७७।।
रुद्रलोकं मृतश्चासौ प्राप्नुयात् सर्वकामिकम् ।
गयायामन्यदीशस्य स्थानं भगवतः शुभम् ।।१७८।।
गृध्रकूटेश्वरं नाम्ना सर्वपापविमोचनम् ।
न तं दृष्ट्वा विमुह्यन्ति मृत्युकाले नरोत्तमाः ।।१७९।।
तत्र भस्म समालभ्य सर्वपापैः प्रमुच्यते ।
द्वादशाब्दव्रतस्यापि द्विजः फलमवाप्नुयात् ।।१८०।।
अन्यदायतनं पुण्यं मगधामु[१४०] पिनाकिनः ।
नगरे पाटलीपुत्रे नाम्ना प्रहसितेश्वरम् ।।१८१।।
वाजिमेधमवाप्नोति[१४१] अभिगम्य तमीश्वरम् ।
मगधासु स्मृतान्यष्टौ स्थानानि शशिमौलिनः।।१८२।।
शिष्यैः परिवृतो यानि बभ्राम नकुलीश्वरः[१४२] ।
यानि[१४३] दृष्ट्वा भवेत्सद्यः पुमान् पापविवर्जितः ।।१८३।।
यवनेषु स्मृतं स्थानं पुण्यमन्यदुमापतेः ।
त्रिपिष्टपमवाप्नोति[१४४] तन्दृष्ट्वा मानवः प्रभुम् ।।१८४।।

---

१३५ भक्तिपरया - क. । १३६ भवसागरप्रतिभयाद् (?) । १३७ तत् - क. ख. । १३८ देवदेवेशं - क. ख. ।
१३९ पापैर्विनिर्मुक्तः - ख. । १४० मगधेषु (?) । १४१ ...सहस्राणि - ख. । १४२ लगुडीश्वरः - ख. ।
१४३ तानि - ख. । १४४ त्रिविष्टपमवाप्नोप्ति - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अङ्गदेशे परं पुण्यं स्थानं प्रोक्तं पिनाकिनः ।
हेमचूडेश्वरं नाम्ना तं दृष्ट्वा न विमुह्यति[१४५] ॥१८५॥
भागीरथ्यास्ततो[१४६] व्यास सागरस्य च संगमे ।
ब्रह्मणा स्थापितं लिङ्गं पुण्यं तत्र[१४७] पिनाकिनः ॥१८६॥
तस्याभिगमनादेव सर्वपापैः प्रमुच्यते ।
दशानामश्वमेधानां तं दृष्ट्वा प्राप्नुते फलम् ॥१८७॥
प्रभासे शूलिनं दृष्ट्वा देहभेदे गणो भवेत् ।
पुष्करे शङ्करं दृष्ट्वा न शोचेन्मृत्युजन्मनी[१४८] ॥१८८॥
महेन्द्रे च नगश्रेष्ठे रुद्रस्यायतनं शुभम् ।
अभिगम्य नरो विद्वानश्वमेधफलं लभेत् ॥१८९॥
महाकालेश्वरं देवमुज्जयिन्यां[१४९] महाव्रतः ।
अभिगम्याप्नुयाद्विद्वान् गणत्वं त्रिपुरद्विषः ॥१९०॥
द्रिमिचण्डेश्वरं देवं दृष्ट्वा त्रायति मानवः ।
कुलान्युभयतः[१५०] सप्त सर्वयज्ञानि[१५१] चाप्नुते ॥१९१॥
शंकुकर्णेश्वरं दृष्ट्वा न शोचेन्मणं नरः ।
तथा हिमगिरेः शृङ्गे सिद्धकिन्नरसेविते ॥१९२॥
डिङ्गेश्वरमिति ख्यातं रुद्रस्यायतनं महत् ।
अभिगम्य च दृष्ट्वा च तं देवं जगतः प्रभुम् ॥१९३॥
शिवभक्तिपरो व्यास सर्वकामानवाप्नुयात्[१५२] ।
मृतस्य च गतिः प्रोक्ता गाणपत्यं महात्मनः ॥१९४॥
सुवर्णाक्षे परं स्थानं देवदेवस्य संस्मृतम् ।
तद् दृष्ट्वा[१५३] मनुजो व्यास[१५४] राजसूयफलं लभेत् ॥१९५॥
सप्तगोदावरे स्थानं दृष्ट्वा पुण्यं कपर्दिनः[१५५] ।
अश्वमेधफलं प्राप्य स्वर्गलोके वसेन्नरः ॥१९६॥

---

१४५ ...न्न विमुच्यति - खा. । १४६ न्ततो ख. । १४७ तस्य पुण्यं - ख. । १४८ मृत्युजन्मनि - क. ख. ।
१४९ ...मुज्जयन्यां - क. ख. । १५० कुलानुभयतः - क. ख., कुलानुभयजान् - क. ख.। १५१ सर्वयज्ञान्स - (?) ।
१५२ सर्वकाममवाप्नुयात् - ख. । १५३ तंदृष्ट्वा - क. । १५४ भक्तया - क. । १५५ कपार्दिनं - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्थानं पुण्यतमं चान्यच्छ्रेष्ठं जगति कीर्तितम् ।
नाम्ना भद्रेश्वरं ख्यातं देवगन्धर्वसेवितम् ॥१९७॥
तं वीक्ष्य मानवो व्यास सर्वयज्ञफलं लभेत् ।
जन्मप्रभृति यत्किञ्चित् कृतं कर्माशुभं[१५६] महत् ॥१९८॥
तत्क्षणान्नश्यते सर्वं दृष्ट्वा भद्रेश्वरं[१५७] हरम् ।
यत्र तत्र मृतश्चापि गाणपत्यं लभेन्नरः ॥१९९॥
धन्यास्ते मानवा व्यास रुद्रभक्ता महौजसः ।
ये प्रपश्यन्ति भद्रेशं जन्ममृत्युभयापहम्[१५८] ॥२००॥
एकाम्रे च विभोः स्थानं दृष्ट्वा स्वर्गमवाप्नुयात् ।
विरजायां हरं दृष्ट्वा वाजिमेधमवाप्नुयात् ॥२०१॥
नेपालेषु च देवेशं दृष्ट्वा पशुपतिं प्रभुम् ।
दशाश्वमेधानाप्नोति[१५९] रुद्रलोकं च गच्छति ॥२०२॥
देहभेदं च संप्राप्य पशुत्वाद्विप्रमुच्यते[१६०] ।
अन्यद्धिमगिरौ स्थानं नैकतुङ्गाधिपेश्वरम् ॥२०३॥
दृष्ट्वा तन्न पुनर्मर्त्यो[१६१] जायते मुनिसत्तम ।
भक्तानां प्रणतानाञ्च सर्वकामप्रदं स्मृतम् ॥२०४॥
एवमेतानि पुण्यानि रुद्रस्यायतनानि ते ।
कथितानि मया व्यास यैर्गतिः प्राप्यते शुभा ॥२०५॥
य एतानि पठेद्विप्रः प्रयतात्मा दिने दिने ।
तस्य सायुज्यतां देवो ददाति वृषभध्वजः ॥२०६॥
मङ्गल्यं परमं पुण्यं मेध्यं सर्वभयापहम् ।
स्थानानां कीर्तनं शम्भोर्नित्यं कुर्याच्छुचिर्नरः ॥२०७॥

---

१५६ कर्म शुभं - ख. । १५७ भद्रेश्वरे (?) । १५८ भयावहम् - क. । १५९ दशाश्वमेधान्प्राप्नोति - क. टि. ।
१६० पशुपत्वाद्विमुच्यते - क. । १६१ तन्दृष्ट्वा न पुनर्मर्त्यो - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

इति गिरिवरपुत्रीविष्णुगङ्गाधरस्य[१६२]
जगति वसतिरेषा सर्वकामप्रदा ते ।
मुनिवरसुतशिष्टा[१६३] पापसंशुद्धिकर्त्री[१६४]
वद किमपरमन्यद् व्यास तुभ्यं वदानि[१६५] ।।२०८।।

⊙ इति स्कन्दपुराणे शिवायतनवर्णने[१६६] सप्तशष्ट्युत्तरशततमोध्याय:[१६७] ⊙

सूत[१] उवाच

श्रुत्वा कथामाग्रतनानुबद्धां[२] चन्द्रार्धबिम्बा[३]स्थितमौलिनस्तु ।
व्यासो मुनिस्तं वचनं बभाषे ब्रह्मात्मजं ब्रह्मविदं मुनीन्द्रम् ।।१।।

धर्म्या[४] सुपुण्या भगवन् त्वयैषा गुह्या कथा मे विधिवत् प्रदिष्टा ।
स्थानानि शम्भोर्दयितानि कोन्य एवं परिज्ञातुमृषि:[५] समर्थ: ।।२।।

इच्छामि वेत्तुं त्रिपुरं प्रदग्धमेकेषुणा दिव्यपिनाकधर्त्रा ।
यथा पुरा भक्तवरप्रदेन[६] तन्मे मुने ब्रूहि यथाप्रवृत्तम् ।।३।।

पृष्टस्तथैवं मुनिना मुनीन्द्र: प्रश्नं यथावत् कथयञ्चकार ।
दग्धं यथा तत् त्रिपुरं तथा त्वं श्रृणुष्व पुत्रेति वचो ब्रुवाण:[७] ।।४।।

तस्मिन् हते दैत्यवृषेन्द्रसिंहे पुरा हिरण्याक्षसुते प्रवीरे ।
भग्नेषु दैत्येषु सदानवेषु मयो बभूवाधृतिदु:खतप्त: ।।५।।

स विश्वकृद्दानवराजलक्ष्म्या रत्येव हीनो मकरध्वजोभूत् ।
आदाय दैत्यं स हि तारकाक्षं विद्युत्प्रभं चेन्द्रसमप्रभावम् ।।६।।

तपश्चचारोग्रमहीनकर्मा[८] दैत्यौ च तावन्धकतुल्यवीर्यौ[९] ।
ते शीतकाले हिमपर्वतस्था ग्रीष्मे च पञ्चज्वलनाभितप्ता: ।।७।।

व्यभ्रे पय:प्लावितभूमिभागे चेरुस्तप: प्रावृषि च प्रयत्ता:[१०] ।
तेषामगाद्दिव्यसमासहस्त्रं तथा सुतीव्रे तपसि स्थितानाम् ।।८।।

---

१६२ ...स्य च - क. । १६३ ...शिष्या - क. । १६४ ... शुद्धकर्त्री - क. । १६५ वदामि - ख. ।
१६६ तीर्थवर्णने (?) - ख. । १६७ अ. २१५ - ख. ।
१ व्यास - क. । २ बद्धा - क. ख. । ३ बिम्ब - क. । ४ धर्मा - ख., ब्रह्मन् - क. ।
५ ज्ञातुमृषे - (?) । ६ भक्तिवरप्रदेन - क. ख. । ७ भ्युवाच - ख. । ८ तपश्चकारोग्रमहीनकर्मा - क. ।
९ कल्पौ - क. ख. । १० प्रयत्नात् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

चर्मास्थिशेषा ज्वलनप्रभावास्तपो[११] विशेषाद् दितिपुत्रसिंहाः ।
आदित्यतेजःप्रतिमानवीरा[१२] बभूवुरादित्यवपुःप्रकाशाः ॥९॥
पितामहस्तानभिगम्य सर्वान् प्रियं[१३] बहूक्त्वा वचनं बभाषे ।
तप्तं तपो वो विगतप्रमोहा वरं त्विदानीं वृणुतेति हृष्टाः[१४] ॥१०॥
तं प्राञ्जलिर्भूमिनिविष्टजानुर्मयः सुरेशं प्रणतोऽभ्युवाच ।
अवध्यतामप्रतिमं बलञ्च ज्ञानं च दिव्यं परमं सुखं च ॥११॥
मृत्युर्यथा नो[१५] न भवेच्च देव वरं प्रयच्छैनमभीप्सितं[१६] नः ।
करोम्यहं यच्च सुरेश दुर्गं त्रिभिः पुरैर्दिव्यविमानकल्पैः ॥१२॥
तन्मे भवेत् सर्वसुरैरगम्यं स्वच्छन्दसंस्थानगतिप्रचारम् ।
इत्येवमुक्तो[१७] दनुजाधिपेन ब्रह्मा वचस्तं मयमाबभाषे ॥१३॥
दातुं न शक्यो वर एष[१८] तुभ्यं तस्मात् परं[१९] सान्तरमेव चान्यम्[२०] ।
त्वं पुत्र याचस्व ततः प्रदास्ये चिन्ता च ते मा दनुजान्यथाभूत् ॥१४॥
ततो मयः प्राह वचो विमूढो वरो यथा मार्गित एव नोऽस्तु ।
ब्रवीमि यच्चान्यदहं[२१] सुरेश तन्मेऽर्हसि त्वं प्रददातु[२२]मद्य ॥१५॥
पूर्णे सहस्रे त्रिपुरं[२३] समानां समेष्यते ह्यर्धनिमेषमात्रम्[२४] ।
तस्मिन्क्षणे यस्त्रिषु[२५] संगतेषु पुरेषु दिव्येषु सुरप्रवीर ॥१६॥
एकेषुणा तत्[२६] त्रिपुरं दहेत स नो विनाशी त्रिपुरस्य[२७] भूयात् ।
श्रुत्वा ततस्तद्वचनं मयस्य ब्रह्मा वरं तं हृषितान्तरात्मा ।
प्रादादभीष्टं दनुजाधिपाय[२८] दत्त्वा च तूर्णं स्वपुरं जगाम ॥१७॥
ततो मयस्तत्त्रिपुरं ससर्ज जगद्विधातेव पुरादिकल्पे ।
अयोमयं तत्प्रथमं चकार ततोऽपरं राजतमद्रिकल्पम् ॥१८॥
तृतीयमन्यत्पुरमाशु हैमं ससर्ज मेरोरिव शृङ्गमुच्चम्[२९] ।
सृष्टं ततस्तत्त्रिपुरं मयेन स्वर्गस्य रूपं प्रजहार दिव्यम् ॥१९॥

---

११ त्ततो - क., ... स्तपो - ख., ...त्तपो (?) । १२ प्रतिमान्यवीरा - क. ख. । १३ प्रियान् - क. ।
१४ हृष्टः - क. ख. । १५ यथातो - ख. । १६ प्रयच्छेत - क, प्रयच्छेत - ख, प्रयच्छैतदभीप्सितं (?)।
१७ मुक्त: - क., ...क्ते - ख. । १८ शक्यामरता हि (?) । १९ वरं - क । २० मेतत् - ख, चान्यत् - क. । २१ ...महं - ख. । २२ प्रदातु ?; । २३ सहस्रे तु पुरं - क. ख. । २४ चार्धनिमेषमात्रम् - ख. ।
२५ यः सह - ख. । २६ तं - क. । २७ विनाशस्त्रिपुरस्य - क. । २८ ...धिपस्य (?) । २९ ...मुच्चै· (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

द्वारैर्मनोज्ञैर्वडभीगवाक्षैर्बीथ्यङ्गणैर्हेममयैः[३०] सुयुक्तम् ।
चन्द्रांशुसंसृष्टतलैश्च हर्म्यैः शीतानिलाह्लादसुखप्रवेशैः[३१] ॥२०॥
मुक्ताप्रवालैर्मणिखण्डचित्रै[३२]रालम्बितैश्चित्रतडित्प्रकाशैः ।
ध्वजैर्विचित्रैः पवनावधूतैश्चलत्पताकाभिरतीव रेजे ॥२१॥
प्रासादपंक्तिस्थितरत्नखण्डै[३३]र्महामणीन्दुद्युतिसन्निकाशैः[३४] ।
सतोरणाभ्युच्छ्रितहर्म्यपृष्ठैरलंकृतं तत् त्रिपुरं रराज ॥२२॥
सर्वर्तुपुष्पैः फलितैर्मनोज्ञैर्वृतं समन्तात्तरुभिर्महोच्चैः ।
रम्यैस्तथोद्यानशतैरुपेतं प्रभ्रान्तषट्पादमयूरहंसैः ॥२३॥
वापीभिराक्रान्तविहङ्गमाभिः प्रफुल्लनीलोत्पलसंवृताभिः[३५] ।
दैत्यालयं तच्छुशुभे तथैव प्रनृत्तकेकाविहगैस्सरोभिः[३६] ॥२४॥
तथा नखोद्भिन्नपयोधराभिराकर्णरक्तान्तविलोचनाभिः ।
सव्रीडमीषच्चपलेक्षिताभिर्योषिद्भिराकीर्णमतीव रेजे ॥२५॥
लौहं पुरं यत्तदधश्चकार तत्तारकाक्षाय मयः प्रदत्वा[३७] ।
पुरं द्वितीयं रजतामयं यद्विद्युत्प्रभायासुरराजभर्त्रे ॥२६॥
हैमं तृतीयं स्वयमेव दिव्यं जग्राह राजा मय आत्मनोर्थे ।
अधिष्ठितं तत्त्रिपुरं तदाभूत्समं त्रिभिस्तैर्दनुराजसिंहैः ॥२७॥
ते सर्वतः स्वः[३८] प्रभवान्[३९] विजित्य[४०] प्रियासहायाः सहमित्रभृत्यैः ।
सुखानि तस्मिन् विविधान्यवापु[४१]स्त्रैलोक्यचिन्तामविचिन्तयन्तः[४२] ॥२८॥
ते दर्पमोहप्रतिबद्धरागा न्यूनानमन्यन्त बलेन देवान् ।
मत्वा च तेषां प्रसभं निपत्य[४३] नानाविधाश्चक्रुरतीव पीडाः ॥२९॥
वनानि वैभ्राजपुरस्सराणि संछिन्नवीरुत्कुसुमानि चक्रुः ।
वापीः प्रचक्रुः कमलैर्विहीना जह्रुश्च रम्भादिपुरस्सरास्ताः ॥३०॥
सन्त्रस्तगात्रीः[४४] सुरयोषितस्तैरन्याश्च[४५] चक्रुर्महतीः प्रपीडाः ।
तेषामतीतः सुमहानथैवं प्रकुर्वतां देवविनाशनानि[४६] ॥३१॥

---

३० र्बीथ्यगनैर्हेममयैः - ख. । ३१ ...प्रदेशैः - ख. । ३२ दण्डचित्रै - ख. । ३३ स्थिररत्नखण्डै - ख. ।
३४ मणीन्द्रद्युनिसन्निकाशैः (?) । ३५ प्रस्फुल्लनीलोत्पलसंवृताभिः - क. । ३६ विहगाप्सरोभिः - ख. । ३७ प्रदाय (?) ।
३८ सर्वसम्पत् - ख. । ३९ स्वप्रभवान् - क. । ४० वा विजित्य - क., वाभिलभ्या - ख. ।
४१ ...न्यथाभू - ख. । ४२ सौख्यामविचिन्तयतः - ख. । ४३ त्वा - ख. । ४४ ... गात्र्यः - क. ।
४५ . स्ता अन्याश्च (?) । ४६ विनाशकानि - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कालो[४७] भयं प्रत्यथ जातकोपा:[४८] संगत्य सर्वे त्रिदिवौकसेशाः ।
वृत्तां यथा सर्वमशेषतस्तन्न्यवेदयन्नाशु पितामहाय ॥३२॥
तानाह देव: कमलासनस्थः सर्वान्सुरेशान्परिसान्त्वयित्वा ।
महाबलास्ते त्रिपुरासुरेन्द्रा हन्तुं न[४९] शक्या हि[५०] बलाद्भवद्भिः ॥३३॥
तस्मादयं विष्णुरहञ्च युष्मान् प्रगृह्य शम्भुं शरणं प्रयाम ।
गतिः सदा नः शशिभृत् सुरेशा: स तान्[५१] बलाद्धंस्यति शूलपाणिः ॥३४॥
तथेति तेपि प्रणिपत्य देवा ब्रह्मार्कशक्रानिलपावकाद्याः ।
कैलासमागम्य सुरेश्वरेशं दृष्ट्वा हरं तुष्टुवुरादृतार्थाः ॥३५॥
नमस्त्रिलोकेश्वरवन्दिताय प्रियाधरायामितविक्रमाय ।
नमोस्तु चन्द्रार्धजटाकलापकान्ति[५२]प्रभोद्योतितशेखराय ॥३६॥
त्रैलोक्यदेवाय नमोस्तु नित्यं पिनाकचापाय नमस्तथैव ।
नमः प्रदीप्तासिपरश्वधाय त्रिशूलहस्ताय नमोस्तु नित्यम् ॥३७॥
नमो नमो नन्दिवरप्रदाय जगच्छरण्याय सुरेश्वराय ।
नमः सदा भक्तवरप्रदाय नमोस्तु यक्षेशवरप्रदाय ॥३८॥
स्थिताय नित्यं हिमवद्गिरीन्द्रे कैलासवासाय नमस्सदैव ।
नमो विमुक्तेशनिकेतनाय स्थिताय सर्वत्र च ते नमोस्तु ॥३९॥
भस्माङ्गलिप्ताय कपर्दिने च नमोस्तु नित्यं वृषभस्थिताय ।
दिग्वाससे श्वेतवरप्रदाय सर्वर्द्धियुक्ताय जगद्विधात्रे ॥४०॥
हर्यर्कशक्राग्निपितामहानां स्रष्ट्रे नमो देव- - -राय।
सूक्ष्माय नित्यं परमेश्वराय नित्यं नमः सर्वगताय धात्रे ॥४१॥
नमः परायातिपरे पुमांसे[५३] पुराय षड्विंशकसंज्ञिताय ।
नमोस्तु शर्वाय धनुर्धराय सर्वाय[५४] सर्वप्रभवाय नित्यम् ॥४२॥
सोमानिलार्कज्वलनाम्बु[५५]भूमिव्योमात्मकायादिसृजे नमोस्तु ।
पूर्णो[५६] नमो दन्तविनाशनाय[५७] कामाङ्गनाशाय नमोस्तु नित्यम् ॥४३॥

---

४७ ततो - क. ख. । ४८ ते प्रति जातकोपा: - ख. । ४९ हि - क. ख. । ५० न - क. ख. । ५१ तं - ख. । ५२ कान्त - ख. । ५३ पराय पुंसे (?) । ५४ सर्वस्य - क. ख. । ५५ सोमानलार्कज्वलनाम्बु - क. ख. । ५६ पूर्णे - क. । ५७ दन्तविनाशकाय - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

नमः प्रधानाय पराय पुंसे योगाधिगम्याय सदा नमोस्तु ।
रौद्राय सौम्याय वपुष्मते च नमो नमः सर्वजगत्सृजे च ।।४४।।
विद्यासृजे धर्मसृजे नमोस्तु स्रष्ट्रे नमो यज्ञसुरासुराणाम्[५८] ।
नमस्तृतीयेक्षणधारिणे च नमो नमो नीलशिखण्डिने च ।।४५।।
नमोस्तु नित्यं पुरुषोत्तमाय श्मशानवासाय नमः सदैव ।
नमोस्तु दैत्यान्धकनाशनाय नमः सदा मोहविनाशनाय ।।४६।।
तमोविनाशाय[५९] नमोस्तु नित्यमज्ञाननाशाय नमोस्तु नित्यम्[६०] ।
नमः सदा मोक्षवरप्रदाय नमः सदायामृतसंस्थिताय[६१] ।।४७।।
भर्त्रे नमो भूमिधरेन्द्रपुत्र्याः पित्रे कुमारस्य नमोस्तु नित्यम् ।
नमोस्तु वित्तेशवरप्रदाय नमः सदा शुक्रवरप्रदाय ।।४८।।
ब्रह्मात्मने ब्रह्मसृजे नमोस्तु नमो नमो देवसृजे[६२] विधात्रे ।
नमोस्तु दक्षामरयज्ञहन्त्रे[६३] नमोस्तु चण्डेशवरप्रदाय ।।४९।।
योगेश्वरायामरसंस्तुताय नमोस्तु रुद्राय पराय धाम्ने ।
हराय शर्वाय शिवाय गोप्त्रे नमोस्तु भीमाय च शम्भवे च ।।५०।।
गुणैर्विहीनाय गुणोत्कटाय गुणेष्वतीताय गुणास्थिताय ।
गीताय सांख्ये पुरुषाय नित्यं नमोस्तु योगोपनिषत्स्थिताय ।।५१।।
महापुराणाय परात्पराय स्थूलाय सूक्ष्माय नमस्सदैव ।
प्रसाद्यमानः कुरु नः प्रसादं तुष्टः परेशान वरं प्रयच्छ ।
शम्भुस्तथैवं स्तुवतां सुराणां ब्रह्मेन्द्रविष्ण्वर्कपुरःसराणाम् ।।५२।।
प्रीतस्तया[६४] स्तोत्रविशेषभक्त्या जगाद वाक्यं परमाद्भुतार्थम् ।
तुष्टोस्मि देवा वृणुताद्य शीघ्रं समीहितं वो यदि किञ्चिदस्ति ।
दातास्मि सर्वं तदशेषतोद्य किञ्चिन्न युष्मभ्यमदेयमस्ति ।।५३।।

⊙ इति स्कन्दपुराणे त्रिपुरवधोपक्रमे[६५] देवतावरप्रदानं[६६] नाम अष्टषष्ट्युत्तरशततमोध्यायः[६७] ⊙

---

५८ धर्म .. - ख., सर्वसुरासुराणाम् (?) । ५९ मनोनिवासाय - क. ख । ६० च ते नमोस्तु - ख. । ६१ नदैवामृतनमंस्थिताय (?) । ६२ वेदसृजे (?) । ६३ ... पात्रे - ख. । ६४ प्रीतस्त्वया -- क. । ६५ त्रिपुरवधे - ख. । ६६ वरप्रदानो - ख. । ६७ २१६ - ख ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

देवा ऊचुः

ब्रह्मदत्तवरैर्देव मयाद्यैर्दानवैस्त्रिभिः ।
दुर्गं तत्त्रिपुरं कृत्वा बाध्यामो बलदर्पितैः ॥१॥
हृता अप्सरसः[1] सर्वा ध्वंसितानि वनानि च ।
सर्वान्देवान्निहन्मोद्य श्वो हन्मेति च तेऽब्रुवन् ॥२॥
न तेषां निग्रहे शक्तो ब्रह्माप्येष पितामहः ।
विष्णुर्वापि महादेव तेन नः सुमहद् भयम् ॥३॥
तद् यथा त्रिपुरं नश्येत् ते च स्युर्निहता यथा[2] ।
तथा कुरु सुरश्रेष्ठ वरोयन्नः प्रदीयताम् ॥४॥
इति विज्ञापितः शम्भुस्सर्वैस्तैर्हि सुरोत्तमैः ।
इदमाह महातेजाः सुरानाश्वासयन्निव ॥५॥
शतमंशं सुरेशा वै गृहीत्वा मम तेजसः ।
रुद्रतेजोमया भूत्वा दानवान् विनिहंस्यथ ॥६॥
ततस्ते पुनरेवेशं प्राहुर्वाक्यमिदं सुराः ।
शक्ताः सहस्रमप्यंशमुद्वोढुं न वयं तव ॥७॥
का नः[3] शक्तिः सुरेशान तेजो माहेश्वरं परम् ।
द्रष्टुं धारयितुं वापि प्रसादं कुरु नः[4] प्रभो ॥८॥
न कथञ्चिद्वयं शक्तास्तान्हन्तुं दानवान् बलात् ।
भगवन् स्वयमेव त्वं त्रिपुरं जहि शङ्कर ॥९॥
तेभ्यः किल वरो दत्तो ब्रह्मणानेन[5] शूलधृक् ।
दिव्ये वर्षसहस्रे तु समेष्यति पुरत्रयम् ॥१०॥
निमेषार्धं क्षणे तस्मिन्नेतद्वस्त्रिपुरं बली ।
सकृदेकमिषुं क्षिप्त्वा यः प्रधक्ष्यति दानवान् ॥११॥
भविष्यति स वो मृत्युर्नान्यथा मरणं हि वः ।
तच्च कर्तुं न शक्ताः स्मः प्रसादं तेन नः कुरु ॥१२॥

---

१ हिता अप्सरसः - क. । २ ...स्तथा - क. । ३ तु - क. ख. । ४ कुरुत - क. ख. । ५ तेन - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ततः स भगवान्देवः प्रणतान् वृषभध्वजः ।
पुनराश्वासयन् प्राह समुद्विग्नान् दिवौकसः ।।१३।।
यद्येवं सुरशार्दूलास्त्रिपुरं दुर्गमं महत् ।
इषुमेकं सकृत् क्षिप्त्वा प्रधक्ष्ये निमिषे क्षणे ।।१४।।
ब्रह्मविष्णुप्रियार्थं हि शक्रस्यानुग्रहाय च ।
त्रिपुरं रथमास्थाय हंस्यामि स्वयमेव तत् ।।१५।।
क्रियतां स रथः सज्जो यमारुह्य[६] दिवौकसः ।
धक्ष्यामि त्रिपुरं दुर्गमाक्रान्तं दानवैस्त्रिभिः ।।१६।।
यादृशश्च हि मां वोढुं शक्तः स्यात् सुरपुङ्गवाः ।
बलवान् हिमवत्कल्पः[७] कर्तव्यस्तादृशो रथः ।।१७।।
ततो देवाः प्रणम्येशं प्रहृष्टमनसोभवन् ।
रथं च सहिताः सर्वे कल्पयामासुरुत्तमम् ।।१८।।
ततः स भगवान् ब्रह्मा तथा विष्णुहुताशनौ ।
सर्वदेवमयं दिव्यं चक्रुस्तं रथमुत्तमम्[८] ।।१९।।
धातारं भास्करं शक्रं पवनं धनदं यमम् ।
वसून् रूद्राँस्तथादित्यान् गन्धर्वानश्विनावपि ।।२०।।
गरुडान् पर्वतान्नागान् गुह्यकान्समहोदधीन् ।
ऋषीँन् सिद्धाँस्तथा यक्षान् ग्रहाँ - - - - -।।२१।।
- - - - । सितं कालं तथा चैव वनस्पतीन् ।
दिवसानि मुहूर्त्तानि क्षणान् काष्ठालवाँस्तथा ।।२२।।
अयने च ऋतून्मासान् पक्षान् संवत्सराँस्तथा[९] ।
स्थावरं जङ्गमं यच्च नक्षत्राणि तथैव च ।।२३।।
अष्टौ देवनिकायाँस्तान् रथे तस्मिन्नकल्पयन् ।
काँश्चिच्चक्रद्वये चक्रुः प्रताप - - - - - ।।२४।।
- - - श्चिद्रथेचान्यान् युयुजुः सुरपुङ्गवान् ।
कृत्वाश्वाँश्चतुरो वेदान् रथे तस्मिन्न्ययोजयन् ।।२५।।

६ यत्रारुह्य - क. । ७ हिमवत्तुल्यः - ख. । ८ रथसत्तमम् - क. । ९ कालान् - क., संवत्सराणि च - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सम्वत्सरमयं चक्रं धनुर्गिरिमयं तथा ।
ज्याश्चैव[१०] धनुषश्चक्रुर्देव देवीं जगत्स्थितिम् ॥२६॥
ते तमेवंविधं[११] देवा रथमग्र्यमचीकरन् ।
सर्वदेवमयं कृत्वा गिरिकल्पं रथोत्तमम् ॥२७॥
विष्णुः पितामहोग्निश्च प्रणम्य परमेश्वरम् ।
रथः[१२] सज्ज इति[१३] प्राहुर्विनाशाय सुरद्विषाम् ॥२८।
ततः स भगवाञ्छम्भुः स्तूयमानः सुरैस्त्रिभिः ।
अवैक्षत[१४] रथं दिव्यं सर्वदेवमयं कृतम् ॥२९॥
सुकृतं साध्विति प्रोच्य धनुर्जग्राह तन्महत् ।
तत्प्रगृह्य धनुर्दीप्तं सर्वतेजोमयं परम् ॥३०॥
अधश्चोर्ध्वञ्च संप्रेक्ष्य तुतोष भुवनेश्वरः ।
पितामहं ततो वीक्ष्य प्रोवाच वचसां पतिः[५] ॥३१॥
रथ एष धनुश्चैतत्[१६] त्वया ब्रह्मन् सुकल्पितम्[७] ।
दग्धव्यं त्रिपुरं येन तमिषुं शीघ्रमानय ॥३२॥
ततः प्रोवाच तं ब्रह्मा प्रणम्य वृषभध्वजम् ।
रथ एष कृतो देव धनुरेतच्च ते मया ॥३३॥
तमिषुं भगवानेव तद्योग्यं कर्तुमर्हति ।
ततः पार्श्वस्थितौ दृष्ट्वा शम्भुर्विष्णुहुताशनौ ॥३४॥
दृष्टिपातेन तौ देवौ समाह्वयदरिन्दमः ।
तौ द्वावञ्जलिमाधाय[१८] सुरेशानमुपस्थितौ ॥३५॥
स्वयमेव ततश्चक्रे शम्भुर्विष्णुं शरोत्तमम् ।
ओषधीनां पतिं सोमं पुंखे तस्य न्ययोजयत् ॥३६॥
शल्यं च पावकं चक्रे ब्रह्माणं स[१९] ततोब्रवीत् ।
सारथिः को रथे ब्रह्मंस्त्वयेह परिकल्पितः ॥३७॥
तमुवाच ततो ब्रह्मा प्राञ्जलिर्जगतः पतिम् ।
मह्यं ददासि यद्याज्ञा[२०]महमेव हि सारथिः ॥३८॥

---

१० ज्याश्चैव - क. । ११ विधा - क. । १२ रथं - क. । १३ सज्जमिति - क । १४ अवेक्षत - ख. ।
१५ पतिम् - क. ख. । १६ धनुश्चैवं - ख । १७ सुकल्पितो - ख. । १८ द्वौ तावञ्जलिमाधाय - क. ख. ।
१९ च - क. ख. । २० यद्याज्ञां स्वय - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्राप्स्ये[२१] किमपरं देव सारथ्यादधिकं तव ।
सर्वं शोभनमित्युक्त्वा ततो देवः पिनाकधृक् ॥३९॥
हस्ते प्रगृह्य देवेशमारुरोह रथोत्तमम् ।
रुद्रपारिषदा[२२] ये च नन्दीश्वरपुरोगमाः ॥४०॥
शंकुकर्णपुरोगाश्च ये च चण्डेश्वरादयः ।
गणेश्वरा महायोगास्त्र्यक्षाः पट्टिशपाणयः ॥४१॥
नानाशस्त्रप्रहरणा नानायुद्धविशारदाः[२३] ।
नानाभरणवस्त्राश्च[२४] नानाविद्याविशारदाः ॥४२॥
वादयन्तः समं वाद्यान्[२५] भेरीशंखस्वनान्[२६] बहून् ।
आजग्मुर्गणमुख्यास्ते सहस्राणि चतुर्द्दश ॥४३॥
नानाविधानां पुष्पाणामुपरिष्टात् सहस्रशः ।
निपेतुर्वृष्टयो मूर्ध्नि रथस्थस्य पिनाकिनः ॥४४॥
स्वयमेव च वाद्यानि विनेदुः सर्वतोदिशम् ।
रथे युक्ताश्च[२७] ते सर्वे[२८] देवदेवस्य शूलिनः ॥४५॥
अशक्ता भारमुद्वोढुं मुमुहुर्देवता[२९] भृशम् ।
ततस्तान्देवदेवेशो ज्ञात्वा मूढान् दिवौकसः ॥४६॥
सहनीयं[३०] वपुश्चक्रे सुरास्ते[३१] मुमुहुस्ततः ।
अथास्मिन्नन्तरे व्यास नारदो भगवान्मुनिः ॥४७॥
जगाम त्रिपुरं शीघ्रं विश्वकर्मदिदृक्षया ।
अथागतमृषिं दृष्ट्वा विश्वकर्मा मयस्तदा ॥४८॥
संपूज्य परया भक्त्या ननाम मुनिसत्तमम् ।
स दत्त्वा ह्याशिषस्तस्मै वेत्रासन उपाविशत्[३२] ॥४९॥
उपविश्यासने तस्मिन्मयमाह महामुनिः ।
प्रसाद्य दैवतैस्सर्वैरेष[३३] देवो वृषध्वजः ॥५०॥

---

२१ प्राप्ये - क. । २२ रुद्राःपारिषदा - ख. । २३ नानायुधविशारदाः - क. । २४ चरणवक्त्राश्च - क. ।
२५ वाद्यं - क. । २६ शंखभेरीस्वनान् - ख. । २७ रथयुक्ताश्च - क., रथं युक्तं च - ख. ।
२८ सर्वे ते - क. । २९ ..र्देवता - क. ख. । ३० वहनीयं (?) । ३१ सुराश्च - क. ख. ।
३२ ...मुपाविशत् - क. । ३३ देवतैस्सर्वैरेष - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

आनीतस्त्रिपुरं हन्तुमत्र यत्साधु तत्कुरु ।
रथं[३४] देवमयं[३५] दिव्यं[३६] समारुह्य जगत्पतिः ॥५१॥
ब्रह्माणं सारथिं कृत्वा स्वयमायाति शङ्करः ।
नारदस्य वचः श्रुत्वा स तदा दानवाधिपः ॥५२॥
तारकाक्षं समाहूय विद्युन्मालिनमेव च ।
तथान्यानसुरान् भ्रातॄन् बाणनेमिपुरस्सरान् ॥५३॥
नारदेन यदाख्यातं[३७] सर्वमश्रावयत्तदा ।
तच्छ्रुत्वा दैत्यराजस्तु तारकाक्षोब्रवीदिदम् ॥५४॥
न तवास्ति समः कश्चित् त्रैलोक्येसुरपुङ्गव[३८] ।
योधयेन्निर्भयो यस्त्वां चिन्तां त्वं मय मा कृथाः ॥५५॥
किमत्र चिन्त्यते राजन् सर्वेवध्या[३९] यदा वयम् ।
कस्य तत्त्रिपुरं हन्तुं शक्तिर्विद्येत दानव ॥५६॥
संगत्य दैवतास्सर्वे यदि योद्‌धुमिहागताः ।
पश्य तान्निहतानद्य[४०] मयैवैकेन दैत्यप ॥५७॥
दुर्बलः कुरुते भेदं दानं सान्त्वमथापि वा ।
प्रणामं ज्यायसः शत्रोर्वयन्तु बलिनःसदा ॥५८॥
दुर्बलस्य रिपोर्दण्डो बलिना विजिगीषता ।
कर्तव्यो विक्रमेणेति प्राह शुक्रस्तदा गुरुः ॥५९॥
तद्वयं बलिनो दैत्या हीनाश्च[४१] त्रिदिवौकसः ।
हत्वा दण्डेन तान्[४२]सर्वान् स्थास्यामो निर्वृताः सुखम् ॥६०॥
तारकाक्षवचः श्रुत्वा विद्युन्माली वचोब्रवीत् ।
ममाप्येतदतीवेष्टं[४३] राज्ञोस्य वचनं शुभम् ॥६१॥
न शक्ता योद्‌धुमस्माभिर्देवता बलवर्जिताः ।
ते चेद्योत्स्यन्ति संमूढाः प्रयास्यन्ति ततः क्षयम् ॥६२॥

---

३४ रथे - क. ख. । ३५ देवमये - क. ख. । ३६ दिव्ये - क. ख. । ३७ यथाख्यातं - क. ।
३८ ...पुङ्गवः - क. । ३९ सर्वावध्या - क. ख. । ४० पश्ये (श्यै) तान्निहतानद्य - क. ख. । ४१ ...स्ते - ख. ।
४२ तत् - क. । ४३ प्येतदतीवेष्टं - क., वमतीष्टं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अन्योन्यन्तु वयं युद्धादुपायं तेषु युञ्ज्महे ।
युद्धे नैव सदा दैत्याः प्राप्नुवन्ति[४४] जयं परम् ॥६३॥
अद्य हत्वा सुरान्सर्वान् कुरु राज्यं त्रिविष्टपे ।
त्रैलोक्यं निर्वृतो भुंक्ष्व त्वमिन्द्रो भव विश्वकृत् ॥६४॥
सप्तलोकेश्वरं त्वद्य पश्यामस्त्वां[४५] पुरन्दरम् ।
हिरण्यकशिपुं स्मृत्वा हिरण्याक्षं च दैत्यप[४६] ॥६५॥
भोक्तारौ जगतो राज्यं त्वं प्रयाहि तयोर्गतिम् ।
ततः श्रुत्वा मयो व्यास विद्युन्मालिविभाषितम् ॥६६॥
नैतदेवमिति प्राह कम्पयन्नसकृच्छिरः[४७] ।
यस्तुल्यः स्वबले शत्रुर्हीनो वा दैत्यपुङ्गवाः ॥६७॥
बले वा यो भवेज्ज्यायानेकजातिवपुर्धराः[४८] ।
बुधास्तस्मिन् प्रयुञ्जन्ति तदुपायचतुष्टयम् ॥६८॥
समा दिवौकसोऽस्माकं बलेनासुरपुङ्गवाः ।
तैर्देवैः सार्धमस्माकं युक्तं सामादियोजनम् ॥६९॥
य[४९] एष भगवानीशः सर्वभूतेश्वरेश्वरः ।
अस्माकं देवतानाञ्च स्रष्टा हर्ता च स प्रभुः ॥७०॥
स हन्तुं स्वयमायाति उपायस्तस्य कीदृशः[५०] ।
प्रणामः संश्रयश्चैव गुणोपायौ[५१] कपर्दिनः ॥७१॥
द्वाविमौ[५२] साधने तस्य प्रयोज्याविति[५३] मे मतिः ।
यदि कार्कश्यमास्थाय योधयामः पिनाकिनम् ॥७२॥
तस्य जिह्मेक्षितेनैव निहताः स्म ततोऽसुराः[५४] ।
ब्रह्माद्याः शरणं शम्भुमर्दिता[५५]यान्ति शान्तये ॥७३॥
योऽभियुक्तः स्वयं तेन शरणं तस्य को भवेत् ।
यस्य सर्वमिदं दैत्या ब्रह्मादि प्रथितं जगत् ॥७४॥

---

४४ प्राप्नुवन्तो - क. ख. । ४५ पश्यामस्त्वा - ख. । ४६ दैत्यपम् - क. । ४७ च्छिरम् - क. ।
४८ नैकजातिवपुर्धराः - क । ४९ स - ख. । ५० स्वयमायात - क., ... मायातुमुपायस्तस्य - ख. ।
५१ द्वावुपायौ (?) । ५२ द्वे इमे (?) । ५३ प्रयोज्ये इति (?), प्रयोज्यमिति - क. । ५४ तयासुराः - क ।
५५ ... मार्दिता - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अभिध्यानात् क्षणेनैव प्रणश्येत भवेदपि ।
यो हेतुरपवर्गस्य कारणं जगतश्च यः ॥७५॥
कीदृशं तेन युद्धं नो देवदेवेन शम्भुना ।
किन्न वेत्थ शिशुप्रज्ञा[५६]लोष्टुगिर्यो[५७]र्यदन्तरम् ॥७६॥
भवन्तो लोष्टवो भूत्वा गिरिकल्पमुमापतिम् ।
ईप्सध्वे[५८] मोहिता युद्धे कालपाशेन यन्त्रिताः ॥७७॥
अहं भक्तो महादेवं जाने[५९] तस्य बलान्तरम् ।
स प्रणाममुपस्थास्ये न योत्स्ये शम्भुना सह ॥७८॥
यदि यूयमपि प्राज्ञा मम शुश्रूषवो यदि ।
मा कृढ्वं[६०] शम्भुना युद्धं गच्छध्वं शरणं शिवम् ॥७९॥
तमेवं वादिनं श्रुत्वा विश्वकर्माणमूर्जितम् ।
नारदो भगवान् प्राह दानवान्तकरं वचः ॥८०॥
विश्वकर्मन् यत्त्वयेद[६१]मुक्तं विस्तरशोर्थवत् ।
सर्वं युक्तमिदं किन्तु कालोयं नास्य वर्तते[६२] ॥८१॥
भवतां तत्तपः क्षीणमैश्वर्यं भुक्तमेव च ।
क्लीबतामपि[६३] कुर्वन्तो यूयं नंक्ष्यथ[६४]दानवाः ॥८२॥
वृतः सर्वामरैः शम्भुर्वधार्थं[६५] भवतामिह ।
प्रणतानप्यसौ युष्माँस्तत्प्रियार्थं निहंस्यति ॥८३॥
कथं दनुसुता भूत्वा राजानो बलदर्पिताः ।
भीता मृत्युं जिगीषध्वं कृपणा इव दानवाः ॥८४॥
प्राप्स्यथाधिकमैश्वर्यं त्यक्ष्यथासून्[६६] रणे यदि ।
विना युद्धं विपन्नानामशुभा वो गतिर्भवेत् ॥८५॥
अपि चेद्यदि हन्येध्वं[६७] देवदेवेन शूलिना ।
प्रमथेन्द्रास्ततो[६८] यूयं भविष्यथ[६९] न संशयः ॥८६॥

---

५६ प्राज्ञा - क ख. । ५७ लेष्टुगिर्यो - ख. । ५८ ईप्सध्वं - क. ख. । ५९ जानन् - ख. । ६० कुथा (ध्वं) - ख । ६१ यत्त्वया विश्वकर्मेदं - क ख । ६२ सांप्रतम् (?) - ख. । ६३ क्लीबोनामपि - क., क्लीबाना .. - ख. । ६४ नश्यत - क. ख. । ६५ व्याम वधार्थं - क. । ६६ त्यक्षयासून् - क. ख. । ६७ हन्यध्वं - क. ख. । ६८ मृतो (ता) - ख. । ६९ भवितासे - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गुणं सन्धिगतं नास्ति युष्माकं देवतैस्सह[७०] ।
विग्रहे वो मतिर्युक्ता सा च व्यक्ता वयं च वः (?) ।।८७।।
शौर्येण भवतां प्रीतः कदाचिद् वृषभध्वजः ।
भवेद्वरप्रदो दैत्याः श्रेयान्[७१] वस्तेन विक्रमः ।।८८।।
करिष्यामि च वो रक्षां शस्त्राघातनिषेधनीम् ।
उत्तिष्ठत दनोः पुत्रा विजयाय युयुत्सया ।।८९।।
नारदस्य वचः श्रुत्वा तारकाक्षो महाबलः ।
विद्युन्माली च दैत्येन्द्रा बाणाद्याश्च महासुराः ।।९०।।
कालपाशार्दिता मूढाः क्षीणपुण्या गतायुषः[७२] ।
साध्वेतच्छोभनं प्रोक्तं नारदेनेति तेब्रुवन् ।।९१।।
मयोपि तद्वचो बुद्ध्वा[७३] ज्ञात्वा नाशमुपस्थितम् ।
शोभनं नारदेनोक्तमिति वाक्यमुवाच ह ।।९२।।
नारदोपि ततो हृष्टो रक्षां[७४] बद्ध्वा तु मायया ।
युयुत्सूनसुरान् कृत्वा ययौ शर्वरथं प्रति ।।९३।।
ततस्ते दानवाः सर्वे युद्धाय कृतनिश्चयाः ।
नानाप्रहरणोपेता बभूवुर्युद्धलिप्सवः ।।९४।।
तरकाक्षो बलो बाणो विद्युन्माली च दानवः ।
सन्नह्य सहिताः सर्वे राजानस्तस्थुरग्रतः ।।९५।।
अवाद्यन्त ततः शंखास्तूर्याणि च सहस्रशः ।
दानवानां बले घोरे कातराणां भयप्रदे[७५] ।।९६।।
सरथोयमिहायाति असावन्यः प्रदृश्यते ।
कथमागत इत्येवं वचांस्यूचुः परस्परम् ।।९७।।

---

७० देवतैःमह - क. ख. । ७१ श्रेगो - क. ख. । ७२ गतायुषा - क । ७३ बुद्ध्या - ख. । ७४ ...द्दुष्टां - ख.।
७५ भयप्रदः - क

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विगतभयविषादास्त्रैपुरा दैत्यसंघाः
प्रकुपितवदनास्ते युद्धसज्जा बभूवुः ।
प्रहरणवरहस्तास्तं रथं वीक्षमाणाः[७६]
पशव इव मखाग्नेरन्वगच्छन् समीपम् ।।९८।।

⊙ इति स्कन्दपुराणे त्रिपुरवधेसुरवर्णने ऊनशप्तत्युत्तरशततमोध्यायः[७७] । ⊙

सनत्कुमार उवाच

अथाभ्यगात् पश्चिमसागरस्य मूर्ध्नि स्थितन्तत्त्रिपुरं[१] रथोसौ ।
नानापताकोज्ज्वलचित्रमौलिर्हैमोपलो[२] मेरुरिवाद्रिराजः ।।१।।
ते वीक्ष्य दुर्गं त्रिपुरं गणेशा नन्दीशचण्डीशमुखाः[३] सुयत्ताः ।
नादं प्रचक्रुः सहिताः प्रवीरा युयुत्सवो दानवराजसिंहैः ।।२।।
चण्डेश्वरश्चण्डवपुर्महात्मा ज्वलत्प्रदीप्तोग्रकुठारपाणिः ।
व्यादाय वक्त्रं पुरतः स्थितोभूद् देवस्य शम्भोःप्रमथेन्द्रवीरः ।।३।।
दीप्तं त्रिशूलं परिगृह्य नन्दी त्र्यक्षः प्रतस्थे[४] हरतुल्यवर्ष्मा[५] ।
पार्श्वे स्थितोभूत् स च शंकुकर्णः प्रगृह्य दीप्तं मुशलं गणेन्द्रः ।।४।।
भृङ्गिर्हरात्मा स च वीरभद्रस्तथा गणेन्द्राः शतशः प्रवीराः ।
वज्रत्रिशूलासिभुशुण्डिहस्ता युयुत्सवस्तस्थुरुपेतहर्षाः ।।५।।
समागतं तं रथमीक्ष्य[६] दैत्या युद्धाय निर्जग्मुरुपेतमोहाः ।
ते तारकाक्षप्रमुखाः सुवीराः सन्नह्य नानायुधदीप्तहस्ताः ।।६।।
सार्धं गणेन्द्रैः समरं प्रचक्रुर्दनोः सुताः कोपवशं प्रयाताः ।
देवोपि चन्द्रार्धनिकेतमौलिः[७] शरं न चिक्षेप पुरं प्रदग्धुम् ।।७।।
तस्थौ तथैवा[८]सक्रुदात्मना[९] च पश्यन् रणं तद्गणदैत्यपानाम् ।
ततः स नन्दी गणपैः प्रवीरैरचीकरद्युद्धमदीनसत्वैः ।।८।।

---

७६ वीक्ष्यमाणाः - क. ख. । ७७ २१७ - ख. ।
१ स्थितो (त) स्तत्रिपुरं - क. । २ मौली हैमोपलो - ख. । ३ नन्दीगिरिशप्रमुखाः - ख. । ४ प्रतस्थौ - ख. ।
५ वर्मा (धर्मा ?) – क. । ६ वीक्ष्य रथं – क. । ७ ...मौली क. । ८ तस्थोजसा वै – क. ।
९ ...कृत - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विव्याध भृङ्गिं दशभिः पृषत्कैर्विद्युत्प्रभः कोपविरक्तनेत्रः ।
भृङ्गिं समासाद्य शिलीमुखास्ते नाशक्नुवँस्तस्य रुजं प्रकर्तुम् ।।९।।
विद्युत्प्रभं भृङ्गिरिटिस्ततोसौ शूलेन दीप्तेन जघान पृष्ठे ।
स तेन शूलेन हतो जुघूर्ण त्यक्त्वा च भृङ्गिं प्रययौ भयार्त्तः ।।१०।।
भग्नस्तथासौ दितिजाधिपेशो भृङ्गिं समुत्सृज्य गणेन्द्रमुख्यम्[१०] ।
विव्याध तीक्ष्णैर्निशितैः पृषत्कैर्विनायकं[११] सप्तभिरंसदेशे ।।११।।
पुनस्त्रिषष्ट्या दशभिश्च भूयो विद्युत्प्रभस्तं गजराजवक्त्रम् ।
जघान मर्मस्वभिलब्धलक्ष्य[१२]स्ततश्चुकोपास्य विनायकेन्द्रः ।।१२।।
स पुष्कराग्रेण गजेन्द्रसिंहो ग्रीवां तदा दैत्यपतेर्विवेष्ट्य ।
उत्पाटयामास शिरः शरीरात् पद्मं ह्रदान्नाग इव प्रमत्तः ।।१३।।
दैत्यस्य कृत्तं शुशुभे शिरस्तद्विन्ध्याच लेन्द्रप्रतिमाच्छरीरात् ।
सहंसचक्राह्वरुतोपगीताद् ह्रदान्नवोत्खातमिवाशु पद्मम् ।।१४।।
ततोपरौ दैत्यपती सुयत्तौ नेमिर्बलश्चान्धकतुल्यकल्पौ[१३] ।
क्रुद्धावुपागम्य हि शंकुकर्णं शिलीमुखैर्विव्यधतुर्गणेन्द्रम् ।।१५।।
तौ शंकुकर्णः प्रसभं निपत्य छिन्नध्वजाश्वौ विरथौ चकार ।
अन्यौ समारुह्य रथौ पुनस्तौ भूयस्समागम्य गणप्रवीरम् ।।१६।।
तं जघ्नतुर्नैकविधैः पृषत्कैर्वज्राभिघातप्रतिमैस्सुतीक्ष्णैः ।
क्रुद्धस्तदा स प्रसभं गणेन्द्रस्तौ[१४] दैत्यराजौ सुचिरं निरीक्ष्य ।।१७।।
दीप्तेन हत्वा मुशलेन वीरौ संप्रेषयामास पुरं यमस्य ।
अन्ये च दैत्यास्त्रिपुराधिवासाः क्रुद्धा विनिष्क्रम्य गणेन्द्रसिंहैः ।।१८।।
नाराचचक्रासिकुठारहस्ता घोरं महद्युद्धमतीव चक्रुः ।
दैत्याधिपास्ते हरतुल्यकल्पैर्गणेश्वरैः प्राप्तशिवप्रसादैः ।।१९।।
हता बभूवुर्हि गतासवस्तु[१५] मृगा यथा केसरिभिर्वनान्ते ।
प्रभ्रष्टनानायुधवस्त्र[१६]हाराश्छिन्नैर्भुजैश्शोणितमुद्वहन्तः[१७] ।।२०।।
वज्राहता[१८] - - - - - - - पेतुः समुद्रे गिरिश्रृङ्गकल्पाः ।
श्रुत्वाथदैत्यौ बलनेमिसंज्ञौ तौ शंकुकर्णेन हतौ प्रसह्य ।।२१।।

---

१० गजेन्द्रमुख्यम् – क. । ११ विनायकैः - क. । १२ ..लक्ष – क. ख. । १३... वीर्यौ – ख. ।
१४ निपत्य तौ (?) – क. । १५ गताशयोस्तु – क., गतासवांस्तु – ख. । १६ चक्र - क. ।
१७ मुद्रम-त्तः – ख. । १८ वृष्टयाहता - खा. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पुराद्विनिष्क्रम्य स तारकाक्षः क्रुद्धो गणेन्द्रं स्वयमभ्यधावत् ।
तं शंकुकर्णो दितिजाधिपेशं[१९] मुञ्चन्तमुग्रं शरवर्षमाशु ॥२२॥
भल्लेन दैत्यं गिरिसन्निकाशं[२०] जघान मूर्ध्नि प्रसभं गणेशः ।
निपत्य किञ्चिन्निहतः स तेन भल्लेन दैत्याधिपतिर्मुमोह ॥२३॥
प्रोत्थाय तूर्णं स हि तारकाक्षश्चिक्षेप तस्मै गणपाय चक्रम् ।
क्रुद्धस्ततोसावभवद् गणेन्द्रस्तं तारकाक्षं स हि शंकुकर्णः ॥२४॥
निपात्य[२१] मुष्टया प्रजघान मूर्ध्नि समाहतः सोपि जगाम कृच्छ्रम् ।
जुघूर्ण बभ्राम मुमोह तस्थौ पपात तत्याज वरायुधञ्च ॥२५॥
मुमोच[२२] रोषं विरराव तीव्रं ममार पश्चादसुविप्रमुक्तः[२३] ।
दृष्ट्वा विपन्नं दितिजाधिपेन्द्रं प्रगृह्य दैत्या भवनं मयस्य ॥२६॥
गत्वा निवेद्यासुरराजभर्त्रे नादान् प्रचक्रुर्विविधैर्विलापैः ।
ततो मयस्तान्[२४] रुदतो[२५]सुरेशानाश्वासयन्[२६]प्राह वचोसुरेशः[२७] ॥२७॥
सृष्टं मया वोमृतमेतदास्ते तेनैनमुत्थापयताशु दैत्याः ।
ततो गृहीत्वामृतमुत्तमं तद् दैत्याधिपं दैत्यवृषाः प्रहृष्टाः ॥२८॥
चक्रुः सजीवं हि यथा पुराणं मयं प्रणेमुश्च मुहुः शिरोभिः ।
स तारकाक्षस्तत आशु भूयो युयुत्सया युद्धपथं जगाम ॥२९॥
आयान्तमालक्ष्य पितामहस्तं[२८] पूर्वं मृतं जीवितमाशु भूयः ।
प्रोवाच वाक्यं स सुरासुरेशं निवेदयन् वामकरेण दैत्यम् ॥३०॥
हतोप्ययं शङ्कर तारकाक्षः कृतो मयेनाशु सजीव एव ।
तस्यास्ति[२९] देवामृतमुत्तमं हि तेनासुरान् जीवयतेसुरेन्द्रः ॥३१॥
दोषो महानेष सुरेन्द्रहेतो[३०]र्मृतान्मृतान् जीवयते यदाजौ[३१] ।
ततोमृतं तन्मयसंस्थमाशु प्रध्यानमात्रेण[३२] जहार शम्भुः ॥३२॥
पितामहस्तं पुनरेव हृष्टः पिनाकिनं प्राह वचः प्रणम्य ।
दृष्टं मया युद्धमिदं गणानां दैत्याधिपैः सार्धमहीनसत्वैः[३३] ॥३३॥

१९ दितिजाधिपेशो - क., ..श - ख. । २० सन्निकाश - क. । २१ निपत्य – ख. । २२ मुभोह – क. । २३ विप्रमुक्तं - क. ख., विप्रयुक्तः (?) । २४ स सुप्तान् - ख. । २५ प्रयतः - ख. । २६ नाम्ना मयं - ख. । २७ ....न्द्रः - ख. । २८ पितामहन्तं - क. । २९ तत्रास्ति - ख. । ३० वृषेन्द्रकेतो (?) । ३१ सदासौ - क., यदासौ – ख. । ३२ संकल्पमात्रेण (?) । ३३ .. मर्दानसत्वैः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

दिव्यं सहस्रं विगतं समानां क्षयं न चैतत् त्रिपुरं जगाम ।
क्षिपस्व दीप्तं तमिषुं सुरेश प्रयान्तु नाशं सुरविद्विषस्ते ।।३४।।
पूर्णे सहस्रे त्रिपुरं समेत्य पुनर्विपर्यस्तमभूत् सुरेश ।
क्षिप्तस्त्वयेषुर्न च देवदेव योगेन किं वा तव देवनाथ ।।३५।।
संकल्पमात्रादिदमेति नाशं दैत्याधिवासं त्रिपुरं तवेश ।
यदि त्वहं मानयितव्य ईश[३४] विमुञ्च शीघ्रं[३५] त्रिपुरे[३६] शरं तम् ।।३६।।
विज्ञप्त[३७] एवं चतुराननेन प्रतीपमालीढमनङ्गहन्ता ।
कृत्वा धनुस्तद्बलवद्विकृष्य युयोज दीप्तं तमिषुं पिनाके[३८] ।।३७।।
संकल्पमात्रेण तदा स तानि पुराणि देवस्सहितानि त्रीणि ।
चक्रे जगत्सृष्टिविनाशकर्ता जगच्च निष्पन्दमभूत्तदाशु ।।३८।।
विष्ण्वात्मकं पावकसोमपुंखं त्रैलोक्यसंहार इव प्रदीप्तम् ।
चिक्षेप देवस्तमिषुं तदोग्रं क्षिप्त्वा च कष्टं धिगितीति चाह ।।३९।।
नन्दी समागम्य ततो महेशं प्रोवाच वाक्यं किमिति प्रणम्य ।
नन्दीश्वरं तं भगवानुवाच मयस्य भक्तस्य शुभं चिकीर्षुः ।।४०।।
नन्दीश भक्तो मम विश्वकर्मा दहेत् पुरं तस्य यथा न वह्निः ।
तथानलं सोमहरी च देवौ ममाज्ञया गच्छ निवारयस्व ।।४१।।
नन्दी प्रगृह्याथ सुरेश्वराज्ञां तूर्णं ययौ विश्वकृतः पुरं तत् ।
- - - - ो - - तुल्यवेगो ज्योतिष्मतः पूर्वतरं जगाम ।।४२।।
दृष्ट्वा मयं तत्र स दानवेशं[३९] मूर्ध्ना नताङ्गः वृषभध्वजस्य ।
मृत्योर्भयार्त्तं शरणार्थिनं च नन्दी समाश्वासयदीशभक्तम् ।।४३।।
भयं कृथा मा मय रक्षितस्त्वं भक्त्या भवेनेति वचोभ्युवाच ।
नन्दीश्वरं दानवराट् स दृष्ट्वा श्रुत्वा प्रियं तच्छिवसंप्रसादम् ।।४४।।
यथैव रुद्राय ननाम मूर्ध्ना चक्रे प्रणामं स तथैव तस्य ।
अथाग्निरागात्[४०] त्रिपुरं दिधक्षन् प्रदीपयित्वा सकलं समन्तात् ।।४५।।

---

३४ मानयितव्यमीश - ख. । ३५ ...मस्त्रं - क, मात्रं - ख. । ३६ त्रिपुरं - क. ख. । ३७ विज्ञाप्त - क. ।
३८ पिनाकि (की) - ख. । ३९ दानवेश - क., दानवेन्द्र - ख. । ४० यथाग्निरागात् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

संवर्त्तवह्निप्रतिमो युगान्ते जगत् प्रसंहर्त्तुमिव प्रदीप्तः[४१] ।
तमागतं विश्वकृतो निवासं विष्णिवन्दुयुक्तं ज्वलनं स नन्दी ।
दग्धव्यमेतन्न हुताशनेति वचोभ्युवाचाशु विभोर्नियोगात् ॥४६॥
ततः स[४२] वह्निस्तमुवाच देवं कस्मान्न दग्धव्यमिदं[४३] मयेति ।
नन्दी हुताशं स ततोभ्युवाच मयोत्र तिष्ठत्यमरेशभक्तः ॥४७॥
तं वह्निराहासुरराजमाशु तूर्णं विनिर्गच्छ[४४] मयेति वाक्यम् ।
हैसं गृहीत्वा स महेशलिङ्गं पुराद्विनिष्क्रम्य मयोसुरेन्द्रः ॥४८॥
पातालमाशु प्रविवेश हृष्टः कुर्वन्नमस्कारमुमाप्रियस्य ।
नन्दीश्वरः सोपि सुरेशपार्श्वमागम्य चाख्याय[४५] च संस्थितोभूत् ॥४९॥
ततः प्रदीप्तं त्रिपुरं बभूव विशिलष्टयन्त्रार्गलनष्टवेश्म ।
नैकासुरामुक्तमहोग्रनादं[४६] वित्रस्तदैत्येन्द्रवधूजनाढ्यम् ॥५०॥
वातायने हर्म्यविमानसंस्थाश्चन्द्रानना: पीनपयोधराढ्याः ।
पर्यङ्कसुप्ता मदविह्वलाक्ष्यो मार्गं प्रियाणां मुहुरीक्षमाणाः[४७] ॥५१॥
विलोचनैस्ताम्रनिभाङ्गरागैः[४८] श्यामावदाता जघनैर्विशालैः ।
दैत्याङ्गनाः स्वं[४९] ददृशुः प्रदीप्तमालिङ्ग्यमानाः शरपावकेन ॥५२॥
प्रासादसंस्थाः प्रययुर्भयार्त्तास्त्रासेन किन्नर्य इवाचलस्थाः ।
प्रियानथोद्वीक्ष्य[५०] समागताँस्तान् मोहं समालिङ्ग्य भृशं विजग्मुः ॥५३॥
प्रिया गृहीत्वा दितिजास्ततस्ते प्रनष्टकामास्तरसा[५१]भिजग्मुः ।
निष्क्रान्तमात्राशिवशक्तिमूढाः[५२] पेतुः समुद्रे बलविप्रयुक्ताः ॥५४॥
दैत्यान् समुद्रे पतिताँस्ततस्तान् मत्स्या महान्तो गिरिसन्निकाशाः ।
तीव्राश्च नक्रा मकराश्च घोराः संजग्रसुर्नष्टबलान् विमूढान् ॥५५॥
जलेचरेन्द्रास्त्वपरे महान्तस्संछिन्नहाराः पतिताः स्त्रियस्ताः ।
हीनाः प्रियैर्भक्षयितुं प्रवृत्ताः करालदंष्ट्रा विवृताननाश्च ॥५६॥
ता भक्ष्यमाणाः पतितास्तरुण्य प्रियान्सरोषं बहुशो निरीक्ष्य ।
रुजा महत्या परिखिद्यमानाः संचुक्रुशुर्दीनतरं युवत्यः ॥५७॥

---

४१ प्रदीप्तं - क. । ४२ ततस्तु - ख. । ४३ हन्तव्यमिदं - क. ख. । ४४ विनिर्गम्य - ख. । ४५ संख्याय - ख. ।
४६ नैतासुरोन्मुक्तमहोग्रनादं - ख.।४७ मुहुरीक्ष्यमाणाः- क. ख. । ४८ ...निताङ्गरागैः - क.,...निभान्तरागैः- ख.।
४९ सं - क. ख । ५० प्रियानथावीक्ष्य - ख. । ५१ प्रनष्टकोपास्तरसा - क. । ५२ च्छिवशक्तिमूढाः - क.।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तासां तदा दैत्यविलासिनीनां रेजे भृशं क्रोधनिरीक्षितं तत् ।
रतावसाने परिखेदितानां प्रियैरिवान्यामभिगन्तुकामैः ॥५८॥
सर्वे ततो दैत्यवृषाः[५३] सभार्याः प्रदह्यमानास्त्रिपुरानलेन ।
मग्नाः[५४] समुद्रे मकरैर्विभिन्ना गतासवो मृत्युवशं प्रजग्मुः ॥५९॥
शरश्च सोग्नीन्दुजनार्दनात्मा[५५] प्रदह्य कृत्स्नं त्रिपुरं पुरं तत् ।
क्षिप्त्वा समुद्रे स्म शमं[५६] प्रयातं[५७] शशाम शम्भोश्च करं जगाम ॥६०॥
दैत्यैर्हतैस्तैस्त्रिपुरे च दग्धे[५८] देवान् रथस्थान् पुनरेव देवः ।
पूर्वं यथा दिव्यशरीरयुक्तान्[५९] चकार सृष्टिप्रलयादिहेतुः ॥६१॥
ब्रह्मादयस्ते त्रिदिवौकसेशा नेमुर्वचश्चेदमथोचुरीशम् ।
कृतं त्वयेदं भगवन्नशक्यं शुभं महद्रौद्रतरं च कर्म ॥६२॥
दैत्या हतास्तत्त्रिपुरं प्रदग्धं शान्तिः कृता नःस्म[६०] सुरासुरेश ।
नमोस्तु सर्वत्र सदा स्थिताय स्रष्ट्रे सुराणां परमेश[६१] तुभ्यम् ।
नित्यं नविज्ञातगमक्रियाय नमो नमः सर्वगताय तुभ्यम् ॥६३॥
तानाह देवः स [६२] तदा सुरेन्द्रान् ब्रह्मार्कविष्ण्विन्द्रधनेश्वराद्यान् ।
सदैव यूयं प्रतिपालनीया रक्ष्याश्च देवाः सुतवन्मयैव ॥६४॥
पूर्णाभिलाषा हतविद्विषश्च प्रयात हृष्टाः स्वनिवेशनानि ।
देवास्ततो देववरं प्रणम्य जग्मुः स्वकीयानि निवेशनानि ॥६५॥
देवोपि सिद्धै रभिवन्द्यमानः कैलासशृङ्गं सहितो गणेन्द्रैः ।
चण्डेशनन्दीश्वरवीरभद्रैर्जगाम कर्ता जगतस्त्रिनेत्रः ॥६६॥

इति कथितमसह्यं देवदेवस्य कर्म
त्रिपुरदहनसंज्ञं व्यास तुभ्यं मयैतत् ।
मनुज इदमधीते यः शुचिः शर्वभक्तः
स भवति गतपापः स्वर्गभाग् देवजन्मा ॥६७॥

⊙ इति स्कन्दपुराणे त्रिपुरवधे सप्तत्यधिकशततमोध्यायः[६३] ⊙

---

५३ दैत्यवराः - ख. । ५४ ... भग्ना - क. । ५५ सोग्नीन्द्रजनार्दनात्मा - क. । ५६ शमं (?) । ५७ प्रयातः (?) । ५८ प्रदग्धे - क. । ५९ शरीरधारीन् - क. । ६० ...स्स - क. । ६१ प्रमथेश - ख. । ६२ स्म - क. । ६३ समाप्तं त्रिपुरवधमिति - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

व्यास उवाच

श्रुतं मयैतद् भगवन् दहनं त्रिपुरस्य तु ।
विचित्रार्थं यथावृत्तं क एवमभिधास्यति ॥१॥

कस्मात् क्रुद्धो नगेन्द्रं तं क्रौञ्चं दारितवान् गुहः ।
पक्षान् सर्वगिरीन्द्राणां[१] कस्माच्चिच्छेद वासवः ॥२॥

सनत्कुमार उवाच

शृणु व्यास महाबुद्धे यन्मां त्वं परिपृच्छसि[२] ।
कुमारेण यथा भिन्नो मैनाकिः[३] क्रौञ्चपर्वतः ॥३॥

गिरिराजमथाभ्येत्य मेरुं सर्वसुरालयम् ।
अपश्यद्वासवः स्कन्दं संघातं तेजसामिव ॥४॥

शरस्तम्बवने दृष्ट्वा कुमारमनलप्रभम्[४] ।
सुरराज्यमदाविष्टः शक्रः पप्रच्छ षण्मुखम् ॥५॥

कस्त्वं दिव्यवपुर्बाल मेरुपर्वतमाश्रितः ।
न मां पूजयसे दृष्ट्वा देवराजमिहागतम् ॥६॥

तमेवं वादिनं शक्रं प्राह शूलधरात्मजः ।
ब्रह्माद्या मां विजानन्ति सिद्धा वेदविदश्च ये ॥७॥

तपसा लब्धराज्येन न चिरादस्तमेष्यता[५] ।
किं त्वया जानता शक्र कार्यं किं पूजितेन वा ॥८॥

अथोवाच पुनः शक्रस्तं देव[६] मनलात्मजम्[७] ।
मत्तः परतरो[८] नास्ति मुक्त्वा शर्वपितामहौ ॥९॥

कथमेवमवोचस्त्वं[९] विबुधाधिपमागतम् ।
यदि मत्तस्त्वमात्मानं महान्तं मन्यसेनघ ॥१०॥

मैनाकतनयो ह्येष क्रौञ्चःसिद्धनिषेवितः[१०] ।
सुविस्तीर्णो महाशैलो नैकनिर्झरनिस्रवः ॥११॥

एह्येहि[११] त्वं मया सार्धं कुरु शीघ्रं प्रदक्षिणम् ।
य एनमावयोरेकः पूर्वमेव क्रमिष्यति ॥१२॥

---

१ सर्वगिरीणां च - ख. । २ पृष्टवानसि - क. । ३ मैनाकः - ख. । ४ कुमारं ह्यनलप्रभम् - ख. । ५ ... तो - क. ख. । ६ शक्रस्तदेव - क. । ७ ... मनलात्मजः - क. । ८ परतरं - ख. । ९ कथं मिथ्य(ा)-मवोचस्त्वं - ख. । १० सिद्धर्षिसेवितः - ख. । ११ एह्येवं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रभावात्तोजसा चैव स महान्नौ भविष्यति ।
वाढमित्येवमुक्त्वाथ कुमारः[१२] षण्मुखस्तदा ।।१३।।
शक्रेण सह संगत्य मयूरवरमास्थितः ।
महेन्द्रस्याग्रतो गच्छन् चक्रे क्रौञ्चं प्रदक्षिणम्[१३] ।।१४।।
अथ बुद्ध्वा महेन्द्रस्तु न्यूनमात्मानमानलात् ।
कुमारमभिसन्धित्सुर्मनसैव प्रदक्षिणम् ।।१५।।
कृत्वा सुनिर्वृतस्तस्थौ उपविष्टः[१४] शिलातले ।
जवेनाथ कुमारस्तं क्रौञ्चं कृत्वा प्रदक्षिणम् ।।१६।।
प्रोवाचेन्द्रं[१५] तदा दृष्ट्वा जेताहमिति सत्वरः[१६] ।
अहमेव हि जेतेति शक्रस्तमवदद् गुहम् ।।१७।।
असकृद् ब्रुवतोरेवं तयोः शक्रकुमारयोः ।
क्रौञ्चोभ्येत्य वचः प्राह किमेतदिति भूचरः ।।१८।।
ततः शक्र उवाचेदं कुमारं वचनं तदा ।
एष एवावयोः क्रौञ्चो जयसाक्षी[१७] महाबलः ।।१९।।
नानृतं वक्ष्यति ह्येष पौत्रो हिमगिरेर्वरः[१८] ।
पृच्छचतां शक्र को दोष इत्याह ज्वलनात्मजः ।।२०।।
तं शक्रः सादरं प्राह केन त्वमचलाग्रतः ।
कृतप्रदक्षिणो[१९] ब्रूहि प्रमाणं हि त्वमावयोः ।।२१।।
ततः क्रौञ्चो विमूढात्मा संचिन्त्य सुचिरं नगः ।
अयं शचीपतिश्चक्रेमामिहाग्रे प्रदक्षिणम् ।।२२।।
- -[२०] यं प्रहसन्[२१] देवानित्युवाच नगाधिपः ।
अथैवं ब्रुवतस्तस्य सत्यहीनं तदा गिरेः ।।२३।।
पपात शिखरं तूर्णं कुलिशेन यथा हतम्[२२] ।
तत्रासन् यानि भूतानि सुराद्यानि गिरीश्वरे ।
तानि संत्यज्य शीघ्रं तं प्रययुः सर्वतो दिशम् ।।२४।।

---

१२ मयूरे - ख. । १३ क्रौञ्चप्रदक्षिणम्, प्रदक्षिणाम् (?) । १४ तस्थावुर्पाविष्टः (?) । १५ प्रोवाचेदं - क. ख. ।
१६ सद्वचः - ख. । १७ जये साक्षी - ख. । १८ ...र्वच - ख. । १९ कृत प्रदाक्षेणं - क. ख. ।
२० आःहाष्टं - क, । २१ संशय - क. । २२ हतः - क ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

जहृषे वासवश्चापि मनसा पूजयन् गिरिम् ।
ततश्चुक्रोध रुद्रात्मा गिरेः क्रौञ्चस्य षण्मुखः ॥२५॥
- - - - गुहं द्रष्टुं[२३] संक्रुद्धं वासवस्तदा ।
एकस्थे तेजसी पूर्णे वह्निभास्करयोरिव ॥(?)२६॥
अथ शक्तिं समुत्क्षिप्य यमानलसमप्रभाम् ।
चिक्षेप भगवान् स्कन्दः क्रुद्धः क्रौञ्चजिघांसया ॥२७॥
सा पपात गिरेर्मूर्ध्नि शक्तिः क्रौञ्चस्य सत्वरम् ।
क्षीणायुषो यथा पुंसो मृत्युपाश - - - - ॥२८॥
स तया भिन्नमर्मा तु शक्त्या क्रौञ्चो नगोत्तमः[२४] ।
सर्वतश्छिन्नसर्वाङ्गः स्रवद्रुधिरनिर्झरः ॥२९॥
मूर्त्तिमानपतद् भूमौ संज्ञाप्राणविवर्जितः ।
पतिं विनिहतं दृष्ट्वा पत्न्यस्तस्य सुदुःखिताः ॥३०॥
विलपन्त्यस्तदा दीनं[२५] पेतुः क्रौञ्चाचलोपरि ।
मेरुर्हिमाचलो विन्ध्यः कैलासो गन्धमादनः ॥३१॥
पारियात्रश्च सह्यश्च निषधोदयवामना:[२६] ।
क्रौञ्चस्य जनकश्चापि मैनाकः पर्वतोत्तमः ॥३२॥
सर्वे पर्वतराजान[२७] आजग्मुः शोकपीडिताः ।
परिवार्य गिरिं क्रौञ्चं रुरुदुर्दुःखिता भृशम् ॥३३॥
भ्रातृपुत्रं हतं ज्ञात्वा देवदेवी गिरीन्द्रजा ।
शर्वेण सहिता क्रौञ्चमाजगाम महाव्रता ॥३४॥
कुमारेण हतं दृष्ट्वा क्रौञ्चं बान्धवमात्मनः ।
पीडिताभूत्तदा देवी दृष्ट्वा पितरमर्दितम्[२८] ॥३५॥
हिमवन्तं महाशैलं वधात् पौत्रस्य दुःखितम् ।
शुशोच गिरिजा दृष्ट्वा मुहुर्वीक्ष्य सुरेश्वरम् ॥३६॥
भगवन्तमथायातं देव्या सह पिनाकिनम् ।
शोकेनापि सुसन्तप्ता नमश्चक्रुर्महाबला:[२९] ॥३७॥

---

२३ तं क्रुद्धं - क. । २४ क्रौञ्चनगोत्तमः - क. । २५ दीनाः (?) । २६ निषधोदयवामनः - क. ।
२७ सर्वपर्वतराजान - क. । २८ ... मर्दितुम् क. । २९ मनश्चक्रुर्महमावलाः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अथ प्रणम्य देवेशं हिमवानचलोत्तमः ।
व्यज्ञापयत दीनात्मा दुःखशोकपरिप्लुतः ।।३८।।
शक्रेणानेन भगवन्नात्मानं[३०] बहुमन्यता ।
निधनं नायितः पौत्रो ममायं क्रौञ्चपर्वतः ।।३९।।
स्पर्धा कास्य कुमारेण तव देव सुतेन हि ।
नान्तरं वेद यो[३१] दर्पात् कुमारस्यात्मनश्च ह ।।४०।।
स्पर्धां कृत्वा कुमारेण हते पौत्रे ममाधुना ।
निर्वृतो गतदर्पोयं सुखं तिष्ठतु वासवः ।।४१।।
हते पौत्रे महादेव निमग्नः शोकसागरे ।
न जीवितुमहं शक्तो यास्ये पौत्रगतिं त्वहम् ।।४२।।
एवं विलपतस्तस्य मेरुविन्ध्यपुरोगमाः ।
विनेदुर्दुःखसंतप्ता बान्धवाभावपीडिताः ।।४३।।
पितरं दुःखितं दृष्ट्वा तथान्यान् बान्धवान् गिरीन् ।
अभवच्छोकसन्तप्ता गिरिजापि जगद्धरा ।।४४।।
अथ तान् दुःखितान् दृष्ट्वा सर्वान् गोवृषवाहनः ।
मा कार्ष्ट शोकमित्युक्त्वा तनयं प्राह षण्मुखम् ।।४५।।
महान्तस्त्वद्विधाः पुत्र सापराधेपि बान्धवे ।
नाशुभं कुर्वते कस्मात् क्रौञ्चं निहतवानसि ।।४६।।
भ्रातृसूनुर्भवन्मातुरेष क्रौञ्चो महागिरिः ।
कथं भ्रातरमेनं त्वं[३२] हतवानसि षण्मुख ।।४७।।
सदृशं कर्म नैतत्तो[३३] मन्मथस्य सुतस्य ते[३४] ।
ब्रूहि वा साम्प्रतं कर्म किमत्र बहु मन्यसे ।।४८।।
तमेवं वादिनं देवं[३५] षण्मुखः पितरं तदा ।
इदं प्रोवाच सव्रीडं वचनं परमाद्भुतम् ।।४९।।
शक्रस्यापनयाद्देव क्रौञ्च एष हतो मया ।
असन्मन्त्रितवान् यस्माद् विज्ञप्तिमपरां शृणु ।।५०।।

---

३० भगवान् आत्मानं - क. । ३१ वेदयन् - क. । ३२ भ्रातरमेवं त्वं (?) । ३३ नैनत्ते - क. । ३४ सुतस्तव -क.।
३५ देवः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

त्वत्प्रसादादहं क्रौञ्चं जीवयामि नगोत्तमम् ।
दुष्करं नहि मे किञ्चित् तव देव सुतस्य हि ॥५१॥
उत्तिष्ठेति ततःक्रौञ्चं भ्रातरं प्राह षण्मुखः ।
स बिभ्रत् पूर्ववद्देहं क्रौञ्चो नगपतिः क्षणात् ॥५२॥
उत्तस्थौ नीरुजो[३६] व्यास आश्चर्यं तदभूत्तदा ।
जीवितेनाचलेनैवं षण्मुखो वह्निसप्रभः ॥५३॥
स्मरन् रुद्रादधिक्षेपं कोपसंरक्तलोचनः ।
समक्षं सर्वदेवानां शक्रस्य च महाबलः ॥५४॥
वायुविष्णुयमानां च ब्रह्मणश्च महात्मनः ।
देवदेवं[३७] प्रणम्येशं पितरं ह्युमया सह ॥५५॥
बभाषे वचनं देवः कुमारवररूपधृक् ।
शक्रेणानेन देवेन्द्रा मत्समक्षं प्रभाषितम् ॥५६॥
महाँस्त्वत्तोहमित्येव तत्र मां मन्युराविशत् ।
तन्मयैषा महाशक्तिर्निखाता वसुधातले ॥५७॥
उद्धर्तुं योमरः शक्तो मुक्त्वा देवं पिनाकिनम् ।
उत्पाटयतु स ह्येतां[३८] महान्मत्तस्ततो हि सः ॥५८॥
एवमुक्त्वा ततो देवो बालार्कसदृशप्रभः ।
तूष्णीं बभूव हृष्टात्मा तस्थौ च पितृपार्श्वतः ॥५९॥
अथेन्द्रो देवतामध्ये राज्यदर्पान्वितोमरः[३९] ।
उत्पाटयितुमुत्सेहे तां शक्तिं वसुधां गताम् ॥६०॥
न च चालयितुं शक्तो यत्नादपि सुराधिपः ।
अथ लज्जान्वितोत्यर्थं तस्माद्देशादपाक्रमत् ॥६१॥
ततोन्ये दैवतश्रेष्ठा[४०] यमानिलपुरस्सराः ।
मतिं चक्रुः समुद्धर्तुं यत्नं शक्त्याश्च दंशिताः (?) ॥६२॥
न च चालयितुं शेकुस्तां शक्तिममरोत्तमाः ।
ततो विष्णुरमेयात्मा देवान् दृष्ट्वा हतौजसः ॥६३॥

---

३६ निरुजो - क. । ३७ देवी - क. । ३८ सो ह्येतां - क. । ३९ राजदर्पान्वितोमरः - क. । ४० देवतेष्ठाः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शक्तिमुद्धर्तुमुत्सेहे समक्षं त्रिदिवौकसाम् ।
तेनासौ चाल्यमानापि यस्माच्छक्तिर्धरातले ॥६४॥
न चचाल महावीर्या स्कन्दतेजोबलान्विता ।
ततो विष्णुरमेयात्मा ज्ञात्वा तत्त्वार्थमादृतः[४१] ॥६५॥
कुमारं पूजयन् भक्त्या शक्त्युत्क्षेपान्न्यवर्तत ।
अथ सर्वेमरा व्यास विष्णुश्च सुरसत्तमः ॥६६॥
संस्तुत्य षड्मुखं देवमिदमाहुर्महौजसः ।
- - - - - देवानां महादेवसुतःप्रभुः ॥६७॥
नाथः पालयिता स्रष्टा आर्तिघ्नः प्रवरो महान् ।
त्वया नाथेन देवेश वयं सर्वे सुनिर्वृताः ॥६८॥
तिष्ठामः सहिताः सर्वे त्वमस्मान्[४२] पाहि सर्वतः ।
शक्रव्यतिक्रमं चैव बालिश्यान्मोहकारितम् ॥६९॥
प्रणयाद्याचितोस्माभिः क्षन्तुमर्हसि सर्वदा ।
एवं स भगवान् सर्वैः कुमारः संस्तुतोमरैः ॥७०॥
क्रोधं तत्याज शक्रे तु तुतोष च दिवौकसाम् ।
ततस्ते गिरयः सर्वे देवी च हिमवत्सुता ॥७१॥
देवराजस्तथा शक्रो हृष्टा गुहमपूजयन् ।
भगवानपि संतुष्टस्तनयाय वरान् ददौ ॥७२॥
ययौ चापि गिरेः शृङ्गं दिव्यं हिमवतः शुभम् ।
सार्धं गुहेन देव्या च मातृणां गणनायकः ॥७३॥
क्रौञ्चेन सहिताश्चापि मेरुविन्ध्यादयोचलाः ।
शक्रश्च सुरराट् देवः स्वानि सद्मानि भेजिरे ॥७४॥
एवमेतद्यथा[४३] क्रौञ्चः क्रौञ्चसारसवासिनः ।
गुहेन दारितःशक्त्या पश्चाच्चैव[४४] कृतोमरः ॥७५॥
दृश्यते चापि[४५] तत् क्रौञ्चे क्षतं शक्त्याचलोत्तमे ।
नैकदैवतसंवासं यदभूद्विस्तृतं[४६] महत् ॥७६॥

---

४१ ...मादितः (?) । ४२ तमास्मान् - क. । ४३ एतस्मिन्नन्तरे - घ. । ४४ पश्चादुभाभ्यां च - घ. ।
४५ दृश्यतेद्यापि (?) । ४६ तदभूद्विस्तृतं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एतत्ते कथितं सर्वं क्रौञ्चदारणमद्भुतम् ।
य इमं शृणुयान्मर्त्यः सर्वपापैः स मुच्यते[४७] ॥७७॥

व्यास उवाच

भगवन्[४८] परमेशानो मातॄणां नायकः कथम् ।
का एता मातरश्चापि शंसैतत् पृच्छतो मम ॥७८॥
कथं मातृगणा जाताः किन्निमित्तमथापि च ।
किंवीर्याः किंप्रभावाश्च संभूतास्ते गणाः प्रभो ॥७९॥
कश्चासामाश्रयो येन वर्तन्ते तद्गणाः शुभाः ।
केन सृष्टाः स्वयं वापि एतदिच्छामि वेदितुम् ॥८०॥

सनत्कुमार उवाच

अत्र[४९] ते वर्त्तयिष्यामि मातॄणामुद्भवं शुभम्[५०] ।
पुरा हि भगवान् ब्रह्मा सृष्ट्वेमा विविधाः प्रजाः ॥८१॥
अवेक्षमाणः कालेय चचार विबुधेश्वरः ।
स कदाचित् प्रजाध्यक्षः संध्याकाल उपागते ॥८२॥
देशं रम्यं समासाद्य तीरे पूर्वमहोदधेः ।
रम्ये चकार संध्यां हि वर्षकोटिमतन्द्रितः ॥८३॥
कृतसंध्यस्ततो देवः कमलासनसंस्थितः ।
चिन्तयामास रम्योयं देशो दृष्टिमनोहरः ॥८४॥
करोम्यत्र[५१] पुरं रम्यं सर्वकामसमन्वितम् ।
इति संचिन्त्य स व्यास भगवान् सर्वसृक् प्रभुः ॥८५॥
तस्मिन् रम्ये प्रदेशे तु चक्रे पुरमनुत्तमम् ।
लोहितासितसौवर्णैः प्रस्तरैश्चामितप्रभम् ॥८६॥
अट्टाट्टहासकैश्चैव खातकैश्च समन्वितम् ।
शृङ्गाटकचतुष्केण चतुष्पादमिव स्थितम् ॥८७॥

---

४७ प्रमुच्यते -क, अत्रान्तरेध्यायसमाप्तिपुष्पिकावाक्यं दृश्यते घ पुस्तके । ४८ भगवान् - क. ख. । ४९ हन्त(?) ।
५० इतिहासं पुरातनं - घ. । ५१ आक्राम्यात्र - घ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वप्रखातकसंयुक्तैर्गृहैश्चापि[५२] महाधनैः[५३] ।
मध्ये मन्दाकिनी वापी सरिद्दिव्या मनोहरा ।।८८।।
नलिनीवनसंछन्ना प्रहृष्टखगनादिता[५४] ।
तत् सृष्ट्वा तु पुरं ब्रह्मा सौवर्णं मणिभूषितम् ।।८९।
प्रोवाच वचनं व्यास परमाद्भुतमर्थवत् ।
रम्ये पुरवरे येस्मिन् वत्स्यन्ति सुकृताशिनः ।।९०।।
अवध्यास्ते जराहीनास्तेजोबलसमन्विताः ।
भविष्यन्ति महाभागा मत्प्रसादान्न संशयः ।।९१।।
ततः स भगवान्देव उवाच पुनरेव ह ।
अस्मिन् सदैव कामानामिष्टानां सुरसत्तमः ।।९२।।
देवो वर्षति कोटिं वै तेनास्मिन्[५५] सुखिनो जनाः ।
एवं स भगवानुक्त्वा ब्रह्मा लोकपितामहः ।
अगच्छत् स्वसभां दिव्यां नैकसिद्धनिषेविताम् ।।९३।।
तस्मिन् गते ततो व्यास असुरैर्दैत्यभाषितैः (?) ।
अधिष्ठितं पुरं तद्वै सर्वैर्ब्राह्मणकंटकैः ।।९४।।
येषां पतिरसुक्रोधः सर्वशस्त्रभृतां वरः ।
ब्रह्महा यज्ञहा विप्र देवान्तकसुरान्तकः[५६] ।।९५।।
सिंहनादो भीमनादो मद इत्येवमादयः ।
अथ दैत्याः समागम्य हैमकुण्डपुरस्सराः ।
तस्मिन्पुरवरे स्थित्वा पीडां[५७] चक्रुरनेकशः[५८] ।।९६।।
द्वेष्टारो जगतस्ते हि जघ्नुर्विप्रान् सहस्रशः ।
यज्ञहोमादिकाश्छिन्नाः क्रियास्तैरसुराधमैः ।।९७।।
तानेवंकारिणो ज्ञात्वा सर्व एव दिवौकसः ।
ब्रह्मलोकमथाभ्येत्य सर्वमश्रावयन् विभोः ।।९८।।
वचो दिवौकसां श्रुत्वा ज्ञात्वा दैत्यविचेष्टितम् ।
नैतच्छक्यं मयेत्युक्त्वा ब्रह्मा सार्धं सुरोत्तमैः ।।९९।।

---

५२ ग्रहैश्चापि - घ. । ५३ ...वरैः - घ. । ५४ प्रकृष्टखगनन्दिता - ख. । ५५ तेनास्मि - घ. ।
५६ सुरान्तकौ (?) । ५७ क्रीडा (?) । ५८ ...श्चक्रुरनेकशः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

आजगाम भवं द्रष्टुं रम्यं हिमगिरेर्वनम्[५९] ।
यत्र गौरी तपस्तेपे भर्तृदेहार्धधारिणी ॥१००॥
प्रविष्टास्तत्र ते देवा ब्रह्माद्याः सर्व एव हि ।
स्त्रिय एवाभवन् तूर्णं पार्वत्यास्तपसो बलात् ॥१०१॥
ततस्तान् देवदेवेशः स्त्रीभूतान् हि सुरोत्तमान् ।
किमर्थमागता यूयमिति पप्रच्छ शूलधृक् ॥१०२॥
ततस्ते सहिताः सर्वे पूर्वं दैत्यविमर्दनम् ।
निवेद्य शम्भवे पश्चात् कृच्छ्रं स्त्रीभावमात्मनः ॥१०३॥
यथैवं पुरुषाः पूर्वं भवाम इति तेब्रुवन् ।
तानुवाचाथ देवेशः सुरान् स्त्रीभावमागतान् ॥१०४॥
यात यूयं सुराः सर्वे स्त्रियो भूत्वासुरान्तिकम् ।
स्त्रीणामेव हि ते वध्या दानवा बलदर्पिताः ॥१०५॥
तनूर्मूर्त्तिमतीः कृत्वा परतो मातरः शुभाः ।
ये[६०] य एव यथा पूर्वं भविष्यथ सुरोत्तमाः ॥१०६॥
अथ भूयः प्रणम्येशं देवता इदमब्रुवन् ।
आत्मनोपि तनुं देव कुरु मूर्त्तिमतीं स्त्रियम् ॥१०७॥
यया सार्धं बलाद् दैत्यान् हंस्यामः परमेश्वर ।
ततो देवोसृजद्देवीं रूद्राणीं मातरं शुभाम् ॥१०८॥
विकृतं रूपमास्थाय द्वितीयामपि मातरम् ।
नाम्ना तु बहुमांसान्तां जगत्संहाररूपिणीम् ॥१०९॥
नियोगाद् देवदेवस्य ततो विष्णुरपि प्रभुः ।
मातरावसृजद् द्वे तु वाराहीं वैष्णवीमपि ।
अभूत् पितामहाद् ब्राह्मी शर्वाणी शङ्करादपि ॥११०॥
कौमारी षड्मुखाच्चापि विष्णोरपि च वैष्णवी ।
वाराही माधवाद् देवी माहेन्द्री च पुरन्दरात् ॥१११॥

---

५९ वंरम् - क. । ६० य - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सर्वतेजोमयी देवी मातृणां प्रवरा शुभा ।
बहुमांसा महाविद्या बभूव वृषभध्वजात् ॥११२॥
सर्वासां[६१] देवतानां च देहेभ्यो मातरः शुभाः ।
स्वरूपबलधारिण्यो निर्जग्मुर्दैत्यनाशनाः ॥११३॥
वायव्या[६२] वारुणी याम्या कौबेरी च महाबलाः ।
महाकाली तथाग्नेयी अन्याश्चैव सहस्रशः ॥११४॥
ता गत्वा तत्पुरं रम्यं दैत्यान् भीमपराक्रमान् ।
जघ्नुर्बहुविधं देव्यो घोरनादैर्विभीषणैः ॥११५॥
दैत्यहीनं च तच्चक्रुः पुराग्र्यं हेमभूषितम् ।
अथ दैत्यैर्हतैस्सर्वैर्देवदेव उमापतिः[६३] ॥११६॥
आजगाम प्रदेशं तं मातृणां वरदित्सया ।
तान् दृष्टवा निहतान्सर्वान् दैत्यानमरविद्विषः[६४] ॥११७॥
परितुष्टस्तदा तासां वरान्प्रादाद् वृषध्वजः ।
जगतो मातरो यूयं मातृभूता भविष्यथः ॥११८॥
युष्माकं ये भविष्यन्ति भक्ताः पुरुषपुंगवाः ।
स्त्रियो वापि महाभागा न तान् हिंसन्ति हिंसकाः ॥११९॥
मृता मम गणाश्चापि भविष्यन्त्यजरामराः ।
भवतीनामिदं स्थानं कोटीवर्षमिति श्रुतम् ॥१२०॥
भविष्यति जगत्ख्यातं सर्वपापप्रमोचनम् ।
अहं हेतुर्हि युष्माकं यस्मात् सृष्टा मयैव च ॥१२१॥
हेतुकेश्वरनाम्नाहं[६५] स्थास्याम्यत्र वरप्रदः ।
युष्माभिः सह वत्स्यामि नायकत्वे व्यवस्थितः ॥१२२॥
यस्तु युष्मान्मया सार्धं विधिवत् पूजयिष्यति ।
सर्वपापविमुक्तात्मा स परां गतिमाप्स्यति ॥१२३॥
दानवा निहता यस्माच्छूलेन बहुमांसया ।
शूलकुण्डमिदं नाम्ना ख्यातं तीर्थं भविष्यति ॥१२४॥

६१ सर्वेषां - क. ख. । ६२ वायवा (?) । ६३ देवदेवमुमापतिम् - क. । ६४ ... विद्विषान् - क. ।
६५ ...नामाहं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

इह शूलोदकं पीत्वा बहुमांसां प्रणम्य च ।
अधृष्यः सर्वहिंस्राणां भविष्यति नरोत्तमः ॥१२५॥
प्रतिकूलेति विख्याता रम्या मन्दाकिनी नदी ।
रुधिरौघवती सेह भवतीनां भविष्यति ॥१२६॥
अहं ब्रह्मा च विष्णुश्च ऋषयश्च तपोधनाः ।
मातृतन्त्राणि दिव्यानि मातृयज्ञविधिं परम् ॥१२७॥
पुण्यानि प्रकरिष्यामो यजनं यैरवाप्स्यथ ।
ब्राह्मं (?) स्वायंभुवं चैव कौमारं यामलं तथा १२८॥
सारस्वतं स गान्धारमैशानं नन्दियामलम् ।
तन्त्राण्येतानि युष्माकं तथान्यानि सहस्रशः ॥१२९॥
भविष्यन्ति नरा यैस्तु युष्मान् यक्ष्यन्ति भक्तितः ।
नराणां यजमानानां वरान् यूयं प्रदास्यथ ॥१३०॥
दिव्यसिद्धिप्रदा देव्यो दिव्ययोगा भविष्यथ ।
याश्च नार्यः सदा युष्मान् यक्ष्यन्ते सरहस्यतः ॥१३१॥
योगेश्वर्यो भविष्यन्ति रामा दिव्यपराक्रमाः ।
छगलः कुम्भकर्णश्च मदीयौ गणनायकौ ॥१३२॥
युष्माकं द्वारपालत्वे स्थास्यतस्तौ ममाज्ञया ।
कोटीवर्षमिदं स्थानं मातॄणां प्रियमुत्तमम् ॥१३३॥
श्मशानं प्रवरं दिव्यं भविष्यति सुखप्रदम् ।
वरानेवं हि ताँल्लब्ध्वा मातरो लोकमातरः ॥१३४॥
भक्त्या प्रणम्य देवेशं मुमुदुर्भृशमर्हिताः ।
ततःप्रभृति ताः सर्वाः सहिताः शशिमौलिना ॥१३५॥
कोटीवर्षे[६६] वसन्ति स्म सर्वलोकाभयप्रदाः[६७] ।
एवं स भगवान् देवो मातॄणां गणनायकः ।
अभवच्छङ्करो व्यास यन्मां त्वं पृष्टवानसि ॥१३६॥

---

६६ कोटीवर्ष - क. ख. । ६७ सर्वलोकभयप्रदा; - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

उत्पत्तिमेतां जगतीश्वरीणां[६८]
ब्रह्मेन्द्रशक्रानिलवन्दितानाम् ।
पठेन्मनुष्यः शृणुयाच्च नित्यं
यः स्वर्गलोकं स मृतो लभेत ॥१३७॥

⊙ इति स्कन्दपुराणे एकसप्तत्यधिकशततमोध्यायः ⊙

सनत्कुमार उवाच

शक्रेण गिरयः पूर्वं छिन्नपक्षा यथा कृताः ।
तत् प्रवक्ष्यामि ते व्यास शृणु सर्वमशेषतः ॥१॥
पुरा सिंहवपुः कृत्वा विष्णुना परमौजसा ।
दैत्यदानवनाथे तु हिरण्यकशिपौ हते ॥२॥
प्रह्लादस्तत्सुतो दैत्यो विष्णुं प्रति चुकोप ह ।
हते पितरि स श्रीमान् महादैत्यपतीश्वरः ॥३॥
बहून्यब्दसहस्राणि चकारोग्रं महातपः ।
अथ देवश्चतुर्वक्त्रस्तुष्टस्तमसुराधिपम् ॥४॥
प्रोवाच स्वयमागत्य वरदोस्मीति सादरम् ।
प्रणम्योवाच वरदमिदं ब्रह्माणमागतम्[१] ॥५॥
प्रह्लादो मन्युतप्ताङ्गः पितुर्वधमनुस्मरन् ।
भगवन् यदि तुष्टोसि वरदश्च समागतः ॥६॥
राजानं हतवान् विष्णुः पितरं मम मायया ।
संग्रामे तमहं विष्णुं यथा हन्यां तथा कुरु ॥७॥
तमुवाच ततो ब्रह्मा प्रह्लादमसुरोत्तमम् ।
अजय्यः समरे विष्णुरवध्यश्च सुरासुरैः ॥८॥
प्रसादाद्देवदेवस्य जगत्स्रष्टुरुमापतेः ।
नैष शक्यो मया दातुं वरस्तुभ्यं महासुर ॥९॥

६८-जगतीश्वराणां - क. ।
१ प्रणम्य तमुवाचेदं वरदं ब्रह्मामागमतम् - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अन्यं वृणु[२] यथेष्टं त्वं वरं यावद्ददामि[३] ते ।
चिन्तयित्वा ततो भूयो महाबुद्धिर्महासुरः ॥१०॥
प्रोवाच[४] वचनं देवं कमलासनसंस्थितम् ।
अजय्यो यद्यवध्यश्च स विष्णुर्देवसत्तमः[५] ॥११॥
तस्य विष्णोस्ततो देव शक्रस्यान्यस्य वा रिपोः ।
अवध्योहमजय्यश्च संभवेयं तवाज्ञया ॥१२॥
एवस्त्विति तं ब्रह्मा प्रोच्य दानवसत्तमम्[६] ।
दिव्यपद्मासनो देवस्तत्रैवान्तरधीयत ॥१३॥
प्रह्लादोपि वरं[७] लब्ध्वा ब्रह्मणः परमाद्भुतम् ।
पश्चिमस्योदधेस्तीरे तस्थौ चिन्ताकुलेन्द्रियः ॥१४॥
कथं हन्यामहं विष्णुं शक्रं चैव शतक्रतुम् ।
एवं चिन्तयतस्तस्य प्रह्लादस्य सुरद्विषः ॥१५॥
सर्वशैलाधिपः श्रीमाँश्चक्रमन् हिमवान् गिरिः ।
द्वाभ्यामुत्पत्य पक्षाभ्यामाजगाम वियच्चरः ॥१६॥
पुरा हि गिरयो व्यास आसन् पक्षससमन्विताः ।
दिव्या वियद्गमाः सर्वे सर्वलोकचरास्तथा ॥१७॥
तमागतमथो दृष्ट्वा प्रह्लादो हिमवद्गिरिम् ।
प्राहेदं वचनं प्रीतः कृत्वा[८] स्वागतमादितः ॥१८॥
कश्यपस्य[९] वयं पौत्रा दैत्या गिरिवराधिप ।
भवन्तोपि[१०] सुतास्तस्य देवा अपि महागिरे[११] ॥१९॥
अस्माकं भवतां चैव एकस्मात् संभवो गिरे[१२] ।
देवता भ्रातरो[१३] भूत्वा अस्माकं देवताश्च[१४] हि ॥२०॥
अवमन्यासुरानस्मान् राज्यं कुर्वन्ति दर्पिताः ।
वयं यूयं च संगत्य जित्वा देवानशेषतः ।
त्रैलोक्यं सर्वमाक्रम्य राज्यं कुर्मो[१५] महागिरे ॥२१॥

---

२ अन्यद् वृणु - क. । ३ वरं दैत्य ददामि - ख., ददानि - क. । ४ उवाच - ख. । ५ देवसत्तम - ख. ।
६ दानवसत्तमः - क., ... म - ख. । ७ वरान् - ख. । ८ प्रीतो दत्त्वा - क. । ९ कास्यपस्य - क. ।
१० भवतोपि - क. ख. । ११ महामुने - क. । १२ मुने - क. । १३ भ्रातरो देवता - क. ख. ।
१४ देवताश्च - क. ख. । १५ कुर्मं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

देवानां[१६] यजनं येषु हूयन्ते येषु चाग्नयः ।
प्रीयन्ते देवता येषु देशाँस्तानचलेश्वर ।।२२।।
सहितः सर्वशैलैस्त्वमाक्रम्य त्वरितं जहि ।
इज्याहीनान् ततो देवान् सुखं हंस्याम निर्वृताः ।।२३।।
इत्युक्तो दैत्यराजेन हिमवानचलोत्तमः ।
नैतद्युक्तमिति प्राह साशङ्को दानवाधिपम् ।।२४।।
पुनरेव ततः प्राह हिमवन्तं महासुरः ।
मत्तो युक्तं परं[१७] त्वं चेद्यदि वेत्सि नगाधिप ।।२५।।
एष त्वां सहित शैलैर्नेष्यामि निधनं समम् ।
अप्रमत्तस्तदा तिष्ठ[१८] यावत्त्वां हन्मि पर्वत ।।२६।।
दैत्यराजं ततः क्रुद्धं दृष्ट्वा पर्वतसत्तमः ।
करोम्येवमिति प्राह ततो दैत्यस्तुतोष सः[१९] ।।२७।।
अथ शैलैस्तदा सार्धं हिमवानचलोत्तमः ।
प्रह्लादस्य वचः श्रुत्वा[२०] चक्रे देशोपमर्दनम् ।।२८।।
पितृदेवात्मिकाः सर्वा यज्ञहोमादिकाः क्रियाः[२१] ।
वर्तन्ते येषु देशेषु गिरयस्तान् समाक्रमन् ।।२९।।
अथोत्सन्नेषु देशेषु नारदो मुनिसत्तमः ।
शक्रायाश्रावयत्[२२] सर्वं पर्वतानां व्यतिक्रमम् ।।३०।।
तच्छ्रुत्वा क्रोधसन्तप्तो देवराजः शतक्रतुः ।
समागम्याचलान् प्राह किमेतदिति मन्युमान् ।।३१।।
अथोचुर्गिरयो व्यास क्रुद्धं देवगणाधिपम् ।
प्रह्लादस्य भयाद्देव महादैत्यपतेर्वयम् ।।३२।।
इमं व्यतिक्रमं प्राप्ता न[२३] दोषो नः कथञ्चन ।
अथ चेन्मन्यसे दोषमस्माकममराधिप ।।३३।।

---

१६ देवतां - क. । १७ वरं - क., युक्तवरं - ख. । १८ ततस्तिष्ठ - ख. । १९ ह - ख. । २० सर्वं - ख. । २१ यज्ञहोमादिकक्रियाः - क. । २२ शक्रमश्रावयत् - क. । २३ ह - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रह्लादान्तिकमागच्छ प्रयाम सहिता द्रुतम् ।
तेनेदं कारितं सर्वं यज्ञदेशोपमर्दनम् [२४] ।
दैत्यराजेन बलिना युष्मदप्रियलिप्सया ।।३४।।
नापराधोयमस्माकं [२५] तथा त्वं विद्धि देवप ।
तानेवं ब्रुवतः शक्रः सुतरां मन्युमान् गिरीन् ।।३५।।
पक्षहीनान् तदा चक्रे क्षिप्त्वा वज्रं पुनःपुनः ।
हीनपक्षास्ततस्ते तु सर्व एवाचलेश्वराः ।।३६।।
पेतुर्महीतले व्यास छिन्नपक्षाः खगा इव ।
अथ दैत्यपतिः श्रुत्वा प्रह्लादोसुरपुङ्गवः ।।३७।।
पक्षच्छेदं नगेन्द्राणां भृशं चुक्रोध पीडितः [२६] ।
किङ्करोमीति संचिन्त्य चिरं दैत्यगणाधिपः ।।३८।।
वदर्याश्रममागत्य ददर्श [२७] विष्णुमास्थितम् ।
तस्यासीत् सुमहद्युद्धं विष्णुना सार्धमद्भुतम् ।।३९।।
न शशाक च तं [२८] विष्णुर्जेतुं प्रह्लादमोजसा ।
तयोर्युद्धमभूद् घोरं दिव्यमब्दशतं पुरा ।।४०।।
आत्मानं वेद हीनं च विष्णुः प्रह्लाददानवात् ।
सोभियुक्तस्तदा युद्धे विष्णुः परमधर्मवित् ।।४१।।
अशक्तो दानवं जेतुं मन्युमानभवत् प्रभुः ।
अथ ध्यात्वा महादेवं प्रणम्य च पुनः पुनः ।।४२।।
सस्मार पर - - - - - - - - - - - - - ।
- - - - - - - - - - - - - - पिनाकिनः ।।४३।।
अवध्यत्वमजय्यत्वं सर्वलोकनिवासिभिः ।
प्रसादं तमनुस्मृत्य शैवं विष्णुः सुरोत्तमः ।।४४।।
महासत्वबलो भूत्वा दैत्यमभ्यद्रवद् बली ।
हीयमानमथात्मानं हिण्यकशिपोः सुतः ।।४५।।

---

२४ देशयज्ञोपमर्दनम् - क. ख. । २५ यथास्माकं - क ख. । २६ पि(प)ण्डितः - क. । २७ ददृशे - ख. । २८ परं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ज्ञात्वा च बलिनं विष्णुं युद्धदेशादपाक्रमत् ।
अजितं विष्णुनात्मानं शिवतेजोविमोहितः ।।४६।।
प्रह्लादो जितमात्मानं[२९] बुबुधे दानवेश्वरः ।
ब्रह्मणोपि वरं लब्ध्वा अजय्यत्वमथात्मनः ।।४७।।
जितमेव तदात्मानममन्यत महासुरः ।
प्रह्लादासुरसंग्रामं घोरं देवभयंकरम् ।।४८।।
अभूदब्दशतं दिव्यं विष्णुना सार्धमद्‌भुतम् ।
न श्रुतेन न वीर्येण न शौर्येण न तेजसा ।।४९।।
न बुद्ध्या न च धर्मेण प्रह्लादसदृशोसुरः ।
हिरण्यकशिपुर्नासीद्राजा तत्सदृशो महान् ।।५०।।
नान्धको न हिरण्याक्षः प्रह्लादसदृशो बले ।
भृगुशापात् किलायातो दैत्यत्वं विष्णुरेव सः ।।५१।।
शौर्येण स्पृहयन्ति स्म श्रुतेन विनयेन च ।
दिवौकसोपि संसिद्धाः प्रह्लादस्य महात्मनः ।।५२।।
नाभवँस्तस्य राज्ये तु दुःखशोकान्विताः प्रजाः ।
एवं स दानवश्रेष्ठः कृत्वा युद्धं तु विष्णुना ।।५३।।
पश्चात्तापोपतप्ताङ्गो विषयेभ्यो गतस्पृहः ।
वरदानमनित्यं तज् ज्ञात्वा च तपसः फलम् ।।५४।।
निःस्पृहः सर्वकार्येषु विषयेप्साविवर्जितः ।
सर्वसन्न्यस्तकर्मा तु[३०] ध्यानाभ्यासपरायणः ।।५६।।
प्रवव्राज महादैत्यः शमेप्सुर्मोक्षसिद्धये ।
पुनरावर्तकं जन्म बुद्‌ध्वा चानित्यतां पराम् ।।५७।।
कष्टं राज्यमिति ज्ञात्वा प्रह्लादः परमार्थवित् ।
अभिषिच्य सुतं राज्ये दितिजानां[३१] विरोचनम् ।।५८।।
दैत्यदानवराजानं कृत्वा तमसुरेश्वरम् ।
मोक्षसिद्धिं परामिच्छन् प्रव्रज्याकृतनिश्चयः ।।५९।।

---

२९ जितमित्येव - क. । ३० सन्न्यस्तसर्वकमा तु (?) । ३१ दितिजातां (तं?) - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

परं तत्त्वमथान्वेष्टुं गुणातीतमजं शिवम् ।
साक्षाद् भगवत: शिष्यं[३२] कपिलस्यासुरिं मुनिम् ।।६०।।
शिष्यत्वेनोपसंगम्य मोक्षविद्यामवाप्तवान्[३३] ।
प्रकृतीनां परं तत्त्वं विकाराणां परं तथा ।।६१।।
क्षेत्रज्ञं पुरुषं ज्ञात्वा भोक्तारं भोक्तृवर्जितम् ।
मोक्षविद्यापरार्थज्ञ: सांख्यसिद्धान्तपारग: ।।६२।।
सिद्ध: पञ्चशिखो नाम्ना सोभवन्मुनिसत्तम[३४] ।
स योगं[३५] परमं लब्ध्वा सांख्याचार्यो महामुनि: ।
दु:खत्रयविनिर्मुक्त: प्राप्तवान् पदमव्ययम् ।।६३।।
श्रीमानेवं त्रिभुवनरिपुर्दैत्यराजो महात्मा
कृत्वा वैरं विबुधगुरुणा विष्णुना दीर्घकालम् ।
सिद्ध: पश्चाज्जगदभयद: प्राप्तयोगश्च भूत्वा
मुक्त: पश्चात्[३६] स पदममृतं[३७] ब्रह्म चाद्यं ह्यवाप ।।६४।।
क्षेत्रज्ञबोद्धा गुणविप्रयुक्तो[३८] दु:खैर्विहीनो भवपाशबन्धै: ।
तामिस्रमोहप्रतिबन्धमुक्तो[३९] योगीश्वरोसौ दितिजाधिपोभूत् ।।६५।।
एवं तांश्छिन्नपक्षांस्तु गिरीन् सर्वान् पुरन्दर: ।
प्रचकार मुनिश्रेष्ठ प्राक् पृष्टो यदहं त्वया ।।६६।।

⊙ इति स्कन्दपुराणे प्रह्लादचरिते पर्वतपक्षच्छेदोनामा द्विसप्तत्यधिकशततमोध्याय:[४०] ⊙

व्यास उवाच

नगेन्द्रे जीविते क्रौञ्चे तोषिते च सुरैर्गुहे ।
यातो[१] हिमवत: शृङ्गं पार्वत्या सहितो हर: ।।१।।
किमन्यदकरोद्देव: किं चैनं प्राह पार्वती ।
एतत् कथय विप्रेन्द्र न तृप्ति: शृण्वतो हि मे ।।२।।

---

३२ सिद्धं - ख. । ३३ मवाप्नुयात् - क. । ३४ मुनिसत्तम: - क. । ३५ संयोगं - क । ३६ शान्तं - क. ।
३७ परममृदुता (?) - ख. । ३८ विप्रमुक्तो - क. । ३९ प्रतिबद्धमुक्तो - ख. । ४० २२० - ख. ।
१ तया - क., यात्वा - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सूत उवाच

एवमुक्तो मुनीन्द्रेण ब्रह्मणस्तनयोऽव्ययः ।
ऋषिः परमयोगीशः कथयामास तत्त्वतः ॥३॥
प्रयाते हिमवच्छृङ्गं देवदेवे सहोमया ।
बभाषे गिरिजा देवं प्रणम्य परमेश्वरम् ॥४॥
उञ्छवृत्तोर्हिरण्यस्य[२] नैमिशारण्यवासिनः ।
शौचेन तपसा भक्त्या युक्तस्य च शमेन हि ॥५॥
स्वयमेव प्रयाताहं द्विजं पूजां प्रतीच्छितुम् ।
माहात्म्यं तस्य तद् दृष्ट्वा ब्राह्मणस्य तपस्विनः ॥६॥
गताहं विस्मयं देव द्विजाः श्रेष्ठतमा इति ।
देवेभ्योपि गरीयांसो ब्रह्मणा इति मे मतिः ।
त्वत्तोथ[३] श्रोतुमिच्छामि द्विजमाहात्म्यमुत्तमम् ॥७॥

देवदेव उवाच

एवमेतज्जगद्धात्रि सुरासुरनमस्कृते ।
श्रेष्ठास्तपस्विनो विप्रा देवेभ्योपि गरीयसः[४] ॥८॥
मदीया याः प्रजाः[५] सृष्टाः[६] प्रथमाः प्रभवो ह्यहम् ।
रुद्रा द्विजातयः पूर्वं मया सृष्टा महौजसः ॥९॥
मदीयां सृष्टिमालोक्य ब्रह्मणापि सिसृक्षुणा ।
ब्राह्मणा मूर्धतः सृष्टाः पूर्वमेव महाप्रभाः ॥१०॥
अग्रभूतो[७] ह्यहं तेषां द्विजश्रेष्ठस्तदाभवम् ।
ततस्ते[८]मत्सखाः[९] सर्वे बभूवुर्विप्रसत्तमाः ॥११॥
उत्तमैषापरा[१०] सृष्टिर्ब्राह्मणाः[११] परमेष्ठिनः ।
धर्मादिकं चतुर्वर्गं सर्वं तेषु प्रतिष्ठितम् ॥१२॥
यज्जुह्वति[१२] हविर्विप्रास्तेन तृप्यन्ति देवताः ।
जगत् प्रतिष्ठितं सर्वं ब्राह्मणानां[१३] हि तेजसा ॥१३॥

---

२ उञ्छवृत्तिर्हिरण्यस्य – ख. टि. । ३ तत्त्वश्च - ख. । ४ गरीयांसः (?) । ५ पुरा - क. ।
६ सृष्ट्वा - क. । ७ अग्रीभूतो - क. । ८ ततते - ख. । ९ मत्समाः (मन्मयाः) - ख., १० पुरा - ख. ।
११ ब्राह्मणं - क. । १२ जुह्वन्ति - क, ख. । १३ ब्राह्मण्येन (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मृत्युजन्मापहं यत्तन्मम पाशुपतं व्रतन् ।
न वर्णाः साधयन्त्यन्ये मुक्त्वा ब्राह्मणसत्तमान् ।।१४।।
लक्षणं संप्रवक्ष्यामि द्विजातीनामिदं शृणु ।
शौचार्जवविधानं च प्रभावं कर्म चैव ह ।।१५।।
ब्राह्मणस्तु भवेज्जात्या[१४] संस्काराद् द्विज उच्यते ।
विद्यया विप्रतां याति ब्राह्मण्यं त्रिविधं स्मृतम् ।।१६।।
यश्च जात्या भवेद् विप्रो यश्च[१५] स्याद् वेदपारगः ।
तयोस्त्राणे वधे चापि[१६] पुण्यपापे[१७] समे[१८] स्मृते[१९] ।।१७।।
जात्या च यो भवेद्विप्रः सर्वागमविशारदः[२०] ।
तपःशौचसमायुक्तस्त्व्यवदातः स उच्यते ।।१८।।
तादृशं भोजयेच्छ्राद्धे दैवे कर्मणि वापि[२१] यः ।
अक्षयं तद् भवेत् तस्य त्व्यवदातस्य तर्पणात् ।।१९।।
वेदविद्यो भवेद्विप्रो नित्यं होमपरायणः ।
सोपि श्रेष्ठः स्मृतो देवि पूजितस्तारयेत् कुलम् ।।२०।।
सर्वथा जातिमात्रेण योपि स्याद् ब्राह्मणः क्वचित् ।
सोऽपि लोकगुरुर्देवि पूजितः स्वर्गदो भवेत् ।।२१।।
अग्निहोत्रं तपो यज्ञः शौचमार्जवमेव च ।
सत्यं वेदप्रसङ्गश्च द्विजकर्म परं स्मृतम् ।।२२।।
नानृतं ब्राह्मणो ब्रूते न हन्ति प्राणिनं द्विजः ।
न सेवां कुरुते विप्रो न द्विजः पापकृद्भवेत् ।।२३।।
ब्राह्मणश्च तपस्वी च न जन्म पुनराप्नुते ।
विद्वद्ब्राह्मणतां लब्ध्वा किन्न लब्धं हि देहिना[२२] ।।२४।।
मूर्त्तयो याः स्मृता ह्यष्टावर्कसोमादयो मम ।
सर्वास्ता निवसन्ति स्म ब्राह्मणे तपसैधिते[२३] ।।२५।।

---

१४ भवेज्जन्मात् - क. । १५ यच्च - क. । १६ वापि - ख. । १७ पुण्यपापौ - क ख. । १८ समौ - क. ख. ।
१९ स्मृतौ - क. ख. । २० विदे(व च) विशारदः - ख. । २१ चापि - ख । २२ देहिनाम् - ख. ।
२३ तपसेधिते - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

द्विजतेजो ह्यवष्टभ्य अमृतं गाव एव च ।
प्रभवन्ति सदा देवि विप्राः श्रेष्ठतमास्ततः ॥२६॥
नासाध्यं[२४] विद्यते तेषां द्विजानां परमौजसाम् ।
रुषितास्ते[२५] प्रसन्ना वा प्रयच्छन्ति शुभाशुभम् ॥२७॥
द्विजास्तपस्विनो ये तु वेदविद्याविशारदाः ।
मुक्तिदास्तु[२६] भवेयुस्ते देवानामपि देवताः ॥२८॥
अहं पितामहश्चैव तेषां योनिद्वयं[२७] स्मृतम् ।
मत्तः पूर्वं प्रसूतास्ते ततो देवि पितामहात् ॥२९॥
आवां हेतू द्विजातीनां प्रकृतित्वात् त्वमेव च ।
प्रकृतिस्त्वं समाख्याता पुरुषः परमो ह्यहम् ॥३०॥
ब्रह्मविष्णू स्मृतौ यौ तौ रजःसत्वगुणात्मकौ ।
आवाभ्यां तौ प्रजायेते सृष्टिकाले प्रजापती ॥३१॥
अहं[२८] ह्यग्निस्तमो विष्णुः सत्वं ब्रह्मणि संस्थितम् ।
रजस्त्वं व्यापितं विद्धि गुणभूतेषु कर्मसु ॥३२॥
मोहात्मकौ स्मृतावेतौ तमो रागस्तथैव च ।
सत्वं नाशयते तौ हि स चाग्नेः[२९] संप्रजायते ॥३३॥
वह्नितेजाः स्मृता ह्येते महात्मानो द्विजातयः ।
सर्वतः प्रभवन्त्येते नास्ति तेषां निवारणम् ॥३४॥
आर्जवं समतां चैव विद्धि तेजो द्विजातिषु ।
तपोविद्यासमायुक्तादार्जवस्तु विशिष्यते ॥३५॥
अशाठ्यं[३०] हन्ति पापानि समता मोहबन्धनम् ।
उभेप्येते निहन्ति स्म आर्जवं सेवितं द्विजैः ॥३६॥
पुरा भागीरथीतीरे द्विजः परमधर्मवित् ।
नाम्ना दानरुचिर्नाम उञ्छवृत्तिर्बभूव ह ॥३७॥
सर्वविद्याविनीतात्मा सर्वभूताभयप्रदः ।
सह पत्न्या च मद्भक्तो वह्निहोमपरायणः ॥३८॥

---

२४ नासाध्यं - ख. । २५ तुषितास्ते - क. । २६ वृत्तिदास्तु - क. । २७ योनीद्वयं - क. ख. ।
२८ अह - क. । २९ तच्चाग्नेः (?) । ३० असाध्यां - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अतिथिं भोजयित्वा च[३१] पूर्वं देवि यथागतम् ।
षष्ठे काले ततोऽश्नाति तस्येदं व्रतमुत्तमम् ॥३९॥
अथैवं वर्तमानस्य भूयान् कालो जगाम ह ।
अतिथावागते[३२] तस्य न विकल्पः प्रजायते ॥४०॥
तपःशौचसमायुक्त[३३] आर्जवैकरतो द्विजः ।
बभूवात्यर्थमर्चिष्मानर्काग्नी इव[३४] तेजसा ॥४१॥
तस्यैवं तपसो[३५] वह्निः प्रीतस्तुष्टिमगात् पराम् ।
शुभदित्सुरभूच्चास्य समीहितफलप्रदः ॥४२॥
कदाचिदथ कालेन षष्ठे काले समागते ।
हिममेघोल्वणे शीते दुर्दिने पर्यटन् द्विजः ॥४३॥
नापश्यदतिथिं कञ्चिद्[३६] बुभुक्षाक्लमखेदितः ।
यदा नासदितस्तेन दिनान्तेऽप्यतिथिः क्वचित् ॥४४॥
अप्राश्यैव तदा किञ्चिदुपवासपरायणः ।
बभूव द्विजमुख्योऽसौ नात्मखेदमचिन्तयत्[३७] ॥४५॥
पत्न्यप्यस्य महाभागा पतिभक्तिव्रते रता ।
यथैवास्याः[३८] पतिश्चक्रे तथा साप्यकरोत्तदा ॥४६॥
शीतक्षुदुपतप्ताङ्गो नैकद्वन्द्वसमावृतः ।
क्लेशेन महतातीव खिन्नोऽभूद्देवि स द्विजः ॥४७॥
द्वितीयेऽथ समायाते षष्ठे काले स ह द्विजः[३९] ।
शीतदुर्द्दिनजाद्दोषान्नैवातिथिमवैक्षत[४०] ॥४८॥
अथाग्निस्तस्य[४१] तज्ज्ञात्वा[४२] निश्चयं परमं महत् ।
श्वपाकसदृशं रूपं विकृतं कुत्सितं च हि[४३] ॥४९॥
कृत्वा पादपमूलस्थः[४४] प्रददौ तस्य दर्शनम् ।
क्षुधार्तोऽथ स विप्रेन्द्रः पर्यटन्नतिथीप्सया ॥५०॥

---

३१ तु - ख. । ३२ अतियेरागमे(?) । ३३ तपम: शौचसंयुक्त - क. ख.। ३४ ...नर्काग्न्योर्रवि(ग्न्योरिव?)- ख. । ३५ तप(प्य)तो (?) । ३६ किञ्चिद् - क. । ३७ मन्नखेदमचिन्तयत् - ख. । ३८ यथैव च - ख. । ३९ समागते - क., महाद्विजः - ख. । ४० मवेक्षत - क. । ४१ तथाग्निस्तस्य - क. ख. । ४२ तं ज्ञात्वा - क. । ४३ बहिः (?) । ४४पादमूलस्थो - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अपश्यद् वृक्षमूलस्थं घोरं विकृतरूपिणम् ।
श्वपाकं शीतसंखिन्नं नैकव्रणशताङ्कितम्[४५] ॥५१॥
दुर्दृशं[४६] वृद्धमार्त्तञ्च प्रस्रवत्कृमिशोणितम् ।
विक्रोशन्तं च तातेति सोपश्यद् द्विजसत्तमः ॥५२॥
कृपणं तमथो दृष्ट्वा श्वपाकं द्विजसत्तमः ।
समाश्वसिहि भद्रेति प्रोवाच मधुरं वचः ॥५३॥
शीतापनयनार्थञ्च वह्निमस्यानयद् द्विजः ।
अथ तं[४७] वह्निसंसर्गात् समाश्वस्तमुवाच सः[४८] ॥५४॥
एहि भुंक्ष्वातिथिर्मे त्वं[४९] भव भद्रेति सादरम् ।
तमुवाच ततो[५०] दीनं[५१] श्वपाकस्तपसां निधिम् ॥५५॥
श्वपाकोहं द्विजश्रेष्ठ मह्यमन्नमिहैव हि ।
कुत्सिताय प्रयच्छस्व यथैव मृगपक्षिणाम् ॥५६॥
नाहं संस्कृतमाहर्तुं योग्योन्नमिति चाब्रवीत् ।
तमेवं वादिनं ध्यानाज्ज्ञात्वा[५२] वह्निमुपस्थितम् ॥५७॥
प्रोवाच द्विजशार्दूल इदं वचनकोविदः ।
नाहं जातिं गर्हयामि पूजयामि न चानघ ॥५८॥
आत्मा सर्वगतो ह्येष सर्वप्राणिषु संस्थितः ।
आत्मानं तमहं भक्त्या पूजयामि परं शिवम् ॥५९॥
सर्वत्र संस्थितं मत्वा पुरुषं परमेश्वरम् ।
तिर्यक्षु नहि मे कुत्सा त्वद्विधेषु विशेषतः ॥६०॥
सर्वमेव स एवेति तपःशौचपरायणः ।
पूजयाम्यहमव्यग्रस्तत्र निस्संशयो भव ॥६१॥
कृमिकीटाखुसर्पेषु[५३] श्वपाग्देवद्विजातिषु ।
यदा सर्वगतो ह्यात्मा तदा कुत्सा कथञ्च नः[५४] ॥६२॥

---

४५ व्रणशतार्दितम् - ख. । ४६ दुर्दर्शं - ख. । ४७ श्वपाकं (?) । ४८ ह - ख. । ४९ .. मंह्यं - ख. ।
५० तदा - क. । ५१ दीनः - क. । ५२ ध्यात्वा ज्ञात्वा - ख. । ५३ क्रिमिकीटाखुनर्पेषु - ख. ।
५४ कथञ्चन (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

न हि मे कुत्सितो भद्र एहि मे त्वमकुत्सितः[५५] ।
भुंक्ष्व संस्कृतमन्नन्तु प्रापयास्माननुग्रहम् ।।६३।।
एवमुक्तो द्विजेन्द्रेण श्वपाकः प्रीतिमाँस्तदा ।
गृहं जगाम विप्रस्य तस्यानुग्रहलिप्सया ।।६४।।
अथ दानरुचिस्तस्य अतिथेरिव पूजितम् ।
आतिथ्यं विधिवच्चक्रे भावशुद्धेन चेतसा ।।६५।।
मूर्त्तिमान् सोभवत् प्रीतो भोजितो हव्यवाहनः ।
प्रददावीप्सितं चास्मै योगैश्वर्यमनुत्तमम् ।।६६।।
स योगं परमं प्राप्य उञ्छवृत्तिर्द्विजोत्तमः ।
विमुक्तः सह पत्न्या तु प्राप्तवानमृतं पदम् ।।६७।।
यथैव कपिलः सिद्धस्तत्त्ववित् परमो मुनिः ।
एवमार्जवसंपन्नो ब्राह्मणः कृतलक्षणः ।
न किञ्चिन्नाप्नुयाद्देवि शुभाच्छुभतरं पदम् ।।६८।।

एतत्ते कथितं नगेन्द्रतनये माहात्म्यमग्र्यं परं
विप्राणाममरत्विषां सुबहुशःपुण्यायुषः[५६] प्रापकम्[५७] ।
शृण्वन्नित्यमिदं पठँश्च विधिवद्विद्वाञ्छुचिर्मानवः
पुण्यं सौख्यमथायुरीप्सितफलं तेजो बलं चाप्नुयात् ।।६९।।

माहात्म्यमेतत् कथितं यथावत्
महामहीध्रेन्द्रसुते द्विजानाम् ।
सृष्टेः प्रभवान्मम ते द्विजेन्द्रा
माहात्म्यमित्थं परमं ह्यवापुः ।।७०।।

सनत्कुमार उवाच

द्विजमाहात्म्यमुल्लिख्य पार्वतीपरमेशयोः ।
बभूवेत्थं सुसंवादः पुण्यः पापविनाशनः ।।७१।।
- - - - - - - - पाराशर्य तपोधन ।
श्रोतव्यं मन्यसे मत्तस्तत् पृच्छस्व समाहितः ।।७२।।

⊙ इति स्कन्दपुराणे द्विजमाहात्म्यवर्णनं नाम त्रिसप्तत्युत्तरशततमोध्यायः[५८] ⊙

---

५५ त्वा कुत्सितो मया - ख. । ५६ पूर्णायुषः (?) । ५७ पूर्णायुषो ह्या(वा)पकम् - ख. । ५८ २२१ - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

व्यास उवाच

भगवन् यत्त्वया प्रोक्तं दक्षयज्ञवधे तदा ।
प्राप्य पाशुपतं योगं ब्रह्माद्यास्त्रिदिवौकसः[१] ॥१॥
लेभिरे परमं तत्त्वं ज्ञानेन हि महामुने ।
तन्मे कथय भक्ताय शिष्याय परिपृच्छते ॥२॥
कीदृशं तत्परं योगं ज्ञानं पाशुपतं शुभम् ।
यज्ज्ञात्वा[२] ब्राह्मणाः सिद्धाः प्राप्नुयुर्मोक्षमुत्तमम् ।
इति[३] पृष्टस्तु शिष्येण प्रोवाच मुनिसत्तमः ॥३॥

सनत्कुमार उवाच

साधु व्यास महाबुद्धे मुमुक्षुरसि पुत्रक ।
यन्मां पृच्छसि तज्ज्ञानं योगं माहेश्वरं परम् ॥४॥
सर्वासां योगविद्यानां यत्तत्त्वं परिकीर्त्यते ।
सांख्ययोगागमोपेताः सर्वाध्यात्मविशारदाः ॥५॥
योगैश्वर्यमपि प्राप्य तत्त्वं नैवोपलेभिरे ।
यदबुद्ध्वा महाभाग ज्ञानं शङ्करभाषितम् ॥६॥
तद्यथा कथितं तेषां त्यम्बकेण[४] दिवौकसाम् ।
तत्तोहं संप्रवक्ष्यामि संक्षेपात्तत्त्वनिश्चयम् ॥७॥
विस्तरेण न तच्छक्यं वक्तुं वर्षशतैरपि ।
तस्याहं स्थितपक्षन्तु संसारोत्पत्तिनाशनम् ॥८॥
मुक्तिसिद्धिप्रदं वक्ष्ये संक्षेपान्मतमुत्तमम् ।
नमस्कृत्य[५] महेशानं पुरुषं भूतभावनम् ॥९॥
प्रकृतेः परमं गुह्यं पुद्गलं परमेष्ठिनम् ।
यं सांख्याः पुरुषं प्राहुः पञ्चविंशमजं विभुम्[६] ॥१०॥
योगाश्चापि हि षड्विंशं व्यापिनं त्रिगुणात्मकम् (?) ।
योसृजत् सृष्टिकाले तु देवौ सर्वजगत्सृजौ ॥११॥

---

१ ब्रह्माद्यास्ते दिवौकसः (?) । २ यं ज्ञात्वा - क. ख. । ३ अथ - क. ख. । ४ त्र्यम्बकेण (?) ।
५ नमस्कृत्वा - क. ख. । ६ प्रभुः (भुं) - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रजापती महात्मानौ ध्यात्वा विष्णुपितामहौ ।
तं प्रणम्य महादेवं त्र्यक्षं वरदमीश्वरम् ॥१२॥
प्रवक्ष्यामि मतं तस्य योगसिद्धान्तनिश्चयम् ।
लक्षणं विद्धि योगस्य प्रोच्यमानमिदं मया ॥१३॥
छिद्यन्ते[७] पशुपाशानि यस्याभ्यासान्महामुने ।
प्रत्ययस्य बहिर्लोपो मनस्यात्मनि संस्थिते ॥१४॥
अभिसन्धिः परे चैव ईश्वरस्यात्मनश्च ह ।
एष योग इति व्यास कीर्तितः शम्भुना पुरा ॥१५॥
भवजन्मापहः सूक्ष्मः प्रपन्नानां दिवौकसाम् ।
शरीरे तिष्ठतः पुंसो यदात्मनि मनः स्थितम् ॥१६॥
अवितर्कं बहिश्चैव सूक्ष्ममभ्यासयोजितम् ।
कृतानां प्रत्ययैः सूक्ष्मैः सुखदुःखादिसंज्ञिनाम्[८] ॥१७॥
अशेषलोप इत्युक्तं साधकस्य तु युञ्जतः ।
परो महेश्वरो देवः सोभिसन्धिस्तु योजकः ॥१८॥
अभिसन्धिस्तदा[९] यस्मादीश्वरस्यात्मनश्च ह ।
सुखादानमथैकेन भावना - - योजनात् ॥१९॥
प्र - - - - - - - - - - - तिष्ठतस्सतः ।
साधकस्य भवेन्नित्यं ह्यद्रिः (?) सिद्धमिदं फलम् ॥२०॥
अथाधिकरणं तत्र क्रमशः परिकीर्त्यते (?)
प्रत्याहारमतो[१०] विद्या प्राणायामस्तथैव च ।
ध्यानञ्च धारणा चैव[११] योगाभ्यास उदाहृतः[१२] ॥२१॥
तिस्रो मृत्युमतिक्रम्य क्रिया हि चतुरात्मिकाः ।
बर्त्तन्ते न च वै - - मृत्युः प्रभवते मुने ॥२२॥
वश्या हि धातवस्तस्माद् भवन्त्यस्य न संशयः ।
ततोसौ पवमृत्युश्च साधको भवति - - ॥२३॥

---

७ छिद्यन्ति - क. ख । ८ संज्ञतम् - ख. । ९ अभिसन्धिस्तु .. - क., अभिसन्धिस्सा (?), इत परं पत्रमेकं खण्डितं क.पुस्तके । १० ...स्ततो (?) । ११ धारणाच्चैव - ख. । १२ उदाहृतं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

इमास्तवर्कक्रिया व्यास मस्तके हृदि चैव हि ।
अन्तरिक्षे च सर्वास्तु कीर्तिता हि न संशयः ।।२४।।
स्थानत्रयनिबद्धास्तु चतुर्लक्षणसंस्थिताः ।
क्रियाः प्रमादिना नैताः शक्याः साधयितुं क्वचित् ।।२५।।
तिस्र एताः सदा मृत्युं प्रवृत्ता मोहलक्षणाः ।
वियोगो न भवेत्तासु क्रियास्वेकैक ै - - - ।।२६।।
अज्ञानं कम्पते[१३]तासु बहिरन्तश्चरास्वपि ।
क्रियासु[१४] साधको युक्तस्तथा मध्यगतासु च ।।२७।।
भूतेन्द्रियमनःकालदिङ्निवृत्तिः प्रभावतः ।
दशैवाशास्त्रयः काला[१५] भूतानीन्द्रियविस्तरः ।।२८।।
मनःप्रचारसंयुक्तो विषयाभावलक्षणः ।
प्रत्याहार इति प्रोक्तः पुरा भगवता स्वयम् ।।२९।।
दिगन्तरगमाभावात् मनस्यविचलस्थितौ ।
प्रत्याहारसमुत्पत्तिर्योगोत्पत्तौ सकृद् भवेत् ।।३०।।
त्रिकालविषयं ज्ञानमैश्वर्योदयमेव च ।
चले मनसि नाभूतां भवेतां संस्थिते[१६] समम् ।।३१।।
मनः सर्वमिदं यस्मात् साधनं योगकर्मणः ।
एकतो मनसः स्थाने तस्माद् यत्नं समाचरेत् ।।३२।।
प्राणनिग्रहणे[१७] ध्यानं प्राणायाममिति स्मृतम् ।
प्राण एव हि वायूनां सारथ्ये वर्तते सदा ।।३३।।
प्राणनिग्रहणे योगी नित्यमभ्यासमाचरेत् ।
उत्तरोत्तरसंसिद्धया वायु - - - गोचरे ।।३४।।
ज्योतिः प्रवर्तनं विद्यान्नित्यमभ्यासयोजितम् ।
द्विरपाने सकृत्प्राणे समाने च ि े - - - ।।३५।।
- - - ि - - ो - - े - - ि - - - ।
- - - - ि - - - ँ - - - ँ - - - ।।३६।।

१३ अज्ञो न कम्पते (?), प्राज्ञो ..(?) । १४ क्रियातु - ख. । १५ कालो - ख. । १६ संस्थिता - ख. । १७ प्राणादिग्रहणो - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

- ।
कुम्भ एष तृतीयस्तु योगवह्निप्रदीपकः ।।३७।।
एभिर्ध्यानगतिः सूक्ष्मा वायुसंरोधकारिता ।
प्रवर्तते यया योगी परमं वेष्टि पुद्गलम् ।।३८।।
सकृदेव समाहारादसकृत्परिमोक्षणात् ।
कुम्भकं चैतदुद्दिष्टं[१८] प्राणायामादिधारणात् ।।३९।।
प्राणो वायुरसावात्मा शरीरे जीव - - - ।
विद्याद् रूपद्वयं तस्य स्थूलं सूक्ष्मं च सर्वतः ।।४०।।
अव्यक्तं सूक्ष्मरूपं तु स्थूलमाकारलक्षणम् ।
स्थूलादारभ्य सूक्ष्मं तु ध्यानाभ्यासान्निरूपयेत्[१९] ।।४१।।
सूक्ष्मसंरोपणाज्ज्योतिः प्रकाशो जायते मुने ।
ध्यायतः स्थूललक्ष्यं[२०] तु सर्वदिक्षु सृतं मनः ।
यदा दीप्तिमदुत्पद्येत् तदाशु स्थापयेत् पुनः ।।४२।।
गिरौ वृक्षे मरुत्पृष्ठे श्वभ्रे प्रासादपंक्तिषु ।
समुद्रे वसुधायां वा मनःसंयोगमाचरेत् ।।४३।।
स्थापितं तन्मनस्तत्र पुनः संहारमाव्रजेत् ।
अचैतन्यं दिशेन्मोहाद् वायुर्दृष्टमतोन्यथा[२१] ।।४४।।
संहृत्य च ततो व्यापि भूयो ध्यानगतिं चरेत् ।
ध्यायतो नित्यमभ्यासान्मनो वायु - - - - ।।४५।।
प्रवृत्तज्ञानयोगस्य[२२] विषयासंगसंक्षये ।
प्रातिभानि[२३] हि विघ्नानि सत्वादिगुणजानि तु ।
विघ्नभूतानि योगस्य प्रोद्भवन्ति हि युञ्जतः ।।४६।।
तानि विद्वान् प्रयत्नेन विषयेच्छाविवर्जितः ।
जित्वा निर्वाणमार्गस्थो भवेत् त्रैगुण्यवर्जितः ।।४७।।
आकाशगमनं दिव्यमप्सरोगणसंगजम् ।
अभिषेकश्च देवेभ्यश्चित्रकाव्यप्रवर्तनम् ।।४८।।

---

१८ कुम्भकमेतदुद्दिष्टं - ख., इतः पूर्वं पत्रमेकं खण्डितं क. पुस्तके । १९ ... सन्निरूपयेत् - ख. २० लक्षं - ख. । २१ दृष्टमतोन्यथा - ख. । २२ ध्यानयोगस्य (?) । २३ प्रतिभा(न्) ति - ख.,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ऐश्वर्यसुखसंसक्तिर्हेमरत्नागमं बहु ।
सत्वादेतानि विघ्नानि प्रातिभानि तु लक्षयेत् ॥४९॥
उत्पत्तिमदयुक्तानि[२४] भिन्नाचारक्रमाणि तु ।
रजोविघ्नानि संविद्यात् प्रातिभानि न संशयः ॥५०॥
क्षयशूलज्वरोन्मादकुष्टसर्पग्रहाणि तु ।
यातनोद्‌गमपूर्वाणि तामसानि विनिर्दिशेत् ॥५१॥
गुणत्रयसमुत्थानि प्रातिभानि सदा मुनिः ।
युञ्जन् संलक्षयेच्छीघ्रं चिकित्सेदाशु चैव हि ॥५२॥
प्राणाद्यानभिसन्धाय[२५] मनः संहृत्य चैव हि ।
प्राणायामेन कुम्भेन हन्याद्विघ्नानि सर्वतः ॥५३॥
रजः सत्वं तमश्चैव प्रधानस्य[२६] गुणास्त्रयः ।
तस्यैव हि महेशस्य प्रजासंसर्गहेतवः ॥५४॥
योगमोहाद् भवन्त्येते साभिमानस्य युञ्जतः ।
निरीहो निर्वृतो योगी सचेता घटते यदा ॥५५॥
प्रातिभानि तदा यान्ति विघ्नानि हि समं क्षयम् ।
प्रादुर्भावस्ततस्तेषां गुणानां मोहकारणम् (?) ॥५६॥
तमो रौद्रं विजानीयात् सत्वं ब्रह्मणि संस्थितम् ।
रजस्तु वैष्णवं विद्यात्तेषां हन्ता[२७] महेश्वरः ॥५७॥
महादेवं परं ज्ञात्वा योगाभ्यासरतो द्विजः ।
गुणत्रयविनिर्मुक्तः शङ्करे लयमाप्नुयात् ॥५८॥
यमैः सनियमैः पूर्वं शोधयेदात्मनस्तनुम् ।
ततः शास्त्रप्रणीतेन धर्माधर्मविवर्जितः[२८] ॥५९॥
क्रमेण सोपदेशेन ध्यानाभ्यासं समाचरेत् ।
शब्दादीन् विषयान् जित्वा श्रोत्रादीन्द्रियगोचरान्[२९] ॥६०॥

---

२४ उन्मत्तमदयुक्तानि - क. । २५ नाभिसंबन्धान् - ख. । २६ प्राधान्यस्य - क., प्राधान्येन (?) । २७ हंर्ता - ख. ।
२८ ...धर्मविवर्जितात् - क. । २९ त्वगादिन्द्रियगोचरान् - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

समो दैवततिर्यक्षु[३०] निर्मम: सर्ववस्तुषु ।
सर्वारम्भविनिर्मुक्त: पुण्यपापविवर्जित: ।।६१।।
निर्द्वन्द्वो[३१] निर्जने[३२] देशे योगाभ्यासं समाचरेत् ।
साभिमानं सनियमं त्यक्त्वा[३३] सांख्यविनिश्चयम् ।।६२।।
परे माहेश्वरे योगे नित्यमभ्याससमाचरेत् ।
अष्टौ प्रकृतयो नित्या विकाराश्चैव षोडश ।।६३।।
पुरुष: पञ्चविंशश्च सांख्यसिद्धान्तगोचर: ।
एतदेव परं गुह्यं[३४] सांख्यानां तत्त्वनिश्चये ।
प्रकृतेरन्तरं ज्ञात्वा पुरुषस्य च मुच्यते[३५] ।।६४।।

⊙इति स्कन्दपुराणे पाशुपतयोगवर्णनं नाम ध्यानविधौ प्रथमोयं चतु:सप्तत्युत्तरशततमोध्याय:⊙

सनत्कुमार उवाच

योगं सांख्यञ्च सर्वत्र द्विविधं ज्ञानमुच्यते ।
तत्र सांख्यरता: केचित् केचिद् योगपथाश्रिता:[१] ।।१।।
अव्यक्तं प्रकृतिश्चैव[२] तथाहङ्कार एव[३] च ।
अष्टौ प्रकृतयो ह्येतास्तन्मात्रै: पञ्चभि: सह ।।२।।
पञ्च बुद्धीन्द्रियाण्याहु: पञ्च कर्मेन्द्रियाणि च ।
मन: पञ्च च भूतानि विकारा: षोडश स्मृता: ।।३।।
पुरुष: पञ्चविंशश्च सर्वारम्भविवर्जित: ।
नित्य: सर्वगत: सूक्ष्मश्चेतावान्[४] त्रिगुणेज्झित: ।।४।।
संशुद्धो विमलो भोक्ता अकर्ता साक्षिवत् स्थित: ।
विदित्वा न विशन्त्येनं भूय: संसारपञ्जरम् ।।५।।
पञ्चविंशति तत्त्वानि सांख्यैरेतानि योगिभि: ।
प्रोक्तानि यद्[५] विदित्वा हि मुच्यते किल जन्मन:[६] ।।६।।

---

३० देवतातिर्यक्षु - क. ख. । ३१ निर्द्वन्द्वे - क. ख. । ३२ विजने - ख. । ३३ ज्ञात्वा (?) । ३४ ब्रह्म - क.।
३५ मुच्यतीति - क. ।
१ योगपथे रता: (?), ...ग्रता: - क । २ च महांश्चैव (?) । ३ ...मेव - ख. । ४ श्चैतावान् - क,
...श्चैत्यवान् (?), ...श्चेतन: (?) । ५ यान् - क., ये या - ख. । ६ जन्तव: - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सूक्ष्मा प्रकृतिरव्यक्ता भोज्या[७] सर्वरता चला ।
नित्या चाचेतना चैव विज्ञेया सर्वकामिकी ॥७॥
तमः सत्वं रजश्चेति[८] विषयस्थं गुणत्रयम् ।
येषामव्यभिचाराद्धि[९] सर्वमेतदवस्थितम् ॥८॥
प्रकाशजननं सत्वं रजः सङ्गप्रवर्तनम् ।
तमो विमोहनञ्चैव गुणविस्तर उच्यते[१०] ॥९॥
भिन्नकार्यप्रचाराणामेतेषां गुणसंज्ञिनाम्[११] ।
हेतुना पुरुषार्थेन साधिका वृत्तिरुच्यते[१२] ॥१०॥
दैवमष्टविभेदन्तु[१३] तिर्यक् सप्तविधं स्मृतम् ।
अविकल्प्यं च मानुष्यं सर्वतेतद्[१४] गुणात्मकम् ॥११॥
मूढं निश्चेतनं भूतं स्थूलं सूक्ष्ममथापि वा[१५] ।
अमूर्त्तं मूर्त्तिमद्वापि[१६] त्रिगुणं सर्वमुच्यते[१७] ॥१२॥
मोक्षविघ्नकरा ह्येते कीर्तिता योगिनो गुणाः ।
सक्तस्यैव[१८] हि बन्धः स्यादसक्तो मुक्त उच्यते ।
विभागात् प्रकृतिस्थस्य स्थिता नित्यं गुणत्रयम् (?) ॥१३॥
विभागेन विकारस्था यथाधर्मं समाश्रिताः ।
भूतसर्गस्त्रिधाभूतः[१९] सांख्यज्ञैः परिपठ्यते ॥१४।
संसिद्धः[२०] प्राकृतश्चैव[२१] तथा वैकृत उच्यते[२२] ।
तत्र धर्मेण संसिद्धा योगे माहेश्वरे स्थिताः ॥१५॥
नेच्छन्ति संभवं व्यास धर्मो (?) पश्चात्मतः स्मृतः ।
ते पुनर्द्रव्यसंबन्धात् सांख्यदृष्टान्तपण्डिताः ॥१६॥
इच्छन्ति[२३] कार्यमाश्रित्य कारणाश्रयिणो न हि ।
प्रधानात् पुरुषाद् बुद्धिरभूत् सत्वाधिकासकृत् ॥१७॥

---

७ भोग्या (?) । ८ रजश्चैव - ख. । ९ येषामाद्यविचाराद्धि - ख. । १० मुच्यते - क. ख. । ११ सज्ञिनां गुणः - क. । १२ वृत्तिरीरिता - ख. । १३ विभिन्नन्तु - क. ख. । १४ सममेतद् - ख । १५ च - ख. । १६ भूर्तिमच्चापि - ख. । १७ सर्वं त्रिगुणमुच्यते (?) । १८ सक्तस्यैष - क. । १९ स्त्रिधाभूता - खं. । २० संसिद्धं - ख. । २१ प्राकृन्तश्चैव - ख. । २२ मुच्यते - ख. । २३ इच्छन्ते - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गुणानां परिणामेन प्राकृतानां जलादिवत्[२४] ।
व्यवसायस्तथा रूपं निश्चयश्चेति भाष्यते ॥१८॥
बुद्धिरेव ह्यहङ्कारःप्रत्ययान्तरसंभवात्[२५] ।
मनः केचित् तमिच्छन्ति[२६] क्रियाजं गुणसंग्रहम् ॥१९॥
अहमेव हि कर्तेति[२७] अहङ्कार उदाहृतः ।
मनसः कल्पनं वापि[२८] स्मृतमिन्द्रियगोचरम् ।
वुद्धिभूतादहङ्कारात् सत्वोत्पन्नात् प्रकाशिनः ॥२०॥
बुद्धीन्द्रियाणि जातानि पञ्च सत्त्वोदयानि तु ।
बोध्यते बुध्यते वापि मुमुक्षुस्त्विन्द्रियैर्यतः[२९] ॥२१॥
ततो बुद्धीन्द्रियाणीति कीर्त्यन्ते तत्त्वचिन्तकैः ।
- - - - - - - - - - - - - - - - - - ॥२२॥
अतः कर्मेन्द्रियाण्याहुर्गुणाज्जातानि राजसात् ।
तामसादप्यहङ्कारात् तन्मात्राण्यभवन् पुनः ॥२३॥
केचित् सर्वगतान्याहु - - - - - - - - ।
- - - - विधं तच्च धर्माधर्मसमुद्भवम् ॥२४॥
याति सर्वत्र सिद्धार्थं भूतव्यापि विमोहनम् ।
शक्तं सर्वाश्रयं सूक्ष्ममनिवारितदिक्पथम् ॥२५॥
लिङ्गं तच्च समाख्यातं देहिनां यच्च कारणम् ।
यश्च सर्गस्त्रिधा प्रोक्तः स एव नवधा पुनः ॥२६॥
प्राकृतस्य विकारस्य देहभेदाः सहस्रशः ।
तत्त्वसर्गः स्मृतः पूर्वः[३०] पिण्डसर्गस्ततोपरः ॥२७॥
प्रत्ययानां ततः सर्गस्तृतीयः समुदाहृतः ।
असक्ति[३१]र्विलयस्तुष्टिः सिद्धिश्चेति चतुस्थि - ॥२८॥
भेदाः प्रत्ययसर्गे तु वैषम्यादपरे स्मृताः ।
पञ्चाशत् परितो भेदा ये च तेषां गुणा दश ॥२९॥

२४ जलाद्रिवत् - ख. । २५ प्रयात्यन्तरसंभवात् - ख., ...संभवाम् - ख. । २६ समिच्छन्ति - ख. । २७ तर्केति - ख. । २८ व्यापि - ख. । २९ ...र्युतः - ख. । ३० पूर्वं - ख. । ३१ अशक्ति - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

षष्टिरेते पदार्था हि गीयन्ते कपिलादिभिः ।
सा तुष्टिर्नवधा भिन्ना सिद्धिश्चैवाष्टधा पुनः ॥३०॥
स्मृतः पञ्चविधश्चापि तेषामेव विपर्ययः ।
अष्टभेदा[३२] स्त्रिभिन्ना[३३] स्याद् दशभिः कार्यबन्धनैः ॥३१॥
एते षष्टिपदार्थास्तु संख्याज्ञानमिति[३४] श्रुतिः ।
न्यूनामेकाधिकामेके[३५] षष्टिमन्ये[३६] तु जानते ॥३२॥
ममैव हि पुरा वत्स गुणजे पदपञ्चके ।
अन्तरं तत्त्वमन्वेष्टुं प्रकृतेः पुरुषस्य च ॥३३॥
सांख्यतन्त्रं महद् बुद्ध्वा ज्ञात्वा तत् प्रकृतेः परम् ।
पंचविंशमजं तत्त्वं भोक्तारमभिमानिनम् ॥३४॥
सन्देहापगमो नाभूदबुद्ध्वा परमेश्वरम् ।
यदाहं देवदेवेन स्वयमेव जगत्सृजा ॥३५॥
स्वयोगं शम्भुना वत्स ग्राहितो गतसंशयः ।
तदा षड्विंशकं तत्त्वं ज्ञात्वा सर्वगमीश्वरम् ॥३६॥
विमुक्तो योगसंसिद्धो जातोहं मोहवर्जितः ।
भोक्ता चेत् प्रकृतेरस्ति भुंक्ते च पुरुषः स्वयम् ।
- - - - - - - - - - - - - - नपि द्विज ॥३७॥
यस्तयोः परतो नित्यः[३७] षड्विंशस्त्वीश्वरो विभुः ।
तं ज्ञात्वा परमं तत्त्वं मुच्यते जन्मबन्धनात् ॥३८॥
सांख्यं कृत्स्नमपि ज्ञात्वा गुणान्तरविचारणात् ।
पञ्चविंशकसंबोधान्नैव मुक्तिः प्रजायते ।
स बद्धो[३८] भोक्तृपाशैस्तु गुणैः प्रकृतिसंभवैः ॥३९॥
अभिमानात्मको भोक्ता पुरुषत्वादमोचकः ।
तं विदित्वापि नैव स्यान्मुक्तिः प्रत्ययवर्जिता ॥४०॥
एष उक्तस्समासेन सांख्यसिद्धान्तविस्तरः ।
योगतत्त्वं प्रवक्ष्यामि दुःखजन्मविनाशनम् ॥४१॥

---

३२ भेद (?) । ३३ त्रिभिन्नः (?) । ३४ सांख्या (सांख्य?) ज्ञानमिति - ख. । ३५ ... नेकाधिके - ख. ।
३६ ...रन्ये - ख. । ३७ नित्यं - ख., इतः पूर्वं पत्रमेकं खण्डितम् क पुस्तके । ३८ संबन्धो - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

संभवं देहिनश्चैव वैराग्यं येन चोद्भवेत् ।
धर्माधर्मपरित्यागं[३९] सत्यानृतविवर्जितम्[४०] ॥४२॥
योगाभ्यासं[४१] परासङ्गं[४२] सूक्ष्मज्ञानमनिन्दितम् ।
सर्वसंसक्तिनिर्मुक्त[४३]मीश्वरप्राप्तिकारणम्[४४] ॥४३॥
सिद्धिनिर्द्वन्द्वसंयोगमशुभोदयनाशनम् ।
परोपलब्धिविज्ञानं तत्त्वार्थपदनिश्चयम् ॥४४॥
भवजन्मापहं योगं विषयेन्द्रियवर्जितम् ।
मतं पशुपतेः कृत्स्नममृतास्पदलम्भनम् ॥४५॥

⊙इति स्कन्दपुराणे पाशुपतयोगवर्णने ध्यानविधौ द्वितीयोयं पञ्चसप्तत्युत्तरशततमोध्याय:[४५] ⊙

सनत्कुमार उवाच

उत्पद्यते[१] यथा जन्तुर्वैराग्यं व्रजते यथा ।
यथा प्रबुध्यते चैव तत्तो व्यास वदाम्यहम् ॥१॥
आकाशः[२] पवनस्तेजो भूमिरापस्तथैव च ।
एषामेकत्र संघाताच्छरीरं नाम जायते ॥२॥
रसाः सोमात्मकाः सर्वे तथाहारश्चतुर्विधः[३] ।
देहिनान्तु रसोत्पत्तिराहारस्य निषेवणात्[४] ॥३॥
रसाद्रक्तसमुत्पत्तिः शोणितात् पिशितं स्मृतम् ।
मेद उत्पद्यते मांसात्तस्मादस्थीनि चाभवन् ॥४॥
मज्जा चास्थिभवा ज्ञेया ततः शुक्रसमुद्भवः ।
रक्तशुक्रसमायोगाद् गर्भः[५] संभवति स्त्रियाः ॥५॥
ऋतुयोगसमाधानाद् दैवकर्मवशादपि ।
स्त्रियाः पुंसश्च रत्यन्ते द्वावप्येकत्वमागतौ ॥६॥

३९ परित्याग - क., परित्यागः (?) । ४० विवर्जिता - ख, विवर्जितः - क । ४१ योगाभ्यासः - (?) ।
४२ परासङ्गः - ख., परासंगः (?) । ४३ संसक्तिर्नर्मुक्त - ख. । ४४ कारणात् - क. । ४५ २२३ - ख. ।
१ उत्पद्यति - क. । २ आकाशं - ख, । ३ तथाहारश्चतुर्विधम् - क. । ४ निसेवनात् - क. । ५ गर्भं - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तावेकत्वमथापन्नौ प्रेरितौ पवनेन च ।
कललं त्वेकरात्रेण पञ्चरात्रेण चार्बुदम् ।।७।।
पिशितं सप्तरात्रेण मासाच्चाङ्कुरसंभवः[६] ।
ततःप्रभृति गर्भस्य विभागो भवति द्विज ।।८।।
शिरः पाणिमुखस्कन्धग्रीवापृष्ठादिसंयुतः[७] ।
पञ्चानामथ मासानामक्षिकर्णादिसम्भवः ।।९।।
सर्वसंपूर्णगात्रस्तु स्रोतोभिर्नवभिर्युतः ।
व्यक्तीभवति तद्गर्भो मासैरष्टभिरेव तु ।।१०।।
संप्राप्ते नवमे मासि सर्वद्रव्यसमन्वितः ।
पञ्चभूतात्मकं तत्तु चेतोवदवतिष्ठति ।।११।।
गर्भक्लेदेन सिक्ताङ्गः[८] सर्वदुःखसमन्वितः[९] ।
जातिं स्मरेद्वसँस्तत्र[१०] जन्तुः सर्वसमुद्भवाम् ।।१२।।
मृतः पुनरहं जातो जातश्चैव पुनर्मृतः ।
इदानीं जातमात्रस्तु योगमेवाभ्यसाम्यहम् ।।१३।।
न पुनर्येन[११] संसारं प्रवेक्ष्याम्यशुभोदयम् ।
एवं चिन्तयतस्तस्य नवमे मासि संगते ।।१४।।
स्वकर्मविनिबद्धस्य जातमात्रस्य देहिनः ।
दहेमाविशते[१२] वायुः स्मृतिमाक्षिप्य तामसः ।।१५।।
येन मूढो निरानन्दो नैवाध्यात्मरतिर्भवेत् ।
अग्नीषोमात्मकं सर्वं भूतग्रामं चतुर्विधम् ।।१६।।
संयोगादेवमुत्पन्नमुत्पत्स्यति च सुव्रत ।
तत्र ये साधुसंपर्काच्छुभकर्मोदयादपि ।।१७।।
आगमान्वेषणे सक्ताः पापानुष्ठानवर्जिताः ।
मत्वा संसारजं क्लेशं[१३] जन्ममृत्युभयार्दितम्[१४] ।।१८।।

---

६ मासादङ्कुरसंभवः - क. । ७ ग्रीवपृष्ठादिसंयुतः - क., संयुतम् - क. ख. । ८ सिक्ताङ्गं - क. ।
९ ममावृतः - क. ख. । १० स्मरति - ख., स्मरन् विसँम्तत्र (?) - क., (वि)शेसनत्र क., संत्रस्तः - (?) ।
११ पुनःप्रत्य - खः । १२ मो[illegible] (?) ख. । १३ [illegible] - ख. । १४ ...भयार्दितः (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

कामक्रोधरतिद्रोहलोभमोहसमावृतम् ।
वैराग्यं जन्मतः[१५] कृत्वा सर्वारम्भपरिक्षयात् ॥१९॥
अन्विषन्ति[१६] शुभार्थं हि गुह्यमध्यात्मदर्शनम् ।
ते योगं परमं प्राप्य ब्रह्म विन्दन्ति तत् परम् ॥२०॥
तस्य ते संप्रवक्ष्यामि ब्रह्मसंबोधकारणम् ।
सर्वेषां योगिनां गुह्यं सर्वयोगनिदर्शनम्[१७] ॥२१॥
ततो माहेश्वरं[१८] योगमाख्यास्ये तत्परन्तव[१९] ।
तेजोग्निः कामजो वह्निः क्रोधाग्निर्वीक्षणानलः ॥२२॥
जठराग्निश्च भूतात्मा पञ्चैते देहवह्नयः ।
प्राणोपानः समानश्च[२०] उदानो व्यान एव च ॥२३॥
पञ्चैते वायवो नित्या देहिनो देहसंभवाः[२१] ।
आकाशप्रभवा ह्येते शरीरं चैषु तिष्ठति[२२] ॥२४॥
मांसरक्तसमाकीर्णं स्नायुमेदोस्थिसंचयम् ।
त्वचावनद्धं[२३] दुर्गन्धं शकृन्मूत्रसमावृतम् ॥२५॥
तडिदभ्रागमानित्यं मृत्पात्रापातसन्निभम् ।
सर्वानर्थसमायुक्तं[२४] नचिरान्नाशगामि च[२५] ॥२६॥
एकरूपं नवद्वारं त्रिस्थूणं पञ्चदेवतम् ।
विषयेन्द्रियसंकीर्णं नैकव्याधिसमार्दितम्[२६] ॥२७॥
प्राणादिभिरवष्टब्धं शरीरं यन्त्रवत् स्थितम् ।
विमुक्तमसक्तृत्[२७] तैस्तु वायुभिर्जीवसंहतैः ॥२८॥
आमपात्रमिवापाताच्छीर्यते कालपर्ययात्[२८] ।
पञ्चभूतानि भूतानि देहान्निष्क्रम्य सर्वशः ॥२९॥
आविशन्ति तथात्मानमात्मा च विशते द्रुतम् ।
भूतेषु पवनः श्रेष्ठो जीवस्तद्विनिबन्धनः ॥३०॥

---

१५ जन्मनः (?) - क., जन्मना - ख.। १६ अन्वेषन्ति - ख., अन्विष्यन्ति (?)। १७ सर्वयोगिनिदर्शनम् - क.। १८ विभोर्माहेश्वरं - ख.। १९ तत्परन्तपः - क.। २० प्राणोपानः समानस्तु - क. ख.। २१ देहसंभवान् - क.। २२ तिष्ठते - क.। २३ त्वचावबद्धं - ख.। २४ सर्वानित्यसमायुक्तं - क. ख.। २५ नाशगामिनम् - क. ख.। २६ शतार्दितम् - क.। २७ वियुक्तमसकृत (?)। २८ कालपर्यये - ख.।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वाय्वग्नी सहितौ जीवो[२९] न जीवः प्राणिनां पृथक् ।
मूर्तिरन्या न जीवस्य मृत्यौ[३०] दृश्यति[३१] देहिनः ॥३१॥
पञ्चरूपात्परो देवः सूक्ष्मात् सूक्ष्मतरो मतः ।
नासौ पश्यति न घ्राति न शृणोति न जल्पति ॥३२॥
न जानाति न च स्पर्शेज्जीवः[३२] प्राणसमावृतः[३३] ।
प्राणो नाम महावायुर्जीवं धारयते द्विज ॥३३॥
भासते[३४] श्वसते चैव सर्वेष्वपि[३५] हि देहिषु ।
स प्राणो धारयत्यग्निं स च जीव इति स्मृतः ॥३४॥
वायुसन्धारणो ह्यग्निः क्रियासु परिवर्तते ।
यो वह्निमानसौ[३६] देहे स जीव इति शब्द्यते ॥३५॥
अन्तर्गतो हि भूतानां कर्मारम्भनिबन्धनः[३७] ।
एवमेतच्छरीरन्तु पञ्चभूतगुणात्मकम् ॥३६॥
तद्विकारे प्रनष्टे[३८] तु मृत इत्यभिधीयते ।
भूतेन्द्रियमनोजीवविषया रागबन्धने (?) ॥३७॥
हृदये कर्णिकायां तु मध्यस्थस्तेजसां निधिः ।
आत्मा सर्वगतो नित्यं वर्जितो विषयादिभिः ॥३८॥
तिष्ठते स विभुस्तत्र यं विदित्वा विमुच्यते ।
स येन योगसंसिद्ध्या ध्यानकर्मक्रियाविदा ॥३९॥
नाडीकर्मसमाधानात् सतताभ्यासयोगतः ।
भाभिः[३९] प्रकाशितो दृष्टो विकारैर्विप्रमोचितः ॥४०॥
दृष्टो भवति विप्रेन्द्र मुक्तिश्चैव ततः स्मृता ।
षड्विंशकपरिज्ञानाल्लयमाधाय तत्र हि ॥४१॥
सर्वप्राणिगतं सूक्ष्ममात्मदेहे च संस्थितम् ।
यं प्रपश्यन्ति संसिद्धा योगिनो गतबन्धनाः ॥४२॥

---

२९ जीतो - क. ख. । ३० सृष्टो (?) । ३१ दृश्येत (?) । ३२ न स्पृशेच्च जीवः (?) । ३३ ...स्पर्शं जीवः प्राणसमावृतः - क. । ३४ भाषते - क. । ३५ सर्वेष्वेव - क. । ३६ वह्निर्मनसो - क. ख । ३७ निबन्धनम् - ख. । ३८ तद्विकारप्रनष्टे - ख. । ३९ नाभिः - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

योऽभ्युपायः परस्तस्य विज्ञानादीश्वरस्य तु ।
योगाभ्यासं परं तं ते प्रवक्ष्यामि द्विजोत्तम ।।४३।।

⊙ इति स्कन्दपुराणे पाशुपतयोगवर्णने ध्यानविधौ तृतीयः षट्सप्तत्युर[४०]शततमोऽध्यायः ⊙

सनत्कुमार उवाच

अन्तरात्मा च [१]चेतोवान्मनः[२] संकल्पजं स्मृतम् ।
महाभूतप्रचाराच्च[३] क्षोभाग्निर्जीव[४] उच्यते ।।१।।
न शरीरं विना चेतस्तच्चेन्[५]नास्ति कुतश्च तत्[६] ।
चेतोऽपि न विना जीवं स चापि न विना मनः ।।२।।
प्राणो जीव इति प्रोक्तः स्पर्शादन्यत् प्रवर्तते ।
मनः सर्वं निबध्नाति कर्मारम्भमिति[७] श्रुतिः ।।३।।
सर्व एते हि संगत्य[८] धारयन्ति शरीरिणम् ।
यस्य[९] चेतोऽधिकन्तेषां[१०] स चेतोवान् प्रकीर्तितः ।।४।।
चेतसा तु विजानाति शुभाशुभनिबन्धनम् ।
तन्मनश्चेतसि स्थाप्य नित्याध्यात्मरतिर्भवेत् ।।५।।
शब्दादिविषयातीत इन्द्रियाणि निगृह्य तु ।
ध्यानारम्भपरो[११] देही स[१२] स्यात् कर्मविवर्जितः ।।६।।
इन्द्रियाणि न बध्नन्ति मनो देहसमास्थितम् ।
जीवो बन्धात्मको ज्ञेयः शुभाशुभनिबन्धनात् ।।७।।
रजसस्तमसश्चैव गुणयोरशुभात्मनोः ।
उद्रेकज्जायते दुःखं सौख्यं सत्वात् प्रजायते ।।८।।
सौख्यस्य परिणामाद्धि दुःखोत्पत्तिः शरीरिणाम् ।
जायते च सुखं विप्र भूयो दुःखविपर्ययात् ।।९।।

---

४० षट्षष्ट्युत्तर - क. ।

१ तु - क. । २ मनः - क. । ३ प्रचाराश्च - क. । ४ ... ग्नीजीव - ख. । ५ चेनस्तत्तो - ख. । ६ कुतश्चन - ख. । ७ कर्मभिस्तमिति - ख. । ८ एवेति संतत्य - ख. । ९ तस्य - ख. । १० तेषां - क. ख. । ११ मनो - ख. । १२ देहीश - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एवमन्योन्यसंबद्धं गुणयत्रयविकारजम् ।
सुखदुःखात्मकं मोहं भूतान्याविश्य तिष्ठति ॥१०॥
मनश्चेतःसमाधानाद्विषयोद्विजनादपि[१३] ।
तस्य नाशः समाख्यातः सङ्गस्य च विवर्जनात् ॥११॥
इच्छानिग्रहणे सक्ताः[१४] क्रोधादिपरिवर्जिताः ।
निर्ममा निरहङ्कारा बध्यन्ते नैव कर्मभिः ॥१२॥
आत्मा सर्वगतो ह्येषः[१५] सूक्ष्मः संभोगवर्जितः ।
योगिनस्तं प्रपश्यन्ति ध्यानाद्वायुविवर्जनात्[१६] ॥१३॥
तावद् भ्रमति संसारे चतुर्योनिषु जन्तुषु ।
यावन्नात्मानमन्वेष्टि स च विन्नो न जन्म च (?) ॥१४॥
यद्यपि ध्यानसंसर्गादबुद्ध्वा ब्रह्म नश्यति ।
तथापि ब्रह्मसायुज्यान्न[१७] तु जन्म पुनर्लभेत् ॥१५॥
अथैश्वर्यं परं ध्यानाद्योगजं प्राप्नुते मुनिः ।
विदित्वा परमात्मानं ततो न पुनराव्रजेत् ॥१६॥
असुखान्यपि[१८] कर्माणि महापापकृतान्यपि ।
कृत्वा ध्यानरतो जन्तुस्तरसा नयति क्षयम् ॥१७॥
प्राप्य कर्मक्षयं कृत्स्नं ध्यानयुक्त्या[१९] महामुने ।
तिष्ठते निर्भयो योगी परमैश्वर्यसंयुतः ॥१८॥
कामरोषौ तथा सङ्गो[२०] द्वेषो रागविनिश्चयः[२१] ।
एते क्षुद्रतरा[२२] भावा मुक्त एभिर्विमुच्यते ॥१९॥
गर्वो दम्भो[२३] ह्यहङ्कारस्तर्को मानोथ मत्सरः ।
पारुष्यं क्रूरता चैव भावाः क्षत्रनिबन्धनाः[२४] ॥२०॥
यस्यैते मोहना न स्युर्विन्दन्त्यात्मानमीश्वरम् ।
मोहभावान्तरातीतः समदुःखसुखस्सदा ॥२१॥

---

१३ विजनादपि - क. ख., द्वेजनादपि (?) । १४ शक्तिः - क. । १५ योगैः — क. ख. ।
१६ वायुर्विवर्जयेत् - क. । १७ ब्रह्मसापुज्यान्न (?) । १८ अभावान्यपि - ख. । १९ ध्यानशक्त्या - क. ख. ।
२० तथा सङ्गौ - ख. । २१ द्वेषरागविनिश्चयः - क. ख. । २२ शूद्रतरा - क ख. । २३ गर्भस्तम्भो - ख. ।
२४ क्षात्रनिसबन्धनाः - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

निर्ममत्वादिभिर्युक्तो योगीति परिपठ्यते ।
यज्ञकर्म समुत्सृज्य वैष्णवं मोहबन्धनम् ॥२२॥
अध्यात्मपरमो नित्यं मुमुक्षुर्ब्राह्मणो भवेत् ।
त्रिवर्गं संपरित्यज्य योपवर्गे रतिं लभेत्[२५] ॥२३॥
दिवौकसामसौ[२६] पूज्यो विप्र इत्यभिधीयते ।
ध्यानेन क्षीयते कर्म पापं वा यदि वा शुभम् ॥२४॥
क्षीणकर्मा ततो योगी तत्परं ब्रह्म विन्दति ।
प्राप्तयोगो मुनिर्ध्यानी यद्यत् कर्तुमभीप्सते[२७] ॥२५॥
तत्तद् भवति तस्याशु मनसा चिन्तितेन वा ।
योगिनं पुरुषं दृष्ट्वा पापैर्मुच्यन्ति तत्क्षणात् ।
योपि संभाषते तेन[२८] सोपि सद्गतिमाप्नुते[२९] ॥२६॥
योगमेव परं[३०] ज्ञात्वा सर्वाशुभविमोचनम् ।
सचेतसो द्विजा विप्र बभूवुर्हि मुमुक्षवः ॥२७॥
ध्यानं ध्येयं परं चैव धातारं चैव ये विदुः ।
तापनात् तपनात् ताप्यान्मुक्तास्ते दुःखबन्धनात् ॥२८॥
सर्वारम्भपरित्यागान्ममत्वादिविवर्जनात् ।
सांख्ययोगागमावेकौ भेदस्तत्वविमोचने[३१] ॥२९ ।
निर्गुणः सांख्यमुख्यानां पुरुषः परिपठ्यते ।
दीपनिर्वाणवत्तेषां देहभेदे गतिः स्मृता ॥३०॥
ईश्वरः सर्वनिर्मुक्तः क्षेत्रज्ञो योगिनां मतः ।
परमैश्वर्यसंयुक्तास्तं विशन्ति हि योगिनः ॥३१॥
धारणाभिः समं ताभिः[३२] प्राणायामैस्तथैव च ।
आत्मानं योजयेद्यस्तु स योगं लभते परम् ॥३२॥
अहिंसादिसमायुक्तो[३३] योगी विगतमत्सरः ।
ध्यानमभ्यसते यस्तु स जयेन्मृत्युजन्मनी ॥३३॥

---

२५ योपवर्गरतो भवेत् (?), योपवर्गरतिर्लभेत् - ख. । २६ दिवौकसामपि - क. ख. । २७ . मभीप्सति - क. ख.। २८ योभिसंभापते - ख., संभावितस्तेन - क. ख. । २९ ... माप्नुयात् - ख. । ३० योगेश्वरपदं - क. । ३१ विमोच॰ः - क. । ३२ समन्त्राभिः - क. ख., समस्ताभिः (?) । ३३ अहिंसाभिः समायुक्तो - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

निर्गुणो निरहङ्कारो जितद्वन्द्वोनवग्रहः ।
भिक्षोपात्तरसाहारो[३४] मुमुक्षुरिति शब्द्यते ।।३४।।

सर्वारम्भसमावस्थः सर्वाश्रयविर्वजितः ।
कर्ममार्गादतिक्रान्तो ध्यानीति परिकीर्त्यते ।।३५।।

यस्य नोद्विजते चेतो दुःखापत्तौ[३५] महामुने ।
न हृष्यति[३६] सुखे चैव ध्यानीति स विशब्दितः ।।३६।।

मोक्षसिद्धिप्रदः पन्थास्त्रिविधः परिकीर्तितः ।
पूर्वः[३७] संकेतनः प्रोक्तः पश्चात् संकथनः स्मृतः ।।३७।।

संसक्तश्च तृतीयस्तु तेषां भेदमिमं[३८] शृणु ।
प्रतिरूपं विभोः कृत्वा दशभिर्नियमैर्युतः ।।३८।।

उपास्ते यो मुनिर्ध्यायन् स संकेतन उच्यते ।
वेदादृतसुखासङ्गः[३९] सत्वकर्मा त्वबान्धवान्[४०] ।।३९।।

परित्यज्येश्वरं ध्यायेत्[४१] तत्संकथनमुच्यते ।
सर्वारम्भपरित्यागात् कपिलादिनिषेवितः ।।४०।।

स्मृतः संकथनःपन्था योगाग्निपरिदीपकः ।
निर्विकल्पस्तु यस्सर्वं ब्रह्म एवेति पश्यति ।।४१।।

भिन्नसर्वक्रियाचारो ध्यानी संसक्त उच्यते ।
त्रिविधस्यापि मार्गस्य नियमानियमानि च ।।४२।।

तान्येव परिकीर्त्यन्ते चर्याभिदा स्त्वनेकधा[४२] ।
त्रयोपि हेतवो मुक्तेरिमे ध्यानपथा मुने ।।४३।।

सम्यगेतान्मुनिर्ज्ञात्वा निर्ममोन्यतमं श्रितः ।
तदाप्नोति परं ध्यानं येन विन्दति तत्परम् ।।४४।।

सर्वान्ध्यानविधींस्त्वेतानुच्यमानानिमान्मया ।
शृणु व्यास महाबुद्धे योगैश्वर्यफलप्रदान् ।।४५।।

⊙इति स्कन्दपुराणे पाशुपतयोगवर्णने ध्यानविधौ चतुर्थः सप्तसप्तत्युत्तर[४३]शततमोध्यायः[४४] ⊙

---

३४ भिक्षावाप्तरसाहारो - क. । ३५ दुःखायत्तो - क. । ३६ भविष्यति - क. । ३७ पूर्वं - क. ।
३८ भेदमिदं - ख. । ३९ वेदानृतसुखासङ्गः - क., ...सङ्ग - क. ख. । ४० ..मंतपबान्धवान् - क. ।
४१ ध्याति - क. ख. । ४२ चर्याभिदस्त्वनेकधा क. । ४३ सप्तषष्टयुत्तर - क. । ४४ २२५ - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

द्विविधं ब्रह्म निर्दिष्टं क्षरमक्षरमेव[१] च ।
विदित्वोभयमेतद्धि मुच्यते सर्वबन्धनैः ॥१॥
पञ्चविंशतिमं तत्त्वं क्षरं[२] तत् प्रकृतेः परम् ।
अक्षरं च[३] परं ब्रह्म षड्विंशकमिति[४] स्मृतम् ॥२॥
मन एकगतं कृत्वा धारणाभिः पुनः पुनः ।
वायुनिग्रहणं कुर्यात् प्रत्याहारपुरस्सरम् ॥३॥
मुहूर्त्तार्धं क्षणं वापि प्रत्याहारं समाचरेत् ।
तलात् त्रिंशच्छतं चोर्ध्वं प्राणायामनिबन्धनम् ॥४॥
अभ्यस्तमासनं[५] यत् स्यात् स्वस्तिकादि प्रकीर्त्तितम् ।
तद् बद्ध्वा विजने देशे ध्यानाभ्यासं समाचरेत् ॥५॥
क्षुधार्त्तो वातिभुक्तो वा रुजा दुःखान्वितोपि वा ।
न ध्यायीत पुनर्विद्वान् य इच्छेद् ध्यानमात्मनः ॥६॥
योगहस्तं ततः कृत्वा वामस्योपरि दक्षिणम् ।
अधोमुखो भवेत् किञ्चित् पश्यन्नासाग्रमात्मनः ॥७॥
अस्पृशन् दशनैर्दन्तानोङ्कारं ब्रह्म संस्मरन् ।
ध्यायीत निर्ममो[६] विद्वान् प्राणायामपुरःसरम् ॥८॥
आत्मानमात्मना योज्य सर्वाङ्गानि तु संहरेत् ।
निरीहः पिहिताक्षश्च[७] निक्षिप्य हृदि धारणाम् ॥९॥
पाषाण इव निष्पन्दो मुनिर्ध्यानं समाचरेत् ।
एकत्रास्पन्दसन्धानं मनसो[८] धारणा स्मृता ॥१०॥
एवं प्रतिदिनं तस्य ध्यायतो योगिनो मुने ।
विकारा गुणजाः सर्वे नश्यन्ते विघ्नहेतवः ॥११॥
अन्वेष्टि च परं[९] ब्रह्म स्वशरीरं समास्थितम् ।
कृत्वैक्यं[१०] प्राणमनसामिन्द्रियाणां विनिग्रहात् ॥१२॥

---

१ अक्षरं क्षरमेव - क., ह्यक्षरंक्षरमेव - ख. । २ अक्षर – क., त्वमक्षरं तत्क्षरं?) - ख. । ३ अक्षरश्च – क.ख. ।
४ इति – क. ख. । ५ स्वभ्यस्तमासनं – ख. । ६ नित्यमों क. । ७ पितिथाक्षश्च - क. क., पतिताक्षश्च - ख. ।
८ मानसो – क. । ९ परमं – ख । १० कृत्वैको – क, ख, ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सर्वभावपरित्यागान्मोक्षमाप्नोत्यसंशयम् ।
प्रत्याहाररतं कृत्वा सर्वमिन्द्रियगोचरम् ।।१३।।
ततो युञ्जीत निर्द्वन्द्वो मनस्सन्धानमाचरन् ।
सर्वं मनसि संस्थाप्य परं तत्त्वं निरूपयेत् ।।१४।।
अथैश्वर्यगतां सिद्धिं ध्यायन्नष्टविधां यदा ।
पश्यते योगसंसिद्ध्या तदा योगी प्रकीर्त्यते ।।१५।।
ब्रह्मसोमादिकान्[११] देवान् यदा युक्तः प्रपश्यति ।
योगिभिः कथ्यते ह्येषा सिद्धिर्योगविकारजा ।।१६।।
मनसा योगिनां सिद्धिः सांख्यास्तत्त्वविनिश्चयात्[१२] ।
न विशेषोस्ति योगानां[१३] मुक्त्वा माहेश्वरं[१४] विधिम् ।।१७।।
योगिनो ध्यानसंसिद्धिं सांख्यास्तत्त्वविनिश्चयम् ।
अविभिन्नावुभावेतौ ध्यानतत्त्वार्थनिश्चयौ[१५] ।।१८।।
सर्वबन्धपरिभ्रष्टः सङ्गदोषविवर्जितः ।
रागमोहादिसंत्यक्तो मुक्त इत्यभिधीयते ।।१९।।
शब्दादीन् विषयान् युक्तो न ध्यायन्वेत्ति वै यदा ।
असकृद् योगसंसिद्ध्या तदा पश्यति तत्परम् ।।२०।।
मृत्युजन्मभयोद्विग्नः सङ्गदोषविवर्जितः ।
अरण्ये मौनमाधाय ध्यायेदोङ्कारमक्षरम् ।।२१।।
वेदादौ यः स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः
तस्य प्रकृतिलीनस्य[१६] यः परः स महान् स्मृतः ।।२२।।
त्रिसंस्थानं त्रिमात्रं च त्रिब्रह्म त्र्यक्षरं तथा[१७] ।
मात्राहीनं समात्रं च यो विद्यात् स विमुच्यते ।।२३।।
नाग्निस्तत्र न वायुश्च न सोमो न दिवाकरः ।
प्रभवन्ति महेशाने ईश्वरे त्रिविकल्पिते ।।२४।।

---

११ ब्रह्मसोमादयो – क. ख. । १२ संख्यानां गुणवर्जिता – ख. । १३ योगिनां न विशेषोस्ति (?), योगिनां - क. ख. । १४ माहेश्वरीं - क. ख. । १५ निश्चितौ - क. ख. । १६ प्रकृतिहीनस्य – ख. । १७ तदा - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ओङ्कारः[१८] परमं तत्त्वमात्मा ब्रह्म च कीर्त्यते ।
क्षेत्रज्ञैरात्मसंबोधाद्योगिभिः सूक्ष्मदर्शनात् ॥२५॥
एवमेव सदा ध्यायन् मन आत्मनि योजयेत् ।
ईश्वरं प्राप्नुते योगी यमवाप्य विमुच्यते ॥२६॥
इन्द्रियाणि तु सर्वाणि शब्दरूपादिनिग्रहात्[१९] ।
विदित्वा कर्मजान् हन्ति योगी दोषानशेषतः[२०] ॥२७॥
ध्यानशक्त्या ततः शुद्धः सर्वजिन्मोक्षमाप्नुते ।
युञ्जन् प्रतिदिनं व्यास षड्मासाद् योगमाप्नुते ॥२८॥
पश्यते च परं ब्रह्म येन मुच्येत बन्धनात् ।
तमात्मानं परं ज्ञात्वा योगशक्त्या महामुनिः ।
परमैश्वर्यसंयुक्त अमृतं[२१] पदमाप्नुयात्[२२] ॥२९॥

⊙ इति स्कन्दपुराणे पाशुपतयोगवर्णने ध्यानविधौ पञ्चमः[२३] अष्टसप्तत्युत्तरशततमोध्यायः ⊙

सनत्कुमार उवाच

अन्तःकरणसंसिद्धो यो महान् कथितो मया ।
पञ्च कर्मेन्द्रियाण्यत्र पञ्च बुद्धीन्द्रियाणि च ॥१॥
पञ्चभूतं मनश्चात्र विकाराः षोडश स्मृताः ।
महान् बुद्धिरहङ्कारस्तन्मात्राणि च[१] पञ्च हि ॥२॥
इमाः प्रकृतयो व्यास देहमष्टौ समाश्रिताः ।
तत्त्वानि तु[२] चतुर्विशत्येतान्युक्तानि[३] योगिभिः ।
देहमेभिरवष्टब्धं त्रैलोक्यव्यापिभिः स्थितम् ॥३॥
नाभिमध्ये तु नाडीनां शतमेकं प्रतिष्ठितम् ।
सर्वाङ्गेषु तु यास्त्वन्या जलान्नरसवाहिकाः[४] ॥४॥

---

१८ ओङ्कारं - ख. । १९ शब्दस्पर्शादिनिग्रहात् - (?) । २० योगिदोषानशेषतः - क. ख. । २१ ...ममृतं - ख.। २२ तदवाप्नुयात् - ख. । २३ ध्यानविधौ (?) । २४ अष्टषष्ट्युत्तर - क. ।
१ तु - क. । २ च - ख. । ३ ...देतान्युक्तानि - क. ख. । ४ रसवाहिनः - क. रसवाहिनी - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तासां त्रिंशत् सहस्राणि व्यानस्रोतसि[५] संस्थिताः ।
उदानस्यापरा नाड्यो[६] ब्रह्ममूर्ध्नि प्रतिष्ठिताः ।।५।।
चक्रनाभी समाश्रित्य[७] भूतसंघातमास्थितम् ।
तन्मध्ये तु गुणस्पृष्टः[८] कर्मात्मा भूतमोहनः ।।६।।
नक्षत्रोद्योतसंकाशो ज्योत्स्ना पुञ्जनिभः प्रभः[९] ।
विघातजननोन्येषां सूर्यायुतनिभः[१०] स्थितः ।।७।।
संभूतोग्निरिवोत्पाती गिरिनीहारसन्निभः ।
गुणस्थो भूतयोनिस्तु पुरुषः पञ्चविंशकः ।।८।।
तस्यापि परतः शुद्धो महानग्निरिवोत्थितः ।
अर्चिष्मान् सर्वतो दीप्तो निर्विकल्पो निरञ्जनः ।।९।।
निर्धूमाङ्गारसंकाशो नविज्ञातागमक्रियः ।
षड्विंशः पुरुषः सूक्ष्म ईश्वरः परमो विभुः ।।१०।।
स एष[११] कथितो व्यास परेषां परतः स्थितः ।
महादेवमिमं ज्ञात्वा मुच्यते तत्क्षणान्मुनिः ।।११।।
गुणत्रयविकारस्थः कथितःपञ्चविंशकः ।
भूयः संसरते तस्मादज्ञानेनैव मोहितः ।।१२।।
देवमानुषतिर्यक्षु भ्राम्यते रागमोहितः ।
षड्विंशकसमाधानात् सिद्धिस्तस्य विकारतः ।।१३।।
क्रियाकार्यविनिर्मुक्तः सर्वज्ञः सर्वसृक्[१२] प्रभुः ।
परमैश्वर्यसंपूर्णः कृतकृत्यो महेश्वरः ।।१४।।
अजः स्वयम्भूः[१३] षड्विंशः कूटस्थो ह्यचलो ध्रुवः ।
ततस्तत्त्वानि जायन्ते पुरुषश्च गुणैः सह ।।१५।।
तस्मिन्नेव च लीयन्ते षड्विंशे तु महेश्वरे ।
विदित्वैनं[१४] महेशानं मुक्तिसिद्धिरवाप्यते ।।१६।।

---

५ व्यानस्रोतसि - ख. । ६ नाडी - क. ख. । ७ चक्रनाभीन्समाश्रित्य - क. । ८ च गुणस्पृष्टः - ख. । ९ पुञ्जनिभप्रभः - (?) । १० सूर्यातपनिभः - क. ख. । ११ एष स - ख. । १२ सर्वकृत् - क. । १३ स्वयम्भुः - क. । १४ विदित्वैकं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एतज्ज्ञात्वा न लिप्येत कर्मभिर्मोहबन्धनैः ।
यथाग्निर्निर्दहेदन्ते भूतग्राममशेषतः ॥१७॥
षड्विंशकपदार्थज्ञस्तथा कर्माणि निर्दहेत् ।
सर्वव्यापि यथाकाशं सूक्ष्मं नैव तु लिप्यते ॥१८॥
षड्विंशकरतो योगी तथा पापैर्न लिप्यते ।
षड्विंशात् परतो नास्ति तस्मात् तत्परमो[१५] भवेत् ॥१९॥
एकत्वं सह तेनैव त्यक्त्वा देहमवाप्नुते[१६] ।
ब्रह्मविष्ण्वादिकं सर्वं भूतग्राममशेषतः ॥२०॥
ईश्वराज्जायते व्यास तस्मिन्नेव प्रलीयते ।
नास्ति तस्मात् परो ह्यन्य[१७]स्तं विद्यात् सर्वतः स्थितम् ॥२१॥
यमध्यात्मविदः सिद्धाः परमात्मेत्युपासते[१८] ।
स एष सर्वगो देवः षड्विंशः परमेश्वरः ॥२२॥
प्राणोपानः[१९] समानश्च उदानो व्यान एव च ।
ये पञ्चवायवो देहे तेषां निग्रहणे यतेत्[२०] ॥२३॥
अपानश्च समानश्च कृत्वैकगतमादृतः[२१] ।
व्यानेन सहितं प्राणमुदाने सन्निवेशयेत् ॥२४॥
नासाग्रे तु सकृत् प्राणं[२२] प्रापयेद् योगशक्तितः ।
भद्रां दृष्टिं समास्थाय[२३] षड्विंशं चिन्तयेत्ततः ॥२५॥
मात्राः पञ्चदश प्रोक्ताः प्रथमं सन्धिबन्धनम् ।
मात्रा विंशति विज्ञेयाः[२४] पञ्चमःसन्धिविग्रहः ॥२६॥
निश्शब्दे विजने देशे निरीहो विजितेन्द्रियः[२५] ।
स्वस्तिकं पद्मकं भद्रमथवा सिंहकच्छपौ[२६] ॥२७॥
एकमासनमास्थाय षड्विंशं समनुस्मरन् ।
सर्वाङ्गानि समाहृत्य निष्पन्दो ध्यानमाचरेत् ॥२८॥

---

१५ परतमो - ख. । १६ त्यक्त्वा देहं स तेनैव सहैकत्वमवाप्नुते (?) । १७ .. स्तं - क. । १८ पर इत्युपसेवते - क. ख. । १९ प्राणापानौ - ख. । २० यतः - क. । २१ .. मादितः (?) । २२ प्राणां (न् - क. । २३ समादाय - ख. । २४ विंशतिका ज्ञेयाः - (?) । २५ .. विचलेन्द्रियः - ख. । २६ भद्रं सिंहं कच्छपमेव वा (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शनैः संचारयेद्वायुं नाडीभिः स्रोतसि स्थितम् ।
तावत्तिष्ठेत युक्तात्मा ध्यानयोगाद् गतस्पृहः ॥२९॥
सोममण्डलसंकाशं यावत् पश्येद्धृदि स्थितम् ।
ज्योतिर्देहाश्रितं दृष्ट्वा योगैश्वर्यं[२७] प्रवर्तते ॥३०॥
तत एवं सदाभ्यासाद् योगसिद्धिप्रवर्तनात् ।
त्रिकालविषयं ज्ञानं प्रत्यक्षं योगिनो भवेद् ॥३१॥
व्याधयो नाविशन्त्येनं न च दुःखान्वितो भवेत् ।
स्वदेहस्य च सौगन्ध्यं वपुर्दिव्यं च जायते ॥३२॥
अमोघश्च वचस्तस्य शापानुग्रहकारितम् ।
प्रत्यवायो न चैवास्य भवेत् कर्मनिबन्धनः ॥३३॥
सर्वविद्याविदां व्यास यतीनां व्रतचारिणाम्[२८] ।
तपस्विनां च विप्राणां योगी श्रेष्ठ उदाहृतः ॥३४॥
नान्यथा मुच्यते जन्तुः संसारात् तमसः[२९] परात्[३०] ।
षड्विंशकपरिज्ञानं मुक्त्वा योगनिबन्धनम् ॥३५॥
षडङ्गेन तु योगेन तथा पञ्चविधेन च ।
जित्वा ह्यष्टप्रकारन्तु[३१] आसनानां निबन्धनम् ॥३६॥
मात्रोत्कर्षेण जित्वा च प्राणायामं चतुर्विधम् ।
तन्मात्राणीन्द्रियैर्जित्वा विषयैरिन्द्रियाणि च ॥३७॥
अहङ्कारभयायासक्रोधलोभविवर्जितः ।
विमत्सरोथ निःसङ्गो निःस्नेहो निःस्पृहस्तथा ॥३८॥
योगास्पदं समाधाय[३२] पूर्वोक्तं गुणवर्जिम्[३३] ।
ध्यायीत हृदि तं देवं विश्वं विश्वेश्वरं विभुम् ॥३९॥
अनादिनिधनं शान्तं त्रैगुण्यपरिवर्जितम् ।
तालौ जिह्वां समाधाय दन्तैर्दन्तान् न च स्पृशन्[३४] ॥४०॥

---

२७ योगी स्वैरं (?) । २८ ब्रह्मचारिणाम् - ख.। २९ तपसः - क. । ३० पुरान् - क. । ३१ पञ्चप्रकारन्तु - ख.।
३२ समादाय - ख. । ३३ गुणवर्जितः - ख. । ३४ न चास्पृशन् - क., निवास्पृशन् - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

इन्द्रियाणि मनश्चैव परमात्मनि योजयेत्[३५] ।
कृत्वा मनसि तत्सर्वं प्राणापानौ निरुद्ध्य च ।।४१।।
ओङ्कारं त्वसकृद् ध्यायन् संहृत्याङ्गानि कूर्मवत् ।
शरीरं सर्वमापूर्य विक्षिपेत् सर्वमात्मनि[३६] ।।४२।।
तत्संहृत्य मुनिर्भूयो व्यापि भूतं प्रविस्तृतम् ।
नाडीवायुप्रचारेण भूयोभूयस्तथारभेत्[३७] ।।४३।।
स पूर्वापररात्रे तु सात्विकं[३८] चेत[३९] उच्यते ।
मध्याह्ने चापराह्णे च कृष्णं[४०] ध्यायीत तामसम् ।।४४।।
सन्ध्ययोरुभयोर्नित्यं राजसं ध्यानमाचरेत् ।
तैजसं सर्वतश्चापि ध्यानादेवं जयेद् गुणान्[४१] ।।४५।।
सदैवं ध्ययतो व्यास तदैश्वर्यं प्रवर्तते ।
येन षड्विंशकं बुद्ध्वा हृदयस्थं महेश्वरम् ।।४६।।
स्वेच्छया स्वतनुं त्यक्त्वा तस्मिन्नेव प्रलीयते ।
परमात्मा परं ब्रह्म कारणं पुरुषो महान् ।।४७।।
ईश्वरो निर्गुणो भोक्ता षड्विंशः समुदाहृतः ।
यच्चा[४२]सत् सदसच्चैव भूतिभूतो विभुः परः ।।४८।।
जागर्त्ति स्वपते भुंक्ते सन्तिष्ठति ददाति च ।
स स्रष्टा स च संहर्ता गुणातीतो महेश्वरः ।।४९।।
इत्येतत् कथितं सर्वं सर्वयोगनिदर्शनम् ।
योगं पाशुपतं तुभ्य[४३]माद्यं[४४] मोक्षगतिप्रदम् ।।५०।।
सर्वप्रसङ्गरहितं हरवक्त्रविनिःसृतम् ।
सूक्ष्मं तत्परमं ज्ञानं प्रवक्ष्यामि तवानघ ।
यस्य सम्यक् परिज्ञानाद् विज्ञेयं नापरं भवेत् ।।५१।।

⊙ इति स्कन्दपुराणे पाशुपतयोगवर्णने ध्यानविधौ षष्ठः ऊनाशीत्युत्तर[४५]शततमोध्यायः[४६] ⊙

३५ योजयन् (?) । ३६ सर्वतो मनः - ख. । ३७ भवेत् - ख., चरेत् (?) । ३८ सार्थिकं - क. । ३९ श्वेत (?) । ४० कृत्स्नं - ख. । ४१ गुणं - ख. । ४२ यच्च (?) । ४३ गुह्यं (?) । ४४ ..मद्य (?), मया (?) । ४५ ऊनसप्तत्युत्तर - क. । ४६ १६९ - क., २२७ - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच

ब्रह्माद्या देवता व्यास दक्षयज्ञवधे पुरा ।
शङ्करं शरणं[१] जग्मुर्वीरभद्रभयार्दिताः ॥१॥
गणेन्द्रेणाभियुक्तास्तु[२] भस्मकूटानि भेजिरे ।
यदा भस्म प्रविष्टास्ते[३] तेजः शाङ्करमुत्तमम्[४] ॥२॥
अभवँस्ते तदा रौद्राः[५] पशवो दीक्षिता इव ।
भस्माभसितगात्राणां[६] शङ्करव्रतचारिणाम् ॥३॥
स्वं योगं प्रददौ तेषां तदा देव उमापतिः ।
सर्वासां[७] मोक्षविद्यानां यत्तत्त्वमतिरिच्यते ॥४॥
हिरण्यगर्भप्रमुखैर्योगिमुख्यैः प्रवर्तितः[८] ।
यो योगः सकलो व्यास कृच्छ्रोपायप्रसाधनः ॥५॥
जन्मान्तरसहस्रैस्तु तमभ्यस्य महामुने ।
प्राप्नुवन्ति परं[९] ज्योतिर्योगैश्वर्यमथापि वा ।
योयं भगवता साक्षाद् योगो माहेश्वरः परः ॥६॥
तत्त्वतः कथितस्तेषां प्रपन्नानां[१०] दिवौकसाम् ।
अस्य सम्यक् परिज्ञानादनेनैव तु जन्मना ॥७॥
व्रतं पाशुपतं प्राप्य षड्मासाज् ज्ञानमाप्नुते ।
योगैश्वर्यं महद्[११] व्यास यदवाप्य विमुच्यते ॥८॥
सर्वधर्मं बहिः कृत्वा निष्कलस्य प्रभावतः ।
दीक्षां पाशुपतीं प्राप्य तं[१२] विशन्ति महेश्वरम् ॥९॥
सर्वज्ञानसमायुक्तं तपोधर्मबहिष्कृतम्[१३] ।
भस्मसाधनमात्रं तु शिवेन कथितं व्रतम् ॥१०॥
पापिष्ठा धर्मवन्तो वा भक्ताः केवलमीश्वरम् ।
सेवनाद्यस्य मुच्यन्ते तन्निबोध महाव्रतम् ॥११॥

---

१ शरणं शङ्करं - ख. । २ संयुक्ता - ख. । ३ प्रदीप्तास्ते - ख. । ४ शङ्करमुत्तमम् - क. ख. । ५ महारौद्राः - क । ६ भषित (रूषित?) गात्राणां - ख. । ७ सर्वेषां - क. । ८ प्रवर्तितम् - क. । ९ यदि - ख. । १० प्रसन्नानां - क. । ११ गतो - ख. । १२ मा - क. ख. । १३ तयोधर्मविहिष्कृतम् - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अधर्मं न विना धर्मो न च धर्मं विनाशुभम् ।
एतौ परस्परं बद्धौ त्यक्त्वा तस्मादिमावुभौ ॥१२॥
धर्माधर्मपरित्यक्तश्चरेत् पाशुपतं व्रतम् ।
ततो योगमिमं प्राप्य महदैश्वर्यमाप्नुते ॥१३॥
भस्मग्रहणमात्रात्तु[१४] सर्वबन्धप्रमोचनम् ।
मुच्यते स्पृष्टमात्रस्तु[१५] ब्रह्मपूतेन[१६] भस्मना ॥१४॥
दहेत् सोमकृतं वह्निरीश्वरं चानलं[१७] विदुः ।
कृताकृत दहत्यग्निर्भूयः[१८] सोमसमागतः[१९] ॥१५॥
भस्मना मोचिताः सर्वे ब्रह्माद्या अभिमानिनः ।
भस्मनस्तेजसो[२०] वीर्यं भस्म पावनमीश्वरम् ॥१६॥
आत्मानमुद्धरेद्[२१] व्यास[२२] यः स्नानं भस्मना चरेत्[२३] ।
भस्मना शिवयोगेन मुच्यते पाशबन्धनात्[२४] ॥१७॥
प्रभवन्ति सुराः सोमात् पितरो वह्निसंभवाः[२५] ।
वह्निसोमात्मकं[२६] तस्माज्जगत्सर्वं प्रतिष्ठितम् ॥१८॥
ईश्वरोग्निश्च सोमश्च भस्म तत्तेज उच्यते ।
तेजसा तस्य संस्पृष्टो मुच्यते जन्मना[२७] द्विज[२८] ॥१९॥
सांख्यं विद्यास्तपश्चैव त्यक्त्वा धर्मांश्च वैदिकान् ।
केवलं भस्मसंस्नात् पूतो गच्छति तत्पदम् ॥२०॥
विषयानपि संसेव्य बह्वधर्मरतोपि सन्[२९] ।
पश्चाद् भक्तिपरः शम्भोर्भस्मनैव[३०] हि शुद्धयति ॥२१॥
आत्मानं यः[३१] पशुं कृत्वा महादेवं हुताशनम् ।
दीक्षितो ब्रह्मभस्मभ्यां शिवयाजी मुनिर्भवेत्[३२] ॥२२॥

---

१४ तन्मात्रात् - क, तन्मात्रं - ख., तन्मात्रं तु (?) । १५ सृष्टमात्रम्तु - ख. । १६ ब्रह्मभूतेन (?) ।
१७ चालनं - क. । १८ दहेदर्ग्निर्भूयः - ख. । १९ समागतम् - क. । २० भस्मसस्तेजसो - क. ख. ।
२१ शङ्करे - ख. । २२ न्यस्य - ख. । २३ भस्मसाचरेत् - क. ख. । २४ पापबन्धनात् - क. ।
२५ संभवान् (त्) - क । २६ वह्नीसोमात्मकं - क ख. । २७ जन्मनो ? । २८ द्विजं - क., द्विजः - ख. ।
२९ सः - ख. । ३० भस्मसैव - क. ख. । ३१ स - ख. । ३२ शिवयाजिमुनिर्भवेत् - क., शिवयोगी ? ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शीघ्रमेव परं योगं प्राप्य मुच्येत[३३] बन्धनात् ।
एवं व्रतमनुप्राप्य भूत्वा पाशुपतो मुनिः ॥२३॥
इदं[३४] माहेश्वरं ज्ञानं[३५] गुह्यं परममभ्यसेत् ।
ज्ञेयं ज्ञानं तथा ज्ञाता त्रयं देहे यथा स्थितम् ॥२४॥
आत्मा यश्च यथा चासौ स्थानत्रयसमास्थितः ।
नाडीषु च यथा ह्यात्मा आत्मन्येवानुतिष्ठति ॥२५॥
सर्वतः सर्वभूतेषु निगूढस्तिष्ठते यथा ।
पयसीव घृतं व्यास यं विदित्वा विमुच्यते ॥२६॥
न स वेत्तु[३६] विना ज्ञानं शक्य आत्मा कथञ्चन ।
रूपशब्दरसातीतं कस्तं वेत्ति महेश्वरम् ॥२७॥
तथा ह्यहं महाभाग प्रसादात्[३७] त्र्यम्बकस्य तु ।
आत्मज्ञानवरोपायं कथयामि तवानघ ॥२८॥
सर्वमेव तमः पूर्वमिदमासीज्जगत् किल ।
न देवा नानिलो न द्यौर्नसूर्यश्चन्द्रमा न च[३८] ॥२९॥
न किञ्चित् सर्वथा भूतं[३९] दृश्यते जगति स्थितम् ।
शुद्धं विमलमाभाति अक्षरं परमैश्वरम् ॥३०॥
सर्वभावगुणातीतं निर्विकल्पं निरञ्जनम् ।
बहिरन्तश्चरं दीप्तमविनाशि वरं ध्रुवम् ।
यथा तदक्षरं ब्रह्म प्रोच्यमानं तथा शृणु ॥३१॥
ओमित्येकाक्षरं पूर्वं क्षरं तस्माद्विनिर्गतम् ।
त्र्यक्षरश्च त्रिमात्रश्च ओङ्कारो ब्रह्म शब्द्यते ॥३२॥
अकारे तत्र विष्णुस्तु उकारे तु पितामहः ।
मकारे भगवानीशो मात्रायां प्रकृतिः स्मृता ॥३३॥
ब्रह्मविष्णू[४०] स्मृतौ यौ तौ[४१] देवावीश्वरनिर्गतौ ।
प्रकृतिस्त्रीत्वमास्थाय[४२] नित्यन्तावीशपाश्वंगौ[४३] ॥३४॥

---

३३ मुच्यतिं - कः ख. । ३४ इमं - क. ख । ३५ योगं (?) । ३६ नावसेतुं - ख. । ३७ महाया (यो) गप्रसादात् - ख. । ३८ न सूर्यो न च चन्द्रमाः (?) । ३९ सर्वभूतानां - ख. । ४० ब्रह्माविष्णु - क. ख. । ४१ तु - क ख. । ४२ प्रकृतिः स्त्रीत्वमास्थाय (?) । ४३ तिष्ठन्तावीशपार्श्वगौ - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पत्नीरूपेण सा शम्भुं भजते प्रकृतिस्सदा ।
क्षरन्तु प्रकृतिः[४४] ख्याताक्षरस्तु[४५] स्वयमीश्वरः ॥३५॥
ईश्वरान्निर्गता सा हि प्रकृतिर्गुणबन्धना ।
तस्याः स्रष्टा महादेवो यतो विष्णुपितामहौ ॥३६॥
प्रजापती समुत्पन्नौ गुणत्रयनिबन्धनौ ।
तावाक्रम्य महेशस्तु प्रकृतिस्थौ गुणात्मकौ ॥३७॥
मकारस्थो विभुर्भूत्वा भुंक्ते संचरते च हि ।
गुह्यमेतत् परं ज्ञात्वा मयोक्तं तत्त्वमक्षरम्[४६] ॥३८॥
येनैव[४७] घ्यानिना[४८] व्यास ईश्वरोसौ विकल्पितः ।
स तमाविश्य मुक्तात्मा कृतार्थो जायते मुनिः[४९] ॥३९॥
नैनं जानन्त्यमार्गस्थास्तर्कहेतुपरायणाः ।
भोक्तारं प्रकृतेरीशं परं षड्विंशसंज्ञितम् ॥४०॥
ओङ्कारः[५०] प्रकृतिर्नित्यं तन्मध्ये चेश्वरःस्थितः[५१] ।
पयोमध्ये यथा व्यस सर्पिरन्तर्गतं स्थितम् ॥४१॥
ओङ्कारं ध्यायता येन[५२] अतीत्य प्रकृतिं मुने ।
ईश्वरोसौ महान् विन्नः स मुक्तः पशुबन्धनैः ॥४२॥
ईश्वरी प्रकृतिः ख्याता गुणबन्धाद्विमोहनी ।
ब्रह्मत्वाद् बृंहणी ह्येषा विष्णुत्वाद्विभवाश्रिता ॥४३॥
प्रसादादीश्वरस्यैषा प्रकृतिस्त्रिगुणात्मिका[५३] ।
साभिमाना भवस्रष्ट्री[५४] भोक्ता तस्या महेश्वरः ॥४४॥
अष्टबाहुस्त्रिपादा च पञ्चदेहमुखी तथा ।
द्विनेत्रा पंचकर्मस्था सप्तवाजिरथोपगा ॥४५॥
जगन्माता स्मृता ह्येषा गुणत्रयविकारजा ।
उभे शुभाशुभे तस्या[५५] विद्याविद्ये तथा ह्युभे ॥४६॥

---

४४ अक्षरप्रकृतिः - ख. । ४५ क्षरस्तु - ख. । ४६ तत्त्वतोक्षरः - क. । ४७ येनैवं - ख. । ४८ ध्या:निनो- ख. ।
४९ मुने .?) । ५० ओङ्कारं - ख. । ५१ चेश्वरं स्थितं - क. । ५२ ध्यायतो नित्यं - ख. ।
५३ स्त्री गुणात्मिका - क, । ५४ ...भवत स्रष्टी - क., ...भवत्स्रष्टा - ख. । ५५ तस्यां - ख, ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

उद्भवोथ प्रणाशश्च क्रियानुष्ठानमेव च ।
निमित्तं चाभवद्योनिर्भावा:[५६] संक्षेपतस्त्वमी ॥४७॥
ईश्वराज्जात ओङ्कारः[५७] स च तस्मिन् प्रतिष्ठितः ।
ओङ्कारात् सर्वमुत्पन्नमाब्रह्मभवनं[५८] जगत् ॥४८॥
अतः कृत्वा महाभाग योगिनः कपिलादयः ।
ओङ्कारं परमं[५९] ब्रह्म निर्विकल्पमुपासते ॥४९॥
स एव सर्वगो ह्यात्मा कारणं च स एव तु ।
एवं प्रकृतिभूतौ तावोङ्कारप्रभवौ स्थितौ[६०] ॥५०॥
ईशभोज्यौ गुणात्मानौ ज्ञात्वा विष्णुपितामहौ ।
तत्सृष्टौ वेदयज्ञाख्यौ मुक्त्वा धर्मनिबन्धनौ ॥५१॥
महामोहौ तमोनिष्ठौ[६१] विषयासङ्गसंयुतौ ।
सत्वपूर्वौ रजोमध्यौ सुखदुःखान्वितौ सदा ॥५२॥
संसारभ्रमणौ मूढौ सर्वानित्यसमायुतौ ।
ईश्वरेप्सुर्भवेद्विद्वान् ध्यायोगपरायणः ॥५३॥
तस्मात् प्रकृतिरुत्पन्ना तस्मिन्नेव प्रणश्यति ।
येनासावीश्वरो विन्नो योगेनात्मनि संस्थितः ।
प्रकृतिस्तं न बध्नाति मुच्यते च भवार्णवात् ॥५४॥

⊙ इति स्कन्दपुराणे पाशुपतयोगवर्णने ध्यानविधौ सप्तमः अशीत्युत्तरशततमोध्यायः ⊙

सनत्कुमार उवाच

आत्मा सूक्ष्मो मनोबुद्धिरहङ्कारो गुणास्तथा ।
भूतानीन्द्रियसंघातस्तन्मात्राणि दशानिलाः[१] ॥१॥
विभक्ताः क्रमशो देहे विभागेन यथाश्रयम् ।
स्वप्नजाग्रत्सुषुप्तेषु[२] स्थानेषु त्रिषु सुव्रत ॥२॥

---

५६ चारुव द्योनिर्भावाः - क., चाभवेद्योनिर्भावाः - ख. । ५७ जायतोङ्कारः - क. । ५८ भुवनं (?) ।
५९ ओङ्कारपरमं - क. ख. । ६० प्रभवस्थितौ - क. ख. । ६१ महामोहतमोनिष्ठौ (?) ।
१ ...स्तन्मात्राण्यनिलात्मकः - ख. । २ जाग्रत्स्वप्नसुषुप्तेषु (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

हृदये कर्णिकायान्तु यत् पद्मं सर्वतोमुखम् ।
वेष्टितं तन्तुभिः[३] सूक्ष्मैस्तदूर्ध्वं सर्वदेहिनाम् ॥३॥
आत्मा तत्र सजीवस्तु समनस्कः[४] प्रतिष्ठितः ।
तत्[५] सुषुप्तमिति प्राहुः संसिद्धाः शिवयोगिनः ॥४॥
ज्वालिनी[६] स्तिमिता धूम्रा विद्युन्मेघा विशालिनी ।
मालिनी शङ्करी चैव सुमैत्री बोधनी तथा[७] ॥५॥
एता दश[८] महानाड्यो जीवे तस्मिन् प्रतिष्ठिताः ।
शयानं प्रतिबुद्धं वा यास्ता बिभ्रति देहिनम् ॥६॥
शब्दादिविषयेभ्यस्तु आत्मा सर्वगतश्च यः ।
अग्निवायुसमायुक्तो जीव इत्युच्यते पुनः ॥७॥
अहङ्कारो मतो बुद्धिर्भावाश्चेतश्च देहजाः ।
सह जीवेन तिष्ठन्ति धारयन्तः शरीरिणम् ॥८॥
त एव सहिताः सर्वे जीवश्चैव तु पञ्चमः ।
कर्णिका तन्तुभिर्व्योम्नि संस्थिता सर्वतोमुखा[९] ॥९॥
स्थितो मनसि सूक्ष्मस्तु शीतांशुर्नाम तन्तुकः ।
चेतः स एव संप्रोक्तः स एव पुरुषः स्मृतः ॥१०॥
अहंकारोथ जीवस्तु तन्तुर्भास्करसंभवः[१०] ।
मनः सोमः सुखं ब्रह्मा ज्ञानं[११]धर्मो[१२] रतिस्तथा ॥११॥
रसमात्मा महौषध्यः सत्वजो भावविस्तरः ।
अहंकारो हुताशश्च मृत्युर्दुःखमथामयम्[१३] ॥१२॥
कामरोषौ जरा तृष्णा अधर्मश्चेति तामसाः ।
विष्णुर्बुद्धिस्तथा कार्यं कारणं[१४] भूमिरेव च ॥१३॥
ज्ञानं वैराग्यमाकाशं राजसो[१५] भावविस्तरः[१६] ।
जीवमध्ये स्थिता सूक्ष्मा विधूमा पावकी शिखा ॥१४॥

---

३ दर्शभिः - क. ख. । ४ सुमनस्कः - क. । ५ तं - ख. । ६ ज्वलिनी - क. । ७ स्नुषा - ख. ।
८ एकादश - ख. । ९ ... स्सर्वतोमुखा - ख., .. मुखाः (?), ... मुखी (?) । १० संज्ञकः (?) ।
११ ब्रह्मज्ञानं - क. । १२ ...ज्ञानैश्वर्यो (र्यें?) - क. । १३ मृत्युर्दुःख मनामयम् - क. ख. । १४ कार्यकारणे - क. ।
१५ राजसं - क. ख. । १६ विस्तरम् - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अमृतं सर्वभूतानां गतिश्चैव हि सा परा ।
मध्ये तस्याः स्थितं सौम्यममृतं शशिमण्डलम् ॥१५॥
मध्ये तस्याग्निसंकाशो जीव ईशः[१७] प्रदृश्यते ।
सरसा लोहिता मुख्या प्रीता रसवती तथा ॥१६॥
विधूमा चामृता चैव निकुण्ठा बहुविस्तरा ।
एताः सूक्ष्मतरा नाड्यः संभिद्य दशपावकम् ।
तर्पयन्ति सदा सोमं भूताधारं पयोमृतम् ॥१७॥
स ताभिस्तर्पितः सोमः[१८] सर्वान्निरसवीर्यतः ।
संछादयति वृद्धस्तां[१९] जीवमध्यगतां शिखाम् ॥१८॥
तदेवामृतमाख्यातमीश्वरास्पदमुत्तम् ।
रसो यदा हि सोमस्य शिखया कर्षितोधिकम्[२०] ॥१९॥
जागर्त्येष तदा जन्तुः सर्वयोनिसमुद्भवः ।
यामृतेत्यपरा नाडी सा तु स्वप्ने[२१] प्रतिष्ठिता ॥२०॥
यदासौ सोममापीति ? सुप्त इत्युच्यते तदा[२२] ।
उभावेतौ मुनिर्जित्वा स्वप्नजागरणाश्रयौ ॥२१॥
अजाग्रन्नस्वपँश्चैव ध्यानयोगेन चिन्तयेत्[२३] ।
ममत्वाद्याश्च ये भावा मनसश्चैव या[२४] घृणा ॥२२॥
न बुद्धेर्यच्च वैराग्यं तेन बुध्यन्ति योगिनः ।
मन्यते[२५] यन्मनः[२६] किञ्चिद् बुद्धिर्यच्च विकल्पयेत् ॥२३॥
यद्वा कुर्यादहङ्कारस्तज्ज्ञानात् सर्वमुत्सृजेत् ।
निष्क्रियस्य कुतः कर्म तद्विना बन्धनं कुतः ॥२४॥
कर्मबन्धविहीनस्तु संशुद्धो बद्ध्यते[२७] कथम् ।
य इमान् विषयान् केचिन्न विद्युः सोमसंभवान्[२८] ॥२५॥
भोक्ता वह्निः[२९] स्मृतस्तेषां तज्ज्ञाता केन बद्ध्यते[३०] ।
इति ज्ञात्वा त्यजेच्चिन्तां भवेद्योगपरः सदा ॥२६॥

---

१७ ईषिन् (ईषत् ?) - क. । १८ सोमो - ख. । १९ वृद्धां तां - ख. । २० ... धिकः - क. ।
२१ सुषुप्ते - ख. । २२ सदा - ख. । २३ ध्यानयोगं विचिन्तयेत् - क. । २४ ये - ख. । २५ मन्यन्ते - क. ख. ।
२६ यन्मयः - क. । २७ मुच्यते - क. ख. । २८ विद्यात्सोमसंभवान् - क. ख. । २९ भोक्तृवह्निः - ख. ।
३० बद्ध्यति - क. ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

वह्न्यर्यदौष्ण्यं तत्पापं तेजोधर्म उदाहृतः ।
प्रकृतिर्या स जीवस्तु या शिखा स महेश्वरः ।।२७।।
यो दहेत्[३१] तेजसा वह्निं[३२] न च तेन विदह्यते[३३] ।
अतीता प्रकृतिस्तेन वित्त[३४]स्तेन महेश्वरः ।।२८।।
कर्मबन्धो ह्ययं लोको निष्कर्मा बद्ध्यते कथम् ।
निर्ममा योगविदुषः शंकरव्रतमास्थिताः ।।२९।।
गच्छन्ति स्वतनुं त्यक्त्वा हित्वा[३५] मायां परं पदम् ।
इदमन्यत् परं ज्ञानमस्मात् सूक्ष्मतरं पुनः ।।३०।।
प्रवक्ष्यामि तव व्यास भक्तस्त्वमसि शङ्करे ।
योगिनोन्ये न जानन्ति यद् गुह्यं परमाद्भुतम्[३६] ।।३१।।
मुक्त्वा पाशुपतान् सिद्धान् यन्न भूतेषु विद्यते ।
मनो बुद्धिरहङ्कार इन्द्रियाणि गुणत्रयम् ।।३२।।
न स्पृशन्ति तदात्मानं[३७] विकारास्तस्य ते बहिः ।
सर्वत्र दृश्यते सोथ न च सर्वैः प्रदृश्यते ।
स एवं दृस्यते ध्यानान्नान्योपायात् कथञ्चन[३८] ।।३३।।
सर्वभावगुणातीतं सुचिन्त्यं [३९] परमेश्वरम् ।
ज्ञानेन ये प्रपश्यन्ति योगिनस्तेपरे स्मृताः ।।३४।।
छायैषा दृश्यते या तु चक्षुर्विषयमाश्रिता ।
स जीवः कीर्तितो व्यास स्थितिहेतुःशरीरिणाम् ।।३५।।
तत्रास्ते स परो ह्यात्मा सूक्ष्मो मध्यगतोव्ययः
महानागः स्मृतो नाम्ना वायुराकाशगोचरः ।।३६।।
आकाशे कर्णिकायां च नाडयां जीवे च संस्थितः ।
गान्धारी विजया चैव सञ्जया तलवर्तिनी ।।३७।।
नाग एतासु नाडीषु वायुः संपरिवर्तते ।
सा जया[४०] विजया या च द्वे ते प्राणवहे स्मृते ।।३८।।

---

३१ देहे - क. । ३२ वह्निर्न - ख. । ३३ विदह्यति - क. । ३४ विद्धः - ख., विन्नः - क. । ३५ भित्वा - ख. । ३६ परमद्भुतम् - ख. । ३७ तमात्मानं (?) । ३८ नानुपायान् - क., ...पायान्न तु - ख. । ३९ स्वभावगुणातीतमचिन्त्यं - ख. । ४० सञ्जया (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अपाने तलगान्धार्यौ नाड्यौ नागेन संयुते ।
योगादपानमनसोर्नागेन समुदीरिता:[४१] ।।३९।।
स प्राणो बहिरन्तश्च तर्पयन् हव्यवाहनम् ।
वृद्धं[४२] संधारयेद् देहमायुषा च बलेन च ।।४०।।
नाडी त्वन्या सुषुम्णेति[४३] सोमवह्निमन:स्थिता ।
सास्मिन् सधातुके देहे कूर्मारे[४४] चानिले स्थिता ।।४१।।
गुल्फे[४५] करतले[४६] सक्ता[४७] निकुञ्चा सप्रसारिणी[४८] ।
समानव्यानसंयुक्ता रक्तमांसे हि तर्पयेत्[४९] ।।४२।।
उदानो योपरो वायुर्यश्च कूर्मार[५०] उच्यते ।
नाड्यां नाभिनिबद्धायां तुलायां तौ प्रतिष्ठितौ ।।४३।।
अध एकश्चरेन्नाड्या वायुरन्यस्तदूर्ध्वग: ।
अध:स्थ: पादसंबद्ध ऊर्ध्वग: शिरसि स्थित: ।।४४।।
यो वायुर्देवदत्ताख्य: कृतको[५१] योपरोनिल: ।
वह्निसोमनिबद्धौ तौ प्राणहेतू महाबलौ[५२] ।।४५।।
एको विवर्द्धयत्यग्निमन्य: सोमञ्च तर्पयेत्[५३] ।
देवदत्तमहानागकृतकूर्मधनञ्जया:[५४] ।।४६।।
प्राणास्ते पञ्च विख्याता वह्न्यो- - याजिन: ।
हुतमेषु यदिष्टं वा सोमं तदुपतिष्ठति[५५] ।।४७।।
सोमं विशन्ति यज्वानो न तेषां मुक्तिलक्षणम् ।
दीप्तिरग्ने: स्मृता या तु ओषधिभ्यश्च यद्रसम् ।।४८।।
तर्पणं यच्च सोमस्य कर्णिकायां तदास्थितम् ।
नेत्रेषु दृश्यते योयं ज्योति: छायाप्रकाशक: ।।४९।।
स जीव: सर्वसत्वानामात्मा तत्र समास्थित: ।
ज्योतिषोन्तर्गत: सूक्ष्मस्तद्धर्मं[५६] परमं स्मृतम् ।।५०।।

४१ समुदीरितां - ख., समुदीरिते (?) । ४२ वृद्ध: - ख. । ४३ सुषुम्नेति - क., सुसुप्तेति - ख. ।
४४ कुर्मारि - ख., कुमारे - क. । ४५ गुल्फा - क. । ४६ खुरतले - क., करतला - ख. । ४७ शक्ते - ख ।
४८ सुप्रसारिणी - क. । ४९ ह्यतर्पयेत् - क ख. । ५० कुर्मार - क. । ५१ कृककको(लो) (?) ।
५२ समानिलौ - ख. । ५३ ...मतर्पयत् - क. ख. । ५४ कृककूर्मधनञ्जया: - ख. । ५५ तदुपतिष्ठते - ख. ।
५६ तद्धर्मा - क., तद्धर्म - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तच्चामृतं समाख्यातं ज्ञानलभ्यं तदुच्यते ।
तस्मात् परतरा[५७] नास्ति ज्ञानविज्ञानयोर्गतिः[५८] ।।५१।।
ज्ञात्वैवं सन्त्यजेन्मोहं गुणत्रयविकारजम् ।
अभिन्नस्यात्मनस्तस्य षड्विंशस्येश्वरस्य[५९] तु ।।५२।।
भेदं भगवतः कुर्यात् कोन्यो योगविशारदः ।
निरञ्जनं निर्विकल्पं प्रभुं तं न विकल्पयेत् ।।५३।।
विमोहास्त्यक्तसंसर्गाः क्रियाकार्यविवर्जिताः ।
तं विशन्ति महेशानमीश्वरव्रतचारिणः ।।५४।।
इतीदं योगमाख्यातं व्यास माहेश्वरं तव ।
सम्यगीश्वरसन्धानं[६०] यदन्यत्र न विद्यते ।।५५।।
सन्देहो यत्र ते विप्र प्रष्टव्यं यच्च मन्यसे ।
तद् ब्रह्मन् परिपृच्छाशु नावक्तव्यं तवास्ति मे ।।५६।।

⊙इति स्कन्दपुराणे पाशुपतयोगवर्णने योगविधावष्टमोयमेकाशीत्युत्तर[६१]शततमोध्यायः[६२]⊙

व्यास उवाच

भगवन् सर्वयोगीश सर्वामरनमस्कृत[१] ।
अहो ज्ञानं त्वयाख्यातमज्ञानविनिवर्तनम् ।।१।।
अद्याहं गतसन्देहो महादेवं परं प्रति ।
शङ्करात् प्रकृतिर्जाता ब्रह्मविष्णू तदात्मकौ ।।२।।
ज्ञात्वा षड्विंशमीशानं मुच्यते बन्धनादिति ।
सर्वयोगपथात्[२] पूर्वमुक्त्वा सकलसंहिताम् ।।३।।
निष्कलं सकलं[३] ज्ञानं कोन्य एवं प्रभाषते ।
श्रवणादस्य विप्रेन्द्र देहं मुक्तमबोधिषम्[४] ।।४।।

---

५७ परतरं - ख. । ५८ ज्ञानिज्ञानगत... - ख. । ५९ षड्त्रिंशस्य परस्य - क. । ६०... सन्धाना(त्) - ख. ।
६१ एकमप्तत्युत्तर - क. । ६२ १७१ - क., २२९ - ख. ।
१ नमस्कृतः - क. । २ ...मया - ख. ३ शाङ्करं - ख । ४ यत् - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

त्वत्प्रसादादहं तात प्राप्तज्ञानो गताशुभः ।
विसन्देहो[५] भवं[६] शान्तः प्रष्टव्यं किञ्चिदस्ति मे ॥५॥
तत्त्वां[७] विज्ञापयामीदं निष्ठामाख्यातुमर्हसि ।
एवं विज्ञानसंपन्नः प्राप्तयोगो मुनिर्मुने ॥६॥
विनाक्लेशं तनुं त्यक्त्वा योगी योगबलान्वितः ।
कथमाप्नोति तद् ब्रह्म निष्कलं परमेश्वरम् ।७॥
ईश्वराधानसंप्राप्तेरुपायं[८] मोक्षलम्भनम् ।
कथयस्व मुनिश्रेष्ठ प्रष्टव्यं नान्यदस्ति मे ॥८॥
एवमुक्तः स शिष्येण व्यासेन सुमहात्मना ।
कथयामास विप्रेन्द्रः शिवसिद्धान्तनिश्चयम् ॥९॥

सनत्कुमार उवाच

शृणु व्यास परं ज्ञानमीश्वराधानकारणम्[९] ।
स्वेच्छया[१०] येन मुच्यन्ते[११] योगिनो ज्ञानतत्पराः ॥१०॥
त्रिधोत्क्रान्तिमिमां[१२] ज्ञात्वा मुहुरभ्यस्य चैव हि ।
स्वदेहं रिपुवत् त्यक्त्वा[१३] षड्विंशे लयमाप्नुयात् ॥११॥
या नाड्यो वाय्ववष्टब्धाः[१४] संवरन्ति[१५] शरीरिणम्[१६] ।
शतं तासां शतानां तु कर्णिकामध्यसाश्रितम्[१७] ॥१२॥
तमाश्रित्या[१८] स्थिता नाड्यो[१९] नाभ्यां पादेष्वधोगताः ।
शिरोबद्धाः स्मृता भूयस्ता एव करमास्थिताः[२०] ॥१३॥
करमाश्रित्य ता भूयः कर्णिकां पुनराश्रिताः ।
द्विसप्ततिसहस्राणि नाडीनामपरा[२१] मुने ॥१४॥
तासामेकैकशो भेदाः[२२] सूक्ष्मसूक्ष्मतराः[२३] स्मृताः[२४] ।
तासु सञ्चरते प्राणः कर्णिकाव्योमसंभवः ॥१५॥

---

५ निःसन्देहो - ख. । ६ भवान् - क. ख. । ७ तन्त्वा - ख । ८ ईश्वरध्यानसंप्राप्तेरुपायं - ख. ।
९ ध्यानकारणम् - ख. । १० स्वेप्सया - ख. । ११ मुच्यन्ति - क ख. । १२ ...मिमं - क. । १३ कृत्वा - ख. ।
१४ वेष्टिताष्टब्धा ? - क. । १५ संचरन्ति - ख. । १६ शरीरिणः - क. । १७ समाश्रिताः - क. ।
१८ तमाश्रिना - ख. । १९ नाडी - क. ख. । २० ...श्रिताः - क. । २१ ...मपरं - क ख. । २२ भेदे - क. ।
२३ सूक्ष्मातरा... - क. । २४ स्थिता - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

तत्रात्मा सूक्ष्मसंलक्ष्यः प्रागुक्तस्तिष्ठति द्विज ।
या प्रभा दुर्दृशा तस्य तां भजेद् योगविन्मुनिः ॥१६॥
तत्तोजः सर्वनाडीषु विभक्तं सर्वदेहिनाम् ।
तेन नाड्यो बहिः स्पर्शान्मनः कुर्वन्ति विस्तृतम् ॥१७॥
तत्तोजश्चक्षुषा हृत्वा सर्वनाडीसमाश्रितम् ।
मन एकगतं कुर्यात् तच्चात्मनि नियोजयेत् ॥१८॥
वायुर्धनञ्जयो नाम्ना यो हृदि स्फुरते सदा ।
त्रीणि तस्य मुखान्याहुः शिरो नाभि[२५] र्हृदेव च ॥१९॥
येन्ये प्राणा नवाख्याता वायवः कीर्तिता मया ।
धनञ्जयस्य सर्वे ते वशगास्तन्निबन्धनाः ॥२०॥
तद्वशादुत्क्रमन्त्येते तस्मिँतिष्ठन्ति संस्थिताः ।
नाभीबन्धनमासाद्य[२६] नाडीनां वक्त्रमास्थितम् ॥२१॥
द्वितीयं कर्णिकायान्तु तृतीयं तालुसंस्थितम्[२७] ।
क्षुरिका परशुः शूलं त्रिविधोत्क्रान्तिरुच्यते ॥२२॥
शूलं हृदि क्षुरं नाभ्यां तालौ परशुरास्थितः ।
तालुके हृदि वा[२८] बद्धं त्रयं[२९] नाभ्यां प्रतिष्ठितम् ॥२३॥
तालौ वियोजितं सर्वं प्राणमेव विमुञ्चति ।
आक्षिप्तं त्रितयं नाभ्यां कर्णिकायां वियोजितम्[३०] ॥२४॥
स्थितम् (?) आत्मनि संयोज्य विक्षिपेदूर्ध्वतो मनः ।
प्रयोगादस्य विप्रेन्द्र मुच्यते तत्क्षणान्मुनिः ॥२५॥
स्वच्छन्दतनुसंत्याग एष ते परिकीर्तितः ।
धर्माधर्मनिबद्धैस्तु कर्मभिः प्रागनुष्ठितैः ॥२६॥
यथा[३१] जीवो न बद्ध्येत[३२] योगिनस्तदिदं[३३] शृणु ।
बाह्यःशरीरजश्चैव मृत्युर्द्विविध उच्यते ॥२७॥

२५ नामा(सा) - क. । २६ नाडीबन्धनमासाद्य - ख. । २७ तालुसंस्थिता - ख. २८ वा हृदि - क. । २९ बन्धत्रयं - ख. । ३० वियोजयेत् - क । ३१ तथा - ख । ३२ बुद्ध्येत - ख. । ३३ ...स्तदिमं - क, स्तमिमं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विषशस्त्राग्नियोगैस्तु सर्पदंष्ट्रिमरुज्जलैः ।
बाह्यो मृत्युरिति ख्यातः शारीरं तु निबोध मे ॥२८॥
रोगजः कालजो वापि मृत्युराभ्यन्तरो[३४] भवेत् ।
कालजो जरया प्रोक्तो रोगजो व्यधिसंक्षयात् ? ॥२९॥
दुर्लभो मृत्युरन्योयं[३५] योगसंधानजो मुने ।
योगोपायकृतो यश्च यश्च कालक्षयागतः ॥३०॥
तयोर्भेदविकारे तु शृणु व्यास समासतः ।
कालक्षयाद् भवत्येको द्वितीयो मनसेप्सितः ॥३१॥
योयमाघोषजः शब्दः श्रूयते श्रोत्रसन्धितः[३६] ।
स पूर्वं लीयते कूर्मे तेन वह्निस्त्यजेत् प्रभाम् ॥३२॥
निष्प्रभः स ततो वह्निः शब्दयोगाद्वियुज्यते ।
शब्दस्पर्शगुणातीतो रूपयोगं विमुञ्चति ॥३३॥
एवमग्नौ प्रणष्टे तु सर्व एवानिलास्ततः ।
एकतो योगमिच्छन्तो[३७] मर्माणि विनिकृन्तते ॥३४॥
कूर्मारो[३८] देवदत्तश्च कृकरो नाग एव च ।
उदानेनाशु संयुज्य कर्णिकायां विशन्ति[३९] हि ॥३५॥
तत[४०] ऊर्ध्वो भवेच्छ्वासो मनोजीवविनिर्गमः ।
ततो ज्योतिर्यदक्षिभ्यां[४१] तत्सोमं विशति द्रुतम्[४२] ॥३६॥
इन्द्रियाणि मनो यान्ति मनः प्राणविनिर्गमम् ।
तेषु सर्वेषु लीनेषु प्राणान् वायुर्निपीडयेत् ॥३७॥
पीड्यमानास्ततः सर्वे[४३] ते भवन्त्येकतोनिलाः[४४] ।
स्वं स्वं त्यक्त्वा ततः स्थानं यच्च[४५] कर्म यदात्मकम् ॥३८॥
एकस्था वायवः सर्वे पूरयन्ति धनञ्जयम् ।
शेषस्तत्र हि कूर्मारो जीवं त्यक्त्वा स तिष्ठति ॥३९॥

---

३४ मृत्युरभ्यन्तरो - ख. । ३५ ..रभ्यासाद् - क. । ३६ सन्धिते (तैः) - ख. । ३७ लोकमिच्छन्तो - ख. ।
३८ कुर्मारो - क. ख. । ३९ ...माविशन्ति - ख. । ४० अतः - ख । ४१ ज्योतिर्यदक्षिभ्यां - क. ।
४२ द्रुते - ख. । ४३ भवन्त्येकगतो - क., भवन्त्यन्तगतो - ख. । ४४ ता - ख. । ४५ धर्मं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मनोबुद्धिरहङ्कारश्चेतो जीवस्तथैव च ।
निष्क्रमन्ति ततो देहात्त्वरितं वायुनेरिता: ।।४०।।
प्रागुपात्तस्ततोस्यान्यो देहः सूक्ष्मो विजायते ।
स तत्र सन्धितो[४६] जीवो भूयो मूढश्च तिष्ठति[४७] ।।४१।।
एवं कालकृता ह्येषा सर्वभूतगणस्थिति:[४८] ।
विना योगं न जीयेत सूक्ष्मं माहेश्वरं पदम् ।।५२।।
उपविष्ट: प्रसुप्तो वा उत्क्रान्त्यभ्यस्तसंयम:[४९] ।
स्वेच्छया मुच्यते व्यास ज्ञात्वा तन्तु[५०] महेश्वरम् ।।४३।
क्षुरिकां परशुं वाथ शूलं वा धारयेन्मुनि: ।
तत: सर्वस्य लीयन्ते[५१] विकारा: करणै: सह ।।४४।।
वीक्षते चेश्वरं ब्रह्म षड्विंशं स्वतनुस्थितम् ।
मनस्तीव्रं जडं जन्तो: प्रयच्छति विपद्यत:[५२] ।।४५।।
स रुजा मोहमापन्नो ज्ञानवस्तु न विन्दति ।
अनेन कर्मणा विप्र सर्वरुक्परिवर्जित: ।।४६।।
सुखमारोहति ब्रह्म हर्म्यपृष्ठं[५३] तलादिव ।
पदार्थं पञ्च विज्ञाय दु:खान्तपरिनिष्ठित: ।।४७।।
पञ्चभिर्ब्रह्मभि: पूतो भस्मसा[५४] दीक्षितो द्विज: ।
शङ्करैकमना योगी ज्ञानमेतदवाप्नुते ।।४८।।
माहेश्वरमिमं योगं निष्कलं मुक्तिकारणम्[५५] ।
यत्नादपि न विन्दन्ति व्रतमप्राप्य शांकरम्[५६] ।।४९।।
स त्वं व्यास महाबुद्धे[५७] चरन्[५८] पाशुपतं व्रतम् ।
महादेवपरो भूत्वा ज्ञानमेतदवाप्नुहि ।।५०।।
नैवमेतत्[५९] परं ब्रह्म अन्ये विन्दन्ति योगिन: ।
महादेवं प्रपन्ना[६०] ये तान्मुक्त्वा शिवयोगिन: ।।५१।।

---

४६ तत्रापस्थितो (?) । ४७ मूढस्मृति ? - क. । ४८ ...गणास्थिति: - ख. । ४९ उत्क्रान्ताभ्यस्तसंयम: -ख.।
५० तत्त्वं - ख. । ५१ लीयन्ति - ख. । ५२ विपद्यते - ख. । ५३ हर्म्यमृण्डे - क. ख. । ५४ भस्मना (?)।
५५ मूर्तिकारणं - क., मूर्त्तिकारणम् - ख. । ५६ शंकरम् - क. ख. । ५७ महाप्रज्ञ - ख. ।
५८ चर - ख. । ५९ दैवमेतत् - ख. । ६० महादेव प्रपन्ना - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

एष[६१] मोक्षविधिः कृत्स्नः[६२] सर्वप्रत्ययवर्जितः[६३] ।
निष्कलः[६४] कथितो व्यास परो यस्मान्न विद्यते[६५] ॥५२॥
एवं पाशुपता विप्रा निष्कलं तं महेश्वरम् ।
योगादाविश्य मुच्यन्ते[६६] पुनर्जन्मविवर्जिताः ॥५३॥
सकलस्थास्पदं दिव्यं ब्रह्मलोकात् परे[६७] स्थितम् ।
महादेवस्य वक्ष्यामि तद्भक्ता यत्र यान्ति ते[६८] ॥५४॥

⊙इति स्कन्दपुराणे पाशुपतयोगवर्णने योगविधौ नवमः द्व्यशीत्युत्तर[६९] शततमोध्यायः[७०]⊙

सनत्कुमार उवाच

सत्यस्य महतश्चैव जनस्य तपसस्तथा ।
भव्यभूतभवानां च सप्तानामूर्ध्वतः स्थितः[१] ॥१॥
लोको भगवतः शम्भोर्यत्रास्ते सकलः शिवः ।
नासौ तर्कविनिर्देश्यो लोकास्तस्मिन् प्रतिष्ठिताः ॥२॥
ऊर्ध्वं तिर्यगधस्ताच्च लोकास्तद्विनिबन्धनाः[२] ।
ब्रह्माण्डं सकलं तस्मिञ्छिवलोके प्रतिष्ठितम् ॥३॥
नासौ नश्यति संहारे ध्रुवः स्थाणुः सुरालयः[३] ।
यत्राहं सनकाद्याश्च ब्रह्मा चैव पितामहः[४] ॥४॥
बालखिल्यपुरोगाश्च[५] सिद्धाश्च कपिलादयः ।
शिवयोगपरिप्राप्त्या[६] सत्वादिगुणवर्जिताः ॥५॥
तिष्ठामो निर्वृता व्यास सेवमानास्तमीश्वरम् ।
परमाणुरसावीशो भावगम्यो मनीषिणाम् ॥६॥
परमैश्वर्यसंयुक्तस्तत्रास्ते विग्रहेश्वरः ।
क्षमा सत्यं धृतिश्चैव तपो वैराग्यमेव च ॥७॥

---

६१ एषा - क. ख. । ६२ कृत्स्ना - क. ख. । ६३ ...वर्जिता - क. ख. । ६४ निष्कला - क. ख. ।
६५ परं यस्या न विद्यते - क. ख. । ६६ मुच्यन्ति - क. । ६७ परा - ख. । ६८ यान्तीति - क. ।
६९ द्विसप्तत्युत्तर - क. । ७० अध्यायाङ्को न विद्यतेत्र ख.पुस्तके ।
१ स्थितम् - ख. । २ विनिबन्धनात् - क. । ३ स्थाण्वीश्वरालयः (?) । ४ पिता मम - ख. ।
५ बालिखिल्यपुरोगाश्च - क. ख. । ६ परिप्राप्ताः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

स्रष्टृत्वं[७] ज्ञानवैराग्यादात्मबोधो[८] महेशता ।
नित्यमेतानि तिष्ठन्ति तस्मिन्देवे महेश्वरे ॥८॥
योगवह्निरसावात्मा ब्रह्मसृक्परमेश्वरः ।
साकल्यान्मूर्त्तिमास्थाय[९] करोति जगतः स्थितिम् ॥९॥
अष्टमं ध्रुवमध्येय(?)मक्षरं[१०] मुक्तिकारणम् ।
मायाधाम तदीशस्य जगत्संहारहेतुमत् ॥१०॥
ऊर्ध्वतो ब्रह्मलोकस्य योजनानां महात्मनः ।
विंशतीनान्तु कोटीनां पुरं स्थाणोः समास्थितम् ॥११॥
एतावानूर्ध्वसञ्चारो गत्यन्तश्च ततः स्मृतः ।
असंख्याताः पुरे तस्मिन्नित्याः सूक्ष्मास्तथाव्ययाः ॥१२॥
ज्ञनााधिकारधर्मिण्यः शैवीप्रकृतयः स्थिताः ।
याभ्यो जज्ञे[११] महेशानौ ब्रह्मविष्णू प्रजापती ॥१३॥
ताभ्यां प्रकृतिभूताभ्यां स्रष्टृत्वं परमं ददौ ।
अक्षयो विमलः सूक्ष्मो निष्कलः सकलोपि च ॥१४॥
स्थिरे मूर्त्तौ[१२] परे दिव्ये परमाणुपदे स्थितः ।
मनसः प्राक्तमस्यादौ[१३] तत्तोजःसंप्रकाशनम् ॥१५॥
यदासीद्धैमम्अण्डन्तु[१४] लौकिकं त्वापवर्गिकम् ।
महत्तत्[१५] सर्वतो नित्यमीश्वरात्तदभूत्तदा ॥१६॥
तस्माद्बीजस्य निर्भेदः क्षेत्रज्ञः स विभुः स्मृतः ।
प्रकृतिर्वैष्णवी प्रोक्ता सा च तस्माद्विनिर्गता ॥१७॥
सुरासुरादिसृष्टचर्थं ब्रह्मत्वं[१६] पुनरास्थिता ।
अण्डस्य भेदतः[१७] पद्मब्रह्मणः[१८] शंकरात्मनः ।
ब्रह्मलोकपुरस्ताच्च पुरं तेजोमयं महत् ॥१८॥
यत् स्थानं विग्रहेशस्य ईश्वरस्य परात्मनः ।
नाम्ना शिवपुरं व्यास गतिरीश्वरयोगिनाम् ॥१९॥

---

७ सष्टितं - क., संस्कृतं - ख. । ८ ...त्मबोधौ - ख. । ९ साकल्यान्मुक्तिमास्थाय - क. । १०...दक्षरं(?) । ११ अन्तर्भावितण्यर्थोत्र जज्ञेशब्दः, जनयामासेत्यर्थः । १२ पूते - ख. । १३ प्राप्तत... - क., प्राप्तमस्यादौ - ख., प्राक्तनस्यादौ (?) । १४ द्धैममण्डस्तु - क. । १५ महान्तं - क. ख., महान्तत् (?) । १६ ब्रह्मत्वे - क. । १७ भिद्यतः (?) । १८ पद्मं ब्रह्मणः (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शतं शतसहस्राणां योजनानां तदुच्यते ।
महीमण्डलसंस्थानं तन्मध्ये विस्तृतं[१९] स्मृतम् ॥२०॥
स्फुरदादित्यरूपेण वह्नेरधिकतेजसा ।
महता हैमजातेन[२०] प्राकारेण सुवेष्टितम् ॥२१॥
चतुर्भिर्हेमजैर्द्वारैर्मणिमुक्ताविभूषितैः[२१] ।
शोभितं तत्पुरं[२२] रम्यं शुशुभे सिद्धसेवितम् ॥२२॥
जरामृत्युश्रमव्याधिकोपमोहमदादयः[२३] ।
न क्रमन्त्यशुभास्तस्मिन् भावाः शिवपुरे मुने ॥२३॥
शतं शतसहस्राणां योजनानां यथादिशम् ।
तत् पुरं वृषभाङ्कस्य सर्वव्यापि समृद्धिमत् ॥२४॥
दिव्या मारकती[२४] भूमिः स्पर्शमात्रसुखावहा[२५] ।
वैदूर्यमणिकल्पानि[२६] बालार्कसदृशानि च ॥२५॥
क्वचिद्रक्तानि पद्मानि क्वचिच्छ्वेतानि रेजिरे ।
महाह्लदप्रमाणानि नालैर्वैदूर्यसन्निभैः ॥२६॥
गन्धवन्ति महार्हाणि विन्यस्तानि महीतले ।
इन्द्रनीलनिकाशानि महामणिनिभानि च ॥२७॥
क्वचित् कृष्णार्धरक्तानि दिव्यगन्धवहानि च ।
- - - - - - तत्र उत्पलानि समन्ततः ॥२८॥
प्रवहन्ति महानद्यो यास्तस्मिन्नमृतोदकम् ।
पुरे भगवतः शम्भोः पाराशर्य निबोध ताः[२७] ॥२९॥
वरदा च वरेण्या च वरेशा वरवर्णिनी ।
वाराही[२८] वारिभद्रा च वरा चैव महापगाः ॥३०॥
नानाकुसुमसंमिश्रं ता वहन्ति जलामृतम् ।
न देवा न मुनीन्द्राश्च नासुराः पितरो न च ॥३१॥

---

१९ विस्त्रितं - क. । २० जातहेमेन - क., जातरूपेण (?) । २१ मुक्तामणिविभूषितैः (?) । २२ तत्परं (?) । २३ महादयः - क. । २४ मरकती - क. । २५ स्पर्शमात्रत् सुखावहा (?) । २६ तुल्यानि(?)। २७ निबोधत - क. । २८ वराही - क. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

न चैवान्ये समर्थाः[२९] स्युर्ज्ञातुं तत्पुरमद्भुतम् ।
अन्तर्मनसि बुद्धा[३०] ये सर्वतो भक्तिभाविताः ।
शिवैकमनसो व्यास तस्मिन्मोदन्ति ते नराः[३१] ॥३२॥
तस्य मध्ये पुरेन्द्रस्य सूर्यज्वलनवर्चसः ।
मेरुशृङ्गप्रतीकाशो दिग्भद्रस्तपनप्रभः ॥३३॥
प्रासादो लक्षपादस्तु कामगः कनकामयः ।
अनिरीक्ष्यैर्महारत्नैः[३२] समन्तात् परिशोभितम् ॥३४॥
वैदूर्यैर्व्योमसंकाशैः स्फाटिकैश्चन्द्रसप्रभैः[३३] ।
प्रबालैरर्कसंकाशैरिन्द्रनीलमयैःपरैः[३४] ॥३५॥
शशिरश्मिप्रकाशाभिः क्वचिदर्कांशुरूपिभिः ।
शोभितं तत्पताकाभिर्विरराज सुखानिलम् ॥३६॥
सर्वर्तुकुसुमैश्चित्रैरिच्छारत्नफलैरपि ।
शुशुभे तत्पुरं कीर्णं पादपैर्गिरिसन्निभैः ॥३७॥
महीध्राणां यथा मेरुस्सर्वेषां प्रवरो महान् ।
तथैव तत्पुरं रेजे सर्वलोकोपरि स्थितम् ॥३८॥
तत्र विश्वेश्वरः साक्षान्महाभूतपतिर्हरः ।
सदास्ते सहितः पत्न्या षड्विंशः परमेश्वरः ॥३९॥
लक्ष्मीर्मेधा धृतिश्चैव ह्रीः श्रीः किर्त्तिः सरस्वती ।
उमया सहितास्तत्र मोदन्ते लोकमातरः ॥४०॥
शिवभावार्पितात्मानो ये नरा रुद्रतत्पराः ।
यत्र तत्र मृता वत्स तेषां तत्रास्पदं स्मृतम्[३५] ॥४१॥
ये च माहेश्वरा व्यास तिष्ठन्ते शङ्करालये ।
मुनयः शङ्करं भक्तास्तान् शृणुष्व समाहितः ॥४२॥
अहं सनन्दनश्चैव सनकः ससनातनः ।
ऋभुर्ब्रह्मा सुरज्येष्ठो नरनारायणावपि ॥४३॥

---

२९ महेशस्य - क. । ३० शुद्धा (?) । ३१ नेतरा (रे) ? । ३२ अनिरीक्षैर्महारत्नैः - क. । ३३ श्चन्दुसप्रभैः - क. ख. । ३४ पुरैः - क. । ३५ इतः परं खण्डितं क.पुस्तके ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

- - - - - - शिष्यः सिद्धः पञ्चशिखस्तथा ।
मुनिर्हयशिरा यश्च यज्ञवल्कादयस्तथा[३६] ॥४४॥
त्र्यक्षाः शङ्करवर्ष्माणः परमैश्वर्यसंयुताः ।
तिष्ठन्तीश्वरमूलस्था गुणातीता मुमुक्षवः ॥४५॥
उत्पन्ने जगतो नाशे महाप्रलयसंज्ञके ।
ईश्वरं ते समाविश्य प्राप्नुवन्त्यपवर्गिकम् ॥४६॥
यैश्च दृष्टानि विप्रेन्द्र शिवलिङ्गानि तानि तु[३७] ।
केदारो मध्यमश्चैव गिरीशश्च[३८] महालये ॥४७॥
चतुःशृङ्गेश्वरो देवः श्रीगिरौ च महेश्वरः ।
कारोहणो च देवेशो गङ्गाद्वारे च शङ्करः ।
भद्रेशश्च महादेवः शंकुकर्णेश्वरस्तथा ॥४८॥
महाकालेश्वरश्चैव गोकर्णे च तथा ह्युभौ ।
अविमुक्तेश्वरश्चैव यानि चान्यानि भूतले ॥४९॥
तेपि यान्ति मृता व्यास तत्पुरं[३९] गिरिजापतेः ।
योगः[४०] पाशुपतो यश्च मया ते परिकीर्त्तितः ॥५०॥
व्रतं पाशुपतं प्राप्य सोपि तत्र[४१] प्रवर्तते ।
भक्तिर्येषां भवे नित्यं कृतार्थास्ते नरोत्तमाः ॥५१॥
मृताः शिवपुरे व्यास त्र्यक्षाःपट्टिशपाणयः[४२] ।
नन्दीशस्कन्दसंकाशा[४३] योगैश्वर्यबलान्विताः ॥५२॥
रुद्रा भवन्ति[४४] ते व्यास सदा शंकरपार्श्वगाः ।
एष ते कथितः सर्वो योगो माहेश्वरः परः ॥५३॥
सकलं निष्कलं चैव ज्ञात्वैवं परमेश्वरम् ।
सर्वबन्धविनिर्मुक्तः परं[४५] मोक्षमवाप्स्यसि ॥५४॥

---

३६ यज्ञावाल्कावयस्तथा - ख. । ३७ निभानि तु(?) । ३८ गिरीशस्य - ख. । ३९ तत्पर - ख. । ४० योगं - ख. । ४१ तेषु - ख. । ४२ पट्टशपाणयः - ख. । ४३ नन्दीशाः स्कन्दसंकाशा - ख. । ४४ च्यवन्ति - ख. । ४५ पर - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

भविष्यसि च योगात्मा[४६] ज्ञानस्यास्य प्रभावतः ।
जगात्स्थितिकरो योगी स्मार्त्तधर्मप्रवर्तकः ॥५५॥
ज्ञानशक्त्या स्मृ - - - ब्रह्माण्डोद्भकारणे[४७] ।
स्थितिधर्मनिबोधार्थं पुराणनि[४८] करिष्यसि ॥५६॥
यज्ञधर्मप्रचारार्थं वेदं स्वायम्भुवस्मृतम् ।
विज्ञानात् त्वमनुस्मृत्य चतुर्धा विकरिष्यसि ॥५७॥
मन्वन्तरमिदं[४९] कृत्स्नं वैवस्वतमनिन्दितम् ।
लोकस्थितिकरा[५०] धर्मा वेदस्मृतिपुरोगमाः ॥५८॥
त्वत्कृताः प्रचरिष्यन्ति तीर्थकृत् त्वं भविष्यसि ।
भस्मव्रतं च संप्राप्य पशुपाशविमोचनम् ॥५९॥
शांकरज्ञानसंपन्न[५१] ईश्वरे लयमाप्स्यसि[५२] ।
एवमुक्तः स विप्रेन्द्रो हृष्टसर्वतनूरुहः ॥६०॥
उपसद्य मुनीन्द्रं तं भस्मसंस्कारमाप्तवान् ।
तत्क्षणाच्चास्य योगोसौ प्रादुर्भूतो महामुनेः ॥६१॥
अभिवाद्य गुरुं व्यासो ब्रह्मसूनुं महौजसम् ।
शर्वायतनवीक्षार्थं विचचार महीतले ॥६२॥

वायुरुवाच[५३]

एवं सनत्कुमारस्तु पृष्टो व्यासेन धीमता ।
मुनीन्द्रः कथयामास पुराणं स्कन्दसंभवम् ॥६३॥
सर्वागमसमायुक्तं मन्वन्तरजगत्स्थितिम् ।
शिवयोगोद्भवं ध्यानं सर्वज्ञानार्णवं महत् ॥६४॥
तस्माद्यूयमपि ज्ञात्वा[५४] व्रतं पाशुपतं द्विजाः ।
अभ्यस्य शांकरं[५५] योगमीश्वरे लयमाप्नुत ॥६५॥

---

४६ योगात् मां - ख. । ४७ ब्रह्माण्डे भवकारणे - ख. । ४८ पुराणा (ण) ञ्च - ख. । ४९ ...मिमं - ख. । ५० लोकस्थितिकरं - ख. । ५१ शङ्करज्ञासंपन्न - ख. । ५२ लयमेष्यसि (?) । ५३ सूत उवाच (?) । ५४ प्राप्य - ख. । ५५ शङ्करं - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

इममागममन्विष्य व्यासोसौ मुनिपुङ्गवः ।
वेदार्थस्मृतिसंबद्धा[५६] विद्याश्चके महामुनिः ॥६६॥
अतो विनिर्गता धर्मा योगविद्यास्तथैव च ।
पुराणं प्रथमं प्राहुराद्यं नन्दीश्वरो[५७] द्विजाः (?)॥६७॥
- - - - - - ख्यातो य इमं वेत्ति तत्त्वतः ।
त्रिवर्गः प्राप्यते तेन मुक्तिरेतेन जायते ॥६८॥
आयुः प्रबर्द्ध तेनेन सर्वमेतेन लभ्यते ।
कृत्स्नस्य जगतो विप्रा आदिकर्ता यथा हरः ॥६९॥
तथा सर्वपुराणानां पुराणोयं परः स्मृतः[५८] ।
अधीतो यैरयं[५९] विप्रैस्तत्प - - - - - - ॥७०॥
- - - - - - - - - - - - - - - - - - ।
- - - - - - (ष्य)सायुज्यं शृणुयाद्विभोः ॥७१॥
सेवनाद्योगसंसिद्धि मोक्षं च परमं लभेत् ।
आद्यं पुण्यमुमापते[६०]र्द्विजवृषाः स्तोत्रानुवादं परं
देव्याश्चापि महाप्रभावकथनं सर्वागमैरंन्वितम् ।
स्कन्दस्योद्भवविक्रमै[६१] - - - - - - - - -
- - - - - - - - - - - - - - - प्नुयुः ॥७२॥
नागेन्द्रै रसुरेन्द्रयक्षविबुधैः सिद्धै र्द्विजेन्द्रै रपि
शम्भार्वापितसर्वभावहृदयैर्यैरयं[६२] सेवितः[६३] ।
सर्वे ते ज्वलदर्कवह्निवपुषस्त्र्यक्षाः शशाङ्कत्विषः
देवास्यानुचरा बभुर्गणवरा - - - - - - - ॥७३॥

---

५६ वेदार्थस्मृतिसम्बन्धा - ख. । ५७ नन्दीश्वरं (?) । ५८ पुराणमिदमुत्तमम् (?) । ५९ ... रियं - ख., ...रिदं (?) । ६० पुराण्य... - ख. । ६१... विक्रमे - ख । ६२... रिदं (?) । ६३ सेवितं (?) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

- - - - - - - - - - - - - - - -

- - - - - - - - - देवदेवस्य भक्ताः ।
तत इह परमं तं प्राप्य योगं मुनिन्द्राः
पुरमजरमनन्तं प्राप्स्यथेशाधिवासम्[६४] ।।७४।।

⊙ इति स्कन्दपुराणे त्र्यशीत्यधिकशततमोध्यायः ⊙

आर्षं[६५] स्कन्दपुराणं सयोगविधि समाप्तम्[६६]

- - - - - - - - - - - - - - - - -

- - - - - - - - - - - - - - - - -

आलब्ध (सं २३४) चैत्रशुक्लद्वादश्यां समाप्तम्[१] ।
सर्वसत्वकैवल्यार्थेन स्कन्दपुराणशास्त्रं लिखितमिति ।।१।।

।। शुभम् ।।

(२०४३ मार्गः)

६४ ...षाधिवासम् - ख. । ६५ आर्ष्यं(र्षं?) - ख. । ६६ समाप्तः - ख. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

परिशिष्टम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

परिशिष्टगतविषयाणाम्
सूची

विषयाः	पृष्ठानि
१ स्कन्दपुराणस्य प्रस्तुते खण्डे समागताः कतिपये शब्दाः	१
२ स्थानविशेषाः (लोका देशाः पुराणि)	७९
३ स्थानविशेषेषु प्रतिष्ठितानि शिवलिङ्गानि	८४
४ पुण्यक्षेत्राणि	८७
५ नेपालविषयान्तर्वर्तिकतिपयपुण्यस्थलानि	९१
६ पर्वताः	९२
७ नदीजलाशयाः	९४
८ जलजन्तवः	९५
९ क्षुद्रजन्तवः	९६
१० कीटपतङ्गादयः	९६
११ पशवः	९७
१२ पक्षिणः	९९
१३ पुष्पौषधिलतावृक्षवनस्पतयः	१०१
१४ सिद्धा ऋषयो विप्रवर्याश्च	१०४
१५ षट्कुलीयाः	१०७
